SB. 2r
[behind
#88]

THE
OSLER LIBRARY
McGILL UNIVERSITY
MONTREAL
Acc. 9827

9827

Pady E 02

From Dr Bremer
Mar. 1943.

vol. 1: [4], 378 pp.
2: [4], 562 pp.

# THE SUŚRUTA, OR SYSTEM OF MEDICINE,

TAUGHT

BY DHANWANTARI,

AND COMPOSED

BY HIS DISCIPLE SUŚRUTA.

---

VOL. I.

CONTAINING

THE THREE DIVISIONS

CALLED

SU'TRA, NIDA'NA, AND SHA'RI'RA.

---

EDITED BY SRI' MADHUSU'DANA GUPTA,

TEACHER OF MEDICINE IN THE SANSCRIT COLLEG

AND

PRINTED BY ORDER OF THE EDUCATION COMMITTEE

AT

THE EDUCATION PRESS.

---

ENGLISH ERA 1835.

ŚAKA 1757.

# सुश्रुतः।

॥ आयुर्व्वेदः ॥

॥ भगवता धन्वन्तरिणोपदिष्टः ॥

॥ सुश्रुतनामधेयेन तच्छिष्येण विरचितः ॥

॥ अस्य॥

॥ सूत्रनिदानशारीरस्थानत्रयकल्पितः ॥

॥ प्रथमभागः ॥

श्रीश्रीयुक्तसाधारणविद्याध्यक्षसमाजाधिपतीनामाज्ञया राजकीयसंस्कृत विद्यामन्दिरस्यायुर्व्वेदशास्त्राध्यापकेन श्रीमधुसूदनगुप्तेन संशोधितः।

कलिकाताराजधान्यां इडुकेशनाख्ययन्त्रालये
मुद्रितोऽभूत्॥
१७५७ शकाब्दे

ई० १८३५

## ॥ सुश्रुतः ॥

### ॥ सूत्रस्थानं ॥

॥ प्रथमाध्यायः ॥

नमो ब्रह्मप्रजापत्यश्विबलभिद्धन्वन्तरिसुश्रुतप्रभृतिभ्यः॥

अथातो वेदोत्पत्तिं नामाध्यायं व्याख्यास्यामः॥ यथोवाच भगवान् धन्वन्तरिः सुश्रुताय। अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतयऊचुः। भगवन् शारीरमानसागन्तुस्वाभाविकै र्व्याधिभिर्व्विविधवेदनाभिघातोपद्रुतान्सनाथानप्यनाथवद्विचेष्टमानान् विक्रोशतश्च मानवानभिसमीक्ष्य मनसि नः पीडा भवति तेषां सुखैषिणां रोगोपशमार्थमात्मनःप्राणयात्रार्थञ्च प्रजाहितहेतोरायुर्व्वेदं श्रोतुमिच्छाम इहोपदिश्यमानं। अत्रायत्तमैहिकमामुष्मिकञ्च श्रेयः। तद्भगवन्तमुपपन्नाः स्मः शिष्यत्वेनेति। तानुवाच भगवान् स्वागतं वः। सर्व्व एवामीमांस्या अध्याप्याश्च भवन्तो वत्साः। इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः। ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान्॥



9827

तद्यथा ॥ शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्य मगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति ॥

अथास्य प्रत्यङ्गलक्षणसमासः ॥

तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थि बालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधान व्रणविनिश्चयार्थञ्च ॥

शालाक्यंनाम ऊर्द्ध्वजत्रुगतानां रोगाणां श्रवणनयनवदनघ्राणा दिसंश्रितानां व्याधीनामुपशमनार्थं ॥

कायचिकित्सा नाम सर्व्वाङ्गसंसृतानां व्याधीनां ज्वराती सारक्तपित्तशोषोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थं ॥

भूतविद्या नाम देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाचनागग्रहा द्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थं ॥

कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थं ॥

अगदतन्त्रं नाम सर्पकीटलूतावृश्चिकमूषिकादिदष्टविषव्यञ्ज नार्थं विविधविषसंयोगविषोपहतोपशमनार्थं ॥

रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगापहरण समर्थञ्च ॥

वाजीकरणतन्त्रं नाम अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायन प्रसादोपचयजननर्निमित्तं प्रहर्षजननार्थञ्च ॥ एवमयमायुर्वेदो ऽष्टाङ्ग उपदिश्यते ॥

अत्र कस्मै किमुच्यतामिति। त ऊचुः। अस्माकं सर्व्वेषामेव शल्यज्ञानंमूलं कृत्वोपदिशतु भगवानिति। स उवाचैवमस्त्विति। त ऊचुर्भूयोऽपि भगवन्तं। अस्माकमेकमतीनां मतमभिसमीक्ष्य सुश्रुतो भगवन्तं प्रक्ष्यति। अस्मै चोपदिश्यमानं वयमप्युपधारयिष्यामः॥ स होवाचैवमस्त्विति। वत्स सुश्रुत इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन्विद्यतेऽनेन वा आयुर्व्विन्दतीत्यायुर्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय। एतद्ध्यङ्गं प्रथमं प्रागभिघातव्रणसंरोहाद्यज्ञशिरःसन्धानाच्च। श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरःसन्धातव्यं। तावूचतुरेवमस्त्विति। अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरःसंहितमिति। अष्टास्वपि चायुर्व्वेदतन्त्रेष्वेतदेवाधिकमभिमतमाशुक्रियाकरणाद्यन्त्रशस्त्रक्षाराग्निप्रणिधानात्सर्व्वतन्त्रसामान्याच्च। तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति॥

ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः॥

भवति चात्र।

अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणां।
शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूय इहोपदेष्टुं॥

अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते। तस्मिन् क्रिया सोऽधिष्ठानं कस्माल्लोकस्य द्वैविध्यात्। लोको हि द्विविधः स्थावरो जङ्गमश्च। द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात्। पञ्चात्मको वा। तत्र चतुर्विधो भूतग्रामः। स्वेदजाण्डजोद्भिज्जजरायुजसंज्ञः। तत्र पुरुषः प्रधानं तस्योपकरणमन्यत्। तस्मात् पुरुषोऽधिष्ठानं। तद्दुःखसंयोगा व्याधय इत्युच्यन्ते। ते चतुर्विधा आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति। तेषामागन्तवोऽभिघातनिमित्ताः। शारीरास्त्वन्नपानमूला वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः। मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतय इच्छाद्वेषभेदैर्भवन्ति। स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः॥ त एते मनःशरीराधिष्ठानाः। तेषां संशोधनसंशमनाहाराचाराः सम्यक्प्रयुक्ता निग्रहहेतवः॥ प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च। स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः। द्रव्याणि पुनरोषधयस्ताः द्विविधाः स्थावरा जङ्गमाश्च। तासां स्थावराश्चतुर्विधाः। वनस्पतयो वृक्षा वीरुध ओषधय इति। तास्वपुष्पाः फलवन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः। प्रतानवत्यः स्तम्बिन्यश्च वीरुधः। फलपाकनिष्ठा ओषधय इति। जङ्गमास्त्वपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्पसरीसृपप्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः॥ तत्र स्थावरेभ्यस्त्वक्पत्रपुष्पफल

मूलकन्दनिर्य्यासस्वरसादयः प्रयोजनवन्तो जङ्गमेभ्यश्चर्म्मनख रोम रुधिरादयः ॥ पार्थिवाः सुवर्णरजतमणिमुक्तामनःशिलामृत्कपालादयः। कालकृतास्तु प्रवातनिवातातपच्छायाज्योत्स्नातमःशीतोष्णवर्षाहोरात्रपक्षमासर्त्त्वयनादयः सम्वत्सरविशेषाः । त एते स्वभावत एव दोषाणां सञ्चय प्रकोप प्रशम प्रतीकार हेतवः प्रयोजनवन्तश्च ॥

भवन्तिचात्र ॥ शारीराणांविकाराणामेष वर्गश्चतुर्व्विधः।
चये कोपे शमेचैव हेतुरुक्तश्चिकित्सकैः ॥
आगन्तवश्च ये रोगास्ते द्विधा निपतन्ति हि।
मनस्यन्ये शरीरेऽन्ये तेषान्तु द्विविधा क्रिया ॥
शरीरपतितानान्तु शारीरवदुपक्रमः ।
मानसानान्तु शब्दादि रिष्टो वर्गः सुखावहः ॥

एवमेतत्पुरुषो व्याधिरौषधं क्रियाकाल इतिचतुष्टयं समासेन व्याख्यातं॥ तत्र पुरुषग्रहणात्तत्सम्भवद्रव्यसमूहोभूतादिरुक्तस्तदङ्गप्रत्यङ्गविकल्पाश्च त्वङ्मांसशिरास्नायुप्रभृतयः । व्याधिग्रहणाद्वातपित्तकफ शोणित सन्निपात वैषम्यनिमित्ताः सर्व्व एवव्याधयो व्याख्याताः । औषधिग्रहणाद्द्रव्यगुणरसवीर्य्यविपाकप्रभावाणामादेशः। क्रियाग्रहणाच्छेद्यादीनि स्नेहादीनि च कर्म्माणिव्याख्यातानि। कालग्रहणात्सर्व्वक्रियाकालानामादेशः ॥

भवतिचात्र। बीजं चिकित्सितस्यैतत्समासेन प्रकीर्त्तितं।
सविंशमध्यायशत मस्य व्याख्या भविष्यति ॥

तच्च सविंशमध्यायशतं पञ्चसु स्थानेषु। तत्र सूत्रस्थाननिदान शारीरचिकित्सितकल्पेष्वर्थवशात्संविभज्योत्तरे तन्त्रे शेषानर्थान् व्याख्यास्यामः॥

भवतिचात्र।

स्वयम्भुवा प्रोक्तमिदं सनातनं पठेद्धि यः काशिपतिप्रकाशितं ।
सपुण्यकर्म्मा भुवि पूजितो नृपैरसुक्षये शक्रसलोकतां व्रजेत् ॥

---

## ॥ द्वितीयाध्यायः ॥

अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः॥ ब्राह्मण क्षत्रियवैश्यानामन्यतममन्वयवयःशीलशौर्य्यशौचाचारविनय शक्ति बलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्रा क्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं नोपनयेत् ॥

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रश स्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिल मुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पै र्लाजभक्तै रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्रह्माणं स्थाप यित्वाग्नि मुपसमाधाय खदिरपलाशदेवदारुबिल्वानां समिद्भिश्च तुर्णां वा क्षीरवृक्षाणां न्यग्रोधोडुम्बराश्वत्थमधूकानां दधिमधुघृता क्ताभि र्दार्वीहोमिकेन विधिना स्रुवेणाज्याहुतीर्ज्जुहुयात्। सप्रण

वाभि र्महाव्याहृतिभिस्ततः प्रतिदैवत मृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्॥ ब्राह्मणस्त्रयाणां वर्णाना मुपनयनं कर्त्तु मर्हति राजन्यो द्वयस्य वैश्यो वैश्यस्यैवेति । शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जमनुपनीतमध्यापयेदित्येके ॥ ततोऽग्निं त्रिःपरिणीयाग्नि साक्षिकं शिष्यं ब्रूयात्। कामक्रोधलोभमोहमानाहङ्कारेर्ष्यापारुष्यपैशुन्यानृतालस्यायशस्यानि हित्वा नीचनखरोम्णा शुचिनाकषायवाससा सत्यव्रत ब्रह्मचर्य्याभिवादनतत्परेणाऽवश्यं भवितव्यं मदनुमतस्थानगमनशयनासनभोजनाध्ययनपरेण भूत्वा मत्प्रियहितेषु वर्त्तितव्य मतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाश्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग्भवेय मफलविद्यश्च। द्विजगुरुदरिद्रमित्रप्रव्रजितोपनतसाध्वनाथाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्य मेवं साधु भवति॥ व्याध शाकुनिक पतित पापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशोधर्म्मार्थकामांश्च प्राप्नोति॥

भवतश्चात्र॥

कृष्णेऽष्टमी तन्निधनेऽहनी द्वे कृष्णेतरेऽप्येव मर्हर्दिसन्ध्यं।
अकालविद्युत्स्तनयित्नुघोषे स्वतन्त्र राष्ट्रक्षितिपव्यथासु॥
श्मशानयानायतनाहवेषु महोत्सवौत्पातिकदर्शनेषु ।
नाध्येय मन्येषुच येषु विप्रा नाधीयते नाशुचिनाच नित्यं॥

---

॥ तृतीयाध्यायः ॥

अथातोऽध्ययनसंप्रदानीयमध्यायं व्याख्यास्यामः॥ प्रागभिहितं सविंशमध्यायशतं पञ्चसु स्थानेषु। तत्र सूत्रस्थानमध्यायाःषट्चत्वारिंशत्। षोडश निदानानि। दश शारीराणि। चत्वारिंशच्चिकित्सितानि। अष्टौ कल्पाः। तदुत्तरं षट्षष्टिः॥

वेदोत्पत्तिः शिष्यनयस्तथाध्ययनदानिकः।
प्रभाषणाग्रहरणाहतुचर्य्याय यान्त्रिकः॥
शस्त्रावचारणं योग्या विशिखा चारकल्पनं।
अग्निकर्म्म जलौकाख्यावध्यायौ रक्तवर्णनं॥
दोषधातुमलाद्यानां विज्ञानाध्याय एव च।
कर्णव्यधामपक्वैषावालेपो व्रणुपासनं॥
हिताहितो व्रणप्रश्नो व्रणास्रावश्च यः पृथक्।
कृत्याकृत्यविधि र्व्याधिसमुद्देशीय एव च॥
विनिश्चयः शस्त्रविधौ प्रनष्टज्ञानिकस्तथा।
शल्योद्धृतिर्व्रणज्ञानं दूतस्वप्ननिदर्शनं॥
पञ्चेन्द्रियं तथाछाया स्वभावादेकृतं तथा।
वारणो युक्तसेनीय आतुरक्रम मिश्रकौ॥
भूमिभागो द्रव्यगणः संशुद्धौ शमने च यः।
द्रव्यादीनाञ्च विज्ञानं विशेषो द्रव्यगोऽपरः॥
रसज्ञानं वमनार्थमध्यायो रेचनाय च।
द्रवद्रव्यविधि स्तददन्नपानविधिस्तथा॥

सूचनात्सूत्रणाच्चैव सन्धानाच्चार्थसन्ततेः ।
षट्चत्वारिंशदध्यायं सूत्रस्थानं प्रचक्षते ॥ १ ॥
वातव्याधिकमर्शांसि साश्मरिश्च भगन्दरः ।
कुष्ठमेहोदरा मूढविद्रध्यः परिसर्प्पणम् ॥
ग्रन्थि वृद्धि भग्नशूक क्षुद्राश्च मुखरोगिकं ।
हेतुलक्षणनिर्द्देशान्निदानानीति षोडश ॥ २ ॥
भूतचिन्ता रजःशुद्धि गर्भावक्रान्तिरेवच ।
व्याकरणञ्च गर्भस्य शरीरस्यच यत् स्मृतं ॥
प्रत्येकं मर्म्मनिर्द्देशः सिरावर्णनमेवच ।
सिराव्यधो धमनीनां गर्भिण्या व्याकृतिस्तथा ॥
निर्द्दिष्टानि दशैतानि शारीराणि महर्षिणा ।
विज्ञानार्थं शरीरस्य भिषजां योगिनामपि ॥ ३ ॥
द्विव्रणीयो व्रणः सद्यो भग्नानां वातरोगिकं ।
महावातिकमर्शांसि साश्मरिश्च भगन्दरः ॥
कुष्टानां महताञ्चापि मैहिकं पैडिकं तथा ।
मधुमेहचिकित्साच तथाचोदरिणामपि ॥
मूढगर्भचिकित्साच विद्रधीनां विसर्पिणां ।
ग्रन्थिवृद्ध्युपदंशानान्तथाच क्षुद्ररोगिकं ॥
शूकदोषचिकित्साच तथाच मुखरोगिणां ।
शोफस्थानागतानाञ्च निषेधो मिश्रकन्तथा ॥
वाजीकरञ्च यत्क्षीणे सर्व्वाबाधशमोपिच ।

मेधायुष्करणञ्चापि स्वभावव्याधिवारणं ॥
निवृत्तसन्तापकरं कीर्त्तितञ्च रसायनं ।
स्नेहोपयौगिकः स्वेदो वमने सविरेचने ॥
तयोर्व्यापच्चिकित्साच नेत्रवस्तिविभागिकः ।
नेत्रवस्तिविपत्सिद्धिस्तथा चोत्तरवस्तिकः ॥
निरूहक्रमसंज्ञश्च तथैवातुरसंज्ञकः ।
धूमनस्यविधिश्चाग्व्याश्चत्वारिंशदिति स्मृताः ॥
प्रायश्चित्तं प्रशमनं चिकित्सा शान्तिकर्म्मच ।
पर्य्यायास्तस्य निर्द्दिष्टाश्चिकित्सास्थानमुच्यते ॥ ४॥
अन्नस्य रक्षा विज्ञानं स्थावरस्येतरस्यच ।
सर्पदष्टविषज्ञानं तस्यैवच चिकित्सितं ॥
दुन्दुभेर्मूषिकाणाञ्च कीटानां कल्प एवच ।
अष्टौ कल्पाः समाख्याता विषभेषजकल्पनात् ॥ ५ ॥
अध्यायानां शतं विंशमेवमेतदुदीरितं ।
अतःपरं स्वनाम्नैव तन्त्रमुत्तरमुच्यते ॥
अधिकृत्य कृतं यस्मात्तन्त्रमेतदुपद्रवान् ।
औपद्रविक इत्येष तस्माच्छ्वलान्निरुच्यते ॥
सन्धौ वर्त्मनि शुक्लेच कृष्णे सर्व्वत्र दृष्टिषु ।
संविज्ञानार्थमध्याया गदानां तु प्रति प्रति ॥
चिकित्साप्रविभागीयो वाताभिष्यन्दवारणः ।
पैत्तस्य श्लैष्मिकस्यापि रौधिरस्य तथैवच ॥

लेख्यभेद्यनिषेधौच छेद्यानां वर्त्मदृष्टिषु ।
क्रियाकल्पोऽभिघातश्च कर्णोत्थास्तच्चिकित्सितं ॥
घ्राणोत्थानाञ्च विज्ञानं तद्वद्प्रतिषेधनं ।
प्रतिश्यायनिषेधश्च शिरोगदविवेचनं ।
चिकित्सा तद्गदानाञ्च शालाक्यं तन्त्रमुच्यते ॥
नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनं ।
अपस्मारशकुन्योश्च रेवत्याश्च पुनः पृथक् ॥
पूतनायास्तथान्धाया मण्डिका शीतपूतना ।
नैगमेषचिकित्सा च ग्रहोत्पत्तिः सयोनिजा ।
कौमारतन्त्रमित्येतच्छारीरेषुच कीर्त्तितं ॥
ज्वरातिसारशोषाणां गुल्महृद्रोगिणामपि ।
पाण्डूनां रक्तपित्तस्य मूर्छायाः पानजाश्च ये ॥
तृष्णायाश्छर्दिहिक्कानां निषेधः श्वासकासयोः ।
स्वरभेदचिकित्साच कृम्युदावर्त्तिनोः पृथक् ॥
विसूचिकारोचकयोर्मूत्राघातविकृच्छ्रयोः ।
इति कायचिकित्सायाः शेषमत्र प्रकीर्त्तितं ॥
अमानुषनिषेधश्च तथापस्मारिकोऽपरः ।
उन्मादप्रतिषेधश्च भूतविद्या निरुच्यते ॥
रसभेदाः स्वस्थवृत्ति र्युक्तयस्तान्त्रिकाश्च याः ।
दोषभेदा इति ज्ञेया अध्यायास्तन्त्रभूषणाः ॥
श्रेष्ठत्वादुत्तरं ह्येतत्तन्त्रमाहुर्महर्षयः ।

वक्ष्यर्थसंग्रहाच्छ्रेष्ठमुत्तरञ्चापि पश्चिमं ॥
शालाक्यतन्त्रं कौमारं चिकित्सा कायिकीच या ।
भूतविद्येति चत्वारि तन्त्रेत्वुत्तरसंज्ञिते ॥
वाजीकरश्चिकित्सासु रसायनविधिस्तथा ।
विषतन्त्रं पुनः कल्पाः शल्यज्ञानं समन्ततः ॥
इत्यष्टाङ्गमिदं तन्त्रमादिदेवप्रकाशितं ।
विधिनाधीत्य युञ्जाना भवन्ति प्राणदा भुवि ॥

एतदवश्यमध्येयमधीत्यच कर्म्माप्यवश्यमुपासितव्यमुभयज्ञो हि भिषग्राजार्हो भवति ॥

भवन्ति चात्र ॥ यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरम्प्राप्य प्राप्य भीरुरिवाहवं ॥
यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधं चार्हति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ ॥
ओषध्योऽमृतकल्पास्तु शस्त्राशनिविषोपमाः ।
भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्जयेत् ॥
छेद्यादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्म निर्वोढुं द्विचक्रः स्यन्दनो यथा ॥

अथ वत्स तदेतदध्येयं यथा तथोपधारय मया प्रोच्यमानं। अथ शुचये कृतोत्तरासङ्गायाव्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा तेच पदपाद श्लोका भूयः क्रमेणानुसन्धेया एवमेकैकशोघटयेदात्मनाचानुप ठेत्। अद्रुतमविलम्बित मविशङ्कितमननुनासिकं व्यक्ताक्षरमपी डितवर्णमक्षिभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेन्नचान्तरेण कश्चिद्व्रजेत्तयोरधीयानयोः ॥

भवतश्चात्र ॥ शुचि र्गुरुपरो दक्षस्तन्द्रानिद्राविवर्ज्जितः।

पठेदेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात्॥

वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्म्मनैपुणे।

तदभ्यासे च सिद्धौ च यतेताध्यायनान्तगः ॥

---

## ॥ चतुर्थाध्यायः ॥

अथातः प्रभाषणीयमध्यायं व्याख्यास्यामः ॥

अधिगतमप्यध्ययनमप्रभाषितमर्थतः।

खरस्य चन्दनभार इव केवलं परिश्रमकरं भवति॥

भवति चात्र॥

यथा खरश्चन्दनभारवाही भारस्य वेत्ता नतु चन्दनस्य।

एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढाः खरवद्वहन्ति॥

तस्मात्सर्विंशमध्यायशतमनुपदपादश्लोकार्द्धश्लोकमनुवर्णयितव्य मनुश्रोतव्यञ्च॥ कस्मात्सूक्ष्मा हि द्रव्यरसगुणवीर्य्यविपाकदोषधातु

मलाशयमर्म्मसिरास्नायुसन्ध्यस्थि गर्भसम्भवद्रव्यसमूहविभागास्तथा प्रनष्टशल्योद्धरणव्रणविनिश्चयभग्नविकल्पाः साध्ययाप्यप्रत्याख्येयता च विकाराणामेवमादयश्चान्ये विशेषाः सहस्रशो ये विचिन्त्यमाना विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः। तस्मादवश्यमनुपदपादश्लोकार्द्धश्लोकमनुवर्णयितव्यमनुश्रोतव्यञ्च॥ अन्यशास्त्रविषयोपपन्नानाञ्चार्थानामिहोपनिपतितानामर्थवशात्तेषां तद्विद्येभ्य एव व्याख्यानमनुश्रोतव्यं कस्मान्नह्येकस्मिन् शास्त्रे शक्यः सर्व्वशास्त्राणामवरोधः कर्त्तुं॥

भवन्ति चात्र॥ एकं शास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयं।
तस्माद्बहुश्रुतः शास्त्रं विजानीयाच्चिकित्सकः॥
शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत्।
यः कर्म्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः॥
औपधेनवमौरभ्रं सौश्रुतं पौष्कलावतं।
शेषाणां शल्यतन्त्राणां मूलान्येतानि निर्द्दिशेत्॥

---

## ॥ पञ्चमाध्यायः॥

अथातोऽग्रोपहरणीयमध्यायं व्याख्यास्यामः॥ त्रिविधं कर्म्म। पूर्व्वकर्म्म प्रधानकर्म्म पश्चात्कर्म्मेति तद्व्याधिं प्रति प्रत्युपदेक्ष्यामः॥ अस्मिन् शास्त्रे शस्त्रकर्म्मप्राधान्याच्छस्त्रकर्म्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च॥ तच्च शस्त्रकर्म्माऽष्टविधं। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति॥

अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गजलौकालाबूजाम्बवोष्ठपिचुक्षौतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजनशीतोष्णोदककटाहादीनि परिकर्म्मिणश्च स्निग्धाः स्थिरा बलवन्तः ॥ ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्च्चयित्वा कृतवलिमङ्गलस्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मसिरास्नायुसन्ध्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमुक्तं॥ तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः॥

भवतश्चात्र॥ आयतश्च विशालश्च सुविभक्तो निराश्रयः।
प्राप्तकालकृतश्चापि व्रणः कर्म्मणि शस्यते॥
शौर्य्यमाशुक्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू।
असंमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते॥

एकेनवा व्रणेनाशुध्यमानेनान्तराबुद्ध्यावेक्ष्यापरान् व्रणान् कुर्य्यात्।

भवतिचात्र॥ यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च।
तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति॥

तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकक्षाकुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः।

चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत्।
अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान्॥

अन्यथा तु सिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दीप्रादुर्भावश्चेति। मूढगर्भोदरार्शो ऽश्मरीभगन्दरमुखरोगेष्वभुक्तवतः कर्म कुर्वीत। ततः शस्त्रमवचार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात्परिपीड्याङ्गुल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण स्रोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढामौषधयुक्तां वर्त्तिं प्रणिदध्यात्। ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां घनां कवलिकान्दत्वा वस्त्रपट्टेन बध्नीयाद्वेदनारक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रैर्रक्षां कुर्वीत। ततोगुग्गुल्वगुरुसर्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रव्यामिश्रैराज्ययुक्तैर्धूपैर्धूपयेत्। आज्यशेषेणचास्य प्राणान् समालभेत। उदकुम्भाच्चापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात्तद्वक्ष्यामः॥

कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्यच।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यतां॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान्सदा॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः॥
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः॥

अग्नीरक्षतु ते जिह्वां प्राणान् वायुस्तथैवच।
सोमो व्यानमपानं ते पर्जन्यः परिरक्षतु॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः।
बलमिन्द्रो बलपतिर्मनुर्मन्ये मतिं तथा॥
कामांस्ते पान्तु गन्धर्व्वाः सत्वमिन्द्रोऽभिरक्षतु।
प्रज्ञां ते वरुणो राजा समुद्रो नाभिमण्डलं॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा।
आकाशं खानि ते पातु देहं तव वसुन्धरा॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमं।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ॥
एता देहे विशेषेण तव नित्या हि देवताः।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वतां।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः।
पितामहकृता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः।
इति स्वाहा॥ एतैर्व्वेदात्मकैर्मन्त्रैः कृत्याव्याधिविनाशनैः।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि॥

ततः कृतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत्। ततस्तृतीयेऽहनि विमुच्यैवं बध्नीयादस्वपट्टेन नचैनं त्वरमाणोऽपरेद्युर्मोचयेत्। द्वितीयदिवसे परिमोक्षणाद्विग्रथितो व्रणश्चिरादुपसंरोहति तीव्ररुजश्च भवति। अत ऊर्द्ध्वं दोषकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान्विदध्यात्। नचैनं त्वरमाणः सान्तर्दोषं रोपयेत् स ह्यल्पेनाप्यपचारेणाभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति॥

भवन्तिचात्र। तस्मादन्तर्बहिश्चैव सुशुद्धं रोपयेद्व्रणं।

रूढेप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत्।

हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात्॥

हेमन्ते शिशिरेचैव वसन्तेचापि मोचयेत्।

त्र्यहाद्द्व्यहाच्छरद्ग्रीष्मवर्षास्वपिच बुद्धिमान्॥

अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक्।

प्रदीप्तागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियां॥

या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रदुनोति जन्तोः।

घृतेन सा शान्तिमुपैति सिक्ता कोष्णेण यष्टीमधुकान्वितेन॥

---

॥ षष्ठाध्यायः॥

अथात ऋतुचर्य्याध्यायं व्याख्यास्यामः॥ कालोहि नाम भगवान् स्वयम्भूरनादिमध्यनिधनोऽत्र रसव्यापत्संपत्ती जीवितमरणे च मनुष्याणामायत्ते स सूक्ष्मामपि कलां न लीयत इति कालः सङ्कल

यति कालयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवाना दित्यो गतिविशेषेणाक्षिनिमेषकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासर्त्त्वयनसंवत्सरयुगप्रविभागं करोति॥ तत्र लघ्वक्षरोच्चारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा॥ त्रिंशत्काष्ठाः कलाः। विंशति कलो मुहूर्त्तः कलादशभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रं। पञ्चदशाहोरात्राणि पक्षः। स च द्विविधः शुक्लः कृष्णश्च तौ मासः॥

तत्र माघादयो द्वादश मासा द्विमासिकमृतुं कृत्वा षडृतवो भवन्ति। ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः। मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षा। इषोर्जौ शरत्। सहःसहस्यौ हेमन्त इति॥ त एते शीतोष्णवर्षलक्षणा श्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवण मधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते। उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायतेऽर्क स्तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपहीयते॥

भवति चात्र। शीतांशुः क्लेदयत्युर्वीं विवस्वान् शोषयत्यपि।
तावुभावपि संश्रित्य वायुः पालयति प्रजाः॥

अथ खल्वयने द्वे युगपत्संवत्सरो भवति। ते तु पञ्च युगमिति संज्ञां लभन्ते। स एष निमेषादियुगपर्य्यन्तः कालश्चक्रवत्परिवर्त्तमानः कालचक्रमुच्यत इत्येके॥

इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षडृतवो भवन्ति दोषोपचयप्रकोपोपशमनिमित्तं । ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः । तद्यथा । भाद्रपदाश्वयुजौ वर्षाः । कार्त्तिकमार्गशीर्षौ शरत् । पौषमाघौ हेमन्तः । फाल्गुणचैत्रौ वसन्तः । वैशाखज्यैष्ठौ ग्रीष्मः । आषाढश्रावणौ प्रावृडिति । तत्र वर्षास्वोषधयस्तरुणोऽल्पवीर्य्या आपश्चाप्रसन्नाः क्षितिमलप्रायास्ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टब्धाग्नीनां विदह्यन्ते विदाहात् पित्तसञ्चयमापादयन्ति स सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति। ता एवौषधयः कालपरिणामात्परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति ।ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति । एवमेष दोषाणां सञ्चयप्रकोपहेतुरुक्तः॥

तत्र वर्षाहेमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्तप्रावृट्सु च प्रकुपितानां निर्हरणं कर्त्तव्यं। तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते श्लैष्मिकाणां निदाघे वातिकानां घनात्यये स्वभावत एव त एते सञ्चयप्रकोपोपशमा व्याख्याताः ॥

तत्र पूर्व्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्द्धरात्रे प्रत्यूषसि हैमन्तमुपलक्षयेत्। एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमै र्जानीयात् ॥

तत्राव्यापन्नेष्वृतुष्वव्यापन्ना ओषधयो भवन्त्यापश्च ता उपयुज्यमानाः प्राणायुर्ब्बलवीर्य्यौजस्कर्य्यो भवन्ति। तेषां व्यापदोऽदृष्टकारिताः। शीतोष्णवातवर्षाणि खलु विपरीतान्योषधीर्व्यापादयन्त्यपश्च तासामुपयोगाद्विविधरोगप्रादुर्भावो मरको वा भवेदिति। तत्राव्यापन्नानामोषधीनामपाञ्चोपयोगः कदाचिद्व्यापन्नेष्वृतुषु कृत्यापिशाचरक्षःक्रोधाधर्म्मैरुपध्वस्यन्ते जनपदाः। विषौषधीपुष्पगन्धेन वायुनोपनीतेनाक्रम्यते यो देशस्तत्र दोषप्रकृत्यविशेषेण कासश्वासवमथुप्रतिश्यायशिरोरुगज्वरैरुपतप्यन्ते ग्रहनक्षत्रचरितैर्व्वा गृहदारशयनासनयानवाहनमणिरत्नोपकरणगर्हितलक्षणनिमित्तप्रादुर्भावैर्व्वा। तत्र स्थानपरित्यागशान्तिकर्म्मप्रायश्चित्तमङ्गलजपहोमोपहारेज्याञ्जलिनमस्कारतपोनियमदयादानदीक्षाभ्युपगमदेवताब्राह्मणगुरुपरैर्भवितव्यमेवं साधु भवति।

ऋतूनामत ऊर्ध्वमव्यापन्नानां लक्षणान्युपदेक्ष्यामः ॥

वायुर्वात्युत्तरः शीतो रजोधूमाकुला दिशः।
छन्नस्तुषारैः सविता हिमानद्धा जलाशयाः ॥
दर्पिता ध्वाङ्क्षखड्गाह्वमहिषोरभ्रकुञ्जराः।
रोध्रप्रियङ्गुपुन्नागाः पुष्पिता हिमसाह्वये ॥ १ ॥
शिशिरे शीतमधिकं वातवृष्ट्याकुला दिशः।
शेषं हेमन्तवत्सर्वं विज्ञेयं लक्षणं बुधैः ॥ २ ॥
दिशो वसन्ते विमलाः काननैरुपशोभिताः।
किंशुकाम्भोजवकुलचूताशोकादिपुष्पितैः ॥
कोकिलाषट्पदगणैरुपगीता मनोहराः।
दक्षिणानिलसम्बीताः सुमुखाः पल्लवोज्ज्वलाः ॥ ३ ॥
ग्रीष्मे तीक्ष्णांशुरादित्यो मारुतो नैर्ऋतोऽसुखः।
भूस्तप्ता सरितस्तन्व्यो दिशः प्रज्वलिता इव ॥
भ्रान्तचक्राह्वयुगलाः पयःपानाकुला मृगाः।
ध्वस्तवीरुत्तृणलता विपर्णाङ्कितपादपाः ॥ ४ ॥
प्रावृष्यम्बरमानद्धं पश्चिमानिलकर्षितैः।
अम्बुदैर्विद्युदुद्योतप्रस्रुतैस्तुमुलस्वनैः ॥
कोमलश्यामशस्याढ्या शक्रगोपोज्ज्वला मही।
कदम्बनीपकुटजसर्ज्जकेतकिभूषिता ॥ ५ ॥
तत्र वर्षासु नद्यम्भःपूरोद्धृततटद्रुमाः।
वाप्यः प्रोत्फुल्लकुमुदनीलोत्पलविराजिताः ॥

भूरव्यक्तस्थलश्वभ्रा बहुशस्योपशोभिता।
नातिगर्जत्स्ववन्मेघनिरुद्धार्कग्रहं नभः॥ ६ ॥
बभ्रुकृष्णः शरद्यर्कः श्वेताभ्रविमलं नभः।
तथा सरांस्यम्बुरुहैर्भान्ति हंसांसघट्टितैः॥
पङ्कशुष्कद्रुमाकीर्णा निम्नोन्नतसमेषु भूः।
वाणसप्ताह्वबन्धूककाशासनविराजिता ॥ ७ ॥
स्वगुणैरतियुक्तेषु विपरीतेषु वा पुनः।
विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनां॥
हरेद्वसन्ते श्लेष्माणं पित्तं शरदि निर्हरेत्।
वर्षासु शमयेद्वायुं प्राग्विकारसमुच्छ्रयात्॥

---

॥ सप्तमाध्यायः ॥

अथातो यन्त्रविधिमध्यायं व्याख्यास्यामः॥ यन्त्रशतमेकोत्तरमत्र हस्तमेव प्रधानतमं यन्त्राणामवगच्छ। किं कारणं। यस्माद्धस्तादृते यन्त्राणामप्रवृत्तिरेव तदधीनत्वाद्यन्त्रकर्म्मणां। तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि॥ तानि षट् प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि। तालयन्त्राणि। नाडीयन्त्राणि। शलाकायन्त्राणि। उपयन्त्राणि चेति॥

तत्र चतुर्व्विंशतिः स्वस्तिकयन्त्राणि। द्वे सन्दंशयन्त्रे। द्वे एव तालयन्त्रे। विंशतिर्नाड्यः। अष्टाविंशतिः शलाकाः। पञ्चविंशति रुपयन्त्राणि॥ तानिप्रायशो लौहानि भवन्ति तत्प्रतिप्रतिरूप

काणि वा तदलाभे। तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तस्मात्तत्सारूप्यादागमादुपदेशादन्ययन्त्रदर्शनाद्युक्तितश्च कारयेत् ॥

समाहितानि यन्त्राणि खरश्लक्ष्णमुखानि च।
सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत् ॥

तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्जारशृगालमृगैर्वारुककाककङ्ककुररचासभासशशघात्युलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जन नन्दिमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवाराण्यस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते ॥

सनिग्रहोऽनिग्रहश्च सन्दंशौ षोडशाङ्गुलौ भवतस्त्वग्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते ॥

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालद्वितालके कर्णनासानाडीशल्यानामाहरणार्थं ॥

नाडीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थञ्चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च ॥

भगन्दरार्शोऽर्बुदव्रणवस्त्युत्तरवस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकशसन्निरुद्धगुदयन्त्राण्यलावूशृङ्गयन्त्राणि चोपरिष्टाद्वक्ष्यामः ॥

शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथ

योगपरिणाहदीर्घाणि च तेषां गण्डूपदशरपुङ्खसर्प्पफणबडिशमुखे द्वे द्वे एषणव्यूहनचालनाहरणार्थमुपदिश्येते। मसूरदलमात्रमुखे द्वे किञ्चिदानताग्रे स्रोतोगतशल्योद्धरणार्थं। षट्कार्पासकृतोष्णीषाणि प्रमार्जनक्रियासु। त्रीणि दर्व्वाकृतीनि खल्लमुखानि क्षारौषधप्रणिधानार्थं। त्रीण्यन्यानि जाम्बववदनानि त्रीण्यङ्कुशवदनानि षडवाग्निकर्म्मस्वभिप्रेतानि। नासार्बुदहरणार्थमेकं कोलास्थिदलमात्रमुखं खल्लतोद्वृत्तौष्ठं। अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रं। मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति॥

उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्म्मान्तवल्कलतावस्त्राष्ठीलाश्ममुद्गरपाणिपादतलाङ्गुलिजिह्वादन्तनखमुखबालाश्वकटकशाखाष्ठीवनप्रवाहणहर्षायस्कान्तमयानि क्षाराग्निभेषजानि चेति॥

एतानि देहे सर्व्वस्मिन् देहस्यावयवे तथा।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत्॥

यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धनव्यूहनवर्त्तनचालनविवर्त्तनविवरणपीडनमार्गविशोधनविकर्षणाहरणाञ्छनोन्नमनविनमनभञ्जनोन्मथनाचूषणैषणदारणर्जूकरणप्रक्षालनप्रधमनप्रमार्जनानि चतुर्व्विंशतिः॥

स्वबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान्।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः॥

तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि विषमग्राहि वक्रं

शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमिति द्वादश यन्त्र दोषाः ॥

एतैर्दोषैर्विनिर्मुक्तं यन्त्रमष्टादशाङ्गुलं ।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्मसु योजयेत् ॥
दृश्यं सिंहमुखाद्यैस्तु गूढं कङ्कमुखादिभिः ।
निर्हरेत्तु शनैः शल्यं शस्त्रयुक्तिव्यपेक्षया ॥

विवर्त्तते साध्ववगाहते च शल्यं निगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं स्थानेषु सर्व्वेष्वविकारि चैव ॥

---

## ॥ अष्टमाध्यायः ॥

अथातःशस्त्रावचारणीयमध्यायं व्याख्यास्यामः ॥

विंशतिः शस्त्राणि। तद्यथा। मण्डलाग्रकरपत्रवृद्धिपत्रनख शस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्त र्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्रकवडिशदन्तशङ्क्वेष ण्य इति। तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखनेच। वृद्धि पत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च। सूची कुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे। कुठा रिकाव्रीहिमुखारावेतसपत्रकाणि व्यधने सूचीच। वडिशो दन्त शङ्कुश्चाहरणे। एषण्येषणे आनुलोम्ये च। सूच्यः सेवने। इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः। तेषामथ यथायोगग्रहण समासोपायः कर्मसु वक्ष्यते । तत्र वृद्धिपत्रं वृन्तफलसाधारणे

भागे गृह्णीयाच्छेदनान्येवं सर्वाणि। वृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्य्यं वृन्ताग्रे विस्रावणानि। विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्त्राणाञ्च त्रिकूर्चकेन विस्रावयेत्। तलप्रच्छादितवृन्तमङ्गुष्ठप्रदेशिनीभ्यां व्रीहिमुखं। कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्याङ्गुष्ठविष्टब्धयाभिहन्यात्। आराकरपत्त्रैषण्यो मूले। शेषाणि तु यथायोगं गृह्णीयात्। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रैषण्यावष्टाङ्गुले। सूच्यो वक्ष्यन्ते।

वडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्त्रमुखे। एषणी गण्डूपदाकारमुखी।

प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा मुद्रिका। दशाङ्गुला शरारीमुखी साकर्त्तरीति कथ्यते। शेषाणि तु षडङ्गुलानि।

तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राण्यकरालानि चेति शस्त्रसम्पत्।

तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतान्यत्र करपत्त्रात्तद्धि खरधारमस्थिच्छेदनार्थं।

तत्र धारा भेदनानां मासूरी। लेखनानामर्द्धमासूरी। व्यधनानां विस्रावणानाञ्च कैशिकी। छेदनानामर्द्धकैशिकीति। तेषां पायना त्रिविधा क्षारोदकतैलेषु तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराव्यधनस्ना

युच्छेदनेषु । तेषां निशाणार्थं श्लक्ष्णशिला माषवर्णा । धारासंस्थाप नार्थं शाल्मलीफलकमिति ।

भवति चात्र । यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितं ।
सुगृहीतं प्रमाणेन तदा कर्मसु योजयेत् ॥

अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निचार नखगोजीशेफालिकाशाकपत्रकरीरवालाङ्गुलय इति ।

शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् ।
त्वक्सारादि चतुर्व्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥
आहार्य्यच्छेद्यभेद्येषु नखं शक्येषु योजयेत् ।
विधिः प्रवच्यते पश्चात् चारवह्निजलौकसां ॥
ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये ।
गोजीशेफालिकाशाकपत्रैर्व्विस्रावयेत्तु तान् ॥
एष्येष्वेषण्यलाभे तु वालाङ्गुल्यङ्कुरा हिताः ।
शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु ।
कारयेत्करणैः प्राप्तं कर्म्मारं कर्म्मकोविदं ॥
प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः ।
तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा ॥

---

॥ नवमाध्यायः ॥

अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः ॥

अधिगतसर्व्वशास्त्रार्थमपि शिष्यं योग्याङ्कारयेत् । छेद्यादिषु

स्नेहादिषु च कर्म्मपथमुपदिशेत्। सुवङ्गश्रुताप्यकृतयोग्यः कर्म्मस्व योग्यो भवति। तत्र पुष्पफलालावूकालिन्दकत्रपुसैर्व्वारुककर्का रुकप्रभृतिषु छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चापदिशेत्। दृतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्यां। सरोम्णि चर्म्मण्यातते लेख्यस्य। मृतपशुसिरासूत्पलनालेषु च वेध्यस्य। घुणोपहतकाष्ठवेणुनलनालीशुष्कालावुमुखेष्वेष्यस्य। पनसविम्बीविल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य। मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य। सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य। पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्यां। मृदुमांसपेशीषूत्पलनालेषु च कर्णसन्धिबन्धयोग्यां। मृदुषु मांसखण्डेष्वग्निक्षारयोग्यां। उदकपूर्णघटपार्श्वस्रोतस्यलावूमुखादिषु च नेत्रप्रणिधानवस्ति व्रणवस्तिपीडनयोग्यामिति।

॥ भवतश्चात्र ॥ एवमादिषु मेधावी योग्यार्हेषु यथाविधि।
द्रव्येषु योग्यां कुर्व्वाणो न प्रमुह्यति कर्म्मसु॥
तस्मात्कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु।
यस्य यत्रेह साधर्म्यं तत्र योग्यां समाचरेत्॥

---

## ॥ दशमाध्यायः ॥

अथातो विशिखानुप्रवेशनीयमध्यायं व्याख्यास्यामः॥

अधिगततन्त्रेणोपासिततन्त्रार्थेन दृष्टकर्म्मणा कृतयोग्येन शास्त्रार्थं

निगदता राज्ञानुज्ञातेन नीचनखरोम्णा शुचिना शुक्लवस्त्रपरिहितेन छत्रवता दण्डहस्तेन सोपानत्केनानुद्धतवेशेन सुमनसा कल्याणाभिव्याहारेणाकुहकेन बन्धुभूतेन भूतानां सुसहायवता वैद्येन विशिखानुप्रवेष्टव्या ॥

ततो दूतनिमित्तशकुनमङ्गलानुलोम्येनातुरगृहमभिगम्योपविश्यातुरमभिपश्येत् स्पृशेत् पृच्छेच । त्रिभिरेतैर्विज्ञानोपायैरोगाः प्रायशो वेदितव्या इत्येके । तत्तु न सम्यक् । षड्विधो हि रोगाणां विज्ञानोपायः । तद्यथा पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति । तत्र श्रोत्रेन्द्रियविज्ञेया विशेषा रोगेषु व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते सफेनं रक्तमीरयन्ननिलः सशब्दो निर्गच्छतीत्येवमादयः । स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयो ज्वरशोफादिषु । चक्षुरिन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलवर्णविकारादयः । रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः । घ्राणेन्द्रियविज्ञेया अरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः । प्रश्नेनच विजानीयाद्देशं कालं जातिं सात्म्यमातङ्कसमुत्पत्तिं वेदनासमुच्छ्रायंबलं दीप्ताग्नितां वातमूत्रपुरीषरजसां प्रवृत्त्यप्रवृत्ती कालप्रकर्षादींश्च विशेषान् । आत्मसदृशेषु विज्ञानाभ्युपायेषु तत्स्थानीयैर्जानीयात् ।

भवति चात्र ॥ मिथ्यादृष्टा विकारा हि दुराख्यातास्तथैवच ।
तथा दुःपरिमृष्टाश्च मोहयेयुश्चिकित्सकं ॥

एवमभिसमीक्ष्य साध्यान् साधयेद्याप्यान् यापयेदसाध्यान्

पक्रमेत् परिसम्वत्सरोत्थितांश्च विकारान् प्रायशो वर्जयेत्। तत्र साध्या अपि व्याधयः प्रायेणैषां दुश्चिकित्स्यतमा भवन्ति। तद्यथा। श्रोत्रियनृपतिस्त्रीबालवृद्धभीरुराजसेवककितवदुर्बलवैद्यविदग्धव्याधिगोपकदरिद्रकृपणक्रोधवतामनात्मवतामनाथानाञ्चैवं निरूप्य चिकित्सां कुर्वन् धर्मार्थकामयशांसि प्राप्नोति।

भवति चात्र ॥ स्त्रीभिः सहास्यां संवादं परिहासञ्च वर्जयेत्।
दत्तञ्च ताभ्यो नादेयमन्नादन्यद्भिषग्वरैः ॥

---

## ॥ एकादशाध्यायः ॥

अथातः क्षारपाकविधिमध्यायं व्याख्यास्यामः ॥

शस्त्रानुशस्त्रेभ्यः क्षारः प्रधानतमश्छेद्यभेद्यलेख्यकरणात्त्रिदोषघ्नत्वाद्विशेषक्रियावचारणाच्च। तत्र क्षरणात् क्षणनाद्वा क्षारः। नानौषधिसमवायात्त्रिदोषघ्नः शुक्लत्वात्सौम्यस्तस्य सौम्यस्यापि सतो दहनपचनदारणादिशक्तिरविरुद्धा स खल्वाग्नेयौषधिगणभूयिष्ठत्वात् कटुक उष्णस्तीक्ष्णः पाचनो विलयनः शोधनो रोपणः शोषणः स्तम्भनो लेखनः कृम्यामकफकुष्ठविषमेदसामुपहन्ता पुंस्त्वस्य चातिसेवितः। स द्विविधः प्रतिसारणीयः पानीयश्च। तत्र प्रतिसारणीयः कुष्ठकिटिभदद्रुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छव्यङ्गमशकवाह्यविद्रधिकृमिविषार्शःस्वूपदिश्यते सप्तसु च मुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैद

र्भेषु तिसृषु च रोहिणीष्वेतेषु चैवानुशस्त्रप्रणिधानमुक्तं ॥ पानीयस्तु गरगुल्मोदराग्निसूलाजीर्णारोचकानाहशर्कराश्मर्य्याभ्यन्तरविद्रधि कृमिविषार्शस्सूपयुज्यते । अहितस्तु रक्तपित्तज्वरितपित्तप्रकृति बालवृद्धदुर्बलभ्रममदमूर्च्छातिमिरपरीतेभ्योऽन्येभ्यश्चैवम्विधेभ्यः । तञ्चेतरक्षारवद्दग्ध्वा परिस्रावयेत्तस्य विस्तारोऽन्यत्र। सच त्रिविधो मृदुर्मध्यस्तीक्ष्णश्च। तं चिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तेऽहनि प्रशस्तदेशजातमनुपहतं मध्यमवयसं महान्तमसितमुष्ककमधिवास्यापरेद्युः पाटयित्वाभिमन्त्र्यानेन मन्त्रेण ।

अग्निवीर्य्य महावीर्य्य मा ते वीर्य्यं प्रणश्यतु ।
इहैव तिष्ठ कल्याण मम कार्य्यं करिष्यसि ।
मम कार्य्ये कृते पश्चात् स्वर्गलोकं गमिष्यसि ॥

श्वेतपुष्परक्तपुष्पसहस्रं जुहुयात् । खण्डशः प्रकल्प्यावपाट्य निर्व्वाते देशे निचितं कृत्वा सुधाशर्कराश्च प्रक्षिप्य तिलनालैरादीपयेदथोपशान्तेऽग्नौ तद्भस्म पृथग्गृह्णीयाद्भस्मशर्कराश्च । अथानेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकविभीतकारग्वधतिल्वकार्कस्नुह्यपामार्गपाटलानक्तमालवृषकदलीचित्रकपूतीकेन्द्रवृक्षास्फोताश्वमारकसप्तच्छदाग्निमन्थगुञ्जाश्चतस्रश्च कोशातकीः समूलफलपत्रशाखा दहेत्। ततः क्षारद्रोणमुदकद्रोणैः षड्भिरालोड्य मुत्रैर्व्वा यथोक्तैरेकविंशतिवारान् विस्राव्यमहति कटाहे शनैर्दर्व्या विघट्टयन् विपचेत्॥ स यदा भवत्यच्छो रक्तस्तीक्ष्णः पिच्छिलश्चतमादाय महति वस्त्रे परिस्राव्येतरं विसृज्यच पुनरग्नाव

धिश्रयेत्। तत एवच क्षारोदकात् कुडवमध्यर्द्धं वापनयेत्। ततः कटशर्कराभस्मशर्कराक्षीरपाकशङ्खनाभीरग्निवर्णाः कृत्वायसे पात्रे तस्मिन्नेव क्षारोदके निषिच्य पिष्ट्वा तेनैव द्विद्रोणे ऽष्टपलसंमितं शङ्खनाभ्यादीनां प्रमाणं प्रतिवाप्य सततमप्रमत्तश्चैनमवघट्टयन् विपचेत्। स यथा नातिसान्द्रो नातिद्रवश्च भवति तथा प्रयतेत। अथैनमागतपाकमवतार्यानुगुप्तमायसे कुम्भे संवृतमुखे निदध्यादेष मध्यमः। एष एवाप्रतीवापः पक्वः संव्यूहिमो मृदुः। प्रतिवापे यथालाभं दन्तीद्रवन्तीचित्रकलाङ्गलकीपूतिकप्रवालतालपत्रीविडसुवर्चिकाकनकक्षीरीहिङ्गुवचाविषाः समाः श्लक्ष्णचूर्णाः शुक्तिप्रमाणाः प्रतिवापः। स एव सप्रतीवापः पक्वः पाक्यस्तीक्ष्णस्तेषां यथाव्याधिबलमुपयोगः। क्षीणबले तु क्षारोदकमावपेद्बलकरणार्थं॥ भवतश्चात्र। नैवातितीक्ष्णो न मृदुः शुक्लः श्लक्ष्णोऽथ पिच्छिलः।

अभिष्यन्दी शिवः शीघ्रः क्षारो ह्यष्टगुणः स्मृतः॥
अतिमार्दवशैत्यौष्ण्यतैक्ष्ण्यपैच्छिल्यसर्पिताः।
सान्द्रताऽपक्वता हीनद्रव्यता दोष उच्यते॥

तत्र क्षारसाध्यव्याधिव्याधितमुपवेश्य निर्वातातपे देशे ऽसम्बाधे ऽग्रोपहरणीयोक्तेन विधानेनोपसम्भृतसम्भारं ततोऽस्य तमवकाशं निरीक्ष्यावघृष्यावलिख्य प्रच्छयित्वा शलाकया क्षारं पातयित्वा वाक्शतमात्रमुपेक्षेत।

तस्मिन्निपतिते व्याधौ कृष्णता दग्धलक्षणं।

तत्राम्लवर्गः शमनः सर्पिर्म्मधुकसंयुतः ॥
अथ चेत् स्थिरमूलत्वात् क्षारदग्धं न शीर्य्यते ।
इदमालेपनं तत्र समग्रमवचारयेत् ॥
अम्लकाञ्जिकवीजानि तिलान्मधुकमेवच ।
प्रपेष्य समभागानि तेनैवमनुलेपयेत् ॥
तिलकल्कः समधुको घृताक्तो व्रणरोपणः ।
रसेनाम्लेन तीक्ष्णेन वीर्य्योष्णेन च योजितः ॥
आग्नेयेनाग्निना तुल्यः कथं क्षारः प्रशाम्यति ।
एवं चेन्मन्यसे वत्स प्रोच्यमानं निबोध मे ॥
अम्लवर्ज्यान् रसान् क्षारे सर्व्वानेव विभावयेत् ।
कटुकस्तत्र भूयिष्ठो लवणानुरसस्तथा ॥
अम्लेन सह संयुक्तः स तीक्ष्णलवणो रसः ।
माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ।
माधुर्य्याच्छमम्प्राप्नोति वह्निरद्भिरिवाप्लुतः ॥

तत्र सम्यग्दग्धे विकारोपशमो लाघवमनास्रावश्च । हीनदग्धे तोदकण्डूजाड्यानि व्याधिवृद्धिश्च । अतिदग्धे दाहपाकरागस्रावाङ्गमर्दक्लमपिपासामूर्च्छाः स्युर्म्मरणं वा । क्षारदग्धव्रणन्तु यथादोषं यथाव्याधि चोपक्रमेत् ।

अथ नैते क्षारकृत्याः । तद्यथा दुर्ब्बलबालस्थविरभीरुसर्व्वाङ्गशूनोदरिरक्तपित्तिगर्भिण्यृतुमतीप्रवृद्धज्वरिप्रमेहिरूक्षक्षतक्षीणतृष्णामूर्च्छापद्रुतक्लीवापवृत्तोद्वृत्तफलयोनयः । तथा मर्म्मशिरास्नायु

धमनीसन्धितरुणास्थिसेवनीगलनाभीनखान्तरशेफस्रोतःस्वल्प मांसेषु च प्रदेशेष्वक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगात्। तत्र क्षार साध्येष्वपि व्याधिषु शूनगात्रमस्थिशूलिनमन्नद्वेषिणं हृदयसन्धिपीडोपद्रुतं क्षारो न साधयति।

॥ भवति चात्र ॥

विषाग्निशस्त्राशनिमृत्युकल्पः क्षारो भवत्यल्पमतिप्रयुक्तः।
स धीमता सम्यगनुप्रयुक्तो रोगान्निहन्यादचिरेण घोरान्॥

---

## ॥ द्वादशाध्यायः ॥

अथातोऽग्निकर्म्मविधिमध्यायं व्याख्यास्यामः॥

क्षारादग्निर्गरीयान् क्रियासु व्याख्यातस्तद्दग्धानां रोगाणामपुनर्भावाद्भिषजशस्त्रक्षारैरसाध्यानां तत्साध्यत्वाच्च॥

अथेमानि दहनोपकरणानि। तद्यथा पिप्पल्यजाशकृद्गोदन्तशरशलाका जाम्बवौष्ठेतरलोहाः क्षौद्रगुडस्नेहाश्च। तत्र पिप्पल्यजाशकृद्गोदन्तशरशलाकास्त्वग्गतानां। जाम्बवौष्ठेतरलोहानि मांसगतानां क्षौद्रगुडस्नेहाः सिरास्नायुसन्ध्यस्थिगतानां। तत्राग्निकर्म्म सर्व्वर्त्तुषु कुर्य्यादन्यत्र शरद्ग्रीष्माभ्यां तत्राप्यात्ययिके ऽग्निकर्म्मसाध्ये व्याधौ तत्प्रत्यनीकं विधिं कृत्वा। सर्व्वव्याधिष्वृतुषु च पिच्छिलमन्नं भुक्तवतः कर्म्म कुर्व्वीत मूढगर्भाश्मरीभगन्दरार्शोमुखरोगेष्वभुक्तवतः। तत्र द्विविधमग्निकर्म्माहुरेके त्वग्दग्धं मांसदग्धञ्च। इह तु सिरास्नायुसन्ध्यस्थिष्वपि न प्रतिषिद्धोऽग्निः। तत्र शब्दप्रादु

भावो दुर्गन्धता त्वक्सङ्कोचश्च त्वग्दग्धे। कपोतवर्णताल्पश्वयथु वेदना शुष्कसंकुचितव्रणता च मांसदग्धे। कृष्णोन्नतव्रणतास्राव सन्निरोधश्च सिरास्नायुदग्धे। रुक्षारुणता कर्कशस्थिरव्रणता च सन्ध्यस्थिदग्धे। तत्र शिरोरोगाधिमन्थयोर्भ्रूललाटशङ्ख प्रदेशेषु दहेत्॥ वर्त्मरोगेष्वार्द्रलक्तकप्रतिच्छन्नां दृष्टिं कृत्वा वर्त्मरोम कूपान् दहेत्॥ त्वङ्मांससिरास्नायुसन्ध्यस्थिस्थितेऽत्युग्ररुजे वायावुच्छ्रितकठिनसुप्तमांसे व्रणे ग्रन्थ्यर्शोऽर्बुदभगन्दरापचीश्लीपदचर्म्म कीलतिलकालकान्त्रवृद्धिसन्धिसिराच्छेदनादिषु नाडीशोणिता तिप्रवृत्तिषु चाग्निकर्म्म कुर्य्यात्॥ तत्र रोगाधिष्ठानभेदादग्निकर्म्म चतुर्द्धा भिद्यते। तद्यथा। वलयविन्दुविलेखाप्रतिसारणानीति दहनविशेषाः॥

॥ भवतिचात्र ॥

रोगस्य संस्थानमतो विदित्वा नरस्य मर्म्माणि बलाबलञ्च।
व्याधिं तथर्त्तुञ्च समीक्ष्य सम्यक् ततो व्यवस्येद्भिषगग्निकर्म्म॥

तत्र सम्यग्दग्धे मधुसर्पिर्भ्यामभ्यङ्गः। अथेमानग्निना परिहरेत् पित्तप्रकृतिमन्तःशोणितं भिन्नकोष्ठमनुद्धृतशल्यं दुर्ब्बलं बालं वृद्धं भीरुमनेकव्रणपीडितमस्वेद्यांश्चेति॥

अत ऊर्द्धमितरथादग्धलक्षणं वक्ष्यामः। तत्र स्निग्धं रुक्षं वाश्रित्य द्रव्यमग्निर्दहति। अग्निसन्तप्तो हि स्नेहः सूक्ष्मसिरानुसारित्वात्त्वगादीननुप्रविश्याशु दहति। तस्मात्स्नेहदग्धेऽधिका रुजो भवन्ति। तत्र प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धञ्चेति

चतुर्व्विधमग्निदग्धं। तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत्प्लुष्टं। यत्रोत्तिष्ठन्ति स्फोटास्तीव्राश्चोषदाहरागपाकवेदनाश्चिराच्चोपशाम्यन्ति तद्दुर्द्दग्धं। सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्व्वलक्षणयुक्तञ्च। अतिदग्धे मांसावलम्बनं गात्रविश्लेषः सिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति व्रणश्चास्य चिरेण रोहति रूढश्च विवर्णो भवति॥ तदेतच्चतुर्व्विधमग्निदग्धलक्षणमात्मकर्म्मप्रसाधकं भवति॥

भवन्ति चात्र॥ अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति।
ततस्तेनैव वेगेन पित्तमस्याभ्युदीर्य्यते॥
तुल्यवीर्य्ये उभे ह्येते रसतो द्रव्यतस्तथा।
तेनास्य वेदनास्तीव्राः प्रकृत्या च विदह्यते॥
स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते।
दग्धस्योपशमार्थाय चिकित्सा संप्रचक्ष्यते॥
प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णं तथौषधं।
शरीरे स्विन्नभूयिष्ठे स्विन्नं भवति शोणितं॥
प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितं।
तस्मात्सुखयति ह्युष्णं नतु शीतं कथञ्चन॥
शीतामुष्णाञ्च दुर्द्दग्धे क्रियां कुर्य्याद्भिषक् पुनः।
घृतालेपनसेकांस्तु शीतानेवास्य कारयेत्॥
सम्यग्दग्धे तुगाक्षीरी प्लक्षचन्दनगैरिकैः।
सामृतैः सर्पिषा स्निग्धैरालेपं कारयेद्भिषक्॥

ग्राम्यानूपौदकैश्चैनं पिष्टैर्मांसैः प्रलेपयेत्।
पित्तविद्रधिवच्चैनं संततोश्माणमाचरेत्॥
अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलां।
क्रियां कुर्य्याद्भिषक् पश्चाच्छालितण्डुलकण्डनैः॥
तिन्दुकीत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत्।
व्रणं गुडूचीपत्रैर्व्वा छादयेदथवौदकैः।
क्रियाञ्च निखिलां कुर्य्याद्भिषक् पित्तविसर्पवत्॥
मधूच्छिष्टं समधुकं रोध्रं सर्जरसं तथा।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्व्विपाचयेत्।
सर्व्वेषामग्निदग्धानामेतद्रोपणमुत्तमं॥
स्नेहदग्धे क्रियां रूक्षां विशेषेणावचारयेत्।
अतऊर्द्ध्वं प्रवक्ष्यामि धूमोपहतलक्षणं॥
श्वसिति क्षौति चात्यर्थमत्याधमति कासते।
चक्षुषोः परिदाहश्च रागश्चैवोपजायते॥
सधूमकं निःश्वसिति घ्रेयमन्यन्न वेत्ति च।
तथैवच रसान् सर्व्वान् श्रुतिश्चास्योपहन्यते॥
तृष्णादाहज्वरयुतः सीदत्यथच मूर्च्छति।
धूमोपहत इत्येवं शृणु तस्य चिकित्सितं॥
सर्पिरिक्षुरसं द्राक्षां पयो वा शर्कराम्बु वा।
मधुराम्लौ रसौ वापि वमनाय प्रदापयेत्॥
वमतः कोष्ठशुद्धिः स्याद्धूमगन्धश्च नश्यति।

विधिनानेन शाम्यन्ति मदनश्वयथुज्वराः॥
दाहमूर्च्छातृडाध्मानश्वासकासाश्च दारुणाः।
मधुरैर्लवणाम्लैश्च कटुकैः कवलग्रहैः॥
सम्यग्गृह्णातीन्द्रियार्थान् मनश्चास्य प्रसीदति।
शिरोविरेचनं तस्मै दद्याद्योगेन शास्त्रवित्॥
दृष्टिर्विशुध्यते चास्य शिरोग्रीवञ्च देहिनः।
अविदाहि लघुस्निग्धमाहारं चास्य कल्पयेत्॥
उष्णवातातपैर्दग्धे शीतः कार्य्यो विधिः सदा।
शीतवर्षानिलहत उष्णं स्निग्धञ्च शस्यते।
तथातितेजसा दग्धे सिद्धिर्नास्ति कथञ्चन॥
इन्द्रवज्राग्निदग्धेऽपि जीवति प्रतिकारयेत्।
स्नेहाभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक्॥

---

त्रयोदशोऽध्यायः॥

अथातो जलौकावचारणीयमध्यायं व्याख्यास्यामः॥
नृपाढ्यबालस्थविरभीरुदुर्ब्बलनारीसुकुमाराणामनुग्रहार्थं परम सुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं शृङ्गजलौकालावुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्व्वा॥
भवन्ति चात्र॥ उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितं।

तस्माद्वातोपसृष्टे तु हितं तदवसेचने ॥
शीताधिवासा मधुरा जलौका वारिसम्भवा।
तस्मात्पित्तोपसृष्टे तु हिता सावसेचने ॥
अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितं ।
तस्माच्छ्लेष्मोपसृष्टे तु हितं तदवसेचने ॥

तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदा चूषणात्। सान्तर्दीपयाऽलाब्वा।

अथ जलायुका वक्ष्यन्ते। जलमासामायुरितिजलायुका जलमासामोक इति जलौकसः। ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः। तत्र सविषाः कृष्णा कर्व्वुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा। वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्व्वुरा। रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दा। इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रिता इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्म्मूर्च्छा ज्वरो दाहश्छर्द्दिर्म्मदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः। इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ॥

अथ निर्विषाः। कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिकाचेति।

तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला। किञ्चिद्रक्ता वृत्तकाया पिङ्गाशुगाच पिङ्गला। यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी। मूषिकाकृति वर्णाऽनिष्टगन्धा च मूषिका। मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी। स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे। इत्येता अविषा व्याख्याताः॥ तासां यवनपाण्ड्यसह्यपौतनादीनि क्षेत्राणि। तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः॥ पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्विषाः॥

भवति चात्र॥ क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु।

न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः॥

तासां ग्रहणमार्द्रचर्म्मणान्यैर्वा प्रयोगैर्गृह्णीयात्। अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात्। भक्ष्यार्थे चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शय्यार्थं तृणमौदकानि च पत्राणि। त्र्यहात्त्र्यहाचान्यज्जलं भक्ष्यं च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत्॥

भवति चात्र॥ स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः।

अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः॥

अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य

च

चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात्। गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा ताभीरोगं ग्राहयेत्। सूक्ष्मशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयादगृह्णन्त्यै क्षीरबिन्दुं शोणितबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत्। यदा च निविशते ऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोममनुमार्जयेदामुखाद्वामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत्। दुर्व्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्व्ववत्सन्निदध्यात्। शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति।

भवति चात्र॥ क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणं।
जलौकसाञ्च यो वेत्ति तत्साध्यान्स जयेद्गदान्॥

चतुर्द्दशोऽध्यायः।

अथातः शोणितवर्णनीयमध्यायं व्याख्यास्यामः ॥

तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्याहारस्य सम्यक्परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशतिंधमनीरनुप्रविश्योर्द्धगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानाद्गतिरुपलक्षयितव्या क्षयवृद्धिवैकृतैः। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति। अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्व्विशेषैः सौम्य इत्यवगम्यते। स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति।

भवतश्चात्र॥ रञ्जितास्तेजसात्वापः शरीरस्थेन देहिनां।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते।
तद्वर्षाद्द्वादशादूर्द्धं याति पञ्चाशतः क्षयं॥

आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकञ्चापरे जीवरक्तमाहुराचार्य्याः॥

विस्रता द्रवता रागः स्पन्दनं लघुता तथा।
भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते॥

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते।
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः॥

तत्रैषां धातूनामन्नपानरसः प्रीणयिता।

रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः।
अन्नात्पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः॥

तत्र रस गतौ धातुरहरहर्गच्छतीत्यतो रसः। स खलु त्रीणि त्रीणि कलासहस्राणि पञ्चदश च कला एकैकस्मिन् धातावतिष्ठत एवं मासेन रसः शुक्रीभवति स्त्रीणाञ्चार्त्तवमिति।

भवति चात्र॥ अष्टादश सहस्राणि सङ्ख्या ह्यस्मिन्समुच्चये।
कलानां नवतिः प्रोक्ता स्वतन्त्रपरतन्त्रयोः॥

स शब्दार्चिर्जलसन्तानवदणुना विशेषेणानुधावत्येवं शरीरं केवलं। वाजीकरण्यस्त्वोषधयः स्वबलगुणोत्कर्षाद्विरेचनवदुपयुक्ताः शुक्रं शीघ्रं विरेचयन्ति॥

यथाहि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भावानामभिव्यक्तिरिति कृत्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते स एव गन्धो विवृतपत्रकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयःपरिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽथार्त्तवादयश्च विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैःस्तनगर्भाशययोन्यभिवृद्धिर्भवति। स एवान्नरसो वृद्धानां जरापरिपक्वशरीरत्वान्न प्रीणनो भवति। त एते शरीरधारणाद्धातव इत्युच्यन्ते॥

तेषां चयवृद्धौ शोणितनिमित्ते तस्मात्तदधिकृत्य वक्ष्यामः॥ तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि च वातेन दुष्टं। नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणाम स्कन्दि च पित्तदुष्टं। गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च। सर्व्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टं। पित्तवद्रक्तेना तिकृष्णञ्च। द्विदोषलिङ्गं संसृष्टं॥ जीवशोणितमन्यत्र वक्ष्यामः। इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात्॥ विस्रा व्यान्यन्यत्र वक्ष्यामः॥ अथाऽविस्राव्याः सर्व्वाङ्गशोफः क्षीणस्य चाम्लभो जननिमित्तः पाण्डुरोग्यर्शोदरिशोषिगर्भिणीनाञ्च श्वयथवः॥

तत्र शस्त्रविस्रावणं द्विविधं प्रच्छानं सिराव्यधनञ्च। तत्र ऋज्व सङ्कीर्णं सूक्ष्मं सममनवगाढमनुत्तानमाशु च शस्त्रं पातयेन्मर्म्म सिरास्नायुसन्धीनां चानुपघाति। तत्र दुर्दिने दुर्व्विद्धे शीतवात योरस्विन्नेऽभुक्तवतः स्कन्नत्वाच्छोणितं न स्रवत्यल्पं वा स्रवति॥ भवति चात्र॥ मदमूर्च्छाश्रमार्त्तानां वातविण्मूत्रसङ्गिनां।
निद्राभिभूतभीतानां नृणां नासृक् प्रवर्त्तते॥

तद्दुष्टं शोणितमनिर्ह्रियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत्। अत्युष्णातिस्विन्नातिविद्धेष्वज्ञैर्व्विस्रावितमति प्रवर्त्तते। तदतिप्रवृत्तं शिरोभितापमान्ध्यमधिमन्थं तिमिरप्रादुर्भावं धातु क्षयमाक्षेपकं पक्षाघातमेकाङ्गविकारं तृष्णादाहौ हिक्कां कासं श्वासंपाण्डुरोगं मरणं चापादयति॥

भवन्तिचात्र॥ तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते।
यवागूं प्रतिपीतस्य शोणितं मोचयेद्भिषक्॥
सम्यग्गत्वा यदा रक्तं स्वयमेवावतिष्ठते।
शुद्धं तदा विजानीयात्सम्यग्विस्रावितञ्च तत्॥
लाघवं वेदनाशान्तिर्व्याधेर्वेगपरिक्षयः।
सम्यग्विस्राविते लिङ्गं प्रसादो मनसस्तथा॥
त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्च ये।
रक्तमोक्षणशीलानां न भवन्ति कदाचन॥

अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठा भद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमहरिद्रार्काङ्कुरनक्तमालफलै र्यथालाभं त्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैः सर्षपतैललवणप्रगाढैर्व्रणमुखमवघर्षयेदेवं सम्यक् प्रवर्त्तते। अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपत्तङ्गगैरिकसर्जरसरसाञ्जनशाल्मलीपुष्पशङ्खशुक्तिमाषयवगोधूमचूर्णैः शनैर्व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेत्। सालसर्ज्जार्ज्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्वा चूर्णिताभिः क्षौमेण वा ध्मापितेन समुद्रफेनलाक्षाचूर्णैर्वा यथोक्तैर्व्रणबन्धनद्रव्यैर्गाढं बध्नीयात्। शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैश्चोपाचरेत् क्षारेणाग्निना वा दहेद्यथोक्तव्यधनादनन्तरं वा तामेवातिप्रवृत्तां सिरां विध्येत्। काकोल्यादिक्वाथं वा शर्करामधुमधुरं पाययेत्। एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीरयूषरसैः सुस्निग्धैश्चाश्नीयादुपद्रवांश्च यथास्वमुपाचरेत्।

भवन्ति चात्र॥ धातुक्षयात्स्रुते रक्ते मन्दः सञ्जायतेऽनलः।
पवनश्च परं कोपं याति तस्मात्प्रयत्नतः॥
तन्नातिशीतैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः।
ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत्॥
चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणं।
सन्धानं स्कन्दनञ्चैव पाचनं दहनं तथा॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमं।
तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् सिराः॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत्।
सन्धाने भ्रश्यमाने तु पाचनैः समुपाचरेत्॥
कल्पैरेतैस्त्रिभिर्व्वैद्यः प्रयतेत यथाविधि।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते।
सावशेषे ततः स्थेयं नतु कुर्य्यादतिक्रमं॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इतिस्थितिः॥
स्रुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले।
शोफं सतोदं कोष्णेण सर्पिषा परिषेचयेत्॥

---

## ॥ पञ्चदशोऽध्यायः ॥

अथातो दोषधातुमलक्षयवृद्धिविज्ञानीयमध्यायं व्याख्यास्यामः॥ दोषधातुमलमूलं हि शरीरं तस्मादेतेषां लक्षणमुच्यमानमुपधारय। तत्र प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति । रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्तमग्निकर्म्मणानुग्रहं करोति। सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदकर्म्मणानुग्रहं करोति । रसः प्रीणयति रक्तपुष्टिञ्च करोति। रक्तं वर्णप्रसादं मांसपुष्टिं जीवयतिच। मांसं शरीरपुष्टिं मेदसश्च। मेदः स्नेहस्वेदौ दृढत्वं पुष्टिमस्थ्नाञ्च। अस्थि देहधारणं मज्ञः पुष्टिश्च। मज्जा प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नाञ्च करोति। शुक्रं धैर्य्यं च्यवनं प्रीतिं देहबलं हर्षं वीजार्थंच। पुरीषमुपस्तम्भं वाय्वग्निधारणञ्च । वस्तिपूरणविक्लेदकृन्मूत्रं। स्वेदः क्लेदत्वक्सौकुमार्य्यकृत्। रक्तलक्षणमार्त्तवं गर्भकृच्च । गर्भो गर्भलक्षणं। स्तन्यं स्तनयोरापीनत्वजननं जीवनञ्चेति। तेषां विधिवत्परिरक्षणं कुर्व्वीत ॥

अतऊर्द्धमेषां क्षीणलक्षणं वक्ष्यामः। क्षयः पुनरेषामतिसंशोधनातिसंशमनवेग विधारणासात्म्यान्नमनस्तापव्यायामानशनातिमैथुनैर्भवति। तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमल्पहर्षो मूढसंज्ञता च । पित्तक्षये मन्दोष्माग्निता निष्प्रभत्वञ्च। श्लेष्मक्षये रूक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्ब्बल्यं प्रजागरणञ्च। तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः॥

रसक्षये हृत्पीडा कम्पः शून्यता तृष्णा च। शोणितक्षये त्वक्पारुष्यमम्ल शीतप्रार्थना सिराशैथिल्यञ्च। मांसक्षये स्फिग्गण्डौष्ठोपस्थोरुवक्षःक क्षापिण्डिकोदरग्रीवाशुष्कता रौक्ष्यतोदौ गात्राणां सदनं धमनीशै थिल्यञ्च। मेदःक्षये प्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांस प्रार्थना च। अस्थिक्षयेऽस्थितोदो दन्तनखभङ्गो रौक्ष्यञ्च। मज्ज क्षये ऽल्पशुक्रता पर्व्वभेदोऽस्थिनिस्तोदोऽस्थिशून्यता च। शुक्रक्षये मेढ्रवृषणवेदनाऽशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्परक्तशु क्रदर्शनञ्च तत्रापि स्वयोनिवर्द्धनद्रव्योपयोगः प्रतीकारः॥ पुरीष क्षये हृदयपार्श्वपीडा सशब्दस्य च वायोरूर्द्ध्वगमनं कुक्षौसञ्चरणञ्च। मूत्रक्षये वस्तितोदोऽल्पमूत्रता च। अत्रापि स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः॥ स्वेदक्षये स्तब्धरोमकूपता त्वक्शोषः स्पर्शवैगुण्यं स्वेद नाशश्च तत्राभ्यङ्गः स्वेदोपयोगश्च॥ आर्त्तवक्षये यथोचितकालादर्शन मल्पता वा योनिवेदना च तत्र संशोधनमाग्नेयानाञ्च द्रव्याणां विधिवदुपयोगः॥ स्तन्यक्षये स्तनयोर्म्लानता स्तन्यासम्भवोऽल्पता वा तत्र श्लेष्मवर्द्धनद्रव्योपयोगः॥ गर्भक्षये गर्भास्पन्दनमनुन्नतकुक्षि ता च तत्र प्राप्तवस्तिकालायाःक्षीरवस्तिप्रयोगो मेध्यान्नोपयोगश्चेति।

अत ऊर्द्ध्वमतिवृद्धानां दोषधातुमलानां लक्षणं वक्ष्यामः॥ वृद्धिः पुनरेषां स्वयोनिवर्द्धनाभ्युपसेवनाद्भवति। तत्र वातवृद्धौ त्वक् पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्प बलत्वं गाढवर्च्चस्त्वञ्च। पित्तवृद्धौ पीतावभासता सन्तापः शीत कामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्ब्बल्यं पीतविण्मूत्र

नेत्रत्वञ्च । श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्य्यं गौरवमवसादस्तन्द्रा निद्रा
सन्ध्यस्थिविश्लेषञ्च । रसोऽतिवृद्धौ हृदयोत्क्लेदं प्रसेकञ्चापादयति ।
रक्तं रक्ताङ्गाक्षितां सिरापूर्णत्वञ्च । मांसं स्फिग्गण्डौष्ठोपस्थोरुबाहु
जङ्घासु वृद्धिं गुरुगात्रताञ्च । मेदः स्निग्धाङ्गतामुदरपार्श्ववृद्धिं कास
श्वासादीन् दौर्गन्ध्यञ्च । अस्थि अध्यस्थीन्यधिदन्तांश्च । मज्जा सर्वा
ङ्गनेत्रगौरवं । शुक्रं शुक्राश्मरीमतिप्रादुर्भावञ्च ॥ पुरीषमाटोपं
कुक्षौ शूलञ्च । मूत्रं मुहुर्मुहुः प्रवृत्तिं वस्तितोदमाध्मानञ्च । स्वे
दस्त्वचो दौर्गन्ध्यं कण्डूञ्च । आर्त्तवमङ्गमर्दमतिप्रवृत्तिं दौर्बल्यञ्च ।
स्तन्यं स्तनयोरापीनत्वं मुहुर्मुहुः प्रवृत्तिं तोदञ्च । गर्भो जठराभि
वृद्धिं शोथञ्च ॥ तेषां यथास्वं संशोधनं क्षपणञ्च क्षयादविरुद्धैः
क्रियाविशेषैः प्रतिकुर्व्वीत ॥

पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परं ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितं ॥

बललक्षणं बलक्षयलक्षणमत ऊर्द्धं वक्ष्यामः । तत्र रसादीनां
शुक्रान्तानां धातूनां यत्परं तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते
स्वशास्त्रसिद्धान्तात् । तत्र बलेन स्थिरोपचितमांसता सर्व्वचेष्टास्वप्र
तिघातः स्वरवर्णप्रसादो बाह्यानामाभ्यन्तराणाञ्च करणानामात्म
कार्य्यप्रतिपत्तिर्भवति ।

भवन्ति चात्र ॥ ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरं ।
विविक्तं मृदुमृत्स्नञ्च प्राणायतनमुत्तमं ॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनां ।

तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणां ॥
अभिघातात्क्षयात्कोपाच्छोकाद्ध्यानात् श्रमात्क्षुधः ।
ओजः सङ्क्षीयते ह्येभ्यो धातुग्रहणनिःसृतं ।
तेजः समीरितं तस्माद्विस्रंसयति देहिनः ॥

तस्य विस्रंसो व्यापत् क्षय इति लिङ्गानि व्यापन्नस्य भवन्ति ॥ सन्धिविश्लेषो गात्राणां सदनं दोषच्यवनं क्रियासन्निरोधश्च विस्रंसे । स्तब्धगुरुगात्रता वातशोफो वर्णभेदो ग्लानिस्तन्द्रा निद्रा च व्यापन्ने । मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति च क्षये ॥ भवन्ति चात्र ॥ त्रयो दोषा बलस्योक्ता व्यापद्विस्रंसनक्षयाः ।

विश्लेषसादौ गात्राणां दोषविस्रंसनं श्रमः ।
अप्राचुर्य्यं क्रियाणाञ्च बलविस्रंसलक्षणं ॥
गुरुत्वं स्तब्धताङ्गेषु ग्लानिर्व्वर्णस्य भेदनं ।
तन्द्रा निद्रा वातशोफो बलव्यापदि लक्षणं ॥
मूर्च्छा मांसक्षयो मोहः प्रलापोऽज्ञानमेव च ।
पूर्व्वोक्तानि च लिङ्गानि मरणञ्च बलक्षये ॥

तत्र विस्रंसे व्यापन्ने च क्रियाविशेषैरविरुद्धैर्बलमाप्याययेत् । नष्टसंज्ञमितरञ्च वर्जयेत् ।

तेजोप्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं वसाख्यं स्त्रीणां विशेषतो भवति तेन मार्दवसौकुमार्य्यमृद्वल्परोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति तत् कषायतिक्तशीतरूक्षविष्टम्भिवेगविघातव्यवायव्यायामव्याधिकर्षणैश्च

विक्रियेते । तस्यापि पारुष्यवर्णभेदतोदनिष्प्रभत्वानि विस्रंसने भवन्ति । कार्श्यं मन्दाग्नितावधस्तिर्य्यक्च्युतिश्चापत्ता दृष्यग्निव लहान्यनिलप्रकोपमरणानि चये तत्रापि स्नेहपानाभ्यङ्गप्रदेहपरिषेकस्निग्धलघ्वन्नानि चये विदधीत ॥

भवन्ति चात्र ॥ दोषधातुमलक्षीणो बलक्षीणोऽपि वा नरः ।
स्वयोनिवर्द्धनं यत्तदन्नपानं प्रकाङ्क्षति ॥
यद्यदाहारजातं हि क्षीणः प्रार्थयते नरः ।
तस्य तस्य स लाभे तु तं तं क्षयमपोहति ॥
यस्य धातुक्षयाद्वायुः संज्ञां कर्म्म च नाशयेत् ।
प्रक्षीणञ्च बलं यस्य नासौ शक्यश्चिकित्सितुं ॥

रसनिमित्तमेव स्थौल्यं कार्श्यञ्च तत्र श्लेष्मलाहारसेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्नरतस्य चाम एवान्नरसो मधुरतरश्च शरीरमनुक्रामन्नतिस्नेहान्मेदो जनयति तदतिस्थौल्यमापादयति तमतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्नस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति सौकुमार्य्यान्मेदसः सर्वक्रियास्वसमर्थः कफमेदोनिरुद्धमार्गत्वाच्चाल्पव्यवायो भवत्यावृतमार्गत्वादेव शेषा धातवो नाप्यायन्तेऽत्यर्थमतोऽल्पप्राणो भवति प्रमेहपिडकाज्वरभगन्दरविद्रधिवातविकाराणामन्यतमं प्राप्य पञ्चत्वमुपयाति सर्व्व एव चास्य रोगा बलवन्तो भवन्त्यावृतमार्गत्वात् स्रोतसामतस्तस्योत्पत्तिहेतुं परिहरेत् । उत्पन्ने तु शिलाजतुगुग्गुलुगोमूत्रत्रिफलालोहरजोरसाञ्जन

मधुयवमुद्गकोरदूषकश्यामाकोद्दालकादीनां विरूक्षणच्छेदनीयानाञ्च द्रव्याणां विधिवदुपयोगो व्यायामो लेखनवस्त्युपयोगश्चेति ॥ तत्र पुनर्वातलाहारसेविनोऽतिव्यायामव्यवायाध्ययनभयशोकध्यानरात्रिजागरणपिपासाक्षुत्कषायाल्पाशनप्रभृतिभिरुपशोषितो रसधातुः शरीरमननुक्रामन्नल्पत्वान्न प्रीणयति तस्मादतिकार्श्यञ्च भवति। सोऽतिकृशः क्षुत्पिपासाशीतोष्णवातवर्षभारादानेष्वसहिष्णुः वातरोगप्रायोऽल्पप्राणश्च क्रियासु भवति श्वासकासशोषप्लीहोदराग्निसादगुल्मरक्तपित्तानामन्यतमं प्राप्य मरणमुपयाति सर्व्वे एव चास्य रोगा बलवन्तो भवन्त्यल्पप्राणत्वादतस्तस्योत्पत्तिहेतुं परिहरेत्। उत्पन्ने तु पयस्याश्वगन्धाविदारीविदारीगन्धाशतावरीबलातिबलानागबलानां मधुराणामन्यासाञ्चौषधीनामुपयोगः क्षीरदधिघृतमांसशालिषष्टिकयवगोधूमानाञ्च दिवास्वप्नब्रह्मचर्य्याव्यायामबृंहणवस्त्युपयोगश्चेति। यः पुनरुभयसाधारणान्युपसेवेत तस्यान्नरसः शरीरमनुक्रामन् समान् धातूनुपचिनोति समधातुत्वान्मध्यशरीरो भवति सर्व्वक्रियासु समर्थः क्षुत्पिपासाशीतोष्णवर्षातपसहो बलवांश्च स सततमनुपालयितव्य इति। भवन्ति चात्र ॥ अत्यन्तगर्हितावेतौ सदा स्थूलकृशौ नरौ।

श्रेष्ठो मध्यशरीरस्तु कृशः स्थूलात्तु पूजितः॥
दोषः प्रकुपितो धातून् क्षपयत्यात्मतेजसा।
इद्धः स्वतेजसा वह्निरुखागतमिवोदकं ॥
वैलक्षण्याच्छरीराणामस्थायित्वात्तथैव च।

दोषधातुमलानान्तु परिमाणं न विद्यते ॥
एषां समत्वं यच्चापि भिषग्भिरवधार्य्यते ।
न तत् स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना ॥
दोषादीनान्त्वसमतामनुमानेन लक्षयेत् ।
अप्रसन्नेन्द्रियं वीक्ष्य पुरुषं कुशलो भिषक् ॥
समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥
स्वस्थस्य रक्षणं कुर्य्यादस्वस्थस्य तु बुद्धिमान् ।
क्षपयेद्बृंहयेच्चापि दोषधातुमलान् भिषक् ।
तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ॥

---

षोडशोऽध्यायः ॥

अथातः कर्णव्यधबन्धविधिमध्यायं व्याख्यास्यामः ॥

रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृतमङ्गलस्वस्तिवाचनं धात्र्यङ्के कुमारमुपवेश्य बालक्रीडनकैः प्रलोभ्याभिसान्त्वयन् भिषग्वामहस्तेनाकृष्य कर्णं दैवकृते छिद्रे आदित्यकरावभासिते शनैः शनैर्दक्षिणहस्तेन ऋजु विध्येत् प्रतनुकं सूच्या बहलमारया पूर्व्वं दक्षिणं कुमारस्य वामं कन्यायास्ततः पिचुवर्त्तिं प्रवेशय सम्यक् विद्धमामतैलेन परिषेचयेत् । शोणितबहुत्वेन वेदनया चान्यदेशविद्धमिति जानीयान्निरुपद्रवतया तद्देशविद्धमिति । तत्राज्ञेन

यदृच्छया विद्धासु सिरासु कालिकामर्म्मरिकालोहितिकासूप द्रवा भवन्ति। तत्र कालिकायां ज्वरो दाहः श्वयथुर्वेदनाच भवति। मर्म्मरिकायां वेदना ज्वरो ग्रन्थयश्च। लोहितिकायां मन्यास्तम्भा पतानकशिरोग्रहकर्णशूलानि भवन्ति। तेषु यथास्वं प्रतिकु र्व्वीत। क्लिष्टजिह्मप्रशस्तसूचीव्यधाद्गाढतरवर्त्तिलाद्दोषप्रकोपादप्र शस्तव्यधाद्वा यत्र संरम्भो वेदना वा भवति तत्र वर्त्तिमुपहृत्याशु मधुकैरण्डमूलमञ्जिष्ठायवतिलकल्कैर्म्मधुघृतप्रगाढैरालेपयेत्तावद्या वत्सुरूढ इति सुरूढं चैनं पुनर्व्विध्येत् विधानन्तु पूर्व्वोक्तमेव। व्यहा त्त्यहाच वर्त्तिञ्च स्थूलतरां दद्यात्परिषेकं तमेव। अथ व्यपगत दोषोपद्रवे कर्णे वर्द्धनार्थं लघुवर्द्धनकं कुर्य्यात्॥

भवति चात्र॥ एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणां।
दोषतो वाभिघाताद्वा सन्धानं तस्य मे शृणु॥

तत्र समासेन पञ्चदशकर्णबन्धनाकृतयः॥ तद्यथा नेमिसन्धानक उत्पलभेद्यको वल्लूरक आसङ्गिमो गण्डकर्ण आहार्य्यो निर्व्वेधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकौष्ठक इति। तेषु पृथुलायतसमोभय पालिर्नेमिसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्व वृत्तसमोभयपालिर्व्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। वाह्यदीर्घैकपालिर्गण्डकर्णः। अपालिरुभयतोऽप्याहार्य्यः। पीठो पमपालिरुभयतः क्षीणपुत्रिकाश्रितो निर्व्वेधिमः। स्थूलाणुसमवि षमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपा

टसन्धिकः। वाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसन्धिकः। तत्र दश्रैते कर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कशष्कुलिरुत्स न्नपालिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोःक्षीण मांसो हीनकर्णः। तनुविषमाल्पपालिर्व्वल्लीकर्णः। ग्रथितमांस स्तब्धसिराततः सूक्ष्मपालिर्यष्टीकर्णः। निर्म्मांससंक्षिप्ताग्राल्पशोणित पालिः काकौष्ठकपालिरिति। बन्धेष्वपि तु शोफदाहरागपाक पिडकास्रावयुक्ता न सिद्धिमुपयान्ति॥

भवन्ति चात्र॥ यस्य पालिद्वयमपि कर्णस्य न भवेदिह।
कर्णपीठं समे मध्ये तस्य विद्धा विवर्द्धयेत्॥
वाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत्।
आभ्यन्तरायां दीर्घायां वाह्यसन्धिरुदाहृतः॥
एकैवतु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या।
तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत्॥
गण्डादुत्पाट्य मांसेन सानुबन्धेन जीवता।
कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित्॥

अतोन्यतमं बन्धं चिकीर्षुरग्रोपहरणीयोक्तोपसंभृतसम्भारं विशेषतश्चात्रोपहरेत् सुरां मण्डं क्षीरमुदकं धान्याम्लं कपालचूर्णञ्चे ति। ततोऽङ्गनां पुरुषं वा ग्रथितकेशान्तं लघु भुक्तवन्तमाप्तैः सुप रिगृहीतञ्च कृत्वा बन्धमुपधार्य्य छेद्यभेद्यलेख्यव्यधनैरुपपन्नैरुपपाद्य कर्णं शोणितमवेक्षेत तद्दुष्टमदुष्टं चेति। तत्र वातदुष्टे धान्याम्ला

ष्णोदकाभ्यां पित्तदुष्टे शीतोदकपयोभ्यां श्लेष्मदुष्टे सुरामण्डोष्णोदकाभ्यां प्रक्षाल्य कर्णौ पुनरवलिख्यानुन्नतमहीनमविषमञ्च कर्ण सन्धिं सन्निवेश्य स्थितरक्तं सन्दध्यात्। ततो मधुघृतेनाभ्यज्य पिचु प्लोतयोरन्यतरेणावगुण्ठ्य सूत्रेणानवगाढमशिथिलञ्च बद्ध्वा कपाल चूर्णेनावकीर्य्याचारिकमुपदिशेद्द्विव्रणीयोक्तेन च विधानेनोपचरेत्। भवतश्चात्र। विघट्टनं दिवास्वप्नं व्यायाममतिभोजनं।

व्यवायमग्निसन्तापं वाक्श्रमञ्च विवर्ज्जयेत्॥

आमतैलपरीषिक्तं चिरात्रमवचारयेत्।

ततस्तैलेन संस्पृष्टं त्र्यहादपनयेत् पिचुं॥

नचासंशुद्धरक्तमतिप्रवृत्तरक्तं चीणरक्तं वा सन्दध्यात्। स हि वातदुष्टे रक्ते रूढोऽपि परिपुटनवान्। पित्तदुष्टे दाहपाकरागवेदनावान्। श्लेष्मदुष्टे स्तब्धः कण्डूमान्। अतिप्रवृत्तरक्ते श्यावशोफवान् चीणोऽल्पमांसो न वृद्धिमुपैति। स यदा सुरूढो निरुपद्रवः सवर्णो भवति तदैनं शनैःशनैरभिवर्द्धयेत्। अतोऽन्यथा संरम्भदाहपाकरागवेदनावान् पुनश्छिद्यते वा॥ अथास्याप्रदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः। तद्यथा गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयः सर्पिस्तैलं गौरसर्षपजञ्च यथालाभं सम्भृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाचीरशुक्लाजलशूकमधुरवर्गप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात्।

स्विदितोन्मर्दितं कर्णं स्नेहेनानेन योजयेत्।

अथानुपद्रवः सम्यक् बलवांश्च विवर्द्धते॥

यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितं ।
शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः ॥
तैलं विपक्वं सक्षीरमभ्यङ्गात्पालिवर्द्धनं ।
ये तु कर्णा न वर्द्धन्ते विधिनानेन योजिताः ॥
तेषामपाङ्गदेशेषु कुर्य्यात् प्रच्छानमेवतु ।
बाह्यच्छेदं न कुर्व्वीत व्यापदस्तु ततो ध्रुवाः ॥
बद्धमात्रन्तु यः कर्णं सहसैवाभिवर्द्धयेत् ।
आमकोशोषमाध्मातः चिप्रमेव विमुच्यते ॥
जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः ।
सुरूढोऽवेदनो यस्तु तं कर्णं वर्द्धयेच्छनैः ॥
अमिताः कर्णबन्धास्तु विज्ञेयाः कुशलैरिह ।
यो यथा सुनिविष्टःस्यात्तं तथा विनियोजयेत् ॥
कर्णपाल्यामयान्नृणां पुनर्व्वक्ष्यामि सुश्रुत ।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः ॥
द्विधा वाप्यथ संसृष्टाः कुर्व्वन्ति विविधा रुजः ।
विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके ॥
दाहविस्फोटजननं शोफः पाकश्च पैत्तिके ।
कण्डूः सश्वयथुस्तम्भो गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितं ।
स्वेदाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः ॥
मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा ।

य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्ध्वं नामलिङ्गैर्व्वक्ष्ये पाल्यामुपद्रवान्।
उत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशं॥
अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा।
स्रावी च दाहवांश्चैव शृणुत्वेषां क्रमशः क्रियां॥
अपामार्गः सर्ज्जरसः पाटलालकुचत्वचौ।
उत्पाटके प्रलेपः स्यात्तैलमेभिश्च पाचयेत्॥
शम्पाकशिग्रुपूतीकगोधामेदोऽथ तद्वसा।
वाराहं गव्यमैणेयं पित्तं सर्पिश्च संसृजेत्॥
लेपमुत्पुटके दद्यात्तैलमेभिश्च साधितं।
गौरीं सुगन्धां सश्यामामनन्तां तण्डुलीयकं॥
श्यावे प्रलेपनं दद्यात्तैलमेभिश्च साधितं।
पाठां रसाञ्जनं क्षौद्रं तथा स्यादुष्णकाञ्जिकं॥
दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितं।
व्रणीभूतस्य देयं स्यादिदं तैलं विजानता॥
मधुकं क्षीरकाकोली जीवकाद्यैर्व्विपाचितं।
गोधावराहसर्पाणां वसाः स्युः क्षतहृंहणे॥
प्रलेपनमिदं दद्यादवमिच्यावमन्थके।
प्रपौण्डरीकं मधुकं समङ्गां धवमेव च॥
तैलमेभिश्च सम्पक्वं शृणु कण्डूमतः क्रियां।
सहदेवा विश्वदेवा अजाक्षीर सथैन्धवं॥

एतैरालेपनं दद्यात्तैलमेभिश्च साधितं ॥
ग्रन्थिके गुटिका पूर्वं स्रावयेदवपाट्यतु ।
ततः सैन्धवचूर्णन्तु घृष्ट्वा लेपं प्रदापयेत् ॥
लिखित्वा तत् स्रुतं घृष्ट्वा चूर्णैरोध्रस्य जम्बुले ।
क्षीरेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः ॥
मधुपर्णीं मधूकञ्च मधुकं मधुना सह ।
लेपः स्राविणि दातव्यस्तैलमेभिश्च साधितं ॥
पञ्चवल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ।
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥

विश्लेषितायास्त्वथ नासिकाया वक्ष्यामि सन्धानविधिं यथावत् ।
नासाप्रमाणं पृथिवीरुहाणां पत्रं गृहीत्वा त्ववलम्बितस्य ॥
तेन प्रमाणेन हि गण्डपार्श्वादुत्कृत्य बद्धं त्वथ नासिकाग्रं ।
विलिख्य चाशु प्रतिसन्दधीत तत्साधुबन्धैर्भिषगप्रमत्तः ॥
सुसंहितं सम्यगतो यथावन्नाडीद्वयेनाभिसमीक्ष्य बद्ध्वा ।
प्रोन्नम्य चैनामवचूर्णयेच्च पत्तङ्गयष्टीमधुकाञ्जनैश्च ॥
संछाद्य सम्यक् पिचुना सितेन तैलेन सिञ्चेदसकृत्तिलानां ।
घृतञ्च पाय्यः स नरः सुजीर्णे स्निग्धो विरेच्यः स यथोपदेशं ॥
रूढञ्च सन्धानमुपागतं स्यात्तदर्द्धशेषन्तु पुनर्निकृन्तेत् ।
हीनां पुनर्व्वर्द्धयितुं यतेत समाञ्च कुर्य्यादतिवृद्धमांसां ॥
नाडीयोगं विनौष्ठस्य नासासन्धानवद्विधिं ।
य एवमेवं जानीयात् स राज्ञः कर्त्तुमर्हति ॥

## ॥ सप्तदशोऽध्यायः ॥

अथात आमपक्वैषणीयमध्यायं व्याख्यास्यामः ॥

शोफसमुत्थाना ग्रन्थिविद्रध्यलजीप्रभृतयः प्रायेण व्याधयोऽभिधास्यन्ते ऽनेकाकृतयस्तैर्व्विलक्षणः पृथुर्ग्रथितः समो विषमो वा त्वङ्मांसस्थायी दोषसङ्घातः शरीरैकदेशोत्थितः शोफ इत्युच्यते । स षड्विधो वातपित्तकफशोणितसन्निपातागन्तुनिमित्तः ।

तस्य दोषरूपव्यञ्जनैर्लक्षणानि व्याखास्यामः । तत्र वातशोफोऽरुणः कृष्णो वा परुषो मृदुरनवस्थितास्तोदादयश्चात्र वेदनाविशेषा भवन्ति । पित्तशोफः पीतो मृदुः सरक्तो वा शीघ्रानुसारी चोषादयश्चात्र वेदनाविशेषा भवन्ति । श्लेष्मशोफः पाण्डुः शुक्लो वा कठिनः शीतः स्निग्धो मन्दानुसारी कण्ड्वादयश्चात्र वेदनाविशेषा भवन्ति । सर्व्ववर्णवेदनःसन्निपातजः । पित्तवच्छोणितजोऽतिकृष्णश्च । पित्तरक्तलक्षण आगन्तुर्लोहितावभासश्च ।

स यदा वाह्याभ्यन्तरैः क्रियाविशेषैर्न सम्भावितः प्रशमयितुं क्रियाविपर्य्ययाद्बहुत्वाद्वा दोषाणां तदा पाकाभिमुखो भवति । तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय । तत्र मन्दोष्मता त्वक्सवर्णता शीतशोफता स्थैर्य्यं मन्दवेदनताल्पशोफता चामलक्षणमुद्दिष्टं । सूचिभिरिव निस्तुद्यते दश्यत इव पिपीलिकाभिस्ताभिश्च संसृप्यत इव छिद्यत इव शस्त्रेण भिद्यत इव शक्तिभिस्ताड्यत इव दण्डेन पीड्यत इव पाणिना घट्टयत इव चाङ्गुल्या दह्यते पच्यत इव चाग्निक्षाराभ्यामोषचोषपरीदाहाश्च

भवन्ति वृश्चिकविद्ध इवच स्थानासनशयनेषु न शान्तिमुपैति । आध्मानवस्तिरिवाततश्च शोफो भवति त्वग्वैवर्ण्यं शोफाभिवृद्धिर्ज्वरदाहपिपासाभक्तारुचिश्च पच्यमानलिङ्गं ॥ वेदनोपशान्तिः पाण्डुताल्पशोफता वलीप्रादुर्भावस्त्वक्परिपुटनं निम्नदर्शनमङ्गुल्यावपीडिते प्रत्युन्नमनं वस्ताविवोदकसञ्चरणं पूयस्य प्रपीडयत्येकमन्तमन्ते वावपीडिते मुहुर्मुहुस्तोदः कण्डूरनुन्नतता च व्याधेरुपद्रवशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गं ॥ कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषग्मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्थौल्यमल्परुजताश्मवद्घनता न तत्र मोहमुपेयादिति ॥

भवन्ति चात्र । आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक् ।
जानीयात्स भवेद्वैद्यः शेषास्तस्करवृत्तयः ॥

वातादृते नास्ति रुजा न पाकः पित्तादृते नास्ति कफाच्च पूयः ।
तस्मात्समस्ताः परिपाककाले पचन्ति शोफांस्त्रय एव दोषाः ॥
कालान्तरेणाभ्युदितन्तु पित्तं कृत्वा वशे वातकफौ प्रसह्य ।
पचत्यतः शोणितमेष पाको मतोऽपरेषां विदुषां द्वितीयः ॥

तत्रामच्छेदे मांससिरास्नाय्वस्थिसन्धिव्यापादनमतिमात्रं शोणितातिप्रवृत्तिर्वेदनाप्रादुर्भावोऽवदरणमनेकोपद्रवदर्शनं क्षतविद्रधिर्वा भवति । स यदा भयमोहाभ्यां पक्वमप्यपक्वमिति मन्यमानश्चिरमुपचते व्याधिं वैद्यस्तदा गम्भीरानुगतो द्वारमलभमानः पूयः

समाश्रयमवदीर्य्यात्मजं महान्तमवकाशं कृत्वा नाडीं जनयित्वा कृच्छ्रसाध्या भवत्यसाध्या वेति।

भवन्तिचात्र। यश्छिनत्त्याममज्ञानाद्यश्च पक्वमुपेक्षते।

अश्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ॥

प्राक् शस्त्रकर्म्मणश्चेष्टं भोजयेदातुरं भिषक्।

मद्यपं पाययेन्मद्यं तीक्ष्णं योऽवेदनासहः॥

न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते।

तस्मादवश्यं भोक्तव्यं रोगेषूक्तेषु कर्म्मणि॥

प्राणो ह्याभ्यन्तरो नृणां बाह्यप्राणगुणान्वितः।

धारयत्यविरोधेन शरीरं पाञ्चभौतिकं।

अल्पो महान्वा क्रियया विना यः समुच्छ्रितः पाकमुपैति शोफः।

विशालमूलो विषमो विदग्धः स कृच्छ्रतां यात्यवगाढदोषः॥

आलेपविस्रावणशोधनैश्च सम्यक्प्रयुक्तैर्यदि नोपशाम्येत्।

पच्येत शीघ्रं सममल्पमूलः स पिण्डितश्चोपरि चोन्नतः स्यात्॥

कक्षं समासाद्य यथैव वह्निर्वाय्वीरितः सन्दहति प्रसह्य।

तथैव पूयोऽप्यविनिःसृतो हि मांसं शिरास्नायुच खादतीह॥

आदौ विम्लापनं कुर्य्याद्द्वितीयमवसेचनं।

तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियां॥

पञ्चमं शोधनं कुर्य्यात् षष्ठं रोपणमिष्यते।

एते क्रमा व्रणस्योक्ताः सप्तमं वैकृतापहं।

## ॥ अष्टादशोऽध्यायः ॥

अथातो व्रणालेपनबन्धविधिमध्यायं व्याख्यास्यामः ।

आलेप आद्य उपक्रम एष सर्व्वशोफानां सामान्यः प्रधानतमश्च तञ्च प्रतिरोगं वक्ष्यामः । ततो बन्धः प्रधानं तेन शुद्धिर्व्रणरोपणमस्थिसन्धिस्थैर्य्यञ्च तत्र प्रतिलोममालिम्पेत्नानुलोमं प्रतिलोमे हि सम्यगौषधमवतिष्ठतेऽनुप्रविशति रोमकूपान् स्वेदवाहिभिः सिरामुखैश्च वीर्य्यं प्राप्नोति । नच शुष्यमाणमुपेक्षेतान्यत्रपीडयितव्यात् । शुष्को ह्यपार्थकोऽरुष्करश्च । स त्रिविधः प्रलेपः प्रदेह आलेपश्च तेषामन्तरं प्रलेपःशीतस्तनुरविशोषी विशोषीच । प्रदेहस्तूष्णःशीतोवा वहलोऽवहुररिशोषी च। मध्यमोऽत्रालेपः। तत्ररक्तपित्तप्रसादकृदालेपः । प्रदेहो वातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोफवेदनापहश्च तस्योपयोगः क्षताक्षतेषु । यस्तु क्षतेषूपयुज्यते स भूयःकल्क इति संज्ञां लभते निरुद्धालेपनसंज्ञस्तेनास्रावसंनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषता व्रणशुद्धिश्च भवति ॥

अविदग्धेषु शोफेषु हितमालेपनं भवेत् ।
यथास्वं दोषशमनं दाहकण्डूरुजापहं ॥
त्वक्प्रसादनमेवाग्र्यं मांसरक्तप्रसादनं ।
दाहप्रशमनं श्रेष्ठं तोदकण्डूविनाशनं ॥
मर्म्मदेशेषु ये रोगा गुह्येष्वपि तथा नृणां ।
संशोधनाय तेषां हि कुर्य्यादालेपनं भिषक् ॥

षड्भागं पैत्तिके स्नेहं चतुर्भागन्तु वातिके ।
अष्टभागन्तु कफजे स्नेहमात्रां प्रदापयेत् ॥

तस्य प्रमाणमार्द्रमाहिषचर्म्मोत्सेधमुपदिशन्ति । नचोलंप रात्रौ प्रयुञ्जीत माभूच्छैत्यपिहितोष्मणस्तदनिर्गमादिकारप्रवृत्ति रिति ।

प्रदेहसाध्ये व्याधौ तु हितमालेपनं दिवा ।
पित्तरक्ताभिघातोत्थे सविषे च विशेषतः ॥
नच पर्य्युषितं लेपं कदाचिदवचारयेत् ।
उपर्य्युपरि लेपन्तु न कदाचित् प्रदापयेत् ।
उष्माणं वेदनां दाहं घनलाज्जनयेत्स हि ॥
नच तेनैव लेपेन प्रदेहं दापयेत्पुनः ।
शुष्कभावात्स निर्वीर्य्यो युक्तोऽपि स्यादपार्थकः ॥

अतऊर्द्धं व्रणबन्धनद्रव्याण्युपदेच्यामः । तद्यथा चौमकार्प्पासाविकदुकूलकौशेयपत्त्रोर्णचीनपट्टचर्म्मान्तर्व्वल्कलालावूशकललताविदलरज्जुतूलफलसन्तानिकालौहानीति तेषां व्याधिं कालं चावेच्योपयोगः प्रकरणतश्चैषामादेशः ॥

तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिकायमकखट्टाचीनविबन्धवितानगोफणाः पञ्चाङ्गी चेति चतुर्दशबन्धविशेषाः । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र कोशमङ्गुष्ठाङ्गुलिपर्व्वसु विदध्यात् । दाम सम्बाधेऽङ्गे । सन्धिकूर्चकभ्रूस्तनान्तरतलकर्णेषु स्वस्तिकं । अनुवेल्लितन्तु शाखासु । ग्रीवामेढ्रयोः प्रतोलीं । वृत्ते

ऽङ्गे मण्डलं। अङ्गुष्ठाङ्गुलिमेढ्राग्रेषु स्थगिकां। यमलव्रणयोर्यमकं। हनुशङ्खगण्डेषु खट्वां। अपाङ्गयोश्चीनं। पृष्ठोदरोरःसु विबन्धं। मूर्द्धनि वितानं। चिवुकनासौष्ठांसवस्तिषु गोफणां। जत्रुण ऊर्द्धं पञ्चाङ्गीमिति। यो वा यस्मिन् शरीरप्रदेशे सुनिविष्टो भवति तं तस्मिन् विदध्यात्। यन्त्रणमत ऊर्द्धमधस्तिर्य्यक् च॥

तत्र घनां कवलिकां दत्वा वामहस्तपरिक्षेपमृजुमनाविद्धमसङ्कुचितं मृदुपट्टं निवेश्य बध्नीयात्। न च व्रणस्योपरि कुर्य्याद्ग्रन्थिमाबाधकरं वा। न च विकेशिकौषधे अतिस्निग्धे अतिरूक्षे विषमे वा कुर्व्वीत यस्मादतिस्नेहात् क्लेदो रौक्ष्याच्छेदो दुर्न्यासाद्व्रणवर्त्मावघर्षणमिति।

तत्र व्रणायतनविशेषाद्बन्धविशेषस्त्रिविधो भवति गाढः समः शिथिल इति।

पीडयन्नरुजो गाढः सोच्छ्वासः शिथिलः स्मृतः।
नैव गाढो न शिथिलः समो बन्धः प्रकीर्त्तितः॥

तत्र स्फिक्कुक्षिकक्षावङ्क्षणोरःशिरःसु गाढः। शाखावदनकर्णकण्ठमेढ्रमुष्कपृष्ठपार्श्वोदरोरस्सु समः। अक्ष्णोः सन्धिषु च शिथिल इति। तत्र पैत्तिकं गाढस्थाने समं बध्नीयात् समस्थाने शिथिलं शिथिलस्थाने नैवं शोणितदुष्टञ्च। श्लैष्मिकं शिथिलस्थाने समं समस्थाने गाढं गाढस्थाने गाढतरमेवं वातदुष्टञ्च। तत्र पैत्तिकं शरदि ग्रीष्मे द्विरह्नो बध्नीयाद्रक्तोपद्रुतमप्येवं श्लैष्मिकं हेमन्तवसन्तयोस्त्र्यहाद्वातोपद्रुतमप्येवं। एवमभ्यूह्य बन्धविपर्य्ययञ्च कुर्व्वीत।

तत्र समशिथिलस्थानेषु गाढबद्धे विकेशिकौषधनैरर्थक्यं शोफ वेदनाप्रादुर्भावश्च। गाढसमस्थानेषु शिथिलबद्धे विकेशिकौषधपतनं पट्टसञ्चाराद्व्रणवर्त्मावघर्षणमिति। गाढशिथिलस्थानेषु समं बद्धे च गुणाभाव इति। अविपरीतबन्धे वेदनोपशान्तिरसृक्प्रसादो मार्दवञ्च। अबध्यमानो दंशमशककृणकाष्ठोपलपांशुशीतवातातप प्रभृतिभिर्व्विशेषैरभिहन्यते व्रणो विविधवेदनोपद्रुतश्च दुष्टतामुपैत्यालेपनादीनि चास्य विशोषमुपयान्ति॥

चूर्णितं मथितं भग्नं विश्लिष्टमतिपातितं।
अस्थि स्नायुसिराछिन्नमाशु बन्धेन रोहति॥
सुखमेवं व्रणो शेते सुखं गच्छति तिष्ठति।
सुखं शय्यासनस्थस्य चिरं संरोहति व्रणः॥

अबन्ध्याः पित्तरक्ताभिघातविषनिमित्ता यदा च शोफदाहपाकरागवेदनाभिभूताः चाराग्निदग्धाः पाकात् प्रकुपिताः प्रविशीर्ण मांसाश्च भवन्ति।

कुष्ठिनामग्निदग्धानां पिडका मधुमेहिनां।
कर्णिकाश्चोन्दुरुविषे विषजुष्टव्रणाश्च ये॥
मांसपाके न बध्यन्ते गुदपाके च दारुणे।
स्वबुद्ध्या चापि विभजेत् कृत्याकृत्यांश्च बुद्धिमान्॥
देशं दोषंच विज्ञाय व्रणञ्च व्रणकोविदः।
ऋतुंश्च परिसंख्याय ततो बन्धान् निवेशयेत्॥
ऊर्द्धं तिर्य्यगधस्ताच्च यन्त्रणा त्रिविधा मता।

यथा च बध्यते बन्धस्तथा वच्याम्यशेषतः ॥
घना कवलिका दत्ता मृदु चैवापि पट्टकं ।
विकेशिकामौषधञ्च नातिस्निग्धं समाचरेत् ॥
प्रक्लेदयत्यतिस्निग्धा तथा रूक्षा चिणोति च ।
युक्तस्नेहा रोपयति दुर्न्यस्ता वर्त्म घर्षति ॥
विषमंच व्रणं कुर्य्यात् स्तम्भयेत्स्रावयेत्तथा ।
यथाव्रणं विदित्वा तु योगं वैद्यः प्रयोजयेत् ॥
पित्तजे रक्तजे वापि सकृदेव परिचिपेत् ।
असकृत्कफजे वापि वातजे च विचक्षणः ॥
तलेन प्रतिपोड्याथ स्रावयेदनुलोमतः ।
सर्व्वांश्च बन्धान् गूढांस्तान् सर्व्वांश्च विनिवेशयेत् ॥
ओष्ठस्याप्येष सन्धाने यथोद्दिष्टो विधिः स्मृतः ।
बुद्ध्वा्त्मेच्छयाभियुक्तेन तथा चास्थिषु जानता ॥
उत्तिष्ठतो निषण्णस्य शयनं चापि गच्छतः ।
गच्छतो विविधैर्यानैर्नास्य दुष्यति स व्रणः ॥
ये च स्युर्मांससंस्था वै लग्गतास्च तथा व्रणाः ।
सन्ध्यस्थिकोष्ठप्राप्ताश्च सिरास्नायुगतास्तथा ॥
तथावगाढगम्भीराः सर्व्वतो विषमस्थिताः ।
नैते साधयितुं शक्या ऋते बन्धाद्भवन्ति हि ॥

---

## एकोनविंशोऽध्यायः ॥

अथातो व्रणितोपासनीयमध्यायं व्याख्यास्यामः ॥

व्रणिनः प्रथममेवागारमन्विच्छेत्तच्चागारं प्रशस्तवास्त्वादिकं कार्य्यं।

प्रशस्तवास्तुनि गृहे शुचावातपवर्ज्जिते।
निवाते नच रोगाः स्युः शारीरागन्तुमानसाः॥

तस्मिन् शयनमसम्बाधं स्वास्तीर्णं मनोज्ञं प्राक्शिरस्कं सशस्त्रं कुर्व्वीत।

सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णे शयने व्रणी।
प्राच्यां दिशि स्थिता देवास्तत्पूजार्थं नतं शिरः॥

तस्मिन् सुहृद्भिरनुकूलैः प्रियम्वदैरुपास्यमानो यथेष्टमासीत।

सुहृदो विक्षिपन्त्याशु कथाभिर्व्रणवेदनाः।
आश्वासयन्तो बहुशस्त्वनुकूलाः प्रियम्वदाः॥

नच दिवा निद्रावशगः स्यात्।

दिवास्वप्नाद्व्रणे कण्डूर्गात्राणां गौरवं तथा।
श्वयथुर्व्वेदना रागः स्रावश्चैव भृशं भवेत्॥

उत्थानसंवेशनपरिवर्त्तनचंक्रमणोच्चैर्भाषणादिषु चात्मचेष्टासु प्रमत्तो व्रणं संरक्षेत्।

स्थानासनं चंक्रमणं यानयानातिभाषणं।
व्रणवान्न निषेवेत शक्तिमानपि मानवः॥
उत्थानाद्यासनं स्थानं शय्यां चातिनिषेविता।

प्राप्नुयान्मारुतादङ्गे रुजस्तम्भादिवर्ज्जयेत् ॥

गम्यानाञ्च स्त्रीणां सन्दर्शनसम्भाषणसंस्पर्शनानि दूरतः परिहरेत्।

स्त्रीदर्शनादिभिः शुक्रं कदाचिच्चलितं स्रवेत्।

ग्राम्यधर्म्मकृतान् दोषान् सोऽसंसर्गेऽप्यवाप्नुयात् ॥

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्ललवणकटुकगुडपिष्टविकृतिवल्लूरशुष्कशाकाजाविकानूपौदकमांसवसाशीतोदककृशरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत्।

तक्रान्तो नवधान्यादिर्य्योऽयं वर्गः प्रकीर्त्तितः।

दोषसञ्जननो ह्येष विज्ञेयः पूयवर्द्धनः ॥

मद्यपश्च मैरेयाऽरिष्टासवसीधुसुराविकारान् परिहरेत्।

मद्यमम्लं तथा रूक्षं तीक्ष्णमुष्णञ्च वीर्य्यतः।

आशुकारि च तत्पीतं क्षिप्रं व्यापादयेद्व्रणं ॥

वातातपरजोधूमावश्यायातिसेवनातिभोजनानिष्टश्रवणदर्शनेर्ष्यामर्षभयक्रोधशोकध्यानरात्रिजागरणविषमाशनानशनशयनोपवासवाग्व्यायामस्थानचंक्रमणशीतवातविरुद्धाशनाजीर्णमक्षिकाद्याबाधाः परिहरेत् ॥

व्रणिनः संप्रतप्तस्य कारणैरेवमादिभिः।

क्षीणशोणितमांसस्य भुक्तं सम्यक् न जीर्य्यति ॥

अजीर्णात्पवनादीनां विभ्रमो बलवान् भवेत्।

ततः शोफरुजास्रावदाहपाकानवाप्नुयात् ॥

सदा नीचनखरोम्णा शुचिना शुक्लवाससा शान्तिमङ्गलदेवता

ब्राह्मणगुरुपरेण भवितव्यमिति। तत् कस्य हेतोर्हिंसाविहाराणि हि महावीर्य्याणि रक्षांसि पशुपतिकुवेरकुमारानुचराणि मांस शोणितप्रियत्वात् क्षतजनिमित्तं व्रणिनमुपसर्पन्ति सत्कारार्थं जिघांसन्ति वा कदाचित्॥

भवतिचात्र॥ तेषां सत्कारकामानां प्रयतेतान्तरात्मना।
धूपवल्युपहारांश्च भक्ष्यांश्चैवोपहारयेत्॥

ते तु सन्तर्प्पिता आत्मवन्तं न हिंस्युः। तस्मात्सततमतन्द्रितो जनपरिवृतो नित्यदीपोदकशस्त्रस्रग्दामपुष्पलाजाद्यलङ्कृते वेश्मनि सम्पन्मङ्गलमनोनुकूलाः कथाः शृण्वन्नासीत॥

सम्पदाद्यनुकूलाभिः कथाभिः प्रीतमानसः।
आशावान्व्याधिमोक्षाय क्षिप्रं सुखमवाप्नुयात्॥

ऋग्यजुःसामाथर्व्ववेदाभिहितैरपरैश्चाशीर्विधानैरुपाध्याया भिषजश्च सन्ध्ययो रक्षां कुर्य्युः॥

सर्षपारिष्टपत्राभ्यां सर्पिषा लवणेन च।
द्विरह्नः कारयेद्धूपं दशरात्रमतन्द्रितः॥

छत्रातिछत्रे लाङ्गूलीं जटिलां ब्रह्मचारिणीं लक्ष्मीं गुहामतिगुहां शतवीर्य्यां सहस्रवीर्य्यां सिद्धार्थांश्च शिरसा धारयेत्॥

वीज्येत वालव्यजनैर्व्रणं नच विघट्टयेत्।
न तुदेन्नच कण्डूयेच्छयानः परिपालयेत्॥
अनेन विधिना युक्तमादावेव निशाचराः।
वनं केसरिणाक्रान्तं वर्ज्जयन्ति मृगा इव॥

जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरं ।
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति ॥
तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकैः ।
बालमूलकवार्त्ताकपटोलैः कारवेल्लकैः ॥
सदाडिमैः सामलकैर्घृतभृष्टैः ससैन्धवैः ।
अन्यैरेवं गुणैर्वापि मुद्गादीनां रसेन वा ॥
सक्तून् विलेपीं कुल्माषं जलञ्चापि शृतं पिबेत् ।
व्रणे श्वयथुरायासात् स च रागश्च जागरात् ॥
तौ च रुक् दिवास्वापात् ताश्च मृत्युश्च मैथुनात् ॥
दिवा न निद्रावशगो निवातगृहगोचरः ।
व्रणी वैद्यवशे तिष्ठन् शीघ्रं व्रणमपोहति ॥
एवं वृत्तसमाचारो व्रणी सम्पद्यते सुखी ।
आयुश्च दीर्घमाप्नोति धन्वन्तरिवचो यथा ॥

---

## ॥ विंशतितमोऽध्यायः ॥

अथातो हिताहितीयमध्यायं व्याख्यास्यामः ॥

यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चि द्रव्यमेकान्तेन हितमहितं वास्तीति केचिदाचार्य्या ब्रुवते तत्तु न सम्यक्। इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्तहि तान्येकान्ताहितानि हिताहितानि च भवन्ति । तत्रैकान्त हितानि जातिसात्म्यात् सलिलघृतदुग्धौदनप्रभृतीनि । एकान्ता हितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निक्षारविषादीनि।

संयोगादपराणि विषतुल्यानि भवन्ति। हिताऽहितानि तु यद्वा योः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्व्वप्राणिनामयमाहारार्थं वर्ग उपदिश्यते।

तद्यथा रक्तशालिषष्टिकगङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदक कालकाशनकपुष्पककर्द्दमकशकुनाहृतसुगन्धककलमनीवारकोद्रवो द्दालकश्यामाकगोधूमवेणुयवादयः। एणहरिणकुरङ्गमृगमातृका श्वदंष्ट्राकरालक्रकरकपोतलावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकादी नां मांसानि। मुद्गवनमुद्गमकुष्ठकलायमसूरमङ्गल्यचणकहरेणवा ढकीसतीनाः। चिल्लिवास्तुक सुनिषण्णकजीवन्तीतण्डुलीयकमण्डूक पर्ण्यः। गव्यं घृतं सैन्धवदाडिमामलकमित्येषवर्गः सर्व्वप्राणिनां सामान्यतः पथ्यतमः। तथा ब्रह्मचर्य्यानिवातशयनोष्णोदकनिशा स्वप्नव्यायामा श्चैकान्ततः पथ्यतमाः। एकान्तहितान्येकान्ताहितानि प्रागुपदिष्टानि॥ हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्या पथ्यमिति॥

संयोगतस्त्वपराणि विषतुल्यानि भवन्ति। तद्यथा। वल्ली फलकवककरीराम्लफललवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशु ष्कशाकाजाविकमांसमद्यजाम्बवचिलिचिममत्स्यगोधावराहांश्च नै कध्यमश्नीयात् पयसा।

रोगं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान्।
अवेक्ष्याग्न्यादिकान्भावान् रोगवृत्तेः प्रयोजयेत्॥
अवस्थान्तरबाहुल्याद्रोगादीनां व्यवस्थितं।

द्रव्यं नेच्छन्ति भिषज इच्छन्ति स्वस्वरचणे ॥
द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः।
दुग्धस्यैकान्तहिततां विषमेकान्ततोऽहितं ॥
एवं युक्तरसाद्येषु द्रव्येषु सलिलादिषु।
एकान्तहिततां विद्धि वत्स सुश्रुत नान्यथा ॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः ॥ न च विरूढधान्यैर्व्वसामधुपयोगुडमाषैर्व्वा ग्राम्यानूपौदकपिशितादीनि नाभ्यवहरेत्। न पयोमधुभ्यां रोहिणीशाकं जातुशाकं वाश्नीयात्। बलाकां वारुणीकुल्माषाभ्यां। काकमाचीं पिप्पलीमरिचाभ्यां। नाडीभङ्गशाककुक्कुटदधीनि च नैकध्यं। मधु चोष्णोदकानुपानं। पित्तेन वा मांसानि। सुराकृशरापायसांश्च नैकध्यं। सौविरकेण सह तिलशष्कुलीं। मत्स्यैः सहेक्षुविकारान्। गुडेन काकमाचीं मधुना मूलकं गुडेन वाराहं मधुना च सह विरुद्धं। क्षीरेण मूलकं। आम्रजाम्बवश्वाविच्छूकरगोधाश्च सर्व्वांश्च मत्स्यान्विशेषेण चिलिचिमं पयसा। कदलीफलं तालफलेन पयसा दध्ना तक्रेण वा। लकुचफलं पयसा दध्ना माषसूपेन वा मधुना घृतेन च। प्राक्पयसः पयसोऽन्ते वा।

अतः कर्म्मविरुद्धान् वक्ष्यामः ॥ कपोतान् सर्षपतैलभृष्टान्नाद्यात्। कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्व्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात्। कांस्यभाजने दशरात्रपर्य्युषितं सर्पिर्म्मधु चोष्णैरुष्णे वा। मत्स्यपरिपचने शृङ्गवेरपरिपचने वा सिद्धां काकमाचीं। तिलकल्कसिद्धमुपोदिकाशाकं। नारिकेलेन वराह

वसापरिभृष्टां बलाकां। भासमङ्गारशूल्यं नाश्नीयादिति॥

अतो मानविरुद्धान् वक्ष्यामः॥ मध्वम्बुनी मधुसर्पिषी मान तस्तुल्ये नाश्नीयात्। स्नेहौ मधुस्नेहौ जलस्नेहौ वा विशेषादान्तरी क्षोदकानुपानौ।

अतऊर्द्ध्वं रसद्वन्द्वानि रसतो वीर्य्यतो विपाकतश्च विरुद्धानि वक्ष्यामः॥ तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च मधुरक टुकौ च सर्व्वतः। मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ल लवणौ रसतः। अम्लकटुकौ रसविपाकाभ्यामम्लतिक्तावम्लकषायौ च सर्व्वतः। लवणकटुकौ रसविपाकाभ्यां लवणतिक्तौ लवणकषायौ च सर्व्वतः। कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः। तरतमयोगयुक्तांश्च भावानतिरुक्षानतिस्निग्धानत्युष्णानतिशीता नित्येवमादीन् विवर्ज्जयेत्॥

भवन्ति चात्र॥ विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः।

तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितं॥

व्याधिमिन्द्रियदौर्ब्बल्यं मरणञ्चाधिगच्छति।

विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः॥

यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत्।

रसादिष्वयथार्थं वा तद्विकाराय कल्पते॥

विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनं।

वमनं शमनं वापि पूर्व्वं वा हितसेवनं॥

सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च।

स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥

व्यायामशीलो बलवान्स्निग्धश्च स्निग्धोऽग्निमांश्चापि महाशनश्च ।
आप्नोति रोगान्न विरुद्धजातानभ्यासतो वाल्पतया च जन्तुः ॥

अथ वातगुणान् वक्ष्यामः ॥

पूर्व्वः समधुरः स्निग्धो लवणश्चैव मारुतः ।
गुरुर्व्विदाहजननो रक्तपित्ताभिवर्द्धनः ॥
क्षतानां विषजुष्टानां व्रणिनः श्लेष्मलाश्च ये ।
तेषामेव विशेषेण सदा रोगविवर्द्धनः ॥
वातलानां प्रशस्तश्च श्रान्तानां कफशोषिणां ।
तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः ॥
मधुरश्चाविदाही च कषायानुरसो लघुः ।
दक्षिणो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्द्धनः ।
रक्तपित्तप्रशमनो नच वातप्रकोपणः ॥
विशदो रूक्षपरुषः खरः स्नेहबलापहः ।
पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः ।
सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणां ॥
उत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च ।
कषायानुरसः शीतो दोषाणामप्रकोपणः ॥
तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्द्धनः ।
क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः ॥

॥ एकविंशतितमोऽध्यायः ॥

अथातो व्रणप्रश्नमध्यायं व्याख्यास्यामः ॥

वातपित्तश्लेष्माण एव देहसम्भवहेतवः। तैरेवाव्यापन्नैरधोमध्योर्द्ध्वसन्निविष्टैः शरीरमिदं धार्य्यते ऽगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके। त एव च व्यापन्नाः प्रलयहेतवस्तदेभिरेव शोणितचतुर्थैः सम्भवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति॥

भवति चात्र॥ नर्त्ते देहः कफादस्ति न पित्तान्नच मारुतात्।
शोणितादपि वा नित्यं देह एतैस्तु धार्य्यते॥

तत्र वा गतिगन्धनयोरिति धातुः तप सन्तापे श्लिष आलिङ्गने। एतेषां कृदिहितैः प्रत्ययै र्वातः पित्तं श्लेष्मेति च रूपाणि भवन्ति॥

दोषस्थानान्यत ऊर्द्ध्वं वक्ष्यामः॥ तत्र समासेन वातः श्रोणिगुदसंश्रयः। श्रोणिगुदयोरुपर्य्यधो नाभेः पक्वाशयः पक्वामाशयमध्यं पित्तस्य। आमाशयः श्लेष्मणः। अतःपरं पञ्चधा विभज्यन्ते तत्रवातस्य वातव्याधौ वक्ष्यामः। पित्तस्य यकृत् प्लीहानौ हृदयं दृष्टिस्त्वक् पूर्व्वोक्तञ्च। श्लेष्मणस्तूरः शिरःकण्ठसन्धय इति पूर्व्वोक्तञ्च। एतानि खलु दोषाणां स्थानान्यव्यापन्नानां।

भवति चात्र॥ विसर्गादानविक्षेपैः सोमसूर्य्यानिला यथा।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥

अत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निराहोस्वित्पित्तमेवाग्निरिति। अत्रोच्यते। न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते

आग्नेयत्वात्पित्ते दहनपचनादिष्वभिवर्त्तमानेऽग्निवदुपचारः क्रियतेऽन्तरग्निरिति क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति। तच्चादृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति विवेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा। यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा स रसस्य रागकृदुक्तः। यत् पित्तं हृदयसंस्थितं तस्मिन्साधकोऽग्निरिति संज्ञा सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः। यद्दृष्ट्यां पित्तं तस्मिन्नालोचकोऽग्निरिति संज्ञा सरूपग्रहणेऽधिकृतः। यत्तु त्वचि पित्तं तस्मिन्भ्राजकोऽग्निरिति संज्ञा सोऽभ्यङ्गपरिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छायानाञ्च प्रकाशकः॥

भवति चात्र॥ पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च।
उष्णं कटुरसञ्चैव विदग्धं चाम्लमेव च॥

श्लेष्मस्थानान्यत ऊर्द्ध्वं वक्ष्यामः। तत्रामाशयः पित्ताशयस्योपरिष्टात्तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्विधस्याहारस्याधारः। सच तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति।

माधुर्य्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च।
आमाशये सम्भवति श्लेष्मा मधुरशीतलः॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदक कर्म्मणानुग्रहं करोति। उरःस्थस्त्रिकसन्धारणमात्मवीर्य्येणान्नरसस हितेन हृदयावम्बलनं करोति। जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते। शिरस्थः स्नेहसन्तर्पणाधिकृतत्वा दिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति। सन्धिस्थस्तु श्लेष्मा सर्व्व सन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति।

भवति चात्र॥ श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः॥

शोणितस्य स्थानं यकृत्प्लीहानौ तच्च प्रागभिहितं तत्रस्थमेव शोणितस्थानानामनुग्रहं करोति।

भवति चात्र॥ अनुष्णशीतं मधुरं स्निग्धं रक्तञ्च वर्णतः।
शोणितं गुरु विस्रं स्याद्विदाहश्चास्य पित्तवत्॥

एतानि खलु दोषस्थानान्येषु सञ्चीयन्ते दोषाः प्राक्सञ्चयहेतुरुक्तः। तत्र सञ्चितानां दोषाणां स्तब्धपूर्णकोष्ठता पीतावभासता मन्दो ष्मताचाङ्गानां गौरवमालस्यं चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति तत्र प्रथमः क्रियाकालः।

अतऊर्द्ध्वं प्रकोपणानि वक्ष्यामः। तत्र बलवद्विग्रहातिव्यायाम व्यवायाध्ययनप्रपतनप्रधावनप्रपीडनाभिघातलङ्घनप्लवनतरणरात्रि जागरणभारहरणगजतुरङ्गरथपदातिचर्य्याकटुकषायतिक्तरूक्ष लघुशीतवीर्य्यशुष्कशाकवल्लूरवरकोद्दालककोरदूषश्यामाकनीवार मुद्गमसूराढकीहरेणुकलायनिष्पावानशनविषमाशनाध्यशनवातमू

त्पुरीषशुक्रच्छर्दिक्षवथूद्गारवाष्पवेगविघातादिभिर्विशेषैर्वायुः प्रकोपमापद्यते ॥

स शीताभ्रप्रवातेषु घर्म्मान्ते च विशेषतः ।
प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ॥

क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवणतीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसीहरितकशाकगोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविकाराम्लफलकट्वरात्क्रप्रभृतिभिः पित्तं प्रकोपमापद्यते ।

तदुष्णैरुष्णकाले च मेघान्ते च विशेषतः ।
मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति ॥

दिवास्वप्नाव्यायामालसमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाविसमृणालकशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ।

स शीतैः शीतकाले च वसन्ते च विशेषतः ।
पूर्व्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ॥

पित्तप्रकोपणैरेव चाभीक्ष्णं द्रवस्निग्धगुरुभिश्चाहारैर्दिवास्वप्नक्रोधानलातपश्रमाभिघाताजीर्णविरुद्धाध्यशनादिभिरसृक् प्रकोपमापद्यते ।

यस्माद्रक्तं विना दोषैर्न्न कदाचित् प्रकुप्यति।
तस्मात्तस्य यथादोषं कालं विद्यात्प्रकोपणे ॥

तेषां प्रकोपात्कोष्ठतोदसञ्चरणाम्लिकापिपासापरिदाहान्नद्वेषहृदयोत्क्लेदाश्च जायन्ते। तत्र द्वितीयः क्रियाकालः॥

अत ऊर्द्ध्वं प्रसरं वक्ष्यामः। तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात्प्रसरणहेतुः सत्यप्यचैतन्ये सहि रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानां। यथामहानुदकसञ्चयोऽतिवृद्धः सेतुमवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति। तद्यथा। वातः पित्तं श्लेष्मा शोणितं। वातपित्ते वातश्लेष्माणौ पित्तश्लेष्माणौ वातशोणिते पित्तशोणिते श्लेष्मशोणिते। वातपित्तशोणितानि वातश्लेष्मशोणितानि पित्तश्लेष्मशोणितानि। वातपित्तकफा वातपित्तकफशोणितानीत्येवं पञ्चदशधा प्रसरन्ति॥

कृत्स्नेऽर्द्धेऽवयवे वापि यत्राङ्गे कुपितो भृशं।
दोषो विकारं नभसि मेघवत्तत्र वर्षति॥
नात्यर्थं कुपितश्चापि लीनो मार्गेषु तिष्ठति।
निःप्रत्यनीकः कालेन हेतुमासाद्य कुप्यति॥

तत्र वायोः पित्तस्थानगतस्य पित्तवत् प्रतीकारः पित्तस्य कफस्थानगतस्य कफवत् कफस्य च वातस्थानगतस्य वातवदेष क्रियाविभागः॥ एवं प्रकुपितानां प्रसरतांच वायोर्व्विमार्गगमनाटोपौ।

उषाचोषपरिदाहधूमायनानि पित्तस्य। अरोचकाविपाकाङ्गसाद च्छर्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति। तत्र तृतीयः क्रियाकालः॥

अतऊर्द्ध्वं स्थानसंश्रयं वक्ष्यामः॥ एवं कुपितास्तांस्तान् शरीर प्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति। ते यदोदरसन्निवेशं कुर्व्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाहविसूचिकातिसारप्रभृतीन् जनयन्ति। वस्तिगताः प्रमेहाश्मरीमूत्राघातमूत्रदोषप्रभृतीन्। मेढ्रगता निरुद्धप्रकाशोपदंशशूकदोषप्रभृतीन्। गुदगता भगन्दरार्शःप्रभृतीन्। वृषणगता वृद्धीः। ऊर्द्ध्वजत्रुगतास्तूर्द्ध्वजान्। त्वङ्मांसशोणितस्थाः क्षुद्ररोगान् कुष्ठानि विसर्पांश्च। मेदोगता ग्रन्थ्यपच्यर्बुदगलगण्डालजीप्रभृतीन्। अस्थिगता विद्रध्यनुशयीप्रभृतीन्। पादगताः श्लीपदवातशोणितवातकण्टकप्रभृतीन्। सर्व्वाङ्गगता ज्वरसर्व्वाङ्गरोगप्रभृतीन्। तेषामेवमभिनिविष्टानां पूर्व्वरूपप्रादुर्भावस्तमति रोगं वक्ष्यामः। तत्र पूर्व्वरूपगतेषु चतुर्थः क्रियाकालः॥

अतऊर्द्ध्वं व्याधिदर्शनं वक्ष्यामः। शोफार्बुदग्रन्थिविद्रधिविसर्पप्रभृतीनां प्रव्यक्तलक्षणता ज्वरातिसारप्रभृतीनाञ्च। तत्र पञ्चमः क्रियाकालः॥

अतऊर्द्ध्वमेतेषामवदीर्णानां व्रणभावमापन्नानां षष्ठः क्रियाकालः। ज्वरातिसारप्रभृतीनाञ्च दीर्घकालानुबन्धः। तत्राप्रतिक्रियमाणेऽसाध्यतामुपयान्ति॥

भवन्ति चात्र॥ सञ्चयञ्च प्रकोपञ्च प्रसरं स्थानसंश्रयं।
व्यक्तिं भेदञ्च यो वेत्ति दोषाणां स भवेद्भिषक्॥

सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गतीः।
ते तूत्तरासु गतिषु भवन्ति बलवत्तराः॥
द्वौ त्रिभिर्वा तैस्त्रिभिर्वापि द्वाभ्यामेकेन वा पुनः।
संसर्गे कुपितः क्रुद्धं दोषं दोषोऽनुधावति॥
संसर्गे यो गरीयान् स्यादुपक्रम्यः स वै भवेत्।
शेषदोषाविरोधेन सन्निपाते तथैवच॥
वृणोति यस्माद्रूढेऽपि व्रणवस्तु न नश्यति।
आदेहधारणात्तस्माद्व्रण इत्युच्यते बुधैः॥

---

॥ द्वाविंशतितमोऽध्यायः॥

अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः॥ त्वङ्मांससिरास्नाय्वस्थिसन्धिकोष्ठमर्म्माणीत्यष्टौ व्रणवस्तूनि। अत्र सर्व्वव्रणसन्निवेशः। तत्राद्यैकवस्तुसन्निवेशी त्वग्भेदी व्रणः सूपचरः शेषाः स्वयमवदीर्य्यमाणा दुरुपचाराः॥ तत्रायतश्चतुरस्रो वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः शेषास्तु विकृताकृतयो दुरुपक्रमा भवन्ति। सर्व्वएव व्रणाः चिप्रं संरोहन्त्यात्मवतां सुभिषग्भिश्चोपक्रान्ताः। अनात्मवतामज्ञैश्चोपक्रान्ताः प्रदुष्यन्ति प्रवृद्धत्वाद्दोषाणां। तत्रातिसंवृतोऽतिविवृतोऽतिकठिनोऽतिमृदुरुत्सन्नोऽवसन्नोऽतिशीतोऽत्युष्णः कृष्णरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांससिरास्नायुप्रभृतिपूर्णः पूतिपूयास्राव्युन्मार्ग्युत्सङ्गमनोज्ञदर्शनगन्धोऽत्यर्थं वेदनावान् दाहपाकरागकण्डूशोफपि

डकोपद्रुतोऽत्यर्थं दुष्टशोणितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रण लिङ्गानि । तस्य दोषोच्छ्रायेण षट्त्वं विभज्य यथास्वं प्रतीकारे प्रयतेत ॥

अतऊर्द्ध्वं सर्व्वस्रावान् वक्ष्यामः ॥ तत्र घृष्टासु छिन्नासु वा त्वक्षु स्फोटेषु भिन्नेषु विदारितेषु वा सलिलप्रकाशो भवत्यास्रावः किञ्चिद्विस्रः पीतावभासश्च ॥ मांसगतः सर्पिःप्रकाशः सान्द्रः श्वेतः पिच्छिलश्च । सिरागतः सद्यश्छिन्नासु सिरासु रक्तातिप्रवृत्तिः पक्कासु च तोयनाडीभिरिव तोयागमनं पूयस्यास्रावश्चात्रतनुर्व्विच्छिन्नः पिच्छिलोऽवलम्बी श्यावोऽवश्यायप्रतिमश्च॥ स्नायुगतः स्निग्धो घनः सिंहाणकप्रतिमः सरक्तश्च ॥ अस्थिगतोऽस्थन्यभिहते स्फुटिते भिन्ने दोषावदारिते वा दोषभक्षितत्वादस्थि निःसारं शुक्तिधौतमिवा भाति । आस्रावश्चात्र मज्जमिश्रः सरुधिरः स्निग्धश्च ॥ सन्धिगतः पीड्यमानो न प्रवर्त्तत आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैश्च स्रवति। आस्रावश्चात्र पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मथितश्च ॥ कोष्ठगतोऽसृङ्मूत्रपुरीषपूयोदकानि स्रवति ॥ मर्म्मगतस्त्वगादिष्ववरुद्धत्वान्नोच्यते ॥ तत्र त्वगादिगतानामास्रावाणां यथाक्रमं पारुष्यश्यावावश्यायदधिमस्तुक्षारोदकमांसधावनपुलाकोदकसन्निभत्वानि मारुताद्भवन्ति ॥ पित्ताद्गोमेदगोमूत्रभस्मशङ्खकषायोदकमाध्वीकतैलसन्निभत्वानि। पित्तवद्रक्तादतिविस्रत्वञ्च॥ कफान्नवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराहवसासन्निभ

लानि ॥ सन्निपातान्तिलनालिकेरोदकैर्वारुकरसकाञ्जिकप्रसादा रुकोदकप्रियङ्गुफलयकृन्मुद्गयूषसर्वणत्वानीति ॥

श्लोकौ चात्र भवतः। पक्वाशयाद्साध्यस्तु पुलाकोदकसन्निभः।
क्षारोदकनिभः स्रावो वर्ज्यो रक्ताशयात्स्रवन् ॥
आमाशयात्कलायाम्भोनिभश्च त्रिकसन्धिजः।
स्रावानेतान्परीक्ष्यादौ ततः कर्म्माचरेद्भिषक् ॥

अतऊर्द्ध्वं सर्व्वव्रणवेदना वक्ष्यामः ॥

तोदनभेदनताडनच्छेदनायमनमन्थनविक्षेपणचुमचुमायननिर्दहनावभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूलविश्लेषणविकिरणपूरणस्तम्भनस्वप्नावकुञ्चनाङ्कुशिकाः सम्भवन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहुर्य्यत्रागच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात् ॥ ओषा चोषपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिवृद्धिः क्षते क्षाराविसिक्तवच्च वेदनाविशेषास्तं पैत्तिकमिति विद्यात् ॥ पित्तवद्रक्तसमुत्थं जानीयात् ॥ कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तम्भः शैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात् ॥ यत्र सर्व्वासां वेदनानां समुत्पत्तिस्तं सान्निपातिकमिति विद्यात् ॥

अतऊर्द्ध्वं व्रणवर्णान् वक्ष्यामः ॥ भस्मकपोतास्थिवर्णः परुषोऽरुणः कृष्ण इति मारुतजस्य। नीलः पीतो हरितः श्यावः कृष्णो रक्तः कपिलः पिङ्गल इति रक्तपित्तसमुत्थयोः। श्वेतः स्निग्धः पाण्डुरिति श्लेष्मजस्य। सर्व्ववर्णोपेतः सान्निपातिक इति ॥

भवति चात्र॥ न केवलं व्रणेषूक्तो वेदनावर्णसंग्रहः।
सर्व्वशोफविकारेषु व्रणवल्लचयेद्भिषक्॥

॥ त्रयोविंशतितमोऽध्यायः॥

अथातः कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः॥

तत्र वयस्थानां दृढानां प्राणवतां सत्ववताञ्च सुचिकित्स्या व्रणा एकस्मिन् वा पुरुषे यत्रैतद्गुणचतुष्टयं तस्य सुखसाधनीयतमाः। तत्र वयस्थानां प्रत्यग्रधातुत्वादाशु व्रणा रोहन्ति। दृढानां स्थिरबहुमांसत्वाच्छस्त्रमवचार्य्यमाणं सिरास्नाय्वादिविशेषान्न प्राप्नोति। प्राणवतां वेदनाभिघाताहारयन्त्रणादिभिर्न ग्लानिरुत्पद्यते। सत्ववतां दारुणैरपि क्रियाविशेषैर्न व्यथा भवति। तस्मादेतेषां सुखसाधनीयतमाः। तएव विपरीतगुणा वृद्धकृशाल्पप्राणभीरुषु द्रष्टव्याः॥ स्फिक्पायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोषोदरजत्रुमुखाभ्यन्तरसंस्थाः सुखरोपणीया व्रणाः॥ अचिदन्तनासापाङ्गश्रोत्रनाभिजठरसेवनीनितम्बपार्श्वकुक्षिवक्षःकक्षास्तनसन्धिभागगताः सफेनपूयरक्तानिलवाहिनोऽन्तःशल्याश्च दुश्चिकित्स्याः। अधोभागाश्चोर्द्ध्वभागनिर्व्वाहिणो रोमान्तोपनखमर्म्मजङ्घास्थिसंश्रिताश्च। भगन्दरमपि चान्तर्मुखं सेवनीकुटकास्थिसंश्रितं॥

भवति चात्र॥ कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनां।
व्रणाःकृच्छ्रेण सिद्ध्यन्ति येषां चापि व्रणे व्रणाः॥

अवपाटिकानिरुद्धप्रकशसन्निरुद्धगुदजठरग्रन्थिचतक्रिमयः प्रतिश्यायजाः कोष्ठजाश्च त्वग्दोषिणां प्रमेहिनां वा ये परिच तेषु दृश्यन्ते शर्करासिकतामेहवातकुण्डलिकाष्ठीलादन्तशर्करोप कुशकण्ठशालूकनिष्कोषणदूषिताश्च दन्तवेष्टा विसर्पास्थिचतोरः चतव्रणग्रन्थिप्रभृतयश्च याप्याः॥

साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावतां॥
यापनीयं विजानीयात् क्रिया धारयते तु यं।
क्रियायान्तु निवृत्तायां सद्य एव विनश्यति॥
प्राप्ता क्रिया धारयति याप्यव्याधितमातुरं।
प्रपतिष्यदिवागारं विष्कम्भः साधुयोजितः॥

अतऊर्द्धमसाध्यान् वक्ष्यामः॥ मांसपिण्डवदुद्गताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽश्वापानवदुद्वृत्तौष्ठाः। केचित्कठिना गोशृङ्गव दुन्नतमृदुमांसप्ररोहाः। अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिला स्राविणो वा मध्योन्नताः। केचिदवसन्नशुष्कविरपर्य्यन्ताः। सण्ठ लवत् स्नायुजालवन्तो दुर्द्दर्शा वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोष समुत्थाः॥पीतासितमूत्रपुरीषवातवाहिनश्च कोष्ठस्थाःचीणमांसाना ञ्च सर्व्वतोगतयश्चाणमुखा मांसबुद्बुदवन्तः सशब्दवातवाहिनश्च शिरःकण्ठस्थाः। चीणमांसानाञ्च पूयरक्तनिर्व्वाहिणोऽरोचका विपाककासश्वासोपद्रवयुक्ताः। भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्ग दर्शनं त्रिदोषलिङ्गप्रादुर्भावः कासश्वासौवा यस्येति॥

भवन्ति चात्र। वसां मेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुस्तु व्रणः सिध्येन्नसिध्येद्दोषसम्भवः ॥
अमर्म्मोपहिते देशे शिरासन्ध्यस्थिवर्जिते।
विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणं॥
क्रमेणोपचयं प्राप्य धातूननुगतः शनैः।
न शक्यउन्मूलयितुं वृद्धो वृक्ष इवामयः॥
स स्थिरत्वान्महत्त्वाच्च धात्वनुक्रमणेन च।
निहन्त्यौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथा॥
अतो यो विपरीतः स्यात्सुखसाध्यः स उच्यते।
अबद्धमूलः क्षुपको यद्वदुत्पाटने सुखः॥
त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकी समः।
अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते॥
कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः।
स्थिराश्चिपिटिकावन्तो रोहतीति तमादिशेत्॥
रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणं।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्॥
दोषप्रकोपाद्व्यायामादभिघातादजीर्णतः।
हर्षात्क्रोधाद्भयाद्वापि व्रणो रूढोऽपि दीर्य्यते॥

---

॥ चतुर्विंशतितमोऽध्यायः॥

अथातो व्याधिसमुद्देशीयमध्यायं व्याख्यास्यामः॥

द्विविधा व्याधयः शस्त्रसाध्याः स्नेहादिक्रियासाध्याश्च। तत्र शस्त्रसाध्येषु स्नेहादिक्रिया न प्रतिषिध्यते। स्नेहादिक्रियासाध्येषु शस्त्रकर्म्म न क्रियते। अस्मिन्पुनः शास्त्रे सर्व्वतन्त्रसामान्यात्सर्व्वेषां व्याधीनां यथा स्थूलमवरोधः क्रियते। प्रागभिहितं तद्दुःखसंयोगो व्याधिरिति तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथादिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः संघातबलप्रवृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताःस्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातुरपचारात्पङ्गुजात्यन्धबधिरमूकमिन्मिणवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसकृता दौर्हृदापचारकृताश्च॥ दोषबलप्रवृत्ता यआतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एत आध्यात्मिकाः॥ संघातबलप्रवृत्ता य आगन्तवो दुर्ब्बलस्य बलवद्विग्रहात्तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एत आधिभौतिकाः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्त्तुकृता अव्यापन्नर्त्तुकृताश्च॥ दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्व्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ताः क्षुत्पिपासाजरामृत्युनिद्राप्रभृ

तयस्तेऽपि द्विविधाः कालकृता अकालकृताश्च तत्र परिरक्षणकृताः
कालकृता अपरिरक्षणकृता अकालकृता एत आधिदैविकाः।
तत्र सर्व्वव्याध्यवरोधः॥

सर्व्वेषाञ्च व्याधीनां वातपित्तश्लेष्माण एव मूलं तल्लिङ्गत्वाद्दृष्टफ
लत्वादागमाच्च यथाहि कृत्स्नं विकारजातं विश्वरूपेणावस्थितं सत्व
रजस्तमांसि न व्यतिरिच्यन्ते। एवमेव कृत्स्नं विकारजातं विश्वरू
पेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्त्तन्ते॥दोषधातुमल
संसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पा भवन्ति। दोषदू
षितेष्वत्यर्थं धातुषु संज्ञा क्रियते रसजोऽयं शोणितजोऽयं मांसजो
ऽयं मेदोजोऽयमस्थिजोऽयं मज्जजोऽयं शुक्रजोऽयं व्याधिरिति॥
तत्रान्नाश्रद्धारोचकाविपाकाङ्गमर्दज्वरहृल्लासतृप्तिगौरवहृत्पाण्डु
रोगमार्गोपरोधकार्श्यवैरस्याङ्गसादाकालवलिपलितदर्शनप्रभृतयो
रसदोषजा विकाराः॥ कुष्ठविसर्पपिडकामशकनीलिकातिलका
लकन्यच्छव्यङ्गेन्द्रलुप्तप्लीहविद्रधिगुल्मवातशोणितार्शोऽर्वुदाङ्गमर्दासृ
ग्दररक्तपित्तप्रभृतयो रक्तदोषजा गुदमुखमेढ्रपाकाश्च॥ अधि
मांसार्वुदार्शोऽधिजिह्वोपजिह्वोपकुशगलशुण्डिकालजीमांससंघातौ
ष्ठप्रकोपगलगण्डगण्डमालाप्रभृतयो मांसदोषजाः॥ ग्रन्थिवृद्धिग
लगण्डार्व्वुदमेदोजौष्ठप्रकोपमधुमेहातिस्थौल्यातिस्वेदप्रभृतयो मे
दोदोषजाः॥ अध्यस्थ्यधिदन्तास्थितोदशूलकुनखप्रभृतयोऽस्थिदो
षजाः॥ तमोदर्शनमूर्च्छाभ्रमपर्व्वगौरवस्थूलमूलोरुजङ्घानेत्राभि
ष्यन्दप्रभृतयो मज्जदोषजाः॥ क्लैव्याप्रहर्षशुक्राश्मरीशुक्रमेहशु

क्रदोषादयश्च तद्दोषजाः॥ लग्दोषाः सङ्गाऽतिप्रवृत्तिर्व्वा मलाय तनदोषाः ॥ इन्द्रियाणामप्रवृत्तिरयथाप्रवृत्तिर्व्वेन्द्रियायतन दोषाः। इत्येवं समासउक्तो विस्तरनिमित्तानि चैषां प्रति रोगं वक्ष्यामः॥

भवति चात्र॥ कुपितानां हि दोषाणां शरीरे परिधावतां।
यत्र सङ्गः खवैगुण्याद्व्याधिस्तत्रोपजायते॥

भूयोऽत्र जिज्ञास्यं किं वातादीनां ज्वरादीनाञ्च नित्यः संश्लेषः परिच्छेदो वेति यदि नित्यः संश्लेषः स्यात्तर्हि नित्यातुराः सर्व्वएव प्राणिनः स्युः। अथाप्यन्यथा वातादीनां ज्वरादीनां चान्यत्र वर्त्त मानानामन्यत्र लिङ्गं न भवतीतिकृत्वा यदुच्यते वातादयो ज्वरादीनां मूलानीति तन्न। अत्रोच्यते। दोषान्प्रत्याख्याय ज्वरादयो न भवन्ति। अथ च न नित्यः सम्बन्धो यथाहि विद्युद्वाताशनि वर्षाण्याकाशं प्रत्याख्याय न भवन्ति। सत्यप्याकाशे कदाचिन्न भवन्ति। अथ च निमित्ततस्ततएवोत्पत्तिरिति तरङ्गबुद्बुदादयश्चोदकविशेषा एव। वातादीनां ज्वरादीनाञ्च नाप्येवं संश्लेषो न परिच्छेदः शाश्वतिकः। अथ च निमित्तत एवोत्पत्तिरिति॥

भवति चात्र॥ विकारपरिमाणञ्च सञ्ज्ञा चैषां पृथक् पृथक्।
विस्तरेणोत्तरे तन्त्रे सर्व्वाबाधाश्च वक्ष्यते।

---

॥ पञ्चविंशतितमोऽध्यायः॥

अथातोऽष्टविधशस्त्रकर्म्मणमध्यायं व्याख्यास्यामः॥

छेद्या भगन्दरा ग्रन्थिः श्लैष्मिकस्तिलकालकः ।
व्रणवर्त्मार्बुदान्यर्शश्चर्मकीलोऽस्थिमांसगं ॥
शल्यं जतुमणिर्मांससंघातो गलशुण्डिका ।
स्नायुमांससिराकोथो वल्मीकं शतपोनकः ॥
अध्रुषश्चोपदंशाश्च मांसकन्द्यधिमांसकः ।
भेद्या विद्रधयोऽन्यत्र सर्व्वजाद्ग्रन्थयस्त्रयः ॥
आदितो ये विसर्पाश्च वृद्धयः सविदारिकाः ।
प्रमेहपिडकाशोफस्तनरोगाववमन्थकाः ॥
कुम्भीकानुशयीनाड्यो वृन्दौ पुष्करिकालजी ।
प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥
तुण्डिकेरी गिलायुश्च पूर्व्वं ये च प्रपाकिणः ।
वस्तिस्तथाश्मरीहेतोर्मेदोजा ये च केचन ॥
लेख्याश्चतस्रो रोहिण्यः किलासमुपजिह्विका ।
मेदोजो दन्तवैदर्भौ ग्रन्थिवर्त्माधिजिह्विका ॥
अर्शांसि मण्डलं मांसकन्दी मांसोन्नतिस्तथा ।
वेध्याः सिरा बहुविधा मूत्रवृद्धिर्दकोदरं ॥
एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये ।
आहार्य्याः शर्करास्तिस्रो दन्तकर्णमलाश्मरी ॥
शल्यानि मूढगर्भाश्च वर्चश्च निचितं गुदे ।
स्राव्या विद्रधयः पञ्च भेवयुः सर्व्वजादृते ॥
कुष्ठानि वायुः सरुजः शोफो यश्चैकदेशजः ।

पाल्यामयाः श्लीपदानि विषजुष्टञ्च शोणितं ॥
अर्ब्बुदानि विसर्पाश्च ग्रन्थयश्चादितस्तु ये ।
त्रयस्त्रयश्चोपदंशाः स्तनरोगा विदारिका ॥
शौषिरो गलशालूकं कण्टकाः कृमिदन्तकः ।
दन्तवेष्टः सोपकुशः शीतादो दन्तपुप्पुटः ॥
पित्तासृक्कफजाश्चौष्ठ्याः क्षुद्ररोगाश्च भूयशः ।
सीव्या भेदःसमुत्थाश्च भिन्नाः सुलिखिता गदाः ॥
सद्योव्रणाश्च ये चैव चलरुन्धिव्यपाश्रयाः ।
न क्षाराग्निविषैर्जुष्टा नवा मारुतवाहिनः ॥
नान्तर्लोहितशल्याश्च तेषु सम्यग्विशोधनं ॥
पांश्वरोमनखादीनि चलमस्थि भवेच्च यत् ।
अहृतानि यतोऽमूनि पाचयेयुर्भृशं व्रणं ॥
रुजश्च विविधाः कुर्य्युस्तस्मादेतान्विशोधयेत् ।
ततो व्रणं समुन्नम्य स्थापयित्वा यथास्थितं ॥
सीव्येत् सूक्ष्मेण सूत्रेण वल्केनाश्मन्तकस्य वा ।
शणजक्षौमसूत्राभ्यां स्नाय्वा बालेन वा पुनः ।
मूर्व्वागुडूचीतानैर्व्वा सीव्येद्वेल्लितकं शनैः ॥
सीव्येद्गोफणिकां वापि सीव्येदा तुन्नसेवनीं ।
ऋजुग्रन्थिमथो वापि यथायोगमथापि वा ॥
देशेऽल्पमांसे सन्धौ च सूची वृत्ताङ्गुलद्वयं ।
आयता त्र्यङ्गुला त्र्यस्रा मांसले वापि पूजिता ॥

धनुर्वक्रा हिता मर्मफलकोशोदरोपरि ।
इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः।
कारयेन्मालतीपुष्पवृन्ताग्रपरिमण्डलाः ॥
नातिदूरे निकृष्टे वा सूचीं कर्म्मणि पातयेत्।
दूराद्रुजो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनं ॥
अथ क्षौमपिचुच्छन्नं सुस्यूतं प्रतिसारयेत्।
प्रियङ्ग्वञ्जनयष्ट्याह्वरोध्रचूर्णैः समन्ततः ॥
सल्लकीफलचूर्णैर्वा क्षौमध्यामेन वा पुनः ।
ततो व्रणं यथायोगं बद्ध्वाचारिकमादिशेत् ॥
एतदष्टविधं कर्म्म समासेन प्रकीर्त्तितं ।
चिकित्सितेषु कार्त्स्न्येन विस्तरस्तस्य वक्ष्यते ॥
हीनातिरिक्तं तिर्य्यक्च गात्रच्छेदनमात्मनः ।
एतास्तत्रस्तोऽष्टविधे कर्म्मणि व्यापदः स्मृताः॥
अज्ञानलोभाहितवाक्ययोगभयप्रमोहैरपरैश्च भावैः ।
यदा प्रयुञ्जीत भिषक्कुशस्त्रं तदा सशेषान् कुरुते विकारान् ॥
तं चारशस्त्राग्निभिरौषधैश्च भूयोऽभियुञ्जानमयुक्तियुक्तं ।
जिजीविषुर्दूरत एव वैद्यं विवर्जयेदुग्रविषाग्नितुल्यं ॥
तदेव युक्तन्त्वतिमर्मसन्धीन् हिंस्यात्सिरास्नायुमथास्थि चैव ।
मूर्खप्रयुक्तं पुरुषं क्षणेन प्राणैर्वियुञ्ज्यादथवा कथञ्चित् ॥
भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं संलपनोष्णता च ।
स्रस्ताङ्गता मूर्च्छनमूर्द्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः ॥

मांसोदकाभं रुधिरञ्च गच्छेत्सर्व्वेन्द्रियार्थोपरमस्तथैव।
दशार्द्धसङ्ख्येष्वपि हि चतेषु सामान्यतो मर्म्मसु लिङ्गमुक्तं॥
सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेद्धि चततश्च वायुः।
करोति रोगान् विविधान् यथोक्तान् छिन्नासु भिन्नास्वथ वा शिरासु॥
कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजश्च।
चिराद्व्रणो रोहति यस्य चापि तं स्नायुविद्धं मनुजं व्यवस्येत्॥
शोफातिवृद्धिस्तुमुला रुजश्च बलक्षयः पर्व्वसु भेदशोफौ।
चतेषु सन्धिष्वचलाचलेषु स्यात्सन्धिकर्म्मोपरतिश्च लिङ्गं॥
घोरा रुजो यस्य निशादिनेषु सर्व्वास्ववस्थासु न शान्तिरस्ति।
तृष्णाङ्गसादौ श्वयथुश्च रुक्च तमस्थिविद्धं मनुजं व्यवस्येत्॥
यथास्वमेतानि विभावयेर्युर्लिङ्गानि मर्म्मस्वभिताडितेषु।
स्पर्शन्न जानाति विपाण्डुवर्णो यो मांसमर्म्मण्यभिताडितः स्यात्॥
आत्मानमेवाथ जघन्यकारी शस्त्रेण यो हन्ति हि कर्म कुर्व्वन्।
तमात्मवानात्महनं कुवैद्यं विवर्जयेदायुरभीप्समानः॥
तिर्य्यक्प्रणिहिते शस्त्रे दोषाः पूर्व्वमुदाहृताः।
तस्मात्परिहरन् दोषान्कुर्य्याच्छस्त्रनिपातनं॥
मातरं पितरं पुत्त्रान् बान्धवानपि चातुरः।
अप्येतानभिशङ्केत वैद्ये विश्वासमेति च॥
विसृजत्यात्मनात्मानं न चैनं परिशङ्कते।
तस्मात्पुत्त्रवदेवैनं पालयेदातुरं भिषक्॥

कर्म्मणा कश्चिदेकेन द्वाभ्यां कश्चित्त्रिभिस्तथा ।
विकारः साध्यते कश्चिच्चतुर्भिरपि कर्म्मभिः ॥
धर्मार्थौ कीर्त्तिमित्यर्थं सतां ग्रहणमुत्तमं ।
प्राप्नुयात्स्वर्गवासञ्च हितमारभ्य कर्म्मणा ॥

---

॥ षड्विंशतितमोऽध्यायः ॥

अथातः प्रनष्टशल्यविज्ञानीयमध्यायं व्याख्यास्यामः ॥

शल श्वल आशुगमने धातुस्तस्य शल्यमिति रूपं। तद्द्विविधं शारीरमागन्तुकञ्च ॥ सर्व्वशरीराबाधकरं शल्यं तदिहोपदिश्यत इत्यतः शल्यशास्त्रं तत्र शारीरं रोमनखादि धातवोऽन्नमला दोषाश्च दुष्टाः। आगन्त्वपि शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्ति। अधिकारो हि लोहवेणुवृक्षतृणशृङ्गास्थिमयेषु तत्रापि विशेषतो लोहमयेष्वेव विशसनार्थोपपन्नत्वाल्लोहस्य लोहानामपि दुर्व्वारत्वादणुमुखत्वाद्दूरप्रयोजनकरत्वाच्च शरएवाधिकृतः स द्विविधः कर्णी श्लक्ष्णश्च प्रायेण विविधवृक्षपत्रपुष्पफलतुल्याकृतयो व्याख्याता व्यालमृगपक्षिवक्त्रसदृशाश्च ॥ सर्व्वशल्यानान्तु महतामणूनां वा पञ्चविधो गतिविशेष ऊर्द्ध्वमधोऽर्वाचीनस्तिर्य्यगृजुरिति । तानि यदा वेगक्षयात् प्रतिघाताद्वा त्वगादिषु व्रणवस्तुष्ववतिष्ठन्ते धमनीस्रोतोऽस्थिविवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु तत्र शल्यलक्षणमुच्यमानमुपधारय। तत्तु द्विविधं सामान्यं वैशेषिकञ्च। श्यावं पिडकावन्तं शोफवे

दनावन्तं मुहुर्मुहुःशोणितास्राविणं बुद्बुदवदुन्नतं मृदुमांसञ्च व्रणंजानीयात्सशल्योऽयमिति सामान्यलक्षणमेतदुक्तं॥ वैशेषिकन्तु त्वग्गते विवर्णः शोफो भवत्यायतः कठिनश्च। मांसगते शोफाभिवृद्धिः शल्यमार्गानुपसंरोहः पीडनासहिष्णुता चोषपाकौ च। पेश्यन्तरस्थेऽप्येतदेव चोषशोफवर्जं। सिरागते सिराध्मानं सिराशूलं सिराशोफश्च। स्नायुगते स्नायुजालोत्क्षेपणं संरम्भश्चोग्रा रुक्च। स्रोतोगते स्रोतसां स्वकर्मगुणहानिः। धमनीस्थे सफेनं रक्तमीरयन्ननिलः सशब्दो निर्गच्छत्यङ्गमर्दः पिपासा हृल्लासश्च। अस्थिगते विविधवेदनाप्रादुर्भावः शोफश्च। अस्थिविवरगतेऽस्थिपूर्णतास्थितोदः संहर्षो बलवांश्च। सन्धिगतेऽस्थिवच्चेष्टोपरमश्च। कोष्ठगते आटोपानाहौ मूत्रपुरीषाहारदर्शनञ्च व्रणमुखात्। मर्मगते मर्मविद्धवच्चेष्टते। सूक्ष्मगतिषु शल्येष्वेतान्येव लक्षणान्यस्पष्टानि भवन्ति॥ महान्ति स्वल्पानि वा शुद्धदेहानामनुलोमसन्निविष्टानि रोहन्ति विशेषतः कण्ठस्रोतःसिरात्वक्पेश्यस्थिविवरेषु दोषप्रकोपव्यायामाभिघातेभ्यः प्रचलितानि पुनर्बाधन्ते॥

तत्र त्वक्प्रनष्टे स्निग्धस्विन्नायां मृन्माषयवगोधूमगोमयमृदितायां त्वचि यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात्॥ स्त्यानघृतमृच्चन्दनकल्कैर्वा प्रदिग्धायां शल्योष्मणाशु विसरति घृतमुपशुष्यति वालेपो यत्र तत्र शल्यं विजानीयात्॥ मांसप्रनष्टे स्नेहस्वेदादिभिः क्रियाविशेषैरविरुद्धैरातुरमुपपादयेत्। कर्शितस्यतु शिथिलीभूतमनवबद्धं क्षुभ्यमाणं यत्र संरम्भो वेदना

वा भवति तत्र च शल्यं विजानीयात् ॥ कोष्ठास्थिसन्धिपेशी विवरेष्ववस्थितमेवं परीक्षेत ॥ सिराधमनीस्रोतःस्नायुप्रनष्टे खण्ड चक्रसंयुक्ते याने व्याधितमारोप्याशु विषमे ऽध्वनि यायाद्यत्र सं रम्भो वेदना वा भवति तत्र शल्यं जानीयात् ॥ अस्थिप्रनष्टे स्नेहस्वेदो पपन्नान्यस्थीनि बन्धनपीडनाभ्यां भृशमुपचरेद्यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात् ॥ सन्धिप्रनष्टे स्नेहस्वेदोपपन्नान सन्धीन्प्रसारणाकुञ्चनबन्धनपीडनैर्भृशमुपचरेद्यत्र संरम्भो वेदना वा भवति तत्र शल्यमिति जानीयात् ॥ मर्म्मप्रनष्टे त्वनन्यभा वान्मर्मणामुक्तं परीक्षणं भवति ॥ सामान्यलक्षणमपिच हस्तिस्क न्धाश्वपृष्ठपर्व्वतद्रुमारोहणधनुर्व्यायामद्रुतयाननियुद्धाध्वगमनल ङ्घनप्रतरणप्लवनव्यायामैर्जृम्भोद्गारकासक्षवथुष्ठीवनहसनप्राणाया मैर्व्वातमूत्रपुरीषशुक्रोत्सर्गैर्व्वा यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात् ॥

भवन्ति चात्र ॥ यस्मिंस्तोदादयो देशे सुप्तता गुरुतापि च ।
घट्टयते बहुशो यत्र सूयते तुद्यते पि च ॥
आतुरश्चापि यं देशमभीक्ष्णं परिरक्षति ।
संवाह्यमानो बहुशस्तत्र शल्यं विनिर्दिशेत् ॥
अल्पबाधमशूनञ्च निरुजं निरुपद्रवं ।
प्रसन्नं मृदुपर्य्यन्तं निराघट्टमनुन्नतं ॥
एषण्या सर्व्वतो दृष्ट्वा यथामार्गं चिकित्सकः ।
प्रसाराकुञ्चनान्नूनं निःशल्यमिति निर्दिशेत् ॥

अस्थ्यात्मकं भज्यते तु शल्यमन्तश्च शीर्य्यते।
प्रायोनिर्भुज्यते शार्ङ्गमायसञ्चेति निश्चयः॥
वार्च्यवैणवतार्क्षानि निर्ह्रियन्ते तु नो यदि।
पचन्ति रक्तं मांसञ्च चिप्रमेतानि देहिनां॥
कानकं राजतं ताम्रं रैतिकं त्रपु सीसकं।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात्॥
स्वभावशीता मृद्वो ये चान्येऽपीदृशा मताः।
द्रवीभूताः शरीरेऽस्मिन्नेकत्वं यान्ति धातुभिः॥
विषाणदन्तकेशास्थिवेणुदारूपलानि तु।
शल्यानि न विशीर्य्यन्ते शरीरे मृन्मयानि च॥
द्विविधं पञ्चगतिकं लगादिव्रणवस्तुषु।
यो वेत्त्यधिष्ठितं शल्यं स राज्ञः कर्त्तुमर्हति॥

---

॥ सप्तविंशतितमोऽध्यायः॥

अथातः शल्यापनयनीयमध्यायं व्याख्यास्यामः॥

शल्यं द्विविधमवबद्धमनवबद्धञ्च। तत्र समासेनावबद्धशल्योद्धरणार्थं पञ्चदशहेतून् वक्ष्यामः। तद्यथा। स्वभावः पाचनं भेदनं दारणं पीडनं प्रमार्जनं निर्ध्मापनं वमनं विरेचनं प्रक्षालनं प्रतिमर्षः प्रवाहणमाचूषणमयस्कान्तो हर्षश्चेति॥ तत्राश्रुक्षवथूद्गारकासमूत्रपुरीषानिलैः स्वभावबलप्रवृत्तैर्नयनादिभ्यः पतति॥ साव

गाढं शल्यमभिदह्यमानं पाचयित्वा प्रकोपात्तस्य पूयशोणितवेगाद्गौरवाद्वा पतति ॥ पक्वमभिद्यमानं भेदयेद्दारयेद्वा भिन्नमनिरस्यमानं पीडनीयैः पीडयेत्पाणिभिर्वा ॥ अणून्यक्षिशल्यानि परिषेचनाश्मापनैर्वालवस्त्रपाणिभिः प्रमार्जयेत् ॥ आहारशेषश्लेष्महीनाणुशल्यानि श्वसनोत्कासनप्रधमनैर्निर्द्धमेत् ॥ अन्नशल्यानि वमनाङ्गुलिप्रतिमर्षप्रभृतिभिर्विरेचनैः पक्वाशयगतानि ॥ व्रणदोषाश्रयगतानि प्रक्षालनैः ॥ वातमूत्रपुरीषगर्भसङ्गेषु प्रवाहणमुक्तं ॥ मारुतोदकसविषरुधिरदुष्टस्तन्येष्वाचूषणमास्येन विषाणैर्वा ॥ अनुलोममनवबद्धमकर्णमनल्पव्रणमुखमयस्कान्तेन ॥ हृद्यवस्थितमनेककारणोत्पन्नं शोकशल्यं हर्षेणेति ॥ सर्व्वशल्यानान्तु महतामणूनां वा द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च तत्र प्रतिलोममर्वाचीनमानयेदनुलोमं पराचीनं । उत्तुण्डितं छित्त्वा निर्घातयेच्छेदनीयमुखं । छेदनीयमुखान्यपि कुक्षिवक्षःकक्षावङ्क्षणपर्शुकान्तरपतितानि च हस्तशक्यं यथामार्गं हस्तेनैवापहर्त्तुं प्रयतेत ।

अनुत्तुण्डितशल्यानि छेदनीयमुखानि च ।
अनिर्घात्यानि जानीयाद्भूयश्छेदानुबन्धतः ॥

हस्तेनापहर्त्तुमशक्यं विमृष्य शस्त्रेण यन्त्रेण वापहरेत् ।

भवति चात्र ॥ शीतलेन जलेनैनं मूर्च्छन्तमवसेचयेत् ।
संरक्षेदस्य मर्म्माणि मुहुराश्वासयेच्च तं ॥

ततः शल्यमुद्धृत्य निर्लोहितं व्रणं कृत्वा स्वेदार्हमग्निघृतप्रभृतिभिः संस्वेद्य विदह्य प्रदिह्य सर्पिर्म्मधुभ्यां बद्ध्वाचारिकमुपदिशेत् ॥

सिरास्नायुविलग्नं शलाकादिभिर्विमोच्यापनयेत् श्वयथुग्रस्तवारङ्गं समवपीड्य श्वयथुं दुर्ब्बलवारङ्गं कुशादिभिर्बद्ध्वा। हृदयमभितो वर्त्तमानं शल्यं शीतजलादिभिरुद्वेजितस्यापहरेद्यथामार्गं। दुरुपहरमन्यतोऽपबाध्यमानं पाटयित्वोद्धरेत्॥ अस्थिविवरप्रविष्टमस्थिविदष्टं वाऽवगृह्य पादाभ्यां यन्त्रेणापहरेदशक्यमेवं वा बलवद्भिः सुपरिगृहीतस्य यन्त्रेण ग्राहयित्वा शल्यवारङ्गं प्रविभुज्य धनुर्गुणैर्बद्ध्वैकतश्चास्य पञ्चाङ्ग्यामुपसंयतस्याश्ववक्त्रकटके वा बध्नीयादथैनं कशया ताडयेद्यथोन्नमयन् शिरो वेगेन शल्यमुद्धरति। दृढां वा वृक्षशाखामवनम्य तस्यां पूर्ववद्बद्ध्वोद्धरेत्॥ अस्थिदेशोत्तुण्डितमष्ठीलाश्ममुद्गराणामन्यतमस्य प्रहारेण विचाल्य यथामार्गमेव। यन्त्रेण विमृदितकर्णानि कर्णवन्त्यनाबाधकरदेशोत्तुण्डितानि पुरस्तादेव जातुषे कण्ठासक्ते कण्ठे नाडीं प्रवेश्याग्नितप्ताञ्च शलाकां तयावगृह्य शीताभिरद्भिः परिषिच्य स्थिरीभूतमुद्धरेत्। अजातुषं जतुमधूच्छिष्टलिप्तया शलाकया पूर्वकल्पेनेत्येके। अस्थिशल्यमन्यद्वा तिर्य्यक्कण्ठासक्तमवेक्ष्य केशोण्डुकं दृढैकसूत्रबद्धं द्रवभक्तोपहितं पाययेदाकण्ठाच्च पूर्णकोष्ठं वामयेद्वमतश्च शल्यैकदेशसक्तं ज्ञात्वा सूत्रं सहसाऽऽक्षिपेत्। मृदुना वा दन्तधावनकूर्च्चकेनापहरेत् प्रणुदेद्वान्तः क्षतकण्ठाय च मधुसर्पिषी लेढुं प्रयच्छेत्त्रिफलाचूर्णं वा मधुशर्करामिश्रं॥ उदकपूर्णमवाक्शिरसमवपीडयेद्धुनीयाद्वामयेद्वा भस्मराशौ वा निखनेदामुखात्॥ ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवबुद्धस्कन्धे मुष्टिनाभिहन्यात् स्नेहं मद्यं पानीयं वा पाययेत्॥ बाहुर

ज्जुलतापाशशल्ये तु कण्ठपीडनाद्वायुः प्रकुपितः श्लेष्माणं कोपयित्वा स्रोतो निरुणद्धि लालास्रावं फेनागमनं संज्ञानाशं चापादयति। तमभ्यज्य संस्विद्य शिरोविरेचनं तस्मै तीक्ष्णं दद्याद्रसञ्च वातघ्नं विदध्यादिति।

भवन्ति चात्र॥ शल्याकृतिविशेषांश्च स्थानान्यावेक्ष्य बुद्धिमान्।
तथा यन्त्रप्रयत्नाश्च सम्यक् शल्यमथाहरेत्॥
कर्णवन्ति तु शल्यानि दुःखाहार्य्याणि यानि च।
आददीत भिषक् तस्मात्तानि युक्त्या समाहितः॥
एतैरुपायैः शल्यन्तु नैव निर्घात्यते यदि।
मत्या निपुणया वैद्यो यन्त्रयोगैश्च निर्हरेत्॥
शोथपाकौ रुजश्चोग्राः कुर्य्याच्छल्यमनिर्हृतं।
वैकल्यं मरणञ्चापि तस्माद्यत्नाद्विनिर्हरेत्॥

---

## ॥ अष्टाविंशतितमोऽध्यायः॥

अथातो विपरीताविपरीतव्रणविज्ञानीयमध्यायं व्याख्यास्यामः॥
फलाग्निजलवृष्टीनां पुष्पधूमाम्बुदा यथा।
ख्यापयन्ति भविष्यत्त्वं तथा रिष्टानि पञ्चतां॥
तानि सौक्ष्म्यात्प्रमादाद्वा तथैवाशुव्यतिक्रमात्।
गृह्यन्ते नोद्गतान्यज्ञैर्मुमूर्षोर्नैलसम्भवात्॥
ध्रुवन्तु मरणं रिष्टे ब्राह्मणैस्तत्किलामलैः।

रसायनतपोजप्यतत्परैर्व्वा निवार्य्यते ॥
नक्षत्रपीडा बहुधा यथाकालाद्विपच्यते ।
तथैवारिष्टपाकञ्च ब्रुवते बहुधा जनाः ॥
असिद्धिमाप्नुयाल्लोके प्रतिकुर्व्वन् गतायुषः ।
अतो रिष्टानि यत्नेन लक्षयेत् कुशलो भिषक् ॥
गन्धवर्णरसादीनां विशेषाणां समासतः ।
वैकृतं यत्तदाचष्टे व्रणिनः पक्वलक्षणं ॥
कट्वीष्णश्च विस्रश्च गन्धस्तु पवनादिभिः ॥
लोहगन्धिस्तु रक्तेन व्यामिश्रः सान्निपातिकः ॥
लाजातसीतैलसमाः किञ्चिद्विस्राश्च गन्धतः ।
ज्ञेयाः प्रकृतिगन्धाः स्युरतोऽन्यद्गन्धवैकृतं ॥
मद्यागुर्व्वाज्यसुमनःपद्मचन्दनचम्पकैः ।
सगन्धा दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः ॥
श्ववाजिमूषिकध्वाङ्क्षपूतिवल्लूरमत्कुणैः ।
सगन्धाः पङ्कगन्धाश्च भूमिगन्धाश्च गर्हिताः ॥
श्यामकुङ्कुमकङ्कुष्ठसवर्णाः पित्तकोपतः ।
न दह्यन्ते न चूष्यन्ते भिषक् तान् परिवर्ज्जयेत् ॥
कण्डूमन्तः स्थिराः श्वेताः स्निग्धाः कफनिमित्ततः ।
दूयन्ते च विदह्यन्ते भिषक् तान् परिवर्जयेत् ॥
कृष्णास्तु ये तनुस्रावा वातजा मर्म्मतापिनः ।
स्वल्पामपि न कुर्व्वन्ति रुजं तान् परिवर्जयेत् ॥

क्लेदन्ति घुर्घुरायन्ते ज्वलन्तीव च ये व्रणाः।
त्वग्मांसस्थाश्च पवनं सशब्दं विसृजन्ति ये ॥
ये च मर्मस्वसम्भूता भवन्त्यत्यर्थवेदनाः ।
दह्यन्ते चान्तरत्यर्थं वहिः शीताश्च ये व्रणाः ॥
दह्यन्ते वहिरत्यर्थं भवन्त्यन्तश्च शीतलाः ।
शक्तिकुन्तध्वजरथा वाजिवारणगोवृषाः ॥
येषु चाप्यवभासेरन् प्रासादाकृतयस्तथा ।
चूर्णावकीर्णा इव ये भान्ति वा नच चूर्णिताः ॥
प्राणमांसक्षयश्वासकासारोचकपीडिताः ।
प्रवृद्धपूयरुधिरा व्रणा येषाञ्च मर्मसु ॥
क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः ।
वर्जयेत्तान् भिषक् प्राज्ञः संरक्षन्नात्मनो यशः ॥

---

## ॥ एकोनत्रिंशत्तमोऽध्यायः ॥

अथातो विपरीताविपरीतदूतशकुनस्वप्ननिदर्शनीयमध्यायं व्याख्यास्यामः ॥

दूतदर्शनसम्भाषा वेशाश्चेष्टितमेवच ।
ऋक्षं वेला तिथिश्चैव निमित्तं शकुनोऽनिलः ॥
देशो वैद्यस्य वाग्देहमनसाञ्च विचेष्टितं ।
कथयन्त्यातुरगतं शुभं वा यदिवाऽशुभं ॥
पाषण्डाश्रमवर्णानां स्वपक्षाः कर्मसिद्धये ।

त एव विपरीताः स्युर्दूताः कर्म्मविपत्तये॥
नपुंसकं स्त्रीबहवो नैककार्य्या असूयकाः।
गर्दभोष्ट्ररथप्राप्ताः प्राप्ता वा स्युः परम्पराः॥
वैद्यं य उपसर्प्पन्ति दूतास्ते चापि गर्हिताः।
पाशदण्डायुधधराः पाण्डरेतरवाससः॥
आर्द्रजीर्णापसव्यैकमलिनध्वस्तवाससः।
न्यूनाधिकाङ्गा उद्विग्ना विकृता रौद्ररूपिणः॥
रूक्षनिष्ठुरवादाश्चाप्यमाङ्गल्याभिधायिनः।
छिन्दन्तस्तृणकाष्ठानि स्पृशन्तो नासिकां स्तनं॥
वस्त्रान्तानामिकाकेशनखरोमदशास्पृशः।
स्रोतोऽवरोधहृद्गण्डमूर्द्धोरःकुचिपाणयः॥
कपालोपलभस्मास्थितुषाङ्गारकराश्च ये।
विलिखन्तो महीं किञ्चिन्मुञ्चन्तो लोष्टभेदिनः॥
तैलकर्दमदिग्धाङ्गा रक्तस्रगनुलेपनाः।
फलं पक्वमसारं वा गृहीत्वान्यच्च तद्विधं॥
नखैर्नखान्तरं वापि करेण चरणं तथा।
उपानच्चर्म्महस्ता वा विकृतव्याधिपीडिताः॥
वामाचारा रुदन्तश्च श्वासिनो विकृतेक्षणाः।
याम्यां दिशं प्राञ्जलयो विषमैकपदे स्थिताः॥
वैद्यं य उपसर्प्पन्ति दूतास्ते चापि गर्हिताः।
दक्षिणाभिमुखं देशे त्वशुचौ वा हुताशनं।

ज्वलयन्तं पचन्तं वा क्रूरकर्मणि चोद्यतं ॥
नग्नं भूमौ शयानं वा वेगोत्सर्गेषु वाऽशुचिं ।
प्रकीर्णकेशमभ्यक्तं स्विन्नं विक्लवमेव च ॥
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ।
वैद्यस्य पैत्र्ये दैवे वा कार्य्ये चोत्पातदर्शने ॥
मध्याह्ने चार्द्धरात्रे वा सन्ध्ययोः कृत्तिकासु च ।
आर्द्राश्लेषामघामूलपूर्व्वासु भरणीषु च ॥
चतुर्थ्यां वा नवम्यां वा षष्ठ्यां सन्धिदिनेषु च ।
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ॥
स्विन्नाभितप्ता मध्याह्ने ज्वलनस्य समीपतः ।
गर्हिताः पित्तरोगेषु दूता वैद्यमुपागताः ॥
त एव कफरोगेषु कर्म्मसिद्धिकराः स्मृताः ।
एतेन शेषं व्याख्यातं बुद्धा संविभजेत्तु तत् ॥
रक्तपित्तातिसारेषु प्रमेहेषु तथैव च ।
प्रशस्तो जलरोधेषु दूतवैद्यसमागमः ॥
विज्ञायैवं विभागं तु शेषं बुध्येत पण्डितः ।
शुक्लवासाः शुचिर्गौरः श्यामो वा प्रियदर्शनः ॥
स्वस्यां जातौ स्वगोत्रो वा दूतः कार्य्यकरः स्मृतः ।
गोयानेनागतस्तुष्टः पादाभ्यां शुभचेष्टितः ॥
धृतिमान् विधिकालज्ञः स्वतन्त्रः प्रतिपत्तिमान् ।
अलङ्कृतो मङ्गलवान् दूतः कार्य्यकरः स्मृतः ॥

स्वस्थं प्राङ्मुखमासीनं समे देशे शुचौ शुचिं ।
उपसर्पति यो वैद्यं स च कार्य्यकरः स्मृतः ॥
मांसोदकुम्भातपत्रविप्रवारणगोवृषाः ।
शुक्लवर्णाश्च पूज्यन्ते प्रस्थाने दर्शनं गताः ॥
स्त्री पुत्त्रिणी सवत्सा गौर्वर्द्धमानमलङ्कृता ।
कन्या मत्स्याः फलं चामं स्वस्तिकं मोदका दधि ॥
हिरण्याक्षतपात्रं वा रत्नानि सुमनो नृपः ।
अप्रशान्तोऽनलो वाजी हंसश्चाषः शिखी तथा ॥
ब्रह्मदुन्दुभिजीमूतशङ्खवेणुरथस्वनाः ।
सिंहगोवृषनादाश्च ह्रेषितं गजबृंहितं ॥
शस्तं हंसरुतं नृणां कौशिकश्चैव वामतः ।
प्रस्थाने यायिनः श्रेष्ठा वाचश्च हृदयङ्गमाः ॥
पत्रपुष्पफलोपेतान् सक्षीरान्निरुजो द्रुमान् ।
आश्रिता वा नभोवेश्मध्वजतोरणवेदिकाः ॥
दिक्षु शान्तासु वक्तारो मधुरं पृष्ठतोऽनुगाः ।
वामा वा दक्षिणा वापि शकुनाः कर्म्मसिद्धये ॥
शुष्के ऽशनिहते पत्रे वल्लीनद्धे सकण्टके ।
वृक्षेऽथवाश्मभस्मास्थिविट्तुषाङ्गारपांशुषु ॥
चैत्यवल्मीकविषमस्थिता दीप्तखरस्वराः ।
पुरतो दिक्षु दीप्तासु वक्तारो नार्थसाधकाः ॥
पुन्नामानः खगा वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः ।

दक्षिणाद्वामगमनं प्रशस्तं श्वशृगालयोः।
वामं नकुलचाषाणां नोभयं शशसर्पयोः ॥
भासकौशिकयोश्चैव न प्रशस्तं किलोभयं।
दर्शनं वा रुतञ्चापि न गोधाकृकलासयोः ॥
दूतैरनिष्टैस्तुल्यानामप्रशस्तं दर्शनं नृणां।
कुलत्थतिलकार्पासतुषपाषाणभस्मनां ॥
पात्रं नेष्टं तथाङ्गारतैलकर्द्दमपूरितं।
प्रसन्नेतरमद्यानां पूर्णं वा रक्तसर्षपैः ॥
शवकाष्ठपलाशानां शुष्काणां पथि सङ्गमाः।
नेष्यन्ते पतितान्तस्थदीनान्धरिपवस्तथा ॥
मृदुशीतोऽनुकूलश्च सुगन्धिश्चानिलः शुभः।
खरोष्णोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हितः ॥
ग्रन्थ्यर्बुदादिषु सदा छेदशब्दश्च पूजितः।
विद्रध्युदरगुल्मेषु भेदशब्दस्तथैव च ॥
रक्तपित्तातिसारेषु रुद्धशब्दः प्रशस्यते।
एवंव्याधिविशेषेण निमित्तमुपधारयेत् ॥
तथैवाक्रुष्टहाकष्टमाक्रन्दरुदितस्वनाः।
छर्द्दा वातपुरीषाणां शब्दो वै गर्दभोष्ट्रयोः ॥
प्रतिषिद्धं तथाभग्नं क्षुतं स्खलितमाहतं।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते ॥
प्रवेशेष्येतदुद्देशादवेक्ष्यंच तथातुरे।

प्रतिद्वारं गृहे वास्य पुनरेतन्न गण्यते ॥
केशभस्मास्थिकाष्ठाश्मतुषकार्पासकण्टकाः।
खट्वोर्द्धपादा मद्यापो वसा तैलं तिलास्तृणं ॥
नपुंसकव्यङ्गभग्ननग्नमुण्डासिताम्बराः।
प्रस्थाने वा प्रवेशे वा नेष्यन्ते दर्शनं गताः ॥
भाण्डानां सङ्करस्थानां स्थानात्सञ्चरणं तथा।
निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा ॥
वैद्यासनावसादो वा रोगी वा स्यादधोमुखः।
वैद्यं सम्भाषमाणोऽङ्गं कुड्यमास्तरणानि वा ॥
प्रमृद्याद्वा धुनीयाद्वा करौ पृष्ठं शिरस्तथा।
हस्तं चाकृष्य वैद्यस्य न्यसेच्छिरसि चोरसि ॥
यो वैद्यमुन्मुखः पृच्छेदुन्मार्ष्टि स्वाङ्गमातुरः।
न स सिद्ध्यति वैद्यो वा गृहे यस्य न पूज्यते ॥
भवने पूज्यते वापि यस्य वैद्यः स सिद्ध्यति।
शुभं शुभेषु दूतादिष्वशुभं ह्यशुभेषु च ॥
आतुरस्य ध्रुवं तस्माद्दूतादीन् लक्षयेद्भिषक्।
स्वप्नानतः प्रवक्ष्यामि मरणाय शुभाय च ॥
सुहृदो यांश्च पश्यन्ति व्याधितो वा स्वयं तथा।
स्नेहाभ्यक्तशरीरस्तु करभव्यालगर्दभैः ॥
वराहैर्महिषैर्वापि यो यायाद्दक्षिणामुखः।
रक्ताम्बरधरा कृष्णा हसन्ती मुक्तमूर्द्धजा ॥

यं वाकर्षति बद्ध्वा स्त्री नृत्यन्ती दक्षिणामुखं ।
अन्त्यावसायिभिर्य्यो वाकृष्यते दक्षिणामुखः ॥
परिष्वजेरन् यं वापि प्रेताः प्रव्रजितास्तथा ।
मूर्द्धन्याघ्रायते यस्तु श्वापदैर्व्विकृताननैः ॥
पिबेन्मधु च तैलञ्च यो वा पङ्केऽवसीदति ।
पङ्कप्रदिग्धगात्रो वा प्रनृत्येत्प्रहसेत्तथा ॥
निरम्बरश्च यो रक्तां धारयेच्छिरसि स्रजं ।
यस्य वंशो नलो वापि तालो वोरसि जायते ॥
यं वा मत्स्यो ग्रसेद्यो वा जननीं प्रविशेन्नरः ।
पर्वताग्रात्पतेद्यो वा श्वभ्रे वा तमसा हृते ॥
ह्रियते स्रोतसा योवा योवा मौण्ड्यमवाप्नुयात् ।
पराजीयेत बध्येत काकाद्यैर्वाभिभूयते ॥
पतनं तारकादीनां प्रणाशं दीपचक्षुषोः ।
यः पश्येद्देवतानां वा प्रकम्पमवनेस्तथा ॥
यस्य छर्द्दिर्व्विरेको वा दशनाः प्रपतन्ति वा ।
शाल्मलीं किंशुकं यूपं वल्मीकं पारिभद्रकं ॥
पुष्पाढ्यं कोविदारंवा चितां वायोऽधिरोहति ।
कार्पासतैलपिण्याकलोहानि लवणं तिलान् ॥
लभेताश्नीत वा पक्वमन्नं यश्च पिबेत्सुरां ।
स्वस्थः स लभते व्याधिं व्याधितो मृत्युमृच्छति ॥
यथास्वं प्रकृतिस्वप्नो विस्मृतो विहतश्च यः ।

चिन्ताकृतो दिवा दृष्टा भवन्त्यफलदास्तु ते॥
ज्वरितानां शुना सख्यं कपिसख्यन्तु शोषिणां।
उन्मादे राक्षसैः प्रेतैरपस्मारे प्रवर्त्तनं॥
मेहातिसारिणां तोयपानं स्नेहस्य कुष्ठिनां।
गुल्मेषु स्थावरोत्पत्तिः कोष्ठे मूर्द्ध्नि शिरोरुजि॥
शष्कुलीभक्षणं छर्द्यामध्वा श्वासपिपासयोः।
हारिद्रं भोजनं वापि यस्य स्यात्पाण्डुरोगिणः॥
रक्तपित्ती पिबेद्यश्च शोणितं स विनश्यति।
स्वप्नानेवं विधान् दृष्ट्वा प्रातरुत्थाय यत्नवान्॥
दद्यान्माषांस्तिलांल्लोहं विप्रेभ्यः काञ्चनं तथा।
जपेच्चापि शुभान् मन्त्रान् गायत्रीं त्रिपदां तथा॥
दृष्ट्वाच प्रथमे यामे सुप्याद्ध्यात्वा पुनः शुभं।
जपेद्वान्यतमं देवं ब्रह्मचारी समाहितः।
नचाचक्षीत कस्मैचिद्दृष्ट्वा स्वप्नमशोभनं॥
देवतायतने चैव वसेद्रात्रित्रयं तथा।
विप्रांश्च पूजयेन्नित्यं दुःस्वप्नात्प्रविमुच्यते॥
अतऊर्द्ध्वं प्रवक्ष्यामि प्रशस्तं स्वप्नदर्शनं।
देवान् द्विजान् गोवृषभान् जीवतः सुहृदो नृपान्॥
समिद्धमग्निं विप्रांश्च निर्म्मलानि जलानि च।
पश्येत्कल्याणलाभाय व्याधेरपगमाय च॥
मांसं मत्स्यान् स्रजःश्वेता वासांसि च फलानि च।

लभन्ते धनलाभाय व्याधेरपगमाय च ॥
महाप्रासादसफलवृत्तवारणपर्व्वतान्।
आरोहेद्द्रव्यलाभाय व्याधेरपगमाय च ॥
नदीनदसमुद्रांश्च क्षुभितान् कलुषोदकान्।
तरेत्कल्याणलाभाय व्याधेरपगमाय च ॥
उरगो वा जलौको वा भ्रमरो वापि यं दशेत्।
आरोग्यं निर्दिशेत्तस्य धनलाभञ्च बुद्धिमान्॥
एवंरूपान् शुभान् स्वप्नान् यः पश्येद्व्याधितो नरः।
स दीर्घायुरिति ज्ञेयस्तस्मै कर्म्म समाचरेत्॥

---

॥ त्रिंशत्तमोऽध्यायः ॥

अथातःपञ्चेन्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः ॥
शरीरशीलयोर्यस्य प्रकृतेर्व्विकृतिर्भवेत्।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे ॥
शृणोति विविधान् शब्दान् यो दिव्यानामभावतः।
समुद्रपुरमेघानामसम्पत्तौ च निःस्वनान् ॥
तान्स्वनान्नावगृह्णाति मन्यते चान्यशब्दवत्।
ग्राम्यारण्यस्वनांश्चापि विपरीतान् शृणोत्यपि ॥
द्विषच्छब्देषु रमते सुहृच्छब्देषु कुप्यति।
न शृणोति च योऽकस्मात्तं ब्रुवन्ति गतायुषं॥
यस्तूष्णमिव गृह्णाति शीतमुष्णञ्च शीतवत्।

सञ्जातशीतपिडको यस्य दाहेन पीड्यते ॥
उष्णगात्रोऽतिमात्रञ्च यः शीतेन प्रवेपते ।
प्रहारान्नाभिजानाति योऽङ्गच्छेदमथापि वा ॥
पांशुनेवावकीर्णानि यस्य गात्राणि मन्यते ।
वर्णान्यभावो राज्यो वा यस्य गात्रे भवन्ति हि ॥
स्नातानुलिप्तं यस्यापि भजन्ते नीलमक्षिकाः ।
सुगन्धिर्वाति योऽकस्मात्तं ब्रुवन्ति गतायुषं ॥
विपरीतेन गृह्णाति रसान्यश्चोपयोजितान् ।
उपयुक्ताः क्रमाद्यस्य रसा दोषाभिवृद्धये ॥
यस्य दोषाग्निसाम्यञ्च कुर्य्युर्मिथ्योपयोजिताः ।
यो वा रसान्न संवेत्ति गतासुं तं प्रचक्षते ॥
सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धितां ।
यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत् ॥
द्वन्द्वान्युष्णहिमादीनि कालावस्था दिशस्तथा ।
विपरीतेन गृह्णाति भावानन्यांश्च यो नरः ॥
दिवाज्योतींषि यस्यापि ज्वलितानीव पश्यति ।
रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसं ॥
अमेघोपप्लवे यस्य शक्रचापतडिद्गुणान् ।
तडित्वतोऽसितान् यो वा निर्मले गगने घनान् ॥
विमानयानप्रासादैर्यस्य सङ्कुलमम्बरं ।
यश्चानिलं मूर्त्तिमन्तमन्तरीक्षञ्च पश्यति ॥

धूमनीहारवासोभिरावृतामिव मेदिनीं ।
प्रदीप्तमिव लोकञ्च यो वा प्लुतमिवाम्भसा ॥
भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति ।
न पश्यति सनक्षत्रां यश्च देवीमरुन्धतीं ॥
ध्रुवमाकाशगङ्गांवा तं वदन्ति गतायुषं ।
ज्योत्स्नादर्शोष्णतोयेषु छायां यश्च न पश्यति ॥
पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्वजां ।
श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसां ॥
पिशाचोरगनागानां भूतानां विकृतामपि ।
यो वा मयूरकण्ठाभं विधूमं वह्निमीक्षते ॥
आतुरस्य भवेन्मृत्युः स्वस्थो व्याधिमवाप्नुयात् ॥

---

॥ एकत्रिंशत्तमोऽध्यायः ॥

॥ अथातश्छायाविप्रतिपत्तिमध्यायं व्याख्यास्यामः ॥
श्यावा लोहितिका नीला पीतिका वापि मानवं ।
अभिद्रवन्ति यं छायाः स परासुरसंशयं ॥
ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा ।
अकस्माद्यं भजन्ते वा स परासुरसंशयं ॥
यस्याधरौष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः ।
उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितं ॥

आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति च।
खञ्जनप्रतिमा वापि तं गतायुषमादिशेत्॥
कृष्णा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै।
कर्कशा वा भवेद्यस्य सोऽचिरादिजहात्यसून्॥
कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका।
अवस्फूर्जति मग्ना वा न स जीवति मानवः॥
सङ्क्षिप्ते विषमे स्तब्धे रक्ते स्रस्ते च लोचने।
स्यातां वा प्रस्रुते यस्य स गतायुर्नरो ध्रुवं॥
केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ।
लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे॥
नाहरत्यन्नमास्यस्थं न धारयति यः शिरः।
एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् जहाति सः॥
बलवान् दुर्ब्बलो वापि सम्मोहं योऽधिगच्छति।
उत्थाप्यमानो बहुशस्तं धीरः परिवर्जयेत्॥
उत्तानः सर्व्वदा शेते पादौ विकुरुते च यः।
विप्रसारणशीलो वा न स जीवति मानवः॥
शीतपादकरोच्छ्वासश्छिन्नश्वासश्च यो भवेत्।
काकोच्छ्वासश्च यो मर्त्यस्तं धीरः परिवर्जयेत्॥
निद्रा न छिद्यते यस्य यो वा जागर्त्ति सर्व्वदा।
मुह्येद्वा वक्तुकामस्तु प्रत्याख्येयः स जानता॥
उत्तरौष्ठञ्च यो लिह्यादुद्गारांश्च करोति यः।

प्रेतैर्व्वा भाषते सार्द्धं प्रेतरूपं तमादिशेत्॥
खेभ्यः सरोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते।
पुरुषस्याविषार्त्तस्य सद्यो जह्यात्स जीवितं॥
वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी।
रुजान्नविद्वेषकरी स परासुरसंशयं॥
अनन्योपद्रवकृतः शोफः पादसमुत्थितः।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयं॥
अतिसारो ज्वरो हिक्का छर्द्दिः शूनाण्डमेढ्रता।
श्वासिनः कासिनो वापि यस्य तं परिवर्जयेत्॥
स्वेदो दाहश्च बलवान् हिक्का श्वासश्च मानवं।
बलवन्तमपि प्राणैर्व्वियुञ्जन्ति न संशयः॥
श्यावा जिह्वा भवेद्यस्य सव्यं चाक्षि निमज्जति।
मुखञ्च जायते पूति यस्य तं परिवर्जयेत्॥
वक्त्रमापूर्य्यतेऽश्रूणां स्विद्यतश्चरणावुभौ।
चक्षुश्चाकुलतां याति यमराष्ट्रं गमिष्यतः॥
अतिमात्रं लघूनि स्युर्गात्राणि गुरुकाणि च।
यस्याकस्मात्स विज्ञेयो गन्ता वैवस्वतालयं॥
पङ्कमत्स्यवसातैलघृतगन्धांश्च ये नराः।
मृष्टगन्धांश्च ये वान्ति गन्तारस्ते यमालयं॥
यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयं॥

ज्वरातिसारशोफाः स्युर्यस्यान्योन्यावसादिनः ।
प्रक्षीणबलमांसस्य नासौ शक्यश्चिकित्सितुं ॥
क्षीणस्य यस्य क्षुत्तृष्णे हृद्यैर्मिष्टैर्हितैस्तथा ।
न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः ॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणं ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥
विषमेणोपचारेण कर्म्मभिश्च पुराकृतैः ।
अनित्यत्वाच्च जन्तूनां जीवितं निधनं व्रजेत् ॥
प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च ।
मरणाभिमुखं नित्यमुपसर्पन्ति मानवं ॥
तानि भेषजवीर्य्याणि प्रतिघ्नन्ति जिघांसया ।
तस्मान्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः ॥

---

## ॥ द्वात्रिंशत्तमोऽध्यायः ॥

अथातः स्वभावविप्रतिपत्तिमध्यायं व्याख्यास्यामः ॥

स्वभावप्रसिद्धानां शरीरैकदेशानामन्यभावित्वं मरणाय । तद्यथा । शुक्लानां कृष्णता कृष्णानां शुक्लता रक्तानामन्यवर्णत्वं स्थिराणामस्थिरत्वं मृदूनां स्थिरता चलानामचलत्वमचलानां चलता पृथूनां सङ्क्षिप्तत्वं सङ्क्षिप्तानां पृथुता दीर्घाणां ह्रस्वत्वं ह्रस्वानां दीर्घता ऽपतनधर्म्मिणां पतनधर्म्मित्वं पतनधर्म्मिणामपतनधर्म्मित्वमकस्माच्च शैत्यौष्ण्यस्नैग्ध्यरौक्ष्यप्रस्तम्भवैवर्ण्यावसदनञ्चाङ्गानां । स्वेभ्यः

स्थानेभ्यः शरीरैकदेशानामवस्रस्तोत्क्षिप्तभ्रान्तावक्षिप्तपतितविमुक्तनिर्गतान्तर्गतगुरुलघुत्वानि। प्रवालवर्णव्यङ्गप्रादुर्भावोऽप्यकस्मात्। सिराणाञ्च दर्शनं ललाटे नासावंशे वा पिडकोत्पत्तिः। ललाटे प्रभातकाले वा स्वेदः। नेत्ररोगाद्विना वाश्रुप्रवृत्तिः। गोमयचूर्णप्रकाशस्य वा रजसो दर्शनमुत्तमाङ्गे निलयनं वा कपोतकङ्कप्रभृतीनां। मूत्रपुरीषवृद्धिरभुञ्जानानां तत्प्रणाशो भुञ्जानानां। स्तनमूलहृदयोरःसु च शूलोत्पत्तयः। मध्ये शूनत्वमन्तेषु परिम्लायित्वं विपर्य्ययो वा तथार्द्धाङ्गे श्वयथुः। शोषो ऽङ्गपक्षयोर्वा नष्टहीनविकलविकृतस्वरता। विवर्णपुष्पप्रादुर्भावो वा दन्तमुखनखशरीरेषु। यस्य वाप्सु कफपुरीषरेतांसि निमज्जन्ति। यस्य वा दृष्टिमण्डले भिन्नविकृतानि रूपाण्यालोकयन्ते। स्नेहाभ्यक्तकेशाङ्ग इव यो भाति। यस्य दुर्ब्बलो भक्तद्वेषातिसाराभ्यां पीड्यते। कासमानश्च तृष्णाभिभूतः। क्षीणश्छर्दिभक्तद्वेषयुक्तः सफेनपूयरुधिरोद्वामी हतस्वरः शूलाभिपन्नश्च मनुष्यः। शूनकरचरणवदनः क्षीणोऽन्नद्वेषी स्रस्तपिण्डिकांसपाणिपादो ज्वरकासाभिभूतः। यस्तु पूर्व्वाह्णे भुक्तमपराह्णे छर्दयत्यविदग्धमतिसार्य्यते वा ज्वरकासाभिभूतः स श्वासान्म्रियते। वस्तवद्विलपन्यश्च भूमौ पतति स्रस्तमुष्कस्तब्धमेढ्रो भग्नग्रीवः प्रनष्टमेहनश्च मनुष्यः। प्राग्विशुष्यमाणहृदय आर्द्रशरीरो यश्च लोष्टं लोष्टेनाभिहन्ति काष्ठं काष्ठेन तृणानि वा छिनत्ति। अधरोष्ठं दशत्युत्तरोष्ठं वा लेढि। आलुञ्चति वा कर्णौ केशांश्च। देवद्विजगुरुसुहृद्वैद्यांश्च द्वेष्टि। यस्य वक्रानुवक्रगा ग्रहा गर्हितस्थानगताः पीडयन्ति जन्मर्क्षं वा

घस्रोल्काशनिभ्यामभिहन्यते हारा वा। गृहदारशयनासनयान
वाहनमणिरत्नोपकरणगर्हितलक्षणनिमित्तप्रादुर्भावो वेति।
भवन्तिचात्र। चिकित्स्यमानः सम्यक् च विकारो योऽभिवर्द्धते।

प्रक्षीणबलमांसस्य लक्षणं तद्गतायुषः॥
निवर्त्तते महाव्याधिः सहसा यस्य देहिनः।
न चाहारफलं यस्य दृश्यते स विनश्यति॥
एतान्यरिष्टरूपाणि सम्यग्बुद्ध्येत यो भिषक्।
साध्यासाध्यपरीक्षायां स राज्ञः सम्मतो भवेत्॥

---

## ॥ त्रयस्त्रिंशत्तमोऽध्यायः॥

॥ अथातोऽवारणीयमध्यायं व्याख्यास्यामः॥

उपद्रवैस्तु ये जुष्टा व्याधयो यान्त्यवार्य्यतां।
रसायनादिना वत्स तान् शृणुष्वैकमना मम॥
वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमं॥
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः।
प्राणमांसक्षयश्वासतृष्णाशोषवमीज्वरैः॥
मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः।
वर्ज्जनीया विशेषेण भिषजा सिद्धिमिच्छता॥
शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीडितं।

नरं रुजार्त्तिमन्तञ्च वातव्याधिर्व्विनाशयेत् ॥
यथोक्तोपद्रवाविष्टमतिप्रस्रुतमेव वा ।
पिडकापीडितं गाढं प्रमेहो हन्ति मानवं ॥
प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरं ।
पञ्चकर्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनं ॥
तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितं ।
शोफातीसारसंयुक्तमर्शोव्याधिर्व्विनाशयेत् ॥
वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च ।
भगन्दरात्प्रस्रवन्ति यस्य तं परिवर्ज्जयेत् ॥
प्रशूननाभिवृषणं रुद्धमूत्रं रुगन्वितं ।
अश्मरी क्षपयत्याशु सिकता शर्कराऽन्विता ॥
गर्भकोषपरासङ्गो मक्कलो योनिसंवृतिः ।
हन्यात् स्त्रियं मूढगर्भं यथोक्ताश्चाप्युपद्रवाः ॥
पार्श्वभङ्गान्नविद्वेषशोफातिसारपीडितं ।
विरिक्तं पूर्य्यमाणञ्च वर्ज्जयेदुदरार्दितं ॥
यस्ताम्यति विसंज्ञश्च शेते निपतितोऽपि वा ।
शीतार्दितोन्तरुष्णश्च ज्वरेण म्रियते नरः ॥
यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् ।
नित्यं वक्त्रेण चोच्छ्वस्यात् तं ज्वरो हन्ति मानवं ॥
हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोचनं ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥

आविलाचं प्रताम्यन्तं निद्रायुक्तमतीव च।
क्षीणशोणितमांसञ्च नरं क्षपयति ज्वरः॥
श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीडितं।
विशेषेण नरं वृद्धमतीसारो विनाशयेत्॥
शुक्लाक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीडितं।
कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवं॥
श्वासशूलपिपासान्नविद्वेषग्रन्थिमूढताः।
भवन्ति दुर्ब्बलत्वञ्च गुल्मिनो मृत्युमेष्यतः॥
आध्मातं बद्धनिष्यन्दं छर्द्दिहिक्कातृडन्वितं।
रुजाश्वाससमाविष्टं विद्रधिर्नाशयेन्नरं॥
पाण्डुदन्तनखो यस्य पाण्डुनेत्रश्च मानवः।
पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति॥
लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः।
रक्तानाञ्च दिशां द्रष्टा रक्तपित्ती विनश्यति॥
अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः।
जागरिष्णुरसन्देहमुन्मादेन विनश्यति॥
बहुशोऽपस्मरन्तन्तु प्रक्षीणं चलितभ्रुवं।
नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्॥

---

॥ चतुस्त्रिंशोऽध्यायः ॥

अथातो युक्तसेनीयमध्यायं व्याख्यास्यामः ॥

युक्तसेनस्य नृपतेः परानभिजिगीषतः ।
भिषजा रक्षणं कार्य्यं यथा तदुपदेक्ष्यते ॥
विजिगीषुः सहामात्यैर्यात्रायुक्तः प्रयत्नतः ।
रक्षितव्यो विशेषेण विषादेव नराधिपः ॥
पन्थानमुदकं छायां भक्तं यवसमिन्धनं ।
दूषयन्त्यरयो यस्मात्जानीयाच्छोधयेत्तथा ।
तस्य लिङ्गं चिकित्सा च कल्पस्थाने प्रवक्ष्यते ॥
एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते ।
तत्रैकः कालसंज्ञस्तु शेषास्त्वागन्तवः स्मृताः ॥
दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्व्वेदमभाषत ।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान् ॥
सङ्करः सर्व्ववर्णानां प्रणाशो धर्म्मकर्म्मणां ।
प्रजानामपि चोच्छित्तिर्नृपव्यसनहेतुतः ॥
पुरुषाणां नृपाणाञ्च केवलं तुल्यमूर्त्तिता ।
आज्ञा त्यागः क्षमा धैर्य्यं विक्रमश्चाप्यमानुषः ॥
तस्माद्देवमिवाभीक्ष्णं वाङ्मनःकर्म्मभिः शुभैः ।
चिन्तयेन्नृपतिं नित्यं श्रेयांसीच्छन् विचक्षणः ॥

स्कन्धावारे च महति राजगेहादनन्तरं।
भवेत्सन्निहितो वैद्यः सर्व्वोपकरणान्वितः॥
तत्रस्थमेनं ध्वजवद्यशःख्यातिसमुच्छ्रितं।
उपसर्पन्त्यमोहेन विषशस्त्रामयार्दिताः॥
स्वतन्त्रकुशलोऽन्येषु शास्त्रार्थेष्वबहिष्कृतः।
वैद्यो ध्वज इवाभाति नृपतद्विधपूजितः॥
वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः॥
गुणवद्भिस्त्रिभिःपादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयङ्कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतं।

युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितं ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीच्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥

---

॥ पञ्चत्रिंशदध्यायः ॥

अथात आतुरोपक्रमणीयमध्यायं व्याख्यास्यामः ॥ आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्षेत । सत्यप्यायुषि व्याध्यृत्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत ॥ तत्र महापाणिपादपार्श्वपृष्ठस्तनाग्रदशनवदनस्कन्धललाटं दीर्घाङ्गुलि पर्व्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्वस्वरनाभिमनुच्चैर्ब्बद्धस्तनमुपचितमहारोमशकर्णं पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्व्या विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति । तमेकान्तेनोपक्रमेत् । एभिर्लक्षणैर्व्विपरीतैरल्पायुर्मिश्रैर्म्मध्यमायुरिति ॥ भवन्तिचात्र ॥ गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः ।
उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥
गर्भात्प्रभृत्यरोगो यः शनैः समुपचीयते ।
शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥
मध्यमस्यायुषो ज्ञानमत ऊर्द्ध्वं निबोध मे ।

अधस्तादक्षयोर्यस्य लेखाः स्युर्व्यक्तमायताः ॥
द्वे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ।
नासाग्रमूर्द्धञ्च भवेदूर्द्धलेखाश्च पृष्ठतः॥
यस्य स्युस्तस्य परममायुर्भवति सप्ततिः।
जघन्यस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे॥
ह्रस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनं।
तथोरस्यवलीढानि नच स्यात्पृष्ठमायतं॥
ऊर्द्धञ्च श्रवणौ स्थानान्नासा चोच्चा शरीरिणः।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते।
प्रेचते यश्च विभ्रान्तं स जीवेत्पञ्चविंशतिं॥

अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः। तत्राङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति। तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते। प्रदेशिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना। चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले। पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः। चतुर्दशाङ्गुलायतः पादः। चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि। अष्टादशाङ्गुला जङ्घा जानूपरिष्टाद्द्वात्रिंशदङ्गुलमेवं पञ्चाशत्। जङ्घायामसमावूरू। द्व्यङ्गुलानि वृषणचिवुकदशननासापुटभागकर्णमूलनयनान्तराणि। चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णललाटग्रीवोच्छ्रायदृष्ट्यन्तराणि। द्वादशाङ्गुलानि भगविस्तारमेहननाभिहृदयग्रीवास्तनान्तरमुखायाममणिबन्धप्र

कोष्ठस्थौल्यानि। इन्द्रवस्तिपरिणाहांसपीठकूर्परान्तरायामः षोडशाङ्गुलः। चतुर्विंशत्यङ्गुलो हस्तः। द्वात्रिंशदङ्गुलपरिमाणौ भुजौ द्वात्रिंशत्परिणाहावूरू। मणिबन्धकूर्परान्तरं षोडशाङ्गुलं। तलं षट्चतुरङ्गुलायामविस्तारं। अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चाङ्गुले। अर्द्धपञ्चाङ्गुले प्रदेशिन्यनामिके। सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ। चतुर्विंशतिविस्तारपरिणाहं मुखग्रीवं। त्रिभागाङ्गुलिविस्तारा नासापुटमर्य्यादा। नयनत्रिभागपरिणाहा तारका। नवमस्तारकांशो दृष्टिः। केशान्तमस्तकान्तरमेकादशाङ्गुलं। मस्तकादवटुकेशान्तो दशाङ्गुलः कर्णावद्वन्तरं चतुर्दशाङ्गुलं। पुरुषोरःप्रमाणविस्तीर्णा स्त्रीश्रोणिः। अष्टादशाङ्गुलविस्तीर्णमुरः। तत्प्रमाणा पुरुषस्य कटी। सविंशमङ्गुलशतं पुरुषायाम इति॥

भवन्तिचात्र॥ पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे।

समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक्॥

देहः स्वैरङ्गुलैरेष यथावदनुकीर्त्तितः।

युक्तप्रमाणेनानेन पुमान् वा यदि वाऽङ्गना॥

दीर्घमायुरवाप्नोति वित्तञ्च महदृच्छति।

मध्यमं मध्यमैरायुर्व्वित्तं हीनैस्तथाऽवरं॥

अथ सारान् वक्ष्यामः॥ स्मृतिभक्तिप्रज्ञाशौर्य्यशौचोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात्। स्निग्धसंहतश्वेतास्थिदन्तनखं बहुलकामप्रजं शुक्रेण। अकृशमुत्तमबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा। महाशिरःस्कन्धदृढदन्तहन्वस्थिनखमस्थि

भिः स्निग्धमूत्रस्वेदस्वरं बृहच्छरीरमायाससहिष्णुं मेदसा । अच्छिद्रगात्रं गूढास्थिसन्धिं मांसोपचितञ्च मांसेन । स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन । सुप्रसन्नमृदुत्वग्रोमाणं त्वक्सारं विद्यादित्येषां पूर्व्वं पूर्व्वं प्रधानमायुः सौभाग्ययोरपि ।

भवति चात्र ॥ सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः ।
परीक्ष्यायुः सुनिपुणो भिषक् सिध्यति कर्म्मसु ॥

व्याधिविशेषास्तु प्रागभिहिताः सर्व्व एवैते त्रिविधाःसाध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत किमसावौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति । तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः । प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च । अन्यलक्षणो यो भविष्यद्व्याधिख्यापकः स पूर्व्वरूपसंज्ञः । तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा । प्राक्केवलं यथास्वं प्रतिकुर्व्वीत । अन्यलक्षणे त्वादिव्याधौ प्रयतेत ॥

भवति चात्र ॥ नास्ति रोगो विना दोषैर्य्यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥

प्रागभिहिता ऋतवः । शीते शीतप्रतीकार उष्णे चोष्मनिवारणं ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया ।
क्रियाहीनाऽतिरिक्ता वा साध्येष्वपि न सिध्यति ॥
यात्युदीर्णं शमयति नान्यं व्याधिं करोति च ।

सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥

प्रागभिहितोऽग्निरन्नस्य पाचकः । स चतुर्व्विधो भवति दोषान भिपन्न एको विक्रियामापन्नस्त्रिविधो भवति विषमो वातेन तीक्ष्णः पित्तेन मन्दः श्लेष्मणा चतुर्थः समः सर्व्वसाम्यादिति ॥ तत्र यो यथा कालमन्नमुपयुक्तं सम्यक्पचति स समः समैर्दोषैः । यः कदाचित्सम्यक्पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठर गौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः । यः प्रभूतमप्युपयुक्त मन्नमाशु पचति स तीक्ष्णः स एवाभिवर्द्धमानोऽत्यग्निरित्या भाष्यते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकान्तेच गलताल्वोष्ठशोषदाहसन्तापान् जनयति । यः स्वल्पमप्युपयुक्तमुद रशिरोगौरवकासश्वासप्रसेकच्छर्द्दिगात्रसदनानि कृत्वा महता का लेन पचति स मन्दः ॥

विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥

तत्र समे परिरक्षणं कुर्व्वीत विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्व्वीत तीक्ष्णे मधुरस्निग्धशीतैर्व्विरेकैश्च । एवमेवात्यग्नौ विशे षेण माहिषैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्वमनैश्च ॥

जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।
सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥
प्राणापानसमानैस्तु सर्व्वतः पवनैस्त्रिभिः ।
ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः ॥

वयस्तु त्रिविधं बालं मध्यं वृद्धमिति। तत्रोनषोडशवर्षा बालास्ते ऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादाइति तेषु सम्वत्सर पराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति॥ षोडशसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं संपूर्णता हानिरिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अतऊर्द्धमीषत् परिहाणिर्या वत्सप्ततिरिति॥ सप्ततेरूर्द्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्य्योत्साहमह न्यहनि बलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभि भूयमानं सर्व्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते॥ तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषज मात्राविशेषा भवन्त्यृतेच परिहाणेस्तत्राद्यापेक्षया प्रतिकुर्वीत। भवन्ति चात्र॥ बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेवतु ।

भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥
अग्निचारविरेकैस्तु बालवृद्धौ विवर्जयेत्।
तत्साध्येषु विकारेषु मृद्वीं कुर्य्यात्क्रियां शनैः॥

देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः ।

कर्शयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ ।
रक्षणञ्चैव मध्यस्य कुर्व्वीत सततं भिषक्॥

बलमभिहितगुणं दौर्ब्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यं॥ यस्माद्बलवतः सर्व्वक्रियाप्रवृत्तिस्तस्माद्बलमेव प्रधानमधिकरणानां॥

केचित् कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः।

तस्मात् स्थिरत्वव्यायामैर्ब्बलं वैद्यः प्रतर्कयेत् ॥

सत्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्ववैकल्यकरं।

सत्त्ववान् सहते सर्व्वं संस्तभ्यात्मानमात्मना।

राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः ॥

प्रकृतिं भेषजं चोपरिष्टाद्वक्ष्यामः ॥ सात्म्यानि तु देशकालजात्यृतुरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति।

यो रसः कल्पते यस्य सुखायैव निषेवितः।

व्यायामजातमन्यद्वा तत्सात्म्यमिति निर्द्दिशेत् ॥

देशस्त्वानूपो जाङ्गलः साधारण इति ॥ तत्र बहूदकनिम्नोन्नतनदीवर्षगहनो मृदुशीतानिलो बहुमहापर्व्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चानूपः ॥ आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः ॥ उभयदेशलक्षणः साधारण इति ॥

भवन्ति चात्र ॥ समाः साधारणे यस्माच्छीतवर्षोष्ममारुताः।

दोषाणां समता जन्तोस्तस्मात्साधारणो मतः ॥

न तथा बलवन्तः स्युर्जलजा वा स्थलाहृताः।

स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः ॥

उचिते वर्त्तमानस्य नास्ति देशकृतं भयं।

आहारस्वप्नचेष्टादौ तद्देशस्य गुणे सति ॥

देशप्रकृतिसात्म्यर्त्तुविपरीतो ऽचिरोत्थितः ।
सम्पत्तौ भिषगादीनां बलसत्वायुषां तथा ॥
केवलः समदेहाग्नेः सुखसाध्यतमो गदः ।
अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्यामिश्रलक्षणः ॥
क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥
गुणालाभेऽपि सपदि यदि सैव क्रिया हिता ।
कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि ॥
य एवमेनं विधिमेकरूपं बिभर्त्ति कालादिवशेन धीमान् ।
स मृत्युपाशान् जगतो गदौघान् छिनत्ति भैषज्यपरश्वधेन ॥

---

॥ षट्त्रिंशत्तमोऽध्यायः ॥

॥ अथातो मिश्रकमध्यायं व्याख्यास्यामः ॥

मातुलुङ्गाग्निमन्थौ च देवदारुमहौषधं ।
अहिंस्राचैव रास्ना च प्रलेपो वातशोफहृत् ॥
दूर्वा च नलमूलञ्च मधुकं चन्दनं तथा ।
शीतलाश्चगणाः सर्व्वे प्रलेपः पित्तशोफहृत् ॥
आगन्तुजे रक्तजे च एष एव विधिः स्मृतः ।
विधिर्विषघ्नो विषजे पित्तघ्नोऽपि हितस्तथा ॥
अजगन्धाश्वगन्धा च काला सरलया सह ।
एकैषिकाजशृङ्गी च प्रलेपः श्लेष्मशोफहृत ॥

एते वर्गास्त्रयो लोध्रं पथ्या पिण्डीतकानि च।
अनन्ता चेति लेपोऽयं सान्निपातिकशोफहृत्॥
स्निग्धाम्ललवणो वाते कोष्णः शीतः पयोयुतः।
पित्ते चोष्णः कफे क्षारमूत्राढ्यस्तत्प्रशान्तये॥
शणमूलकशिग्रूणां फलानि तिलसर्षपाः।
शक्तवः किण्वमतसी द्रव्याण्युष्णानि पाचनं॥
चिरबिल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतगृध्रकङ्कानां पुरीषाणि च दारणं।
क्षारद्रव्याणि वा यानि क्षारो वा दारणं परं॥
द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपीडनं।
यवगोधूममाषाणां चूर्णानि च समासतः॥
शङ्खिन्यङ्कोठसुमनःकरवीरसुवर्चलाः।
शोधनानि कषायाणि वर्गश्चारग्वधादिकः॥
अजगन्धाजशृङ्गी च गवाक्षी लाङ्गलाह्वया।
पूतीकश्चित्रकः पाठा विडङ्गैलाहरेणवः॥
कटुत्रिकं यवक्षारो लवणानि मनःशिला।
कासीसं त्रिवृता दन्ती हरितालं सुराष्ट्रजा॥
संशोधनीनां वर्त्तीनां द्रव्याण्येतानि निर्दिशेत्।
एतैरेवौषधैः कुर्य्यात्कल्कानपि च शोधनान्॥
कासीसकटुरोहिण्योर्जातीकन्दहरिद्रयोः।
पूर्व्वोद्दिष्टेषु चाङ्गेषु कुर्य्यात्तैलघृतानि वै॥

अर्कोत्तमां स्नुहीक्षीरं पिष्ट्वा क्षारोत्तमानपि।
जातीमूलं हरिद्रे द्वे कासीसं कटुरोहिणीं॥
पूर्व्वोद्दिष्टानि चान्यानि कुर्य्यात्संशोधनं घृतं॥
मयूरको राजवृक्षो निम्बः कोषातकी तिलाः।
बृहती कण्टकारीच हरितालं मनःशिला।
शोधनानि च योज्यानि तैले द्रव्याणि शोधने॥
कासीसे सैन्धवे किण्वे वचायां रजनीद्वये।
शोधनाङ्गेषु चान्येषु चूर्णं कुर्व्वीत शोधनं॥
सालसारादिसारेषु पटोलत्रिफलासु च।
रसक्रिया विधातव्या शोधनी शोधनेषु च॥
श्रीवेष्टके सर्जरसे सरले देवदारुणि।
सारेष्वपि च कुर्व्वीत मतिमान् व्रणधूपनं॥
कषायाणामनुष्णानां वृक्षाणां त्वक्षु साधितं
शृतशीतं कषायं वा रोपणार्थेषु शस्यते॥
सोमामृताश्वगन्धासु काकोल्यादौ गणे तथा
क्षीरिप्ररोहेष्वपि च वर्त्तयो रोपणाः स्मृताः॥
समङ्गा सोमसरला सोमवल्का सचन्दना।
काकोल्यादिश्च कल्कःस्यात् प्रशस्तो व्रणरोपणे॥
पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता।
काकोल्यादिश्च योज्यः स्यात् प्रशस्तो रोपणे घृते॥
कालानुसार्य्यागुरुणी हरिद्रे देवदारुच।

प्रियङ्ग्वश्च रोध्रञ्च तैले योज्यानि रोपणे ॥
कङ्गुका त्रिफला रोध्रं कासीसं श्रवणाह्वया ।
धवाश्वकर्णयोस्त्वक् रोपणं चूर्णमिष्यते ॥
प्रियङ्गुका सर्जरसः पुष्पं कासीसमेव च ।
त्वक्चूर्णं धवजं चैव रोपणार्थं प्रशस्यते ॥
त्वचु न्यग्रोधवर्गस्य त्रिफलायास्तथैव च ।
रसक्रियां रोपणार्थे विदधीत यथाक्रमं ॥
अपामार्गोऽश्वगन्धा च तालपत्री सुवर्चला ।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः ॥
कासीसं सैन्धवं किण्वं कुरुविन्दो मनःशिला ।
कुक्कुटाण्डकपालानि सुमनोमुकुलानि च ॥
फले शैरीषकारञ्जे धातुचूर्णानि यानि च ।
व्रणेषूत्सन्नमांसेषु प्रशस्तान्यवसादने ॥
समस्तं वर्गमर्द्धं वा यथालाभमथापि वा ।
प्रयुञ्जीत भिषक् प्राज्ञो यथोद्दिष्टेषु कर्मसु ॥

---

॥ सप्तत्रिंशत्तमोऽध्यायः ॥

अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः ॥

श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाऽघतनदेवतायतनसिकताभि रनुपहतामनूषरामभङ्गुरामदूरादेकां स्निग्धां प्ररोहवतींमृद्वीं

स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमिविषशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढमूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सामान्यः ॥

विशेषतस्तु । तत्राश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा ॥ स्निग्धा शीतला सन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाम्बुगुणभूयिष्ठा ॥ नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा ॥ रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा ॥ मृद्वी समा श्वभ्रवत्यव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्षप्राया श्यामाचाकाशगुणभूयिष्ठा ॥

तत्र केचिदाहुराचार्य्याः । प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तत्तु न सम्यक् कस्मात्सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येष्वृतुष्वाददीताग्नेयान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति ॥ सौम्यान्यौषधानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते । एतेन शेषं व्याख्यातं ॥

तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतोभागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति । सर्व्वाण्येव चाभिनवान्यन्यत्र

मधुघृतगुडपिप्पलीविडङ्गेभ्यः। सर्व्वाण्येव सचीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति॥

भवन्तिचात्र। गोपालास्तापसा व्याधा ये चान्ये वनचारिणः।
मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते॥
सर्व्वावयवसाध्येषु पलाशलवणादिषु।
व्यवस्थिता न कालोऽस्ति तत्र सर्व्वा विधीयते॥
गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते।
तस्माद्भूमिस्वभावेन वीजिनः षड्रसायुताः॥
अव्यक्तः किल तोयस्य रसो निश्चयनिश्चितः।
रस एव सचाव्यक्तो व्यक्तो भूमिरसाद्भवेत्॥
सर्व्वलक्षणसम्पन्ना भूमिः साधारणा स्मृता।
द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः॥
विगन्धेनापरामृष्टमविपन्नं रसादिभिः।
नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत्॥
विडङ्गं पिप्पली क्षौद्रं सर्प्पिश्चाप्यनवं हितं।
शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्जितं॥
जङ्गमानां वयःस्थानां रक्तरोमनखादिकं।
क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत्॥
प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजं।
प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते॥

---

## ॥ अष्टात्रिंशत्तमोऽध्यायः ॥

अथातो द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः ॥

समासेन सप्तत्रिंशद्द्रव्यगणा भवन्ति। तद्यथा । विदारिगन्धा विदारी सहदेवा विश्वदेवा श्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहा बृहत्यौ पुनर्नवे एरण्डो हंसपादी वृश्चिकाल्यृषभी चेति ॥

विदारीगन्धादिरयं गणः पित्तानिलापहः ।
शोषगुल्माङ्गमर्दोर्द्ध्वश्वासकासविनाशनः ॥

आरग्वधमदनगोपघोण्टाकुटजपाठाकण्टकीपाटलामूर्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासीकुरुण्टकगुडूचीचित्रकशार्ङ्गेष्टाकरञ्जद्वयपटोलकिराततिक्तकानि सुषवी चेति ॥

आरग्वधादिरित्येष गणः श्लेष्मविषापहः ।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ॥

वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृङ्गीपूतीकनक्तमालमोरटाग्निमन्थसैरीयकद्वयबिम्बीवसुकवसिरचित्रकशतावरीबिल्वाजशृङ्गीदर्भा बृहतीद्वयञ्चेति ।

वरुणादिर्गणो ह्येष कफमेदोनिवारणः ।
विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन् ॥

वीरतरुसहचरद्वयदर्भवृक्षादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटावसुकवसिरभल्लूककुरुण्टकेन्दीवरकपोतवङ्काःश्वदंष्ट्रा चेति ॥

वीरतर्वादिरित्येष गणो वातविकारनुत्।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः ॥

सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकश्चेति ॥

सालसारादिरित्येष गणः कुष्ठविनाशनः।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः ॥

रोध्रसावररोध्रपलाशकुटन्नटाशोकफञ्जीकट्फलैलवालुकसल्लकीजिङ्गिनीकदम्बसालाः कदली चेति ॥

एष रोध्रादिरित्युक्तो मेदःकफहरो गणः।
योनिदोषहरस्तम्भी वर्ण्यो विषविनाशनः ॥

अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति।

अर्कादिको गणो ह्येष कफमेदोविषापहः।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः ॥

सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणसुगन्धकसुमुखकालमालकासमर्दक्षवकखरपुष्पाविडङ्गकट्फलसुरसीनिर्गुण्डीकुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीबलकाकमाच्यो विषमुष्टिकश्चेति ॥

सुरसादिर्गणो ह्येष कफहृत्कृमिसूदनः।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥

मुष्ककपलाशधवचित्रकमदनवृक्षशिंशपावज्रवृक्षास्त्रिफला चेति ॥

मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहृत्।
मेहार्शःपाण्डुरोगघ्नः शर्कराश्मरिनाशनः ॥

पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति ॥

पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः ॥

एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकबालकगुग्गुलुसर्जरसतुरुष्ककुन्दुरुकागुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति ॥

एलादिको वातकफौ निहन्याद्विषमेव च।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ॥

वचामुस्तातिविषाभयाभद्रदारूणि नागकेशरञ्चेति ॥

हरिद्रा दारुहरिद्राकलशीकुटजबीजानि मधुकं चेति ॥

एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ।
आमातीसारशमनौ विशेषाद्दोषपाचनौ ॥

श्यामामहाश्यामात्रिवृद्दन्तीशङ्खिनीतिल्वककम्पिल्लकरम्यकक्रमुकपुत्रश्रेणीगवाक्षीराजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥

उक्तः श्यामादिरित्येष गणो गुल्मविषापहः।

आनाहोदरविड्भेदी तथोदावर्त्तनाशनः ॥

बृहतीकण्टकारिकाकुटजफलपाठा मधुकञ्चेति ॥

पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः ।
कफारोचकहृद्रोगमूत्रकृच्छ्ररुजापहः ॥

पटोलचन्दनकुचन्दनमूर्व्वागुडूचीपाठाः कटुरोहिणी चेति ॥

पटोलादिर्गणः पित्तकफारोचकनाशनः ।
ज्वरोपशमनो व्रण्यश्छर्दिकण्डूविषापहः ॥

काकोलीचीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाछिन्नरुहाकर्कटशृङ्गीतुगाचीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति ।

काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ॥

ऊषकसैन्धवशिलाजतुकासीसद्वयहिङ्गूनि तुत्थकञ्चेति

ऊषकादिः कफं हन्ति गणो मेदोविशोषणः ।
अश्मरीशर्करामूत्रकृच्छ्रगुल्मप्रणाशनः ॥

सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधूकपुष्पाणु शीरञ्चेति ॥

सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः ।
पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः ॥

अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिनकेशराणि मधुकञ्चेति ॥

अञ्जनादिर्गणो ह्येष रक्तपित्तनिवर्हणः।
विषोपशमनो दाहं निहन्त्याभ्यन्तरं तथा॥

परूषकद्राक्षाकट्फलदाडिमराजादनकतकफलशाकफलानि त्रिफला चेति।

परूषकादिरित्येष गणोऽनिलविनाशनः।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः॥

प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनकुचन्दनमोचरसरसाञ्जन कुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूला चेति॥

अम्बष्ठाधातकीकुसुमसमङ्गाकट्वङ्गमधुकविल्वपेशिकारोध्रसावररोध्रपलाशनन्दीवृक्षपद्मकेशराणि चेति॥

गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ।
सन्धानीयौ हितौ पित्ते व्रणानाञ्चापि रोपणौ॥

न्यग्रोधोडुम्बराश्वत्थप्लक्षमधूककपीतनककुभाम्रकोशाम्रचोरकपत्रजम्बूद्वयपियालमधुकरोहिणीवञ्जुलकदम्बवदरीतिन्दुकीसल्लकीरोध्रसावररोध्रभल्लातकपलाशा नन्दीवृक्षश्चेति।

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत्॥

गुडूचीनिम्बकुस्तुम्बुरुचन्दनानि पद्मकश्चेति॥

एष सर्व्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः।
हृल्लासारोचकवमीपिपासादाहनाशनः॥

उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकाणि मधुकश्चेति॥

उत्पलादिरयं दाहपित्तरक्तविनाशनः ।
पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः ॥

मुस्ताहरिद्रादारुहरिद्राहरीतक्यामलकविभीतककुष्ठहैमवती वचापाठाकटुरोहिणीशार्ङ्गेष्टातिविषाद्राविडीभल्लातकानि चित्रकश्चेति ॥

एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः ।
योनिदोषहरस्तन्यशोधनः पाचनस्तथा ॥

हरितक्यामलकविभीतकानि त्रिफला ॥

त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशनी ।
चक्षुष्या दीपनी चैव विषमज्वरनाशनी ॥

पिप्पलीमरिचशृङ्गबेराणि त्रिकटुकं ।

व्यूषणं कफमेदोघ्नं मेहकुष्ठत्वगामयान् ।
निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि ॥

आमलकीहरीतकीपिप्पल्यश्चित्रकश्चेति ॥

आमलक्यादिरित्येष गणः सर्व्वज्वरापहः ।
चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः ॥

त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलश्चेति ॥

गणस्त्वघ्रादिरित्येष गरक्रिमिहरः परः ।
पिपासाविषहृद्रोगपाण्डुमेहहरस्तथा ॥

लाक्षारेवतकुटजाऽश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति ॥

कषायस्तिक्तमधुरः कफपित्तार्त्तिनाशनः।
कुष्ठक्रिमिहरश्चैव दुष्टव्रणविशोधनः॥

पञ्च पञ्च मूलान्यत ऊर्द्धं वक्ष्यामः॥ तत्र त्रिकण्टकवृहतीद्वय पृथक्पर्ण्यौ विदारिगन्धा चेति कनीयः॥

कषायतिक्तमधुरं कनीयः पञ्चमूलकं।
वातघ्नं पित्तशमनं वृंहणं बलवर्द्धनं॥

विल्वाग्निमन्थटुण्टुकपाटलाकाश्मर्य्यश्चेति महत्।

सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्।
मधुरानुरसञ्चैव पञ्चमूलं महत् स्मृतम्॥

अनयोर्दशमूलमुच्यते॥

गणः श्वासहरो ह्येष कफपित्तानिलापहः।
आमस्य पाचनश्चैव सर्व्वज्वरविनाशनः॥

विदारीसारिवारजनीगुडूच्योऽजशृङ्गी चेति वल्लीसंज्ञः॥

करमर्द त्रिकण्टकसैरीयकशतावरीगृध्रनख्यइति कण्टकसंज्ञः।

रक्तपित्तहरौ ह्येतौ शोफत्रयविनाशनौ।
सर्व्वमेहहरौ चैव शुक्रदोषविनाशनौ॥

कुशकाशनलदर्भकाण्डेक्षुका इति तृणसंज्ञकः।

मूत्रदोषविकारञ्च रक्तपित्तं तथैवच।
अन्त्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत्॥

एषां वातहरावाद्यावन्त्यः पित्तविनाशनः।
पञ्चकौ श्लेष्मशमनावितरौ परिकीर्त्तितौ॥

त्रिवृतादिकमन्यत्रोपदेक्ष्यामः ।

समासेन गणा ह्येते प्रोक्तास्तेषान्तु विस्तरम् ।
चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम् ॥
एभिर्लेपान् कषायांश्च तैलं सर्प्पींषि पानकान् ।
प्रविभज्य यथान्यायं कुर्व्वीत मतिमान् भिषक् ॥
धूमवर्षानिलक्लेदैः सर्व्वर्त्तुष्वनभिद्रुते ।
ग्राहयित्वा गृहे न्यस्येद्विधिनौषधसंग्रहं ॥
समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत् ।
पृथङ्मिश्रान् समस्तान्वा गणं वा व्यस्तसंहतं ॥

---

॥ एकोनचत्वारिंशत्तमोऽध्यायः ॥

अथातः संशोधनसंशमनीयमध्यायं व्याख्यास्यामः ॥

मदनकुटजजीमूतकेक्ष्वाकुधामार्गवकृतवेधनसर्षपविडङ्गपिप्पलीकरञ्जप्रपुन्नाडकोविदारकर्वुदारारिष्टाश्वगन्धाविदुलबन्धुजीवकश्वेतासणपुष्पीविम्बीवचामृगेर्व्वारुचित्राश्चेत्यूर्द्धभागहराणि । तत्रकोविदारपूर्व्वाणां फलानि । कोविदारादीनां मूलानि ॥

त्रिवृताश्यामादन्तीद्रवन्तीसप्तलाशङ्खिनीविषाणिकागवाक्षीछगलान्त्रीस्नुक्सुवर्णक्षीरीचित्रककिणिहीकुशकाशतिल्वककम्पिल्लकरम्यकपाटलापूगहरीतक्यामलकविभीतकनीलिनीचतुरङ्गुलैरण्डपूतीकमहावृक्षसप्तच्छदार्कज्योतिष्मतीचेत्यधोभागहराणि ।

तत्र तिल्वकपूर्व्वाणांमूलानि । तिल्वकादीनां पाटलान्तानां त्वचः ।

कम्पिल्लकफलरजः । पूगादीनामेरण्डान्तानां फलानि । पूतीकारग्वधयोः पत्राणि । शेषाणां क्षीराणीति ॥

कोशातकी सप्तला शङ्खिनी देवदाली कारवेल्लिका चेत्युभयतोभागहराणि । एषां स्वरसा इति ॥

पिप्पलीविडङ्गापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरविम्बीगिरिकर्णिकाकिणिहीवचाज्योतिष्मतीकरञ्जार्कालर्कलशुनातिविषाशृङ्गवेरतालीशतमालसुरसार्जकेङ्गुदीमेषशृङ्गीमातुलुङ्गीमुरुङ्गीपीलुजातीशालतालमधूकलाक्षाहिङ्गुलवणमद्यगोशकृद्रसमूत्राणीति शिरोविरेचनानि । तत्र करवीरपूर्व्वाणां फलानि । करवीरादीनामर्कान्तानां मूलानि । तालीशपूर्व्वाणां कन्दाः । तालीशादीनामर्जकान्तानां पत्राणि । इङ्गुदीमेषशृङ्गीत्वचौ । मातुलुङ्गीमुरुङ्गीपीलुजातीनां पुष्पाणि । शालतालमधूकानां साराः । हिङ्गुलाक्षे निर्य्यासौ । लवणानि पार्थिवविशेषाः । मद्यान्यासवसंयोगाः । गोमूत्रशकृद्रसौ मलाविति ॥

संशमनान्यतऊर्द्धं वक्ष्यामः ॥ तत्र भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीवलातिवलार्त्तगलकच्छुराशल्लकीकुवेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्काकशतावरीपुनर्नवावसुकवसिरकाञ्चनकभार्गीकार्प्पासीवृश्चिकालीपत्तूरवदरयवकोलकुलत्थप्रभृतीनि विदारिगन्धादिश्च द्वे चाद्ये पञ्चमूल्यौ समासेन वातसंशमनो वर्गः ॥

चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठापयस्याविदारिशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पलकदलीकन्दलीदूर्व्वामूर्व्वाप्रभृतीनि

काकोल्यादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः ॥

कालेयकागुरुतिलपर्णीकुष्ठहरिद्राशीतशिवशतपुष्पासरलारास्नाप्रकीर्य्योदकीर्य्येङ्गुदीसुमनःकाकादनीलाङ्गलकीहस्तिकर्णमुञ्जातकलामज्जकप्रभृतीनि वल्लीकण्टकपञ्चमूल्यौ पिप्पल्यादिर्बृहत्यादिर्मुष्ककादिर्वचादिः सुरसादिरारग्वधादिरिति समासेन श्लेष्मसंशमनो वर्गः ॥

तत्र सर्वाण्येवौषधानि व्याध्यग्निपुरुषबलान्यभिसमीक्ष्य विदध्यात्। तत्र व्याधिबलादधिकमौषधमुपयुक्तं तमुपशमय्य व्याधिं व्याधिमन्यमावहति । अग्निबलादधिकमजीर्णं विष्टभ्यवा पच्यते । पुरुषबलादधिकं ग्लानिमूर्च्छामदानावहति। संशमनमेवं संशोधनमतिपातयति। हीनमेभ्यो दत्तमकिञ्चित्करं भवति । तस्मात्सममेव विदध्यात् ॥

भवन्ति चात्र ॥ रोगे शोधनसाध्ये तु यो भवेद्दोषदुर्बलः ।
तस्मै दद्याद्भिषक् प्राज्ञो दोषप्रच्यावनं मृदु ॥
चले दोषे मृदौ कोष्ठे नेचेताच्च बलं नृणां ।
अव्याधिदुर्बलस्यापि शोधनं हि तदा भवेत् ॥
व्याध्यादिषु तु मध्येषु क्वाथस्याञ्जलिरिष्यते ।
विडालपदकं चूर्णं देयः कल्कोऽक्षसंमितः ॥
स्वयं प्रवृत्तदोषस्य मृदुकोष्ठस्य शोधनं ।
भवेदल्पबलस्यापि प्रयुक्तं व्याधिनाशनं ॥

---

## ॥ चत्वारिंशत्तमोऽध्यायः ॥

अथातो द्रव्यरसगुणवीर्य्यविपाकविज्ञानीयमध्यायं व्याख्यास्यामः। केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं कस्माद्व्यवस्थितत्वादिह खलु द्रव्यं व्यवस्थितं न रसादयो यथामे फले ये रसादयस्ते पक्के न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। शास्त्रप्रामाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशेहि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति। एकदेशसाध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयः साध्यन्ते यथा महावृक्षक्षीरेणेति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत् समवायिकारणमिति। नेत्याहुरन्ये रसास्तु प्रधानं कस्मादागमादागमो हि शास्त्रमुच्यते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च प्राणाः। उपदेशाच्चोपदिश्यन्ते हि रसा यथा मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च रसेन ह्यनुमी

यते द्रव्यं यथा मधुरमिति। ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिज्यार्थं मधुरमाहरेदिति। तस्माद्रसाः प्रधानं रसेषु गुण संज्ञा। रसलक्षणमन्यत्रोपदेच्याम:। नेत्याहुरन्ये। वीर्य्यं प्रधान मिति कस्मात्तदर्शनौषधकर्म्मनिष्पत्तेः। इहौषधकर्म्माण्यूर्द्धाधोभागो भयभागसंशोधनसंशमनसंग्राहकाग्निदीपनप्रपीडनलेखनबृंहणरसा यनवाजीकरणश्वयथुकरविलयनदहनदारणमादनप्राणघ्नविषप्रश मनानि वीर्य्यप्राधान्याद्भवन्ति। तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नि षोमीयत्वाज्जगतः। केचिदष्टविधमाहुरुष्णं शीतं स्निग्धं रुक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्य्याणि स्वबलगुणोत्कर्षा द्रसमभिभूयात्मकर्म्म कुर्व्वन्ति यथा तावन्महत्पञ्चमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्य्यत्वात् तथा कुलत्थः कषायः कटुकः पलाण्डुः स्नेहभावाच्च। मधुरश्चेक्षुरसो वातं वर्द्धयति शीतवीर्य्यत्वात्। कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लमामलकं लवणं सैन्धवञ्च। तिक्ता काकमाची पित्तं वर्द्धयत्युष्णवीर्य्यत्वान्मधुरा मत्स्याश्च। कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात्। अम्लं कपित्थं श्लेष्माणं शमयति रुक्षवीर्य्यत्वान्मधुरं क्षौद्रञ्च। तदेतन्नि दर्शनमात्रमुक्तं॥

भवन्ति चात्र॥ ये रसा वातशमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणं॥
ये रसाः पित्तशमना भवन्ति यदि तेषु वै।

तैक्ष्ण्यौष्ण्यलघुताश्चैव न ते तत्कर्मकारिणः ॥
ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै ।
स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते ॥

तस्माद्वीर्य्यं प्रधानमिति । नेत्याहुरन्ये । विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यक् मिथ्या विपक्वानि गुणं दोषं वा जनयन्ति । तत्राहुरन्ये प्रतिरसं पाक इति । केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकंचेति तत्तु न सम्यक् भूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्ध मम्लतामुपैत्यग्नेर्मन्दत्वात् । यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्व्वेषा मिति केचिदाहुर्दृष्टान्तं चोपदिशन्ति यथा तावत् क्षीरं स्थालीगत मभिपच्यमानं मधुरमेवस्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति । केचिद्वदन्त्यब लवन्तोबलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एष । आगमे हि द्विविध एव पाको मधुरः कटुकश्च तयोर्म्मधुराख्यो गुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति गुणसाधर्म्याद्गुरुता लघुता च पृथिव्यापश्च गुर्व्यः शेषाणि लघूनि तस्माद्द्विविध एव पाक इति ॥

भवन्ति चात्र ॥ द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः ।
निर्व्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते ॥

तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु ।
निर्व्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते ॥
पृथक्त्वदर्शिनामेष वादिनां वादसंग्रहः ।
चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः ॥
तद्द्रव्यमात्मना किञ्चित्किञ्चिद्वीर्य्येण सेवितं ।
किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा ॥
पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतं ॥
जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षकं स्मृतं ।
अन्योऽन्यापेक्षकं जन्म यथास्याद्देहदेहिनोः ॥
वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः ।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः ॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः ।
श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः ॥
अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः
आगमेनोपयोज्यानि भेषजानि विचक्षणैः ॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः ।
नौषधीर्हेतुभिर्व्विद्वान् परीक्षेत कथञ्चन ॥
सहस्रेणापि हेतूनां नाम्बष्ठादिर्व्विरेचयेत् ।
तस्मात्तिष्ठेत्तु मतिमानागमे नतु हेतुषु ॥

---

## ॥ एकचत्वारिंशत्तमोऽध्यायः ॥

अथातो द्रव्यविशेषविज्ञानीयमध्यायं व्याख्यास्यामः ॥

पृथिव्यप्तेजोवाय्वाकाशानां समुदायाद्द्रव्याभिनिर्वृत्तिरुत्कर्षस्त्वभिव्यञ्जको भवतीदं पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति। तत्र स्थूलसारसान्द्रमन्दस्थिरखरगुरुकठिनगन्धबहुलमीषत्कषायं प्रायशो मधुरमिति पार्थिवं तत् स्थैर्य्यबलसङ्घातोपचयकरं विशेषतश्चाधोगतिस्वभावमिति ॥

शीतस्तिमितस्निग्धमन्दगुरुसरसान्द्रमृदुपिच्छिलरसबहुलमीषत्कषायाम्ललवणमधुररसप्रायमाप्यं तत् स्नेहनप्रह्लादनक्लेदनबन्धनविष्यन्दनकरमिति ॥

उष्णतीक्ष्णसूक्ष्मरूक्षखरलघुविशदं रूपगुणबहुलमीषदम्ललवणं कटुकरसप्रायं विशेषतश्चोर्द्ध्वगतिस्वभावमिति तैजसं तद्दहनपचनदारणतापनप्रकाशनप्रभावर्णकरमिति ॥

सूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति।

श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयं तन्मार्दवशौषिर्य्यलाघवकरमिति ॥

अनेन निदर्शनेन नानौषधीभूतं जगति किञ्चिद्द्रव्यमस्तीति कृत्वा तं तं युक्तिविशेषमर्थं वाभिसमीक्ष्य स्ववीर्य्यगुणयुक्तानि द्रव्याणि कर्म्मकराणि भवन्ति ॥ तानि यदा कुर्व्वन्ति स कालः यत्कुर्व्वन्ति

तत्कर्म्म येन कुर्व्वन्ति तद्वीर्य्यं यत्र कुर्व्वन्ति तदधिकरणं यथा कुर्व्वन्ति स उपायो यन्निष्पादयति तत्फलमिति ॥

तत्र विरेचनद्रव्याणि पृथिव्यम्बुगुणभूयिष्ठानि पृथिव्यापो गुर्व्वी गुरुत्वादधोगच्छन्ति तस्माद्विरेचनमधोगुणभूयिष्ठमनुमानात्। वमनद्रव्याण्यग्निवायुगुणभूयिष्ठान्यग्निवायू हि लघू लघुत्वाच्च तान्यूर्द्ध्वमुत्तिष्ठन्ति तस्माद्वमनमप्यूर्द्ध्वगुणभूयिष्ठमुक्तं। उभयगुणभूयिष्ठमुभयतोभागं। आकाशगुणभूयिष्ठं संशमनं। संग्राहकमनिलगुणभूयिष्ठमनिलस्य शोषणात्मकत्वात्। दीपनमग्निगुणभूयिष्ठं। लेखनमनिलानलगुणभूयिष्ठं। बृंहणं पृथिव्यम्बुगुणभूयिष्ठं। एवमौषधकर्म्माण्यनुमानात्साधयेत्॥

भवन्ति चात्र। भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः।
भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिं॥
खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणां।
वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः॥
आग्नेयमेव यद्द्रव्यं तेन पित्तमुदीर्य्यते।
वसुधाजलजाताभ्यां बलासः परिवर्द्धते।
एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये विनिश्चितं।
द्विशो वा बहुशो वापि ज्ञात्वा दोषेऽवचारयेत्॥

तत्र यद्दमे गुणा वीर्य्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां तीक्ष्णोष्णावाग्नेयौ। शीतपिच्छिलावम्बुगुणभूयिष्ठौ। पृथिव्यम्बुगुणभूयिष्ठः स्नेहः। तोयाकाशगुणभूयिष्ठं मृदुत्वं।

वायुगुणभूयिष्ठं रौक्ष्यं। क्षितिसमीरणगुणभूयिष्ठं वैशद्यं। गुरुलघ विपाकावुक्तगुणौ ॥ तत्रोष्णस्निग्धौ वातघ्नौ। शीतमृदुपिच्छिलाः पित्तघ्नाः। तीक्ष्णरूक्षविशदाः श्लेष्मघ्नाः॥ गुरुपाको वातपित्तघ्नः। लघुपाकः श्लेष्मघ्नः॥ तेषां मृदुशीतोष्णाः स्पर्शग्राह्याः। पिच्छिलविशदौ चक्षुःस्पर्शाभ्यां। स्निग्धरूक्षौ चाक्षुषौ। शीतोष्णौ सुखदुःखोत्पादनेन। गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च। लघुर्बद्धविण्मूत्रतया मारुतकोपेनच॥ तत्र तुल्यगुणेषु भूतेषु रसविशेषमुपलक्षयेत् । तद्यथा। मधुरो गुरुश्च पार्थिवः। मधुरः स्निग्धश्चाप्य इति ॥

भवति चात्र ॥ गुणा य उक्ता द्रव्येषु शरीरेष्वपि ते तथा।
स्थानवृद्धिक्षयास्तस्माद्देहिनां द्रव्यहेतुकाः ॥

---

## ॥ द्विचत्वारिंशत्तमोऽध्यायः ॥

अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः॥

आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः। तस्मादाप्यो रसः परस्परसंसर्गात्परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्व्वेषु सर्व्वेषां सान्निध्यमस्त्युत्कर्षापकर्षात्तु ग्रहणं। स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते। तद्यथा। मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। ते च भूयः परस्परसंसर्गात्त्रिषष्टिधा भिद्यन्ते॥ तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः। भूम्यग्निगुणबाहुल्यादम्लः। तोयाग्निगुणबाहुल्याल्लवणः। वाय्वग्निगुणबाहुल्यात्कटुकः। वाय्वाकाशगुणबाहुल्यात्तिक्तः।

पृथिव्यनिलगुणबाहुल्यात्कषाय इति ॥ तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः। तत्र वायुरात्मैवात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति॥ त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च ॥ केचिदाहुरग्नीषोमीयत्वाज्जगतो रसा द्विविधाः सौम्या आग्नेयाश्च। तत्र मधुरतिक्तकषायाः सौम्याः कट्वम्ललवणा आग्नेयाः ॥ मधुराम्ललवणाः स्निग्धा गुरवश्च। कटुतिक्तकषाया रूक्षा लघवश्च। सौम्याः शीता आग्नेयाश्चोष्णाः ॥

तत्र शैत्यरौक्ष्यलाघववैशद्यवैष्टम्भ्यगुणलक्षणो वायुस्तस्य समानयोनिः कषायो रसः सोऽस्य शैत्यात् शैत्यं वर्द्धयति रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यं वैष्टम्भ्याद्वैष्टम्भ्यमिति।

औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तं तस्य समानयोनिः कटुको रसः सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति तैक्ष्ण्यात्तैक्ष्ण्यं रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यमिति ॥

माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः श्लेष्मा तस्य समानयोनिर्मधुरो रसः सोऽस्य माधुर्य्यान्माधुर्य्यं वर्द्धयति स्नेहात् स्नेहं गौरवाद्गौरवं शैत्यात् शैत्यं पैच्छिल्यात्पैच्छिल्यमिति तस्य पुनरन्ययोनिः कटुको रसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्य्यमभिभवति रौक्ष्यात् स्नेहं लाघवाद्गौरवमौष्ण्यात् शैत्यं वैशद्यात्पैच्छिल्यमिति। तदेतन्निदर्शनमात्रमुक्तं ॥

रसलक्षणमतऊर्द्ध्वं वक्ष्यामः ॥ तत्र यः परितोषमुत्पादयति

प्रह्लादयति तर्प्पयति जीवयति मुखावलेपं जनयति श्लेष्माणं चाभिवर्द्धयति स मधुरः ॥ यो दन्तहर्षमुत्पादयति मुखास्रावं जनयति श्रद्धाञ्चोत्पादयति सोऽम्लः ॥ यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्दवं चापादयति स लवणः ॥ यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुकः ॥ यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः ॥ यो वक्त्रं परिशोषयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षति पीडयति च स कषायः ॥

रसगुणानत ऊर्द्धं वक्ष्यामः ॥ तत्र मधुरो रसो रसरक्तमांसमेदोऽस्थिमज्जौजःशुक्रस्तन्यवर्द्धनश्चक्षुष्यः केश्यो वर्ण्यो बलकृत्सन्धानः शोणितरसप्रसादनो बालवृद्धक्षतक्षीणहितः षट्पदपिपीलिकानामिष्टतमस्तृष्णामूर्च्छादाहप्रशमनः षडिन्द्रियप्रसादनः कृमिकफकरश्चेति स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानः कासश्वासालसकवमथुवदनमाधुर्य्यस्वरोपघातकृमिगलगण्डानापादयति तथार्बुदश्लीपदवस्तिगुदोपलेपाभिष्यन्दप्रभृतीन् जनयति ॥

अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही बहिः शीतः क्लेदनःप्रायशो हृद्यश्चेति स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्षनयनसंमीलनरोमसंवेजनकफविलयनशरीरशैथिल्यान्यापादयति तथा क्षताभिहतदग्धदष्टभग्नशूनरुग्णप्रच्युतावमूत्रितविसर्पितच्छिन्नभिन्नविद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति ॥

लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवं गुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्य पुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाकं रक्तपित्तवातशोणिताम्लीकाप्रभृतीनापादयति ॥

कटुको दीपनः पाचनो रोचनः शोधनः स्थौल्यालस्यकफकृमिविषकुष्ठकण्डूपशमनः सन्धिबन्धविच्छेदनोऽवसादनः स्तन्यशुक्रमेदसामुपहन्ता चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो भ्रममदगलताल्वोष्ठशोषगात्रसन्तापबलविघातकम्पतोदभेदकृत् करचरणपार्श्वपृष्ठप्रभृतिषु च वातशूलानापादयति ॥

तिक्तश्छेदनो रोचनो दीपनः शोधनः कण्डूकोठतृष्णामूर्च्छाज्वरप्रशमनः स्तन्यशोधनो विण्मूत्रक्लेदमेदोवसापूयोपशोषणश्चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो गात्रमन्यास्तम्भाक्षेपकार्दितशिरःशूलभ्रमतोदभेदच्छेदास्यवैरस्यान्यापादयति ॥

कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो हृत्पीडास्यशोषोदराध्मानवाक्यग्रहमन्यास्तम्भगात्रस्फुरणचुमुचुमायनाकुञ्चनाक्षेपणप्रभृतीन् जनयति ॥

अतः सर्व्वेषामेव द्रव्याण्युपदेक्ष्यामः ॥

तद्यथा ॥ काकोल्यादिः क्षीरघृतवसामज्जशालिषष्टिकयवगोधूममाषशृङ्गाटककसेरुकत्रपुसैर्व्वारुककर्कारुकालावुकालिन्द

कतकगिलोड्यपियालपुष्करवीजकाश्मर्य्यमधूकद्राक्षाखर्जूरराजादनतालनालिकेरेक्षुविकारबलातिबलात्मगुप्ताविदारीपयस्यागोक्षुरकक्षीरमोरटमधूलिकाकुष्माण्डप्रभृतीनि समासेन मधुरो वर्गः॥

दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्दवदरकोलप्राचीनामलकतिन्तिडीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥

सैन्धवसौवर्चलविडपाक्यरोमकसामुद्रकपक्तिमयवक्षारोषप्रसूतसुवर्चिकाप्रभृतीनि समासेन लवणो वर्गः ॥

पिप्पल्यादिः सुरसादिः शिग्रुमधुशिग्रुमूलकलशुनसुमुखशीतशिवकुष्ठदेवदारुहरेणुकावल्गुजफलचण्डागुग्गुलुमुस्तलाङ्गलकीशुकनासापीलुप्रभृतीनि सालसारादिश्च प्रायशःकटुको वर्गः ॥

आरग्वधादिर्गुडूच्यादिर्मण्डूकपर्णीवेत्रकरीरहरिद्राद्वयेन्द्रयववरुणस्वादुकण्टकसप्तपर्णबृहतीद्वयशङ्खिनीद्रवन्तीत्रिवृत्कृतवेधनकर्कोटककारवेल्लकवार्त्ताककरीरकरवीरसुमनःशङ्खपुष्प्यपामार्गत्रायमाणाऽशोकरोहिणीवैजयन्तीसुवर्चलापुनर्नवावृश्चिकालीज्योतिष्मतीप्रभृतीनि समासेन तिक्तो वर्गः ॥

न्यग्रोधादिरम्बष्ठादिः प्रियङ्ग्वादी रोध्रादिस्त्रिफलाशल्लकीजम्ब्वाम्रबकुलतिन्दुकफलानि कतकशाकपाषाणभेदकवनस्पतिफलानि सालसारादिश्च प्रायशः कुरवककोविदारकजीवन्तीचिल्लीपालङ्क्यासुनिषण्णकप्रभृतीनि नीवारकादयो मुद्गादयश्च समासेन कषायो वर्गः॥

तत्रैषां रसानां संयोगास्त्रिषष्टिर्भवन्ति । तद्यथा । पञ्चदश द्विका विंशतिस्त्रिकाः पञ्चदश चतुष्काः षट् पञ्चका एकशः षड्रसा एकः षट्क इति तेषामन्यत्र प्रयोजनानि वक्ष्यामः ॥

भवति चात्र ॥ जग्धाः षडधिगच्छन्ति बलिनो वशतां रसाः ।
यथा प्रकुपिता दोषा वशं यान्ति बलीयसः ॥

---

## ॥ त्रिचत्वारिंशत्तमोऽध्यायः ॥

अथातो वमनद्रव्यविकल्पविज्ञानीयमध्यायं व्याख्यास्यामः ॥

वमनद्रव्याणां फलादीनां मदनफलानि श्रेष्ठतमानि भवन्ति । अथ मदनपुष्पाणामातपपरिशुष्काणां चूर्णप्रकुञ्चं प्रत्यक्पुष्पी सदापुष्पीनिम्बकषायाणामन्यतमेनालोड्य मधुसैन्धवयुक्तां मात्रां पाययित्वा वामयेत् मदनशलाटुचूर्णान्येवं वा वकुलरम्यकोपयुक्तानि मधुलवणयुक्तान्यभिप्रतप्तानि मदनशलाटुचूर्णसिद्धां वा तिलत ण्डुलयवागूं। निर्वृत्तानां वा नातिहरितपाण्डूनां कुशमूढावबद्ध मृद्गोमयप्रलिप्तानां यवतुषमुद्गमाषशाल्यादिधान्यराशावष्टरा त्रोषितक्लिन्नभिन्नानां फलानां फलपिप्पलीरुद्धृत्यातपे शोषयेत् तासां दधिमधुपललविमृदितपरिशुष्काणां सुभाजनस्थानामन्त र्नखमुष्टिमुष्णे यष्टीमधुककषाये कोविदारादीनामन्यतमे वा क षाये विमृद्य रात्रिपर्युषितं मधुसैन्धवयुक्तमाशीर्भिरभिमन्त्रितमु दङ्मुखः प्राङ्मुखमातुरं पाययेतानेन मन्त्रेणाभिमन्त्र्य ।

ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानलानिलाः।
ऋषयः सौषधीग्रामा भूतसङ्घाश्च पान्तु ते॥
रसायनमिवर्षीणां देवानाममृतं यथा।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते॥

विशेषेण श्लेष्मज्वरप्रतिश्यायान्तर्व्विद्रधिष्वप्रवर्त्तमाने वा दोषे पिप्पलीवचागौरसर्षपकल्कोन्मिश्रैः सलवणैरुष्णाम्बुभिः पुनः पुनः प्रवर्त्तयेदासम्यग्वान्तलक्षणादिति॥ मदनफलमज्जचूर्णं वा तत्क्वाथपरिभावितं मदनफलकषायेण मदनफलमज्जसिद्धस्य वा पयसः सन्तानिकां चोद्रयुक्तां मदनफलमज्जसिद्धं वा पयः। मदनफलमज्जसिद्धेन वा पयसा यवागूमधोभागास्रक्पित्तहृद्दाहयोः॥ मदनफलमज्जसिद्धस्य वा पयसो दधिभावमुपगतस्य दध्युत्तरं दधि वा कफप्रसेकच्छर्द्दिमूर्च्छातमकेषु॥ मदनफलमज्जस्नेहं वा भल्लातकस्नेहवदादाय फाणितीभूतं लेहयेदातपपरिशुष्कं वा मदनफलमज्जचूर्णं जीवन्तीकषायेण पित्ते कफस्थानगते॥ मदनफलमज्जक्वाथं वा पिप्पल्यादिप्रतीवापं तच्चूर्णं वा निम्बरूपिकाकषाययोरन्यतरेण सन्तर्पणं कफजव्याधिहरं मदनफलमज्जचूर्णं वा मधूककाश्मर्य्यद्राक्षाकषायेण॥ मदनफलविधानमुक्तं॥

जीमूतककुसुमचूर्णंवा पूर्व्ववदेवं क्षीरेण निर्वृत्तेषु क्षीरयवागूं रोमशेषु सन्तानिकामरोमशेषु च दध्युत्तरं हारितपाण्डुषु दधि तत्कषायसंसृष्टां वा सुरां कफारोचककासश्वासपाण्डुरोगयक्ष्मसु पर्य्यागतेषु मदनफलमज्जवदुपयोगः तद्वदेव कुटजफलविधानं॥ कृत

वेधनानामप्येष एव कल्पः। इक्ष्वाकुकुसुमचूर्णं वा पूर्व्ववदेव क्षीरेण कासश्वासच्छर्दिकफरोगेषूपयोगः।

धामार्गवस्यापि मदनफलमज्जवदुपयोगो विशेषतस्तु गरगुल्मोदरकासश्वासश्लेष्मामयेषु वार्त्ता वा कफस्थानगते कृतवेधनफलपिप्पलीनां वमनद्रव्यकषायपरिपीतानां बकुशश्चूर्णमुत्पलादिषु दत्तमाघ्रातं वामयति तत्त्वनवबद्धदोषेषु यवागूमाकण्ठात्पीतवत्सु च विदध्यात्। वमनविरेचनशिरोविरेचनद्रव्याण्येवं वा प्रधानतमानि भवन्ति ॥

भवतश्चात्र ॥ वमनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता।
तां विभज्य यथाव्याधि कालशक्तिर्विनिश्चयात् ॥
कषायैः स्वरसैः कल्कैश्चूर्णैरपि च बुद्धिमान्।
पेयलेह्याद्यभोज्येषु वमनान्युपकल्पयेत् ॥

---

## ॥ चतुश्चत्वारिंशत्तमोऽध्यायः ॥

अथातो विरेचनद्रव्यविकल्पविज्ञानीयमध्यायं व्याख्यास्यामः ॥

अरुणाभं तृवृन्मूलं श्रेष्ठं मूलविरेचने।
प्रधानं तिल्वकस्त्वक्षु फलेष्वपि हरीतकी ॥
तैलेष्वेरण्डजन्तैलं स्वरसे कारवेल्लिका।
सुधापयः पयःस्वक्तमिति प्राधान्यसंग्रहः ॥
तेषां विधानं वक्ष्यामि यथावदनुपूर्व्वशः।

वैरेचनद्रव्यरसानुपीतं मूलं महत्त्वेष्टतमस्तदोषं ।
चूर्णीकृतं सैन्धवनागराढ्यमम्लैः पिवेन्मारुतरोगजुष्टः ॥
द्राक्षाविकारैर्मधुरैरसैस्तत् पैत्ते गदे चीरयुतं पिवेद्वा ।
गुडूच्यरिष्टत्रिफलारसेन सव्योषमूत्रं कफजे पिवेद्वा ॥
त्रिवर्णकल्यूषणयुक्तमेतद्गुडेन लिह्यादनवेन चूर्णं ।
प्रस्थे च तन्मूलरसस्य दत्वा तन्मूलकल्कं कुडवप्रमाणं ।
कर्षोन्मिते सैन्धवनागरे च विपाच्य कल्कीकृतमेतदद्यात्॥
तत्कल्कभागः समहौषधार्द्धः ससैन्धवो मूत्रयुतश्च पेयः ॥
समास्तृष्टन्नागरकाऽभयाः स्युर्भागार्द्धकं पूगफलं सुपकं ।
विडङ्गसारो मरिचं सदारु योगः ससिन्धूद्भवमूत्रयुक्तः ॥
विरेचनद्रव्यभवन्तु चूर्णं रसेन तेषां मतिमान् विमृद्य ।
तन्मूलसिद्धेन च सर्पिषाक्तं सेव्यन्तदाज्ये गुटिकीकृतञ्च ॥
गुडेच पाकाभिमुखे निधाय चूर्णीकृतं सम्यगिदं विपाच्य ।
शीतं त्रिजाताक्तमथो विमृद्य योगानुरूपा गुटिकाः प्रयोज्याः ॥
वैरेकीयद्रव्यचूर्णस्य भागं सिद्धं सार्द्धं क्काथभागैश्चतुर्भिः ।
आमृद्नीयात् सर्पिषा तच्कृतेन तत्क्काथोष्मखेदितं सामितञ्च ॥
पाकप्राप्ते फाणिते चूर्णितं तत् चिप्तं पक्कं चावतार्य्य प्रयत्नात् ।
शीतीभूता मोदका हृद्यगन्धाः कार्य्यास्त्वेते भच्यकल्पाःसमासात् ॥
रसेन तेषां परिभाव्य मुद्गान् यूषः ससिन्धूद्भवसर्पिरिष्टः ।
वैरेचनेऽन्यैरपि वैदलैः स्यादेवं विदध्यादमनौषधैश्च ॥
भित्त्वा द्विधेक्षुं परिलिप्य कल्कैस्त्रिभण्डिजातैः प्रतिबध्य रज्ज्वा ।

पक्वञ्च सम्यक् पुटपाकयुक्त्या खादेत्तु तं पित्तगदी सुशीतं॥

सिताजगन्धात्वक्क्षीरीविदारीत्रिवृतः समाः।
लिह्यान्मधुघृताभ्यान्तु तृड्दाहज्वरशान्तये॥
शर्कराक्षौद्रसंयुक्तं तृवृच्चूर्णावचूर्णितं।
रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकं॥
पचेल्लेहं सिताक्षौद्रं पलार्द्धकुडवान्वितं।
त्रिवृच्चूर्णयुतं शीतं पित्तघ्नं तद्विरेचनं॥
तृवृच्छ्यामाक्षारशुण्ठीपिप्पलीर्मधुनाप्नुयात्।
सर्व्वश्लेष्मविकाराणां श्रेष्ठमेतद्विरेचनं॥
वीजाढ्यपथ्याकाश्मर्य्यधात्रीदाडिमकोलजान्।
तैलभृष्टान् रसानम्लफलैरावाप्य साधयेत्॥
घनीभूतं त्रिसौगन्ध्यं त्रिवृत्क्षौद्रसमन्वितं।
लेह्यमेतत्कफप्रायैः सुकुमारैर्व्विरेचनं॥
नीलीतुत्थं लगेलञ्च तैस्त्रिवृत्ससितोपला।
चूर्णं सन्तर्पणं क्षौद्रफलाम्लं सन्निपातनुत्॥
तृवृच्छ्यामासिताकृष्णात्रिफलामाक्षिकैः समैः।
मोदकाः सन्निपातोर्द्ध्वरक्तपित्तज्वरापहाः॥
तृवृद्भागास्त्रयः प्रोक्तास्त्रिफला तत्समा तथा।
क्षारकृष्णाविडङ्गानि संचूर्ण्य मधुसर्पिषा॥
लिह्याद्गुडेन गुटिकां कृत्वा वाप्यथ भक्षयेत्।
कफवातकृतान् गुल्मान् प्लीहोदरहलीमकान्॥

हन्त्यन्यानपि चाप्येतन्निरपायं विरेचनं।
चूर्णं श्यामा त्रिवृन्नीली कटुकी मुस्ता दुरालभा ॥
चव्येन्द्रबीजं त्रिफला सर्पिर्मांसरसाम्बुभिः।
पीतं विरेचनं तद्धि रूक्षाणामपि शस्यते ॥
वैरेचनिकनिःक्वाथभागाः शीतास्त्रयो मताः।
द्वौ फाणितस्य तच्चापि पुनरग्नावधिश्रयेत् ॥
तत् साधुसिद्धं विज्ञाय शीतं कृत्वा निधापयेत्।
कलसे कृतसंस्कारे विभज्यर्त्तूं हिमाहिमौ ॥
मासादूर्द्धं जातरसमासवं मधुगन्धिकं।
पिबेदासावेव विधिः क्षारमूत्रासवेष्वपि ॥
वैरेचनिकमूलानां क्वाथे माषान् सुभावितान्।
सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान् ॥
अवचुर्ण्यैकतः पिण्डान् कृत्वा शुष्कान् सुचूर्णितान्।
शालितण्डुलचूर्णञ्च तत्कषायोष्मसाधितं ॥
तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान्।
मण्डोदकार्थे क्वाथञ्च दद्यात्तत्सर्व्वमेकतः ॥
निदध्यात्कलसे तान्तु सुरां जातरसां पिबेत्।
एष एव सुराकल्पो वमनेष्वपि कीर्त्तितः ॥
मूलानि त्रिवृतादीनां प्रथमस्य गणस्य च।
महतः पञ्चमूलस्य मूर्व्वाशार्ङ्गेष्टयोरपि ॥
सुधां हैमवतीं चैव त्रिफलातिविषे वचां।
संहृत्यैतानि भागौ द्वौ कारयेदेकमेतयोः ॥

कुर्य्यान्निः क्वाथमेकस्मिन्नेकस्मिन् चूर्णमेवतु ।
चूर्णांस्तस्मिंस्तु निः क्वाथे भावयेद्बहुशो यवान् ॥
शुष्काणां मृदुभृष्टानां तेषां भागास्त्रयो मताः ।
चतुर्थं भागमावाप्य चूर्णानामनुकीर्त्तितं ॥
प्रक्षिप्य कलसे सम्यक् समस्तं तदनन्तरं ।
तेषामेव कषायेण शीतलेन सुयोजितं ॥
पूर्व्ववत्सन्निदध्यात्तु ज्ञेयं सौवीरकं हि तत् ॥
पूर्व्वोक्तं वर्गमाहृत्य द्विधा हत्वैकमेतयोः ।
भागं संक्षुद्य संसृज्य यवान् स्थाल्यामधिश्रयेत् ॥
अजशृङ्ग्याः कषायेण तानभ्यासिच्य साधयेत् ।
सुसिद्धांस्त्रावतार्य्यैतानौषधिभ्यो विवेचयेत् ॥
विमृद्य सतुषान् सम्यक् ततस्तान् पूर्व्ववन्मितान् ।
पूर्व्वोक्तौषधभागस्य चूर्णं दत्वा तु पूर्व्ववत् ॥
तेनैव सह यूषेण कलसे पूर्व्ववन्न्यसेत् ।
ज्ञात्वा जातरसञ्चापि तत्तुषोदकमादिशेत् ॥
तुषाम्बुसौवीरकयोर्विधिरेष प्रकीर्त्तितः ।
षड्रात्रात्सप्तरात्राद्वा ते च पेये प्रकीर्त्तिते ॥
वैरेचनेषु द्रव्येषु त्रिवृन्मूलविधिः स्मृतः ।
दन्तीद्रवन्त्योर्मूलानि विशेषान्मृत्कुशान्तरे ॥
पिप्पलीक्षौद्रयुक्तानि खिन्नान्युद्धृत्य शोषयेत् ।
ततस्त्रिवृद्विधानेन योजयेत् श्लेष्मपित्तयोः ॥

तयोः कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ।
सर्पिश्च पक्वं वीसर्प्पकच्छदाहालजीर्जयेत् ॥
मेहगुल्मानिलश्लेष्मविबन्धांस्तैलमेव च ।
चतुःस्नेहं शकृच्छुक्रवातसंरोधजा रुजः ॥
दन्तीद्रवन्तीमरिचकनकाह्वयवासकैः ।
विश्वभेषजमृद्वीकाचित्रकैर्मूत्रभावितैः ॥
सप्ताहं सर्पिषा चूर्णं योज्यमेतद्विरेचनं ।
जीर्णे सन्तर्पणं चौद्रं पित्तश्लेष्मरुजापहं ।
अजीर्णपार्श्वरुक्पाण्डुप्लीहोदरनिबर्हणं ॥
गुडस्याष्टपले पथ्या विंशतिः स्युः पलं पलं ।
दन्तीचित्रकयोः कर्षौ पिप्पलीत्वृटतोर्दश ॥
कृत्वैतान्मोदकानेकं दशमे दशमेऽहनि ।
ततः खादेदुष्णतोयसेवी निर्यन्त्रणास्त्विमे ॥
दोषघ्ना ग्रहणीपाण्डुरोगार्शःकुष्ठनाशनाः ।
व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा ॥
नवैतानि समांशानि त्रिवृदष्टगुणानि वै ।
श्लक्ष्णचूर्णीकृतानीह दन्तीभागद्वयं तथा ॥
सर्व्वाणि चूर्णितानीह गालितानि विमिश्रयेत् ।
षड्भिश्च शर्कराभागैरीषत्सैन्धवमाक्षिकैः ॥
पिण्डितं भक्षयित्वा तु ततः शीताम्बु पाययेत् ।
वस्तिरुक् तृड् ज्वरच्छर्दिशोषपाण्डुभ्रमापहं ॥

निर्यन्त्रणमिदं सर्व्वं विषघ्नन्तु विरेचनं ।
हृद्दद्रष्टकसंज्ञोऽयं प्रशस्तः पित्तरोगिणां ॥
भक्ष्यः क्षीरानुपानो वा पित्तश्लेष्मातुरैर्नरैः ।
भक्ष्यरूपसधर्म्मत्वादाद्येष्वेव विधीयते ॥
तिल्वकस्य त्वचं वाह्यामन्तर्व्वल्कविवर्जितां ।
चूर्णयित्वा तु तौ भागौ तत्कषायेण गालयेत् ॥
तृतीयं भावितं तेन भागं शुष्कन्तु भावितं ।
दशमूलकषायेण हृद्दत्संप्रयोजयेत् ॥
विधानं त्वत्तु निर्दिष्टं फलानामथ वक्ष्यते ।
हरीतक्याः फलं त्वस्थिवियुक्तं दोषवर्ज्जितं ॥
योज्यं हृद्दिधानेन सर्व्वव्याधिनिवर्हणं ।
रसायनं परं मेध्यं दुष्टान्तर्व्रणशोधनं ॥
हरीतकी विडङ्गानि सैन्धवं नागरं त्रिवृत् ।
मरिचानिच तत्सर्व्वं गोमूत्रेण विरेचनं ॥
हरीतकी भद्रदारु कुष्ठं पूगफलं तथा ।
सैन्धवं शृङ्गवेरञ्च गोमूत्रेण विरेचनं ॥
नीलिनीफलचूर्णञ्च नागराभययोस्तथा ।
लिह्याद्गुडेन सलिलं पश्चादुष्णं पिबेन्नरः ॥
पिप्पल्यादिकषायेण पिबेत्पिष्टां हरीतकीं ।
सैन्धवोपहितः सद्य एष योगो विरेचयेत् ॥
हरीतकी भक्ष्यमाणा नागरेण गुडेन वा ।

सैन्धवोपहिता वापि सातत्येनाग्निदीपनी ॥
वातानुलोमनी हृद्या चेन्द्रियाणां प्रसादनी ।
सन्तर्पणकृतान् रोगान् प्रायो हन्ति हरीतकी ॥
शीतमामलकं रूक्षं पित्तमेदःकफापहं ।
विभीतकमनुष्णन्तु कफपित्तनिवर्हणं ॥
त्रीण्यप्यम्लकषायाणि सतिक्तमधुराणि च ।
त्रिफला सर्व्वरोगघ्नी त्रिभागघृतमूर्च्छिता ॥
वयसःस्थापनं चापि कुर्य्यात् सततसेविता ।
हरीतकीविधानेन फलान्येवं प्रयोजयेत् ॥
विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ।
फलं काले समुद्धृत्य सिकतायां निधापयेत् ॥
सप्ताहमातपे शुष्कं ततो मज्जानमुद्धरेत् ।
तैलं ग्राह्यं जले पक्त्वा तिलवद्वा प्रपीड्य च ॥
तस्योपयोगो बालानां यावद्वर्षाणि द्वादश ।
लिह्यादेरण्डतैलेन कुष्ठं त्रिकटुकान्वितं ।
सुखोदकञ्चानुपिबेदेष योगो विरेचयेत् ॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन तु ।
युक्तं पीतं तथा चीररसाभ्यान्तु विरेचयेत् ॥
बालवृद्धक्षतक्षीणसुकुमारेषु योजितं ॥
फलानां विधिरुद्दिष्टः क्षीराणां शृणु सुश्रुत ।
विरेचनानां तीक्ष्णानां पयः सौधं परं मतं ॥

अज्ञप्रयुक्तं तद्धन्ति विषवत्कर्म्मविभ्रमात्।
विजानता प्रयुक्तन्तु महान्तमपि सञ्चयं ॥
भिनत्त्याश्वेव दोषाणां रोगान् हन्तिच दुस्तरान्।
महत्याः पञ्चमूल्यास्तु वृहत्योश्चैकशः पृथक्॥
कषायैः समभागन्तु तदङ्गारैर्व्विशोषितं।
अम्लादिभिः पूर्व्ववत्तु प्रयोज्यं कोलसन्मितं॥
महावृक्षपयःपीतैर्यवागूस्तण्डुलैः कृता।
पीता विरेचयत्याशु गुडेनोत्कारिका कृता॥
लेहो वा साधितः सम्यक् स्नुहीक्षीरसिताघृतैः।
भाविताश्च स्नुहीक्षीरे पिप्पल्यो लवणान्विताः।
चूर्णं काम्पिल्लकं वापि तत्पीतं गुटिकीकृतं॥
सप्तला शङ्खिनी दन्ती त्रिवृदारग्वधं गवां॥
मूत्रेणाप्लाव्य सप्ताहं स्नुहीक्षीरे ततः परं।
कौसं तेनैवचूर्णेन माल्यं वसनमेवच॥
आघ्रायावृत्य वा सम्यक् मृदुकोष्ठो विरिच्यते।
क्षीरत्वक्फलमूलानां विधानैः परिकीर्त्तितैः।
अवेक्ष्य सम्यग्योगादीन् यथावदुपयोजयेत्॥
त्रिवृत्क्षाणा मितास्तिस्रस्तिस्रश्च त्रिफलात्वचः।
विडङ्गपिप्पलीक्षारशाणास्तिस्रश्च चूर्णिताः॥
लिह्यात् सर्पिर्म्मधुभ्याञ्च मोदकं वा गुडेन वा।
भक्षयेन्निष्परीहारमेतत् श्रेष्ठं विरेचनं॥

गुल्मान् प्लीहोदरं कासं हलीमकमरोचकं।
कफवातकृतांश्चान्यान् व्याधीनेतद्व्यपोहति॥
घृतेषु तैलेषु पयःसु चापि मद्येषु मूत्रेषु तथा रसेषु।
भक्ष्यान्नलेह्येषु च तेषु तेषु विरेचनान्यग्रमतिर्विदध्यात्॥
क्षीरं रसः कल्कमथो कषायः शृतश्च शीतश्च तथैव चूर्णं।
कल्पाः षडेते खलु भेषजानां यथोत्तरं ते लघवः प्रदिष्टाः॥

---

॥ पञ्चचत्वारिंशत्तमोऽध्यायः॥

॥ अथातो द्रवद्रव्यविधिमध्यायं व्याख्यास्यामः॥

पानीयमान्तरीक्षमनिर्देश्यरसममृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमक्लमपिपासामदमूर्च्छातन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमञ्च तदेवावनीपतितमन्यतमं रसमुपलभते स्थानविशेषान्नदीनदसरस्तडागवापीकूपचुण्टीप्रस्रवणोद्भिदविकिरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति। तत्र लोहितकपिलपाण्डुपीतनीलशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते तत्तु न सम्यक् तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलरसो भवत्युत्कर्षापकर्षेण तत्र स्वगुणभूयिष्ठायां भूमावम्लं लवणञ्च। अम्बुगुणभूयिष्ठायां मधुरं। तेजोगुणभूयिष्ठायां कटुकं तिक्तञ्च। वायुगुणभूयिष्ठायां कषायञ्च। आकाशगुणभूयिष्ठायामव्यक्तरसमव्यक्तं ह्याकाशमित्यतस्तत्प्रधानमव्यक्तरसत्वात् तत्पेयमान्तरीक्षालाभे। तच्चान्तरीक्षं चतुर्विधं। तद्यथा।

धारं कारं तौषारं हैममिति। तेषां धारं प्रधानं लघुत्वात्तत्पुन
र्द्विविधं गाङ्गं सामुद्रं चेति। तत्र गाङ्गमाश्वयुजे मासि प्रायशो
वर्षति तयोर्द्वयोरपि परीक्षणं कुर्वीत शाल्योदनपिण्डमकुथितम
विदग्धं रजतभाजनोपहितं वर्षति देवे वहिष्कुर्वीत स यदि
मुहूर्त्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णा
न्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तन्नोपादेयं। सामुद्रमप्याश्व
युजे मासि गृहीतं गाङ्गवद्भवति। गाङ्गं पुनः प्रधानं तदुपाददीताश्व
युजे मासि शुचिशुक्लविततपटैकदेशच्युतमथ वा हर्म्यतलपरिभ्रष्ट
मन्यैर्व्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृन्मये वा पात्रे निद
ध्यात्तत्सर्व्वकालमुपयुञ्जीत तस्यालाभे भौमं। तच्चाकाशगुणबहुलं
तत्पुनः सप्तविधं। तद्यथा। कौपं नादेयं सारसं ताडागं प्रास्रवणमौ
द्भिदं चौण्ट्यमिति तत्र वर्षास्वान्तरिक्षमौद्भिदं वा सेवेत महागुण
त्वात् शरदि सर्व्वं प्रसन्नत्वात् हेमन्ते सारसं ताडागं वा वसन्ते कौपं
प्रास्रवणं वा ग्रीष्मेष्वेवं प्रावृषि चौण्ट्यमनवमनभिवृष्टं सर्व्वञ्चेति॥

कीटमूत्रपुरीषाण्डशवकोथप्रदूषितं।
तृणपर्णोत्करयुतं कलुषं विषसंयुतं॥
योऽवगाहेत वर्षासु पिबेद्वापि नवंजलं।
स वाह्याभ्यन्तरान् रोगान् प्राप्नुयात्क्षिप्रमेव तु॥

तत्र यत् शैवालपङ्कहटतृणपद्मपत्रप्रभृतिभिरवच्छन्नं शशिसूर्य्य
किरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्व्यापन्नमिति वि
द्यात्॥ तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकदोषाः षट् सम्भवन्ति।

तत्र खरता पैच्छिल्यमौष्ण्यं दन्तग्राहिता च स्पर्शदोषाः। पङ्कसिकताशैवालबहुवर्णता रूपदोषाः। व्यक्तरसता रसदोषः। अनिष्टगन्धता गन्धदोषः। यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति स वीर्य्यदोषः। यदुपयुक्तं चिरादिपच्यते विष्टम्नाति वा स विपाकदोष इति। त एते आन्तरिक्षे न सन्ति॥ व्यापन्नानामग्निक्वथनं सूर्य्यातपप्रतापनं तप्तायःपिण्डसिकतालोष्ट्राणां वा निर्व्वापणं प्रसादनञ्च कर्त्तव्यं नागचम्पकोत्पलपाटलापुष्पप्रभृतिभिश्चाधिवासनमिति॥

सौवर्णे राजते ताम्रे कांस्ये मणिमये तथा।
पुष्पावतंसं भौमे वा सुगन्धि सलिलं पिवेत्॥
व्यापन्नं वर्जयेन्नित्यं तोयं यच्चाप्यनार्त्तवं।
दोषसञ्जननं ह्येतन्नाददीताहितन्तु तत्॥
व्यापन्नं सलिलं यस्तु पिवतीहाप्रसाधितं।
श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकतां॥
श्वासकासप्रतिश्यायशूलगुल्मोदराणि च।
अन्यान्वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव च॥

तत्र सप्तकलुषस्य प्रसाधनानि भवन्ति। तद्यथा। कतकगोमेदकविसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति। पञ्च निक्षेपणानि भवन्ति। तद्यथा। फलकं त्र्यष्टकं मुञ्जवलय उदकमञ्चिका शिक्यञ्चेति॥ सप्त शीतीकरणानि भवन्ति। प्रवातस्थापनमुदकप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरणं वालुकाप्रक्षेपणं शिक्यावलम्बन

श्चेति ॥

निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचि शीतलं।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥

तत्र नद्यः पश्चिमाभिमुखाः पथ्या लघूदकत्वात्। पूर्व्वाभिमुखास्तु न प्रशस्यन्ते गुरूदकत्वात्। दक्षिणाभिमुखा नाऽतिदोषलाः साधारणत्वात्। तत्र सह्यप्रभवाःकुष्ठञ्जनयन्ति विन्ध्यप्रभवाः कुष्ठं पाण्डुरोगञ्च मलयप्रभवाः क्रमीन् महेन्द्रप्रभवाः श्लीपदोदराणि हिमवत्प्रभवा हृद्रोगश्वयथुशिरोरोगश्लीपदगलगण्डान्। प्राच्यावन्त्या अपरावन्त्याश्चार्शांस्युपजनयन्ति पारिपात्रप्रभवाः पथ्या बलारोग्यकर्य्य इति।

नद्यः शीघ्रवहा लघ्व्यः प्रोक्ता याश्चामलोदकाः।
गुर्व्यः शैवालसञ्छन्नाः कलुषा मन्दगाश्च याः॥
प्रायेण नद्यो मरुषु सतिक्ता लवणान्विताः।
ईषत्कषाया मधुरालघुपाका बले हिताः।

तत्र सर्व्वेषां भौमानां ग्रहणं प्रत्यूषसि तत्र ह्यमलत्वं शैत्यञ्चाधिकं भवति स एव चापां परो गुण इति॥

दिवार्ककिरणैर्जुष्टं निशायामिन्दुरश्मिभिः।
अरूक्षमनभिष्यन्दि तत्तुल्यं गगनाम्बुना॥
गगनाम्बु त्रिदोषघ्नं गृहीतं यत्सुभाजने।
बल्यं रसायनं मेध्यं पात्रापेक्षि ततः परं॥
रक्षोघ्नं शीतलं ह्लादि ज्वरदाहविषापहं।

चन्द्रकान्तोद्भवं वारि पित्तघ्नं विमलं स्मृतं ॥
मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमक्लमपरीतेषु तमके वमथौ तथा ॥
ऊर्द्धगे रक्तपित्ते च शीतमम्भः प्रशस्यते ।
पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥
आध्माते स्तिमिते कोष्ठे सद्यःशुद्धे नवज्वरे ।
हिक्कायां स्नेहपीते च शीताम्बु परिवर्ज्जयेत् ॥
नादेयं वातलं रूक्षं दीपनं लघु लेखनं ।
तदभिष्यन्दि मधुरं सान्द्रं गुरु कफावहं ॥
तृष्णाघ्नं सारसं बल्यं कषायं मधुरं लघु ।
ताडागं वातलं स्वादु कषायं कटुपाकि च ॥
वातश्लेष्महरं वाप्यं सक्षारं कटु पित्तलं ।
सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु ॥
चौण्ट्यमग्निकरं रूक्षं मधुरं कफकृन्न च ।
कफघ्नं दीपनं हृद्यं लघु प्रस्रवणोद्भवं ॥
मधुरं पित्तशमनमविदाह्यौद्भिदं स्मृतं ।
वैकिरं कटु सक्षारं श्लेष्मघ्नं लघु दीपनं ॥
कैदारं मधुरं प्रोक्तं विपाके गुरु दोषलं ।
तद्वत्पाल्वलमुद्दिष्टं विशेषाद्दोषलन्तु तत् ॥
सामुद्रमुदकं विस्रं लवणं सर्व्वदोषकृत् ।
अनेकदोषमानूपं वार्य्यभिष्यन्दि गर्हितं ॥

एभिर्दोषैरसंयुक्तं निरवद्यन्तु जाङ्गलं।
पाके विदाहि तृष्णाघ्नं प्रशस्तं प्रीतिवर्द्धनं॥
दीपनं स्वादु शीतञ्च तोयं साधारणं लघु।
कफमेदोऽनिलामघ्नं दीपनं वस्तिशोधनं॥
श्वासकासज्वरहरं पथ्यमुष्णोदकं सदा।
यत्क्वाथ्यमानं निर्व्वेगं निःफेनं निर्म्मलं लघु॥
चतुर्भागावशेषन्तु तत्तोयं गुणवत्स्मृतं।
नच पर्य्युषितं देयं कदाचिद्वारि जानता॥
अम्लीभूतं कफोत्क्लेशि न हितं तत् पिपासवे।
मद्यपानात्समुद्भूते रोगे पित्तोत्थिते तथा॥
सन्निपातसमुत्थेच शृतशीतं प्रशस्यते।
स्निग्धं स्वादु हिमं हृद्यं दीपनं वस्तिशोधनं॥
वृष्यं पित्तपिपासाघ्नं नारिकेलोदकं गुरु।
दाहातीसारपित्तासृङ्मूर्च्छामद्यविषार्त्तिषु॥
शृतशीतं जलं शस्तं तृष्णाच्छर्दिभ्रमेषु च।
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये॥
मन्दाग्नावुदरे कुष्ठे ज्वरे नेत्रामये तथा।
व्रणे च मधुमेहे च पानीयं मन्दमाचरेत्॥

॥ इति जलवर्गः ॥

गव्यमाजन्तथा चौष्ट्रमाविकं माहिषञ्च यत्।
अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत्पयः॥

तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु।
मधुरं पिच्छिलं शीतं स्निग्धं श्लक्ष्णं सरं मृदु ॥
सर्व्वप्राणभृतां तस्मात्सात्म्यं चीरमिहोच्यते॥

तत्र सर्व्वमेव चीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात्। वात पित्तशोणितमानसविकारेष्वविरुद्धं। जीर्णज्वरकासश्वासशोषचय गुल्मोन्मादोदरमूर्च्छाभ्रममददाहपिपासाहृद्बस्तिपाण्डुरोगग्रहणी दोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भास्रावरक्तपित्त श्रमक्लमहरं पाप्मापहं बल्यं वृष्यं वाजीकरणं रसायनं मेध्यं सन्धानमास्थापनं वयःस्थापनमायुष्यं जीवनं बृंहणं वमनं विरेचन ञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धचतचीणानां चुद्व्यवायव्यायामकर्शितानाञ्च पथ्यतमं।

गोचीरमनभिस्यन्दि स्निग्धं गुरु रसायनं।
रक्तपित्तहरं शीतं मधुरं रसपाकयोः॥
जीवनीयं तथावातपित्तघ्नं परमं स्मृतं।
गव्यतुल्यगुणं त्वाजं विशेषाच्छोषिणां हितं॥
दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत्।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात्॥
नात्यम्बुपानाद्व्यायामात्सर्व्वव्याधिहरं पयः।
रुचोष्णं लवणं किञ्चिदोष्ट्रं स्वादुरसं लघु॥
शोफगुल्मोदरार्शोघ्नं कृमिकुष्ठविषापहं।
आविकं मधुरं स्निग्धं गुरु पित्तकफावहं॥

पथ्यं केवलवातेषु कासे चानिलसम्भवे ।
महाभिस्यन्दि मधुरं माहिषं वह्निनाशनं ॥
निद्राकरं शीतकरं गव्यात् स्निग्धतरं गुरु ।
उष्णं चैकशफं बल्यं शाखावातहरं पयः ॥
मधुराम्लरसं रूक्षं लवणानुरसं लघु ।
नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमं ॥
नस्याश्चोतनयोः पथ्यं जीवनं लघु दीपनं ।
हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु ॥
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनं ।
प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीतलं ॥
रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा ।
दिवाकराभितप्तानां व्यायामानिलसेवनात् ॥
वातानुलोमि श्रान्तिघ्नं चक्षुष्यं चापराह्णिकं ।
पयोऽभिस्यन्दि गुर्व्वामं प्रायशः परिकीर्त्तितं ॥
तदेवोक्तं लघुतरमनभिस्यन्दि वै शृतं ।
वर्जयित्वा स्त्रियाः स्तन्यमाममेव हि तद्धितं ॥
धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा ।
तदेवातिशृतं सर्व्वं गुरु बृंहणमुच्यते ॥
अनिष्टगन्धमम्लञ्च विवर्णं विरसञ्च यत् ।
वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥
॥ इतिक्षीरवर्गः ॥

दधि तु मधुरमम्लमत्यम्लञ्चेति। तत्कषायानुरसं स्निग्धमुष्णं पीनसविषमज्वरातिसारारोचकमूत्रकृच्छ्रकार्श्यापहं वृष्यं प्राणकरं मङ्गल्यञ्च॥

महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनं।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणं॥
विदाहि सृष्टविण्मूत्रं मन्दजातं त्रिदोषकृत्।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनं॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदं।
दध्याजं कफपित्तघ्नं लघु वातक्षयापहं॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनं।
विपाके मधुरं वृष्यं वातपित्तप्रसादनं॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषं।
विपाके कटु सक्षारं गुरु भेद्यौष्ट्रिकं दधि॥
वातमर्शांसि कुष्ठानि कृमीन् हन्त्युदराणि च।
कोपनं कफवातानां दुर्नाम्नां चाविकं दधि॥
रसे पाके च मधुरमत्यभिष्यन्दि दोषलं।
दीपनीयमचक्षुष्यं वाडवं दधि वातलं॥
रूक्षमुष्णं कषायञ्च कफमूत्रापहञ्च तत्।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरं।
लघु पाके बलासघ्नं वीर्य्योष्णं पक्तिनाशनं॥

कषायानुरसं नाग्या दधि वर्च्चोविवर्द्धनं ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरं ।
वातघ्नं कफकृत्स्निग्धं वृंहणं नच पित्तकृत् ॥
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतं ।
शृतात्क्षीरात्तु यज्जातं गुणवद्दधि तत्स्मृतं ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनं ।
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः ॥
वह्नेर्व्विधमनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलं ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदं ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितं ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।
तृष्णाक्लमहरं मस्तु लघु स्रोतोविशोधनं ॥
अम्लं कषायं मधुरमवृष्यं कफवातनुत् ।
प्रह्लादनं प्रीणनञ्च भिनत्त्याशु मलञ्च तत् ॥
बलमावहते चापि भक्तच्छन्दं करोति च ॥
स्वादम्लमत्यम्लकमन्दजातं तथा शृतक्षीरभवं सरञ्च ।
असारमेवं दधि सप्तधाऽस्मिन् वर्गे स्मृता मस्तुगुणास्तथैव ॥

॥ इतिदधिवर्गः ॥

तक्रं मधुरमम्लं कषायानुरसमुष्णवीर्य्यं लघु रूक्षमग्निदी

पनं गरशोफातिसारग्रहणीपाण्डुरोगार्शःप्लीहगुल्मारोचकविषमज्वरतृष्णाच्छर्दिप्रसेकशूलमेदःश्लेष्मानिलहरं मधुरविपाकं हृद्यं मूत्रकृच्छ्रस्नेहव्यापत्प्रशमनमवृष्यञ्च ॥

मन्थनादिपृथग्भूतस्नेहमर्द्धोदकन्तु यत्।
नातिसान्द्रद्रवं तक्रं स्वाद्वम्लं तुवरं रसे ॥
यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥
तक्रं नैव चते दद्यान्नोष्णकाले न दुर्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥
शीतकालेऽग्निमान्द्ये च कफोत्थेष्वामयेषु च।
मार्गावरोधे दुष्टे च वायौ तक्रं प्रशस्यते ॥

तत् पुनर्मधुरं श्लेष्मप्रकोपणं पित्तप्रशमनञ्च। अम्लं वातघ्नं पित्तकरञ्च ॥

वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करं।
पिबेत्तक्रं कफे चापि व्योषक्षारसमायुतं ॥
ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका।
तक्राल्लघुतरो मण्डः कूर्चिकादधितक्रजः ॥
गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः।
मधुरौ बृंहणौ वृष्यौ तद्वत्पीयूषमोरटौ ॥

नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरं कषायमीषदम्लं शीतलं मेध्यं दीपनं हृद्यं संग्राहि पित्तानिलहरं वृष्यमविदाहि क्षयकासश्वासव्रणार्शोऽर्दितापहं गुरुकफमेदोविवर्द्धनं बलकरं बृंहणं

शोषघ्नं विशेषतो बालानां प्रशस्यते। क्षीरोत्थं पुनर्नवनीतमुत्कृष्ट स्नेहं माधुर्य्ययुक्तमतिशीतं सौकुमार्य्यकरं चक्षुष्यं संग्राहि रक्तपित्त नेत्ररोगहरं प्रसादनञ्च ॥ सन्तानिका पुनर्व्वातघ्नी तर्पणी बल्या वृष्या स्निग्धा रुच्या मधुरा मधुरविपाका रक्तपित्तप्रसादनी गुर्व्वी च।

विकल्प एष दध्यादिः श्रेष्ठो गव्योऽभिवर्णितः।
विकल्पानवशिष्टांस्तु क्षीरवीर्य्यात्समादिशेत्॥

॥ अथ घृतं ॥

घृतन्तु सौम्यं शीतवीर्य्यं मृदु मधुरमल्पाभिस्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृति मतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरमायुष्यं वृष्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पाप्मालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च ॥

विपाके मधुरं शीतं वातपित्तविषापहं।
चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरं॥
आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनं।
कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु॥
मधुरं रक्तपित्तघ्नं गुरु पाके कफावहं।
वातपित्तप्रशमनं सुशीतं माहिषं घृतं॥
औष्ट्रं कटुरसं पाके शोफक्रिमिविषापहं।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहं॥

पाके लघ्वाविकं सर्पिर्नच पित्तप्रकोपणं ।
कफेऽनिले योनिदोषे शोषे कम्पेच तद्धितं ॥
पाके लघूष्णवीर्य्यञ्च कषायं कफनाशनं ।
दीपनं बद्धमूत्रञ्च विद्यादैकशफं घृतं ॥
चक्षुष्यमग्र्यं स्त्रीणान्तु सर्पिः स्यादमृतोपमं ।
वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहं ॥
कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु ।
हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन् ॥

क्षीरघृतं पुनः संग्राहि रक्तपित्तभ्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च। सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षिशिरसां शूलघ्नो वस्तिनस्याक्षिप्रपूरणेषूपदिश्यते॥ सर्पिः पुराणं सरं कटुविपाकं त्रिदोषापहं मूर्च्छामेदउन्मादोदरज्वरगरशोफापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं दीपनं वस्तिनस्याक्षिपूरणेषूपदिश्यते।

भवन्ति चात्र॥ पुराणं तिमिरश्वासपीनसज्वरकासनुत्।
मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनं॥
एकादशशतञ्चैव वत्सरानुषितं घृतं।
रक्षोघ्नं कुम्भसर्पिः स्यात्परतस्तु महाघृतं॥
पेयं महाघृतं भूतैः कफघ्नं पवनाधिकैः।
बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहं॥
सर्व्वभूतहरञ्चैव घृतमेतत्प्रशस्यते॥

॥ अथ तैलानि ॥

तैलं त्वाग्नेयमुष्णं तीक्ष्णं मधुरं मधुरविपाकं बृंहणं प्रीणनं व्यवायि सूक्ष्मं विशदं गुरु सरं विकासि वृष्यं त्वक्प्रसादनं मेधामार्दवमांसस्थैर्य्यवर्णबलकरं चक्षुष्यं बद्धमूत्रं लेखनं तिक्तकषायानुरसं पाचनमनिलबलासक्षयकरं क्रिमिघ्नमशीतपित्तजननं योनिशिरःकर्णशूलप्रशमनं गर्भाशयशोधनञ्च तथा छिन्नभिन्नविद्धोत्पिष्टच्युतमथितक्षतपिच्चितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नमृगव्यालविदष्टप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते॥

तद्वस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥

एरण्डतैलं मधुरमुष्णं तीक्ष्णं दीपनं कटुकषायानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुरविपाकं वयःस्थापनं योनिशुक्रविशोधनमारोग्यमेधाकान्तिस्मृतिबलकरं वातकफहरमधोभागदोषहरञ्च ॥

निम्बातसीकुसुम्भमूलकजीमूतकृतवेधनार्कताम्पिल्लकहस्तिकर्णपृथ्वीकापीलुकरञ्जेङ्गुदीशिग्रुसर्षपसुवर्चलाविडङ्गज्योतिष्मतीफलतैलानि तीक्ष्णानि लघून्युष्णवीर्य्याणि कटूनि कटुविपाकानि सराण्यनिलकफक्रिमिकुष्ठप्रमेहशिरोरोगहराणि चेति ॥

वातघ्नं मधुरं तेषु क्षौमं तैलं बलावहं ।
कटुपाकमचक्षुष्यं स्निग्धोष्णं गुरु पित्तलं ॥

क्रमिघ्नं सार्षपं तैलं कण्डूकुष्ठापहं लघु।
कफमेदोऽनिलहरं लेखनं कटुदीपनं ॥
क्रमिघ्नमिङ्गुदीतैलमीषत्तिक्तं तथा लघु।
कुष्ठामयक्रमिहरं दृष्टिशुक्रबलापहं ॥
विपाके कटुकं तैलं कौसुम्भं सर्व्वदोषकृत्।
रक्तपित्तकरं तीक्ष्णमचक्षुष्यं विदाहि च ॥

किराततिक्ताऽतिमुक्तकविभीतकनालिकेरकोलाक्षोडजीवन्ती पियालकर्व्वुदारसूर्य्यवल्लीत्रपुसैर्व्वारुककर्कारुकुष्माण्डप्रभृतीनां तैलानि मधुराणि मधुरवीर्य्यविपाकानि वातपित्तप्रशमनानि शीतवीर्य्याण्यभिष्यन्दीनि सृष्टविण्मूत्राण्यग्निसादनानि चेति ॥

मधूककाश्मर्य्यपलाशतैलानि मधुरकषायाणि कफपित्तप्रशमनानि ॥

तुवरकभल्लातकतैले उष्णे मधुरकषाये तिक्तानुरसे वातकफकुष्ठमेदोमेहक्रमिहरे उभयतोभागदोषहरे च ॥

सरलदेवदारुगण्डीरशिंशपागुरुसारस्नेहास्तिक्तकटुकषाया दुष्टव्रणशोधनाः क्रमिकफकुष्ठानिलहराश्च ॥

तुम्बीकोशाम्रदन्तीद्रवन्तीश्यामासप्तलानीलिकाकम्पिल्लकशङ्खिनी स्नेहास्तिक्तकटुकषाया अधोभागदोषहराः क्रमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च ॥

यवतिक्तातैलं सर्व्वदोषप्रशमनमीषत्तिक्तमग्निदीपनं लेखनं मेध्यं पथ्यं रसायनञ्च ॥

एकैषिकातैलं मधुरमतिशीतं पित्तहरमनिलप्रकोपणं श्लेष्माभिवर्द्धनं ॥

सहकारतैलमीषत्तिक्तमतिसुगन्धि वातकफहरं रूक्षं मधुरं कषायं रसवन्नातिपित्तकरञ्च ।

फलोद्भवानि तैलानि यान्यन्युक्तानि कानिचित् ।
गुणान् कर्म्म च विज्ञाय फलवत्तानि निर्द्दिशेत् ॥
यावन्तः स्थावराः स्नेहाः समासात्परिकीर्त्तिताः ।
सर्व्वे तैलगुणा ज्ञेयाः सर्व्वे चानिलनाशनाः ॥
सर्व्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ।
निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि ॥

ग्राम्यानूपौदकानाञ्च वसामेदोमज्जानो गुरूष्णमधुरा वातघ्ना जाङ्गलैकशफक्रव्यादादीनां लघुशीतकषाया रक्तपित्तघ्नाः प्रतुदविष्किराणां श्लेष्मघ्नाः ॥ तत्र घृततैलवसामेदोमज्जानो यथोत्तरं गुरुविपाका वातहराश्च ॥

॥ अथ मधुवर्गः ॥

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं बल्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्दितृष्णाक्रिमिविषप्रशमनं ह्लादि त्रिदोषप्रशमनञ्च तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात्कषायभावाच्च वातपित्तघ्नं ॥

पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
विशेषात्पौत्तिकं तेषु रूक्षोष्णं सविषान्वयात् ।
वातासृक्पित्तकृच्छेदि विदाहि मदकृन्मधु ॥
पैच्छिल्यात्स्वादुभूयस्त्वाद्भ्रामरं गुरुसंज्ञितं ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनं ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतं ।
श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥
स्वादुपाकं गुरु हिमं पिच्छिलं रक्तपित्तजित् ।
श्वित्रमेहकृमिहरं विद्याच्छात्रं गुणोत्तरं ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं ।
कषायं कटु पाके च बल्यं तिक्तमवातकृत् ॥
औद्दालकं रुचिकरं स्वर्यं कुष्ठविषापहं ।
कषायमुष्णमम्लञ्च पित्तकृत्कटुपाकि च ॥
छर्दिमेहप्रशमनं मधु रूक्षं दलोद्भवं ।
बृंहणीयं मधु नवं नातिश्लेष्महरं सरं ॥
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनं ।
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ॥
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ।
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥

तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविष
मक्षिकासम्भवत्वाचानुष्णोपचारं ।

उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णे वा तं निहन्ति यथाविषं ॥

तत्सौकुमार्य्याच्च तथैव शैत्यान्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च तयान्तरीक्षेण जलेनचापि ॥

उष्णेन मधु संयुक्तं वमनेष्ववचारितं ।
अपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्वामात्परतम्नन्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सर्व्वं हन्ति यथाविषं ॥

॥ अथेक्षुवर्गः ॥

इक्षवो मधुरा मधुरविपाका गुरवः शीताः स्निग्धा बल्याहृष्या मू
त्रलारक्तपित्तप्रशमनाः क्रमिकफकराश्चेति तेचानेकविधाः। तद्यथा।

पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत् ।
इत्येता जातयः स्थौल्याद्गुणान् वक्ष्याम्यतःपरं ॥

सुशीतो मधुरः स्निग्धो बृंहणः श्लेष्मलः सरः ।
अविदाही गुरुर्वृष्यः पौण्ड्रको भीरुकस्तथा ॥
आभ्यां तुल्यगुणः किञ्चित्सक्षारो वंशको मतः ।

वंशवच्छतपोरस्तु किञ्चिदुष्णः स वातहा ॥
कान्तारतापसाविक्षू वंशकानुगुणौ मतौ ।
एवङ्गुणस्तु काष्ठेक्षुः सतु वातप्रकोपणः ॥
सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः ।
अतीव मधुरो मूले मध्ये मधुर एव तु ॥
अग्रेष्वक्षिषु विज्ञेय इक्षूणां लवणो रसः ।
अविदाही कफकरो वातपित्तनिवारणः॥
वक्त्रप्रह्लादनो वृष्यो दन्तनिष्पीडितो रसः।
गुरुर्व्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः ॥
पक्वो गुरुः सरः स्निग्धः स तीक्ष्णः कफवातनुत् ॥

फाणितं गुरु मधुरमभिष्यन्दि बृंहणमवृष्यं त्रिदोषकृच्च । गुडः सक्षारमधुरो नातिशीतः स्निग्धो मूत्ररक्तशोधनो नातिपित्तजिद्वातघ्नो मेदःकफकरो बल्यो वृष्यश्च ॥

पित्तघ्नो मधुरः शुद्धो वातघ्नोऽसृक्प्रसादनः ।
स पुराणोऽधिकगुणो गुडः पथ्यतमः स्मृतः ॥

मत्स्यण्डिकाखण्डशर्कराविमलजाता उत्तरोत्तरं शीताः स्निग्धा गुरुतरा मधुरतरा वृष्या रक्तपित्तप्रसादनास्तृष्णाप्रशमनाश्च ॥

यथायथैषां वैमल्यं मधुरत्वं तथातथा ।
स्नेहगौरवशैत्यानि सरत्वञ्च तथातथा ॥

यो यो मत्स्यण्डिकाखण्डशर्कराणां स्वको गुणः ।
तेनतेनैव निर्द्दिश्यस्तेषां विस्रावणो गुणः ॥
सारस्थिता सुविमला निःक्षारा च यथायथा ।
तथातथा गुणवती विज्ञेया शर्करा बुधैः ॥

मधुशर्करा पुनश्छर्द्यतीसारहरी रुक्षा छेदनी प्रह्लादनी कषायमधुरा मधुरविपाका च ॥ यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति ॥

यावत्यः शर्कराः प्रोक्ताः सर्व्वा दाहप्रणाशनाः ।
रक्तपित्तप्रशमनाश्छर्दिमूर्च्छातृषापहाः ॥
रूक्षं मधूकपुष्पोत्थं फाणितं वातपित्तकृत् ।
कफघ्नं मधुरं पाके कषायं वस्तिदूषणं ॥

॥ अथ मद्यवर्गः ॥

सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनं ।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनं ॥
पाके लघु विदाह्युष्णं तीक्ष्णमिन्द्रियबोधनं ।
विकासि सृष्टविण्मूत्रं शृणु तस्य विशेषणं ॥
मार्द्वीकमविदाहित्वान्मधुरान्वयतस्तथा ।
रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते ॥
मधुरं तद्धि रूक्षञ्च कषायानुरसं लघु ।
लघुपाकि सरं शोषविषमज्वरनाशनं ॥
मार्द्वीकाल्पान्तरं किञ्चित्खार्जूरं वातकोपनं

तदेव विशदं रुच्यं कफघ्नं कर्शनं लघु ॥
कषायमधुरं हृद्यं सुगन्धीन्द्रियबोधनं।
कासार्शोग्रहणीदोषमूत्राघातानिलापहा ॥
स्तन्यरक्तक्षयहिता सुरा बृंहणदीपनी।
कासार्शोग्रहणीश्वासप्रतिश्यायविनाशनी ॥
श्वेता मूत्रकफस्तन्यरक्तमांसकरी सुरा।
छर्द्यरोचकहृत्कुक्षितोदशूलप्रमर्दनी ॥
प्रसन्ना कफवातार्शोविबन्धानाहनाशनी।
पित्तलाल्पकफा रूक्षा यवैर्वातप्रकोपणी ॥
विष्टम्भिनी सुरा गुर्वी श्लेष्मला तु मधूलिका।
रूक्षा नातिकफा वृष्या पाचनी चाक्षिकी स्मृता ॥
त्रिदोषो भेद्यवृष्यश्च कोहलो वदनप्रियः।
ग्राह्युष्णो जगलः पक्वा रूक्षस्तृट्कफशोफहृत् ॥
हृद्यः प्रवाहिकाटोपदुर्नामानिलशोषहृत्।
वक्कसो हृतसारत्वाद्विष्टम्भी वातकोपनः ॥
दीपनः सृष्टविण्मूत्रो विशदोऽल्पमदो गुरुः।
कषायो मधुरः सीधुर्गौडः पाचनदीपनः ॥
शार्करो मधुरो रुच्यो दीपनो वस्तिशोधनः।
वातघ्नो मधुरः पाके हृद्य इन्द्रियबोधनः ॥
तद्वत् पक्वरसः सीधुर्बलवर्णकरः सरः।
शोफघ्नो दीपनो हृद्यो रुच्यः श्लेष्मार्शसां हितः ॥

कर्षनः शीतरसिकः श्वयथूदरनाशनः ।
वर्णकृज्जरणः स्वर्य्यो विबन्धघ्नोऽर्शसां हितः ॥
आच्छिकः पाण्डुरोगघ्नो व्रण्यः संग्राहको लघुः ।
कषायमधुरः सीधुः पित्तघ्नोऽसृक्प्रसादनः ॥
जाम्बवो बद्धनिस्यन्दस्तुवरो वातकोपनः ।
तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत् ॥
मुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः ।
लघुर्मध्वासवश्छेदी मेहकुष्ठविषापहः ॥
तिक्तः कषायशोफघ्नस्तीक्ष्णः स्वादुरवातकृत् ।
तीक्ष्णः कषायो मदकृद्दुर्नामकफगुल्महृत् ॥
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ।
बल्यः पित्तहरो वर्ण्यो मृद्वीकेक्षुरसासवः ॥
शीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः ।
रूक्षः कषायकफहृद्वातपित्तप्रकोपणः ॥
निर्दिशेद्रसतश्चान्यान् कन्दमूलफलासवान् ।
नवं मद्यमभिष्यन्दि गुरु वातादिकोपनं ॥
अनिष्टगन्धं विरसमहृद्यञ्च विदाहि च ।
सुगन्धि दीपनं हृद्यं रोचिष्णु कृमिनाशनं ॥
स्फुटस्रोतस्करं जीर्णं लघु वातकफापहं ।
अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः ॥
बहुदोषहरश्चैव दोषाणां शमनश्च सः ।

दीपनः कफवातघ्नः सरः पित्तविरोधनः ॥
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः ।
पिप्पल्यादिकृतो गुल्मकफरोगहरः स्मृतः ॥
चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक् ।
अरिष्टासवसीधूनां गुणान् कर्म्माणि चादिशेत् ॥
बुद्ध्वा यथास्वं संस्कारमवेक्ष्य कुशलो भिषक् ।
सान्द्रं विदाहि दुर्गन्धं विरसं कृमिलं गुरु ॥
अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भाजनस्थितं ।
अल्पौषधं पर्य्युषितमत्यच्छं पिच्छिलञ्च यत् ॥
तद्वर्ज्यं सर्व्वदा मद्यं किञ्चिच्छेषन्तु यद्भवेत् ।
तत्र यत् स्तोकसम्भारं तरुणं पिच्छिलं गुरु ॥
कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः ।
पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च ॥
अहृद्यं फेनिलं पूति कृमिलं विरसं गुरु ।
तथा पर्य्युषितञ्चापि विद्यादनिलकोपनं ॥
सर्व्वदोषैरुपेतन्तु सर्व्वदोषप्रकोपणं ।
चिरस्थितं जातरसं दीपनं कफवातजित् ॥
रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहं ।
तस्यानेकप्रकारस्य मद्यस्य रसवीर्य्यतः ॥
सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च विकासित्वाच्च वह्निना ।
समेत्य हृदयं प्राप्य धमनीरूर्द्ध्वमागतं ॥

विक्षोभ्येन्द्रियचेतांसि वीर्य्यं मदयतेऽचिरात्।
चिरेण श्लैष्मिके पुंसि पानतो जायते मदः।
अचिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव तु ॥
सात्विके शौचदाक्षिण्यहर्षमण्डनलालसः।
गीताध्ययनसौभाग्यसुरतोत्साहकृन्मदः ॥
राजसे दुःखशीलत्वमात्मत्यागंससाहसं।
कलहं सानुबन्धन्तु करोति पुरुषे मदः ॥
अशौचनिद्रामात्सर्य्यागम्यागमनलोलताः।
असत्यभाषणञ्चापि कुर्य्याद्धि तामसे मदः ॥
रक्तपित्तकरं शुक्तं छेदि भुक्तविपाचनं।
वैस्वर्य्यं जरणं श्लेष्मपाण्डुक्रिमिहरं लघु ॥
तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटुपाकि च।
तद्वत्तदासुतं सर्व्वं रोचनञ्च विशेषतः ॥
गौडानि रसशुक्तानि मधुशुक्तानि यानि च।
यथापूर्व्वं गुरुतराण्यभिस्यन्दकराणि च ॥
तुषाम्बु दीपनं हृद्यं हृत्पाण्डुक्रिमिरोगनुत्।
ग्रहण्यर्शोविकारघ्नं भेदि सौवीरकं तथा ॥
धान्याम्लं धान्ययोनित्वाद्दीपनं दाहनाशनं।
स्पर्शात्पानात्तु पवनकफतृष्णाहरं लघु ॥
तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात्।
मुखवैरस्यदौर्गन्ध्यमलशोषक्लमापहं ॥

दीपनं जरणं भेदि हितमास्थापनेषु च।
समुद्रमाश्रितानाञ्च जनानां सात्म्यमुच्यते ॥

॥ अथमूत्राणि ॥

गोमहिषाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटून्युष्णानि तिक्तानि लवणानुरसानि लघूनि शोधनानि कफवातक्रिमिमेदो विषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः ॥

भवन्ति चात्र ॥ तत्सर्वं कटु तीक्ष्णोष्णं लवणानुरसं लघु।
शोधनं कफवातघ्नं क्रिमिमेदोविषापहं ॥
अर्शोजठरगुल्मघ्नं शोफारोचकनाशनं।
पाण्डुरोगहरं भेदि हृद्यं दीपनपाचनं ॥
गोमूत्रं कटु तीक्ष्णोष्णं सक्षारत्वान्न वातलं।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥
दुर्नामोदरशूलेषु कुष्ठमेहाविशुद्धिषु।
आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषं ॥
कासश्वासापहं शोषकामलापाण्डुरोगनुत्।
कटुतिक्तान्वितं छागमीषन्मारुतकोपनं ॥
कासप्लीहोदरश्वासशोषवर्चोग्रहे हितं।
सक्षारन्तिक्तकटुकमुष्णं वातघ्नमाविकं ॥

दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत् ।
आश्वं कफहरं मूत्रं कृमिदद्रुषु शस्यते ॥
सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनं ।
तीक्ष्णं क्षारे किलासे च नागं मूत्रं प्रयोजयेत् ॥
गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्दभं मूत्रं कृमिवातकफापहं ॥
शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनं ।
अर्शोघ्नं कारभं मूत्रं मानुषन्तु विषापहं ॥
द्रवद्रव्याणि सर्व्वाणि समासात्कीर्त्तितानितु ।
कालदेशविभागज्ञो नृपतेर्दातुमर्हति ॥

---

## षट्चत्वारिंशत्तमोऽध्यायः ॥

अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः ॥

धन्वन्तरिमभिवाद्य सुश्रुत उवाच प्रागभिहितं प्राणिनां पुनर्मूलमाहारो बलवर्णौजसां च स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयिणो द्रव्यरसगुणवीर्य्यविपाकनिमित्ते च क्षयवृद्धी दोषधातूनां साम्यञ्च। ब्रह्मादेरपि च लोकस्याहारः स्थित्युत्पत्ति विनाशहेतुराहारादेवाभिवृद्धिर्ब्बलमारोग्यं वर्णेन्द्रियप्रसादश्च तथाहारवैषम्यादस्वास्थ्यं । तस्याशितपीतलीढखादितस्य नाना द्रव्यात्मकस्यानेकविधविकल्पस्यानेकविधप्रभावस्य पृथक् पृथक्

द्रव्यरसगुणवीर्य्यविपाकप्रभावकर्म्माणीच्छामि ज्ञातुं नह्यनव बुद्धस्वभावा भिषजः स्वस्थानुवृत्तिं रोगनिग्रहणञ्च कर्त्तुं समर्थाः। आहारमूलाश्च सर्व्वप्राणिनो यस्मात्तस्मादन्नपान विधिमुपदिशतु मे भगवानित्युक्तः प्रोवाच भगवान् धन्वन्तरिरथ खलु वत्स सुश्रुत यथाप्रश्नमुच्यमानमुपधारयस्व। तत्र लोहितक शालिकलमकर्दमकपाण्डुकसुगन्धकशकुनाहृतपुष्पाण्डकपुण्डरीक महाशालिशीतभीरुकरोध्रपुष्पकदीर्घशूककाञ्चनकमहिषमस्तकहा यनकदूषकमहादूषकप्रभृतयः शालयः।

मधुरा वीर्य्यतः शीता लघुपाका बलावहाः।
पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धाल्पवर्च्चसः॥
तेषां लोहितकः श्रेष्ठो दोषघ्नः शुक्रमूत्रलः।
चक्षुष्यो वर्णबलकृत् स्वर्य्यो हृद्यः श्रमापहः॥
व्रण्यो ज्वरहरश्चैव सर्व्वदोषविषापहः।
तस्मादल्पान्तरगुणाः क्रमशः शालयोऽवराः॥

षष्टिककाङ्गुकमुकुन्दकपीतकप्रमोदककाकलकासनपुष्पकमहा षष्टिकचूर्णककुरवककेदारकप्रभृतयः षष्टिकाः।

रसे पाके च मधुराः शमना वातपित्तयोः।
शालीनाञ्च गुणैस्तुल्या वृंहणाः कफशुक्रलाः॥
षष्टिकः प्रवरस्तेषां कषायानुरसो लघुः।
मृदुः स्निग्धस्त्रिदोषघ्नः स्थैर्य्यकृद्बलवर्द्धनः॥
विपाके मधुरो ग्राही तुल्यो लोहितशालिभिः।

शेषास्त्वल्पान्तरगुणाः षष्टिकाः क्रमशो गुणैः ॥

कृष्णव्रीहिशालामुखजतुमुखनन्दीमुखलावाचकत्वरितककुक्कुटाण्डकपारापतकपाटलप्रभृतयो व्रीहयः ॥

कषायमधुराः पाके मधुरा वीर्य्यतोऽहिमाः ।
अल्पाभिष्यन्दिनस्तुल्याःषष्टिकैर्बद्धवर्चसः ॥
कृष्णव्रीहिर्व्वरस्तेषां कषायानुरसो लघुः ।
तस्मादल्पान्तरगुणाः क्रमशो व्रीहयोऽपरे ॥
दग्धायामवनौ जाताः शालयो लघुपाकिनः ।
कषाया बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षणाः ॥
स्थलजाः कफपित्तघ्नाः कषायाः कटुकान्वयाः ।
किञ्चित्सतिक्तमधुराः पवनानलवर्द्धनाः॥
कैदारा मधुरा वृष्या बल्याः पित्तनिवर्हणाः ।
ईषत्कषायाल्पमला गुरवः कफशुक्रलाः ॥
रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धनाः ॥
शालयश्छिन्नरूढा ये रूक्षास्ते बद्धवर्चसः ।
तिक्ताः कषायाः पित्तघ्ना लघुपाकाः कफावहाः ॥
विस्तरेणायमुद्दिष्टः शालिवर्गो हिताहितः ।
तद्वत्कुधान्यमुद्गादिमाषादीनाञ्च वक्ष्यते ॥

॥ अथ कुधान्यवर्गः ॥

कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधू

लिकानान्दीमुखीकुरुविन्दगवेधुकवरुकतोदपर्णीमुकुन्दकवेणुयव प्रभृतयः कुधान्यविशेषाः ॥

ऊष्णाः कषायमधुरा रूक्षाः कटुविपाकिनः ।
श्लेष्मघ्ना बद्धनिस्यन्दा वातपित्तप्रकोपणाः ॥
कषायमधुरास्तेषां शीतपित्तापहाः स्मृताः ।
कोद्रवश्च सनीवारःश्यामाकश्च सशान्तनुः ॥
कृष्णा रक्ताश्च पीताश्च श्वेताश्चैव प्रियङ्गवः ।
यथोत्तरं प्रधानाः स्यू रूक्षाः कफहराः स्मृताः ॥
मधूली मधुरा शीता स्निग्धा नान्दीमुखी तथा ।
विशोषी तत्र भूयिष्ठं वरुकः समुकुन्दकः ॥
रूक्षा वेणुयवा ज्ञेया वीर्य्योष्णाः कटुपाकिनः ।
बद्धमूत्राः कफहराः कषाया वातकोपनाः ॥

मुद्गवनमुद्गकलायमकुष्ठमसूरमङ्गल्यचणकसतीनत्रिपुटकहरेणुआढकीप्रभृतयो वैदलाः ॥

कषायमधुराः शीताः कटुपाका मरुत्कराः ।
बद्धमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा ॥
नात्यर्थं वातलास्तेषु मुद्गा दृष्टिप्रसादनाः ।
प्रधाना हरितास्तत्र वन्या मुद्गसमाः स्मृताः ॥
विपाके मधुराः प्रोक्ता मसूरा बद्धवर्चसः ।
मकुष्ठकाः कृमिकराः कलायाः प्रचुरानिलाः ॥
आढकी कफपित्तघ्नी नातिवातप्रकोपणी ।

वातलाः शीतमधुराः सकषाया विरूक्षणाः ॥
कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः ।
हरेणवः सतीनाश्च विज्ञेया बद्धवर्च्चसः ॥
ऋते मुद्गमसूराभ्यामन्येत्वाध्मानकारकाः ॥
माषो गुरुर्भिन्नपुरीषमूत्रः स्निग्धोष्णवृष्यो मधुरोऽनिलघ्नः ।
सन्तर्पणः स्तन्यकरो विशेषाद्बलप्रदः शुक्रकफावहश्च ॥
कषायभावान्न पुरीषभेदी न मूत्रलो नैव कफस्य कर्त्ता ।
स्वादुर्व्विपाके मधुरोऽलसान्द्रः सन्तर्पणः स्तन्यरुचिप्रदश्च ॥
माषैः समानं फलमात्मगुप्तमुक्तञ्च काकाण्डफलं तथैव ।
आरण्यमाषा गुणतः प्रदिष्टा रूक्षाः कषाया अविदाहिनश्च ॥
उष्णः कुलत्थो रसतः कषायः कटुर्व्विपाके कफमारुतघ्नः ।
शुक्राश्मरीगुल्मनिषूदनश्च संग्राहकः पीनसकासहारी ॥
आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकृच्च ।
कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः ॥
ईषत्कषायो मधुरः सतिक्तः संग्राहकः पित्तकरस्तथोष्णः ।
तिलो विपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपन एव पथ्यः ॥
दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्योऽनिलहा गुरुश्च ।
तिलेषु सर्व्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथान्ये ॥
यवः कषायो मधुरो हिमश्च कटुर्व्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्तिलवच्च नित्यं प्रबद्धमूत्रो बहुवातवर्चाः ॥
स्थैर्य्याग्निमेधास्वरवर्णकृच्च स पिच्छिलः स्थूलविलेखनश्च ।

मेदोमरुत्तृड्हरणोऽतिरूक्षः प्रसादनः शोणितपित्तयोश्च ॥
एभिर्गुणैर्हीनतरांस्तु किञ्चिद्विद्याद्यवेभ्योऽतियवान् विशेषैः ।
गोधूम उक्तो मधुरो गुरुश्च बल्यः स्थिरः शुक्ररुचिप्रदश्च ॥
स्निग्धोऽतिशीतोऽनिलपित्तहन्ता सन्धानकृत्श्लेष्मकरः सरश्च ।
रूक्षः कषायो विषशोफशुक्रबलासदृष्टिक्षयकृद्विदाही॥
कटुर्विपाके मधुरस्तु शिम्बः प्रभिन्नविण्मारुतपित्तलश्च
सितासिताः पीतकरक्तवर्णा भवन्ति येऽनेकविधास्तु शिम्बाः ॥
यथोदितास्ते गुणतः प्रधाना ज्ञेयाः कटूष्णा रसपाकयोश्च ।
सहादयं मूलकजाश्च शिम्बाः कुशिम्बिवल्लीप्रभवास्तु शिम्बाः॥
ज्ञेया विपाके मधुरा रसे च बलप्रदाः पित्तनिबर्हणाश्च ।
विदाहवन्तश्च भृशञ्च रूक्षा विष्टभ्य जीर्य्यन्त्यनिलप्रदाश्च ॥
रुचिप्रदाश्चैव सुदुर्जराश्च सर्व्वे स्मृता वैदलिकास्तु शिम्बाः ।
कटुर्विपाके कटुकः कफघ्नो विदाहिभावादहितः कुसुम्भः ॥
उष्णातसीस्वादुरसाऽनिलघ्नी पित्तोल्वणा स्यात् कटुका विपाके ।
पाके रसे चापि कटुः प्रदिष्टः सिद्धार्थकः शोणितपित्तकोपी॥
तीक्ष्णोष्णरूक्षःकफमारुतघ्नस्तथागुणश्चासितसर्षपोऽपि॥

अनार्त्तवं व्याधिहतमपर्य्यागतमेव च ।
अभूमिजं नवञ्चापि न धान्यं गुणवत्स्मृतं॥
नवं धान्यमभिष्यन्दि लघु सम्वत्सरोषितं ।
विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणं ॥

शाल्यादेः सर्षपान्तस्य विविधस्यास्य भागशः ।
कालप्रमाणसंस्कारमात्राः सम्परिकीर्त्तिताः ॥

॥ अत ऊर्द्धं मांसवर्गानुपदेच्यामः ॥

तद्यथा । जलेशया आनूपा ग्राम्याः क्रव्यभुज एकशफा जाङ्गलाश्चेति षण्मांसवर्गास्तेषां वर्गाणामुत्तरोत्तरं प्रधानतमाः । ते पुनर्द्विविधा जाङ्गला आनूपाश्चेति । तत्र जाङ्गलवर्गोऽष्टविधः । तद्यथा । जङ्घाला विष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा विलेशया ग्राम्याश्चेति तेषां जङ्घालविष्किरौ प्रधानतमौ तावेणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो जङ्घाला मृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च ॥

कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा ।
संग्राही रोचको बल्यस्तेषामेणो ज्वरापहः ॥
मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः ।
शीतलो बद्धविण्मूत्रः सुगन्धिर्हरिणो लघुः ॥
एणः कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते ।
न कृष्णो नच ताम्रश्च कुरङ्गः सोऽभिधीयते ॥
शीतासृक्पित्तशमनी विज्ञेया मृगमातृका ।
सन्निपातक्षयश्वासकासहिक्काऽरुचिप्रनुत् ॥

लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकावातीक

चकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रक कुतित्तिरिकुरवाङ्कयवलकप्रभृतयस्त्वाह्वला विष्किरा लघवः शीतमधुरा.कषाया दोषशमनाश्च ॥

संग्राही दीपनश्चैव कषायमधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥
ईषद्गुरूष्णमधुरो वृष्यो मेधाग्निवर्द्धनः ।
तित्तिरिः सर्व्वदोषघ्नो ग्राही वर्णप्रसादनः ॥
हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः ।
रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः ॥
कफोत्थेषु च रोगेषु मन्दवाते च शस्यते ।
वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः ॥
लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः ।
कषायः स्वादुलवणस्त्वच्यः केश्यो रुचिप्रदः ॥
मयूरः स्वरमेधाग्निदृक्श्रोत्रेन्द्रियदार्ढ्यकृत् ।
स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः ॥
बृंहणः कुक्कुटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु सः ।
वातरोगक्षयवमीविषमज्वरनाशनः ॥

कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गगृहकुलिङ्गगोक्षोडकडिडिमाणकशतपत्रकमातृनिन्दकभेदाशिशुकसारिकावल्गुलीगिरिशालक्वालदूषकसुगृहीखञ्जरीटकहारीतदात्यूहप्रभृतयः प्रतुदाः ॥

कषायमधुरा रूक्षाः फलाहारा मरुत्कराः ।
पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः ॥
सर्व्वदोषकरस्तेषां भेदाशी मलदूषकः ।
कषायस्वादुलवणो गुरुः काणकपोतकः ॥
रक्तपित्तप्रशमनः कषायविशदोऽपि च ।
विपाके मधुरश्चापि गुरुः पारावतः स्मृतः ॥
कुलिङ्गो मधुरः स्निग्धः कफशुक्रविवर्द्धनः ।
रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः ॥

सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्जारशृगालमृगेर्व्वारुकप्रभृतयो गुहाशयाः ॥

मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः ।
उष्णवीर्य्या हिता नित्यं नेत्रगुह्यविकारिणां ॥

काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्रप्रभृतयः प्रसहाः ॥

एते सिंहादिभिः सर्व्वे समाना वायसादयः ।
रसवीर्य्यविपाकेषु विशेषाच्छोषिणे हिताः ॥

मद्गुमूषिकवृक्षशायिकावकुशपूतिघासवानरप्रभृतयः पर्णमृगाः ॥

मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः ।
सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः ॥
समुद्रजेभ्यो नादेया बृंहणत्वाद्गुणोत्तराः ॥

श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रिय
काऽजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो बिलेशयाः ॥
वर्चोमूत्रं संहतं कुर्य्युरेते वीर्य्ये चोष्णाः पूर्व्ववत्स्वादुपाकाः ।
वातं हन्युः श्लेष्मपित्ते च कुर्य्युः स्निग्धाः कासश्वासकार्श्यापहाश्च ॥

कषायमधुरस्तेषां शशः पित्तकफापहः ।
नातिशीतलवीर्य्यत्वाद्वातसाधारणो मतः ॥
गोधा विपाके मधुरा कषायकटुका स्मृता ।
वातपित्तप्रशमनी वृंहणी बलवर्द्धनी ॥
शल्यकः स्वादुपित्तघ्नो लघुः शीतो विषापहः ।
प्रियको मारुते पथ्यो ऽजगरस्त्वर्शसां हितः ॥
दुर्नामानिलदोषघ्नाः कृमिदूषीविषापहाः ।
चक्षुष्या मधुराः पाके सर्पा मेधाग्निवर्द्धनाः ॥
दर्व्वीकरा दीपकाश्च तेषूक्ताः कटुपाकिनः ।
मधुराश्चातिचक्षुष्याः सृष्टविण्मूत्रमारुताः ॥

अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः ॥

ग्राम्या वातहराः सर्व्वे वृंहणाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः ॥
नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः ।
छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः ॥
वृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु ।
मेदःपुच्छोद्भवं वृष्यमौरभ्रसदृशं गुणैः ॥

श्वासकासप्रतिश्यायविषमज्वरनाशनं।
अमात्यग्निहितं गव्यं पवित्रमनिलापहं॥
औरभ्रवत्सलवणं मांसमेकशफोद्भवं।
अल्पाभिष्यन्द्ययं वर्गो जाङ्गलः समुदाहृतः॥
दूरे जनान्तनिलया दूरे पानीयगोचराः।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो मताः॥
अतीवासन्ननिलयाः समीपोदकगोचराः।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते॥

आनूपवर्गस्तु पञ्चविधः। तद्यथा। कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोन्द्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः॥

वतपित्तहरा वृष्या मधुरा रसपाकयोः।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः॥
विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः।
स्वाद्वम्ललवणस्तेषां गजः श्लेष्मानिलापहः॥
गवयस्य तु मांसं हि स्निग्धं मधुरकासजित्।
विपाके मधुरं चापि व्यवायस्य तु वर्द्धनं॥
स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः।
निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत्॥
रुरुमांसं समधुरं कषायानुरसं स्मृतं।

वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनं ॥
तथा चमरमांसन्तु स्निग्धं मधुरकासजित्।
विपाके मधुरं चापि वातपित्तप्रणाशनं ॥
सृमरस्य तु मांसञ्च कषायानुरसं स्मृतं।
वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् ॥
स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु।
स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनं ॥
कफघ्नं खड्गिपिशितं कषायमनिलापहं ॥
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणं।
गोकर्णमांसं मधुरं स्निग्धं मृदु कफावहं ॥
विपाके मधुरञ्चापि रक्तपित्तविनाशनं ॥

हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकवकबलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गूत्क्रोशकाचाचमल्लिकाच्छशुक्लाचपुष्करशायिकाकोनालकाम्बुकुकुटिकामेघरावश्वेतचरणप्रभृतयः प्लवाः संघातचारिणः ॥

रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः।
सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः ॥
गुरूष्णमधुरः स्निग्धः स्वरवर्णबलप्रदः।
बृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः ॥

शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः। कूर्म्मकुम्भीरकर्कटकृष्णकर्कटकशिशुमारप्रभृतयः पादिनः ॥

शङ्खकूर्म्मादयः स्वादुरसपाका मरुन्नुदः ।
शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः ॥
कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः ।
शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा ॥

मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः। रोहित पाठीनपाटलाराजीववर्म्मिगोमत्स्यकृष्णमत्स्यवागुञ्जारमुरलसहस्र दंष्ट्रप्रभृतयो नादेयाः ॥

नादेया मधुरा मत्स्या गुरवो मारुतापहाः ।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः ॥
कषायानुरसस्तेषां शष्पशैवालभोजनः ।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ॥
पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः ।
दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ ॥
मुरलो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ।
सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः ॥
महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ॥

तिमिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः ॥

सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः ।
उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः ॥
बलावहा विशेषेण मांसाशित्वात्समुद्रजाः ।

तेषामप्यनिलघ्नत्वाच्चौण्ड्यकौप्यौ गुणोत्तरौ ।
स्निग्धत्वात् स्वादुपाकत्वात् तयोर्व्वाप्या गुणोत्तराः ॥
नादेया गुरवो मध्ये यस्मात्पुच्छास्यचारिणः ।
सरस्तडागजानान्तु विशेषेण शिरो लघु ॥
अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः ।
किञ्चिन्मुक्ता शिरोदेशमत्यर्थं गुरवस्तु ते ।
अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ॥
उरोविचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतं ॥
॥ इत्यानूपो महाभिष्यन्दिमांसवर्गो व्याख्यातः ॥

तत्र शुष्कपूतिव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानाम सात्म्यचारिणां मांसान्यभक्ष्याणि यस्माद्विगतव्यापन्नापहतपरिणताल्पासंपूर्णवीर्य्यत्वाद्दोषकराणि भवन्ति ॥

अरोचकं प्रतिश्यायं गुरु शुष्कं प्रकीर्त्तितं ।
विषव्याधिहतं मृत्युं बालं छर्दिञ्च कोपयेत् ॥
कासश्वासकरं वृद्धं त्रिदोषं व्याधिदूषितं ।
क्लिन्नमुत्क्लेशजननं कृशं वातप्रकोपणं ॥

एभ्योऽन्येषामुपादेयं मांसमिति ॥ स्त्रियश्चतुष्पादेषु पुमांसो विहङ्गेषु महाशरीरेष्वल्पशरीरा अल्पशरीरेषु महाशरीराः प्रधानतमा एवमेकजातीयानां महाशरीरेभ्यः कृशशरीराः प्रधानतमाः ॥

स्थानादिकृतं मांसस्य गुरुलाघवमुपदेक्ष्यामः। तद्यथा। रक्ता दिषु शुक्रान्तेषु धातुषूत्तरोत्तरासु गुरुतरास्तथा सक्थिस्कन्धक्रोड शिरःपादकरकटीपृष्ठचर्म्मकालेयकयकृदन्त्राणि॥

शिरःस्कन्धं कटीपृष्ठं सक्थिनी चात्मपक्षयोः।
गुरुपूर्व्वं विजानीयाद्धातवस्तु यथोत्तरं॥
सर्व्वस्य प्राणिनो देहे मध्यो गुरुरुदाहृतः॥
पूर्व्वभागो गुरुः पुंसामधोभागस्तु योषितां॥
उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतं।
पक्षोत्क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणां॥
अतीवरूक्षं मांसन्तु विहङ्गानां फलाशिनां।
वृंहणं मांसमत्यर्थं खगानां पिशिताशिनां॥
मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणां।
जलजानूपजा ग्राम्या क्रव्यादैकशफास्तथा॥
प्रसहा विलवासाश्च ये च जङ्गालसंज्ञिताः।
प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरं॥
अल्पाभिष्यन्दिनश्चैव यथापूर्व्वमतोऽन्यथा॥

प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च। सर्व्वप्राणिनां सर्व्व शरीरेभ्यो ये प्रधानतमा भवन्ति यकृत्प्रदेशवर्त्तिनस्तानाददीत प्रधानलाभाभावे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेयं मांसमिति॥ भवति चात्र॥ वयः शरीरावयवाः स्वभावो धातवः क्रिया॥

लिङ्गं प्रमाणं संस्कारो मात्राचास्मिन् परीक्षिता ॥

॥ इति मांसवर्गः ॥

अत ऊर्द्धं फलवर्गानुपदेच्यामः ॥ तद्यथा ॥ दाडिमामलकवदर कोलकर्कन्धुसौवीरसिम्बितिकाफलकपित्थमातुलुङ्गाम्राम्रातककरम र्द्दपियाललकुचभव्यपारावतवेत्रफलप्राचीनामलकतिन्तिडीकनीप कोशाम्राम्लीकानारङ्गजम्बीरप्रभृतीनि ॥

अम्लानि रसतः पाके गुरूण्युष्णानि वीर्य्यतः।
पित्तलान्यनिलघ्नानि कफोत्क्लेशकराणि च ॥
कषायानुरसं तेषां दाडिमं नातिपित्तलं ।
दीपनीयं रुचिकरं हृद्यं वर्च्चोविबन्धनं ॥
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च ।
त्रिदोषघ्नञ्च मधुरमम्लं वातकफापहं ॥
अम्लं समधुरं तिक्तं कषायं कटुकं सरं ।
चक्षुष्यं सर्व्वदोषघ्नं वृष्यमामलकीफलं ॥
हन्ति वातं तदम्लत्वात्पित्तं माधुर्य्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलेभ्योऽभ्यधिकञ्च तत् ॥
कर्कन्धुकोलवदरमामं पित्तकफावहं।
पक्वं पित्तानिलहरं स्निग्धं समधुरं सरं ॥
पुरातनं तृट्शमनं श्रमघ्नं दीपनं लघु।
सौवीरं वदरं स्निग्धं मधुरं वातपित्तजित् ॥
कषायं स्वादु संग्राहि शीतं सिम्बितिकाफलं ।

आमं कपित्थमस्वर्य्यं कफघ्नं ग्राहि वातलं ॥
कफानिलहरं पक्वं मधुराम्लरसं गुरु ।
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनं ॥
लघ्वम्लं दीपनं हृद्यं मातुलुङ्गमुदाहृतं ।
त्वक् तिक्ता दुर्जरा तस्य वातक्रिमिकफापहा ॥
स्वादु शीतं गुरु स्निग्धं मांसं मारुतपित्तजित् ।
मेध्यं शूलानिलच्छर्दिकफारोचकनाशनं ॥
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केसरं ।
शूलाजीर्णविबन्धेषु मन्दाग्नौ कफमारुते ॥
अरुचौ च विशेषेण रसस्तस्योपदिश्यते ।
पित्तानिलकरं बालं पित्तलं बद्धकेसरं ॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदं ।
कषायानुरसं स्वादु वातघ्नं बृंहणं गुरु ॥
पित्ताविरोधि सम्पक्कमाम्रं शुक्रविवर्द्धनं ।
बृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्य्यति ॥
आम्रातकफलं वृष्यं सस्नेहं श्लेष्मवर्द्धनं ।
त्रिदोषविष्टम्भकरं लकुचं शुक्रनाशनं ॥
अम्लं तृष्णापहं रुच्यं पित्तकृत्करमर्द्दकं ।
वातपित्तहरं वृष्यं पियालं गुरु शीतलं ॥
हृद्यं स्वादु कषायाम्लं भव्यमास्यविशोधनं ।
पित्तश्लेष्महरं ग्राहि गुरु विष्टम्भि शीतलं ॥

पारावतं समधुरं रुच्यमत्यग्निवातनुत्।
गरदोषहरं नीपं प्राचीनामलकं तथा॥
वातापहं तिन्तिडीकमामं पित्तबलासकृत्।
ग्राह्युष्णं दीपनं रुच्यं सम्पक्वं कफवातनुत्॥
तस्मादल्पान्तरगुणं कोशाम्रफलमुच्यते।
अम्लीकायाः फलं पक्वं तद्वद्भेदि तु केवलं॥
अम्लं समधुरं हृद्यं विशदं भक्तरोचनं।
वातघ्नं दुर्जरं प्रोक्तं नारङ्गस्य फलं गुरु॥
तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारणं।
वातश्लेष्मविबन्धघ्नं जम्बीरं गुरु पित्तकृत्॥
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत्।

क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकवकुलधन्वनाश्मन्तका
श्वकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि॥

फलान्येतानि शीतानि कफपित्तहराणि च।
संग्राहकाणि रूक्षाणि कषायमधुराणि च॥
क्षीरवृक्षफलं तेषां गुरु विष्टम्भि शीतलं।
कषायं मधुरं साम्लं नातिमारुतकोपनं॥
अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित्।
स्निग्धं स्वादु कषायञ्च राजादनफलं गुरु॥
कषायं मधुरं रूक्षं तोदनं कफवातजित्।
अम्लोष्णं लघु संग्राहि स्निग्धं पित्ताग्निवर्द्धनं॥

आमं कषायं संग्राहि तिन्दुकं वातकोपनं ।
विपाके गुरु संपक्वं मधुरं कफपित्तजित् ॥
मधुरश्च कषायश्च स्निग्धं संग्राहि वाकुलं ।
स्थिरीकरश्च दन्तानां विशदं फलमुच्यते ॥
कषायञ्च हिमं स्वादु धान्वनं कफवातजित् ।
तद्वद्गाङ्गेरुकं विद्यादश्मन्तकफलानि च ॥
विष्टम्भि मधुरं स्निग्धं फल्गुजं तर्पणं गुरु ।
अत्यम्लमीषन्मधुरं कषायानुरसं लघु ॥
वातघ्नं पित्तजननमामं विद्यात् परूषकं ।
तदेव पक्वं मधुरं वातपित्तनिवर्हणं ॥
विपाके मधुरं शीतं रक्तपित्तप्रसादनं ।
पौष्करं स्वादु विष्टम्भि बल्यं कफकरं गुरु ॥
कफानिलहरं तीक्ष्णं स्निग्धं संग्राहि दीपनं ।
कटुतिक्तकषायोष्णं बालं विल्वमुदाहृतं ॥
तदेव विद्यात्सम्पक्वं मधुरानुरसं गुरु ।
विदाहि विष्टम्भकरं दोषकृत् पूतिमारुतं ॥
विम्बीफलं साम्बकर्षं स्तन्यकृत् कफपित्तजित् ।
तृड्दाहज्वरपित्तासृक्कासश्वासक्षयापहं ॥
तालनारिकेलपनसमोचप्रभृतीनि ॥
स्वादुपाकरसान्याऊर्व्वातपित्तहराणि च ॥
बलप्रदानि स्निग्धानि बृंहणानि हिमानि च ॥

फलं स्वादुरसं तेषां तालजं गुरु पित्तजित् ।
तद्बीजं स्वादुपाकञ्च मूत्रलं वातपित्तजित् ॥
नारिकेलं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलं ।
बलमांसप्रदं हृद्यं बृंहणं वस्तिशोधनं ॥
पनसं सकषायन्तु स्निग्धं स्वादुरसं गुरु ।
मोचं स्वादुरसं प्रोक्तं कषायं नातिशीतलं ॥
रक्तपित्तहरं वृष्यं रुच्यं श्लेष्मकरं गुरु ॥

द्राक्षाकाश्मर्य्यमधूकपुष्पखर्जूरप्रभृतीनि ॥

रक्तपित्तहराण्याहुर्गुरूणि मधुराणि च ।
तेषां द्राक्षा सरा स्वर्य्या मधुरा स्निग्धशीतला ॥
रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा ।
हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनं ॥
केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते ।
क्षतक्षयापहं हृद्यं शीतलं तर्पणं गुरु ॥
रसे पाके च मधुरं खार्जूरं रक्तपित्तजित् ।
बृंहणीयमहृद्यञ्च मधूककुसुमं गुरु ॥
वातपित्तोपशमनं फलं तस्योपदिश्यते ॥

वातामाक्षोडाभिषुकनिचुलपिचुनिकोचकोरुमाणप्रभृतीनि ॥

पित्तश्लेष्महराण्याहुः स्निग्धोष्णानि गुरूणि च ।
बृंहणान्यनिलघ्नानि बल्यानि मधुराणि च ॥
कषायं कफपित्तघ्नं किंचित्तिक्तं रुचिप्रदं ।

हृद्यं सुगन्धि विशदं लवलीफलमुच्यते ॥
वमिरं शीतपाक्यञ्च सारुष्कर निबन्धनं ।
विष्टम्भि दुर्जरं रूचं शीतलं वातकोपनं ॥
विपाके मधुरञ्चापि रक्तपित्तप्रणाशनं ।
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ॥
शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु ।
स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैङ्गुदं ॥
शमीफलं गुरु स्वादु रूचोष्णं केशनाशनं ।
गुरु श्लेष्मातकफलं कफकृन्मधुरं हिमं ॥
करीराचकपीलूनि तृणशून्यफलानि च ।
स्वादुतिक्तकटूष्णानि कफवातहराणि च ॥
तिक्तं पित्तकरं तेषां सरं कटुविपाकि च ।
तीक्ष्णोष्णं कटुकं पीलु सस्नेहं कफवातजित् ॥
आरुष्करं तौवरकं कषायं कटुपाकि च ।
उष्णं कृमिज्वरानाहमेहोदावर्त्तनाशनं ॥
कुष्ठगुल्मोदरार्शोघ्नं कटुपाकि तथैवच ।
करञ्जकिंशुकारिष्टफलं जन्तुप्रमेहनुत् ॥
रूचोष्णं कटुकं पाके लघु वातकफापहं ।
तिक्तमीषद्विषहितं विडङ्गं कृमिनाशनं ॥
अश्णमुष्णं सरं मेध्यं दोषघ्नं शोफकुष्ठनुत् ।
कषायं दीपनं चाम्लं चक्षुष्यं चाभयाफलं ॥

भेदनं लघु रूक्षोष्णं वैस्वर्य्यं क्रिमिनाशनं।
चक्षुष्यं स्वादुपाक्यम्लं कषायं कफपित्तजित्॥
कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहं।
कषायमीषन्मधुरं किञ्चित्पूगफलं सरं॥
जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलं।
कक्कोलकं लवङ्गञ्च तिक्तं कटु कफापहं॥
लघु तृष्णापहं वक्त्रक्लेददौर्गन्ध्यनाशनं।
सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः॥
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः।
लताकस्तूरिका तद्वत् शीता वस्तिविशोधनी॥
पियालमज्जा मधुरो वृष्यः पित्तानिलापहः॥
वैभीतको मदकरः कफमारुतनाशनः।
कषायो मधुरो मज्जा कोलानां पित्तनाशनः।
तृष्णाच्छर्दिनिलघ्नश्च तद्वचामलकस्य च॥
वीजपूरकशम्याकमज्जा कोशाम्रसम्भवः।
स्वादुपाकोऽग्निबलकृत् स्निग्धः पित्तानिलापहः॥
यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं।
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत्॥
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतं।
विल्वादन्यत्र विज्ञेयमामं तद्धिगुणोत्तरं॥
ग्राह्युष्णं दीपनं तद्धि कषायं कटुतिक्तकं।

व्याधितं क्रमिजुष्टञ्च पाकातीतमकालजं ॥
वर्जनीयं फलं सर्व्वमपर्य्यागतमेवच ॥

॥ इतिफलवर्गः ॥

---

॥ शाकान्यत ऊर्द्धं वक्ष्यामः ॥

तत्र पुष्पफलाऽलावुकालिन्दकप्रभृतीनि ॥

पित्तघ्नान्यनिलं कुर्य्युस्तथामन्दकफानि च ।
सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च ॥
पित्तघ्नं तेषु कुष्माण्डं बालं मध्यं कफावहं ।
पक्वं लघूष्णं सक्षारं दीपनं वस्तिशोधनं ॥
सर्व्वदोषहरं हृद्यं पथ्यं चेतोविकारिणां ।
दृष्टिशुक्रक्षयकरं कालिन्दं कफवातकृत् ॥
अलावुर्भिन्नविट्का तु रूक्षा गुर्व्यतिशीतला ।
तिक्तालावुरहृद्या तु वामनी वातपित्तजित् ॥

त्रपुसैर्व्वारुकर्क्कारुकशीर्षटन्तप्रभृतीनि ॥

गुरुविष्टम्भिशीतानि स्वादूनि कफकृन्ति च ॥
सृष्टमूत्रपुरीषाणि सक्षारमधुराणि च ।
बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतं ॥
तत्पाण्डुकफकृज्जीर्णमम्लं वातकफापहं ।
एर्व्वारुकं सकर्क्कारु सम्पक्वं कफवातकृत् ॥
सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलं ।

सक्षारं मधुरञ्चैव शीर्णवृन्तं कफापहं ॥
भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघु ।

पिप्पलीमरिचशृङ्गवेरार्द्रकहिङ्गुजीरककुस्तुम्बुरुजम्बीरकसुमुखसुरसार्जकभूस्तृणसुगन्धककासमर्दककालमालकुठेरकक्षवककखरपुष्पशिग्रुमधुशिग्रुफणिज्झकसर्षपराजिकाकुलाहलवेणुगण्डीरतिलपर्णिकावर्षाभूचित्रकमूलकपोतिकालशुनपलाण्डुकलायप्रभृतीनि ॥

कटून्युष्णानि रुच्यानि वातश्लेष्महराणि च ।
कृतान्नेषूपयुज्यन्ते संस्कारार्थमनेकधा ॥
तेषां गुर्वी स्वादुशीता पिप्पल्यार्द्रा कफावहा ।
शुष्का कफानिलघ्नी सा वृष्या पित्ताविरोधिनी ॥
स्वादुपाक्यार्द्रमरिचं गुरु श्लेष्मप्रसेकि च ।
कटूष्णं लघु तच्छुष्कमवृष्यं कफवातजित् ॥
नात्युष्णं नातिशीतञ्च वीर्य्यतो मरिचं सितं ।
गुणवन्मरिचेभ्यश्च चक्षुष्यञ्च विशेषतः ॥
नागरं कफवातघ्नं विपाके मधुरं कटु ।
वृष्योष्णं रोचनं हृद्यं सस्नेहं लघु दीपनं ॥
कफानिलहरं स्वर्य्यं विबन्धानाहशूलनुत् ।
कटूष्णं रोचनं हृद्यं वृष्यं चैवार्द्रकं स्मृतं ॥
लघूष्णं पाचनं हिङ्गु दीपनं कफवातजित् ।
कटु स्निग्धं सरं तीक्ष्णं शूलाजीर्णविबन्धनुत् ॥
तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्द्धनं ।

कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयं ॥
कारवी करवी तद्वद्विज्ञेया सोपकुञ्चिका ।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता ॥
आर्द्रा कुस्तुम्बरी कुर्य्यात् स्वादुसौगन्ध्यहृद्यतां ।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशनी ॥
दोषघ्नी कटुका किञ्चित्तिक्ता स्रोतोविशोधनी ।
जम्बीरः पाचनस्तीक्ष्णः कृमिवातकफापहः ॥
सुरभिर्दीपनो रुच्यो मुखवैशद्यकारकः ॥
कफानिलविषश्वासकासदौर्गन्ध्यनाशनः ।
पित्तकृत्पार्श्वशूलघ्नः सुरसः समुदाहृतः ॥
तद्वत्तु सुमुखो ज्ञेयो विशेषाद्गरनाशनः ।
कफघ्ना लघवो रूक्षा स्निग्धोष्णाः पित्तवर्द्धनाः ॥
कटुपाकरसाश्चैव सुरसार्जकभूस्तृणाः ।
मधुरः कफवातघ्नः पाचनः कण्ठशोधनः ॥
विशेषतः पित्तहरः सतिक्तः कासमर्दकः ।
कटुः सक्षारमधुरः शिग्रुस्तिक्तोऽथ पित्तलः ॥
मधुशिग्रुः सरस्तिक्तः शोफघ्नो दीपनः कटुः ।
विदाहि बद्धविण्मूत्रं रूक्षं तीक्ष्णोष्णमेव च ॥
त्रिदोषं सार्षपं शाकं गाण्डीरं वेगनाम च ।
चित्रकस्तिलपर्णी च कफशोफहरे लघू ॥
वर्षाभूः कफवातघ्नो हिता शोफोदरार्शसां ।

कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी ॥
सर्व्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका ।
महत्तद्गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् ॥
तदेव स्निग्धसिद्धन्तु पित्तनुत् कफवातजित् ।
त्रिदोषशमनं शुष्कं विषदोषहरं लघु ॥
विष्टम्भि वातलं शाकं शुष्कमन्यत्र मूलकात् ॥

पुष्पञ्च पत्रञ्च फलं तथैव यथोत्तरं ते लघवः प्रदिष्टाः ।
तेषान्तु पुष्पं कफपित्तहन्तृ फलं निहन्यात् कफमारुतौ च ॥
स्निग्धोष्णतीक्ष्णः कटुपिच्छिलश्च गुरुः सरः स्वादुरसश्च बल्यः ॥
वृष्यश्च मेधास्वरवर्णचक्षुर्भग्नास्थिसन्धानकरो रसोनः ।
हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिकासशोफान् ॥
दुर्नामकुष्ठानलसादजन्तुसमीरणश्वासकफांश्च हन्ति ।
नात्युष्णवीर्य्योऽनिलहा कटुश्च तीक्ष्णो गुरुर्नातिकफावहश्च ॥
बलावहः पित्तकरोऽथ किञ्चित् पलाण्डुरग्निञ्च विवर्द्धयेच्च ॥
स्निग्धो रुचिस्थः स्थिरधातुकर्त्ता बल्योऽथ मेधाकफपुष्टिदश्च ।
स्वादुर्गुरुः शोणितपित्तशस्तः स पिच्छिलः चीरपलाण्डुरुक्तः ॥

कलायशाकं पित्तघ्नं कफघ्नं वातलं गुरु ।
कषायानुरसञ्चैव विपाके मधुरञ्च तत् ॥

चुच्चूपूयिकातरुणीजीवन्तीविम्बीतिकानन्दीभल्लातकच्छगलान्त्री वृत्तादनीफञ्जीशाल्मलीशेलुवनस्पतिप्रसवशणकर्व्वुदारकोविदारप्रभृतीनि ॥

कषायस्वादुतिक्तानि रक्तपित्तहराणि च।
कफघ्नान्यनिलं कुर्य्युः संग्राहीणि लघूनि च॥
लघुः पाकेच जन्तुघ्नः पिच्छिलो व्रणिनां हितः।
कषायमधुरो ग्राही चुचूस्तेषां त्रिदोषहा॥
चक्षुष्या सर्व्वदोषघ्नी जीवन्ती समुदाहृता।
हृद्यादनी वातहरा फञ्जी लध्वग्निला मता॥
क्षीरवृक्षोत्पलादीनां कषायाः पल्लवाः स्मृताः।
शीताः संग्राहिणः शस्ता रक्तपित्तातिसारिणां॥
पुनर्नवावरुणतर्कार्य्युरुवूकवत्सादनीविल्वशाकप्रभृतीनि।
उष्णानि स्वादुतिक्तानि वातप्रशमनानि च।
तेषु पौनर्नवं शाकं विशेषाच्छोफनाशनं॥
तण्डुलीयकोपोदिकाऽश्ववलाचिल्लीपालङ्क्यावास्तूकप्रभृतीनि॥
सृष्टमूत्रपुरीषाणि सक्षारमधुराणि च।
मन्दवातकफान्याहुरक्तपित्तहराणि च॥
मधुरो रसपाकाभ्यां रक्तपित्तमदापहः।
तेषां शीततमो रूक्षस्तण्डुलीयो विषापहः॥
स्वादुपाकरसा वृष्या वातपित्तमदापहा।
उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा॥
कटुर्विपाके कृमिहा मेधाग्निबलवर्द्धनः॥
सक्षारः सर्व्वदोषघ्नो वास्तूको रोचकः सरः।
चिल्ली वास्तुकवत् ज्ञेया पालङ्क्या तण्डुलीयवत्॥

वातकृत् बद्धविण्मूत्रा रूक्षा पित्तकफे हिता।
शाकमाम्लबलं रूक्षं बद्धविण्मूत्रमारुतं॥

मण्डूकपर्णीसप्तलासुनिषण्णकसुवर्चलाब्रह्मसुवर्चलापिप्पलीगुडूची गोजिह्वाकाकमाचीप्रपुन्नाडावल्गुजसतीनबृहतीकण्टकारिकाफल पटोलवार्त्ताकुकारवेल्लककटुकिकाकेबुकोरुबूकपर्प्पटककिराततिक्त कर्कोटकारिष्टकोशातकीवेत्रकरीराटरूषकार्कपुष्पीप्रभृतीनि।

रक्तपित्तहराण्याऊर्द्ध्यानि सुलघूनि च।
कुष्ठमेहज्वरश्वासकासारुचिहराणि च॥
कषायातु हिता पित्ते स्वादुपाकरसा हिमा।
लघ्वी मण्डूकपर्णीतु तद्वद्गोजिह्विका मता॥
अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः।
अवल्गुजः कटुः पाके तिक्तः पित्तकफापहः॥
ईषत्तिक्तं त्रिदोषघ्नं शाकं कटु सतीनजं।
नात्युष्णशीतं कुष्ठघ्नं काकमाच्यास्तु तद्विधं॥
कण्डुकुष्ठकृमिघ्नानि कफवातहराणि च॥
फलानि बृहतीनान्तु कटुतिक्तलघूनि च।
कफपित्तहरं व्रणमुष्णं तिक्तमवातलं॥
पटोलं कटुकं पाके वृष्यं रोचनदीपनं।
कफवातहरं तिक्तं रोचनं कटुकं लघु॥
वार्त्ताकं दीपनं प्रोक्तं जीर्णं सक्षारपित्तलं।

तद्वत्कर्कोटकं प्रोक्तं कारवेल्लकमेव च।
अटरूषकवेत्राग्रगुडूचीनिम्बपर्पटाः॥
किराततिक्तसहितास्तिक्ताः पित्तकफापहाः।
कफापहं शाकमुक्तं वरुणप्रपुनाडयोः॥
रूक्षं लघु च शीतञ्च वातपित्तप्रकोपणं।
दीपनं कालशाकन्तु गरदोषहरं कटु॥
कौसुम्भं मधुरं रूक्षमुष्णं श्लेष्महरं लघु।
वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत्॥
ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी॥

लोणिकाजातुकपर्णिकापत्तूरजीवकसुवर्चलाकुरुवककठिञ्जरकुन्तलिकाकुरण्टिकाप्रभृतीनि॥

स्वादुपाकरसाः शीताः कफघ्ना नातिपित्तलाः।
लवणानुरसा रूक्षाः सक्षारा वातलाः सराः॥
स्वादुतिक्ता कुन्तलिका सकषाया कुरण्टिका।
संग्राहि शीतलञ्चापि लघु दोषाविरोधि च॥
राजक्षवकशाकन्तु सटीशाकन्तु तद्विधं।
स्वादु पाकरसं शाकं दुर्जरं हरिमन्थजं॥
भेदनं मधुरं रूक्षं कलायमतिवातलं।
खंषनं कटुकं पाके लघुवातकफापहं॥

श्रीफलमुष्णवीर्य्यन्तु पत्रं पूतिकरञ्जजं।
ताम्बूलपत्रं तीक्ष्णोष्णं कटु पित्तप्रकोपणं ॥
सुगन्धि विशदं तिक्तं स्वर्य्यं वातकफापहं।
स्रंसनं कटुकं पाके कषायं वह्निदीपनं।
वक्त्रकण्डूमलक्लेददौर्गन्ध्यादिविशोधनं ॥

॥ अथ पुष्पवर्गः ॥

कोविदारशणशाल्मलीपुष्पाणि मधुराणि मधुरविपाकानि रक्तपित्तहराणि च ॥ वृषागस्त्ययोः पुष्पाणि तिक्तानि कटुविपाकानि क्षयकासापहानि ॥ मधुशिग्रुकरीरकुसुमानि कटुविपाकानि वातहराणि सृष्टमूत्रपुरीषाणि च।

आगस्त्यं नातिशीतोष्णं नक्तान्धानां प्रशस्यते।
रक्तवृक्षस्य निम्बस्य मुष्ककार्कासनस्य च ॥
कफपित्तहरं पुष्पं कुष्ठघ्नं कुटजस्य च।
सतिक्तं मधुरं शीतं पद्मं पित्तकफापहं ॥
मधुरं पिच्छिलं स्निग्धं कुमुदं ह्लादि शीतलं।
तस्मादल्पान्तरगुणे विद्यात्कुवलयोत्पले ॥
सिन्दुवारं विजानीयाद्धितं पित्तविनाशनं।
मालतीमल्लिके तिक्ते सौरभ्यात्पित्तनाशने ॥
सुगन्धि विशदं हृद्यं वाकुलं पाटलानि च।
श्लेष्मपित्तविषघ्नन्तु नागं तद्वच्च कुङ्कुमं।
चम्पकं रक्तपित्तघ्नं शीतोष्णं कफनाशनं ॥

किंशुकं कफपित्तघ्नं तद्वदेव कुरण्टकं ।
यथावृत्तं विजानीयात्पुष्पं वृक्षोचितं तथा ॥
मधुशिग्रुकरीराणि कटुश्लेष्महराणि च ॥

चवककुलेचरवंशकरीरप्रभृतीनि कफहराणि सृष्टमूत्रपुरीषाणि ॥

चवकं क्रमिलं तेषु स्वादुपाकं सपिच्छिलं ।
विस्यन्दि वातलं नाति पित्तश्लेष्मकरञ्च तत् ॥
वेणोः करीराः कफला मधुरा रसपाकतः ।
विदाहिनो वातकराः सकषाया विरूक्षणाः ॥

उद्भिदानि पलालेक्षुकरीषवेणुक्षितिजानि ॥ तत्र पलालजातं मधुरं मधुरविपाकं रूक्षं दोषप्रशमनञ्च । इक्षुजं मधुरं कषायानुरसं कटुकं शीतलञ्च ॥ तद्वदेवोष्णं कारीषं कषायं वातकोपनञ्च ॥ वेणुजातं कषायं वातकोपनञ्च ॥ भूमिजं गुरु नातिवातलं भूमितश्चास्यानुरसः ॥

पिण्याकतिलकल्कस्थूणिकाशुष्कशाकानि सर्व्वदोषप्रकोपणानि ॥

विष्टम्भिनः स्मृताः सर्व्वे वटका वातकोपनाः ।
सिण्डाकी वातला सान्द्रा रुचिष्यानलदीपनी ॥
विड्भेदि गुरु रूक्षञ्च प्रायोविष्टम्भि दुर्जरं ।
सकषायञ्च सर्व्वं हि स्वादु शाकमुदाहृतं ॥
पुष्पं पत्रं फलं नालं कन्दाश्च गुरवः क्रमात् ।
कर्कशं परिजीर्णञ्च क्रमिजुष्टमदेशजं ॥
वर्जयेत्पत्रशाकन्तत् यदकालविरोहि च ।

॥ कन्दानत ऊर्द्धं वक्ष्यामः ॥

विदारीकन्दशतावरीविसमृणालशृङ्गाटककशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि ॥

रक्तपित्तहराण्याहुः शीतानि मधुराणि च ।
गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च ॥
मधुरो बृंहणो वृष्यः शीतः स्वर्य्योऽतिमूत्रलः ।
विदारीकन्दो बल्यस्तु पित्तवातहरस्तु सः ॥
वातपित्तहरी वृष्या स्वादुतिक्ता शतावरी ।
महती चैव हृद्या च मेधाग्निबलवर्द्धिनी ॥
ग्रहण्यर्शोविकारघ्नी वृष्या शीता रसायनी ।
कफपित्तहरास्तिक्तास्तस्या एवाङ्कुराः स्मृताः ॥
अविदाहि विसम्प्रोक्तं रक्तपित्तप्रसादनं ।
विष्टम्भि दुर्ज्जरं रूक्षं विरसं मारुतावहं ॥
गुरुविष्टम्भिशीतौ च शृङ्गाटककशेरुकौ ।
पिण्डालुकं कफकरं गुरु वातप्रकोपणं ॥
सुरेन्द्रकन्दः श्लेष्मघ्नो विपाके कटुपित्तकृत् ।
वेणोः करीरा गुरवः कफमारुतकोपनाः ॥

स्थूलसूरणमाणकप्रभृतयः कन्दा ईषत्कषायाः कटुका रूक्षा विष्टम्भिनो गुरवः कफवातलाः पित्तहराश्च ॥

माणकं स्वादु शीतञ्च गुरुचापि प्रकीर्त्तितं ।

स्थूलकन्दस्तु नात्युष्णः सूरणो गुदकीलहा ॥
कुमुदोत्पलपद्मानां कन्दा मारुतकोपनाः ।
कषायाः पित्तशमना विपाके मधुरा हिमाः ॥
वाराहकन्दः श्लेष्मघ्नः कटुको रसपाकतः ।
मेहकुष्ठक्रिमिहरो बल्यो वृष्यो रसायनः ॥
तालनालिकेरखर्जूरप्रभृतीनां मस्तकमज्जानः ।
स्वादुपाकरसानाहूरक्तपित्तहरांस्तथा॥
शुक्रलानानिलघ्नांश्च कफवृद्धिकरानपि ।
बालं ह्यनार्त्तवं जीर्णं व्याधितं क्रिमिभक्षितं ॥
कन्दं विवर्ज्जयेत् सर्व्वं यो वा सम्यक् न रोहति ॥

॥ अथ लवणवर्गः ॥

सैन्धवसामुद्रविडसौवर्चलरोमकौद्भिदप्रभृतीनि लवणानि यथो त्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्व्वं स्निग्धानि स्वादूनि सृष्टमूत्रपुरीषाणि चेति ॥

चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनं ।
स्निग्धं समधुरं वृष्यं शीतं दोषघ्नमुत्तमं ॥
सामुद्रं मधुरं पाके नात्युष्णमविदाहि च ।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलं ॥
सक्षारं दीपनं सूक्ष्मं शूलहृद्रोगनाशनं ।
रोचनं तीक्ष्णमुष्णञ्च विडं वातानुलोमनं ॥
लघु सौवर्चलं पाके वीर्य्योष्णं विशदं कटु ।

गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनं ॥
रोमकं तीक्ष्णमत्युष्णं व्यवायि कटुपाकि च ।
वातघ्नं लघु विष्यन्दि सूक्ष्मं विड्भेदि मूत्रलं ॥
लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनं ।
सतिक्तं कटु सक्षारं विद्याल्लवणमौद्भिदं ॥
कफवातक्रिमिहरं लेखनं पित्तकोपनं ।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयं ॥
ऊषसूतं वालुकेलं शैलमूलाकरोद्भवं ।
लवणं कटुकं क्लेदि विहितं कटु चोच्यते ॥
यवक्षारस्वर्जिकाक्षारपाकिमटङ्कणक्षाराः ।
गुल्मार्शोग्रहणीदोषशर्कराश्मरिनाशनाः ॥
क्षारास्तु पाचनाः सर्व्वे रक्तपित्तकराः स्मृताः ॥
शैयौ वह्निसमौ क्षारौ स्वर्जिकायावशूकजौ ।
शुक्रश्लेष्मविबन्धार्शोगुल्मप्लीहविनाशनौ ॥
उष्णोऽनिलघ्नः प्रक्लेदी ऊषक्षारो बलापहः ।
मेदोघ्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः ॥
विरूक्षणोऽनिलकरः श्लेष्मघ्नः पित्तदूषणः ।
अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते ॥
सुवर्णं स्वादु हृद्यञ्च बृंहणीयं रसायनं ।
दोषत्रयघ्नं शीतञ्च चक्षुष्यं विषसूदनं ॥
रूप्यमम्लं सरं शीतं सस्नेहं पित्तवातनुत् ।

ताम्रं कषायं मधुरं लेखनं शीतलं सरं ॥
तिक्तं कांस्यं लेखनञ्च चक्षुष्यं कफवातजित्।
वातकृत् शीतलं लोहं तृष्णापित्तकफप्रनुत् ॥
कटुक्रिमिघ्ने लवणे त्रपुसीसे विलेखने ।
मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादयः ॥
चक्षुष्या मणयः शीता लेखना विषसूदनाः ।
पवित्रा धारणायाश्च पाप्मालक्ष्मीमलापहाः ॥
धान्येषु मांसेषु फलेषु चैव शाकेषु चानुक्तमिहाप्रमेयात् ।
आस्वादतो भूतगुणैश्च मत्वा तदादिशेद्द्रव्यमनल्पबुद्धिः ॥
षष्टिका यवगोधूमा लोहिता ये च शालयः।
मुद्गाढकीमसूराश्च धान्येषु प्रवराः स्मृताः ॥
लावतित्तिरिसारङ्गकुरङ्गैणकपिञ्जलाः ।
मयूरवर्म्मिकूर्माश्च श्रेष्ठा मांसगणेष्विह ॥
दाडिमामलकं द्राक्षा खर्जूरं सपरूषकं ।
राजादनं मातुलुङ्गं फलवर्गे प्रशस्यते ॥
सतीनो वास्तुकश्चुचूचिल्लीमूलकपोतिकाः ।
मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते ॥
गव्यं क्षीरं घृतं श्रेष्ठं सैन्धवं लवणेषु च।
धात्री दाडिममम्लेषु पिप्पली नागरं कटौ ॥
तिक्ते पटोलवार्त्ताके मधुरे घृतमुच्यते ।
क्षौद्रं पूगफलं श्रेष्ठं कषाये सपरूषकं ॥

शर्करेक्षुविकारेषु पाने मध्वासवौ तथा ॥
परिसंवत्सरं धान्यं मांसं वयसि मध्यमे।
अपर्य्युषितमन्नन्तु संस्कृतं मात्रया शुभं ॥
फलं पर्य्यागतं शाकमशुष्कं तरुणं नवं।
अतः परं प्रवक्ष्यामि कृतान्नगुणविस्तरं ॥
लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः।
वातानुलोमनो हृद्यः पिप्पलीनागरायुतः ॥
स्वेदाग्निजननी लघ्वी दीपनी वस्तिशोधनी।
क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी ॥
विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी।
पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा ॥
हृद्या सन्तर्पणी वृष्या बृंहणी बलवर्द्धनी।
शाकमांसफलैर्युक्ता यवाग्व्यस्ताश्च दुर्जराः ॥
सिक्थैर्व्विरहितो मण्डः पेया सिक्थसमन्विता ॥
विलेपी बहुसिक्था स्याद्यवागूर्व्विरलद्रवा।
विष्टम्भी पायसो बल्यो मेदःकफकरो गुरुः ॥
कफपित्तकरी बल्या कृशराऽनिलनाशनी।
धौतस्तु विमलः शुद्धो मनोज्ञः सुरभिः समः ॥
स्विन्नः सुप्रस्रुतस्त्वुष्णो विशदस्त्वोदनो लघुः।
अधौतोऽप्रस्रुतोऽस्विन्नः शीतश्चाप्योदनो गुरुः ॥
लघुः सुगन्धिः कफहा विज्ञेयो भृष्टतण्डुलः।

स्नेहैर्मांसैः फलैः कन्दैर्वैदलाम्लैश्च संयुताः ॥
गुरवो बृंहणा बल्या ये च क्षीरोपसाधिताः।
सुस्विन्नो निस्तुषो भृष्ट ईषत्सूपो लघुर्हितः ॥
स्विन्नं निःपीडितं शाकं हितं स्यात् स्नेहसंस्कृतं।
अस्विन्नं स्नेहरहितमपीडितमतोऽन्यथा ॥
मांसं स्वभावतो वृष्यं स्नेहनं बलवर्द्धनं।
स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह ॥
सिद्धं मांसं हितं बल्यं रोचनं बृंहणं गुरु।
तदेव गोरसादानं सुरभिद्रव्यसंस्कृतं ॥
विद्यात्पित्तकफोद्रेकि बलमांसाग्निवर्द्धनं।
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ॥
रोचनं बलमेधाग्निमांसौजःशुक्रवर्द्धनं।
तदेवोल्लुप्तपिष्टत्वादुल्लुप्तमिति पाचकाः ॥
परिशुष्कगुणैर्युक्तं वह्नेः पक्वमतो लघु।
तदेव शूलिकाप्रोतमङ्गारे परिपाचितं ॥
ज्ञेयं गुरुतरं किञ्चित्प्रदिग्धं गुरुपाकतः।
उल्लुप्तं भर्जितं पिष्टं प्रतप्तं कन्दुपाचितं ॥
परिशुष्कं प्रदग्धञ्च शूल्यं यच्चान्यदीदृशं।
मांसं यत्तैलसिद्धन्तु वीर्य्योष्णं पित्तकृद्गुरु ॥
लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनं।
अनुष्णवीर्य्यं पित्तघ्नं मनोज्ञं घृतसाधितं ॥

प्रीणनः प्राणजननः श्वासकासक्षयापहः ।
वातपित्तश्रमहरो हृद्यो मांसरसः स्मृतः ॥
स्मृत्योजःस्वरहीनानां ज्वरक्षीणक्षतोरसां ।
भग्नविश्लिष्टसन्धीनां कृशानामल्परेतसां ॥
आप्यायनः संहननः शुक्रौजोबलवर्द्धनः ।
सदाडिमयुतो हृद्यः संस्कृतो दोषनाशनः ॥
यन्मांसमुद्धृतरसं न तत्पुष्टिबलावहं ।
विष्टम्भि दुर्जरं रूक्षं विरसं मारुतावहं ॥
दीप्ताग्नीनां सदा पथ्यः खानिष्कस्तु परं गुरुः ।
मांसं निरस्थि सुस्विन्नं पुनर्दृषदि चूर्णितं ॥
पिप्पलीशुण्ठिमरिचगुडसर्पिःसमन्वितं ।
एकध्यं पाचयेत्सम्यक् वेसवार इति स्मृतः ॥
वेसवारो गुरुः स्निग्धो बल्यो वातरुजापहः ।
प्रीणनः सर्व्वधातूनां विशेषान्मुखशोषिणां ॥
क्षुत्तृष्णापहरः श्रेष्ठः सौरावः स्वादुशीतलः ।
कफघ्नो दीपनो हृद्यः शुद्धानां प्राणिनामपि ॥
ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाडिममृद्वीकायुक्तः स्याद्रागषाडवः ॥
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत् ।
मसूरमुद्गगोधूमकुलत्थलवणैः कृतः ॥
कफपित्ताविरोधी स्याद्वातव्याधौ च शस्यते ।

मृद्वीकादाडिमैर्युक्तः स एवोक्तोऽनिलार्दिते ॥
रोचनो दीपनो हृद्यो लघुपाक्युपदिश्यते ।
पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ ॥
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ ।
श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ॥
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ।
कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः ॥
तूणीप्रतूणीकाशोंगुल्मोदावर्त्तनाशनः ।
दाडिमामलकैर्यूषो हृद्यः संशमनो लघुः ॥
प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् ।
मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः ॥
यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः ।
सर्व्वधान्यकृतस्तद्वद्बृंहणः प्राणवर्द्धनः ॥
खलकाम्बलिकौ हृद्यौ तथा वातकफे हितौ ।
बल्यः कफानिलौ हन्ति दाडिमाम्लोऽग्निदीपनः ॥
दध्यम्लः कफकृद्बल्यः स्निग्धो वातहरो गुरुः ।
तक्राम्लः पित्तकृत्प्रोक्तो विषरक्तप्रदूषणः ।
खडाः खडयवाग्वश्च षाडवाः पानकानि च ।
एवमादीनि चान्यानि क्रियन्ते वैद्यवाक्यतः ॥
अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना ।
विज्ञेयं लवणस्नेहकटुकैः संयुतं कृतं ॥

अथ गोरसधान्याम्लफलाद्यैरन्वितञ्च यत् ॥
यथोत्तरं लघु हितं संस्कृतासंस्कृतं रसे।
दधिमस्त्वम्लसिद्धस्तु यूषः काम्बलिकः स्मृतः ॥
तिलपिण्याकविकृतिः शुष्कशाकं विरूढकं।
शिण्डाकी च गुरूणि स्युः कफपित्तकराणि च।
तद्वच्च वटकान्याहुर्विदाहीनि गुरूणि च।
लघवो बृंहणा वृष्या हृद्या रोचनदीपनाः ॥
तृष्णामूर्च्छाभ्रमच्छर्दिश्रमघ्ना रागषाडवाः।
रसाला बृंहणी बल्या स्निग्धा वृष्या च रोचनी ॥
स्नेहनं गुडसंयुक्तं हृद्यं दध्यनिलापहं।
सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः ॥
नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते।
मन्थः सद्योबलकरः पिपासाश्रमनाशनः ॥
साम्लस्नेहगुडो मूत्रकृच्छ्रोदावर्त्तनाशनः।
शर्करेक्षुरसद्राक्षायुक्तः पित्तविकारनुत् ॥
द्राक्षामधूकसंयुक्तः कफरोगनिवर्हणः।
वर्गत्रयेणोपहितो मलदोषानुलोमनः ॥
गौडमम्लमनम्लं वा पानकं गुरु मूत्रलं।
तदेव खण्डमृद्वीकाशर्करासहितं पुनः ॥
साम्लं सुतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययं।
मार्द्वीकं तु श्रमहरं मूर्च्छादाहतृषापहं ॥

परूषकाणां कोलानां हृद्यं विष्टम्भि पानकं।
द्रव्यसंयोगसंस्कारं ज्ञात्वा मात्राश्च सर्व्वतः ॥
पानकानां यथायोगं गुरुलाघवमादिशेत्।
॥ इतिकृतान्नवर्गः ॥

वक्ष्याम्यतः परं भक्ष्यान् रसवीर्य्यविपाकतः ॥
भक्ष्याः क्षीरकृता बल्या वृष्या हृद्याः सुगन्धिनः।
अदाहिनः पुष्टिकरा दीपनाः पित्तनाशनाः ॥
तेषां प्राणकरा हृद्या घृतपूराः कफावहाः।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः ॥
बृंहणा गौडिका भक्ष्या गुरवोऽनिलनाशनाः।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः ॥
मधुमस्तकसंयावाः पूपा ह्येते विशेषतः।
गुरवो बृंहणाश्चैव मोदकास्तु सुदुर्जराः ॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः।
गुरुर्म्मृष्टतमश्चैव सट्टकः प्राणवर्द्धनः ॥
हृद्यः सुगन्धिर्म्मधुरः स्निग्धः कफकरो गुरुः।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
बृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु समिताः।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
मुद्गादिवेसवाराणां पूर्णा विष्टम्भिनो मताः।
वेसवारैः सपिशितैः सम्पूर्णा गुरुबृंहणाः ॥

पालला: श्लेष्मजनना: शष्कुल्य: कफपित्तला: ।
वीर्य्योष्णा: पैष्टिका भक्ष्या: कफपित्तप्रकोपणा: ॥
विदाहिनो नातिबला गुरवश्च विशेषत: ।
वैदला लघवो भक्ष्या कषाया: सृष्टमारुता: ॥
विष्टम्भिन: पित्तसमा: श्लेष्मघ्ना भिन्नवर्चस: ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिता: ॥
कूर्चिकाविकृता भक्ष्या गुरवो नातिपित्तला: ।
विरूढककृता भक्ष्या गुरवो ऽनिलपित्तला: ॥
विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणा: ।
हृद्या सुगन्धिनो वृष्या लघवो घृतपाचिता: ॥
वातपित्तहरा बल्या वर्णदृष्टिप्रसादना: ।
विदाहिनस्तैलकृता गुरव: कटुपाकिन: ॥
उष्णा मारुतदृष्टिघ्ना: पित्तलास्त्वक्प्रदूषणा: ।
फलमांसेक्षुविकृतितिलमाषोपसंस्कृता: ॥
भक्ष्या बल्यास्तु गुरवो बृंहणा हृदयप्रिया: ।
कपालाङ्गारपकास्तु लघवो वातकोपना: ॥
सुपक्वास्तनवश्चापि भूयिष्ठं लघवो मता: ।
सकिलाटादयो भक्ष्या गुरव: कफवर्द्धना: ॥
कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चस: ।
उदावर्त्तहरो वाट्य: कासपीनसमेहनुत् ।
धानोलुम्बास्तु लघव: कफमेदोविशोषणा: ॥

सक्तवो बृंहणा वृष्यास्तृष्णापित्तकफापहाः ।
पीताः सद्यो बलकरा भेदिनः पवनापहाः ॥
गुर्वी पिण्डी खरात्यर्थं लघ्वी सैव विपर्य्ययात् ॥
सक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ।
लाजाश्छर्द्यतिसारघ्ना दीपनाः कफनाशनाः ॥
बल्याः कषायमधुरा लघवस्तृष्णमलापहाः ।
तृट्छर्दिदाहघर्म्मार्त्तिनुदस्तत्सक्तवो मताः ॥
रक्तपित्तहराश्चैव दाहज्वरविनाशनाः ॥
पृथुका गुरवः स्निग्धा बृंहणाः कफवर्द्धनाः ।
बल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्चसः ॥
सुदुर्जरः स्वादुरसो बृंहणस्तण्डुलो नवः ॥
सन्धानकृन्मेहहरः पुराणस्तण्डुलः स्मृतः ॥
द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु ।
यदा कारणमासाद्य भोक्तॄणां छन्दतोऽपि वा ॥
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान्विनिर्दिशेत् ॥
॥ अतः सर्व्वाण्यनुपानान्युपदेक्ष्यामः ॥

अम्लेन केचिद्विहता मनुष्या माधुर्य्ययोगे प्रणयीभवन्ति ।
तथाम्लयोगे मधुरेण तृप्तास्तेषां यथेष्टं प्रवदन्ति पथ्यं ॥
शीतोष्णतोयासवमद्ययूषफलाम्लधान्याम्लपयोरसानां ।
यस्यानुपानन्तु हितं भवेद्यत्तस्मै प्रदेयं त्विह मात्रया तत् ॥
व्याधिञ्च कालञ्च विभाव्य धीरैर्द्रव्याणि भोज्यानि च तानि तानि ।

सर्व्वानुपानेषु वरं वदन्ति मेध्यं यदम्भः शुचिभाजनस्थं ॥
लोकस्य जन्मप्रभृति प्रशस्तं तोयात्मकाः सर्व्वरसाश्च दृष्टाः ।
सङ्क्षेप एषोऽभिहितोऽनुपानेष्वतः परं विस्तरतो विधास्ये ॥

उष्णोदकानुपानन्तु स्नेहानामथ शस्यते ।
ऋते भल्लातकस्नेहात्स्नेहात्तौवरकात्तथा ॥
अनुपानं वदन्त्येके तैले यूषाम्लकाञ्जिके ।
शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्व्वशः ॥
दधिपायसमद्यार्त्तिविषजुष्टे तथैव च ।
केचित् पिष्टमयस्याहुरनुपानं सुखोदकं ॥
पयोमांसरसौ वापि शालिमुद्गादिभोजिनां ॥
युद्धाध्वातपसन्तापविषमद्यरुजासु च ।
माषादेरनुपानन्तु धान्याम्लं दधिमस्तु वा ।
मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितं ॥
अमद्यपानामुदकं फलाम्लं वा प्रशस्यते ।
क्षीरं घर्म्माध्वभाष्यस्त्रीक्लान्तानाममृतोपमं ॥
सुराकृशानां स्थूलानामनुपानं मधूदकं ।
निरामयानां चित्रन्तु भक्तमध्ये प्रकीर्त्तितं ॥
स्निग्धोष्णं मारुते पथ्यं कफे रूक्षोष्णमिष्यते ।
अनुपानं हितं चापि पित्ते मधुरशीतलं ॥
हितं शोणितपित्तिभ्यः क्षीरमिक्षुरसस्तथा ।
अर्कशेलुशिरीषाणामासवास्तु विषार्त्तिषु ॥

अतः परन्तु वर्गाणामनुपानं पृथक् पृथक्।
प्रवक्ष्याम्यानुपूर्व्वेण सर्व्वेषामेव मे शृणु॥

तत्र पूर्व्वशस्यजातीनां वदराम्लंवैदलानां धान्याम्लं जङ्गालानां धन्वजानाञ्च पिप्पल्यासवः। विष्किराणां कोलवदरासवः। प्रतुदाना न्तु चीरवृचासवः। गुहाशयानान्तु खर्जूरनालिकेलासवः । प्रसह नामश्वगन्धासवः । पर्णमृगाणां कृष्णगन्धासवः । विलेशयानां फलसारासवः। एकशफानां त्रिफलासवः। अनेकशफानां खदिरा सवः। कूलचराणान्तु शृङ्गाटककशेरुकासवः। कोशवासिनां पादिना ञ्च तदेव। प्लवानामिचुरसासवः। नादेयानां मृणालासवः। सामु द्राणां मातुलुङ्गासवः। अम्लानां फलानां पद्मोत्पलकन्दासवः। कषा याणां दाडिमवेत्रासवः। मधुराणां त्रिकटुकयुक्तः कन्दासवः। ताल फलादीनां धान्याम्लं। कटुकानां दूर्व्वानलवेत्रासवः । पिप्पल्या दीनां श्वदंष्ट्रावसुकासवः । कुष्माण्डादीनां दार्व्वीकरीरासवः। चुचूप्रभृतीनां लोध्रासवः। जीवन्त्यादीनां त्रिफलासवः। कुसुम्भ शाकस्य सएव। मण्डूकपर्ण्यादीनां महापञ्चमूलासवः। बालम स्तकादीनामम्लफलासवः। सैन्धवादीनां सुरासव आरनालञ्च। तोयं वा सर्व्वंचेति॥

भवन्तिचात्र। सर्व्वेषामनुपानानां माहेन्द्रतोयमुत्तमं।
सात्म्यं यस्य तु यत्तोयं तत्तस्मै हितमुच्यते॥
उष्णं वाते कफे तोयं पित्ते रक्ते च शीतलं।
दोषवद्गुरु वा भुक्तमतिमात्रमथापि वा॥

यथोक्तेनानुपानेन सुखमन्नं प्रजीर्य्यति ।
रोचनं वृंहणं वृष्यं दोषसङ्घातभेदनं ॥
तर्पणं मार्दवकरं श्रमक्लमहरं सुखं ।
दीपनं दोषशमनं पिपासाच्छेदनं परं ॥
बल्यं वर्णकरं सम्यगनुपानं सदोच्यते ।
तदादौ कर्शयेत्पीतं स्थापयेन्मध्यसेवितं ॥
पश्चात्पीतं वृंहयति तस्मादीच्य प्रयोजयेत् ।
स्थिरतां गतमक्लिन्नमन्नमद्रवपायिनां ॥
भवत्याबाधजननमनुपानमतः पिबेत् ।
न पिबेच्छ्वासकासार्त्तो रोगेचाप्यूर्द्ध्वजत्रुगे ॥
चतोरस्कः प्रसेकी च यस्य चोपहतः स्वरः ।
पीत्वाऽध्वभाष्याध्ययनगेयस्वप्नान्न शीलयेत् ॥
प्रदूष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितं ।
स्यन्दाग्निसादच्छर्द्यादीनामयान् जनयेद्बहून् ॥
गुरुलाघवचिन्तेयं स्वभावं नातिवर्त्तते ।
तथा संस्कारमात्रान कालांश्चाण्युत्तरोत्तरं ॥
मन्दकर्म्मानलारोग्याः सुकुमाराः सुखोचिताः ।
जन्तवो ये तु तेषां हि चिन्तेयं परिकीर्त्तिता ॥
बलिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः ।
कर्म्मनित्याश्च ये तेषां नावश्यं परिकीर्त्त्यते ॥

॥ इति सर्व्वानुपानवर्गः ॥

अथाहारविधिं वत्स विस्तरेणाखिलं शृणु ।
आप्तान्वितमसंकीर्णं शुचि कार्य्यं महानसं ॥
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सु संस्कृतं ।
शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥
विषघ्नैरगदैः स्पृष्टं प्रोक्षितं व्यजनोदकैः ।
सिद्धैर्मन्त्रैर्हतविषं सिद्धमन्नं निवेदयेत् ॥
वक्ष्याम्यतः परं कृत्स्नमाहारस्योपकल्पनां ।
घृत कार्ष्णायसे देयं पेया देया तु राजते ॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत् ।
कट्वराणि खडांश्चैव सर्व्वान् शैलेषु दापयेत् ॥
दद्यात्ताम्रमये पात्रे सुशीतं सुशृतं पयः ।
पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्वैदूर्य्यपात्रेषु रागषाडवसट्टकान् ॥
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।

तानि दक्षिणपार्श्वेतु भुञ्जानस्योपकल्पयेत् ॥
सद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खडान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुडविकारांश्च रागषाडवसट्टकान् ।
पुरस्तात् स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनां ।
भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टैरसादिभिः ॥
मनोज्ञं शुचि नात्युष्णं प्रत्ययमशनं हितं ।
पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततः परं ।
घनम्पूर्व्वं समश्नीयात् केचिदाहुर्व्विपर्य्ययं ॥
आदावन्तेच मध्येच भोजनस्य तु शस्यते ।
निरत्ययं दोषहरं फलेष्वामलकं नृणां ॥
मृणालविसशालूककन्देक्षुप्रभृतीनि च ।
पूर्व्वं योज्यानि भिषजा नतु भुक्ते कथञ्चन ॥
सुखमुच्चैः समासीनः समदेहोऽन्नतत्परः ।
काले सात्म्यं लघु स्निग्धं क्षिप्रमुष्णं द्रवोत्तरं ॥

बुभुक्षितोऽन्नमश्नीयान्मात्रावद्विदितागमः ।
काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते ॥
लघु शीघ्रं व्रजेत्पाकं स्निग्धोष्णं बलवह्निदं ।
क्षिप्रं भुक्तं समं पाकं यात्यदोषं द्रवोत्तरं ॥
सुखं जीर्य्यति मात्रावद्धातुसाम्यं करोति च ।
अतीवायतयामास्तु क्षपा येष्वृतुषु स्मृताः ॥
तेषु तत्प्रत्यनीकाढ्यं भुञ्जीत प्रातरेव तु ।
येषु चापि भवेयुश्च दिवसा भृशमायताः ॥
तेषु तत्कालविहितमपराह्णे प्रशस्यते ।
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः ॥
कृत्वा सममहोरात्रं तेषु भुञ्जीत भोजनं ।
नाप्राप्तातीतकालं वा हीनाधिकमथापि वा ॥
अप्राप्तकाले भुञ्जानः शरीरे ह्यलघौ नरः ।
तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति ॥
अतीतकाले भुञ्जानो वायुनोपहतेऽनले ।
कृच्छ्राद्विपच्यते भुक्तं द्वितीयञ्च न काङ्क्षति ॥
हीनमात्रमसन्तोषं करोति च बलक्षयं ॥
आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकं ।
तस्मात्सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्जितं ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनं ॥
विभज्य कालदोषादीन् कालयोरुभयोरपि ।

अशोचं दुष्टमुच्छिष्टं पाषाणतृणलोष्टवत् ॥
द्विष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत् ।
चिरसिद्धं स्थिरं शीतमन्नमुष्णीकृतं पुनः ॥
अशान्तमुपदग्धञ्च तथा स्वादु न लक्ष्यते ।
यद्यत्स्वादुतरं तत्र विदध्यादुत्तरोत्तरं ॥
प्रक्षालयेदद्भिरास्यं भुञ्जानस्य मुहुर्मुहुः ।
विशुद्धरसने तस्मै रोचतेऽन्नमपूर्ववत ॥
स्वादुना तस्य रसनं प्रथमेनापि तर्पितं ।
न तथा स्वादयेदन्यत्तस्मात्प्रक्षाल्यमन्तरा ॥
सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखं ।
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्य्ययं ॥
भुक्ता च यत्प्रार्थयते भूयस्तत्स्वादु भोजनं ।
अशितश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिवेत् ॥
दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः ।
कुर्य्यादनाहृतं तद्धि मुखस्यानिष्टगन्धतां ॥
जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेव तु ।
भुक्तमात्रे कफश्चापि तस्माद्भुक्ते हरेत्कफं ॥
धूमेनापोह्य रूक्षैर्वा कषायकटुतिक्तकैः ।
पूगकक्कोलकर्पूरलवङ्गसुमनःफलैः ॥
कटुतिक्तकषायैर्वा मुखवैशद्यकारकैः ।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः ॥

भुक्त्वा राजवदासीत यावदन्नक्लमो गतः।
ततः पदशतं गत्वा वामपार्श्वे तु संविशेत्॥
शब्दरूपरसान् गन्धान् स्पर्शांश्च मनसः प्रियान्।
भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति॥
शब्दरूपरसस्पर्शगन्धाश्चापि जुगुप्सिताः।
अशुच्यन्नं तथाभुक्तमतिहास्यञ्च वामयेत्॥
शयनं चासनं वापि नेच्छेद्वापि द्रवोत्तरं।
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनं॥
नचैकरससेवायां प्रसज्येत कदाचन।
शाकावरान्नभूयिष्ठमम्लञ्च न समाचरेत्॥
एकैकशः समस्तान् वा नाभ्यश्नीयाद्रसान् सदा।
प्राग्भुक्ते त्वविविक्तेऽग्नौ द्विरन्नं न समाचरेत्॥
पूर्व्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकं।
मात्रागुरुं परिहरेदाहारं द्रव्यतश्च यः॥
पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः।
द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति।
पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरं॥
गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते।
द्रवोत्तरो द्रवश्चापि न मात्रागुरुरिष्यते॥
द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति॥

पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति ।
स्रोतस्यन्नवहे पित्तं पक्तौ वा यस्य तिष्ठति ॥
विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यते ।
शुष्कं विरुद्धं विष्टम्भि वह्निव्यापदमावहेत् ॥
आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥

अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात्स्वप्नविपर्ययाच्च ।
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥
ईर्ष्याभयक्रोधपरिक्षतेन लुब्धेन रुग्दैन्यनिपीडितेन ।
प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति ॥
माधुर्य्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावं ।
किञ्चिद्विपक्कं भृशतोदशूलं विष्टब्धमाबद्धविरुद्धवातं ॥
उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य ।
रसावशेषेण तु सप्रसेकं चतुर्थमेतत्प्रवदन्त्यजीर्णं ॥

मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः ॥
तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितं ।
विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च ॥
वामयेदाशु तं तस्मादुष्णेन लवणाम्बुना ।
कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् ।
लघुकायमतश्चैनं लङ्घनैः समुपाचरेत् ॥

यावन्नप्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥
हिताहितोपसंयुक्तमन्नं समशनं स्मृतं ।
बहु स्तोकमकाले वा विज्ञेयं विषमाशनं ॥
अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते ।
त्रयमेतन्निहन्त्याशु बहून् व्याधीन् करोति वा ॥

अन्नं विदग्धं हि नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति ।
तद्ध्यस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् ॥
विदह्यते यस्य तु भुक्तमात्रे दह्येत हृत्कण्ठगलञ्च यस्य ।
द्राक्षाभयां माक्षिकसम्प्रयुक्तां लीढ्वाभयां वा स सुखं लभेत ॥
भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्बलिनोऽन्नकाले ।
प्रातः स शुण्ठीमभयामशङ्को भुञ्जीत सम्प्राश्य हितं हितार्थी ॥
स्वल्पं यदा दोषविबद्धमामं लीनं न तेजः पथमावृणोति ।
भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति ॥
अत ऊर्द्धं प्रवक्ष्यामि गुणानां कर्म्मविस्तरं ।

कर्म्मभिस्त्वनुमीयन्ते नानाद्रव्याश्रया गुणाः ॥
ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाहजित् ।
उष्णस्तद्विपरीतः स्यात्पाचनश्च विशेषतः ॥
स्नेहमार्दवकृत्स्निग्धो बलवर्णकरस्तथा ।
रूक्षस्तद्विपरीतः स्याद्विशेषात्स्तम्भनः खरः ॥
पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरुः ।
विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः ॥

दाहपाककरस्तीक्ष्णः स्रावणो मृदुरन्यथा ।
सान्द्रोपलेपबलकृद्गुरुस्तर्पणबृंहणः ॥
लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा ।
दशाद्याः कर्म्मतः प्रोक्तास्तेषां कर्म्मविशेषणैः ॥

दशैवान्यान् प्रवक्ष्यामि द्रवादींस्तान्निबोध मे ।
द्रवः प्रक्लेदनः सान्द्रः स्थूलः स्याद्बन्धकारकः ।
श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा ॥
सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः ।
दुर्गन्धो विपरीतोऽस्माद्धृल्लासारुचिकारकः ॥
सरोऽनुलोमनः प्रोक्तो मदो यात्राकरः स्मृतः ।
व्यवायी चाखिलं देहं व्याप्य पाकाय कल्पते ॥
विकाशी विकसन्नेवं धातुबन्धान् विमोचयेत् ।
आशुकारी तथाशुत्वाद्धावत्यम्भसि तैलवत् ॥
सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतःस्वनुसरः स्मृतः ।
गुणा विंशतिरित्येवं यथावत्परिकीर्त्तिताः ।

संप्रवक्ष्याम्यतश्चोर्द्ध्वमाहारगतिनिश्चयं ॥
पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः ।
विपक्वः पञ्चधा सम्यग्गुणान् स्वानभिवर्द्धयेत् ॥
अविदग्धः कफं पित्तं विदग्धः पवनं पुनः ।
सम्यग्विपक्वो निःसार आहारः परिबृंहयेत् ॥
विण्मूत्रमाहारमलः सारः प्रागीरितो रसः ।

स तु व्यानेन विक्षिप्तः सर्व्वान्धातून् प्रतर्पयेत् ॥
कफःपित्तं मलः खेषु खेदः स्यान्नखरोम च ।
नेत्रविट्त्वचुच स्नेहो धातूनां क्रमशो मलाः ॥
दिवाविबुद्धे हृदये जाग्रतः पुण्डरीकवत् ।
अन्नमक्लिन्नधातुत्वादजीर्णे पिहितं निशि ॥
हृदि सन्मीलिते रात्रौ प्रसुप्तस्य विशेषतः ।
क्लिन्नविस्रस्तधातुत्वादजीर्णे न हितं दिवा ॥

इमं विधिं योऽनुमतं महामुनेर्नृपर्षिमुख्यस्य पठेद्धि यत्नतः ।
स भूमिपालाय विधातुमौषधं महात्मनाञ्चार्हति सूरिसत्तमः ॥

इतिश्रीसुश्रुताचार्य्यविरचिते आयुर्व्वेदशास्त्रे सुश्रुते सूत्रस्थानं समाप्तं ॥

# ॥ निदानस्थानं ॥

## ॥ प्रथमाध्यायः ॥

अथातो वातव्याधिनिदानं व्याख्यास्यामः ॥
धन्वन्तरिं धर्म्मभृतां वरिष्ठममृतोद्भवम्।
चरणावुपसंगृह्य सुश्रुतः परिपृच्छति ॥
वायोः प्रकृतिभूतस्य व्यापन्नस्य च कोपनैः।
स्थानं कर्म्मच रोगांश्च वद मे वदतांवर ॥
तस्य तद्वचनं श्रुत्वा प्राब्रवीद्भिषजांवरः।
स्वयम्भूरेष भगवान्वायुरित्यभिशब्दितः ॥
स्वातन्त्र्यान्नित्यभावाच्च सर्व्वगत्वात्तथैव च।
सर्व्वेषामेव सर्व्वात्मा सर्व्वलोकनमस्कृतः ॥
स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणं।
अव्यक्तो व्यक्तकर्म्मा च रूक्षः शीतो लघुः खरः ॥
तिर्य्यग्गो द्विगुणश्चैव रजोबहुल एव च।
अचिन्त्यवीर्य्यो दोषाणां नेता रोगसमूहराट् ॥

आशुकारी मुहुश्चारी पक्वाधानगुदालयः।
देहे विचरतस्तस्य लक्षणानि निबोध मे॥
दोषधात्वग्निसमतां सम्प्राप्तिं विषयेषु च।
क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः॥
यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः।
भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियामयैः॥
प्राणोदानौ समानश्च व्यानश्चापान एव च।
स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणं॥
वायुर्य्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान्।
उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः॥
तेनभाषितगीतादिविशेषोऽभिप्रवर्त्तते।
ऊर्द्ध्वजत्रुगतान् रोगान्करोति च विशेषतः॥
आमपक्वाशयचरः समानो वह्निसङ्गतः।
सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि॥
गुल्माग्निसङ्गातीसारप्रभृतीन्कुरुते गदान्।
कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः॥
स्वेदासृक्स्रावणो वापि पञ्चधा चेष्टयत्यपि।
क्रुद्धश्च कुरुते रोगान्प्रायशः सर्व्वदेहगान्॥
पक्वाधानालयो ऽपानः काले कर्षति चाप्ययम्।

समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ॥
क्रुद्धश्च कुरुते रोगान्घोरान्वस्तिगुदाश्रयान्।
शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः ॥
युगपत्कुपिताश्चापि देहं भिन्द्युरसंशयम्।
अत ऊर्द्ध्वं प्रवक्ष्यामि नानास्थानान्तराश्रितः ॥
बहुशः कुपितो वायुर्व्विकारान्कुरुतेहि यान्।
वायुरामाशये क्रुद्धश्छर्द्यादीन्कुरुते गदान् ॥
मोहं मूर्च्छां पिपासाञ्च हृद्ग्रहं पार्श्ववेदनाम्।
पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति च ॥
कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम्।
श्रोत्रादिष्विन्द्रियवधं कुर्य्यात्क्रुद्धः समीरणः ॥
वैवर्ण्यं स्फुरणं रौक्ष्यं सुप्तिं चुमुचुमायनं।
त्वक्स्थोनिस्तोदनं कुर्य्यात्त्वग्भेदं परिपोटनं ॥
व्रणांश्च रक्तगो ग्रन्थीन्सशूलान्मांससंश्रितः।
तथा मेदःश्रितः कुर्य्याद्ग्रन्थीन्मन्दरुजोऽव्रणान् ॥
कुर्य्यात्सिरागतः शूलं सिराकुञ्चनपूरणम्।
स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा ॥
हन्ति सन्धिगतः सन्धीन् शूलशोफौ करोति च।
अस्थिशोषञ्च भेदञ्च कुर्य्याच्छूलञ्च तत्स्थितः ॥
तथा मज्जगते रुक् न कदाचित्प्रशाम्यति।
अप्रवृत्तिः प्रवृत्तिर्व्वा विकृतिः शुक्रगेऽनिले ॥

हस्तपादशिरोधातूंस्तथा सञ्चरति क्रमात्।
व्याप्नुयादाखिलं देहं वायुः सर्व्वगतो नृणाम्॥
स्तम्भनाक्षेपणस्वापशोफशूलानि सर्व्वगः।
स्थानेष्वेतेषु मिश्रश्च संमिश्राः कुरुते रुजः॥
कुर्य्यादवयवप्राप्तो मारुतस्त्वमितानगदान्।
दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्विते॥
शैत्यशोफगुरुत्वानि तस्मिन्नेव कफावृते।
सूचीभिरिव निस्तोदः स्पर्शद्वेषः प्रसुप्तता॥
शेषाः पित्तविकाराःस्युर्म्मारुते शोणितान्विते।
प्राणे पित्तावृते छर्द्दिर्दाहश्चैवोपजायते॥
दौर्ब्बल्यं सदनं तन्द्रा वैवर्ण्यञ्च कफावृते।
उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः॥
अस्वेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफावृते।
समाने पित्तसंयुक्ते स्वेददाहौष्ण्यमूर्च्छनम्॥
कफाधिकश्च विण्मूत्रं रोमहर्षः कफावृते।
अपाने पित्तसंयुक्ते दाहौष्ण्ये स्यादसृग्दरम्॥
अधःकाये गुरुत्वञ्च तस्मिन्नेव कफावृते।
व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः॥
गुरूणि सर्व्वगात्राणि स्तम्भनं चास्थिपर्व्वणाम्।
लिङ्गं कफावृते व्याने चेष्टास्तम्भस्तथैव च॥
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम्।

शोकाच्च प्रमदामद्यव्यायामैश्चातिपीडनात् ॥
ऋतुसात्म्यविपर्य्यासात्स्नेहादीनाञ्च विभ्रमात्।
अव्यवाये तथा स्थूले वातरक्तं प्रकुप्यति ॥
हस्त्यश्वोष्ट्रैर्गच्छतोऽन्यैश्च वायुः कोपं यातः कारणैः सेवितैः स्वैः।
तीक्ष्णोष्णाम्लक्षारशाकादिभोज्यैः सन्तापाद्यैर्भूयसा सेवितैश्च ॥
क्षिप्रं रक्तं दुष्टिमायाति तच्च वायोर्मार्गं संरुणद्ध्याशु यातः।
क्रुद्धोऽत्यर्थं मार्गरोधात्स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु ॥
तत्सम्पृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तं।
तद्वत्पित्तं दूषितेनासृजाक्तं श्लेष्मा दुष्टो दूषितेनासृजाक्तः ॥
स्पर्शोद्विग्नौ तोदभेदप्रशोषस्वापोपेतौ वातरक्तेन पादौ।
पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोफौ मृदू च ॥
कण्डूमन्तौ श्वेतशीतौ सशोफौ पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते।
सर्व्वैर्दुष्टे शोणिते चापि दोषाः स्वं स्वं रूपं पादयोर्दर्शयन्ति ॥
प्राग्रूपे शिथिलौ स्विन्नौ शीतलौ सविपर्य्ययौ।
वैवर्ण्यतोदसुप्तत्वगुरुत्वौषसमन्वितौ ॥
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि।
आखोर्व्विषमिव क्रुद्धं तद्देहमनुसर्पति ॥
आजानुस्फुटितं यच्च प्रभिन्नं प्रस्रुतञ्च यत्।
उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥
शोणितं तदसाध्यं स्याद्याप्यं संवत्सरोत्थितम्।
यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः ॥

तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः।
मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः॥
सोपतानकसंज्ञो यः पातयत्यन्तरान्तरा।
कफान्वितो भृशंवायुस्तास्वेव यदि तिष्ठति॥
सदण्डवत्स्तम्भयति कृच्छ्रो दण्डापतानकः।
हनुग्रहस्तदात्यर्थं सोऽन्नं कृच्छ्रान्निषेवते॥
धनुस्तुल्यं नमेद्यस्तु स धनुःस्तम्भसंज्ञकः।
अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः॥
स्नायुप्रतानमनिलो यदा क्षिपति वेगवान्।
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन्॥
अभ्यन्तरं धनुरिव यदा नमति मानवः।
तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली॥
बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च।
तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम्॥
कफपित्तान्वितो वायुर्वायुरेवच केवलः।
कुर्य्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम्॥
गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः।
अभिघातनिमित्तश्च न सिध्यत्यपतानकः॥
अधोगमाः सतिर्य्यग्गा धमनीरूर्द्ध्वदेहगाः।
यदा प्रकुपितोऽत्यर्थं मातरिश्वा प्रपद्यते॥
तदान्यतरपक्षस्य सन्धिबन्धान्विमोचयन्।

हन्ति पक्षं तमाहुर्हि पक्षाघातं भिषग्वराः ॥
यस्य कृत्स्नं शरीरार्द्धमकर्म्मण्यमचेतनं ।
ततः पतत्यसून्वापि जहात्यनिलपीडितः ॥
शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संसृष्टमसाध्यं क्षयहेतुकं ॥
वायुरूर्द्धं व्रजेत्स्थानात्कुपितो हृदयं शिरः ।
शङ्खौ च पीडयत्यङ्गान्याक्षिपेन्नमयेच्च सः ॥
निमीलिताक्षो निश्चेष्टः स्तब्धाक्षो वापि कूजति ।
निरुच्छ्वासोऽथ वा कृच्छ्रादुच्छ्वस्यान्नष्टचेतनः ॥
स्वस्थः स्याद्धृदये मुक्ते आवृते च प्रमुह्यति ।
कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रकः ॥
दिवास्वप्नासमस्थानविकृतोर्द्धनिरीक्षणैः ।
मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणा वृतः ॥
गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च ॥
हसतो जृम्भतो भारादिषमाच्छयनादपि ।
शिरोनासौष्ठचिवुकललाटेक्षणसन्धिगः ॥
अर्दयित्वाऽनिलो वक्त्रमर्दितं जनयत्यतः ।
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते ॥
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम् ।
ग्रीवाचिवुकदन्तानां तस्मिन्पार्श्वे तु वेदना ॥

यस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलं॥
वायुरूर्द्ध्वं त्वचि स्वापस्तोदो मन्याहनुग्रहः।
तमर्दितमिति प्राज्ञ्या व्याधिं व्याधिविशारदाः॥
क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः।
न सिध्यत्यर्दितं वाढं त्रिवर्षं वेपनस्य च॥
पार्ष्णिप्रत्यङ्गुलीनान्तु कण्डरा यानिलार्दिता।
सक्थ्नः क्षेपं निगृह्णीयाद्गृध्रसीति हि सा स्मृता॥
तलं प्रत्यङ्गुलीनान्तु कण्डरा बाहुपृष्ठतः।
बाह्वोः कर्म्मक्षयकरी विश्वाचीति हि सा स्मृता॥
वातशोणितजः शोफो जानुमध्ये महारुजः॥
शिरः क्रोष्टुकपूर्व्वन्तु स्थूलं क्रोष्टुकमूर्द्धवत्।
वायुः कट्यां स्थितः सक्थ्नः कण्डरामाक्षिपेद्यदा॥
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्।
प्रक्रामन्वेपते यस्तु खञ्जन्निव च गच्छति॥
कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम्।
न्यस्ते तु विषमे पादे रुजः कुर्य्यात्समीरणः॥
वातकण्टक इत्येष विज्ञेयः खुडकाश्रितः।
पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः॥
विशेषतश्चंक्रमतः पाददाहं तमादिशेत्।
हृष्यतश्चरणौ यस्य भवतश्च प्रसुप्तवत्॥
पादहर्षः स विज्ञेयः कफवातप्रकोपजः।

अंसदेशस्थितो वायुः शोषयित्वांसबन्धनम् ॥
शिराश्चाकुञ्च्य तत्रस्थो जनयत्यवबाहुकम् ।
यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति ॥
शुद्धः श्लेष्मान्वितो वापि वाधिर्य्यं तेन जायते ।
हनुशङ्खशिरोग्रीवं यस्य भिन्दन्निवानिलः ॥
कर्णयोः कुरुते शूलं कर्णशूलं तदुच्यते ।
आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ॥
नरान्करोत्यक्रियकान्मूकमिन्मिणगद्गदान् ॥
अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता ।
भिन्दन्तीव गुदोपस्थं सा तूणीत्युपदिश्यते ॥
गुदोपस्थोत्थिता सैव प्रतिलोमविसर्प्पिणी ।
वेगैः पक्काशयं याति प्रतितूणी तु सा स्मृता ॥
साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् ।
आध्मानमिति जानीयाद्घोरं वातनिरोधजम् ॥
विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलम् ॥
अष्ठीलावद्घनं ग्रन्थिमूर्द्ध्वमायतमुन्नतम् ।
वाताष्ठीलां विजानीयाद्बहिर्मार्गावरोधिनीं ॥
एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीं ।
प्रत्यष्ठीलामितिवदेज्जठरे तिर्य्यगुत्थिताम् ॥

## ॥ द्वितीयोऽध्यायः ॥

### ॥ अथातोऽर्शसां निदानं व्याख्यास्यामः ॥

षडर्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति ॥ तत्रानात्मवतां यथोक्तैः प्रकोपणैर्व्विरुद्धाध्यशनस्त्रीप्रसङ्गो त्कुटकासनपृष्ठयानवेगविधारणादिभिर्व्विशेषैः प्रकुपिता दोषा एकशो द्विशः समस्ताः शोणितसहिता वा यथोक्तं प्रसृताः प्रधान धमनीरनुप्रपद्याऽधोगत्वा गुदमागम्य प्रदूष्य वलीर्मांसप्ररोहान् जनयन्ति विशेषतो मन्दाग्नेस्तथा तृणकाष्ठोपललोष्ट्रवस्त्रादिभिः शीतोदकसंस्पर्शनाद्वा कन्दाः परिवृद्धिमासादयन्ति तान्यर्शांसीत्याचक्षते ॥ तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी सम्वरणी चेति चतुरङ्गुलायताः सर्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः ॥

शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः ।
गजतालुनिभाश्चापि वर्णतः सम्प्रकीर्त्तिताः ॥
रोमान्तेभ्यो यवाध्यर्द्धो गुदौष्ठः परिकीर्त्तितः ॥

प्रथमा तु गुदौष्ठादङ्गुलमात्रे । तेषान्तु भविष्यतां पूर्व्वरूपाण्यन्ने न श्रद्धा कृच्छ्रात्पक्तिरम्लीका सक्थिसदनमाटोपः कार्श्यमुद्गारबाहुल्यमक्ष्णोश्च श्वयथुरन्त्रकूजनं गुदपरिकर्त्तनमाशङ्का पाण्डुरोगग्रहणीदोषशोषाणां कासश्वासौ भ्रमस्तन्द्रानिद्रे न्द्रियदौर्ब्बल्यञ्च जातेष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति ॥

तत्र मारुतात्परिशुष्कारुणवर्णानि विषममध्यानि कदम्बपुष्पतुण्डिकेरीनाडीमुखसूचीमुखाकृतीनि च भवन्ति। तैरुपहतः सशूलं संहतमुपवेश्यते कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्य वेदना गुल्माष्ठीलाप्लीहोदराणि चास्य तन्निमित्तान्येव भवन्ति कृष्णत्वङ्नखनयनरदनवदनमूत्रपुरीषश्च पुरुषो भवति॥

पित्तान्नीलाग्राणि तनूनि विसर्पीणि पीतावभासानि यकृत्प्रकाशानि शुकजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति तैरुपहतः सदाहं सरुधिरमतिसार्य्यते ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति पीतत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति।

श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि वृत्तानि स्निग्धानि पाण्डूनि करीरपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति कण्डूबहुलानि च भवन्ति तैरुपहतः सश्लेष्माणमनल्पं मांसधावनप्रकाशमतिसार्य्यते शोफशीतज्वरारोचकाविपाकशिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति॥

रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढपुरीषप्रपीडितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक्सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति॥ सन्निपातजानि सर्व्वदोषलक्षणयुक्तानि॥

सहजानि दुष्टशोणितशुक्रनिमित्तानि तेषां दोषत एव प्रसा

धनं कर्त्तव्यं। विशेषतश्चात्र दुर्दर्शनानि परुषाणि पाण्डूनि दारुणान्य न्तर्मुखानि तैरुपद्रुतः कृशोऽल्पभुक् सिरासन्ततगात्रोऽल्पप्रजःक्षीण रेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्घ्राणशिरोऽक्षिश्रवणरोगवान्सतत मन्त्रकूजाटोपहृदयोपलेपारोचकप्रभृतिभिः पीड्यते॥

भवति चात्र ॥ बाह्यमध्यबलिस्थानां प्रतिकुर्य्याद्भिषग्वरः।

अन्तर्ब्बलिसमुत्थानां प्रत्याख्यायाचरेत्क्रियाम्॥

प्रकुपितास्तु दोषा मेढ्रमभिप्रपन्ना मांसशोणिते प्रदूष्य कण्डूं जनयन्ति ततः कण्डूयनात्क्षतं समुपजायते तस्मिंश्च क्षते दुष्ट मांसजाः प्ररोहाः पिच्छिलरुधिरस्राविणो जायन्ते कूर्चकिनोऽ भ्यन्तरमुपरिष्टाद्वा ते तु शेफो विनाशयन्त्युपघ्नन्ति च पुंस्त्वम् योनिमभिप्रपन्नाः सुकुमारान्दुर्गन्धान् पिच्छिलरुधिरस्राविण श्छत्राकारान्करीरान् जनयन्ति त एवोर्द्ध्वमागताः श्रोत्राक्षि घ्राणवदनेष्वर्शांस्युपनिर्व्वर्त्तयन्ति तत्र कर्णजेषु वाधिर्य्यं शूलं पूतिकर्णता च। नेत्रजेषु वर्त्मावरोधो वेदनास्रावौ दर्शननाशश्च। घ्राणजेषु प्रतिश्यायोऽतिमात्रं क्षवथुः कृच्छ्रोच्छ्वासता पूतिनस्यं सानु नासिकवाक्यत्वं शिरोदुःखञ्च। वक्त्रजेषु कण्ठौष्ठतालूनामन्यतम स्मिंस्तैर्गद्गदवाक्यता रसाज्ञानं मुखरोगाश्च भवन्ति। व्यानस्तु प्रकु पितः श्लेष्माणं परिगृह्य वहिःस्थिराणि कीलवदर्शांसि निर्व्वर्त्त यन्ति तानि चर्म्मकीलान्यर्शांसीत्याचक्षते॥

भवन्ति चात्र॥ तेषु कीलेषु निस्तोदो मारुतेनोपजायते।

श्लेष्मणा तु सवर्णत्वं ग्रन्थिलत्वञ्च विनिर्दिशेत्॥

पित्तशोणितजं रौक्ष्यं कृष्णत्वं शुक्लतातथा।
समुदीर्णखरत्वञ्च चर्म्मकीलस्य लक्षणं॥
अर्शसां लक्षणं व्यासादुक्तं सामान्यतस्तु यत्।
तत्सर्व्वं प्राग्विनिर्दिष्टात्साधयेद्भिषजां वरः॥
अर्शःसु दृश्यते रूपं यदा दोषद्वयस्य तु।
संसर्गं तं विजानीयात्संसर्गः सच षड्विधः॥
त्रिदोषाण्यल्पलिङ्गानि याप्यानि तु विनिर्दिशेत्।
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च॥
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च।
सन्निपातसमुत्थानि सहजानि तु वर्जयेत्॥
सर्व्वाः स्युर्व्वलयो येषां दुर्न्नामभिरुपद्रुताः।
तैस्तु प्रतिहतो वायुरपानः सन्निवर्त्तते॥
ततो व्यानेन सङ्गम्य ज्योतिर्म्हन्ति देहिनां॥

---

॥ तृतीयोऽध्यायः॥

॥ अथातोऽश्मरीणां निदानं व्याख्यास्यामः॥

चतस्रोऽश्मर्य्यो भवन्ति श्लेष्माधिष्ठानास्तद्यथा श्लेष्मणा वातेन पित्तेन शुक्रेण चेति॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति तासां पूर्व्वरूपाणि वस्तिपीडारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति॥

यथास्वं वेदनावर्षं दुष्टं सान्द्रमथाविलम्।
पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ॥

अथ जातासु नाभिवस्तिसेवनीमेहनेष्वन्यतमस्मिन्मेहतोवेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाश मनाविलं ससिकतं विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनै श्चास्य वेदना भवति ॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्दाल्यते भिद्यते निस्तुद्यत इव च वस्तिर्गुरुः शीतश्च भवति। अश्मरीचात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥

पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्ति मुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मुत्रप्रतीघातादुष्यते चूष्यते दह्यते पच्यत इव वस्तिरुष्णवातश्च भवति। अश्मरीचात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥

वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीडयति मेढ्रं मृद्नाति पायुं स्पृशति विशर्द्धते विदहति वातमूत्र पुरीषाणि कृच्छ्रेण वास्य मेहतो निःसरन्ति। अश्मरी चात्र श्यामा

परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता भवति तां वा तिकीमिति विद्यात्॥

प्रायेणैतास्तिस्रो ऽश्मर्य्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्धगुरु मधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति तेषामेवाल्पवस्तिकाय त्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति॥ महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रस्खलितमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संगृह्य मेढ्रवृ षणयोरन्तरे संहरति संहृत्यचोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति पीडित मात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात्॥

भवन्ति चात्र॥ शर्करा सिकता मेहो भस्माख्यो ऽश्मरिवैकृतम्।
अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना॥
पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः।
सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते॥
हृत्पीडासक्थिसदनं कुक्षिशूलः सवेपथुः।
तृष्णोर्द्ध्वगोऽनिलः कार्ष्ण्यं दौर्ब्बल्यं पाण्डुगात्रता॥
अरोचकाविपाकौ तु शर्करार्त्ते भवन्ति च।
मूत्रमार्गप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्॥
दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमरोचकम्।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीडनं वमिं॥

नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसां ।
एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः ॥
अलाब्वा इव रूपेण सिरास्नायुपरिग्रहः ।
वस्तिर्वस्तिशिरश्चैव पौरुषं वृषणौ गुदं ॥
एकसम्बन्धिनो ह्येते गुदास्थिविवराश्रिताः ।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥
पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः ।
तर्प्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥
सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः ।
नाडीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥
जाग्रतः स्वपतश्चैव स निःस्यन्देन पूर्य्यते ।
आमुखात्सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः ॥
घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्य्यते ।
एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा ॥
मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम् ।
अप्सु स्वच्छास्वपि यथा निषिक्तासु नवे घटे ॥
कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा ।
संहन्त्यपो यथा दिव्या मारुतोऽग्निश्च वैद्युतः ॥
तद्वद्बलासं वस्तिस्थमुष्मा संहन्ति सानिलः ।
मारुते प्रगुणे वस्तौ मूत्रं सम्यक्प्रवर्त्तते ॥
विकाराः विविधाश्चापि प्रतिलोमे भवन्ति हि ॥

मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च।
मूत्रदोषाश्च ये केचिद्वस्तावेव भवन्तिहि ॥

---

॥ चतुर्थोऽध्यायः॥

अथातोभगन्दराणां निदानं व्याख्यास्यामः॥

वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ताः शतपोनकोष्ट्रग्रीवपरिस्राविशम्बूकावर्त्तोन्मार्गिणो यथासङ्ख्यं पञ्च भगन्दरा भवन्ति॥ ते तु भगगुदवस्तिप्रदेशदारणाच्च भगन्दरा इत्युच्यन्ते॥ अपक्काः पिडकाः पक्कास्तु भगन्दराः॥ तेषान्तु पूर्व्वरूपाणि कटीकपालवेदना गुदकण्डूर्द्दाहः शोफश्च गुदस्य भवति॥

तत्रापथ्यसेविनो वायुः प्रकुपितः सन्निवृत्तः स्थिरीभूतो गुदमभितोऽङ्गुले द्व्यङ्गुले वा मांसशोणिते प्रदूष्यारुणवर्णां पिडकां जनयति सास्य तोदादीन्वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति मूत्राशयाभ्याशगतत्वाच्च व्रणः प्रक्लिन्नः शतपोनकवदणुमुखैश्छिद्रैरापूर्य्यते तानि च छिद्राण्यजस्रं फेणानुविद्धमधिकमास्रावं स्रवन्ति व्रणश्च ताड्यते भिद्यते छिद्यते सूचीभिरिव निस्तुद्यते गुदञ्चावदीर्य्यते वातमूत्रपुरीषरेतसामप्यागमश्च तैरेव छिद्रैर्भवति तं भगन्दरं शतपोनकमित्याचक्षते॥

पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्व्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिडकां जनयति। सास्य चोषादीन्वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्चाग्निक्षा-

राभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते ॥

श्लेष्मा तु प्रकुपितः समीरणेनाधःप्रेरितः पूर्व्ववदवस्थितः शुक्लावभासां स्थिरां कण्डूमतीं पिडकां जनयति सास्य कण्ड्वादीन्वेदनाविशेषाञ्जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्च कठिनः संरम्भी कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरीषरेतांसि विसृजति तं भगन्दरं परिस्राविणमित्याचक्षते।

वायुः प्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिगृह्याधोगत्वा पूर्व्ववदवस्थितः पादाङ्गुष्ठप्रमाणां सर्व्वलिङ्गां पिडकां जनयति सास्य तोददाहकण्ड्वादीन्वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्च नानाविधवर्णमास्रावं स्रवति पूर्णनदी शम्बूकावर्त्तवच्चात्र समुत्तिष्ठन्ति वेदनाविशेषास्तं भगन्दरं शम्बूकावर्त्तमित्याचक्षते।

मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदा वगाढपुरीषोन्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः क्लोथ उपजायते तस्मिंश्च क्षते पूयरुधिरावकीर्णे मांसकोथे भूमाविव जलप्रक्लिन्नायां क्रिमयः सञ्जायन्ते ते भक्षयन्तो गुदमनेकधा पार्श्वतो दारयन्ति तस्य तैर्म्मार्गैः कृमिकृतैर्व्वातमूत्रपुरीषरेतांस्यभिनिःसरन्ति तं भगन्दरमुन्मार्गिणमित्याचक्षते।

भवन्ति चात्र ॥ उत्पद्यतेऽल्परुक्शोफा क्षिप्रं चाप्युपशाम्यति।
पाय्वन्तदेशे पिडका सा ज्ञेयान्या भगन्दरात् ॥

भागन्दरी तु विज्ञेया पिडकाऽतो विपर्य्ययात् ।
पायोः स्याद्द्‌व्यङ्गुले देशे गूढमूला सरुग्ज्वरा ॥
यानयानान्मलोत्सर्गात्कण्डूरुग्दाहशोफवान् ।
पायुर्भवेद्रुजः कट्यां पूर्व्वरूपं भगन्दरे ॥
घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च भगन्दरः ॥

---

॥ पञ्चमोऽध्यायः ॥

अथातः कुष्ठनिदानं व्याख्यास्यामः ॥ मिथ्याहाराचारस्य विशेषाद्गुरुविरुद्धासात्म्याजीर्णाहिताशिनः स्नेहपीतस्य वान्तस्य वा व्यायामग्राम्यधर्म्मसेविनो ग्राम्यानूपौदकमांसानि वा पयसा भीक्ष्णमश्नतो यो वा मज्जत्यप्सूष्माभितप्तः सहसा छर्दिं वा प्रतिहन्ति तस्य पित्तश्लेष्माणौ प्रकुपितौ परिगृह्यानिलः प्रवृद्धस्तिर्य्यगाः सिराः सम्प्रतिपद्य समुद्धूय वाह्यं मार्गं प्रति समन्ताद्विक्षिपति । यत्र यत्र च दोषो विक्षिप्तो निःसरति तत्र तत्र मण्डलानि प्रादुर्भवन्त्येवमुत्पन्नस्त्वचि दोषस्तत्र च परिवृद्धिं प्राप्याप्रतिक्रियमाणोऽभ्यन्तरं प्रतिपद्यते धातून् दूषयन् । तस्य पूर्व्वरूपाणि त्वक्पारुष्यमकस्माद्रोमहर्षः कण्डूः स्वेदबाहुल्यमस्वेदनंवाङ्गप्रदेशानां स्वापः क्षतविसर्पणमसृजः कृष्णता चेति ॥

तत्र सप्त महाकुष्ठान्येकादश क्षुद्रकुष्ठान्येवमष्टादश कुष्ठानि

भवन्ति । तत्र महाकुष्ठान्यऽरुणौडुम्बरर्ष्यजिह्वकपालकाकणकपुण्डरीकदद्रुकुष्ठानीति ।

क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्मदलं विसर्पः परिसर्प्पः सिध्म विचर्च्चिका किटिभं पामा रकसा चेति ॥ सर्व्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि सक्रिमीणि च भवन्त्युत्सन्नतस्तु दोषग्रहणमभिभवात् ॥

तत्र वातेनारुणं पित्तेनौडुम्बरर्ष्यजिह्वकपालकाकणकानि ॥ श्लेष्मणा पौण्डरीकं दद्रुकुष्ठञ्चेति तेषान्तु महत्त्वं क्रियागुरुत्वमुत्तरोत्तरं धात्वनुप्रवेशादसाध्यत्वञ्चेति ॥

तत्र वातेनारुणाभानि तनूनि विसर्प्पीणि तोदभेदस्वापयुक्तान्यरुणानि ॥ पित्तेन पक्वोडुम्बरफलाकृतिवर्णान्यौडुम्बराणि ॥ ऋष्यजिह्वाप्रकाशखरत्वानि ऋष्यजिह्वानि ॥ कृष्णकपालिकाप्रकाशानि कपालकुष्ठानि । काकणन्तिकाफलसदृशान्यतीव रक्तकृष्णानि काकणकानि ॥ तेषाञ्चतुर्णामप्योषचोषपरिदाहधूमायनानि क्षिप्रोत्थानप्रपाकभेदित्वानि क्रिमिजन्म च सामान्यानि लिङ्गानि ॥

पुण्डरीकपत्रप्रकाशानि पौण्डरीकाणि । अतसीपुष्पवर्णानि ताम्राणि वा विसर्प्पीणि पिडकावन्ति च दद्रुकुष्ठानि तयोर्द्वयोरप्युत्सन्नता परिमण्डलता कण्डूश्चिरोत्थानत्वं चेति सामान्यरूपाणि ॥

क्षुद्रकुष्ठान्यत ऊर्द्ध्वं वक्ष्यामः ॥

स्थूलानि सन्धिष्वतिदारुणानि स्थूलारुंषि स्युः कठिनान्यरुंषि ।

त्वक्सङ्कोचभेदस्वपनाङ्गसादाः कुष्ठे महत्पूर्व्वयुते भवन्ति ॥
कृष्णारुणं येन भवेच्छरीरं तदेककुष्ठं प्रवदन्त्यसाध्यम् ।
स्थूल्येन कण्डूव्यथनौषचोषास्तलेषु तच्चर्म्मदलं वदन्ति ॥
विसर्प्पवत्सर्पति सर्वतोयस्त्वग्रक्तमांसान्यभिभूय शीघ्रं ।
मूर्च्छाविदाहारतितोदपाकान्कृत्वा विसर्पः स भवेद्विकारः ॥
शनैः शरीरे पिडकाः स्रवत्यः सर्प्पन्ति यास्तं परिसर्पमाहुः ।
कण्ड्वन्वितं श्वेतमपायि सिध्म विद्यात्तनु प्रायश ऊर्द्ध्वकाये ॥
राज्योऽतिकण्ड्वर्त्तिरुजः सुरूचा भवन्ति गात्रेषु विचर्च्चिकायां ।
कण्डूमतीदाहरुजोपपन्ना विपादिका पादगतेयमेव ॥
यत्स्रावि वृत्तं घनमुग्रकण्डु तत्स्निग्धकृष्णं किटिमं वदन्ति ।
सास्रावकण्डूपरिदाहवद्भिः पामाणुकाभिः पिडकाभिरुच्या ॥
स्फोटैः सदाहैरति सैव कच्छूः स्फिक्पाणिपादप्रभवैर्निरूप्या ।
कण्ड्वन्विता या पिडका शरीरे संस्रावहीना रकसोच्यते सा ॥
अरुः ससिध्मं रकसा महच्च यच्चैककुष्ठं कफजान्यमूनि ।
वायोः प्रकोपात्परिसर्पमेकं शेषाणि पित्तप्रभवाणि विद्यात् ॥

किलासमपि कुष्ठविकल्पएव । तत्त्रिविधं वातेन पित्तेन श्लेष्मणा चेति । कुष्ठकिलासयोरन्तरन्त्वग्गतमेव किलासमपरिस्रावि च । तद्वातेन मण्डलमरुणं परुषं परिध्वंसि च पित्तेन पद्मपत्रप्रतीकाशं सपरिदाहञ्च । श्लेष्मणापि श्वेतं स्निग्धं बहलं कण्डूमच्च ॥ तेषु सम्बद्ध मण्डलमन्तेजातं रक्तरोमचाऽसाध्यमग्निदग्धञ्च । कुष्ठेषु रुक् त्वक् सङ्कोचस्वापस्वेदशोफभेदकौण्यस्वरोपघाता वातेन । पाकावदरणा

ङ्गुलिपतनकर्णनासाभङ्गाक्षिरागसत्त्वोत्पत्तय. पित्तेन। कण्डूवर्णभेदशोफास्रावगौरवाणि श्लेष्मणा॥ तत्रादिबलप्रवृत्तं पौण्डरीकं काकणं चासाध्यं॥

भवन्ति चात्र॥ यथा वनस्पतिर्जातः प्राप्य कालप्रकर्षणं।
अन्तर्भूमिं विगाहेत मूलैर्वृद्धिविवर्द्धितैः॥
एवं कुष्ठं समुत्पन्नं त्वचि कालप्रकर्षतः।
क्रमेण धातून्व्याप्नोति नरस्याप्रतिकारिणः॥
स्पर्शहानिः स्वेदनत्वमीषत्कण्डूश्च जायते।
वैवर्ण्यं रूक्षभावश्च कुष्ठे त्वचि समाश्रिते॥
त्वक्स्वापो रोमहर्षश्च स्वेदस्याभिप्रवर्त्तनम्।
कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते॥
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः।
तोदः स्फोटः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते॥
दौर्गन्ध्यमुपदेहश्च पूयोऽथ क्रिमयस्तथा।
गात्राणां भेदनञ्चापि कुष्ठे मेदःसमाश्रिते॥
नासाभङ्गोऽक्षिरागश्च क्षते च क्रिमिसम्भवः।
भवेत्स्वरोपघातश्च अस्थिमज्जसमाश्रिते॥
कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणं।
शुक्रस्थानगते लिङ्गं प्रागुक्तानि तथैव च॥
स्त्रीपुंसयोः कुष्ठदोषाद्दुष्टशोणितशुक्रयोः।
यदपत्यन्तयोर्जातं ज्ञेयं तदपि कुष्ठितं।

कुष्ठमात्मवतः साध्यं त्वग्रक्तपिशिताश्रितम् ॥
मेदोगतं भवेद्याप्यमसाध्यमत उत्तरं ।
ब्रह्मस्त्रीसज्जनवधपरस्वहरणादिभिः ॥
कर्म्मभिः पापरोगस्य प्राहुः कुष्ठस्य सम्भवं ।
म्रियते यदि कुष्ठेन पुनर्ज्जातेऽपि गच्छति ॥
नातः कष्टतरो रोगो यथाकुष्ठं प्रकीर्त्तितं ।
आहाराचारयोः प्रोक्तामास्थाय महतीं क्रियां ॥
औषधीनां विशिष्टानां तपसश्च निषेवणात् ।
यस्तेन मुच्यते जन्तुः सपुण्याङ्गतिमाप्नुयात् ॥
प्रसङ्गाद्गात्रसंस्पर्शान्निश्वासात्सहभोजनात् ।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एवच ।
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरं ॥

---

## षष्ठोऽध्यायः ।

अथातः प्रमेहनिदानं व्याख्यास्यामः ॥

दिवास्वप्नाव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमेद्यद्रवान्नपानसेविनं पुरुषं जानीयात्प्रमेही भविष्यतीति। तस्य चैवं प्रवृत्तस्यापरिपक्का एव वातपित्तश्लेष्माणो यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधो गत्वावस्तेर्मुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति। तेषान्तु पूर्व्वरूपाणि हस्तपादतलदाहः स्निग्धपिच्छिलगुरुता

गात्राणां मधुरशुक्लमूत्रता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालु गलजिह्वादन्तेषु मलोत्पत्तिर्जटिलीभावः केशानां वृद्धिश्च नखानां। तत्राविलप्रभूतमूत्रलक्षणाः सर्व्वे एव प्रमेहाः सर्व्वे एव सर्व्वे दोषसमुत्थाः सहपिडकाभिः ॥

तत्र कफादुदकेक्षुसुरासिकताशनैर्लवणपिष्टसान्द्रशुक्रफेनमेहाः दश साध्या दोषदूष्याणां समक्रियत्वात्॥ पित्तान्नीलहरिद्राम्लक्षारमञ्जिष्ठाशोणितमेहाः षट् याप्या दोषदूष्याणां विषमक्रियत्वात्॥ वातात्सर्प्पिर्व्वसाक्षौद्रहस्तिमेहाश्चत्वारोऽसाध्यतमामहात्ययिकत्वात्।

तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहान् जनयति वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् कफपित्तवसामज्जमेदोभिरन्वितो वायुर्व्वातप्रमेहान्॥

तत्र श्वेतमवेदनमुदकसदृशमुदकमेही मेहति इक्षुरसतुल्यमिक्षुमेही सुरामेही सुरातुल्यं सरुजं सिकतानुविद्धं सिकतामेही शनैः सकफं मूत्रं शनैर्मेही विशदं लवणतुल्यं लवणमेही हृष्टरोमा पिष्टरसतुल्यं पिष्टमेही आविलं सान्द्रं सान्द्रमेही शुक्रतुल्यं शुक्रमेही स्तोकं स्तोकं सफेनं फेनमेही मेहति

अत ऊर्द्ध्वं पित्तनिमित्तान्वक्ष्यामः॥ सफेनमच्छं नीलं नीलमेही मेहति सदाहं हरिद्राभं हरिद्रामेही अम्लरसगन्धमम्लमेही सुतक्षारप्रतिमं क्षारमेही मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही। शोणितप्रकाशं शोणितमेही मेहति ॥

अत ऊर्द्ध्वं वातनिमित्तान्वक्ष्यामः ॥ सर्प्पिःप्रकाशं सर्प्पिर्मेही

मेहति वसाप्रकाशं वसामेही चौद्ररसवर्णं चौद्रमेही मत्तमातङ्ग वदनुप्रवृद्धं हस्तिमेही मेहति।

मक्षिकोपसर्प्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्द्दिनिद्राकासश्वासाश्चेति श्लेष्मजाना मुपद्रवाः॥

वृषणयोरवदरणं वस्तिभेदो मेढ्रतोदो हृदि शूलमम्लीकाज्वरा तीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रा नाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वञ्चेति पैत्तिकानाम्॥ हृद्ग्रहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं बद्धपुरीषत्वञ्चेति वातजानाम्॥एव मेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः॥ तत्र वसामेदोभ्याम भिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पिडका जायन्ते। तद्यथा। शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति॥

शरावमात्रा तद्रूपा निम्नमध्या शराविका।
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः।
जालिनी तीव्रदाहा तु मांसजालसमावृता॥
महती पिडका नीला पिडका विनता स्मृता।
महत्यल्पाचिता ज्ञेया पिडका सा तु पुत्रिणी॥
मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका।
रक्तासिता स्फोटवती दारुणा त्वलजी भवेत्॥

विदारी कन्दवद्वृत्ता कठिना च विदारिका।
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः ॥
ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तल्लताः।
गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मणि चोत्थिताः।
सोपद्रवा दुर्ब्बलस्य पिडकाः परिवर्ज्जयेत्।
कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः ॥
अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः।
प्रमेहपूर्व्वरूपाणामाकृतिर्यत्र दृश्यते ॥
किञ्चिचाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत्।
कृत्स्नान्यर्द्धानि वा यस्मिन्पूर्व्वरूपाणि मानवे॥
प्रवृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत्।
पिडकापीडितं गाढमुपसृष्टमुपद्रवैः ॥
मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः।
स चापि गमनात्स्थानं स्थानादासनमिच्छति ॥
आसनाद्वृणुते शय्यां शयनात्स्वप्नमिच्छति ॥

यथाहि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेण शवलवभ्रुकपिलकपोतमेचकादीनां । वर्णानामनेकेषामुत्पत्तिर्भवति। एवमेव दोषधातुमलाहारविशेषेणोत्कर्षापकर्षकृतेन संयोगविशेषेण प्रमेहाणां नानाकारणं भवति ॥

भवति चात्र ॥ सर्व्वएव प्रमेहास्तु कालेनाप्रतिकारिणः।
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥

---

॥ सप्तमोऽध्यायः ॥

अथात उदराणां निदानं व्याख्यास्यामः ।

धन्वन्तरिर्धर्मभृतां वरिष्ठो राजर्षिरिन्द्रप्रतिमो बभूव ।
ब्रह्मर्षिपुत्रं विनयोपपन्नं शिष्यं शुभं सुश्रुतमन्वशात् सः ॥
पृथक् समस्तैरपि चेह दोषैः प्लीहोदरं बद्धगुदं तथैव ।
आगन्तुकं सप्तममष्टमञ्च दकोदरं चेति वदन्ति तानि ॥
सुदुर्ब्बलाग्नेरहिताशनस्य संशुष्कपूत्यन्ननिषेवणाद्वा ।
स्नेहादिमिथ्याचरणाच्च जन्तोर्वृद्धिं गताः कोष्ठमभिप्रपन्नाः ॥
गुल्माकृतिव्यञ्जितलक्षणानि कुर्व्वन्ति घोराण्युदराणि दोषाः ।
कोष्ठादुपस्नेहवदन्नसारो निःसृत्य दुष्टोऽनिलवेगनुन्नः ॥
त्वचः समुन्नम्य शनैः समन्ताद्विवर्द्धमानो जठरं करोति ।
तत्पूर्व्वरूपं बलवर्णकाङ्क्षावलीविनाशो जठरे हि राज्यः ॥
जीर्णापरिज्ञानविदाहवत्यो वस्तौ रुजः पादगतश्च शोफः ।
सङ्गश्च पार्श्वोदरपृष्ठनाभीर्यद्वर्द्धते कृष्णसिरावनद्धं ॥
सशूलमानाहवदुग्रशब्दं सतोदभेदं पवनात्मकं तत् ।
यच्चोषतृष्णाज्वरदाहयुक्तं पीतं सिरा यत्र भवन्ति पीताः ॥
पीताक्षिविण्मूत्रनखाननस्य पित्तोदरं तत्त्वचिराभिवृद्धि ।
यच्छीतलं शुक्लसिरावनद्धं गुरु स्थिरं शुक्लनखाननस्य ॥
स्निग्धं महच्छोफयुतं ससादं कफोदरं तच्च चिराभिवृद्धि ॥
स्त्रियोऽन्नपानं नखरोममूत्रविडार्त्तवैर्युक्तमसाधुवृत्ताः ।
यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ॥

तेनाशु रक्तं कुपिताश्च दोषाः कुर्व्वन्ति घोरं जठरं त्रिलिङ्गं।
तच्छीतवाताभ्रसमुद्भवेषु विशेषतः कुप्यति दह्यते च॥
स चातुरो मूर्च्छति सम्प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च।
प्रकीर्त्तितं दूष्युदरन्तु घोरं प्लीहोदरं कीर्त्तयतो निबोध॥
विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं सततं करोति प्लीहोदरं तत्प्रवदन्ति तज्ज्ञाः॥
वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः॥
सव्येतरस्मिन् यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव।
यस्यान्त्रमन्नैरुपलेपिभिर्व्वा बालाश्मभिर्व्वा सहितैः पृथग्वा॥
सञ्चीयते तत्र मलः सदोषः क्रमेण नाड्यामिव सङ्करोहि।
निरुध्यते चास्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पं॥
हृन्नाभिमध्ये परिवृद्धिमेति यच्चोदरं विट्समगन्धिकञ्च।
प्रच्छर्दयन् बद्धगुदी विभाव्यस्ततः परिस्राव्युदरं निबोध॥
शल्यं यदन्नोपहितं तदन्त्रं भिनत्ति यस्यागतमन्यथा वा।
तस्मात्स्रुतान्त्रात्सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः॥
नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यतेऽतीव विदह्यते च।
एतत्परिस्राव्युदरं प्रदिष्टं दकोदरं कीर्त्तयतो निबोध॥
यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथ वा निरूढः।
पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरं पूर्व्ववदभ्युपैति।

स्निग्धं महत्सम्परिवृत्तनाभि भृशोन्नतं पूर्णमिवाम्बुनाच ॥
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् ।
आध्मानं गमने शक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ॥
शोफः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तृष्णा च सर्व्वेषु जठरेषु भवन्ति हि ॥
अन्ते सलिलभावन्तु भजन्ते जठराणि तु ।
सर्व्वाण्येव परीपाकात्तदा तानि विवर्ज्जयेत् ॥

---

॥ अष्टमोऽध्यायः ॥

अथातो मूढगर्भनिदानं व्याख्यास्यामः ॥

ग्राम्यधर्म्मयानवाहनाध्वगमनप्रस्खलनप्रपतनप्रपीडनधावनाभिघातविषमशयनासनोपवासवेगाभिघातातिरूक्षकटुतिक्तभोजनशाकातिक्षारसेवनातिसारवमनविरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्ब्बन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः। स विमुक्तबन्धनो गर्भाशयमतिक्रम्य यकृत्प्लीहान्त्रविवरैरवस्रंसमानः कोष्ठसङ्क्षोभमापादयति तस्या जठरसङ्क्षोभाद्वायुरपानो मूढः पार्श्ववस्तिशीर्षोदरयोनिशूलानाहमूत्रसङ्गानामन्यतममापाद्य गर्भं व्यापादयति तरुणं शोणितस्रावेण तमेव कदाचिद्विवृद्धमसम्यगागतमपत्यपथमनुप्राप्तमनिरस्यमानमपानवैगुण्यसंमोहितं गर्भं मूढगर्भमित्याचक्षते। ततः स कीलः प्रतिखुरो वीजकः परिघ इति। तत्र ऊर्द्धबाहुशिरःपादो यो योनिमुखं निरुणद्धि कील

इव स कीलः। निःसृतहस्तपादशिराः कायसङ्गी प्रतिखुरः। यस्तु निर्गच्छत्येकशिरोभुजः स वीजकः परिघ इव योनिमुखमावृत्य तिष्ठेत् स परिघ इति चतुर्व्विधो भवतीत्येके भाषन्ते तत्तु न सम्यक् कस्मात् स यदा विगुणानिलप्रपीडितोऽपत्यपथमनेकधा प्रतिपद्यते तदा सङ्ख्या हीयते। तत्र कश्चित् द्वाभ्यां सक्थिभ्यां योनिमुखं प्रतिपद्यते कश्चिदाभुग्नैकसक्थिरेकेन। कश्चिदाभुग्नसक्थिशरीरः स्फिग्देशेन तिर्य्यगागतः। कश्चिदुरःपार्श्वपृष्ठानामन्यतमेन योनिद्वारं पिधायावतिष्ठते। अन्तःपार्श्वापवृत्तशिराः कश्चिदेकेन बाहुना। कश्चिदाभुग्नशिरा बाहुद्वयेन। कश्चिदाभुग्नमध्यो हस्तपादशिरोभिः। कश्चिदेकेन सक्थ्ना योनिमुखमभिप्रतिपद्यतेऽपरेण पायुमित्यष्टविधा मूढगर्भगतिरुद्दिष्टाः समासेन॥ तत्र द्वावन्त्यावसाध्यौ मूढगर्भौ शेषानपि विपरीतेन्द्रियार्थाक्षेपकयोनिभ्रंशसम्वरणमक्कलश्वासकासभ्रमनिपीडितान् परिहरेत्॥

भवन्ति चात्र॥ कालस्य परिणामेन मुक्तं वृन्ताद्यथाफलम्।
प्रपद्येत स्वभावेन नान्यथा पतितुं फलम्॥
एवं कालप्रकर्षेण मुक्तो नाडीविबन्धनात्।
गर्भाशयस्थो यो गर्भो जननाय प्रपद्यते॥
कृमिवाताभिघातैस्तु तदेवोपद्रुतं फलम्।
पतत्यकालेऽपि यथा तथा स्याद्गर्भविच्युतिः॥
आचतुर्थात्ततो मासात्प्रस्रवेद्गर्भविच्युतिः।

ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ॥
प्रविध्यति शिरो या तु शीताङ्गी निरपत्रपा ।
नीलोद्धतसिरा हन्ति सा गर्भं सच तां तथा ॥
गर्भास्पन्दनमावीनां प्रणाशः श्यावपाण्डुता ।
भवत्युच्छासपूतित्वं शूलं चान्तर्मृते शिशौ ॥
मानसागन्तुभिर्म्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुचौ व्याधिभिश्च प्रपीडितः ॥
वस्तमारविपन्नायाः कुचिः प्रस्पन्दते यदि ।
तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक् ॥

---

## ॥ नवमोऽध्यायः ॥

अथातोविद्रधीनां निदानं व्याख्यास्यामः ॥
सर्व्वामरगुरुः श्रीमान्निमित्तान्तरभूमिपः ।
शिष्यायोवाच निखिलमिदं विद्रधिलक्षणं ॥
त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः ।
दोषाः शोफं शनैर्घोरं जनयत्युच्छ्रिता भृशम् ॥
महामूलं रुजावन्तं वृत्तं चाप्यथवायतं ।
तमाहुर्व्विद्रधिं धीरा विज्ञेयः षड्विधः स च ॥
पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ।
षषामपि हि तेषान्तु लक्षणं संप्रवक्ष्यते ॥
कृष्णोऽरुणो वा परुषो भृशमत्यर्थवेदनः ।

चिरोत्थानप्रपाकश्च विद्रधिर्व्वातसम्भवः ॥
पक्कोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान् ।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ॥
शरावसदृशः पाण्डुः शीतः स्तब्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च सकण्डुश्च कफोत्थितः ॥
तनुपीतसिताश्चैषामास्रावाः क्रमशः स्मृताः ।
नानारूपरुजास्रावो घाटालो विषमो महान् ॥
विषमं पच्यते वापि विद्रधिः सान्निपातिकः ॥
तैस्तैर्भावैरभिहते क्षते चापथ्यसेविनः ।
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ॥
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
एष विद्रधिरागन्तुः पित्तविद्रधिलक्षणः ॥
कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ॥
उक्ता विद्रधयो ह्येते तेष्वसाध्यस्तु सर्व्वजः ।
आभ्यन्तरानतस्तूर्द्ध्वं विद्रधीन्परिचक्षते ॥
गुर्व्वसात्म्यविरुद्धान्नशुष्कसंक्लिन्नभोजनात् ।
अतिव्यवायव्यायामवेगाघातविदाहिभिः ॥
पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम् ।
वल्मीकवत्समुन्नद्धमन्तः कुर्व्वन्ति विद्रधिम् ॥
गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा ।

वृक्कयोः प्लीह्नि यकृति हृदये क्लोम्नि वा तथा ।
तेषां लिङ्गानि जानीयाद्बाह्यविद्रधिलक्षणैः ।
आमपक्वैषणीयेन पक्वापक्वं विनिर्द्दिशेत् ॥
अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः ।
गुदे वातनिरोधस्तु वस्तौ कृच्छ्राल्पमूत्रता ॥
नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम ।
कटीपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ ॥
वृक्कयोः पार्श्वसङ्कोचः प्लीह्न्युच्छ्वासावरोधनम् ।
सर्व्वाङ्गप्रग्रहस्तीव्रो हृदि शूलश्च दारुणः ॥
श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका ।
आमोवा यदि वा पक्वो महान्वा यदि चेतरः ॥
सर्व्वो मर्म्मोत्थितश्चापि विद्रधिः कष्ट उच्यते ।
नाभेरुपरिजाः पक्वा यान्त्यूर्द्ध्वमितरे त्वधः ॥
जीवत्यधो निस्रुतेषु स्रुतेषूर्द्ध्वं न जीवति ।
हृन्नाभिवस्तिवर्ज्ज्या ये तेषु भिन्नेषु वाह्यतः ॥
जीवेत्कदाचित्पुरुषो नेतरेषु कदाचन ।
स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः ॥
दाहज्वरकरो घोरो जायते रक्तविद्रधिः ।
अपि सम्यक्प्रजातानामसृक्कायादनिःसृतं ॥
रक्तजं विद्रधिं विद्यात्कुक्षौ मक्कल्लसंज्ञितं ।
सप्ताहान्नोपशान्तश्चेत्ततोऽसौ संप्रपद्यते ॥

विशेषमथ वक्ष्यामि स्पष्टं विद्रधिगुल्मयोः ।
तुल्यदोषसमुत्थानाद्विद्रधेर्गुल्मकस्य च ॥
कस्मान्न पच्यते गुल्मो विद्रधिः पाकमेति च ।
गुल्माकाराः स्वयं दोषा विद्रधिर्म्मांसशोणिते ॥
विवरानुचरो ग्रन्थिरप्सु वुद्बुदको यथा ।
एवं प्रकारो गुल्मस्तु तस्मात्पाकं न गच्छति ॥
मांसशोणितबाहुल्यात्पाकं गच्छति विद्रधिः ।
मांसशोणितहीनत्वाद्गुल्मः पाकं न गच्छति ।
गुल्मस्तिष्ठति दोषे स्वे विद्रधिर्म्मांसशोणिते ॥
विद्रधिः पच्यते तस्माद्गुल्मश्चापि न पच्यते ।
हृन्नाभिवस्तिजः पक्वो वर्ज्ज्यो यश्च त्रिदोषजः ॥
अथ मज्जपरीपाको घोरः समुपजायते ।
सोऽस्थिमांसनिरोधेन द्वारं न लभते यदा ॥
ततः स व्याधिना तेन ज्वलनेनेव दह्यते ।
अस्थिमज्जोष्मणा तेन शीर्य्यते दह्यमानवत् ॥
विकारः शल्यभूतोऽयं क्लेशयेदातुरं चिरं ।
अथास्य कर्म्मणा व्याधिर्द्वारन्तु लभते यदा ॥
ततो मेदःप्रभं स्निग्धं श्लक्ष्णं शीतमथो गुरु ।
भिन्नेऽस्थ्नि निस्रवेत्पूयमेतदस्थिगतं विदुः ॥
विद्रधिं शास्त्रकुशलाः सर्व्वदोषरुजावहं ॥

---

दशमोऽध्यायः ॥

अथातो विसर्पनाडीस्तनरोगनिदानं व्याख्यास्यामः ॥

त्वङ्मांसशोणितगताः कुपितास्तु दोषाः
सर्वाङ्गसारिणमिहास्थितमात्मलिङ्गं ।
कुर्वन्ति यं विस्तृतमुन्नतमाशु शोफं
तं सर्वतोविसरणाच्च विसर्पमाहुः ॥
वातात्मकोऽसितमृदुः परुषोऽङ्गमर्द्द
सम्भेदतोदपवनज्वरलिङ्गयुक्तः ।
गण्डैर्यदा तु विषमैरतिदूषितत्वा
युक्तः स एव कथितः खलु वर्ज्जनीयः ॥
पित्तात्मको द्रुतगतिर्ज्वरदाहपाक
स्फोटप्रभेदबहुलः क्षतजप्रकाशः ।
दोषप्रवृद्धिहतमांससिरो यदा स्यात्
स्रोतोजकर्द्दमनिभो न तदा स सिध्येत् ॥
श्लेष्मात्मकः सरति मन्दमशोघ्रपाकः
स्निग्धः सितः श्वयथुरल्परुगुग्रकण्डुः ।
सर्व्वात्मकस्त्रिविधवर्णरुजोऽवगाढः
पक्वो न सिध्यति च मांससिराप्रणाशात् ॥
सद्यःक्षतव्रणमुपेत्य नरस्य पित्तं
रक्तञ्च दोषबहुलस्य करोति शोफं ।
श्यावं सलोहितमतिज्वरदाहपाकं

स्फोटैः कुलत्थसदृशैरसितैश्च कीर्णं ॥
सिध्यन्ति वातकफपित्तकृता विसर्प्पाः
सर्व्वात्मकः क्षतकृतश्च न सिद्धिमेति ।
पैत्तानिलावपि च दर्शितपूर्व्वलिङ्गौ
सर्व्वे च मर्म्मसु भवन्ति हि कृच्छ्रसाध्याः ॥
शोफं न पक्वमिति पक्वमुपेक्षते यो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः ।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः स पूयः ॥
तस्यातिमात्रगमनाद्गतिरित्यतश्च
नाडीव यद्वहति तेन मता तु नाडी ।
दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ॥
तत्रानिलात्परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपायां ।
तृट्तापतोदमदनज्वरभेदहेतुः
पीतं स्रवत्यधिकमुष्णमहःसु पित्तात् ॥
ज्ञेया कफाद्बहुघनार्ज्जुनपिच्छिलास्रा
रात्रिस्रुतिःस्तिमितरुक्कठिना सकण्डूः ।
दोषद्वयाभिहितलक्षणदर्शनेन
तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् ॥

दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि ।
तामादिशेत्पवनपित्तकफप्रकोपा
द्वोरामसुचयकरीमिव कालरात्रिम् ॥
नष्टे कथञ्चिदणुमात्रमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ।
सा फेनिलं मथितमच्छमसृग्विमिश्र
मुष्णं करोति सहसा सरुजा च नित्यं ॥
यावत्यो गतयो यैश्च कारणैः सम्भवन्ति हि ।
तावन्तः स्तनरोगाः स्युः स्त्रीणां तैरेव हेतुभिः ॥
धमन्यः संवृतद्वाराः कन्यानां स्तनसंश्रिताः ।
दोषाविसरणात्तासां न भवन्ति स्तनामयाः ॥
तासामेव प्रजातानां गर्भिणीनान्तु ताः पुनः ।
स्वभावादेव विवृता जायन्ते सम्भवन्त्यतः ॥
रसप्रसादो मधुरः पक्वाहारनिमित्तजः ।
कृत्स्नदेहात्स्तनौ प्राप्तः स्तन्यमित्यभिधीयते ॥
विशस्तेष्वपि देहेषु यथा शुक्रं न दृश्यते ।
सर्व्वदेहाश्रितत्वाच्च शुक्रलक्षणमुच्यते ॥
तदेव चेष्टयुवतेर्दर्शनात्स्मरणादपि ।
शब्दसंश्रवणात्स्पर्शात्संहर्षाच्च प्रवर्त्तते ॥
सुप्रसन्नं मनस्तत्र हर्षणे हेतुरुच्यते ।

आहाररसयोनित्वादेवं स्तन्यमपि स्त्रियाः ॥
तदेवापत्यसंस्पर्शाद्दर्शनात्स्मरणादपि ।
ग्रहणाच्च शरीरस्य शुक्रवत्सम्प्रवर्त्तते ॥
स्नेहो निरन्तरस्तत्र प्रस्रवे हेतुरुच्यते ।
तत्कषायं भवेद्वातात्क्षिप्तञ्च प्लवतेऽम्भसि ॥
पित्तादम्लञ्च कटुकं राज्योऽम्भसि च पीतिकाः ।
कफाद्घनं पिच्छिलञ्च जले चाप्यवसीदति ॥
सर्व्वैर्दुष्टैः सर्व्वलिङ्गमभिघाताच्च दुष्यति ।
यत्क्षीरमुदके क्षिप्तमेकीभवति पाण्डुरं ॥
मधुरञ्चाविवर्णञ्च प्रसन्नं तद्विनिर्द्दिशेत् ।
सक्षीरौ वाप्यदुग्धौ वा प्राप्य दोषः स्तनौ स्त्रियाः ॥
रक्तं मांसञ्च सन्दूष्य स्तनरोगाय कल्पते ।
पञ्चानामपि तेषान्तु हित्वा शोणितविद्रधिं ॥
लक्षणानि समानानि बाह्यविद्रधिलक्षणैः ।

---

## एकादशोऽध्यायः ॥

अथातो ग्रन्थ्यपच्यर्बुदगलगण्डानां निदानं व्याख्यास्यामः ॥
वातादयो मांसमसृक् प्रदुष्टाः सन्दूष्य मेदश्च कफानुविद्धम् ।
वृत्तोन्नतं विग्रथितन्तु शोफं कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥
आयम्यते व्यथ्यत एति तोदं प्रत्यस्यते कृत्यत एति भेदं ।
कृष्णोऽमृदुर्व्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छं ॥

दन्दह्यते धूप्यति चाति मात्रं पापच्यते प्रज्वलतीव चापि ।
रक्तः सपीतोऽप्यथवापि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रं ॥
शीतो विवर्णोऽल्परुजोऽतिकण्डुः पाषाणवत्संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयं ॥
शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महानल्परुजोऽतिकण्डुः ।
मेदःकृतो गच्छति चातिभिन्ने पिण्याकसर्प्पिः प्रतिमन्तु मेदः ॥
व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुर्हि सिराप्रतानं ।
संपीड्य सङ्कोच्य विशोष्य वापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम् ॥
ग्रन्थिः सिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात्सरुजश्चलश्च ।
अरुक् स एवाप्यचलो महांश्च मर्म्मोत्थितश्चापि विवर्ज्जनीयः ॥
हन्वस्थिकक्षाक्षकबाहुसन्धिमन्यागलेषूपचितन्तु मेदः ।
ग्रन्थिं स्थिरं वृत्तमथायतं वा स्निग्धं कफश्चाल्परुजं करोति ॥
तं ग्रन्थिभिश्चामलकास्थिमात्रैर्मत्स्याण्डजालप्रतिमैस्तथान्यैः ।
अनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति ॥
कण्डूयुतास्तेऽल्परुजः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये ।
मेदःकफाभ्यां खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी ॥
गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमभिप्रदूष्य ।
वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकं ॥
कुर्व्वन्ति मांसोपचयञ्च शोफं तदर्बुदं शास्त्रविदो वदन्ति ।
वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा च ॥
तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि सदा भवन्ति ।

दोषः प्रदुष्टो रुधिरं सिरास्तु संपीड्य सङ्कोच्य गतस्तु पाकं ॥
सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशु वृद्धिं ।
स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकं स्यात् ॥
रक्तक्षयोपद्रवपीडितत्वात्पाण्डुर्भवेदर्बुदपीडितस्तु ।
मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं प्रकरोति शोफं ॥
अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यं ।
प्रदुष्टमांसस्य नरस्य वाढमेतद्भवेन्मांसपरायणस्य ॥
मांसार्ब्बुदं त्वेतदसाध्यमुक्तं साध्येष्वपीमान्युपवर्ज्जयेत्तु ।
संप्रस्रुतं मर्म्मणि यच्च जातं स्रोतःसु वा यच्च भवेदचाल्यं ॥
यज्जायतेऽन्यत्खलु पूर्ब्बजाते ज्ञेयं तदध्यर्ब्बुदमर्ब्बुदज्ञैः ।
यद्द्वन्द्वजातं युगपत्क्रमाद्वा द्विरर्ब्बुदं तच्च भवेदसाध्यं ॥
न पाकमायान्ति कफाधिकत्वान्मेदोऽधिकत्वाच्च विशेषतस्तु ।
दोषस्थिरत्वाद्ग्रथनाच्च तेषां सर्ब्बार्ब्बुदान्येव निसर्गतस्तु ॥
वातः कफश्चैव गले प्रवृद्धौ मन्ये तु संसृत्य तथैव मेदः ।
कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ॥
तोदान्वितः कृष्णसिरावनद्धः कृष्णोऽरुणो वा पवनात्मकस्तु ।
मेदोऽन्वितश्चोपचितश्च कालाद्भवेत्प्रदिग्धे च गले रुजश्च ॥
पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात्कदाचित् ।
वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः ॥
स्थिरः सवर्णोऽल्परुगुग्रकण्डुः शीतो महांश्चापि कफात्मकस्तु ।
चिराभिवृद्धिं कुरुते चिराद्वा प्रपच्यते मन्दरुजं कदाचित् ॥

माधुर्य्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रलेपः।
स्निग्धो मृदुः पाण्डुरनिष्टगन्धो मेदःकृतो नीरुगथातिकण्डुः॥
प्रलम्बतेऽलावुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः।
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेन शब्दं कुरुते च नित्यं॥
कृच्छ्रात् श्वसन्तं मृदु सर्व्वगात्रं संवत्सरातीतमरोचकार्त्तं।
क्षीणन्तु वैद्यो गलगण्डिनं तं भिन्नस्वरं चैव विवर्ज्जयेत्तु॥
निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले।
महान्वा यदि वा ह्रस्वस्तं गण्डमिति निर्द्दिशेत्॥

---

## द्वादशोऽध्यायः॥

अथातो वृद्ध्युपदंशश्लीपदानां निदानं व्याख्यास्यामः॥

वातपित्तश्लेष्मशोणितमेदोमूत्रान्त्रनिमित्ताः सप्त वृद्धयः। तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः॥ अधः प्रकुपितोऽन्यतमो हि दोषः फलकोशवाहिनीरभिप्रपद्य धमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते॥ तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोशशोफश्चेति।

तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिलरुजं वातवृद्धिमाचक्षते पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चाशु समुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्म

वृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिं ॥ मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृतिरिव क्षुभ्यति मूत्रकृच्छ्रं वेदनां वृषणयोः श्वयथुं कोशयोश्चापादयति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणबलवद्विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोशं प्रविश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीडितश्चोर्द्ध्वमुपैति । विमुक्तश्च पुनराध्मति तामन्त्र वृद्धिमसाध्यामित्याचक्षते ॥

तत्रातिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमप्रक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविषशूकनिपातनादर्द्दनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीडनाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥

स पञ्चविधस्त्रिभिर्द्दोषैः पृथक्समस्तैरसृजा चैकः ॥

तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफताविविधाश्च वातवेदनाः ॥

पैत्तिके ज्वरःश्वयथुः पक्वोडुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च ॥

श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनश्च।

रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहौ शोषश्च याप्यश्चैव कदाचित् ॥

सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः कृमिप्रादुर्भावो मरणं चेति ॥

कुपितास्तु दोषा वातपित्तश्लेष्माणोऽधःप्रपन्ना वङ्क्षणोरुजानुजङ्घास्ववतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैःशोफं जनयन्ति तत्श्लीपदमित्याचक्षते। तत्त्रिविधं वातपित्तकफनिमित्तमिति॥ तत्र वातजं खरं कृष्णं परुषमनिमित्तानिलरुजं परिस्फुटति च बहुशः ॥ पित्तजन्तु पीतावभासमीषन्मृदुज्वरदाहप्रायञ्च॥ श्लेष्मजन्तु श्वेतं स्निग्धावभासं मन्दवेदनं भारिकमितिमहाग्रन्थिकं कण्टकैरुपचितञ्च। तत्र सम्वत्सरातीतमतिमहद्वल्मीकजातं प्रस्नुतमिति वर्ज्जनीयानि ॥

भवन्तिचात्र ॥ त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात्।

गुरुत्वञ्च महत्त्वञ्च यस्मान्नास्ति विना कफात् ॥

पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः।

ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥
पाद हस्तयोश्चापि श्लीपदं जायते नृणां ।
कर्णाक्षिनासिकौष्ठेषु केचिदिच्छन्ति तद्विदः ॥

---

## त्रयोदशोऽध्यायः ।

अथातः क्षुद्ररोगाणां निदानं व्याख्यास्यामः ॥

समासेन चतुश्चत्वारिंशत्क्षुद्ररोगा भवन्ति ॥ तद्यथा ॥ अजगल्लिका यवप्रख्याऽन्धालजी विवृता कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्पं कुनखोऽनुशयी विदारिका शर्कराऽर्वुदं पामा विचर्च्चिका रकसा पाददारिका कदरमलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मसूरिका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकशः निरुद्धगुदोऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति ॥

स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥
यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पिडका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥
घनामवक्त्रां पिडकामुन्नतां परिमण्डलां ।
अन्धालजीमल्पपूयां तां विद्यात्कफवातजाम् ॥
विवृतास्यां महादाहां पक्कोडुम्बरसन्निभाम् ।

विवृतामिति तां विद्यात्पित्तोत्थां परिमण्डलां ॥
ग्रन्थयः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यामुद्भूतां विद्यात्तां कच्छपीमिति ॥
पाणिपादतले सन्धौ ग्रीवायामूर्द्धजत्रुणि ।
ग्रन्थिर्वल्मीकवद्यस्तु शनैः समुपचीयते ॥
तोदक्लेदपरीदाहकण्डूमद्भिर्व्रणैर्वृतः ।
व्याधिर्वल्मीक इत्येष कफपित्तानिलोद्भवः ॥
पद्मपुष्करवन्मध्ये पिडकाभिः समाचिताम् ।
इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥
कर्णौ परिसमन्ताद्वा पृष्ठे वा पिडकोग्ररुक् ।
शालूकवत्पनसिकां तां विद्यात् श्लेष्मवातजाम् ।
हनुसन्धौ समुद्भूतं शोफमल्परुजं स्थिरम् ।
पाषाणगर्द्दभं विद्याद्बलासपवनात्मकम् ॥
विसर्पवत्सर्प्पति यो दाहज्वरकरस्तनुः ।
अपाकः श्वयथुः पित्तात्स ज्ञेयो जालगर्दभः ॥
बाहुपार्श्वांसकक्षासु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपात्सम्भूतां कक्षामिति विनिर्दिशेत् ॥
अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्ततः ।
क्वचित्सर्व्वत्र वा देहे स्मृता विस्फोटका इति ॥
कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥

सप्ताहाद्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपाततः॥
नखमांसमधिष्ठाय पित्तं वातश्च वेदनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥
तदेव क्षतरोगाख्यं तथोपनखमित्यपि।
अभिघातात्प्रदुष्टो यो नखो रूक्षोऽसितः खरः॥
भवेत्तु कुनखं विद्यात्कुलीनमिति संज्ञितं।
गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम्॥
कफादन्तःप्रपाकान्तां विद्यादनुशयीं भिषक्।
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु॥
रक्तां विदारिकां विद्यात् सर्व्वजां सर्व्वलक्षणाम्।
प्राप्य मांससिरास्नायु श्लेष्मा मेदस्तथाऽनिलः॥
ग्रन्थिं कुर्व्वन्ति भिन्नोऽसौ मधुसर्प्पिर्व्वसानिभम्।
स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः॥
मांसं विशोष्य ग्रथितां शर्करां जनयेत्पुनः।
दुर्गन्धं क्लिन्नमत्यर्थं नानावर्णं ततः सिराः॥
स्रवन्ति सहसा रक्तं तद्विद्याच्छर्करार्व्वुदं।
पामाविचर्च्यौ कुष्ठेषु रकसा च प्रकीर्त्तिता॥
परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः।
पादयोः कुरुते दारीं सरुजां तलसंश्रितां॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।

मेदोरक्तानुगैश्चैव दोषैर्वा जायते नृणाम् ॥
सकीलः कठिनो ग्रन्थिर्निम्नमध्योन्नतोऽपि वा ।
कोलमात्रः सरुक्स्रावो जायते कदरस्तु सः ॥
क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुगन्वितौ ।
दुष्टकर्द्दमसंस्पर्शादलसं तं विनिर्दिशेत् ॥
रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ॥
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः ।
तदिन्द्रलुप्तं खालित्यं रुज्येति च विभाव्यते ॥
दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते ।
कफवातप्रकोपेण विद्याद्दारुणकन्तु तं ॥
अरूंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि ।
कफासृक्कृमिकोपेन नृणां विद्यादरुंषिकाम् ।
क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः ॥
पित्तञ्च केशान्पचति पलितं तेन जायते ।
दाहज्वररुजावन्तस्ताम्राः स्फोटाः सपीतकाः ॥
गात्रेषु वदने चान्तर्विज्ञेयास्ता मसूरिकाः ।
शाल्मलीकण्टकप्रख्याः कफमारुतशोणितैः ॥
जायन्ते पिडका यूनां वक्त्रे या मुखदूषिकाः ।
कण्टकैराचितं वृत्तं कण्डूमत्पाण्डुमण्डलम् ॥
पद्मिनीकण्टकप्रख्यैस्तदाख्यं कफवातजम् ।

नीरुजं सममुत्पन्नं मण्डलं कफरक्तजम् ॥
सहजं रक्तमीषच्च श्लक्ष्णं जतुमणिं विदुः ।
अवेदनं स्थिरञ्चैव यस्य गात्रेषु दृश्यते ॥
माषवत्कृष्णमुत्सन्नमनिलान्मशकं दिशेत् ।
कृष्णानि तिलमात्राणि नीरुजानि समानि च ॥
वातपित्तकफोद्रेकात्तान्विद्यात्तिलकालकान् ।
मण्डलं महदल्पं वा श्यामं वा यदि वा सितम् ॥
सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते ।
समुत्थाननिदानाभ्यां चर्म्मकील प्रकीर्त्तितं ॥
क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः ।
सहसा मुखमागम्य मण्डलं विसृजेत्ततः ॥
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ।
मर्द्दनात्पीडनाच्चापि तथैवात्यभिघाततः ॥
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरः ।
तदा वातोपसृष्टन्तु चर्म्म प्रतिनिवर्त्तते ॥
मणेरधस्तात्कोशस्य ग्रन्थिरूपेण लम्बते ।
सवेदनः सदाहश्च पाकञ्च व्रजति क्वचित् ॥
मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकाम् ।
सकण्डूः कठिना चैव सैव श्लेष्मसमुत्थिता ॥
अल्पीयस्खां यदा हर्षाद्बालां गच्छेत्स्त्रियं नरः ।
हस्ताभिघातादथ वा चर्म्मण्युद्वर्त्तिते बलात् ॥

मर्द्दनात्पीडनाद्वापि शुक्रवेगविघाततः।
यस्यावपाट्यते चर्म्म तां विद्यादवपाटिकाम्॥
वातोपसृष्टमेवन्तु चर्म्म संश्रयते मणिम्।
मणिश्चर्म्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च॥
निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम्।
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्न्नच विदीर्य्यते॥
निरुद्धप्रकशं विद्याद्रूढां चावपाटिकाम्।
वेगसन्धारणाद्वायुर्व्विहतो गुदमाश्रितः॥
निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोतिच।
मार्गस्य सौक्ष्म्यात्कृच्छ्रेण पुरीषं तस्य गच्छति॥
सन्निरुद्धगुदं व्याधिमेनं विद्यात्सुदुस्तरम्।
शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्॥
स्विन्नस्यास्नाप्यमानस्य कण्डूरक्तकफोद्भवा।
कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते॥
एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्।
स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः॥
प्रक्लिद्यते यदा स्वेदात्स कण्डूं जनयेत्तदा।
तत्र कण्डूयनात्क्षिप्रं स्फोटः स्रावश्च जायते॥
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम्।

प्रवाहणातिसाराभ्यां निर्गच्छति गुदं वहिः ॥
रूक्षदुर्व्वलदेहस्य तं गुदभ्रंशमादिशेत् ।

---

## ॥ चतुर्द्दशोऽध्यायः ॥

॥ अथातः शूकदोषनिदानं व्याख्यास्यामः ॥

लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते। तद्यथा। सर्षपिका। अष्ठीलिका। ग्रथितं। कुम्भीका। अलजी। मृदितं। सम्मूढपिडका। अवमन्थः। पुष्करिका। स्पर्शहानिः। उत्तमा। शतपोनकः। त्वक्पाकः। शोणितार्व्वुदम्। मांसार्वुदम्। मांसपाकः। विद्रधिः। तिलकालकश्चेति ॥

गौरसर्षपतुल्या तु शूकदुर्भग्नहेतुका ।
पिडका कफरक्ताभ्यां ज्ञेया सर्षपिका बुधैः ॥
कठिना विषमैरन्तैर्म्मारुतस्य प्रकोपतः ।
शूकैस्तु विषसंयुक्तैः पिडकाऽष्ठीलिका भवेत् ॥
शूकैर्यत्पूरितं शश्वद्ग्रथितं तत्कफोत्थितम् ।
कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा ॥
अलजीलक्षणयुक्तामलजीञ्च वितर्कयेत् ।
मृदितं पीडितं यत्तु संरब्धं वायुकोपतः ॥
पाणिभ्यां भृशसंमूढे संमूढपिडका भवेत् ।

दीर्घा वक्त्रश्च पिडका दीर्य्यन्ते मध्यतस्तु याः ॥
सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत् ।
पित्तशोणितसम्भूता पिडका पिडकाचिता ॥
पद्मपुष्करसंस्थाना ज्ञेया पुष्करिकेति सा ।
जनयेत् स्पर्शहानिन्तु शोणितं शूकदूषितम् ॥
मुद्गमाषोपमा रक्ता पिडका रक्तपित्तजा ।
उत्तमैषा तु विज्ञेया शूकाजीर्णनिमित्तजा ॥
छिद्रैरणुमुखैर्यन्तु चितं मेढ्रं समन्ततः ।
वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः ॥
पित्तरक्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान् ।
कृष्णस्फोटैः सरक्तैश्च पिडकाभिश्च पीडितम् ।
यस्य वस्तिरुजश्चोग्रा ज्ञेयं तच्छोणितार्ब्बुदम् ॥
मांसदोषेण जानीयादर्वुदं मांससम्भवं ।
शीर्य्यन्ते यस्य मांसानि यस्य सर्व्वाश्च वेदनाः ॥
विद्यात्तं मांसपाकन्तु सर्व्वदोषकृतं भिषक् ।
विद्रधिं सन्निपातेन यथोक्तमभिनिर्दिशेत् ॥
कृष्णानि चित्राण्यथवा शूकानि सविषाणि च ।
पातितानि पचन्त्याशु मेढ्रं निरवशेषतः ॥
कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः ।
सन्निपातसमुत्थानं तं विद्यात्तिलकालकम् ॥

तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ।
विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः ॥

---

## ॥ पञ्चदशोऽध्यायः ॥

### ॥ अथातो भग्नानां निदानं व्याख्यास्यामः ॥

पतनपीडनप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमाणं द्विविधमेवोत्पद्यते सन्धिमुक्तं काण्डभग्नञ्च ॥

तत्र सन्धिमुक्तमुत्पिष्टं विश्लिष्टं विवर्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम्॥ तत्र प्रसारणाकुञ्चनविवर्त्तनाक्षेपणाऽशक्तिरुग्ररुजत्वं स्पर्शासहत्वं चेति सामान्यं सन्धिमुक्तलक्षणमुक्तम् ॥

विशेषेणोत्पिष्टे सन्धावुभयतः शोफो वेदनाप्रादुर्भावो विशेषतश्च नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति ॥ विश्लिष्टेऽल्पशोफो वेदनासातत्यं सन्धिविक्रियाच ॥ विवर्त्तिते तु सन्धिपार्श्वापगमनाद्विषमाङ्गता वेदना च ॥ अवक्षिप्ते सन्धिविश्लेषस्तीव्ररुजत्वञ्च ॥ अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च ॥ तिर्य्यक्क्षिप्ते त्वेकास्थिपार्श्वापगमनमत्यर्थं वेदना चेति ॥

काण्डभग्नमत ऊर्द्ध्वं वक्ष्यामः ॥ कर्क्कटकमश्वकर्णं चूर्णितं पिच्चितमस्थिच्छल्लितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं

च्छिन्नं पाटितं स्फुटितमिति द्वादशविधं ॥ श्वयथुबाहुल्यं स्पन्दन विवर्त्तनस्पर्शासहिष्णुत्वमवपीड्यमाने शब्दः स्रस्ताङ्गता विवि वेदनाप्रादुर्भावः सर्व्वास्ववस्थासु न शर्म्मलाभ इति समासेन काण्ड भग्नलक्षणमुक्तम् ॥

विशेषतस्तु संमूढमुभयतोऽस्थिमध्यभग्नं ग्रन्थिरिवोन्नतं कर्क्कटकम् ॥ अश्वकर्णवदुद्गतमश्वकर्णकम् ॥ चूर्णितमस्थि तत्तु शब्दस्पर्शाभ्यां बोद्धव्यं ॥ पिच्चितं पृथुतां गतमनल्पशोफं ॥ पार्श्वयोरस्थि हीनोद्गत मस्थिच्छलितं ॥ खल्लेत प्रकम्पमानं काण्डभग्नत्वं ॥ अस्थ्यवयवोऽस्थि मध्यमनुप्रविश्य मज्जानमुन्नह्यतीति मज्जानुगतं ॥ अस्थि निःशेषत श्छिन्नमतिपातितं ॥ आभुग्नमविमुक्तास्थि वक्रं ॥ अन्यतरपार्श्वा वशिष्टं छिन्नं ॥ पाटितमणु बहुविदारितं वेदनावच्च ॥ शूकपूर्ण मिवाध्मातं विपुलं विस्फुटीकृतं स्फुटितमिति ॥ तेषु चूर्णितच्छि न्नातिपातितमज्जानुगतानि कृच्छ्रसाध्यानि कृशवृद्धबालानां क्षत क्षीणकुष्ठश्वासिनां सन्ध्युपगतञ्चेति ॥

भवन्ति चात्र ॥ भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतं ।
जघनं प्रतिपिष्टञ्च वर्ज्जयेत्तच्चिकित्सकः ॥
असंश्लिष्टं कपालन्तु ललाटे चूर्णितञ्च यत् ।
भग्नं स्तनान्तरे शङ्खे पृष्ठे मूर्द्ध्नि च वर्ज्जयेत् ॥
आदितो यच्च दुर्ज्जातमस्थि सन्धिरथापि वा ।
सम्यक् संहितमप्यस्थि दुर्न्यासाद्दुर्न्निबन्धनात् ॥
सङ्क्षोभाद्वापि यद्गच्छेद्विक्रियां तत्तु वर्ज्जयेत् ।

मध्यस्य वयसोऽवस्थास्तिस्रो याः परिकीर्त्तिताः ॥
तत्र स्थिरो भवेज्जन्तुरुपक्रान्तो विजानता।
तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु ॥
कपालानि विभिद्यन्ते स्फुटन्ति रुचकानिच ॥

---

## ॥ षोडशोऽध्यायः ॥

॥ अथातो मुखरोगाणां निदानं व्याख्यास्यामः ॥

मुखरोगाः पञ्चषष्टिः सप्तस्वायतनेषु तत्रायतनान्योष्ठौ दन्तमूलानि दन्ता जिह्वा तालु कण्ठः सर्व्वाणि चेति। तत्राष्टावोष्ठयोः। पञ्चदश दन्तमूलेषु। अष्टौ दन्तेषु। पञ्च जिह्वायाम्। नव तालुनि। सप्तदश कण्ठे। त्रयः सर्वेष्वायतनेषु ॥

तत्रौष्ठप्रकोपा वातपित्तश्लेष्मसन्निपातरक्तमांसमेदोऽभिघातनिमित्ताः ॥

कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ।
दाल्येते परिपुट्येते ओष्ठौ मारुतकोपतः ॥
आचितौ पिडकाभिस्तु सर्षपाकृतिभिर्भृशम्।
सदाहपाकसंस्रावौ नीलौ पीतौ च पित्ततः ॥
सवर्णाभिस्तु चीयेते पिडकाभिरवेदनौ।
कण्डूमन्तौ कफाच्छूनौ पिच्छिलौ शीतलौ गुरू ॥
सकृत्कृष्णौ सकृत्पीतौ सकृच्छ्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिडकाचितौ ॥

खर्ज्जूरफलवर्णाभिः पिडकाभिः समाचितौ ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ ॥
मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुद्गतौ ।
जन्तवश्चात्र मूर्च्छन्ति सृक्कस्रोभयतो मुखात् ॥
मेदसा घृतमण्डाभौ कण्डूमन्तौ स्थिरौ मृदू ।
अच्छस्फटिकसङ्काशमास्रावं स्रवतो गुरू ॥
क्षतजाभौ विदीर्य्येते पाट्येते चाभिघाततः ।
ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥

दन्तमूलगतास्तु शीतादो दन्तपुप्पुटको दन्तवेष्टकः शौषिरो महाशौषिरः परिदर उपकुशो दन्तवैदर्भो वर्द्धनोऽधिमांसो नाड्यः पञ्चेति ॥

शोणितं दन्तवेष्टेभ्यो यस्याकस्मात्प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्तिच परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥
दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान् ।
दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्तजः ॥
स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥
श्वयथुर्दन्तमूलेषु रुजावान्कफरक्तजः ।
लालास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः ॥

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते।
दन्तमांसानि पच्यन्ते मुखञ्च परिपीड्यते॥
यस्मिन्स सर्व्वजो व्याधिर्म्महाशौषिरसंज्ञकः।
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक्॥
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः।
वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च॥
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः।
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते॥
यस्मिन्नुपकुशः स स्यात्पित्तरक्तकृतो गदः।
घृष्टेषु दन्तमूलेषु संरम्भो जायते महान्॥
भवन्ति च चला दन्ताः स वैदर्भोऽभिघातजः।
मारुतेनाधिको दन्तो जायते तीव्रवेदनः॥
वर्द्धनः स मतो व्याधिर्ज्जाते रुक् प्रशाम्यति।
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः॥
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः॥

दन्तगतास्तु दालनः क्रिमिदन्तको दन्तहर्षो भञ्जनकः शर्करा कपालिका श्यावदन्तको हनुमोचश्चेति॥

दाल्यन्ते बहुधा दन्ता यस्मिंस्तीव्ररुगन्विताः।
दालनः स इति ज्ञेयः सदागतिनिमित्तजः॥
कृष्णश्छिद्री चलः स्रावी ससंरम्भो महारुजः।

अनिमित्तरुजो वाताद्विज्ञेयः कृमिदन्तकः ॥
दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात्समीरणात् ॥
वक्त्रं वक्रं भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक्।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥
शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै।
सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा ॥
दलन्ति दन्तवल्कानि यदा शर्करया सह।
ज्ञेया कपालिका सैव दशनानां विनाशिनी ॥
योऽसृग्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥
वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः।
हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः ॥

जिह्वागतास्तु कण्टकास्त्रिविधास्त्रिभिर्दोषैरलास उपजिह्विका चेति।

जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा ॥
पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च।
कफेन गुर्वी बहुला चिता च मांसोद्गमैः शाल्मलिकण्टकाभैः ॥
जिह्वातले यः श्वयथुः प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तम्भयति प्रवृद्धो मूले तु जिह्वा भृशमेति पाकम ॥
जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तयोनिः।

प्रसेककण्डूपरिदाहयुक्ता प्रकथ्यतेऽसावुपजिह्विकेति ॥

तालुगतास्तु गलशुण्डिका तुण्डिकेर्य्यऽध्रुषो मांसकच्छपोऽर्ब्बुदं मांससङ्घातस्तालुपुप्पुटस्तालुशोषस्तालुपाक इति ॥

श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो दीर्घः शोफो ध्मातवस्तिप्रकाशः ।
तृष्णाकासश्वासकृत्सम्प्रदिष्टो व्याधिर्व्वैद्यैःकण्ठशुण्डीति नाम्ना ॥
शोफःस्थूलस्तोददाहप्रपाकी प्रागुक्ताभ्यां तुण्डिकेरी मता तु ।
शोफः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः ॥
कूर्म्मोत्सन्नो ऽवेदनोऽशीघ्रजन्माऽरक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात् ।
पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तादर्ब्बुदं प्रोक्तलिङ्गम् ॥
दुष्टं मांसं श्लेष्मणा नीरुजञ्च ताल्वन्तस्थं मांससङ्घातमाहुः ।
नीरुक् स्थायी कोलमात्रः कफात्स्यान्मेदोयुक्तात्पुप्पुटस्तालुदेशे ॥
शोषोऽत्यर्थं दीर्य्यते चापि तालुः श्वासो वातात्तालुशोषः सपित्तात् ।
पित्तं कुर्य्यात्पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदन्ति ॥

कण्ठगतास्तु रोहिण्यः पञ्च कण्ठशालूकमधिजिह्वो बलयो बलास एकवृन्दो वृन्दः शतघ्नी गिलायुर्गलविद्रधिर्गलौघः स्वरघ्नो मांसतानो विदारी चेति ॥

गलेऽनिलः पित्तकफौ च मूर्च्छितौ
पृथक् समस्ताश्च तथैव शोणितम् ।
प्रदूष्य मांसं गलरोधिनोऽङ्कुरान्
सृजन्ति यान्साऽसुहरा तु रोहिणी ॥
जिह्वां समन्ताद्भृशवेदना ये

मांसाङ्कुराः कण्ठनिरोधिनः स्युः ।
तां रोहिणीं वातकृतां वदन्ति
वातात्मकोपद्रवगाढयुक्तां ॥
क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्ततः स्यात् ।
स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा वै ॥
गम्भीरपाकाऽप्रतिवारवीर्य्या
त्रिदोषलिङ्गा त्रयसम्भवा स्यात् ।
स्फोटाचिता पित्तसमानलिङ्गाऽ
साध्या प्रदिष्टा रुधिरात्मिकेयम् ॥
कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥
जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वाप्रबन्धोपरि रक्तमिश्रः ।
ज्ञेयो द्विजिह्वः खलु रोग एष विवर्जयेदागतपाकमेनं ॥
बलास एवायतमुन्नतञ्च शोफं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवारवीर्य्यं विवर्जनीयं बलयं वदन्ति ॥
गले च शोफं कुरुतः प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोपपन्नं ।

मर्म्मच्छिदं दुस्तरमेतदाहुर्बलाससंज्ञं निपुणा विकारम् ॥
वृत्तोन्नतो यः श्वयथुः सदाहः कण्ड्वन्वितोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकल्पितोऽसौ व्याधिर्बलासक्षतजप्रसूतः ॥
समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति।
तच्चापि पित्तक्षतजप्रकोपाद्विद्यात्सतोदं पवनास्रजं तम् ॥
वर्त्तिर्घना कण्ठनिरोधिनी या चिताऽतिमात्रं पिशितप्ररोहैः ।
नानारुजोच्छ्रायकरी त्रिदोषाज्ज्ञेया शतघ्नीव शतघ्न्यसाध्या ॥
ग्रन्थिर्गलेत्वामलकास्थिमात्रः स्थिरोऽल्परुक्स्यात्कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवाशनञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥
सर्व्वं गलं व्याप्य समुत्थितो यः शोफो रुजो यत्र वसन्ति सर्व्वाः ।
स सर्व्वदोषो गलविद्रधिस्तु तस्यैव तुल्यः खलुसर्व्वजस्य ॥
शोफो महानन्नजलावरोधी तीव्रज्वरो वातगतेर्न्निहन्ता ।
कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्त्यतेऽसौ ॥
योऽतिप्रताम्यन् श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु ज्ञेयः सरोगः श्वसनात्स्वरघ्नः ॥
प्रतानवान् यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी प्राणप्रणुत्सर्व्वकृतो विकारः ॥
सदाहतोदं श्वयथुं सरक्तमन्तर्गले पूतिविशीर्णमांसं ।
पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात्स तु येन शेते ॥
सर्व्वसरास्तु वातपित्तकफशोणितनिमित्ताः ॥
स्फोटैः सतोदैर्व्वदनं समन्ताद्यस्याचितं सर्व्वसरः स वातात् ॥

रक्तैः सदाहैस्तनुभिः सपीतैर्य्यस्याचितं वापि स पित्तकोपात्।
कण्डूयुतैरल्परुजैः सवर्णैर्यस्याचितं चापि स वै कफेन ॥
रक्तेन पित्तोदित एक एव कैश्चित्प्रदिष्टो मुखपाकसंज्ञः ॥
इति सुश्रुते आयुर्व्वेदशास्त्रे निदानस्थानं समाप्तं ॥

## ॥ शारीरस्थानं ॥

### ॥ प्रथमाध्यायः ॥

अथातः सर्व्वभूतचिन्ताशारीरं व्याख्यास्यामः ॥

सर्व्वभूतानां कारणमकारणं सत्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवौदकानां भावानां ॥

तस्मादव्यक्तान्महानुत्पद्यते तल्लिङ्ग एव । तल्लिङ्गाच्च महतस्तल्लिङ्ग एवाहङ्कार उत्पद्यते। स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति। तत्र वैकारिकादहङ्कारात्तैजससहायात्तल्लक्षणान्येवैकादशेन्द्रियाण्युत्पद्यन्ते। तद्यथा। श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादमनांसीति। तत्र पूर्व्वाणि पञ्च बुद्धीन्द्रियाणि। इतराणि पञ्च कर्म्मेन्द्रियाणि। उभयात्मकं मनः ॥

भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते तद्यथा। शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्यः। एवमेषा तत्त्वचतुर्व्विंशतिर्व्याख्याता ॥

तत्र बुद्धीन्द्रियाणां शब्दादयो विषयाः। कर्म्मेन्द्रियाणां यथासङ्ख्यं वचनादानानन्दविसर्गविहरणानि॥ अव्यक्तं महानहङ्कारः पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः शेषाः षोडश विकाराः। स्वः स्वश्चैषां विषयोऽधिभूतं। स्वयमध्यात्ममधिदैवतञ्च। अथ बुद्धेर्ब्रह्मा। अहङ्कारस्येश्वरः। मनसश्चन्द्रमाः। दिशः श्रोत्रस्य। त्वचो वायुः सूर्य्यश्चक्षुषोः। रसनस्यापः। पृथिवी घ्राणस्य। वचसोऽग्निः। हस्तयोरिन्द्रः। पादयोर्व्विष्णुः। पायोर्म्मित्रं। प्रजापतिरुपस्थस्येति। तत्र सर्व्व एवाचेतन एष वर्गः पुरुषः पञ्चविंशतितमः सच कार्य्यकारणसंयुक्तश्चेतयिता भवति। सत्यप्यचैतन्ये प्रधानस्य पुरुषकैवल्यार्थं प्रवृत्तिमुपदिशन्ति चीरादींश्चेहत्वनुदाहरन्ति॥

अत ऊर्द्धं प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः॥ तद्यथा। उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ उभावपि नित्यौ उभावप्यपरौ उभौच सर्व्वगताविति॥ एका तु प्रकृतिरचेतना त्रिगुणा वीजधर्म्मिणी प्रसवधर्म्मिण्यमध्यस्थधर्म्मिणी चेति॥ बहवस्तु पुरुषाश्चेतनावन्तोऽगुणा अवीजधर्म्मिणोऽप्रसवधर्म्मिणो मध्यस्थधर्म्मिणश्चेति॥

तत्र कारणानुरूपं कार्य्यमिति कृत्वा सर्व्व एवैते विशेषाः सत्वरजस्तमोमया भवन्ति तदञ्जनत्वात्तन्मयत्वाच्च तद्गुणा एव पुरुषा भवन्तीत्येके भाषन्ते॥

वैद्यकेतु॥ स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा।
परिणामञ्च मन्यन्ते प्रकृतिं पृथुदर्शिनः॥

तन्मयान्येव भूतानि तद्गुणान्येव चादिशेत् ।
तैश्च तल्लक्षणः कृत्स्नो भूतग्रामो व्यजन्यत ॥
तस्योपयोगोऽभिहितश्चिकित्सां प्रति सर्व्वदा ।
भूतेभ्योहि परं यस्मान्नास्ति चिन्ता चिकित्सिते ॥
यतोऽभिहितं तत्सम्भवद्रव्यसमूहोभूतादिरुक्तः ॥
भौतिकानि चेन्द्रियाण्यायुर्व्वेदे वर्ण्यन्ते तथेन्द्रियार्थाः ॥
भवति चात्र ॥ इन्द्रियेणेन्द्रियार्थन्तु स्वं स्वं गृह्णाति मानवः ।
नियतं तुल्ययोनित्वान्नान्येनान्यमिति स्थितिः ॥

नचायुर्वेदशास्त्रेषूपदिश्यन्ते सर्व्वगताः क्षेत्रज्ञा नित्याश्च । अस
र्व्वगतेषु च क्षेत्रज्ञेषु नित्यपुरुषख्यापकान् हेतूनुदाहरन्ति ॥
आयुर्व्वेदशास्त्रेष्वसर्व्वगताः क्षेत्रज्ञा नित्याश्च तिर्य्यग्योनिमानुषदे
वेषु सञ्चरन्ति धर्म्माधर्म्मनिमित्तं तएतेऽनुमानग्राह्याः परम
सूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसोः सन्निपातेष्वऽभिव्यज्यन्ते
यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति । स एव
कर्म्मपुरुषश्चिकित्साधिकृतः ॥

तस्य सुखदुःखेच्छाद्वेषौ प्रयत्नः प्राणापानावुन्मेषनिमेषौ बुद्धिर्म
नःसङ्कल्पो विचारणा स्मृतिर्विज्ञानमध्यवसायोविषयोपलब्धिश्च
गुणाः ॥ सात्विकास्तु आनृशंस्यं संविभागरुचिता तितिक्षा सत्यं धर्म्म
आस्तिक्यं ज्ञानं बुद्धिर्मेधा स्मृतिर्धृतिरनभिषङ्गश्च॥ राजसास्तु दुःख
बहुलताऽटनशीलता ऽधृतिरहङ्कार आनृतिकत्वमकारुण्यं दम्भो
मानो हर्षः कामः क्रोधश्च ॥ तामसास्तु विषादित्वं नास्तिक्यमधर्म

शीलता बुद्धेर्निरोधोऽज्ञानं दुर्मेधस्त्वमकर्म्मशीलता निद्रालुत्वञ्चेति॥ आन्तरीचास्तु शब्दः शब्देन्द्रियं सर्व्वच्छिद्रसमूहो विविक्तता च॥ वायव्यास्तु स्पर्शः स्पर्शेन्द्रियं सर्व्वचेष्टासमूहः सर्व्वशरीरस्पन्दनं लघुता च॥ तैजसास्तु रूपं रूपेन्द्रियं वर्णः सन्तापो भ्राजिष्णुता पक्तिरमर्षस्तैक्ष्ण्यं शौर्य्यञ्च॥ आप्यास्तु रसो रसनेन्द्रियं सर्व्वद्रवसमूहो गुरुता शैत्यं स्नेहो रेतश्च॥ पार्थिवास्तु गन्धो गन्धेन्द्रियं सर्व्वमूर्त्तिसमूहो गुरुता चेति॥ तत्र सत्त्वबहुलमाकाशं। रजोबहुलो वायुः। सत्त्वरजोबहुलोऽग्निः। सत्त्वतमोबहुला आपः। तमोबहुला पृथिवीति॥

श्लोकौ चात्र भवतः॥

अन्योन्यानुप्रविष्टानि सर्व्वाण्येतानि निर्द्दिशेत्।
स्वे स्वे द्रव्ये तु सर्व्वेषां व्यक्तं लक्षणमिष्यते॥
अष्टौ प्रकृतयः प्रोक्ता विकाराः षोडशैव तु।
क्षेत्रज्ञस्य समासेन स्वतन्त्रपरतन्त्रयोः॥

---

## ॥ द्वितीयोऽध्यायः॥

अथातः शुक्रशोणितशुद्धिं नाम शारीरं व्याख्यास्यामः॥

वातपित्तश्लेष्मकुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषरेतसः प्रजोत्पादने न समर्था भवन्ति॥ तेषु वातवर्णवेदनं वातेन। पित्तवर्णवेदनं पित्तेन। श्लेष्मवर्णवेदनं श्लेष्मणा। शोणितवर्णवेदनं कुणपगन्ध्यनल्पं रक्तेन। ग्रन्थिभूतं श्लेष्मवाताभ्यां। पूतिपूयनिभं पित्तश्लेष्मभ्यां। क्षीणं

आगुक्तं पित्तमारुताभ्यां । मूत्रपुरीषगन्धि सन्निपातेनेति । तेषु कुणपग्रन्थिपूतिपूयक्षीणरेतसः कृच्छ्रसाध्याः ॥ मूत्रपुरीषरेतसस्त्वसाध्याः साध्यमन्यच्चेति ॥

आर्त्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैश्चोपसृष्टमबीजं भवति तदपि दोषवर्णवेदनादिभिर्विज्ञेयं। तेषु कुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषप्रकाशमसाध्यं साध्यमन्यद्भवति ॥

भवन्ति चात्र ॥ तेष्वाद्यान् शुक्रदोषांस्त्रीन् स्नेहस्वेदादिभिर्जयेत्।

क्रियाविशेषैर्मतिमांस्तथाचोत्तरवस्तिभिः।
पाययेत नरं सर्पिर्भिषक् कुणपरेतसि।
धातकीपुष्पखदिरदाडिमार्जुनसाधितं॥
पाययेदथ वा सर्पिः शालसारादिसाधितं।
ग्रन्थिभूते शठीसिद्धं पालाशे वापि भस्मनि॥
परूषकवटादिभ्यां पूयप्रख्ये च साधितं।
प्रागुक्तं वक्ष्यते यच्च तत् कार्य्यं क्षीणरेतसि॥
विट्प्रभे पाययेत् सिद्धं चित्रकोशीरहिङ्गुभिः।
स्निग्धं वान्तं विरिक्तञ्च निरूढमनुवासितं॥
योजयेच्छुक्रदोषार्त्तं सम्यगुत्तरवस्तिना।
विधिमुत्तरवस्त्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतसृष्वार्त्तवार्त्तिषु।
कुर्य्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च॥

ग्रन्थिभूते पिबेत् पाठां व्यूषणं वृचकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे ॥
पिबेद्भद्रश्रियः क्वाथञ्चन्दनक्वाथमेव च।
शुक्रदोषहराणाञ्च यथास्वमवचारणं ॥
दोषाणां शुद्धिकरणं शेषास्वप्यार्त्तवार्त्तिषु।
अन्नं शालियवं मद्यं हितं मांसञ्च पित्तल॥
स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च।
शुक्रमिच्छन्ति केचित्तु तैलचौद्रनिभन्तथा॥
शशासृक्प्रतिमं यत्तु यद्वा लाचारसोपमं।
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥
तदेवातिप्रसङ्गेन प्रवृत्तमनृतावपि।
असृग्दरं विजानीयादतोऽन्यद्रक्तलचणात्॥
असृग्दरो भवेत् सर्व्वः साङ्गमर्द्दः सवेदनः।
तस्यातिवृत्तौ दौर्ब्बल्यं भ्रमो मूर्च्छा तमस्तृषा ॥
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः।
तरुण्या हितसेविन्यास्तदल्पोपद्रवं भिषक्॥
रक्तपित्तविधानेन यथावत्समुपाचरेत्।
दोषैरावृतमार्गत्वादार्त्तवं नश्यति स्त्रियाः॥
तत्र मत्स्यकुलत्थाम्लतिलमाषसुरा हिताः।
पाने मूत्रमुदश्विच्च दधि शुक्तञ्च भोजने॥
चीणं प्रागीरितं रक्तं सलचणचिकित्सितं।

तथाप्यत्र विधातव्यं विधानं नष्टरक्तवत् ॥

एवमदुष्टशुक्रः शुद्धार्त्तवा ॥ ऋतौ प्रथमदिवसात्प्रभृति ब्रह्म
चारिणी दिवास्वप्नाञ्जनाश्रुपातस्नानानुलेपनाभ्यङ्गनखच्छेदनप्रधा
वनहसनकथनातिशब्दश्रवणावलेखनानिलायासान् परिहरेत् ।
किङ्कारणं । दिवा स्वपन्त्याः स्वापशीलोऽञ्जनादन्धो रोदनाद्वि
कृतदृष्टिः स्नानानुलेपनाद्दुःखशीलस्तैलाभ्यङ्गात् कुष्ठी नखापकर्त्त
नात् कुनखी प्रधावनाच्चञ्चलो हसनाच्छ्यावदन्तौष्ठतालुजिह्वः
प्रलापी चातिकथनादतिशब्दश्रवणाद्बधिरोऽवलेखनात् खलति
र्मारुतायाससेवनादुन्मत्तो गर्भो भवतीत्येवमेतान् परिहरेत् ॥
दर्भसंस्तरशायिनीं करतलशरावपर्णान्यतमभोजिनीं हविष्यं त्र्यहञ्च
भर्त्तुः संरक्षेत् । ततः शुद्धस्नातां चतुर्थेऽहन्यहतवाससमलङ्कृतां
कृतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत् । तत् कस्य हेतोः ।

पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्त्रं भर्त्तारं दर्शयेदतः ॥
ततो विधानं पुत्त्रीयमुपाध्यायः समाचरेत् ।
कर्म्मान्ते च क्रमं ह्येनमारभेत विचक्षणः ॥

ततोऽपराह्णे पुमान्मासं ब्रह्मचारी सर्पिःस्निग्धः सर्पिःक्षीराभ्यां
शाल्योदनं भुक्त्वा मासं ब्रह्मचारिणीं तैलस्निग्धां तैलमाषोत्तरा
हारां नारीमुपेयाद्रात्रौ सामादिभिरभिविश्वास्य विकल्प्यैवञ्च
तुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां द्वादश्यां चोपेयादिति पुत्रकामः ॥

एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च ।

प्रजासौभाग्यमैश्वर्य्यं बलञ्च दिवसेषु वै ॥

अतः परं पञ्चम्यां सप्तम्यां नवम्यामेकादश्याञ्च स्त्रीकामः ॥ त्रयोदशीप्रभृतयो निन्द्याः ॥

तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति। यश्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते। द्वितीयेऽप्येवं सूतिकागृहे वा। तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्व्वा भवति। चतुर्थेतु सम्पूर्णाङ्गो दीर्घायुश्च भवति। नच प्रवर्त्तमाने रक्ते वीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोतःप्लावि द्रव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्धङ्गच्छति तद्वदेव द्रष्टव्यं। तस्मान्नियमवतीं त्रिरात्रं परिहरेत्। अतः परं मासादुपेयात्।

लब्धगर्भायाश्चैतेष्वहःसु लक्षणावटशुङ्गासहदेवा विश्वदेवानामन्यतमं क्षीरेणाभिषुत्य त्रींश्चतुरो वा विन्दून्दद्याद्दक्षिणे नासापुटे पुत्त्रकामायै नच तान्निष्ठीवेत्॥

ध्रुवञ्चतुर्णां सान्निध्याद्गर्भः स्याद्विधिपूर्व्वकः।
ऋतुक्षेत्राम्बुवीजानां सामग्र्यादङ्कुरो यथा॥
एवं जाता रूपवन्तो महासत्त्वाश्चिरायुषः।
भवन्त्यृणस्य मोक्तारः सत्पुत्त्राः पुत्त्रिणे हिताः॥

तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावव्धातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामं॥ यादृग्वर्णमाहारमुपसेवते गर्भिणी तादृग्वर्णप्रसवा भवति

त्येके भाषन्ते ॥ तत्र दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धं करोति। तदेव रक्तानुगतं रक्ताक्षं पित्तानुगतं पिङ्गाक्षं श्लेष्मानुगतं शुक्लाक्षं वातानुगतं विकृताक्षमिति ॥

भवन्ति चात्र ॥ घृतपिण्डो यथैवाग्निमाश्रितः प्रविलीयते।
विसर्पत्यार्त्तवं नार्य्यास्तथा पुंसां समागमे ॥
बीजेऽन्तर्व्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ।
यमावित्यभिधीयेते धर्म्मेतरपुरःसरौ ॥
पित्रोरत्यल्पबीजत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयं ॥
यः पूतियोनौ जायेत स सौगन्धिकसंज्ञितः।
स योनिशेफसोर्गन्धमाघ्राय लभते बलं ॥
स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते।
कुम्भीकः स च विज्ञेयईर्ष्यकं शृणु चापरं ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते।
ईर्ष्यकः स च विज्ञेयः षण्डकं शृणु पञ्चमं ॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते।
ततः स्त्रीचेष्टिताकारो जायते षण्डसंज्ञितः ॥
ऋतौ पुरुषवद्वापि प्रवर्त्तेताङ्गना यदि।
तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ॥
आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा।
सरेतसस्त्वमी ज्ञेया अशुक्रःषण्डसंज्ञितः ॥

अनया विप्रकृत्या तु तेषां शुक्रवहाः सिराः ॥
हर्षात् स्फुटत्वमायान्ति ध्वजोच्छ्रायस्ततो भवेत् ॥
आहाराचारचेष्टाभिर्य्यादृशीभिः समन्वितौ ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्त्रोऽपि तादृशः ॥
यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन ।
मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते ॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणं ।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः ॥
सर्पवृश्चिककुष्माण्डविकृताकृतयश्च ये ।
गर्भास्त्वेते स्त्रियाश्चैव ज्ञेयाः पापकृता भृशं ॥
गर्भो वातप्रकोपेण दौर्हृदे चावमानिते ।
भवेत् कुब्जः कुणिःपङ्गुर्मूको मिण्मिण एव च ॥
मातापित्रोस्तु नास्तिक्यादशुभैश्च पुराकृतैः ।
वातादीनाञ्च कोपेन गर्भो विकृतिमाप्नुयात् ॥
मलाल्पत्वादयोगाच्च वायोः पक्वाशयस्य च ।
वातमूत्रपूरीषाणि न गर्भस्थः करोति हि ॥
जरायुणा मुखेच्छन्ने कण्ठे च कफवेष्टिते ।
वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति ॥
निश्वासोच्छ्वाससङ्क्षोभस्वप्नान्गर्भोऽधिगच्छति ।

मातुर्निश्वसितोच्छ्वाससङ्क्षोभस्वप्नसम्भवान् ॥
सन्निवेशः शरीराणां दन्तानां पतनोद्भवौ ।
तलेष्वसम्भवो यश्च रोम्णामेतत् स्वभावतः ॥
भाविताः पूर्व्वदेहेषु सततं शास्त्रबुद्धयः ।
भवन्ति सत्वभूयिष्ठाः पूर्व्वजातिस्मरा नराः ॥
कर्म्मणा चोदितो येन तदाप्नोति पुनर्भवे ।
अभ्यस्ताः पूर्व्वदेहे ये तानेव भजते गुणान् ॥

---

॥ तृतीयोऽध्यायः ॥

अथातो गर्भावक्रान्तिं शारीरं व्याख्यास्यामः ॥

सौम्यं शुक्रमार्त्तवमाग्नेयमितरेषामप्यत्र भूतानां सान्निध्यमस्त्यणुना विशेषेण परस्परोपकारात्परस्परानुग्रहात्परस्परानुप्रवेशाच्च ॥

तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुरुदीरयति। ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन । ततोऽग्निसोमसंयोगात् संसृज्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते ॥ क्षेत्रज्ञो वेदयिता स्प्रष्टा घ्राता द्रष्टा श्रोता रसयिता पुरुषः स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते दैवसंयोगादक्षयोऽव्ययोऽचिन्त्यो भूतात्मना सहान्वक्षं सत्वरजस्तमोभिर्दैवासुरैरपरैश्च भावैर्वायुनाभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते॥

तत्र शुक्रबाहुल्यात् पुमानार्त्तवबाहुल्यात् स्त्री साम्यादुभयोर्नं पुंसकमिति ॥ ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवः ॥

अदृष्टार्त्तवाप्यस्तीत्येके भाषन्ते ॥

भवन्ति चात्र ॥ पीनप्रसन्नवदनां प्रक्लिन्नात्ममुखद्विजां।

नरकामां प्रियकथां स्रस्तकुक्ष्यक्षिमूर्द्धजां ॥

स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचं ॥

हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति ।

नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा ॥

ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ।

मासेनोपचितं काले धमनीभ्यान्तदार्त्तवं ॥

ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत् ।

तद्वर्षाद्द्वादशात्काले वर्त्तमानमसृक्पुनः ॥

जरापक्वशरीराणां याति पञ्चाशतः क्षयं ।

युग्मेषु तु पुमान् प्रोक्तो दिवसेष्वन्यथाऽबला ॥

पुष्पकाले शुचिस्तस्मादपत्यार्थी स्त्रियं व्रजेत् ॥

तत्र सद्योगृहीतगर्भाया लिङ्गानि श्रमो ग्लानिः पिपासा सक्थि सदनं शुक्रशोणितयोरवबन्धः स्फुरणञ्च योनेः ॥

स्तनयोःकृष्णमुखता रोमराज्युद्गमस्तथा ।

अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः ॥

अकामतश्छर्दयति गन्धादुद्विजते शुभात् ।

प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते ॥

तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कुटकासनं चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणं चाकाले वेगविधारणञ्च न सेवेत॥

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते ॥

तत्र प्रथमे मासि कललं जायते। द्वितीये शीतोष्मानिलैरभिप्रपच्यमानानां महाभूतानां सङ्घातो घनः सञ्जायते यदि पिण्डः पुमान् स्त्री चेत्पेशी नपुंसकश्चेदर्बुदमिति। तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति। चतुर्थे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति गर्भहृदयप्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति कस्मात् तत्स्थानत्वात्तस्माद्गर्भश्चतुर्थे मास्यभिप्रायमिन्द्रियार्थेषु करोति द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते। दौहृदविमाननात्कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति। तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत्। लब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति॥

भवन्ति चात्र॥ इन्द्रियार्थांस्तु यान् यान्सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान्भिषगाहृत्य दापयेत्।
सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितं।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयं॥
येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना।

प्रजायेत सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये ॥
राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते ॥
दुकूलपट्टकौशेयभूषणादिषु दौहृदात् ॥
अलङ्कारैषिणं पुत्त्रं ललितं सा प्रसूयते।
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते ॥
देवताप्रतिमायान्तु प्रसूते पार्षदोपमं।
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते ॥
गोधामांसाऽशने पुत्त्रं सुषुप्सुं धारणात्मकं।
गवां मांसेच बलिनं सर्व्वक्लेशसहन्तथा ॥
माहिषे दौहृदाच्छूरं रक्ताक्षं लोमसंयुतं।
वराहमांसात् स्वप्नालुं शूरं सञ्जनयेत्सुतं ॥
मार्गादिक्रान्तजङ्घालं सदा वनचरं सुतं।
सृमरादिग्नमनसं नित्यभीतं च तैत्तिरात् ॥
अतोऽनुक्तेषु या नारी समभिध्याति दौहृदं।
शरीराचारशीलैः सा समानं जनयिष्यति ॥
कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा तथा दैवयोगाद्दौहृदं जनयेद्धृदि ॥

पञ्चमे मनः प्रतिबुद्धतरं भवति। षष्ठे बुद्धिः। सप्तमे सर्व्वाङ्ग प्रत्यङ्गविभागः प्रव्यक्ततरः। अष्टमेऽस्थिरीभवत्योजस्तत्र जात श्चेन्न जीवेन्निरोजस्त्वान्नैर्ऋतभागत्वाच्च ततो बलिं मांसौदनमस्मै

दापयेत्। नवमदशमैकादशद्वादशानामन्यतमस्मिञ्जायते। अतो न्यथा विकारी भवति ॥

मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा सास्य मातुराहाररसवीर्य्यमभिवहति। तेनोपस्नेहेनास्याभिवृद्धिर्भवति। असञ्जाताङ्गप्रत्यङ्गप्रविभागमानिषेकात्प्रभृति सर्व्वशरीरावयवानुसारिणीनां रसवहानां तिर्य्यग्गतानां धमनीनामुपस्नेहो जीवयति ॥

गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्देहेन्द्रियाणां ॥ हृदयमिति कृतवीर्य्यो बुद्धेर्मनसश्च स्थानत्वात् ॥ नाभिरिति पाराशर्य्यस्ततो हि वर्द्धते देहो देहिनः ॥ पाणिपादमिति मार्कण्डेयस्तन्मूलत्वाच्चेष्टाया गर्भस्य। मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबद्धत्वात् सर्व्वगात्रसम्भवस्य ॥ तत्तु न सम्यक् ॥ सर्व्वाङ्गप्रत्यङ्गानि युगपत् सम्भवन्तीत्याह धन्वन्तरिर्गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च। तद्यथा। चूतफले परिपक्वे केशरमांसास्थिमज्जानः पृथग्दृश्यन्ते कालप्रकर्षात्तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति। एतेनैव वंशाङ्कुरोऽपि व्याख्यातः। एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः। तान्येव कालप्रकर्षात् प्रव्यक्तानि भवन्ति ॥

तत्र गर्भस्य पितृजमातृजरसजात्मजसत्वजसात्म्यजानि शरीरलक्षणानि व्याख्यामः ॥ गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्ना

युधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि ॥ मांसशोणितमेदो मज्जहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि ॥ शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रसजानि ॥ इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिकञ्चात्मजानि ॥ सत्वजान्युत्तरं वक्ष्यामः॥ वीर्य्यमारोग्यं बलवर्णौ मेधा च सात्म्यजानि ॥

तत्र यस्या दक्षिणे स्तने प्राक् पयोदर्शनं भवति दक्षिणाक्षिम हत्त्वञ्च पूर्व्वञ्च दक्षिणं सक्थ्युत्कर्षति बाहुल्याच्च पुन्नामधेयेषु द्रव्येषु दौहृदमभिध्यायति स्वप्नेषु चोपलभते पद्मोत्पलकुमुदाम्रातका दीनि पुन्नामान्येव प्रसन्नमुखवर्णा च भवति तां ब्रूयात् पुत्त्रमियं जनयिष्यतीति तद्विपर्य्यये कन्यां ॥ यस्याः पार्श्वद्वयमुन्नतम्पुर स्तान्निर्गतमुदरं प्रागभिहितलक्षणं च तस्या नपुंसकमिति विद्यात्। यस्या मध्ये निम्नं द्रोणीप्रभूतमुदरं सा युग्मं प्रसूयत इति॥ भवन्ति चात्र ॥ देवताब्राह्मणपराः शौचाचारहिते रताः ।

महागुणान् प्रसूयन्ते विपरीतास्तु निर्गुणान् ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते ।
अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्ति गुणागुणाः ॥
ते ते गर्भस्य विज्ञेया धर्म्माधर्म्मनिमित्तजाः ॥

---

॥ चतुर्थोऽध्यायः ॥

अथातो गर्भव्याकरणं नाम शारीरं व्याख्यास्यामः ॥

अग्निःसोमो वायुः सत्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः॥

तस्य खल्वेवम्प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति ॥ तासां प्रथमाऽवभासिनी नाम या सर्व्ववर्णानवभासयति पञ्चविधाञ्च छायां प्रकाशयति सा व्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकण्टकाधिष्ठाना द्वितीया लोहिता नाम षोडशभागप्रमाणा तिलकालकन्यच्छव्यङ्गाधिष्ठाना तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना पञ्चमी वेदिनी नाम व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना षष्ठी रोहिणी नाम व्रीहिप्रमाणा ग्रन्थ्यपच्यर्ब्बुदश्लीपदगलगण्डाधिष्ठाना सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा भगन्दरविद्रध्यर्शोऽधिष्ठाना यदेतत्प्रमाणं निर्द्दिष्टं तन्मांसलेष्ववकाशेषु न ललाटे सूक्ष्माङ्गुल्यादिषु। यतो वक्ष्यत्युदरेषु व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येदिति ॥ कलाः खल्वपि सप्त सम्भवन्ति धात्वाशयान्तरमर्य्यादाः ॥

भवतश्चात्र ॥ यथाहि सारः काष्ठेषुच्छिद्यमानेषु दृश्यते।
तथा धातुर्हि मांसेषुच्छिद्यमानेषु दृश्यते ॥
स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा।
श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान्विदुः ॥

तासां प्रथमा मांसधरा नाम यस्यां मांसे सिरास्नायुधमनीस्रोतसां प्रताना भवन्ति ॥

भवति चात्र ॥ यथा विसमृणालानि विवर्द्धन्ते समन्ततः

भूमौ पङ्कोदकस्थानि तथा मांसे सिरादयः।

द्वितीया रक्तधरा नाम मांसस्याभ्यन्तरतस्तस्यां शोणितं विशेषतश्च सिरासु यकृत्प्लीह्नोश्च भवति॥

भवति चात्र॥ वृक्षाद्यथाभिप्रहतात् क्षीरिणः क्षीरमावहेत्।
मांसादेवं क्षतात् क्षिप्रं शोणितं सम्प्रसिच्यते॥

तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरस्थमण्वस्थिषु च महत्सु च मज्जा भवति॥

भवति चात्र॥ स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः।
अथेतरेषु सर्व्वेषु सरक्तं मेद उच्यते॥
शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता।

चतुर्थी श्लेष्मधरा नाम सर्व्वसन्धिषु प्राणभृतां भवति॥

भवति चात्र॥ स्नेहाभ्यक्ते यथाक्षे च चक्रं साधु प्रवर्त्तते।
सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा॥

पञ्चमी पुरीषधरा नाम यान्तःकोष्ठे मलमभिविभजते पक्काशयस्था॥

भवति चात्र॥ यकृत्समन्तात् कोष्ठञ्च तथान्त्राणि समाश्रिता।
उण्डुकस्थं विभजते मलं मलधरा कला॥

षष्ठी पित्तधरा नाम या चतुर्व्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्काशयोपस्थितं धारयति॥

भवति चात्र॥ अशितं खादितं पीतं लीढं कोष्ठगतं नृणां।
तज्जीर्य्यति यथाकालं शोषितं पित्ततेजसा॥

सप्तमी शुक्रधरा नाम या सर्व्वप्राणिनां सर्व्वशरीरव्यापिनी ॥

भवन्ति चात्र ॥ यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा।

शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरः ॥

द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।

मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते ॥

कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा।

स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते ॥

गृहीतगर्भाणामार्त्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण तस्माद्गृहीतगर्भाणामार्त्तवं न दृश्यते। ततस्तदधः प्रतिहत मूर्द्धमागतमपरञ्चोपचीयमानमपरेत्यभिधीयते। शेषश्चोर्द्धतरमागतं पयोधरावभिप्रतिपद्यते तस्माद्गर्भिण्यः पीनोन्नतपयोधरा भवन्ति ॥

गर्भस्य यकृत्प्लीहानौ शोणितजौ। शोणितफेनप्रभवः फुप्फुसः शोणितकिट्टप्रभवउण्डुकः ॥

असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः।

तं पच्यमानं पित्तेन वायुश्चाप्यनुधावति ॥

ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्च देहिनः।

उदरे पच्यमानानामाध्मानाद्रुक्मसारवत्॥

कफशोणितमांसानां सारो जिह्वा प्रजायते।

यथार्थमुष्मणा युक्तो वायुः स्रोतांसि दारयेत्॥

अनुप्रविश्य पिशितं पेशीर्विभजते तथा।

मेदसः स्नेहमादाय सिरा स्नायुत्वमाप्नुयात् ॥
सिराणां च मृदुः पाकः स्नायूनाञ्च ततः खरः ।
आशय्याऽभ्यासयोगेन करोत्याशयसम्भवं ॥

रक्तमेदःप्रसादाद्वृक्कौ मांसासृक्कफमेदःप्रसादादृषणौ शोणितकफप्रसादजं हृदयं यदाश्रया हि धमन्यः प्राणवहाः । तस्याधोवामतः प्लीहा फुप्फुसश्च दक्षिणतो यकृत् क्लोम च ॥

तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिंस्तमसावृते सर्व्वप्राणिनः स्वपन्ति ॥

भवति चात्र ॥ पुण्डरीकेण सदृशं हृदयं स्यादधोमुखं ।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति ॥

निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति ॥

तत्र यदा संज्ञावहानि स्रोतांसि तमोभूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले । तमोभूयिष्ठानामहःसु निशासु च भवति । रजोभूयिष्ठानामनिमित्तं । सत्वभूयिष्ठानामर्द्धरात्रे । क्षीणश्लेष्मणामनिलबहुलानां मनःशरीराभितापवताञ्च नैव सा वैकारिकी भवति ॥

भवन्ति चात्र ॥ हृदयञ्चेतनास्थानमुक्तं सुश्रुत देहिनां ।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनां ॥
निद्राहेतुस्तमः सत्वं बोधने हेतुरुच्यते ।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्त्यते ॥

पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः ।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥
करणानां तु वैकल्ये तमसाभिप्रवर्द्धिते ।
अस्वपन्नपि भूतात्मा प्रसुप्तइव चोच्यते ॥

सर्व्वर्त्तुषु दिवास्वापः प्रतिसिद्धोऽन्यत्र ग्रीष्मात् ॥ प्रतिषिद्धेष्वपि तु बालवृद्धस्त्रीकर्षितक्षतक्षीणमद्यनित्ययानवाहनाध्वकर्म्मपरिश्रान्तानामभुक्तवतां मेदःस्वेदकफरसरक्तक्षीणानामजीर्णिनाञ्च मुहूर्त्तं दिवा स्वपनमप्रतिषिद्धं । रात्रावपि जागरितवतां जागरितकालादर्द्धमिष्यते दिवा स्वप्नः ॥ विकृतिर्हि दिवास्वप्नोनाम तत्र स्वपतामधर्म्मः सर्व्वदोषप्रकोपश्च । तत्प्रकोपाच्च कासश्वासप्रतिश्यायशिरोगौरवाङ्गमर्द्दाऽरोचकज्वराग्निदौर्बल्यानि भवन्ति ॥ रात्रावपि जागरितवतां वातपित्तनिमित्तास्तएवोपद्रवा भवन्ति ॥

भवन्ति चात्र ॥ तस्मान्न जागृयाद्रात्रौ दिवास्वप्नञ्च वर्जयेत् ।
ज्ञात्वा दोषकरावेतौ बुधः स्वप्नं मितञ्चरेत् ॥
अरोगः सुमना ह्येवं बलवर्णान्वितो वृषः ।
नातिस्थूलकृशः श्रीमान्नरो जीवेत् समाः शतं ॥
निद्रासात्मीकृता यैस्तु रात्रौच यदि वा दिवा ।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते ॥
निद्रानाशोऽनिलात्पित्तान्मनस्तापात् क्षयादपि ।
सम्भवत्यभिघाताच्च प्रत्यनीकैः प्रशाम्यति ॥

निद्रानाशेऽभ्यङ्गयोगो मूर्द्ध्नि तैलनिषेवणं।
गात्रस्योद्वर्त्तनञ्चैव हितं संवाहनानि च॥
शालिगोधूमपिष्टान्नभक्ष्यैरैक्षवसंस्कृतैः।
भोजनं मधुरं स्निग्धं क्षीरमांसरसादिभिः॥
रसैर्विलेशयानाञ्च विष्किराणान्तथैव च॥
द्राक्षासितेक्षुद्रव्याणामुपयोगो भवेन्निशि।
शयनासनयानानि मनोज्ञानि मृदूनि च॥
निद्रानाशे तु कुर्व्वीत तथान्यान्यपि बुद्धिमान्।
वमेन्निद्रातियोगे तु कुर्य्यात् संशोधनानि च।
लङ्घनं रक्तमोक्षञ्च मनोव्याकुलनानि च॥
कफमेदोविषार्त्तानां रात्रौ जागरणं हितं॥
दिवास्वप्नश्च तृट्शूलहिक्काऽजीर्णातिसारिणां।
इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः॥
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्।
पीत्वैकमनिलोच्छ्वासमुद्वेष्टन् विवृताननः॥
यन्मुञ्चति सनेत्रास्रं स जृम्भ इति संज्ञितः।
योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः॥
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः।
सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता॥
शक्तस्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते।
उत्क्लिश्यान्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितं॥

हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत् ॥
वक्त्रे मधुरतातन्द्रा हृदयोद्वेष्टनं भ्रमः ।
नचान्नमभिकाङ्क्षेत ग्लानिं तस्य विनिर्दिशेत् ॥
आर्द्रचर्म्मावनद्धं हि यो गात्रमभिमन्यते ।
तथा गुरु शिरोऽत्यर्थं गौरवं तद्विनिर्दिशेत् ॥
मूर्च्छापित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥

गर्भस्य खलु रसनिमित्ता मारुताध्माननिमित्ता च परिवृद्धिर्भवति ॥

भवन्ति चात्र ॥ तस्यान्तरेण नाभेस्तु ज्योतिःस्थानं ध्रुवं स्मृतं ।
तदा धमति वातस्तु देहस्तेनास्य वर्द्धते ॥
उष्मणा सहितश्चापि दारयत्यस्य मारुतः ।
ऊर्द्धं तिर्य्यगधस्ताच्च स्रोतांस्यपि यथा तथा ॥
दृष्टिश्च रोमकूपाश्च न वर्द्धन्ते कदाचन ।
ध्रुवाण्येतानि मर्त्यानामिति धन्वन्तरेर्मतं ॥
शरीरे क्षीयमाणेऽपि वर्द्धेते द्वाविमौ सदा ।
स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः ॥

सप्त प्रकृतयो भवन्ति। दोषैः पृथक् द्विशः समस्तैश्च ।
शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः ॥
प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु ।

तत्र जागरूकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्य्यनार्य्यो गान्धर्व्व

चित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनख
खादी च भवति ॥

अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी।
द्रुतगतिरटनोऽनवस्थितात्मा वियदपि गच्छति सम्भ्रमेण सुप्तः ॥

अव्यवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसञ्चयमित्रः।
किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः ॥

वातिकाश्चाजगोमायुशशाखूष्ट्रशुनान्तथा।
गृध्रकाकखरादीनामनूकैः कीर्त्तिता नराः ॥

स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठ
पाणिपादतलो दुर्भगो वलीपलितखालित्यजुष्टो बहुभुगुष्णद्वेषी
क्षिप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति ॥

मेधावी निपुणमतिर्व्विगृह्य वक्ता
तेजस्वी समितिषु दुर्निवारवीर्य्यः।
सुप्तः सन् कनकपलाशकर्णिकारान्
सम्पश्येदपि च हुताशविद्युदुल्काः ॥

न भयात् प्रणमेदनतेष्वमृदुः प्रणतेष्वपि सान्त्वनदानरुचिः।
भवतीह सदा व्यथितास्य गतिः स भवेदिह पित्तकृतप्रकृतिः ॥

भुजङ्गोलूकगन्धर्व्वयक्षमार्जारवानरैः।
व्याघ्रर्क्षनकुलानूकैः पैत्तिकास्तु नराः स्मृताः ॥

दूर्व्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः सुभगः
प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो ब

लवांश्चिरग्राही दृढवैरश्च भवति ॥

शुक्लाक्षः स्थिरकुटिलातिनीलकेशो
लक्ष्मीवान् जलदमृदङ्गसिंहघोषः ।
सुप्तःसन् सकमलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥

रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्वगुणोपपन्नः ।
क्लेशक्षमो मानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्मनुष्यः ॥

दृढशास्त्रमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा ॥

ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः ।
तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयो नराः ॥

द्वयोर्व्वा तिसृणांवापि प्रकृतीनान्तु लक्षणैः ।
ज्ञात्वा संसर्गजा वैद्यः प्रकृतीरभिनिर्द्दिशेत् ॥

प्रकोपोवाऽन्यथाभावः क्षयो वा नोपजायते ।
प्रकृतीनां स्वभावेन जायते तु गतायुषः ॥

विषजातो यथा कीटो न विषेण विपद्यते ।
तद्वत्प्रकृतयो मर्त्यं शक्नुवन्ति न बाधितुं ॥

प्रकृतिमिह नराणां भौतिकीं केचिदाहुः
पवनदहनतोयैः कीर्त्तितास्तास्तु तिस्रः ।
स्थिरविपुलशरीरः पार्थिवश्च क्षमावान्
शुचिरथ चिरजीवी नाभसः खैर्महद्भिः ॥

शौचमास्तिक्यमभ्यासो वेदेषु गुरुपूजनं।
प्रियातिथित्वमिज्याच ब्रह्मकायस्य लक्षणं॥
माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणं॥
शीतसेवा सहिष्णुत्वं पैङ्गल्यं हरिकेशता।
प्रियवादित्वमित्येतद्वारुणं कायलक्षणं॥
मध्यस्थता सहिष्णुत्वमर्थस्यागमसञ्चयौ।
महाप्रसवशक्तित्वं कौवेरं कायलक्षणं॥
गन्धमाल्यप्रियत्वञ्च नृत्यवादित्रकामिता।
विहारशीलता चैव गान्धर्व्वं कायलक्षणं॥
प्राप्तकारी दृढोत्थानो निर्भयः स्मृतिमान् शुचिः।
रागमोहभयद्वेषैर्व्वर्जितो याम्यसत्ववान्॥
जपव्रतब्रह्मचर्य्यहोमाध्ययनसेविनं।
ज्ञानविज्ञानसम्पन्नमार्षसत्वं नरं विदुः॥
सप्तैते सात्विकाः काया राजसांस्तु निबोध मे।
ऐश्वर्य्यवन्तं रौद्रञ्च शूरं चण्डमसूयकं॥
एकाशिनं चौदरिकमाशूरं सत्वमीदृशं।
तीक्ष्णमायासिनं भीरुं चण्डं मायान्वितन्तथा॥
विहाराचारचपलं सर्पसत्वं विदुर्नरं।
प्रवृद्धकामसेवी चाप्यजस्राहार एव च॥
अमर्षणोऽनवस्थायी शाकुनं कायलक्षणं।

एकान्तग्राहिता रौद्रमसूया धर्म्मवाह्यता ॥
भृशमात्मं तमश्चापि राक्षसं कायलक्षणं ।
उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा ॥
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचं कायलक्षणं ।
असंविभागमलसं दुःखशीलमसूयकं ॥
लोलुपञ्चाप्यदातारं प्रेतसत्वं विदुर्नरं ।
षडेते राजसाः कायास्तामसांस्तु निबोध मे ॥
दुर्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः ॥
अनवस्थितता मौर्ख्यं भीरुत्वं सलिलार्थिता ।
परस्पराभिमर्दश्च मत्स्यसत्वस्य लक्षणं ॥
एकस्थानरतिर्नित्यमाहारे केवले रतः ।
वानस्पत्यो नरः सत्त्वधर्म्मकामार्थवर्जितः ॥
इत्येते त्रिविधाः कायाः प्रोक्ता वै तामसास्तथा ।
कायानां प्रकृतीर्ज्ञात्वा त्वनुरूपां क्रियां चरेत् ॥
महाप्रकृतस्त्वेता रजःसत्वतमःकृताः ।
प्रोक्ता लक्षणतः सम्यग्भिषक् ताश्च विभावयेत् ॥

---

## ॥ पञ्चमोऽध्यायः ॥

॥ अथातःशरीरसङ्ख्याव्याकरणं शारीरं व्याख्यास्यामः ॥
शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ

इत्युच्यते। तच्च चेतनावस्थितं वायुर्विभजति तेज एनं पचति। आपः क्लेदयन्ति पृथिवी संहन्त्याकाशं विवर्द्धयति। एवंविवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते तच षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर इति॥

अतः परं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः। स्रोतांसि च वक्ष्यमाणानि। एष प्रत्यङ्गविभाग उक्तः॥

तस्य पुनः सङ्ख्यानं। त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्चा रज्जवः सेवन्यःसङ्घाताः सीमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि सिरा धमन्यो योगवहानि स्रोतांसि च॥

त्वचः सप्त। कलाः सप्त। आशयाः सप्त। धातवः सप्त। सप्त सिराशतानि। पञ्च पेशीशतानि। नव स्नायुशतानि। त्रीण्यस्थिशतानि। द्वे दशोत्तरे सन्धिशते। सप्तोत्तरं मर्म्मशतं। चतुर्व्विंशतिर्धमन्यः। त्रयो दोषास्त्रयो मलाः। नव स्रोतांसीति समासः॥

विस्तारोऽत ऊर्द्धं। त्वचोऽभिहिताः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयं वृक्कौ च॥

आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमा

शयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयो ऽष्टम इति ॥

सार्द्धत्रिव्यामान्यन्त्राणि पुंसां स्त्रीणामर्द्धव्यामहीनानि ॥

श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां वहिर्मुखान्येतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहञ्च ॥

षोडश कण्डराः । तासाञ्चतस्रः पादयोस्तावत्यो हस्तग्रीवापृष्ठेषु । तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहाः । ग्रीवाहृदयनिबन्धिनीनामधोभागगतानां मेढ्रं श्रोणिपृष्ठनिबन्धिनीनामधोभागगतानां विम्वः । मूर्द्धोरुवक्षोऽक्षपिण्डादीनाञ्च ॥

मांससिरास्नाय्वस्थिजालानि प्रत्येकं चत्वारि चत्वारि ॥ तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरं ॥

षट् कूर्चास्ते हस्तपादग्रीवामेढ्रेषु । हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवामेढ्रयोरेकैकः ॥

महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं द्वे वाह्ये आभ्यन्तरे च द्वे ॥

सप्त सेवन्यः । शिरसि विभक्ताः पञ्च जिह्वाशेफसोरेकैका ताः परिहर्त्तव्याः शस्त्रेण ॥

चतुर्दशास्थ्नां सङ्घाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु । एतेनेतरसक्थिबाहू च व्याख्यातौ । त्रिकशिरसोरेकैकः ॥

चतुर्द्दशैव सीमन्ताः । ते चास्थिसंघातवद्गणनीया यतस्तैर्युक्ता

अस्थिसङ्घाताः। येष्वुक्ताः सङ्घातास्तु खल्वष्टादशैकेषां॥

त्रीणि सषष्ठान्यस्थिशतानि वेदवादिनो भाषन्ते। शल्यतन्त्रेतु त्रीण्येव शतानि। तेषां सविंशमस्थिशतं शाखासु। सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोदरोरस्सु। ग्रीवां प्रत्यूर्द्धं त्रिषष्टिः। एवमस्थ्नां त्रीणि शतानि पूर्य्यन्ते॥

एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश। तलकूर्च्च गुल्फसंश्रितानि दश। पार्ष्ण्यामेकं। जङ्घायां द्वे। जानुन्येकं। एक मूराविति। त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ॥ श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि। त्रिकसंश्रितमेकं। पार्श्वे षट्त्रिंशदेवमेकस्मिन् द्वितीयेऽप्येवं। पृष्ठे त्रिंशत्। अष्टावुरसि।द्वे अचकसंज्ञे। ग्रीवायां नवकं। कण्ठनाड्यां चत्वारि। द्वे हन्वोः। दन्ता द्वात्रिंशत्। नासायां त्रीणि। एकं तालुनि। गण्डकर्णशङ्खेष्वेकैकं। षट् शिरसि॥

एतानि पञ्चविधानि भवन्ति। तद्यथा। कपालरुचकतरुण बलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि।दशनास्तु रुचकानि घ्राणकर्णग्रीवाचिकोषेषु तरुणाणि। पाणिपादपार्श्वपृष्ठोदरोरस्सु बलयानि। शेषाणि नलकसंज्ञानि॥ भवन्ति चात्र॥ अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।

अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवं॥
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणां।
अस्थीनि न विनश्यन्ति साराण्येतानि देहिनां॥

मांसान्यत्र निबद्धानि सिराभिः स्नायुभिस्तथा।
अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति वा ॥

सन्धयस्तु द्विविधाश्चेष्टावन्तः स्थिराश्च ॥

शाखासु हन्वोः कट्यां च चेष्टावन्तस्तु सन्धयः।
शेषास्तु सन्धयः सर्व्वे विज्ञेया हि स्थिरा बुधैः ॥

सङ्ख्यातस्तु दशोत्तरे द्वे शते तेषां शाखास्वष्टषष्टिरेकोनषष्टिः कोष्ठे ग्रीवांप्रत्यूर्द्धं त्र्यशीतिः॥ एकैकस्यां पादाङ्गुल्यां त्रयस्तयो द्वावङ्गुष्ठे ते चतुर्दश। जानुगुल्फवङ्क्षणेष्वेकैकः। एवं सप्तदशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ त्रयः कटीकपालेषु। चतुर्व्विंशतिः पृष्ठवंशे। तावन्त एव पार्श्वयोः। उरस्यष्टौ तावन्त एव ग्रीवायां। त्रयः कण्ठे। नाडीषु हृदयक्लोमनिबद्धास्वष्टादश। दन्तपरिमाणा दन्तमूलेषु। एकः काकलके नासायाञ्च। द्वौ वर्त्ममण्डलजौ नेत्राश्रयौ। गण्डकर्णशङ्खेष्वेकैकः। द्वौ हनुसन्धी। द्वावुपरिष्टाद्भ्रुवोः शङ्खयोश्च। पञ्च शिरःकपालेषु। एको मूर्द्ध्नि।

त एते सन्धयोऽष्टविधाः; कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः। तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः। कक्षावङ्क्षणदशनेषूदूखलाः। अंसपीठगुदभगनितम्बेषु सामुद्गाः। ग्रीवापृष्ठवंशयोःप्रतराः। शिरःकटीकपालेषु तुन्नसेवनी। हन्वोरुभयतस्तु वायसतुण्डाः। कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः। श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ताः। तेषां

नामभिरेवाकृतयः प्रायेण व्याख्याताः ॥

अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः ।
पेशीस्नायुशिराणान्तु सन्धिसङ्ख्या न विद्यते ॥

नव स्नायुशतानि तासां शाखासु षट् शतानि । द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्यूर्द्ध्वं सप्ततिः ॥ एकैकस्यान्तु पादाङ्गुल्यां षट् नि चितास्तास्त्रिंशत् । तावत्य एव तलकूर्च्चगुल्फेषु । तावत्य एव जङ्घायां । दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमध्यर्द्ध मेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥ षष्टिः कट्यां । अशीतिः पृष्ठे । पार्श्वयोः षष्टिः । उरसि त्रिंशत् । षट्त्रिंशद्ग्रीवायां । मूर्द्ध्नि चतुस्त्रिंशत् । एवं नव स्नायु शतानि व्याख्यातानि ॥

भवन्ति चात्र ॥ स्नायूश्चतुर्विधा विद्यात्तास्तु सर्व्वा निबोध मे ।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा ॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ॥
वृत्तास्तु कण्डराः सर्व्वा विज्ञेयाः कुशलैरिह ।
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु ॥
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ।
नौर्य्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ॥
भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता ।
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ॥
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः ॥

नह्यस्थीनि नवा पेश्यो न सिरा नच सन्धयः ।
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणं ॥
यः स्नायूः प्रविजानाति बाह्याश्चाभ्यन्तरास्तथा ।
सगूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहिनां ॥

पञ्च पेशीशतानि भवन्ति। तासां चत्वारि शतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वञ्चतुस्त्रिंशत् ॥

एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव । दश गुल्फतलयोः। गुल्फजान्वन्तरे विंशति। पञ्च जानुनि। विंशतिरूरौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ॥ तिस्रः पायौ। एका मेढ्रे। सेवन्यां चापरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि । पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्ध्वसंनिविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु। ग्रीवायाञ्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायां। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि ॥

सिरास्नाय्वस्थिपर्व्वाणि सन्धयश्च शरीरिणां ।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः ॥

स्त्रीणान्तु विंशतिरधिका। दश तासां स्तनयोरेकैकस्मिन्

पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते वाह्ये च प्रवृत्ते द्वे॥ गर्भच्छिद्र संश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति॥

तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिसिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति॥

भवति चात्र॥ पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः॥

मर्म्मसिराधमनीस्रोतसामन्यत्र प्रविभागः॥

शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः॥
आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः।
स योनिं शिरसा याति स्वभावात् प्रसवं प्रति॥
त्वक्पर्य्यन्तस्य देहस्य योऽयमङ्गविनिश्चयः।
शल्यज्ञानादृते नैष वर्ण्यतेऽङ्गेषु केषुचित्॥
तस्मान्निःसंशयं ज्ञानं हर्त्रा शल्यस्य वाञ्छता।
शोधयित्वा मृतं सम्यग्द्रष्टव्योऽङ्गविनिश्चयः॥
प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्च यद्भवेत्।

समासतस्तदुभयं भूयो ज्ञानविवर्द्धनं॥

तस्मात्समस्तगात्रमविषोपहतमदीर्घव्याधिपीडितमवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुषमवहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्ज वल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गमप्रकाशे देशे कोथयेत् सम्यक्प्रकुथितञ्चोद्धृत्य ततो देहं सप्तरात्रादुशीरबालवेणुवल्कलकूचीनामन्यतमेन शनैः शनैरवघर्षयंस्त्वगादीन् सर्व्वानेव वाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षयेच्चक्षुषा॥

श्लोकौचात्र भवतः॥ न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतनो विभुः।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च॥
शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत्क्रियाः॥

---

## ॥ षष्ठोऽध्यायः॥

अथातः प्रत्येकमर्म्मनिर्देशं शारीरं व्याख्यास्यामः॥

सप्तोत्तरं मर्म्मशतं॥ तानि मर्म्माणि पञ्चात्मकानि। तद्यथा मांसमर्म्माणि। सिरामर्म्माणि। स्नायुमर्म्माणि। अस्थिमर्म्माणि। सन्धिमर्म्माणि चेति॥ न खलु मांससिरास्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते॥

तत्रैकादश मांसमर्म्माणि। एकचत्वारिंशत् सिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतं॥

तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ। उदरोरसोर्द्वादश चतुर्दश पृष्ठे। ग्रीवां प्रत्यूर्द्ध्वं सप्तत्रिंशत्॥

तत्र सक्थिमर्म्माणि क्षिप्रतलहृदयकूर्चकूर्चशिरोगुल्फेन्द्रवस्तिजान्वाण्युर्व्वीलोहिताक्षाणि विटपञ्चेति । एतेनेतरं सक्थि व्याख्यातं ॥

उदरोरसोस्तु॥ गुदवस्तिनाभिहृदयस्तनमूलस्तनरोहितापलापान्यपस्तम्भौ चेति ॥ पृष्ठमर्म्माणितु कटीकतरुणकुकुन्दरनितम्बपार्श्वसन्धिबृहत्यंसफलकान्यंसौ चेति ॥ बाहुमर्म्माणितु क्षिप्रतलहृदयकूर्चकूर्चशिरोमणिबन्धेन्द्रवस्तिकूर्पराण्यूर्व्वीलोहिताक्षाणि कक्षधरश्चेति । एतेनेतरो बाहुर्व्याख्यातः ॥

जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधिपतिरिति ॥

तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि ॥

नीलधमनीमातृकाशृङ्गाटकापाङ्गस्थपनीफणस्तनमूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धिबृहतीलोहिताक्षोर्व्यः सिरामर्म्माणि॥

आणिविटपकक्षधरकूर्चकूर्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्म्माणि ॥

कटीकतरुणनितम्बांसफलकशङ्खास्त्वस्थिमर्म्माणि ॥

जानुकूर्प्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृकाटिकाश्चेति सन्धिमर्म्माणि ॥

तान्येतानि पञ्चविकल्पानि मर्म्माणि भवन्ति । तद्यथा । सद्यः प्राणहराणि कालान्तरप्राणहराणि विशल्यघ्नानि वैकल्यकराणि रुजाकराणीति ॥ तत्र सद्यः प्राणहराण्येकोनविंशतिः । कालान्तरप्राणहराणि त्रयस्त्रिंशत् । त्रीणि विशल्यघ्नानि । चतुश्चत्वारिंशद्वैकल्यकराणि । अष्टौ रुजाकराणीति ॥

भवन्ति चात्र ॥ शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरोगुदं ।
हृदयं वस्तिनाभी च घ्नन्ति सद्यो हतानि तु ॥
वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः ।
कटीकतरुणे सन्धी पार्श्वजौ बृहती च या ॥
नितम्बाविति चैतानि कालान्तरहराणि तु ।
उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्दिशेत् ॥
लोहिताक्षाणि जानूर्व्वीकूर्चा विटपकूर्प्पराः ।
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके ॥
अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा ।
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैवच ॥
गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्चशिरांसि च ।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् ॥
क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च ॥

मर्म्माणि नाम मांससिरास्नाय्वस्थिसन्धिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते ॥

तत्र सद्यःप्राणहराण्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्षपयन्ति ॥ कालान्तरप्राणहराणि सौम्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति ॥ विशल्यप्राणहराणि वायव्यानि शल्यमुखनिरुद्धो यावदन्तर्वायुस्तिष्ठति तावज्जीवत्युद्धृतमात्रे तु शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रामति तस्मात्सशल्यो जीवत्युद्धृतशल्यो म्रियते ॥ वैकल्यकराणि सौम्यानि सोमोहि स्थिरत्वाच्छैत्याच्च प्रणावलम्बनं करोति ॥ रुजाकराण्यग्निवायुगुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ ॥ पाञ्चभौतिकीञ्च रुजामाङ्करेके ॥

केचिदाङ्कमांसादीनां पञ्चानामपि समस्तानां विवृद्धानाञ्च समवायात्सद्यःप्राणहराणि । एकहीनानामल्पानां वा कालान्तरप्राणहराणि । द्विहीनानां विशल्यप्राणहराणि । त्रिहीनानां वैकल्यकराणि । एकस्मिन्नेव रुजाकराणीति ॥ यतश्चैवमतोऽस्थिमर्म्मस्वप्यभिहतेषु शोणितागमनं भवति ॥

चतुर्व्विधा यास्तु सिराः शरीरे प्रायेण ता मर्म्मसु सन्निविष्टाः ।
स्नाय्वस्थिमांसानि तथैव सन्धीन्सन्तर्प्य देहं प्रतिपालयन्ति ॥
ततः क्षते मर्मणि ताः प्रवृद्धः समन्ततो वायुरभिस्तृणोति ।
विवर्द्धमानस्तु स मातरिश्वा रुजः सुतीव्राः प्रतनोति काये ॥
रुजाभिभूतन्तु पुनः शरीरं प्रलीयते नश्यति चास्य संज्ञा ।
अतोहि शल्यं विनिहर्त्तुमिच्छन्मर्म्माणि यत्नेन परीक्ष्य कर्षेत् ॥
एतेन शेषं व्याख्यातं ॥

तत्र सद्यःप्राणहरमन्ते विद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्ते विद्धं वैकल्यमापादयति । विशल्यप्राणहरमन्ते विद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति ॥

तत्र सद्यःप्राणहराणि सप्तरात्राभ्यन्तरान्मारयन्ति। कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति ॥

अतऊर्द्धं प्रत्येकशो मर्म्मस्थानान्यनुव्याख्यास्यामः ॥

तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणं ॥ मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्म्मरणं ॥ क्षिप्रस्योपरिष्टादुभयतः कूर्च्चो नाम तत्र पादस्य भ्रमणवेपने भवतः ॥ गुल्फसन्धेरधउभयतः कूर्च्चशिरो नाम तत्र रुजाशोफौ ॥ पदजङ्घयोःसन्धाने गुल्फो नाम तत्र रुजः स्तब्धपादता खञ्जता वा ॥ पार्ष्णिंप्रति जङ्घामध्ये इन्द्रवस्तिर्नाम तत्र शोणितक्षये मरणं ॥ जङ्घोर्व्वोः सन्धाने जानु नाम तत्र खञ्जता ॥ जानुन ऊर्द्धमुभयतस्त्र्यङ्गुलमाणिर्नाम तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च ॥ ऊरुमध्ये ऊर्व्वीनाम तत्र शोणितक्षयात् सक्थिशोषः ॥ ऊर्व्व्या ऊर्द्धमधोवङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम तत्र लोहितक्षयेण पक्षाघातः। वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र षाण्ढ्यमल्पशुक्रता वा भवति।

एवमेतान्येकादश सक्थिमर्म्माणि व्याख्यातानि। एतेनेतरसक्थि बाहू च व्याख्यातौ ॥

विशेषतस्तु यानि सक्थ्नि गुल्फजानुविटपानि तानि बाहौ मणिबन्धकूर्प्परकक्षधराणि यथा वङ्क्षणवृषणयोरन्तरे विटपमेवं वक्षःकक्षयोर्मध्ये कक्षधरं तस्मिन्विद्धे त एवोपद्रवाः। विशेषतस्तु मणिबन्धे कुण्ठता। कूर्प्पराख्ये कुणिः। कक्षधरे पक्षाघातः॥ एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि॥

अत ऊर्द्ध्वमुदरोरसोर्मर्म्मस्थानान्यनुव्याख्यास्यामः॥ तत्र वातवर्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म तत्र सद्योमरणं॥ अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्तिर्नाम तत्रापि सद्योमरणमश्मरीव्रणादृते तत्राप्युभयतो भिन्ने न जीवत्येकतो भिन्ने मूत्रस्रावी व्रणो भवति स तु यत्नेनोपक्रान्तो रोहति॥ पक्वामाशययोर्मध्ये सिराप्रभवा नाभिर्नाम तत्रापि सद्य एव मरणं॥ स्तनयोर्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्वरजस्तमसामधिष्ठानं हृदयं नाम तत्र सद्य एव मरणं॥ स्तनयोरधस्ताद्व्यङ्गुलमुभयतः स्तनमूले नाम मर्मणी तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते॥ स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते॥ अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापौ नाम तत्र रक्तेन पूयभावं गतेन मरणं॥ उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ नाम तत्र वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च मरणं। एवमेतान्युदरोरसो

द्वादश मर्माणि व्याख्यातानि ॥

अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्यामः ॥ तत्र पृष्ठवंशमुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्मणी तत्र शोणितक्षयात् पाण्डुर्व्विवर्णो हीनरूपश्च म्रियते ॥ पार्श्वजघनवहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च ॥ श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्ब्बल्याच्च मरणं ॥ अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते ॥ स्तनमूलादुभयतः पृष्ठवंशस्य वृहती नाम तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते ॥ पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्वापः शोषो वा ॥ बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्तब्धबाहुता । एवमेतानि चतुर्द्दश पृष्ठमर्माणि व्याख्यातानि ॥

अत ऊर्द्धं जत्रुगतानि व्याख्यास्यामः ॥ तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च ॥ ग्रीवायामुभयतश्चतस्रः सिरा मातृकास्तत्र सद्यो मरणं ॥ शिरोग्रीवयोः सन्धाने कृकाटिके नाम तत्र चलमूर्द्धता ॥ कर्णपृष्ठतोऽधःसंश्रिते विधुर नाम तत्र वाधिर्य्यं ॥ घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतः फणे नाम तत्र गन्धाज्ञानं ॥ भ्रूपुच्छान्तयोरधोऽक्ष्णोर्वाह्यतो

ऽपाङ्गौ नाम तत्रान्ध्यं दृष्ट्युपघातो वा ॥ भ्रुवोरुपरि निम्न योरावर्त्तौ नाम तत्रान्ध्यं दृष्ट्युपघातश्च ॥ भ्रुवोः पुच्छान्तयोरु परि कर्णललाटयोर्मध्ये शङ्खौ नाम तत्र सद्योमरणं॥ शङ्खयो रुपरि केशान्त उत्क्षेपौ नाम तत्र सशल्यो जीवति पाकात् पतितशल्यो वा नोद्धृतशल्यः ॥ भ्रुवोर्मध्ये स्थपनी नाम तत्रोत्क्षेप वत् ॥ पञ्च सन्धयः शिरसि विभक्ताः सीमन्ता नाम तत्रोन्माद भयचित्तनाशैर्मरणं ॥ घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां सिराणां मध्ये सिरासन्निपातः शृङ्गाटकानि तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणं॥ मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्नि पातो रोमावर्त्तोऽधिपतिस्तत्रापि सद्योमरणं ॥ एवमेतानि सप्त त्रिंशदूर्द्धजत्रुगतानि मर्म्माणि व्याख्यातानि ॥

भवन्ति चात्र ॥ ऊर्व्वः शिरांसि विटपे च सकक्षपार्श्वे
एकैकमङ्गुलमिता स्तनपूर्व्वमूलं ।
विद्ध्यङ्गुलद्वयमितं मणिबन्धगुल्फं
त्रीण्येव जानु सपरं सह कूर्प्पराभ्यां ॥
हृद्बस्तिकूर्च्चगुदनाभि वदन्ति मूर्द्ध्नि
चत्वारि पञ्च च गले दश यानि च द्वे ।
तानि स्वपाणितलकुञ्चितसंमितानि
शेषाण्यवेहि परिविस्तरतोऽङ्गुलार्द्धं ॥
एतत्प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञाः
शस्त्रेण कर्म्मकरणं परिहृत्य मर्म्म ।

पार्श्वाभिघातितमपीह निहन्ति मर्म्म
तस्माद्धि मर्म्मसदनं परिवर्जनीयं ॥
छिन्नेषु पाणिचरणेषु सिरा नराणां
सङ्कोचमीयुरसृगल्पमतो निरेति ।
प्राप्यामितव्यसनमुग्रमतो मनुष्याः
संछिन्नशाखतरुवन्निधनं न यान्ति ॥
चिप्रेषु तत्र सतलेषु हतेषु रक्तं
गच्छत्यतीव पवनश्च रुजं करोति ।
एवं विनाशमुपयान्ति हि तत्र विद्धा
वृत्ता इवायुधविघातनिकृत्तमूलाः ॥
तस्मात्तयोरभिहतस्य तु पाणिपादं
छेत्तव्यमाशु मणिबन्धनगुल्फदेशे ।
मर्म्माणि शल्यविषयार्द्धमुदाहरन्ति
यस्माच्च मर्म्मसु हता न भवन्ति सद्यः ॥
जीवन्ति तत्र यदि वैद्यगुणेन केचि
त्ते प्राप्नुवन्ति विकलत्वमसंशयं हि ।
सम्भिन्नजर्ज्जरितकोष्ठशिरःकपाला
जीवन्ति शस्त्रविहतैश्च शरीरदेशैः ॥
छिन्नैश्च सक्थिभुजपादकैररशेषै
र्येषां न मर्म्मपतिता विविधाः प्रहाराः ।
सोममारुततेजांसि रजःसत्वतमांसि च

मर्म्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते ॥
मर्म्मस्वभिहतास्तस्मान्न जीवन्ति शरीरिणः ।
इन्द्रियार्थेष्वसम्प्राप्तिर्मनोबुद्धिविपर्य्ययः ॥
रुजश्च विविधास्तीव्रा भवन्त्याय्वहरे हते ।
हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणां ॥
ततो धातुक्षयाज्जन्तुर्व्वेदनाभिश्च नश्यति ।
हते वैकल्यजनने केवलं वैद्यनैपुणात् ॥
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात् ।
विशल्यघ्नेषु विज्ञेयं पूर्व्वोक्तं यच्च कारणं ॥
रुजाकराणि मर्म्माणि क्षतानि विविधा रुजः ।
कुर्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि ॥
छेदभेदाभिघातेभ्यो दहनाद्दारणादपि ।
उपघातं विजानीयान्मर्म्मणान्तुल्यलक्षणं ॥

मर्माभिघातस्तु न कश्चिदस्ति योऽल्पात्ययो वापि निरत्ययो वा ।
प्रायेण मर्म्मस्वभिताडितास्तु वैकल्यमृच्छन्त्यथ वा म्रियन्ते ॥
मर्म्माण्यधिष्ठाय हि ये विकारा मूर्च्छन्ति काये विविधा नराणां ।
प्रायेण ते कृच्छ्रतमा भवन्ति नरस्य यत्नैरपि साध्यमानाः ॥

---

## ॥ सप्तमोऽध्यायः ॥

अथातः सिरावर्णनविभक्तिनाम शारीरं व्याख्यास्यामः ॥
सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहा

रिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकु
ञ्चनप्रसारणादिभिर्विशेषैः ॥ द्रुमपत्रसेवनीनामिव च तासां प्रता
नास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च ॥
भवतश्चात्र ॥ यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणां ।

नाभ्यां सर्व्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता ।
सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ॥

तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवा
हिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवा
हिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति तावत्य एव पित्त
वाहिन्यः पित्तस्थाने कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृ
त्प्लीह्नोरेवमेतानि सप्त सिराशतानि ॥

तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः । एते
नेतरसक्थिबाहू च व्याख्यातौ ॥ विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां
गुदमेढ्राश्रिताःश्रोण्यामष्टौ द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य एव
चोदरे दश वक्षसि ॥ एकचत्वारिंशज्जत्रुण ऊर्द्ध्वं तासां चतुर्दश
ग्रीवायां । कर्णयोश्चतस्रः । नव जिह्वायां । षट् नासिकायां । अष्टौ
नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां
व्याख्यातं । एष एव विभागः शेषाणामपि ॥ विशेषतस्तु पित्तवा
हिन्यो नेत्रयोर्दश कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि
सप्त सिराशतानि सविभागानि व्याख्यातानि ॥

भवन्ति चात्र ॥ क्रियाणामप्रतीघातममोहं बुद्धिकर्म्मणां।
करोत्यन्यान्गुणांश्चापि स्वाः सिराः पवनश्चरन्॥
यदा तु कुपितो वायुः स्वाः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः॥
भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगतां।
संसर्पत्स्वाः सिराः पित्तं कुर्य्याच्चान्यान् गुणानपि॥
यदा प्रकुपितं पित्तं सेवते स्ववहाः सिराः।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः॥
स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं बलमुदीर्णतां।
करोत्यन्यान् गुणांश्चापि बलासः स्वाः सिराश्चरन्॥
यदा तु कुपितः श्लेष्मा स्वाःसिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः॥
धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयं।
स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान्गुणानपि॥
यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः॥
नहि वातं सिराः काश्चिन्न पित्तं केवलं तथा।
श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः॥
प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावतां।
ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः॥
तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः।

पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात्॥
असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः।
अतऊर्द्ध्वं प्रवक्ष्यामि न विध्याः सिरा भिषक्॥
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत्।
सिराशतानि चत्वारि विद्याच्छाखासु बुद्धिमान्॥
षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिञ्च मूर्द्धनि।
शाखासु षोडश सिराः कोष्ठे द्वात्रिंशदेव तु॥
पञ्चाशज्जत्रुणश्चोर्द्ध्वमवेध्याः परिकीर्त्तिताः॥

तत्र सिराशतमेकैकस्मिन् सक्थ्नि भवति तासां जालधरास्त्वेका तिस्रश्चाभ्यन्तरास्तत्रोर्व्वीसंज्ञे द्वे लोहिताक्षसंज्ञा चैकैतास्त्ववेध्या एतेनेतरसक्थि बाहू च व्याख्यातावेवमशस्त्रकृत्याःषोडश शाखासु॥

द्वात्रिंशत् श्रोण्यां तासामष्टावशस्त्रकृत्या द्वे द्वे विटपयोः कटीकतरुणयोश्च॥ अष्टावष्टावेकैकस्मिन् पार्श्वे तासामेकैकामूर्द्ध्वगां परिहरेत् पार्श्वसन्धिगते च द्वे॥ चतस्रो विंशतिश्च पृष्ठवंशमुभयतस्तासामूर्द्ध्वगामिन्यौ द्वे द्वे परिहरेद्बृहतीसिरे। तावत्य एवोदरे तासां मेढ्रोपरि रोमराजीमुभयतो द्वे द्वे परिहरेत्॥ चत्वारिंशद्वक्षसि तासां चतुर्दशाशस्त्रकृत्या हृदये द्वे द्वे द्वे स्तनमूले स्तनरोहितापलापस्तम्भेषूभयतोऽष्टौ। एवं द्वात्रिंशदशस्त्रकृत्याः पृष्ठोदरोरःसु भवन्ति॥

चतुःषष्टिसिराशतं जत्रुण ऊर्द्ध्वं भवति तत्र षट्पञ्चाशच्छिरोधरायां तासामष्टौ चतस्रश्च मर्म्मसंज्ञाः परिहरेद्द्वे कृकाटिकयो

द्वे विधुरयोः। एवं ग्रीवायां षोडशाव्यध्याः॥ हन्वोरुभयतोऽष्टा वष्टौ तासान्तु सन्धिधमन्यौ द्वे द्वे परिहरेत्॥

षट्त्रिंशज्जिह्वायां तासामधः षोडशाशस्त्रकृत्या रसवहे द्वे वाग्वहे च द्वे॥ द्विर्द्वादश नासायां तासामौपनासिक्यश्चतस्रः परिहरेत्। तासामेव च तालुन्येकां मृदावुद्देशे। अष्टात्रिंशदुभयोर्नेत्रयोस्तासामेकैकामपाङ्गयोः परिहरेत्॥

कर्णयोर्द्दश तासां शब्दवाहिनीनामेकैकां परिहरेत्। नासानेत्रगतास्तु ललाटे षष्टिस्तासां केशान्तानुगताश्चतस्रः।

आवर्त्तयोरेकैका स्थपन्याञ्चैका परिहर्त्तव्या॥ शङ्खयोर्दश तासां शङ्खसन्धिगतामेकैकां परिहरेत्॥

द्वादश मूर्द्धि तासामुत्क्षेपयोर्द्वे परिहरेत्॥ सीमन्तेष्वेकैकामेकामधिपताविति। एवमशस्त्रकृत्याः पञ्चाशज्जत्रुण ऊर्द्धमिति॥

भवति चात्र॥ व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः।
प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलं॥

---

## ॥ अष्टमोऽध्यायः॥

अथातः सिराव्यधविधिशारीरं व्याख्यास्यामः॥

बालस्थविररूक्षक्षतक्षीणभीरुपरिश्रान्तस्त्रीमद्याध्वकर्शितमत्तवान्तविरिक्तास्थापितानुवासितजागरितक्लीवकृशगर्भिणीनां कासश्वासशोषप्रवृद्धज्वराक्षेपकपक्षाघातोपवासपिपासामूर्च्छाप्रपी

डितानाञ्च सिरां न विध्येद्याश्चाव्यध्या व्यध्याश्चादृष्टा दृष्टाश्चाय न्त्रिता यन्त्रिताश्चानुत्थिता इति॥

शोणितावसेकसाध्याश्च विकाराः प्रागभिहितास्तेषु चापक्केष्व न्येषु चानुक्तेषु यथाभ्यासं यथान्यायञ्च सिरां विध्येत्। प्रतिषिद्धाना मपि च विषोपसर्गेष्वात्ययिकेषु सिराव्यधनमप्रतिषिद्धं ॥

तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकद्रवप्रायमन्नं भुक्तवन्तं यवागूं पीतवन्तं वा यथाकालमुपस्थाप्यासीनं स्थितंवा प्राणानबाध मानो वस्त्रपट्टचर्मान्तर्व्वल्कललतानामन्यतमेन यन्त्रयित्वा नाति गाढं नातिशिथिलं शरीरप्रदेशमासाद्य यथोक्तं शस्त्रं गृहीत्वा सिरां विध्येत्॥

नैवातिशीते नात्युष्णे न प्रवाते न चाभ्रिते।
सिराणां व्यधनं कार्य्यमरोगे वा कदाचन॥

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रिते उपवे श्यासने सक्थ्नोराकुञ्चितयोर्निवेश्य कूर्प्परसन्धिद्वयस्योपरि हस्ता वन्तर्गूढाङ्गुष्ठकृतमुष्टी मन्ययोः स्थापयित्वा यन्त्रणशाटकं ग्रीवाम् श्योरुपरि परिक्षिप्यान्येन पुरुषेण पश्चात्स्थितेन वामहस्तेनोत्ता नेन शाटकान्तद्वयं ग्राहयित्वा ततो वैद्यो ब्रूयाद्दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतशिथिलं यन्त्रमावेष्टयेत्यस्वकस्रावणार्थं यन्त्रं पृष्ठमध्ये च पीडयेति कर्म्मपुरुषञ्च वायुपूर्णमुखं स्थाप येदेष उत्तमाङ्गगतानामन्तर्मुखवर्ज्यानां सिराणां व्यधने यन्त्रण विधिः॥

तत्र पादव्यध्यसिरस्य पादं समे स्थाने सुस्थिरं स्थापयित्वान्यं पादमीषत्सङ्कुचितमुच्चैः कृत्वा व्यध्यपादं जानुसन्धेरधःशाटकेना वेष्ट्य हस्ताभ्यां प्रपीड्य गुल्फं व्यध्यप्रदेशस्योपरि चतुरङ्गुलं प्लोता दीनामन्यतमेन बद्ध्वा पादसिरां विध्येत्। अथोपरिष्टाद्धस्तौ गूढा ङ्गुष्ठकृतमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्ववद्यन्त्रं बद्ध्वा हस्तसिरां विध्येत्। गृध्रसीविश्वाच्योः सङ्कुचितजानुकूर्परः स्यात्। श्रोणीपृष्ठस्कन्धेषून्नामितपृष्ठस्यावाक्शिरस्कस्योपविष्टस्य विस्फूर्ज्जितपृष्ठस्य विध्येत्। उदरोरसोः प्रसारितोरस्कस्योन्नमित शिरस्कस्य विस्फूर्ज्जितदेहस्य। बाहुभ्यामवलम्बमानदेहस्य पार्श्वयोः। अवनामितमेढ्रस्य मेढ्रे॥ उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायां। अतिव्यात्ताननस्य तालुनि दन्तमूलेषु च। एवं यन्त्रोपायानन्यांश्च सिरोत्थापनहेतून् बुद्ध्वा विदध्यात् शरीरवशेन व्याधिवशेनच विदध्यात्॥ मांसलेष्ववकाशेषु यवमात्रं शस्त्रं निदध्यादतोऽन्येष्वर्द्धयवमात्रं व्रीहि मात्रं वा व्रीहिमुखेन। अस्थ्नामुपरि कुठारिकया विध्येदर्द्धयव मात्रं॥

भवन्ति चात्र॥ अभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले।

हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृताः॥

सम्यक्शस्त्रनिपातेन धारया या स्रवेदसृक्।

मुहूर्त्तं रुद्ध्वा तिष्ठेच्च सुविद्धान्तां विनिर्दिशेत्॥

यथा कुसुम्भपुष्पेभ्यः पूर्व्वं स्रवति पीतिका।

तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्त्तते॥

मूर्च्छितस्यातिभीतस्य श्रान्तस्य तृषितस्य च।
न वहन्ति सिरा विद्धास्तथानुत्थितयन्त्रिताः॥
क्षीणस्य बहुदोषस्य मूर्च्छयाभिद्रुतस्य च।
भूयोऽपराह्णे विस्राव्या सापरेद्युस्त्र्यहेऽपि वा॥
रक्तं सशेषदोषन्तु कुर्य्यादपि विचक्षणः।
नचातिप्रसुतं कुर्य्याच्छेषं संशमनैर्ज्जयेत्॥
बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥

तत्र पाददाहपादहर्षावबाहुकचिप्पविसर्पवातशोणितवातकण्टकविचर्च्चिकापाददारीप्रभृतिषु क्षिप्रमर्म्मण उपरिष्टाद्‌व्यङ्गुले व्रीहिमुखेन सिरां विध्येत्। श्लीपदे तच्चिकित्सिते यथा वक्ष्यते। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनासु जङ्घायां गुल्फस्योपरि चतुरङ्गुले। अपच्यामिन्द्रवस्तेरधस्ताद्‌व्यङ्गुले। जानुसन्धेरुपर्य्यधोवा चतुरङ्गुले गृध्रस्यां। ऊरुमूलसंश्रितान्तु गलगण्डे। एतेनेतरसक्थिबाहू च व्याख्यातौ॥

विशेषतस्तु वामबाहौ कूर्प्परसन्धेरभ्यन्तरतो बाहुमध्ये प्लीह्नि कनिष्ठिकानामिकयोर्मध्ये वा। एवं दक्षिणबाहौ यकृद्दाल्ये कफोदरे चैतामेवच कासश्वासयोरप्यादिशन्ति। गृध्रस्यामिव विश्वाच्यां। श्रोणिप्रतिसमन्ताद्‌व्यङ्गुले प्रवाहिकायां शूलिन्यां। परिकर्त्तिकोपदंशशूकदोषशुक्रव्यापत्सु मेढ्रमध्ये। वृषणयोःपार्श्वे मूत्रवृद्ध्यां। नाभेरधश्चतुरङ्गुले सेवन्या वामपार्श्वे दकोदरे। वाम

पार्श्वकचास्तनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूलेच। बाहुशोषावबाहु कयोरप्येके वदन्त्यंसयोरन्तरे। त्रिकसन्धिमध्यगतां तृतीयके। अधः स्कन्धसन्धिगतामन्यतरपार्श्वसंस्थिताञ्चतुर्थके। हनुसन्धिमध्यगता मपस्मारे। शङ्खकेशान्तसन्धिगतामुरोऽपाङ्गललाटेषु चोन्मादेऽ पस्मारे च। जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च। तालुनि तालव्येषु। कर्णयोरुपरिसमन्तात् कर्णशूले तद्रोगेषु च। गन्धाग्रहणे नासारोगेषु च नासाग्रे। तिमिराक्षिपाकप्रभृतिष्वा मयेषूपनासिके लालाट्यामपाङ्ग्याञ्चैताएव शिरोरोगाधिमन्थप्रभृ तिषु रोगेष्विति॥

अत ऊर्द्धं दुष्टव्यधनमनुव्याख्यास्यामः॥ तत्र दुर्विद्धातिविद्धा कुञ्चिता पिच्चिता कुट्टिता अस्रुता अत्युदीर्णा अन्तेऽभिहता परि शुष्का कूणिता वेपिता अनुत्थितविद्धा शस्त्रहता तिर्य्यग्विद्धा अविद्धा अव्याध्या विद्रुता धेनुका पुनःपुनर्विद्धा शिरास्नाय्वस्थि सन्धिमर्म्मसु चेति विंशतिर्दुष्टव्यधाः॥

तत्र या सूक्ष्मशस्त्रविद्धा न व्यक्तमसृक् स्रवति रुजाशोफवती च सा दुर्विद्धा। प्रमाणातिरिक्तविद्धायामन्तःप्रविशति शोणितं शोणिता तिप्रवृत्तिर्वा सातिविद्धा कुञ्चितायामप्येवं। कुण्ठशस्त्रप्रम थिता पृथुलीभावमापन्ना पिच्चिता। अनासादिता पुनःपुन रन्तयोश्च बहुशः शस्त्राभिहता कुट्टिता। शीतभयमूर्च्छाभिरप्र वृत्तशोणिता अस्रुता। तीक्ष्णमहामुखशस्त्रविद्धा अत्युदीर्णा। अल्परक्तस्राविण्यविद्धा। क्षीणशोणितस्यानिलपूर्णा परिशुष्का।

चतुर्भागावसादिता किञ्चित्प्रवृत्तशोणिता कूणिता। दुःस्थानबन्धनाद्वेपमानायाः शोणितसंमोहो भवति सा वेपिता। अनुत्थितविद्धायामप्येवं। छिन्नातिप्रवृत्तशोणिता क्रियासङ्गकरी शस्त्रहता। तिर्य्यक्प्रणिहितशस्त्रा किञ्चिच्छेषा तिर्य्यग्विद्धा। बहुशःक्षता ही नशस्त्रप्रणिधानेनापविद्धा। अशस्त्रकृत्या अव्याध्या। अनवस्थितविद्धा विद्रुता। प्रदेशस्य बहुशोऽवघट्टनादारोहव्यधा मुहुर्मुहुः शोणितस्रावा धेनुका। सूक्ष्मशस्त्रव्यधनाद्बहुशो विच्छिन्ना पुनःपुनर्व्विद्धा। स्नाय्वस्थिशिरासन्धिमर्म्मसु विद्धा वा रुजां शोषं वैकल्यं मरणं वापादयति॥

भवन्ति चात्र॥ सिरासु शिक्षितो नास्ति चला ह्येताः स्वभावतः।
मत्स्यवत् परिवर्त्तन्ते तस्माद्यत्नेन ताडयेत्॥
अजानता गृहीते तु शस्त्रे कायनिपातिते।
भवन्ति व्यापदश्चैता बहवश्चाप्युपद्रवाः॥
स्नेहादिभिः क्रियायोगैर्न तथा लेपनैरपि।
यान्त्याशु व्याधयः शान्तिं यथा सम्यक् सिराव्यधात्॥
सिराव्यधश्चिकित्सार्द्धं शल्यतन्त्रे प्रकीर्त्तितः।
यथा प्रणिहितः सम्यग्वस्तिः कायचिकित्सिते॥

तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैःपरिहर्त्तव्यानि क्रोधायासमैथुनदिवास्वप्नवाग्व्यायामयानोत्थानासनचंक्रमणशीतवातातपविरुद्धासात्म्याजीर्णान्याबललाभान्मासमेके मन्यन्ते। एतेषां विस्तरमुपरिष्टाद्वक्ष्यामः॥

भवतश्चात्र ॥ सिराविषाणतुम्बैस्तु जलौकाभिः पदैस्तथा ।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितं ॥
अवगाढे जलौका स्यात् प्रच्छन्नं पिण्डिते हितं ।
सिराङ्गव्यापके रक्ते शृङ्गालावू त्वचि स्थिते ॥

---

## ॥ नवमोऽध्यायः ॥

अथातो धमनीव्याकरणं शारीरं व्याख्यास्यामः ॥

चतुर्व्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः ॥ तत्र केचिदाहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति। तत्तु न सम्यक् । अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः कस्माद्व्यञ्जनान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्मणामप्यविभाग इव कर्म्मसु भवति ॥

तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश दश चाधोगामिन्यस्तस्रस्तिर्य्यग्गाः ॥

ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति । तास्तु हृदयमभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत् । तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरसगन्धानष्टाभिर्गृह्णीते । द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां

प्रतिबुध्यते।द्वे चाश्रुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः । तास्त्वेतास्त्रिंशत्स विभागा व्याख्याता एताभिरूर्द्धं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवा बाहवो धार्य्यन्ते याप्यन्ते च॥

भवति चात्र॥ ऊर्द्धंगतास्तु कुर्व्वन्ति कर्माण्येतानि सर्व्वशः।
अधोगमास्तु वक्ष्यामि कर्म्म तासां यथायथं॥

अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तास्तु पित्ताशयमभिप्रतिपन्नास्तत्रस्थमेवान्नपानरसं विपक्कमौष्ण्याद्विवेचयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यर्प्पयन्ति चोर्द्धगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विवेचयन्त्यामपक्काशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश द्वे अन्नवाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञं। द्वे वर्च्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गानां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरधोनाभेः पक्काशयकटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च॥

भवति चात्र॥ अधोगमास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः।
तिर्य्यग्गाः संप्रवक्ष्यामि कर्म्म तासां यथायथं॥

तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चो

त्तरोत्तरं विभज्यन्ते तास्त्वसङ्ख्येयास्ताभिरिदं शरीरं गवाक्षितं विवद्धमाततञ्च। तासां मुखानि रोमकूपप्रतिबद्धानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्वहिश्च तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तःशरीरमभिप्रतिपद्यन्ते त्वचि विपक्वानि तैरेव स्पर्शसुखमसुखं वा गृह्णाति । तास्त्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः ॥

भवतश्चात्र ॥ यथा स्वभावतः खानि मृणालेषु बिसेषु च।
धमनीनां तथा खानि रसो यैरुपचीयते ॥
पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले॥

अत ऊर्द्ध्वं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्यामः॥ तानि तु प्राणान्नोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्त्तववहानि येष्वधिकार एकेषां बहूनि। एतेषां विशेषा बहवः । तत्र प्राणवहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यः। तत्र विद्धस्य क्रोशनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति। अन्नवहे द्वे तयोर्मूलमामाशयोऽन्नवाहिन्यश्च धमन्यस्तत्र विद्धस्याध्मानं शूलान्नद्वेषौ छर्द्दिःपिपासान्ध्यं मरणं वा। उदकवहे द्वे तयोर्मूलं तालु क्लोम च। तत्र विद्धस्य पिपासा सद्योमरणञ्च । रसवहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यस्तत्र विद्धस्य शोषः प्राणवहविद्धवच्च मरणं तल्लिङ्गानि च। रक्तवहे द्वे तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य श्यावाङ्गता ज्वरो दाहः पाण्डुता शोणितागति

गमनं रक्तनेत्रता चेति। मांसवहे द्वे तयोर्मूलं स्नायुत्वचं रक्तवहाश्च धमन्यस्तत्र विद्धस्य श्वयथुर्मांसशोषः सिराग्रन्थयो मरणं। मेदोवहे द्वे तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य स्वेदागमनं स्निग्धाङ्गता तालुशोषः स्थूलशोफता पिपासा च। मूत्रवहे द्वे तयोर्मूलं वस्तिर्मेढ्रश्च तत्र विद्धस्यानद्धवस्तिता मूत्रनिरोधः स्तब्धमेढ्रता च। पुरीषवहे द्वे तयोर्मूलं पक्वाशयो गुदश्च तत्र विद्धस्यानाहो दुर्गन्धता ग्रथितान्त्रता च। शुक्रवहे द्वे तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च। आर्त्तववहे द्वे तयोर्मूलं गर्भाशय आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धायां बन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनीच्छेदाद्रुजाप्रादुर्भावः। वस्तिगुदविद्धलक्षणं प्रागुक्तमिति॥ स्रोतोविद्धन्तु प्रत्याख्यायोपचरेदुद्धृतशल्यन्तु क्षतविधानेनोपचरेत्॥

मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं सिराधमनिवर्ज्जितं॥

---

## ॥ दशमोऽध्यायः॥

अथातो गर्भिणीव्याकरणं शारीरं व्याख्यास्यामः॥ गर्भिणी प्रथमदिवसात् प्रभृति नित्यंप्रहृष्टा शुच्यलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविकृतहीनगात्राणि न स्पृशेद्दुर्गन्धदुर्दर्शनानि परिहरेदुद्वेजनीयाश्च कथाः शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत वहिर्निष्क्रमणं शून्यागार

चैत्यश्मशानवृक्षाश्रयान् क्रोधभयशङ्करांश्च भारानुच्चैर्भाष्यादिकं परिहरेद्यानि च गर्भं व्यापादयन्ति नचाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत नचायासयेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतदाप्रसवात्॥

विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये षष्टिकौदनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषा चेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पिःसंसृष्टं षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषो मात्रां पाययेद्यवागूं वा सप्तमे सर्पिः पृथक्पर्ण्यादिसिद्धमेवमाप्याय्यते गर्भः। अष्टमे वदरोदकेन बलातिबलाशतपुष्पपललपयोदधिमस्तुतैललवणमदनफलमधुघृतमिश्रेणास्थापयेत् पुराणपुरीषशुद्ध्यर्थमनुलोमनार्थञ्च वायोः। ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुपद्रवा च भवति। अतऊर्द्ध्वं स्निग्धाभिर्यवागूभिर्जाङ्गलरसैश्चोपक्रमेदाप्रसवकालादेवमुपक्रान्ता स्निग्धा बलवती सुखमनुपद्रवा प्रसूयते। नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातकनिर्म्मितं सर्व्वागारं यथासङ्ख्यं तन्मयपर्य्यङ्कमुपलिप्त

भित्ति सुविभक्तपरिच्छदं प्राग्द्वारं दक्षिणद्वारं वाष्टहस्तायतञ्चतु हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयं ॥

जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने।
सशूले जघने नारी ज्ञेया सा तु प्रजायिनी ॥

तत्रोपस्थितप्रसवायाः कटीपृष्ठं प्रति समन्ताद्वेदना भवत्य भीक्ष्णं पुरीषप्रवृत्तिर्मूत्रञ्च प्रसिच्यते · योनिमुखात् श्लेष्मा च ॥

प्रजनयिष्यमाणां कृतमङ्गलस्वस्तिवाचनां कुमारपरिवृतां पुन्नाम फलहस्तां स्वभ्यक्तामुष्णोदकपरिषिक्तामथैनां सम्भृतां यवागूमा कण्ठात् पाययेत्। ततः कृतोपधाने मृदुविस्तीर्णे शयने स्थितामा भुग्नसक्थीमुत्तानामशङ्कनीयाश्चतस्रः स्त्रियः परिणतवयसः प्रज ननकुशलाः कर्त्तितनखाः परिचरेयुरिति ॥

अथास्या विशिखान्तरमनुलोममनुसुखमभ्यज्याद्भूयाच्चैनामेका सुभगे प्रवाहस्वेति नचाप्राप्तावी प्रवाहस्व ततो विमुक्ते गर्भनाडी प्रबन्धे सशूलेषु श्रोणिवङ्क्षणबस्तिशिरःसु प्रवाहिथाः शनैः शनैः। ततो गर्भनिर्गमे प्रगाढं ततो गर्भे योनिमुखं प्रपन्ने गाढतरमावि शल्यभावात् ॥

अकालप्रवाहणाद्वधिरं मूकं व्यस्तहनुं मूर्द्धाभिघातिनं कासश्वास शोषोपद्रुतं कुब्जं विकटं वा जनयति। तत्र प्रतिलोममनुलोमयेत्॥

गर्भसङ्गे तु योनिं धूपयेत् कृष्णसर्पनिर्मोकेण पिण्डीतकेन वा। बध्नीयाद्धिरण्यपुष्पीमूलं हस्तपादयोर्द्धारयेत् सुवर्चलां विशल्यां वा।

अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्ध्नि

पिचुं दद्यात्ततो नाभिनाडीमष्टाङ्गुलमायम्य सूत्रेण बद्धा छेदयेत्त त्सुत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग्बध्नीयात्।

अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधु सर्पिरनन्ताब्राह्मीरसेन सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूप्यहेमप्रतप्तेनवा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादोषं यथाविभवञ्च॥

धमनीनां हृदिस्थानां विवृतत्वादनन्तरं।
चतूरात्रात्त्रिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्त्तते॥

तस्मात्प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं पाययेद्द्वितीये लक्ष्मणासिद्धं सर्पिस्तृतीये च। ततः प्राङ्निवारितः स्तन्यं मधुसर्पिः स्वपाणितलसम्मितं द्विकालं पाययेत्॥

अथ सूतिकां बलातैलाभ्यक्तां वातहरौषधनिःक्वाथेनोपचरेत् सशेषदोषान्तु तदहः पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचित्रकशृङ्गवेर चूर्णं गुडोदकेनोष्णेनपाययेत्। एवं द्विरात्रं त्रिरात्रंवा कुर्य्यादादुष्ट शोणितात्। विशुद्धे ततो विदारिगन्धादिसिद्धां स्नेहयवागूं क्षीरयवागूंवा पाययेत्त्रिरात्रं। ततो यवकोलकुलत्थसिद्धेन जाङ्गलरसेन शाल्योदनं भोजयेद्बलमग्निबलञ्चावेक्ष्य। अनेन विधिनाध्यर्द्धमासमुपसंस्कृता विमुक्ताहाराचारा विगतसूतिकाभिधाना स्यात् पुनरार्त्तवदर्शनादित्येके॥

धन्वभूमिजातां सूतिकां घृततैलयोरन्यतरस्य मात्रां पाययेत्

पिप्पल्यादिकषायानुपानं स्नेहनित्या च स्यात्त्रिरात्रं पञ्चरात्रं वा।
बलवतीमबलां यवागूं पाययेत्त्रिरात्रं पञ्चरात्रं वा। अतऊर्द्धं स्नि
ग्धेनान्नसंसर्गेणोपचरेत् प्रायशश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्।
क्रोधायासमैथुनादीन् परिहरेत्॥

भवतश्चात्र॥ मिथ्याचारात्सूतिकाया यो व्याधिरुपजायते।
स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्यपतर्पणात्॥
तस्मात्तां देशकालौ च व्याधिसात्म्येन कर्म्मणा।
परीक्ष्योपचरेदेवं नैयमत्ययमाप्नुयात्॥

अथापरापतन्त्यानाहाध्मानौ कुरुते तस्मात्कण्ठमस्याः केशवेष्टि
तयाङ्गुल्या प्रमृजेत्। कटुकालावुकृतवेधनसर्षपसर्पनिर्म्मोकैर्वा कटु
तैलविमिश्रैर्योनिमुखं धूपयेत्। लाङ्गलीमूलकल्केन वास्याः पाणि
पादतलमालिम्पेत्। मूर्द्ध्नि वास्या महावृक्षक्षीरमनुसेचयेत्। कुष्ठ
लाङ्गलीमूलकल्कं वा मद्यमूत्रयोरन्यतरेण पाययेत्। शालिमूल
कल्कं वा पिप्पल्यादिं वा मद्येन सिद्धार्थककुष्ठलाङ्गलीमहावृक्षक्षीर
मिश्रेण सुरामण्डेन वास्थापयेत्। एतैरेव सिद्धेन सिद्धार्थकतै
लेनोत्तरवस्तिं दद्यात् स्निग्धेन वा कृत्तनखेन हस्तेनापहरेत्॥

प्रजातायाश्च नार्य्या रूक्षशरीरायास्तीक्ष्णैरविशोधितं रक्तं
वायुना तद्देशगेनातिसंरुद्धं नाभेरधः पार्श्वयोर्वस्तौ वस्तिशिरसि वा
ग्रन्थिं करोति। ततश्च नाभिवस्त्युदरशूलानि भवन्ति सूचीभिरिव
निस्तुद्यते भिद्यते दीर्य्यत इव च पक्वाशयः। समन्तादाध्मानमुदरे
मूत्रसङ्गश्च भवतीति मक्कल्लक्षणं। तत्र वीरतर्व्वादिसिद्धं जलमूष

कादिप्रतीवापं पाययेत्। यवक्षारचूर्णंवा सर्पिषा सुखोदकेन
वा लवणचूर्णं वा पिप्पल्यादिक्वाथेन पिप्पल्यादिचूर्णंवा सुरा
मण्डेन वरुणादिक्वाथं वा पञ्चकोलकप्रतीवापं पृथक्पर्ण्यादिक्वाथं
वा भद्रदारुमरिचसंसृष्टं पुराणगुडंवा त्रिकटुकचतुर्जातककुस्तु
म्बुरुमिश्रं खादेदच्छंवा पिबेदरिष्टमिति ॥

अथ बालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत्।
पीलुबदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् । मूर्द्ध्नि चास्याह
रहस्तैलपिचुमवचारयेत् । धूपयेच्चैनं रक्षोघ्नैर्धूपैः । रक्षोघ्नानि
चास्य पाणिपादशिरोग्रीवास्ववसृजेत् तिलातसीसर्षपकणांश्चात्र
प्रकिरेत्। अधिष्ठाने चाग्निं प्रज्वालयेत्। व्रणितोपासनीयञ्चा
वेक्षेत ॥

ततोदशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवा
चनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा ॥

ततो यथावर्णं धात्रीमुपेयान्मध्यमप्रमाणां मध्यमवयसमरोगां
शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीरामलम्बौष्ठीमल
म्बोर्द्ध्वस्तनीमव्यङ्गामव्यसनिनीं जीवद्वत्सां दोग्ध्रीं वत्सलामक्षुद्र
कर्म्मिणीं कुले जातामतोभूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यब
लवृद्धये बालस्य। तत्रोर्द्ध्वस्तनी करालं कुर्य्यात्। लम्बस्तनी नासि
कामुखं छादयित्वा मरणमापादयेत्। ततः प्रशस्तायां तिथौ
शिरःस्नातामहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुप

वेश्य दक्षिणं स्तनं धौतमीषत्परिस्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत्॥

चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिणः।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा॥

अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्याद्व्याधिजन्म भवति। अपरिस्रुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्क्षुहितस्रोतसः शिशोः कासश्वासवमीप्रादुर्भावः। तस्मादेवंविधानं स्तन्यं न पाययेत्।

क्रोधशोकावात्सल्यादिभिश्च स्त्रियाः स्तन्यनाशो भवति। अथास्याः क्षीरजननार्थं सौमनस्यमुत्पाद्य यवगोधूमशालिषष्टिकमांसरससुरासौवीरकपिण्याकलशुनमत्स्यकशेरुकशृङ्गाटकविसविदारिकन्दमधुकशतावरीनलिकालाबूकालशाकप्रभृतीनि विदध्यात्।

अथास्याः स्तन्यमप्सु परीक्षेत तच्चेच्छीतलममलं तनु शङ्खावभासमप्सु न्यस्तमेकीभावं गच्छत्यफेनिलमतन्तुमन्नोत्प्लवते न सीदति वा तच्छुद्धमिति विद्यात्तेन कुमारस्यारोग्यं शरीरोपचयो बलवृद्धिश्च भवति। नच क्षुधितशोकार्त्तश्रान्तप्रदुष्टधातुगर्भिणीज्वरितातिक्षीणातिस्थूलविदग्धभक्तविरुद्धाहारतर्पितायाः स्तन्यं पाययेन्नाजीर्णौषधञ्च बालं दोषौषधमलानां तीव्रवेगोत्पत्तिभयात्॥

भवन्ति चात्र॥ धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः।
दूषयन्ति पयस्तेन शारीरा व्याधयः शिशोः॥
भवन्ति कुशलस्तांश्च भिषक् सम्यग्विभावयेत्।
अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते॥
मुहुर्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति।
निमीलिताक्षो मूर्द्धस्थे शिरो रोगे न धारयेत्॥
वस्तिस्थे मूत्रसङ्गार्त्तो रुजा तृष्यति मूर्च्छति।
विण्मूत्रसङ्गवैवर्ण्यच्छर्द्याध्मानान्त्रकूजनैः॥
कोष्ठे दोषान् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः॥

तेषु च यथाभिहितं मृदच्छेदनीयमौषधं मात्रया क्षीरपस्य क्षीरसर्पिषा धात्र्याश्च विदध्यात् क्षीरान्नादस्यात्मनि धात्र्याश्चान्नादस्य कषायादीनात्मन्येव न धात्र्याः॥ तत्र मासादूर्द्ध्वं क्षीरपायाङ्गुलिपर्व्वद्वयग्रहणसम्मितामौषधमात्रां विदध्यात् कोलास्थिसम्मितां कल्कमात्रां क्षीरान्नादाय कोलसम्मितामन्नादायेति॥

येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः।
तेषु तत्कल्कसंलिप्तौ पाययेत शिशुं स्तनौ॥
एकं द्वे त्रीणि चाहानि वातपित्तकफज्वरे।
स्तन्यपायाहितं सर्पिरितराभ्यां यथार्थतः॥
नच तृष्णाभयादत्र पाययेत शिशुं स्तनौ।

विरेकवस्तिवमनान्यृते कुर्य्याच्च नात्ययात् ॥
मस्तुलुङ्गक्षयाद्यस्य वायुस्तालुस्थि नामयेत् ।
तस्य ह्लैन्ययुक्तस्य सर्पिर्मधुरकैः शृतं ॥
पानाभ्यञ्जनयोर्योज्यं शीताम्बूद्वेजनन्तथा ।
वातेनाध्मापितां नाभिं सरुजां तुण्डिसंज्ञितां ॥
मारुतघ्नैः प्रशमयेत् स्नेहस्वेदोपनाहनैः ।
गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियां ॥
रसाञ्जनं विशेषेण पानालेपनयोर्हितं ॥

क्षीराहाराय सर्पिःपाययेत् सिद्धार्थकवचामांसीपयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धं क्षीरान्नादाय मधुकवचापिप्पलीचित्रकत्रिफलासिद्धमन्नादाय द्विपञ्चमूलीक्षीरतगरभद्रदारुमरिचमधुविडङ्गद्राक्षादिब्राह्मीसिद्धं। तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति ॥

बालं पुनर्गात्रसुखं गृह्णीयान्नचैनं तर्जयेत् सहसा न प्रतिबोधयेद्वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवेशयेत् कौब्जभयात् नित्यं चैनमनुवर्त्तेत प्रियशतैरजिघांसुः । एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत् ॥

नाशुचौ विसृजेद्बालं नाकाशे विषमे नच ।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च ॥

क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा।
दद्यादास्तन्यपर्य्याप्तेर्बालानां वीक्ष्य मात्रया॥

षण्मासञ्चैनमन्नं प्राशयेल्लघु हितञ्च। नित्यमवरोधरतश्च स्यात् कृतरक्ष उपसर्गभयात्। प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्ष्या बाला भवन्ति॥

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिणुदति दन्तान् खादति कूजति जृम्भते भ्रुवौ विक्षिपत्यूर्द्ध्वं निरीक्षते फेणमुद्वमति सन्दष्टौष्ठः क्रूरो भिन्नामवर्चा दीनार्त्तस्वरो निशि जागर्त्ति दुर्ब्बलो म्लानाङ्गो मत्स्यच्छुछुन्दरिमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः॥

शक्तिमन्तञ्चैनं ज्ञात्वा यथावर्णं विद्यां ग्राहयेत्। अथास्मै पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् पित्र्यधर्म्मार्थकामप्रजाः प्राप्स्यतीति॥

ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिं।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्ब्बलेन्द्रियः।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥

अतिवृद्धायां दीर्घरोगिण्यामन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्व्वीत। पुरुषस्याप्येवंविधस्य त एव दोषाः सम्भवन्ति॥

तत्र पूर्वोक्तैः कारणैः पतिष्यति गर्भे गर्भाशयकटीवङ्क्षणवस्ति

शूलानि रक्तदर्शनञ्च तत्र शीतैः परिषेकावगाहप्रदेहादिभिरुपच
रेज्जीवनीयशृतक्षीरपानैश्च गर्भस्फुरणे मुहुर्मुहुस्तत्सन्धारणार्थं
क्षीरमुत्पलादिसिद्धं पाययेत् ॥ प्रस्रंसमाने सदाहपार्श्वपृष्ठ
शूलासृग्दरानाहमूत्रसङ्गाः स्थानात् स्थानञ्चोपक्रामति गर्भे
कोष्ठे संरम्भस्तत्र स्निग्धशीताः क्रियाः। वेदनायां महासहाक्षुद्रसहा
मधुकश्वदंष्ट्राकण्टकारिकासिद्धं पयः शर्कराक्षौद्रमिश्रं पाय
येत् मूत्रसङ्गे दर्भादिसिद्धं। आनाहे हिङ्गुसौर्व्वललशुनवचा
सिद्धं। अत्यर्थं स्रवति रक्ते कोष्ठागारिकागारमृत्पिण्डसमङ्गाधा
तकीकुसुमनवमालिकागैरिकसर्जरसरसाञ्जनचूर्णं मधुनावलिह्या
द्यथालाभं न्यग्रोधादित्वक्प्रवालकल्कं वा पयसा पाययेदुत्प
लादिकल्कं वा कशेरुशृङ्गाटकशालूककल्कं वा शृतेन पयसोडुम्बर
फलोदककन्दक्वाथेन वा शर्करामधुमधुरेण शालिपिष्टं न्यग्रोधादि
स्वरसपरिपीतं वा वस्त्रावयवं योन्यां धारयेत्॥ अथादृष्टशोणित
वेदनायां मधुकदेवदारुपयस्यासिद्धं पयः पाययेत् तदेवाश्मन्तक
शतावरीपयस्यासिद्धं विदारिगन्धादिसिद्धं वा बृहतीद्वयोत्पल
शतावरीसारिवापयस्यामधुकसिद्धं वैवं क्षिप्रमुपक्रान्ताया उपा
वर्त्तन्ते रुजो गर्भश्चाप्यायते।

व्यवस्थिते च गर्भे गव्येनोडुम्बरशलाटुसिद्धेन पयसा भोजयेत्।
अतीते लवणस्नेहवर्ज्याभिर्यवागूभिरुद्दालकादीनां पाचनीयोपसं
स्कृताभिरुपक्रमेत यावन्तो मासा गर्भस्य तावन्त्यहानि। वस्युदरशू
लेषु पुराणगुडं दीपनीयसंयुक्तं पाययेदरिष्टं वा। वातोपतद्रवगृही

तलात् स्रोतसां लीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते तां मृदुना स्नेहादिक्रमेणोपचरेत्। उत्क्रोशरससंसिद्धामनल्पस्नेहां यवागूं पाययेत्। माषतिलविल्वशलाटुसिद्धान् वा कुल्माषान् भक्षयेन्मधु माध्वीकञ्चानुपिवेत् सप्तरात्रं। कालातीतस्थायिनि गर्भे विशेषतः सधान्यमुदूखलं मूषलेनाभिहन्याद्विषमे वा यानासने सेवेत॥ वाताभिपन्न एव शुष्यति गर्भः स मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं वृंहणीयैः पयोभिर्मांसरसैश्चोपचरेत्। शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मापयत्युदरं तत्कदाचिद्यदृच्छयोपशान्तं नैगमेषापहृतमिति भाषन्ते। तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुस्तत्रापि लीनवत् प्रतीकारः॥

अत ऊर्द्ध्वं मासानुमासिकं वक्ष्यामः।

मधुकं शाकबीजञ्च पयस्या सुरदारु च॥
अश्मन्तकस्तिलाः कृष्णास्ताम्रवल्ली शतावरी।
वृक्षादनी पयस्या च लता चोत्पलसारिवा॥
अनन्ता सारिवा रास्ना पद्मा मधुकमेव च।
वृहत्यौ काश्मरी चापि क्षीरिशुङ्गास्त्वचो घृतं॥
पृश्निपर्णी बला शिग्रु श्वदंष्ट्रा मधुपर्णिका।
शृङ्गाटकं बिसं द्राक्षा कशेरु मधुकं सिता॥
वत्सैते सप्त योगाः स्युरर्द्धश्लोकसमापनाः।
यथा सङ्ख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः॥
कपित्थवृहती विल्वपटोलेक्षुनिदिग्धिकाः।

मूलानि क्षीरसिद्धानि पाययेद्भिषगष्टमे ॥
नवमे मधुकानन्तापयस्यासारिवाः पिबेत् ।
क्षीरं शुण्ठीपयस्याभ्यां सिद्धं स्याद्दशमे हित ॥
सक्षीरा वा हिता शुण्ठी मधुकं सुरदारु च ।
एवमाप्याय्यते गर्भस्तीव्रा रुक् चोपशाम्यति ॥

निवृत्तप्रसवायास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्ध्वं प्रसवमानाया नार्य्याः कुमारोऽल्पायुर्भवति ।

अथ गर्भिणीं व्याध्युत्पत्तावत्ययेच्छर्दयेन्मधुराम्लेनान्नोपहितेना नुलोमयेच्च संशमनीयञ्च मृदु विदध्यादन्नपानयोरश्नीयाच्च मृदुवीर्य्यं मधुरप्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाश्च क्रिया यथा योगं विदधीत मृदुप्रायाः ॥

भवन्ति चात्र ॥ सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधुसर्पिः सकाञ्चनं ॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा ।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्व्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राशाः श्लोकार्द्धेषु चतुर्ष्वपि ।
कुमाराणां वपुर्मेधाबलबुद्धिविवर्द्धनाः ॥

इति सुश्रुत आयुर्व्वेदशास्त्रे तृतीयं शारीरस्थानं समाप्तं ॥

N° 1131

THE

# SUS'RUTA,

OR

# SYSTEM OF MEDICINE,

TAUGHT

## BY DHANWANTARI,

AND COMPOSED

## BY HIS DISCIPLE SUŚRUTA.

---

VOL. II.

CONTAINING

THE THREE DIVISIONS

CALLED

## CHIKITSÁ, KALPA, AND UTTARA TANTRA.

---

EDITED BY SRÍ MADHUSUDANA GUPTA,
FORMERLY TEACHER OF MEDICINE IN THE SANSCRIT COLLEGE;
NOW ATTACHED TO THE NEW MEDICAL COLLEGE;
HONORARY MEMBER OF THE MEDICAL AND PHYSICAL SOCIETY
OF CALCUTTA, &c. &c.

---

COMMENCED UNDER THE AUSPICES OF THE GENERAL COMMITTEE OF
PUBLIC INSTRUCTION; TRANSFERRED TO THE ASIATIC
SOCIETY WITH OTHER UNFINISHED ORIENTAL
WORKS IN 1835; AND COMPLETED BY
THE ASIATIC SOCIETY IN 1836.

---

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1836.

SOCIÉTÉ ASIATIQUE

# सुश्रुतः।

॥ आयुर्व्वेदः ॥

॥ भगवता धन्वन्तरिणोपदिष्टः ॥
॥ सुश्रुतनामधेयेन तच्छिष्येण विरचितः ॥

॥ अस्य ॥

॥ चिकित्सास्थानकल्पस्थानोत्तरतन्त्रकल्पितः ॥

॥ द्वितीयभागः ॥

श्रीलश्रीयुक्तसाधारणविद्योत्सर्थकसमाजाधिपतीनामाज्ञया मुद्रितप्रायस्ततस्तं
त्परित्यक्तत्वात् एसीएटीकसोइटीनामसमाजाधिपतीनामनुज्ञया
राजकीय विद्यामन्दिरस्यायुर्व्वेदशास्त्रपण्डितेन श्रीमधुसूदनगुप्तेनसंशोधितः।

कलिकाताख्यराजधान्यां तन्मुद्रायन्त्रालये
मुद्रितोऽभूत् ॥

शकाब्दे १७५८
इं० १८३६

## ॥ चिकित्सितस्थानं ॥

### ॥ प्रथमाध्यायः ॥

अथातो द्विव्रणीयचिकित्सितं व्याख्यास्यामः ॥

द्वौ व्रणौ भवतः शारीरआगन्तुकश्चेति। तयोः शारीरःपवनपित्तकफशोणितसन्निपातनिमित्तः ॥ आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतनपीडनप्रहाराग्निक्षारविषतीक्ष्णौषधशकलकपालशृङ्गचक्रेषुपरशुशक्तिकुन्ताद्यायुधाभिघातनिमित्तः ॥ तत्र तुल्ये व्रणसामान्ये द्विकारणोत्थानप्रयोजनसामर्थ्याद्द्विव्रणीयइत्युच्यते। सर्व्वस्मिन्नेवागन्तुव्रणे तत्कालमेव क्षतोष्मणः प्रसृतस्योपशमार्थं पित्तवच्छीतक्रियावधारणविधिर्विशेषः सन्धानार्थञ्च मधुघृतप्रयोग इत्येतद्द्विकारणोत्थानप्रयोजनमुत्तरकालन्तु दोषोपप्लवविशेषाच्छारीरवत्प्रतीकारः ॥ दोषोपप्लवविशेषः पुनः समासतः पञ्चदशप्रकारः प्रसरणसामर्थ्याद्यथोक्तो व्रणप्रश्नाधिकारे शुद्धत्वात् षोडशप्रकार इत्येके ॥ तस्य लक्षणं द्विविधं सामान्यं

वैशेषिकश्च । तत्र सामान्यं रुक् व्रणगात्रविचूर्णने व्रणतीति व्रणः। विशेषलक्षणं पुनर्व्वातादिलिङ्गविशेषः ॥

तत्र श्यावारुणाभस्तनुः शीतपिच्छिलाल्पस्रावी रूक्षश्चटचटायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्मांसश्चेति वातात् ॥

क्षिप्रजः पीतनीलाभः किंशुकोदकाभोष्णस्रावी दाहपाकरागविकारो पीतपिडकाजुष्टश्चेति पित्तात् ॥

प्रततचण्डकण्डूबहुलः स्थूलो घनः स्तब्धसिरास्नायुजालावततः कठिनः पाण्डुवभासो मन्दवेदनः शुक्लशीतसान्द्रपिच्छिलास्रावी गुरुश्चेति कफात् ॥

प्रवालदलनिचयप्रकाशः कृष्णस्फोटपिडकाजालोपचितस्तुरङ्गस्थानगन्धः सवेदनो धूमायनशीलो रक्तस्रावी पित्तलिङ्गश्चेति रक्तात् ॥

तोददाहधूमायनप्रायः पीतारुणाभस्तद्वर्णस्रावी चेति वातपित्ताभ्यां ॥

कण्डूयनशीलः सनिस्तोदो दारुणो मुहुर्मुहुः शीतपिच्छिलस्रावी चेति वातश्लेष्मभ्यां ॥

गुरुःसदाह उष्णः पीतः पाण्डुस्रावी चेति पित्तश्लेष्मभ्यां ॥

रूक्षस्तनुस्तोदबहुलः सुप्त इव च रक्तारुणाभस्तद्वर्णस्रावी चेति वातशोणिताभ्यां॥

घृतमण्डाभो मीनधावनतोयगन्धिर्मृदुर्विसर्प्युष्णकृष्णस्रावी चेति पित्तशोणिताभ्यां ॥

रक्तोगुरुः पिच्छिलः कण्डूप्रायः स्थिरः सरक्तपाण्डुस्रावी चेति श्लेष्मशोणिताभ्यां ॥

स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वातपित्त शोणितेभ्यः ॥

कण्डूस्फुरणचुमचुमायनप्रायः पाण्डुघनरक्तस्रावी चेति वात श्लेष्मशोणितेभ्यः ॥

दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तास्रावी चेति श्लेष्मपित्त शोणितेभ्यः ॥

त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः ॥

निर्दहननिर्मथनस्फुरणतोददाहपाकरागकण्डुस्वापबहुलोनाना वर्णवेदनास्रावविशेषोपेतः पवनपित्तकफशोणितेभ्यः ॥

जिह्वातलाभो मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः सुव्यवस्थितो निरास्रावश्चेति शुद्धो व्रण इति ॥

तस्य व्रणस्य षष्टिरुपक्रमा भवन्ति ॥ तद्यथा ॥ अपतर्पणमा लेपः परिषेकोऽभ्यङ्गः स्वेदो विम्लापनमुपनाहः पाचनं विस्रावणं स्नेहो वमनं विरेचनं छेदनं भेदनं दारणं लेखनमेषणमाहरणं व्यधनं विस्रावणं सीवनं सन्धानं पीडनं शोणितास्थापनं निर्व्वापण मुत्कारिका कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनं व्रणधूपनमुत्सादनमवसादनं मृदुकर्म्म दारुणकर्म्म चारकर्म्माग्नि कर्म्म कृष्णकर्म्म पाण्डुकर्म्म प्रतिसारणं रोमसञ्जननं लोमापह

रणं वस्तिकर्म्मोत्तरवस्तिकर्म्म वन्धः पत्रदानं क्रमिघ्नं वृंहणं विषघ्नं शिरोविरेचनं नस्यं कवलधारणं धूमो मधुसर्पिर्यन्त्र माहारो रक्षाविधानं ॥

तेषु कषायोवर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनमिति शोधनरोपणानि ॥ तेष्वष्टौ शस्त्रकृत्याः ॥ शोणितास्थापनं क्षारोऽ ग्निर्यन्त्रमाहारो रक्षाविधानं बन्धविधानं चोक्तानि ॥ स्नेहस्वेदन वमनविरेचनवस्त्युत्तरवस्तिशिरोविरेचननस्यधूमकवलधारणान्य न्यत्र वक्ष्यामः ॥ यदन्यदवशिष्टमुपक्रमजातं तदिह वक्ष्यते ॥

षड्विधः प्रागुपदिष्टः शोफस्तस्यैकादशोपक्रमा भवन्त्यपत र्पणादयो विरेचनान्तास्ते च विशेषेण शोथप्रतीकारा वर्त्तन्ते व्रणभावमापन्नस्य च न विरुध्यन्ते शेषास्तु प्रायेण व्रणप्रती कर हेतव एव। अपतर्पणन्त्वाद्य उपक्रम एष सर्व्वशोफानां सामान्यः प्रधानतमश्च ॥

दोषोच्छ्रायोपशान्त्यर्थं दोषानद्धस्य देहिनः ।
अवेक्ष्य दोषं प्राणञ्च कार्य्यं स्यादपतर्पनं ॥
ऊर्द्ध्वमारुततृष्णाक्षुन्मुखशोषश्रमान्वितैः ।
न कार्य्यं गर्भिणीवृद्धबालदुर्बलभीरुभिः ॥
शोफेषूत्थितमात्रेषु व्रणेषूग्ररुजेषु च ।
यथास्वैरौषधैर्लेपं प्रत्येकञ्चैव कारयेत् ॥
यथा प्रज्वलिते वेश्मन्यम्भसा परिषेचनं ।

क्षिप्रं प्रशमयत्यग्निमेवमालेपनं रुजः ॥
प्रह्लादने शोधने च शोफस्य हरणे तथा ।
उत्सादने रोपणे च लेपः स्यात्तु तदर्थकृत् ॥

वातशोफे तु वेदनोपशमार्थं सर्पिस्तैलधान्याम्लमांसरसवातहरौषधनिःक्वाथैरशीतैः परिषेकान् कुर्व्वीत ॥

पित्तरक्ताभिघातविषनिमित्तेषु क्षीरघृतमधुशर्करोदकेक्षुरसमधुरौषधक्षीरवृक्षनिःक्वाथैरनुष्णैः परिषेकान्कुर्वीत ॥

श्लेष्मशोफे तु तैलमूत्रक्षारोदकसुराशुक्तकफघ्नौषधनिःक्वाथैरशीतैः परिषेकान्कुर्वीत ॥

यथाम्बुभिः सिच्यमानः शान्तिमग्निर्नियच्छति ।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति ॥

अभ्यङ्गस्तु दोषमालोक्योपयुक्तो दोषोपशमं मृदुताञ्च करोति ॥

स्वेदविम्लापनादीनां क्रियाणां प्राक् स उच्यते ।
पश्चात्कर्म्मसु चादिष्टः स च विस्रावणादिषु ॥
रुजावतां दारुणानां कठिनानां तथैव च ।
शोफानां स्वेदनं कार्य्यं ये चाप्येवंविधा व्रणाः ॥
स्थिराणां रुजतां मन्दं कार्य्यं विम्लापनं भवेत् ।
अभ्यज्य स्वेदयित्वा तु वेणुना वा शनैः शनैः ॥
विमर्दयेद्भिषक् प्राज्ञस्तलेनाङ्गुष्ठकेन वा ।
शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः ॥

अविदग्धः शमं याति विदग्धः पाकमेति च ।
निवर्त्तते न यः शोफो विरेकान्तैरुपक्रमैः ॥
तस्य सम्पाचनं कुर्य्यात् समाहृत्यौषधानि तु ।
दधितक्रसुरासुक्तधान्याम्लैर्यैाजितानि तु ॥
स्निग्धानि लवणीकृत्य पचेदुत्कारिकां शुभां ।
सैरण्डपत्रया शोफं नाहयेदुष्णया तथा ॥
हितं सम्भोजनं चापि पाकायाभिमुखो यदि ।
वेदनोपशमार्थाय तथा पाकशमाय च ॥
अचिरोत्पतिते शोफे कुर्य्याच्छोणितमोक्षणं
सशोफे कठिने श्यामे सरक्ते वेदनावति ॥
संरब्धे विषमे वापि व्रणे विस्रावणं हितं ।
सविषे च विशेषेण जलौकाभिः पदैस्तथा ॥
वेदनायाः प्रशान्त्यर्थं पाकस्याप्राप्तये तथा ।
सोपद्रवाणां रूक्षाणां कृशानां व्रणशोषिणां ॥
यथास्वमौषधैः सिद्धं स्नेहपानं विधीयते ।
उत्सन्नमांसशोफे तु कफजुष्टे विशेषतः ॥
संक्लिष्टश्यामरुधिरे व्रणे प्रच्छर्दनं हितं ।
वातपित्तप्रदुष्टेषु दीर्घकालानुबन्धिषु ॥
विरेचनं प्रशंसन्ति व्रणेषु व्रणकोविदाः ।
अपाकेषुतु रोगेषु कठिनेषु स्थिरेषु च ॥
स्नायुकोथादिषु तथाच्छेदनं प्राप्तमुच्यते ।

अन्तःपूयेष्ववक्त्रेषु तथैवोत्सङ्गवत्स्वपि ॥
गतिमत्सु च रोगेषु भेदनं प्राप्तमुच्यते ।
बालवृद्धासहक्षीणभीरूणां योषितामपि ॥
मर्म्मोपरि च जातेषु रोगेषूक्तञ्च दारणम् ।
सुपक्के पिण्डिते शोफे पीडनैरवपीडिते ॥
पाकोद्वृत्तेषु दोषेषु तत्तु कार्य्यं विजानता ।
सुपिष्टैर्दारणद्रव्यैर्युक्तैः क्षारेण वा पुनः ॥
कठिनान्स्थूलवृत्तौष्ठान्दीर्य्यमाणान्पुनः पुनः ।
कठिनोत्सन्नमांसांश्च लेखनेनाचरेद्भिषक् ॥
समं लिखेत्सुलिखितं लिखेन्निरवशेषतः ।
वर्त्मनानुप्रमाणेन समं शस्त्रेण निर्लिखेत् ॥
क्षौमं प्लोतं पिचुं फेनं यावशूकं ससैन्धवं ।
कर्क्कशानि च पत्राणि लेखनार्थे प्रदापयेत् ॥
नाडीव्रणान् शल्यगर्भानुन्मार्ग्युत्सङ्गिनः शनैः ।
करीरबालाङ्गुलिभिरेषण्या वैषयेद्भिषक् ॥
नेत्रवर्त्मगुदाभ्यासनाड्योऽवक्त्राः सशोणिताः ।
चुच्चूपोदकजैः श्लक्ष्णैः करीरैरेषयेत्तु ताः ॥
संवृतासंवृतास्येषु व्रणेषु मतिमान् भिषक् ।
यथोक्तमाहरेच्छल्यं प्राप्तोद्धरणलक्षणं ॥
रोगे व्यधनसाध्ये तु यथोद्देशं प्रमाणतः ।
शस्त्रं निदध्याद्दोषञ्च स्रावयेत्कीर्त्तितं यथा ॥

अपाकोपद्रुता ये च मांसस्था विवृताश्च ये।
यथोक्तं सीवनं तेषु कार्य्यं सन्धानमेव च ॥
पूयगर्भानणुद्वारान्व्रणान्मर्मगतानपि ।
यथोक्तैः पीडनद्रव्यैः समन्तात्परिपीडयेत् ॥
शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति।
न चाभिमुखमालिम्पेत्तथा दोषः प्रसिच्यते ॥
तैस्तैर्निमित्तैर्बहुधा शोणिते प्रस्रुते भृशं ।
कार्य्यं यथोक्तं वैद्येन शोणितास्थापनं भवेत् ॥
दाहपाकज्वरवतां व्रणानां पित्तकोपतः ।
रक्तेन चाभिभूतानां कार्य्यं निर्व्वापणं भवेत् ॥
यथोक्तैः शीतलद्रव्यैः क्षीरपिष्टैर्घृतप्लुतैः ॥
दिह्यादबहलांल्लेपान् सुशीतांश्चावचारयेत् ।
व्रणेषु क्षीणमांसेषु तनुस्राविष्वपाकिषु ॥
तोदकाठिन्यपारुष्यशूलवेपथुमत्सु च ।
वातघ्नवर्गेऽम्लगणे काकोल्यादिगणे तथा ॥
स्नैहिकेषु च बीजेषु पचेदुत्कारिकां शुभां ।
तेषाञ्च स्वेदनं कार्य्यं स्थिराणां वेदनावतां ॥
दुर्गन्धानां क्लेदवतां पिच्छिलानां विशेषतः ।
कषायैः शोधनं कार्य्यं शोधनैः प्रागुदीरितैः ॥
अन्तः शल्यानणुमुखान्गम्भीरान्मांससंश्रितान् ।
शोधनद्रव्ययुक्ताभिर्व्वर्त्तिभिस्तान्यथाक्रमं ॥

पूतिमांसप्रतिच्छन्नान्महादोषांश्च शोधयेत्।
कल्कीकृतैर्यथालाभं वर्त्तिद्रव्यैः पुरोदितैः ॥
पित्तप्रदुष्टान् गम्भीरान्दाहपाकप्रपीडितान्।
कार्पासीफलमिश्रेण जयेच्छोधनसर्पिषा ॥
उत्सन्नमांसानस्निग्धानल्पास्रावान् व्रणांस्तथा।
सर्षपस्नेहयुक्तेन धीमांस्तैलेन शोधयेत् ॥
तैलेनाशुध्यमानानां शोधनीयां रसक्रियां।
व्रणानां स्थिरमांसानां कुर्य्याद्द्रव्यैरुदीरितैः॥
कषाये विधिवत्तेषां कृते व्यामिश्रयेत्पुनः।
सुराष्ट्रजां सकासीसां दद्याच्चापि मनःशिलां ॥
हरितालञ्च मतिमांस्ततस्तामवचारयेत्।
मातुलुङ्गरसोपेतां सक्षौद्रामतिमर्दितां ॥
व्रणेषु दत्वा तां तिष्ठेत्त्रींस्त्रींश्च दिवसान्परं।
गम्भीरान्मेदसा जुष्टान्दुर्गन्धांश्चूर्णशोधनैः ॥
उपाचरेद्भिषक् प्राज्ञः श्लक्ष्णैः शोधनवर्त्तिजैः।
शुद्धलक्षणयुक्तानां कषायं रोपणं हितं ॥
तत्र कार्य्यं यथोद्दिष्टैर्द्रव्यैर्वैद्येन जानता।
अवेदनानां शुद्धानां गम्भीराणां तथैव च ॥
हिता रोपणवर्त्त्यङ्गकृता रोपणवर्त्तयः।
अपेतपूतिमांसानां मांसस्थानामरोहतां ॥
कल्कः संरोहणः कार्य्यस्तिलजो मधुसंयुतः।

स माधुर्य्यात्तथौष्ण्याच्च स्नेहाच्चानिलनाशनः ॥
कषायभावान्माधुर्य्यात्तिक्तत्वाच्चापि पित्तहृत्।
औष्ण्यात्कषायभावाच्च तिक्तत्वाच्च कफे हितः ॥
शोधयेद्रोपयेच्चापि युक्तः शोधनरोपणैः।
निम्बपत्रमधुभ्यान्तु युक्तः संशोधनः स्मृतः ॥
पूर्व्वाभ्यां सर्पिषा चापि युक्तः संरोपणो भवेत्।
तिलवद्यवकल्कन्तु केचिदाहुर्मनीषिणः ॥
शमयेदविदग्धञ्च विदग्धमपि पाचयेत्।
पक्वं भिनत्ति भिन्नञ्च शोधयेद्रोपयेत्तथा ॥
पित्तरक्तविषागन्तून्गभीरानपि च व्रणान्।
रोपयेद्रोपणीयेन क्षीरसिद्धेन सर्पिषा ॥
कफवाताभिभूतानां व्रणानां मतिमान्भिषक्।
कारयेद्रोपणं तैलं भेषजैस्तद्यथोदितैः ॥
अबन्ध्यानाञ्चलस्थानां शुद्धानाञ्च प्रदुष्यतां।
हिहरिद्रायुतां कुर्य्याद्रोपणार्थां रसक्रियां ॥
समानां स्थिरमांसानां त्वक्स्थानां रोपणं भिषक्।
चूर्णं विदध्यान्मतिमान् प्राक्स्थानोक्तो विधिर्यथा ॥
शोधनो रोपणश्चैव विधिर्योऽयं प्रकीर्त्तितः।
सर्व्वव्रणानां सामान्ये नोक्तो दोषाविशेषतः ॥
एष आगमसिद्धत्वात्तथैव फलदर्शनात्।
मन्त्रवत्संप्रयोक्तव्यो न मीमांस्यः कथञ्चन ॥

स्वबुद्ध्या चापि त्रिभजेत्कषायादिषु सप्तसु ।
भेषजानि यथायोगं यान्युक्तानि पुरा मया ॥
आद्ये द्वे पञ्चमूल्यौ तु गणो यश्चानिलापहः ।
स वातदुष्टे दातव्यः कषायादिषु सप्तसु ॥
न्यग्रोधादिर्गणो यस्तु काकोल्यादिश्च यः स्मृतः ।
तौ पित्तदुष्टे दातव्यौ काषायादिषु सप्तसु ॥
आरग्बधादिस्तु गणो यश्चोष्णः परिकीर्त्तितः ।
तौ देयौ कफदुष्टे तु संसृष्टे संयुता गणाः ॥
वातात्मकानुग्ररुजान्सास्रावानपि च व्रणान् ।
स चौमयवसर्पिर्भिर्धूपनाङ्गैश्च धूपयेत् ॥
परिशुष्काल्पमांसानां गम्भीराणां तथैव च ।
कुर्य्यादुत्सादनीयानि सर्पींष्यालेपनानि च ॥
मांसाशिनाञ्च मांसानि भक्षयेद्विधिवन्नरः ।
विशुद्धमनसस्तस्य मांसं मांसेन वर्द्धते ॥
उत्सन्नमृदुमांसानां व्रणानामवसादनं ।
कुर्य्याद्द्रव्यैर्यथोद्दिष्टैश्चूर्णितैर्मधुना सह ॥
कठिनानाममांसानां दुष्टानां मातरिश्वना ।
मृद्वी क्रिया विधातव्या शोणितं चापि मोक्षयेत् ॥
वातघ्नौषधसंयुक्तान्स्नेहान्सेकांश्च कारयेत् ।
व्रणेषु मृदुमांसेषु दारुणीकरणं हितं ॥
धवप्रियङ्ग्वशोकानां रोहिण्याश्च त्वचस्तथा ।

त्रिफलाधातकीपुष्परोध्रसर्जरसान्समान् ॥
कृत्वा सूक्ष्माणि चूर्णानि व्रणं तैरवचूर्णयेत् ।
उत्सन्नमांसान्कठिनान्कण्डूयुक्तांश्चिरोत्थितान् ॥
तथैव खलु दुःशोधान् शोधयेत्क्षारकर्म्मणा ।
स्रवतोऽश्मभवान्मूत्रं ये चान्ये रक्तवाहिनः ॥
निःशेषच्छिन्नसन्धींश्च साधयेदग्निकर्म्मणा ।
दुरूढत्वात्तु शुक्लानां कृष्णकर्म्म हितं भवेत् ॥
भल्लातकान्वासयेत्तु क्षीरे प्राङ्मूत्रभावितान् ।
ततो द्विधाच्छेदयित्वा लौहे कुम्भे निधापयेत् ॥
कुम्भेऽन्यस्मिन्निखाते तु तं कुम्भमथ योजयेत् ।
मुखं मुखेन सन्धाय गोमयैर्दाहयेत्ततः ॥
यः स्नेहस्स्रवते तस्माद्ग्राहयेत्तं शनैर्भिषक् ।
ग्राम्यानूपशफान्दग्धान्सूक्ष्मचूर्णानि कारयेत् ॥
तैलेनानेन संसृष्टं शुक्लमालेपयेद्व्रणं ।
भल्लातकविधानेन सारस्नेहांस्तु कारयेत् ॥
ये च केचित्फलस्नेहा विधानं तेषु कीर्त्तितं ।
दुरूढत्वात्तु कृष्णानां पाण्डुकर्म्म हितं भवेत् ॥
सप्तरात्रं स्थितं क्षीरेच्छागले रोहिणीफलं ।
तेनैव पिष्टं सुश्लक्ष्णं सवर्णकरणं हितं ॥
नवं कपालिकाचूर्णं वैदुलं सर्जनाम च ।
कासीसं मधुकञ्चैव क्षौद्रयुक्तं प्रलेपयेत् ॥

कपित्थमुद्धृते मांसे मूत्रेणाजेन पूरयेत् ॥
कासीसं रोचनां तुत्थं हरितालं मनःशिलां ।
वेणुनिर्लेखनं चापि प्रपुन्नाडरसाञ्जनं ॥
अधस्तादर्जुनस्यैतन्मासं भूमौ निधापयेत् ।
मासादूर्द्धं ततस्तेन कृष्णमालेपयेद्व्रणं ॥
कुक्कुटाण्डकपालानि कतकं मधुकं समं ।
तथा समुद्रमण्डूकीमणिचूर्णञ्च दापयेत् ॥
गुटिका मूत्रपिष्टास्ता व्रणानां प्रतिसारणं ।
हस्तिदन्तमषीं कृत्वा मुख्यञ्चैव रसाञ्जनं ॥
रोमाण्येतेन जायन्ते लेपात्पाणितलेष्वपि ।
चतुष्पदानां त्वग्रोमखुरशृङ्गास्थिभस्मना ॥
तैलाक्ता चूर्णिता भूमिर्भवेद्रोमवती पुनः ।
कासीसं नक्तमालस्य पल्लवांश्चैव संहरेत् ॥
कपित्थरसपिष्टानि रोमसञ्जननं परं ।
रोमाकीर्णो व्रणो यस्तु न सम्यगुपरोहति ॥
क्षुरकर्त्तरिसन्दंशैस्तस्य रोमाणि निर्हरेत् ।
शङ्खचूर्णस्य भागौ द्वौ हरितालञ्च भागिकं ॥
शुक्तेन सह पिष्टानि लोमशातनमुत्तमं ।
तैलं भल्लातकस्याथ स्नुहीक्षीरं तथैव च ॥
प्रगृह्यैकत्र मतिमान् रोमशातनमुत्तमं ।
कदलीदीर्घवृन्ताभ्यां भस्मालं लवणं शमी ॥

वीजं शीतोदपिष्टं वा रोमशातनमाचरेत्।
आगारगोधिकापुच्छं रम्भालं वीजमैङ्गुदं ॥
दग्ध्वा तद्भस्मतैलाम्बु सूर्य्यपक्कं कचान्तकृत्।
वातदुष्टो व्रणो यस्तु रूचश्चात्यर्थवेदनः ॥
अधःकाये विशेषेण तत्र वस्तिर्विधीयते।
मूत्राघाते मूत्रदोषे शुक्रदोषेऽश्मरीव्रणे ॥
तथैवार्त्तवदोषे च वस्तिरप्युत्तरो हितः ॥
यस्माच्छुध्यति बन्धेन व्रणो याति च मार्दवं।
रोहत्यपि च निःशङ्कस्तस्माद्बन्धो विधीयते ॥
स्थिराणामल्पमांसानां रौच्यादनुपरोहतां।
पत्त्रदानं भवेत्कार्य्यं यथादोषं यथर्त्तुच ॥
एरण्डभूर्ज्जपूतीकहरिद्राणान्तु वातजे।
पत्त्रमाश्वबलं यच्च काश्मरीपत्त्रमेव च ॥
पत्त्राणि चीरवृक्षाणामौदकानि तथैव च।
दूषिते रक्तपित्ताभ्यां व्रणे दद्याद्विचक्षणः ॥
पाठामूर्व्वागुडूचीनां काकमाचीहरिद्रयोः।
पत्त्रञ्च शुकनाशाया योजयेत्कफजे व्रणे ॥
अकर्क्कशमविक्लिन्नमजीर्णं सुकुमारकं।
अजन्तुजग्धं मृदु च पत्त्रं गुणवदुच्यते ॥
स्नेहमौषधसारञ्च पट्टवस्त्रान्तरीकृतं।
न दूषयति यत्पत्त्रं लेपस्योपरि दापयेत्॥

शैत्योष्ण्यजननार्थाय स्नेहसंग्रहणाय च।
दत्तौषधेषु दातव्यं पत्रं वैद्येन जानता ॥
मक्षिका व्रणजातस्य निःक्षिपन्ति यदा कृमीन्।
श्वयथुर्भक्षिते तैस्तु जायते भृशदारुणः ॥
तीव्रा रुजो विचित्राश्च रक्तास्रावश्च जायते।
सुरसादिर्हितस्तत्र धावने पूरणे तथा ॥
सप्तपर्णकरञ्जार्कनिम्बराजादनत्वचः।
हिता गोमूत्रपिष्टाश्च सेकः क्षारोदकेन वा ॥
प्रच्छाद्य मांसपेश्या च कृमीनपहरेद्व्रणात्।
विंशतिं कृमिजातीस्तु वक्ष्याम्युपरि भागशः ॥
दीर्घकालातुराणान्तु कृशानां व्रणशोषिणां।
वृंहणीयो विधिः सर्व्वः कार्य्योऽग्निं परिरक्षता ॥
विषजुष्टस्य विज्ञानं विषनिश्चयमेव च।
चिकित्सितञ्च वक्ष्यामि कल्पे तु प्रतिभागशः ॥
कण्डूमन्तः सशोफाश्च ये च जत्रूपरि व्रणाः।
शिरोविरेचनं तेषु विदध्यात्कुशलो भिषक् ॥
रुजावन्तोऽनिलाविष्टा रूक्षा ये चोर्द्ध्वजत्रुजाः।
व्रणेषु तेषु कर्त्तव्यं नस्यं वैद्येन जानता।
दोषप्रच्यवनार्थाय रुजादाहक्षयाय च ॥
जिह्वादन्तसमुत्थस्य हरणार्थं मलस्य च ॥
शोधनो रोपणश्चैव व्रणस्य मुखजस्य वै।

उष्णो वा यदि वा शीतः कवलग्रह इष्यते ॥
ऊर्द्ध्वजत्रुगतान् रोगान् व्रणांश्च कफवातजान्।
शोफस्रावरुजायुक्तान् धूमपानैरुपाचरेत् ॥
क्षतोष्मणो निग्रहार्थं सन्धानार्थं तथैव च ।
सद्योव्रणेष्वायतेषु क्षौद्रसर्पिर्विधीयते ॥
अवगाढास्तनुमुखा ये व्रणाः शल्यपीडिताः ।
निवृत्तहस्तोद्धरणा यन्त्रं तेषु विधीयते ॥
लघुमात्रो लघुश्चैव स्निग्ध उष्णोऽग्निदीपनः ।
सर्वव्रणिभ्यो देयस्तु सदाहारो विजानता ॥
निशाचरेभ्यो रक्ष्यस्तु नित्यमेव क्षतातुरः ।
रक्षाविधानैरुद्दिष्टैर्यमैः सनियमैस्तथा ॥
षण्मूलोऽष्टपरिस्रावी पञ्चलक्षणलक्षितः ।
षष्ट्युपक्रमनिर्द्दिष्टश्चतुर्भिः साध्यते व्रणः ॥
योऽल्पौषधकृतो योगो बहुग्रन्थभयान्मया ।
द्रव्याणां तत्समानानां तत्रावापो न दुष्यति ॥
प्रसङ्गाभिहितो यो वा बहुदुर्लभभेषजः ।
यथोपपत्ति तत्रापि कार्य्यमेवं चिकित्सितं ॥
गणोक्तमपि यद्द्रव्यं भवेद्व्याधावयौगिकं ।
तदुद्धरेद्यौगिकन्तु प्रक्षिपेदप्यकीर्त्तितं ॥
उपद्रवास्तु द्विविधा व्रणस्य व्रणितस्य च ।
तत्र गन्धादयः पञ्च व्रणस्योपद्रवाः स्मृताः ॥

ज्वरातीसारौ मूर्च्छा च हिक्काच्छर्दिररोचकः ।
श्वासकासाविपाकाश्च तृष्णा च व्रणितस्य च ॥
व्रणक्रियास्वेवमाशु व्यासेनोक्तास्वपि क्रियां ।
भूयोऽप्युपरि वक्ष्यामि सद्योव्रणचिकित्सिते ॥

---

॥ द्वितीयोऽध्यायः ॥

अथातः सद्योव्रणचिकित्सितं व्याख्यास्यामः ॥

धन्वन्तरिर्धर्म्मभृतां वरिष्ठो वाग्विशारदः ।
विश्वामित्रात्मजमृषिं शिष्यं सुश्रुतमन्वशात् ॥
नानाधारामुखैःशस्त्रैर्नानास्थाननिपातितैः ।
नानारूपा व्रणा ये स्युस्तेषां वक्ष्यामि लक्षणं ॥
आयताश्चतुरस्राश्च त्र्यस्रा मण्डलिनस्तथा ।
अर्द्धचन्द्रप्रतीकाशा विशालाः कुटिलास्तथा ॥
शरावनिम्नमध्याश्च यवमध्यास्तथापरे ।
एवं प्रकाराकृतयो भवन्त्यागन्तवो व्रणाः ॥
दोषजा वा स्वयं भिन्ना नतु वैद्यनिमित्तजाः ।
भिषग्व्रणाकृतिज्ञो हि न मोहमधिगच्छति ॥
दृशन्दुर्द्दर्शरूपेषु व्रणेषु विकृतेष्वपि ।
अनेकाकृतिरागन्तुः स भिषग्भिःपुरातनैः ॥
समासतो लक्षणतः षड्विधः परिकीर्त्तितः ।
छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ॥

घृष्टमाऊस्तथा षष्ठं तेषां वक्ष्यामि लक्षणं ।
तिरश्चीनश्चर्जुर्वापि यो व्रणश्चायतो भवेत् ॥
गात्रस्य पातनं चापिच्छिन्नमित्युपदिश्यते ।
कुन्तशक्त्यृष्टिखड्गाग्रविषाणादिभिराशयः ॥
हतः किञ्चित्स्रवेत्तद्धि भिन्नलक्षणमुच्यते ।
स्थानान्यामाग्निपक्कानां मूत्रस्य रुधिरस्य च ॥
हृदुण्डुकः फुप्फुसश्च कोष्ठइत्यभिधीयते ।
तस्मिन्भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते ॥
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ।
मूर्च्छाश्वासतृडाध्मानमभक्तच्छन्द एव च ॥
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽचिरक्तता ।
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च ॥
हृच्छूलं पार्श्वयोश्चापि विशेषञ्चात्र मे शृणु ।
आमाशयस्थे रुधिरे रुधिरं छर्दयेत्पुनः ।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणं ॥
पक्वाशयगते चापि रुजो गौरवमेव च ।
शीतता चाप्यधो नाभेः खेभ्यो रक्तस्य चागमः ॥
अभिन्नेऽप्याशयेऽन्त्राणां खैः सूक्ष्मैरन्तपूरणं ।
पिहितास्ये घटे यद्वल्लक्ष्यते तस्य गौरवं ॥
सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयादिना ।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत् ॥

नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितं।
विषमं व्रणमङ्गे यत्तत्वतन्त्वभिर्निर्दिशेत्॥
प्रहारपीडनाभ्यान्तु यदङ्गं पृथुतां गतं।
सास्थि तत्पिच्चितं विद्यान्मज्जरक्तपरिप्लुतं॥
विगतत्वग्यदङ्गं हि सङ्घर्षादन्यथापि वा।
उषास्रावान्वितं तत्तु घृष्टमित्युपदिश्यते॥
छिन्ने भिन्ने तथा विद्धे क्षते वास्नगतिस्रवेत्।
रक्तक्षयाद्रुजस्तत्र करोति पवनो भृशं॥
स्नेहपानं हितं तत्र तत्सेको विहितस्तथा।
वेशवारैः सकृशरैः सुस्निग्धैश्चोपनाहनं॥
धान्यस्वेदांश्च कुर्व्वीत स्निग्धान्यालेपनानि च।
वातघ्नौषधसिद्धैश्च स्नेहैर्व्वस्तिर्व्विधीयते॥
पिच्चिते च विघृष्टे च नातिस्रवति शोणितं।
अगच्छति भृशं तस्मिन्दाहः पाकश्च जायते॥
तयोरूष्मणो निग्रहार्थं तथा दाहप्रपाकयोः।
शीतमालेपनं कार्य्यं परिषेकश्च शीतलः॥
षट्स्वेतेषु यथोक्तेषुच्छिन्नादिषु समासतः।
ज्ञेयं समर्पितं सर्व्वं सद्योव्रणचिकित्सितं॥
अत ऊर्द्ध्वं प्रवक्ष्यामिच्छिन्नानान्तु चिकित्सितं॥
ये व्रणा विवृताः केचिच्छिरःपार्श्वावलम्बिनः।
तान्सीव्येद्विधिनोक्तेन बध्नीयाद्गाढमेव च॥

कर्णं स्थानादपहृतं स्थापयित्वा यथास्थितं ।
सीव्येद्यथोक्तं तैलेन स्रोतश्चाप्यभितर्पयेत् ।
कृकाटिकान्ते छिन्ने तु गच्छत्यपि समीरणे ॥
सम्यङ्निवेश्य बध्नीयात्सीव्येच्चापि निरन्तरं ।
आजेन सर्पिषा चैव परिषेकन्तु कारयेत् ॥
उत्तानोऽन्नं समश्नीयाच्छयीत च सुयन्त्रितः ।
शाखासु पतितांस्तिर्य्यक्प्रहाराद्विवृतान्भृशं ॥
सीव्येत्सम्यङ्निवेश्याशु सन्ध्यस्थीन्यनुपूर्व्वशः ।
बद्ध्वा वेल्लितकेनाशु ततस्तैलेन सेचयेत् ॥
चर्मणा गोफणाबन्धः कार्य्यो यो वा हितो भवेत् ।
पृष्ठे व्रणो यस्य भवेदुत्तानं शाययेत्तु तं ॥
अतोऽन्यथा चोरसिजे शाययेत्पुरुषं व्रणे ।
छिन्नां निःशेषतः शाखान्दग्ध्वा तैलेन बुद्धिमान् ॥
बध्नीयात्कोशबन्धेन प्राप्तं कार्य्यञ्च रोपणं ।
चन्दनं पद्मकं रोध्रमुत्पलानि प्रियङ्गवः ॥
हरिद्रा मधुकञ्चैव पयःस्यादत्र चाष्टमं ।
तैलमेभिर्व्विपक्वन्तु प्रधानं व्रणरोपणं ॥
चन्दनं कर्कटाख्या च सहे मांस्याऽऽह्वयामृते ।
हरेणवो मृणालञ्च त्रिफला पद्मकोत्पलम् ॥
त्रयोदशाङ्गं त्रिवृतमेतद्वा पयसान्वितं ।
तैलं विपक्वं सेकार्थे हितं तु व्रणरोपणे ॥

अतऊर्द्ध्वं प्रवच्यामि भिन्नानान्तु चिकित्सितं।
भिन्नं नेत्रमकर्म्मण्यमभिन्नं लम्बते तु यत्॥
तन्निवेश्य यथास्थानमव्याविद्धशिरं शनैः।
पीडयेत्पाणिना सम्यक् पद्मपत्रान्तरेण तु॥
ततोऽस्य तर्पणं कार्य्यं नस्यं चानेन सर्पिषा।
आजं घृतं चीरपात्रं मधुकं चोत्पलानि च॥
जीवकर्षभकौ चैव पिष्ट्वा सर्पिर्व्विपाचयेत्।
सर्व्वनेत्राभिघाते तु सर्पिरेतत्प्रशस्यते॥
उदरान्मेदसो वर्त्तिर्निर्गता यस्य देहिनः।
कषायभस्ममृत्कीर्णां बद्धा सूत्रेण सूत्रवित्॥
अग्नितप्तेन शस्त्रेणच्छिन्द्यान्मधुसमायुतं।
बद्धा व्रणं सुजीर्णेऽन्ने सर्पिषः पानमिष्यते॥
स्नेहपानादृते चापि पयःपानं विधीयते।
शर्करामधुयष्टिभ्यां लाचया वा श्वदंष्ट्रया॥
चित्रासमन्वितञ्चैव रुजादाहविनाशनं।
आटोपो मरणं वा स्याच्छूलो वाऽच्छिद्यमानया॥
मेदोग्रन्थौ च यत्तैलं वच्यते तच्च योजयेत्।
त्वचोऽतीत्य सिरादीनि भित्त्वा वा परिहृत्य वा॥
कोष्ठे प्रतिष्ठितं शल्यं कुर्य्यादुक्तानुपद्रवान्।
तत्रान्तर्लोहितं पाण्डु शीतपादकराननं॥
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्ज्जयेत्।

आमाशयस्थे रुधिरे वमनं पथ्यमुच्यते ॥
पक्काशयस्थे देयञ्च विरेचनमसंशयं ।
आस्थापनञ्च निःस्नेहं कार्य्यमुष्णैर्व्विशोधनैः ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागूं वा पिवेत्सैन्धवसंयुतां ॥
अतिनिस्रुतरक्तो वा भिन्नकोष्ठः पिवेदसृक् ।
स्वमार्गप्रतिपन्नास्तु यस्य विण्मूत्रमारुताः ॥
व्युपद्रवः स भिन्नेऽपि कोष्ठे जीवति मानवः ।
अभिन्नमन्त्रं निःक्रान्तं प्रवेश्यं नान्यथाभवेत् ॥
पिपीलिकाशिरोग्रस्तं तदप्येके वदन्ति तु ।
प्रक्षाल्य पयसा दिग्धं तृणशोणितपांशुभिः ॥
प्रवेशयेत्कृत्तनखो घृतेनाक्तं शनैः शनैः ।
प्रवेशयेत्क्षीरसिक्तं शुष्कमन्त्रं घृताप्लुतं ॥
अङ्गुल्याभिमृशेत्कण्ठं जलेनोद्वेजयेदपि ।
हस्तपादेषु संगृह्य समुत्थाप्य महाबलाः ॥
भवत्यन्तःप्रवेशस्तु यथा निर्द्धुनुयुस्तथा ।
तथान्त्राणि विशन्त्यन्तः स्वाङ्कलां पीडयन्ति च ॥
व्रणाल्पत्वाद्बहुत्वाद्वा दुःप्रवेशं भवेत्तु यत् ।
तदापाद्य प्रमाणेन भिषगन्त्रं प्रवेशयेत् ॥
यथास्थानं निविष्टे च व्रणं सीव्येदतन्द्रितः ।
स्थानादपेतमादत्ते प्राणान् गुम्फितमेव वा ॥

वेष्टयित्वा तु पट्टेन घृतसेकं प्रदापयेत्।
घृतं पिबेत्सुखोष्णञ्च चित्रातैलसमन्वितं ॥
मृदुक्रियार्थं शकृतो वायोश्चाधःप्रवृत्तये।
ततस्तैलमिदं कुर्य्याद्रोपणार्थं चिकित्सकः ॥
त्वचोऽश्वकर्णधवयोर्मोचकीमेषशृङ्गयोः।
शल्लक्यर्ज्जुनयोश्चापि विदार्य्याः चीरिणां तथा ॥
बलामूलानि चाहृत्य तैलमेतैर्व्विपाचयेत्।
व्रणं संरोपयेत्तेन वर्षमात्रं यतेत च ॥
पादौ निरस्तमुष्कस्य जलेन प्रोक्ष्य चाक्षिणी।
प्रवेश्य तुन्नसेवन्या मुष्कौ सीव्येत्ततः परं ॥
कार्य्यो गोफणिकाबन्धः कट्यामावेश्य यन्त्रकं।
न कुर्य्यात्स्नेहसेकञ्च तेन क्लिद्यति हि व्रणः ॥
कालानुसार्य्यागुर्व्वेलाजातीचन्दनपद्मकैः।
शिलादार्व्यमृतातुत्थैस्तैलं कुर्व्वीत रोपणं ॥
शिरसोऽपहृते शल्ये बालवर्त्तिं प्रवेशयेत्।
बालवर्त्त्यामदत्तायां मस्तुलुङ्गं व्रणात्स्रवेत् ॥
हन्यादेनं ततो वायुस्तस्मादेवमुपाचरेत्।
व्रणे रोहति चैकैकं शनैर्व्बालमपकर्षयेत् ॥
गात्राद्धापहृतेऽन्यस्मात्स्नेहवर्त्तिं प्रवेशयेत्।
क्षते निःशोणिते चापि विधिः सद्यःक्षते हितः ॥
दूरावगाढाः सूक्ष्माः स्युर्ये व्रणास्तान्विशोणितान्।

कृत्वा सूक्ष्मेण नेत्रेण चक्रतैलेन तर्पयेत् ॥
समङ्गां रजनीं पद्मां त्रिवर्गं तुल्यमेव च ।
विडङ्गं कटुकां पथ्यां गुडूचीं सकरञ्जिकां ॥
संहृत्य विपचेत्काले तैलं रोपणमुत्तमं ।
तालीशं पद्मकं मांसी हरेणुगुरुचन्दनं ॥
हरिद्रे पद्मबीजानि सोशीरं मधुकञ्च तैः ।
पक्कं सद्योव्रणेषूक्तं तैलं रोपणमुत्तमं ॥
क्षते क्षतविधिः कार्य्यः पिच्चिते भग्नवद्विधिः ।
घृष्टे रुजो निगृह्याशु चूर्णैरुपचरेद्व्रणं ॥
विश्लिष्टदेहं पतितं मथितं हतमेव च ।
वासयेत्तैलपूर्णायां द्रोण्यां मांसरसाशनं ॥
अयमेव विधिः कार्य्यः क्षीणे मर्म्महते तथा ।
रोपणे सपरीषेके पाने च व्रणिनां सदा ॥
तैलं घृतं वा संयोज्यं शरीरत्तूनवेक्ष्य हि ।
घृतानि यानि वक्ष्यामि यत्नतः पित्तविद्रधौ ॥
सद्योव्रणेषु देयानि तानि वैद्येन जानता ।
सद्यःक्षतव्रणं वैद्यः सशूलं परिषेचयेत् ॥
सर्पिषा नातिशीतेन बलातैलेन वा पुनः ।
समङ्गां रजनीं पद्मां पथ्यां तुत्थं सुवर्चलां ॥
पद्मकं रोध्रमधुकं विडङ्गानि हरेणुकं ।
तालीशपत्रं नलदं चन्दनं पद्मकेशरं ॥

मञ्जिष्ठोशीरलाचाश्च चीरिणा चापि पल्लवान्।
पियालबीजं तिन्दुक्यास्तरुणानि फलानि च॥
यथालाभं समाहृत्य तैलमेभिर्व्विपाचयेत्।
सद्योव्रणानां सर्व्वेषामदुष्टानान्तु रोपणं॥
कषायमधुराः शीताः क्रियाः स्निग्धाश्च योजयेत्॥
सद्योव्रणानां सप्ताहं पश्चात्पूर्व्वक्रमाचरेत्।
दुष्टव्रणेषु कर्त्तव्यमूर्द्ध्वंचाधश्च शोधनं॥
विशोषणं तथाहारः शोणितस्य च मोचणं।
कषायं राजवृचादौ सुरसादौ च धावनं॥
तयोरेव कषायेण तैलं शोधनमिष्यते।
चारकल्पेन वा तैलं चारद्रव्येण साधितं॥
द्रवन्ती चिरबिल्वश्च दन्ती चित्रकमेव च।
पृथ्वीका निम्बपत्राणि कासीसं तुत्थमेव च॥
वृहत्तेजोवती नीली हरिद्रे सैन्धवं तिलाः।
भूमीकदम्बः सुवहा शुकाख्या लाङ्गलाक्वया॥
नैपाली जालिनी चैव मदयन्ती मृगादनी।
सुधामूर्व्वार्क्ककीटारिहरितालकरञ्जिकाः॥
यथोपपत्ति कर्त्तव्यं तैलमेतैस्तु शोधनं।
घृतं वा यदि वा प्रातं कल्काः संशोधनास्तथा॥
सैन्धवं वृहदेरण्डपत्रकल्कास्तु वातिके।
त्रिवृद्धरिद्रामधुककल्काः पैत्ते तिलैर्युतः॥

कफजे तिलतेजाह्वा दन्तीस्वर्ज्जिकचित्रकाः ।
दुष्टव्रणविधिः कार्य्यो मेहकुष्ठव्रणेष्वपि ॥
षड्विधः प्राक् प्रदिष्टो यः सद्योव्रणविनिश्चयः ।
नातः शक्यं परं वक्तुमपि निश्चितवादिभिः ॥
उपसर्गैर्निपातैश्च तत्तु पण्डितमानिनः ।
केचित्संयोज्य भाषन्ते बहुधा मानगर्व्विताः ॥
बहु तद्भाषितं तेषां षट्स्वेवेवावतिष्ठते ॥
विशेषा इव सामान्ये षट्त्वन्तु परमं मतं ।

---

॥ तृतीयोऽध्यायः ॥

अथातो भग्नानां चिकित्सितं व्याख्यास्यामः ॥

अल्पाशिनोऽनात्मवतो जन्तोर्व्वातात्मकस्य च ।
उपद्रवैर्व्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥
लवणं कटुकं क्षारमम्लं मैथुनमातपं ।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥
शालिर्म्मांसरसः क्षीरं सर्पिर्यूषः सतीनजः ।
बृंहणं चान्नपानं स्याद्देयं भग्नाय जानता ॥
मधूकोडुम्बराश्वत्थपलाशककुभत्वचः ।
वंशसर्ज्जवटानां वा कुशार्थमुपसंहरेत् ॥
आलेपनार्थं मञ्जिष्ठां मधुकं रक्तचन्दनं ।
शतधौतघृतोन्मिश्रं शालिपिष्टञ्च संहरेत् ।

सप्ताहादथ सप्ताहात्त्रीम्यिवृतुषु बन्धनं ॥
साधारणेषु कर्त्तव्यं पञ्चमे पञ्चमेऽहनि।
आग्नेयेषु व्यहात्कुर्य्याद्भग्नदोषवशेन वा॥
तत्रातिशिथिलं बद्धे सन्धिस्थैर्य्यं न जायते॥
गाढेनापि त्वगादीनां शोफो रुक्पाक एव च।
तस्मात्साधारणं बन्धं भग्ने शंसन्ति तद्विदः॥
न्यग्रोधादिकषायन्तु सुशीतं परिषेचने।
पञ्चमूलीविपक्वन्तु क्षीरं कुर्य्यात्सवेदने॥
सुखोष्णमवचार्य्यंवा चक्रतैलं विजानता।
विभज्य कालं दोषञ्च दोषघ्नौषधसंयुतं॥
परिषेकं प्रदेहञ्च विदध्याच्छीतमेव च।
गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितं॥
शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः।
सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः॥
प्रतिसार्य्य कषायैस्तु शेषं भग्नवदाचरेत्।
प्रथमे वयसि त्वेवं भग्नं सुकरमादिशेत्॥
अल्पदोषस्य जन्तोस्तु काले च शिशिरात्मके।
प्रथमे वयसि त्वेवं मासात्सन्धिः स्थिरो भवेत्॥
मध्यमे द्विगुणात्कालादुत्तरे त्रिगुणात्स्मृतः।
अवनामितमुन्नह्येदुन्नतं चावपीडयेत्॥
आञ्छेदतिक्षिप्तमधो गतं चोपरि वर्त्तयेत्।

आञ्छनैः पीडनैश्चैव सङ्क्षेपैर्बन्धनैस्तथा ॥
सन्धीन् शरीरे सर्व्वांस्तु चलानप्यचलानपि ।
एतैस्तु स्थापनोपायैः स्थापयेन्मतिमान्भिषक् ॥
उत्पिष्टमथ विश्लिष्टं सन्धिं वैद्यो न घट्टयेत् ।
तस्य शीतान्परीषेकान्प्रदेहांश्चावचारयेत् ॥
अभिघाते हृते सन्धिः स्वां याति प्रकृतिं पुनः ।
घृतदिग्धेन पट्टेन वेष्टयित्वा यथाविधि ॥
पट्टोपरि कुशान्दत्वा यथावद्बन्धमाचरेत् ।
प्रत्यङ्गभग्नस्य विधिरत ऊर्द्धं प्रवक्ष्यते ॥
नखसन्धिं समुत्पिष्टं रक्तानुगतमारया ।
अवमथ्य स्रुते रक्ते शालिपिष्टेन लेपयेत् ॥
भग्नां वा सन्धिमुक्तां वा स्थापयित्वाङ्गुलीं समं ।
अणुनावेष्ट्य पट्टेन घृतसेकं प्रदापयेत् ॥
अभ्यज्य सर्पिषा पादं तलभग्नं कुशोत्तरं ।
वस्त्रपट्टेन बध्नीयान्नच व्यायाममाचरेत् ॥
अभ्यज्यायामयेज्जङ्घामूरूश्च सुसमाहितः ।
दत्वा दृढत्वचः शीता वस्त्रपट्टेन वेष्टयेत् ॥
मतिमांश्चक्रयोगेन आञ्छेदूर्व्वस्थि निर्गतं ।
स्फुटितं पिच्चितं चापि बध्नीयात्पूर्व्ववद्भिषक् ॥
आञ्छेदूर्द्धमधो वापि कटीभग्नन्तु मानवं ।
ततः स्थानस्थिते सन्धौ वस्तिभिः समुपाचरेत् ॥

पर्शुकास्वथ भग्नासु घृताभ्यक्तस्य तिष्ठतः।
दक्षिणास्वथ वा वामास्वनुमृज्य निबन्धनीः॥
ततः कवलिकान्दत्वा वेष्टयेत्सुसमाहितः।
तैलपूर्णे कटाहे वा द्रोण्यां वा शाययेन्नरं॥
मुषलेनोत्क्षिपेत्कक्षामंससन्धौ विसंहते।
स्थानस्थितञ्च बध्नीत स्वस्तिकेन विचक्षणः॥
कौर्प्परन्तु तथा सन्धिमङ्गुष्ठेनानुमार्ज्जयेत्।
अनुमृज्य ततः सन्धिं पीडयेत् कूर्पराच्च्युतं।
प्रसार्य्याकुञ्चयेच्चैनं स्नेहसेकञ्च दापयेत्॥
एवं जानुनि गुल्फे च मणिबन्धे च कारयेत्।
उभे तले समे कृत्वा तलभग्नस्य देहिनः॥
बध्नीयादामतैलेन परिषेकञ्च कारयेत्।
प्राग्गोमयमयं पिण्डं धारयेन्मृन्मयं ततः॥
हस्ते जातबले चापि कुर्य्यात्पाषाणधारणं।
सन्नमुन्नमयेत्क्षिन्नमक्षकं मुषलेन तु॥
तथोन्नतं पीडयेच्च बध्नीयाद्गाढमेव च।
ऊरुवद्वापि कर्त्तव्यं बाहुभग्नचिकित्सितं॥
ग्रीवायां तु विवृत्तायां प्रविष्टायामधोऽपि च।
अवटावथहन्वोश्च प्रगृह्योन्नमयेन्नरं॥
तथा कुशान्समं दत्वा वस्त्रपट्टेन वेष्टयेत्॥
उत्तानं शाययेच्चैनं सप्तरात्रमतन्द्रितः।

हन्वस्थिनी समानीय हनुसन्धौ विसंहते॥
स्वेदयित्वा स्थिते सम्यक्पञ्चाङ्गीं वितरेद्भिषक्।
वातघ्नमधुरैः सर्पिः सिद्धं नस्ये च पूजितं॥
अभग्नांश्चलितान्दन्तान्सरक्तानवपीडयेत्।
तरुणस्य मनुष्यस्य शीतैरालेपयेद्बहिः॥
सिक्ताम्बुभिस्ततः शीतैः सन्धानीयैरुपाचरेत्।
उत्पलस्य च नालेन चीरपानं विधीयते॥
जीर्णस्यतु मनुष्यस्य वर्ज्जयेच्चलितान् द्विजान्।
नासां सन्नां विवृत्तां वा ऋज्वीं कृत्वा शलाकया॥
पृथङ्नासिकयोर्नाड्यौ द्विमुख्यौ सम्प्रवेशयेत्।
ततः पट्टेन संवेष्ट्य घृतसेकं प्रदापयेत्॥
भग्नं कर्णञ्च बध्नीयात्समं कृत्वा घृतप्लुतं।
सद्यःक्षतविधानञ्च ततः पश्चात्समाचरेत्॥
मस्तुलुङ्गादिना भिन्ने कपाले मधुसर्पिषी।
दत्वा ततो निबध्नीयात्सप्ताहञ्च पिवेद्घृतं॥
पतनादभिघाताद्वा शूनमङ्गं यदक्षतं।
शीतान्प्रदेहान् सेकांश्च भिषक् तस्यावचारयेत्॥
अथ जङ्घोरुभग्नानां कपाटशयनं हितं।
कीलका बन्धनार्थञ्च पञ्च कार्य्या विजानता॥
यथा न चलनं तस्य भग्नस्य क्रियते तथा।
सन्धेरुभयतो द्वौ द्वौ तले चैकश्च कीलकः॥

श्रोण्यां वा पृष्ठवंशे वा वक्षस्यक्षकयोस्तथा ।
भग्नसन्धिविमोक्षेषु विधिमेनं समाचरेत् ॥
सन्धींश्चिरविमुक्तांस्तु स्निग्धान्स्विन्नान्मृदूकृतान् ।
उक्तैर्व्विधानैर्ब्बुद्ध्या च सम्यक्प्रकृतिमानयेत् ॥
काण्डभग्ने प्ररूढे तु विषमोल्वणसंहिते ।
आपोथ्य शमयेद्भग्नं ततो भग्नवदाचरेत् ॥
कल्पयेन्निर्गतं शुष्कं व्रणान्तेऽस्थि समाहितः ।
सन्ध्यन्ते वा क्रियां कुर्य्यात्सव्रणे व्रणभग्नवत् ॥
ऊर्द्धकाये तु भग्नानां मस्तिक्यं कर्णपूरणं ।
घृतपानं हितं नस्यं प्रशाखास्वनुवासनं ॥
अत ऊर्द्धं प्रवक्ष्यामि तैलं भग्नस्य साधकं ।
रात्रौ रात्रौ तिलान्कृष्णान्वासयेदस्थिरे जले ॥
दिवा दिवा शोषयित्वा गवां क्षीरेण भावयेत् ।
तृतीयं सप्तरात्रं वा भावयेन्मधुकाम्बुना ।
ततः क्षीरे पुनः पीतान्सुशुष्कांश्चूर्णयेद्भिषक् ॥
काकोल्यादिं सयष्ट्याह्वं मञ्जिष्ठां सारिवां तथा ।
कुष्ठं सर्ज्जरसं मांसीं सुरदारु सचन्दनं ॥
शतपुष्पाञ्च सञ्चूर्ण्य तिलचूर्णेन योजयेत् ।
पीडनार्थञ्च कर्त्तव्यं सर्व्वगन्धशृतं पयः ॥
चतुर्गुणेन पयसा तत्तैलं विपचेद्भिषक् ।
एलामंशुमतीं पत्रं जीवकं तगरं तथा ॥

रोध्रं प्रपौण्डरीकञ्च तथा कालानुसारिणं ।
शैरेयकं क्षीरशुक्लामनन्तां समधूलिकां॥
पिष्ट्वा शृङ्गाटकञ्चैव पूर्व्वोक्तान्यौषधानि च।
एभिस्तद्विपचेत्तैलं शास्त्रविन्मृदुनाग्निना ॥
एतत्तैलं सदा पथ्यं भग्नानां सर्व्वकर्म्मसु।
आक्षेपके पक्षघाते तालुशोषे तथार्द्दिते ॥
मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे।
वाधिर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः॥
पथ्यं पाने तथाभ्यङ्गे नस्ये वस्तिषु भोजने ।
ग्रीवास्कन्धोरसां वृद्धिरमुनैवोपजायते ॥
मुखञ्च पद्मप्रतिमं सुसुगन्धिसमीरणं।
गन्धतैलमिदं नाम्ना सर्व्ववातविकारनुत्॥
राजार्हमेतत्कर्त्तव्यं राज्ञामेव विचक्षणैः।
क्षपुताक्षप्रियालानां तैलानि मधुरैः सह ॥
वसां दत्वा यथालाभं क्षीरे दशगुणे पचेत्।
स्नेहोत्तममिदं चाशु कुर्य्यादङ्गप्रसाधनं ॥
पानाभ्यञ्जननस्येषु वस्तिकर्म्मणि सेचने।
भग्नं नैति यथापाकं प्रयतेत तथा भिषक् ॥
पक्वमांससिरास्नायु तद्धि कृच्छ्रेण सिध्यति।
भग्नं सन्धिमनाविद्धमहीनाङ्गमनुल्वणं ॥
सुखचेष्टाप्रचारञ्च संहितं सम्यगादिशेत्।

---

॥ चतुर्थोऽध्यायः ॥

अथातो वातव्याधिचिकित्सितं व्याख्यास्यामः ॥

आमाशयगते वातेच्छर्द्दयित्वा यथाक्रमं ।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥
चित्रकेन्द्रयवे पाठा कटुकातिविषाभया ।
वातव्याधिप्रशमनो योगः षड्धरणः स्मृतः ॥
पक्वाशयगते चापि देयं स्नेहविरेचनं ।
वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ॥
कार्य्यो वस्तिगते चापि विधिर्व्वस्तिविशोधनः ।
श्रोत्रादिषु प्रकुपिते कार्य्यश्चानिलहा क्रमः ॥
स्नेहाभ्यङ्गोपनाहाश्च मर्द्दनालेपनानि च ।
त्वङ्मांसासृक्सिरां प्राप्ते कुर्य्याच्चासृग्विमोक्षणं ॥
स्नेहोपनाहाग्निकर्म्मबन्धनोन्मर्द्दनानि च ।
स्नायुसन्ध्यस्थिसम्प्राप्ते कुर्य्याद्वायावतन्द्रितः ॥
निरुद्धेऽस्थनि वा वायौ पाणिमन्थेन दारिते ।
नाडीं दत्वास्थनि भिषक् चूषयेत्पवनं बली ॥
शुक्रप्राप्तेऽनिले कार्य्यं शुक्रदोषचिकित्सितं ।
अवगाहकुटीकर्षूप्रस्तराभ्यङ्गवस्तिभिः॥
जयेत्सर्व्वाङ्गजं वातं सिरामोक्षैश्च बुद्धिमान्।
एकाङ्गगञ्च मतिमान् शृङ्गैश्चावस्थितं जयेत् ॥
बलासपित्तरक्तैस्तु संसृष्टमविरोधिभिः ।

सुप्तिवातेऽवसम्भोचं कुर्य्यात्तु बहुशो भिषक् ॥
दिह्याच्च लवणागारधूमैस्तैलसमन्वितैः।
पञ्चमूलीशृतं क्षीरं फलाम्लो रस एव च ॥
सुस्निग्धो धान्ययूषो वा हितो वातविकारिणां।
काकोल्यादिः सवातघ्नः सर्व्वाम्लद्रव्यसंयुतः ॥
सानूपोदकमांसस्तु सर्व्वस्नेहसमन्वितः।
सुखोष्णः स्पष्टलवणः शाल्वणः परिकीर्त्तितः ॥
तेनोपनाहं कुर्व्वीत सर्व्वदा वातरोगिणां।
कुञ्चमानं रुजार्त्तं वा गात्रं स्तब्धमथापि वा ॥
गाढं पट्टैर्निबध्नीयात्क्षौमकार्पासकौर्णिकैः।
विडालनकुलोष्ट्राणां चर्मगोण्यां मृगस्य वा ॥
प्रवेशयेद्वा स्वभ्यक्तं शाल्वणेनोपनाहितं।
स्कन्धवक्षस्त्रिकप्राप्तं वायुं मन्यागतं तथा ॥
वमनं हन्ति नस्यञ्च कुशलेन प्रयोजितं।
शिरोगतं शिरोवस्तिर्हन्ति वातविमोक्षणं ॥
स्नेहमात्रासहस्रन्तु धारयेत्तत्र योगतः।
सर्व्वाङ्गगतमेकाङ्गस्थितं वापि समीरणं ॥
रुणद्धि केवलो वस्तिर्व्वायुवेगमिवाचलः।
स्नेहस्वेदस्तथाभ्यङ्गो वस्तिःस्नेहविरेचनं॥
शिरोवस्तिः शिरःस्नेहो धूमः स्नैहिक एव च।
सुखोष्णः स्नेहगण्डूषो नस्यं स्नैहिकमेव च ॥

रसाः क्षीराणि मांसानि स्नेहाः स्नेहान्वितञ्च यत्।
भोजनानि फलाम्लानि स्निग्धानि लवणानि च॥
सुखोष्णश्च परीषेकस्तथा संवाहनानि च।
कुङ्कुमागुरुपत्राणि कुष्ठैलातगराणि च॥
कौशेयौर्णिकरोमाणि कार्पासानि गुरूणि च।
निवातातपयुक्तानि तथा गर्भगृहाणि च॥
मृद्वी शय्याग्निसन्तापो ब्रह्मचर्य्यं तथैव च।
समासेनैवमादीनि योज्यान्यनिलरोगिषु॥

त्रिवृद्दन्तीसुवर्णक्षीरीसप्तलाशङ्खिनीत्रिफलाविडङ्गानामचसमाः कल्का विल्वमात्रः कल्कस्तिल्वकमूलकम्पिल्लकयोस्त्रिफलारसदधिपात्रे द्वे द्वे घृतपात्रमेकं तदैकध्यं संसृज्य विपचेत्तिल्वकसर्पिरेतत्स्नेहविरेचनमुपदिशन्ति वातरोगेषु। तिल्वकविधिरेवाशोकरम्यकयोर्द्रष्टव्यः॥

तिलपरिपीडनोपकरणकाष्ठान्याहृत्यानल्पकालं तैलपरिपीतान्यणूनि खण्डशः कल्पयित्वावचुद्य महति कटाहे पानीये आप्लाव्य क्राथयेत्ततः स्नेहमम्बुपृष्ठाद्यदुदेति तत्सरकपाणिरन्यतरेणादाय वातघ्नौषधप्रतीवापञ्च स्नेहपाककल्पेन विपचेदेतदणुतैलमुपदिशन्ति वातरोगेषु। अणुभ्यस्तैलद्रव्येभ्यो निष्पाद्यतइत्यणुतैलं॥

अथ महापञ्चमूलकाष्ठैर्बहुभिरवदग्ध्यावनिप्रदेशमसितमुषितमेकरात्रमुपशान्तेऽग्नावपोह्य भस्म निष्टप्तां भूमिं विदारिगन्धादिसिद्धेन तैलघटशतेन तुल्यपयसाभिषिच्यैकरात्रमवस्थाप्य ततो

यावती मृत्तिका स्निग्धा स्यात्तामादायोष्णोदकेन महति कटाहेऽभ्यासिञ्चेत्तत्र यत्तैलमुत्तिष्ठेत्तत्पाणिभ्यां पर्य्यादाय स्वनुगुप्तं निदध्यात्। ततस्तैलं वातहरौषधक्वाथमांसरसक्षीराम्लभागसहस्रेण सहस्रपाकं विपचेद्यावता कालेन शक्नोति पक्तुं प्रतिवापश्चात्र हैमवता दक्षिणापथगाश्च गन्धा वातघ्नानि च तस्मिन् सिध्यति शङ्खानाध्मापयेद्दुन्दुभिं घातयेच्छत्त्रं धारयेद्वालव्यजनैश्च वीजयेद्ब्राह्मणसहस्रं भोजयेत् तत्साधु सिद्धमवतार्य्य सौवर्णे राजते मृन्मये वा पात्रे स्वनुगुप्तं निदध्यात्तदेतत् सहस्रपाकमप्रतिवारवीर्य्यं राजार्हं तैलमेवं भागशतविपक्वं शतपाकं ॥

गन्धर्व्वहस्तकमुष्ककनक्तमालाटरूषकपूतीकारग्वधचित्रकादीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽवक्षुद्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेदेतत्पत्रलवणमुपदिशन्ति वातरोगेषु ॥

पत्रलवणं ॥

एवं स्नुहीकाण्डवार्त्ताकुशिग्रुलवणानि सङ्क्षुद्य घटं पूरयित्वा सर्पिस्तैलवसामज्जभिःप्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेदेतत्स्नेहलवणमुपदिशन्ति वातरोगेषु॥काण्डलवणं ॥

गण्डीरपलाशकुटजविल्वार्कस्नुह्यपामार्गपाटलापारिभद्रकनादेयीकृष्णगन्धानीपनिर्दहन्यटरूषकनक्तमालकपूतिकबृहतीकण्टकारिकाभल्लातकेङ्गुदीवैजयन्तीकदलीवर्षाभूह्रीवेरक्षुरकेन्द्रवारुणीश्वेतमोक्षकाशोका इत्येवं वर्गं समूलपत्रशाखमार्द्रमाहृत्य लवणेन सह संसृष्टं पूर्व्ववद्दग्ध्वा क्षारकल्पेन परिस्राव्य विपचेदेतत्प्रति

वापश्चात्र हिङ्ग्वादिभिः पिप्पल्यादिभिर्व्वा। इत्येतत्कल्याणकलवणं वातरोगेषु गुल्मप्लीहाग्निसङ्गाजीर्णार्शोऽरोचकार्त्तानां कासादिभिरुपद्रुतानां चोपदिशन्ति पानभोजनेष्विति॥

भवति चात्र॥ विष्यन्दनादुष्णभावाद्दीपणाच्च विपाचनात्।
संस्कारपाचनाच्चेदं वातरोगेषु शस्यते॥

---

॥ पञ्चमोऽध्यायः॥

अथातो महावातव्याधिचिकित्सितं व्याख्यास्यामः॥

द्विविधं वातशोणितमुत्तानमवगाढञ्चेत्येके भाषन्ते तत्तु न सम्यक्कुष्ठवदुत्तानं भूत्वा कालान्तरेणावगाढीभवति तस्मान्न द्विविधं॥

तत्र बलवद्विग्रहादिभिः प्रकुपितस्य वायोर्गुरूष्णाध्यशनशीलस्य प्रदुष्टं शोणितं मार्गमावृत्य वातेन सहैकीभूतं युगपद्वातरक्तनिमित्तां वेदनां जनयतीति वातरक्तं तत्तु पूर्व्वं हस्तपादयोरवस्थानं कृत्वा पश्चाद्देहं व्याप्नोति। तस्य पूर्व्वरूपाणि तोददाहकण्डूशोफस्तम्भत्वक्पारुष्यसिरास्नायुधमनिस्पन्दनसक्थिदौर्ब्बल्यानि श्यावरक्तमण्डलोत्पत्तिश्चाकस्मात्पाणिपादतलाङ्गुलिगुल्फप्रभृतिषु॥ तत्राप्रतिकारिणोऽपचारिणश्च रोगो व्यक्तस्तस्य लक्षणमुक्तं तत्राप्रतिकारिणो वैकल्यं भवति॥

भवति चात्र॥ प्रायशः सुकुमाराणां मिथ्याहारविहारिणां।
स्थूलानां सुखिनां चापि वातरक्तं प्रकुप्यति॥

तत्र प्राणमांसक्षयपिपासाज्वरमूर्च्छाश्वासकासस्तम्भारोचकाविपाकविसरणसङ्कोचनैरनुपद्रुतं बलवन्तमात्मवन्तमुपकरणवन्तं चोपक्रमेत् ॥

तत्रादावेव बहुवातरक्तस्नानाङ्गादृते मार्गावरणाद्दुष्टशोणितमसकृदल्पाल्पमवसिञ्चेद्वातकोपभयात्ततो वमनादिभिरुपक्रमैरुपपाद्य प्रतिसंसृष्टभक्तं वातप्रबले पुराणघृतं पाययेदजाक्षीरं चार्द्धतैलं मधुकाक्षयुक्तं शृगालविन्नासिद्धं वा शर्करामधुमधुरं शुण्ठीशृङ्गाटककशेरुकसिद्धं वा श्यामारास्नासुषवीशृगालविन्नापीलुशतावरीश्वदंष्ट्रादिपञ्चमूलीसिद्धं वा ॥ द्विपञ्चमूलीक्वाथाष्टगुणसिद्धेन च पयसा मधुकमेषशृङ्गीश्वदंष्ट्रासरलभद्रदारुवचासुरभिकल्कप्रतीवापं तैलं पाचयित्वा पानादिषूपयुञ्जीत शतावरीमयूरकमधुकक्षीरविदारीबलातिबलातृणपञ्चमूलीक्वाथसिद्धं वा काकोल्यादिप्रतिवापं बलातैलं शतपाकञ्चेति ॥ वातहरमूलसिद्धेन च पयसा परिषेचनमम्लेन वा कुर्व्वीत ॥ यवमधुकैरण्डतिलवर्षाभूभिर्व्वा प्रदेहः कार्य्यः ॥

तत्र चूर्णितेषु यवगोधूमतिलमुद्गमाषेषु प्रत्येकशः काकोलीक्षीरकाकोलीजीवकर्षभकबलातिबलाविसमृणालशृगालविन्नामेषशृङ्गीपियालशर्कराकशेरुकसुरभिवचाकल्कमिश्रेषूपनाहार्थं सर्पिस्तैलवसामज्जदुग्धसिद्धाः पञ्च पायसा व्याख्याताः ॥ स्नैहिकफलसारोत्कारिका वा ॥ चूर्णितेषु यवगोधूमतिलमुद्गमाषेषु विचित्रमत्स्यपिशितवेशवारो वा ॥ बिल्वपेशिकातगरदेवदारुसरलारास्नाहरेणु

कुष्ठशतपुष्पासुरादधिमस्तुयुक्त उपनाहः ॥ मातुलुङ्गाम्लसैन्धवघृतमिश्रो मधुशिग्रुमूलमालेपे तिलकल्कश्चेति वातप्रबले ॥

पित्तप्रबले द्राक्षारेवतकट्फलपयस्यामधुकचन्दनकाश्मर्य्यकषायं शर्करामधुमधुरं पाययेत्। शतावरीमधुकपटोलत्रिफलाकटुरोहिणीकषायं गुडूचीकषायं वा पित्तज्वरहरचन्दनादिकषायं शर्करा मधुमधुरं तिक्तकषायसिद्धं वा सर्पिः ॥

विसमृणालभद्रश्रियपद्मककषायेणार्द्धक्षीरेण परिषेकः॥ क्षीरेक्षुरसमधुशर्करातण्डुलोदकैर्व्वा द्राक्षेक्षुकषायमिश्रैर्मस्तुमधुधान्याम्लैर्जीवनीयसिद्धेन वा सर्पिषाभ्यङ्गः ॥

शतधौतघृतेन वा काकोल्यादिकल्कविपक्केन वा सर्पिषा शालिषष्टिकनलवञ्जुलतालीशशृङ्गाटकगलोड्यगौरीगैरिकशैवलपद्मकपद्मपत्रप्रभृतिभिर्धान्याम्लपिष्टैः प्रदेहो घृतमिश्रः॥ वातप्रबलेऽप्येष सुखोष्णः प्रदेहः कार्य्यः॥ रक्तप्रबलेऽप्येवं बहुशश्च शोणितमवसेचयेत् शीततमाश्च प्रदेहाः कार्य्या इति॥

श्लेष्मप्रबले त्वामलकहरिद्राकषायं मधुमधुरं पाययेत् ॥ त्रिफलाकषायं वा मधुकशृङ्गवेरहरीतकीतिक्तरोहिणीकल्कं वा सक्षौद्रमूत्रं तोयेन गुडहरीतकीं वा भक्षयेत् ॥

तैलमूत्रक्षारोदकसुराशुक्तकफघ्नौषधनिःक्वाथैः परिषेकः ॥ आरग्वधादिकषायैर्व्वोष्णैः । मस्तुमूत्रसुराशुक्तमधुकसारिवापद्मकसिद्धं वा घृतमभ्यङ्गः। तिलसर्षपातसीयवचूर्णानि श्लेष्मान्तककपित्थमधुशिग्रुमिश्राणि क्षारमूत्रपिष्टः प्रदेहः ॥

श्वेतसर्षपकल्कः तिलाश्वगन्धाकल्कः प्रियालसेलुकपित्थत्वक् कल्कः मधुशिग्रुपुनर्नवाकल्कः श्योषतिक्तापृथक्पर्णीबृहतीकल्क इत्येते पञ्च प्रदेहाः सुखोष्णाः चारोदकपिष्टाः ॥

शालपर्णी पृश्निपर्णी बृहत्यौ वा क्षीरपिष्टाः सर्पिर्मिश्राः ॥ संसर्गे सन्निपाते च क्रियापथमुक्तं मिश्रं कुर्य्यात्॥

सर्व्वेषु गुडहरीतकीं वा सेवेत पिप्पलीर्वा क्षीरपिष्टा वारिपि ष्टावा पञ्चाभिवृद्धाः दशाभिवृद्धा वा पिवेत्क्षीरौदनाहारो दश रात्रं भूयश्चापकर्षयेदेवं यावत्पञ्चदश चेति तदेतत्पिप्पलीवर्द्धमानकं वातशोणितविषमज्वरारोचकपाण्डुरोगप्लीहोदरार्शः कासश्वासशोफशोषाग्निसादहृद्रोगोदराण्युपहन्ति ॥

जीवनीयप्रतीवापं सर्पिः पयसा पाचयित्वा ऽभ्यञ्जेत् ॥

सहासहदेवाचन्दनमूर्व्वामुस्ताप्रियालशतावरीकशेरुपद्मकमधुकशतपुष्पाकुष्ठानि क्षीरपिष्टः प्रदेहो घृतमण्डयुक्तः ॥

सैरेयकाटरूषकबलातिबलाजीवन्तीसुषवीकल्को वा छागक्षीरपिष्टः ॥

काश्मर्य्यमधुकतर्पणकल्को वा मधूच्छिष्टमञ्जिष्ठासर्ज्जरससारिवाक्षीरसिद्धं पिण्डतैलमभ्यङ्गः ॥

सर्व्वेषु च पुराणघृतमामलकरसविपक्वं वा पानार्थे ॥ जीवनीयसिद्धं परिषेकार्थे काकोल्यादिक्वाथकल्कसिद्धं वा सुषवीक्वाथसिद्धं वा कारवेल्लकक्वाथमात्रसिद्धं वा ॥ बलातैलं वा परि

षेकावगाहवस्तिभोजनेषु शालिषष्टिकयवगोधूमान्नमनवं भुञ्जीत पयसा जाङ्गलरसेन वा मुद्गयूषेणवानम्लेन ॥

शोणितमोक्षञ्चाभीक्ष्णं कुर्व्वीत । उच्छ्रितदोषे च वमन विरेचनास्थापनानुवासनकर्म्म कर्त्तव्यं ॥

भवन्ति चात्र ॥ एवमाद्यैः क्रियायोगैरचिरोत्पतितं सुखं ।
वातासृक् साध्यते वैद्यैर्य्याप्यते तु चिरोत्थितं ॥
उपनाहपरीषेकप्रदेहाभ्यञ्जनानि च ।
शरणान्यप्रवातानि मनोज्ञानि महान्ति च ॥
मृदुगण्डोपधानानि शयनानि सुखानि च ।
वातरक्ते प्रशस्यन्ते मृदुसंवाहनानि च ॥
व्यायामं मैथुनं कोपमुष्णाम्ललवणाशनं ।
दिवास्वप्नमभिष्यन्दि गुरु चान्नं विवर्जयेत् ॥

अपतानकिनमस्रस्ताक्षमवक्रभ्रुवमस्तब्धमेढ्रमस्वेदनमवेपनम प्रलापिनमखट्वापातिनमवहिरायामिनं चोपक्रमेत् ॥

तत्र प्रागेव स्नेहाभ्यक्तं स्विन्नशरीरमवपीडनेन तीक्ष्णेनोपक्रमेत शिरःशुद्ध्यर्थं । अनन्तरञ्च विदारिगन्धादिक्वाथमांसरस क्षीरदधिपक्वं सर्पिरच्छं पाययेत् तथा हि नातिमात्रं वायुः प्रसरति । ततो भद्रदार्व्वादिवातघ्नगणमाहृत्य सयवकोलकुलत्थसानूपौदकमांसं पञ्चवर्गमेकतः प्रक्वाथ्य तमादाय कषायमम्लक्षीरैः सहोन्मिश्र्य सर्पिस्तैलवसामज्जभिः सह विपचेन्मधुरकप्रतीवापं तदेतत्त्रैवृतमपतानकिनां परिषेकावगाहाभ्यङ्गपानभोजनानुवासनन

स्नेषु विदध्यात्। यथोक्तैश्च स्वेदविधानैः स्वेदयेत्॥ बलीयसि वाते सुखोष्णतुषबुसकरीषपूर्णे कूपे निदध्यादामुखात्॥ तप्तायां वाङ्गारचुल्ल्यां तप्तायां वा शिलायां सुरापरिषिक्तायां पलाशदलच्छन्नायां शाययेत्। कृशरावेशवारपायसैर्वा स्वेदयेत्॥

मूलकारूवूकस्फूर्जार्जकार्कशप्तलाशह्लिनीखरससिद्धं तैलमपतानकिनां परिषेकादिषूपयोज्यं॥ अभुक्तवता पीतमम्लं दधिमरिचवचायुक्तमपतानकं हन्ति तैलसर्पिर्वसाक्षौद्राणि च॥ एतच्छुद्धवातापतानकविधानमुक्तं संसृष्टे संसृष्टं कर्त्तव्यं। वेगान्तेषु चावपीडं दद्यात्॥ ताम्रचूडकर्कटकृष्णमत्स्यशिशुमारवराहवसाश्च सेवेत। क्षीराणि वा वातहरसिद्धानि यवकोलकुलत्थमूलकदधिघृततैलसिद्धां वा यवागूं स्नेहविरेचनास्थापनानुवासनैश्चैनं दशरात्राहतवेगमुपक्रमेत्॥ वातव्याधिचिकित्सितं चावेक्षेत रक्षाकर्म्म च कुर्य्यादिति॥

पक्षाघातोपद्रुतमम्लानगात्रं सरुजमात्मवन्तमुपकरणवन्तं चोपक्रमेत्॥ तत्र प्रागेव स्नेहस्वेदोपपन्नं मृदुना शोधनेन संशोध्यानुवास्यास्थाप्य च यथाकालमाक्षेपकविधानेनोपचरेत्। वैशेषिकश्चात्र मस्तिष्कशिरोवस्तिश्चाणुतैलमभ्यङ्गार्थे शाल्वणमुपनाहार्थे बलातैलमनुवासनार्थे। एवमतन्द्रितस्त्रींश्चतुरो वा मासान् क्रियापथमुपसेवेत॥

मन्यास्तम्भेऽप्येतदेव विधानं विशेषतो वातश्लेष्महरैर्नस्यैरूक्षस्वेदैश्चोपचरेत्॥

अपतन्त्रकातुरं नापतर्पयेत्। वमनानुवासनास्थापनानि न निषेवेत ॥ वातश्लेष्मोपरुद्धोच्छ्वासं तीक्ष्णैः प्रध्मापनैर्मोचयेत्। तुम्बुरुपुष्कराक्षहिङ्गुम्लवेतसपथ्यालवणत्रयं यवक्राथेन पातुं प्रयच्छेत् पथ्याशतार्द्धे सौवर्च्चलद्विपले चतुर्गुणे पयसि सर्पिःप्रस्थं सिद्धं वातश्लेष्मापनुच्च कर्म्म कुर्य्यात् ॥

अर्दितातुरं बलवन्तमुपकरणवन्तञ्च वातव्याधिविधानेनोपचरेद्वैशेषिकैश्च मस्तिष्कशिरोवस्तिनस्यधूमोपनाहस्नेहनाडीस्वेदादिभिः। ततः सतृणं महापञ्चमूलं काकोल्यादिं विदारिगन्धादिमौदकानूपमांसं तथैवौदककन्दांश्च संहृत्य द्विगुणोदके क्षीरद्रोणे निक्वाथ्य पादावशिष्टमवतार्य्य परिस्राव्य तैलप्रस्थेनोन्मिश्र्य पुनरग्नावधिश्रयेत् ततस्तैलं क्षीरानुगतमवतार्य्य शीतीभूतमभिमथ्नीयात्तत्र यः स्नेह उत्तिष्ठेत्तमादाय मधुरौषधसहाक्षीरयुक्तं विपचेदेतत्क्षीरतैलमर्दितातुराणां पानाभ्यङ्गादिषूपयोज्यं ॥
तैलहीनं वा क्षीरसर्पिरक्षितर्पणमिति ॥

गृध्रसीविश्वाचीक्रोष्टुकशिरःखञ्जपङ्गुलवातकण्टकपाददाहपादहर्षाववाहुकबाधिर्य्यधमनीगतवातरोगेषु यथोक्तं यथोद्देशञ्च सिराव्यधं कुर्य्यादन्यत्रावबाहुकाद्वातव्याधिचिकित्सितंचावेक्षेत ॥

कर्णशूले तु शृङ्गवेररसं तैलमधुसंसृष्टं सैन्धवोपहितं सुखोष्णं कर्णे दद्यादजामूत्रं मधुतैलानि वा मातुलुङ्गदाडिमतिन्तिडीकस्वरसमूत्रसिद्धं तैलं शुक्तसुरातक्रमूत्रलवणसिद्धं वा ॥

नाडीस्वेदैश्च स्वेदयेत् । वातव्याधिचिकित्सां चावेक्षेत । भूयश्चोत्तरे वक्ष्यामः ॥

तूणीप्रतूण्योः स्नेहलवणमुदकेन पाययेत् पिप्पल्यादिचूर्णं वा हिङ्गुयवक्षारप्रगाढं वा सर्पिर्वस्तिभिश्चैनमुपक्रमेत् ॥

आध्माने त्वपतर्पणपाणितापदीपनचूर्णफलवर्त्तिक्रियापाचनीयवस्तिभिरुपचरेत्। लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥ प्रत्याध्माने छर्दनापतर्पणदीपनानि कुर्य्यात्।

अष्ठीलाप्रत्यष्ठीलयोर्गुल्माभ्यन्तरविद्रधिवत्क्रियाविभाग इति ॥

हिङ्गुत्रिकटुवचाजमोदाधन्याजगन्धादाडिमतिन्तिडीकपाठाचित्रकयवक्षारसैन्धवविडसौवर्चलस्वर्जिकापिप्पलीमूलाम्लवेतसशटीपुष्करमूलहपुषाचव्याजाजीपथ्याश्चूर्णयित्वा मातुलुङ्गाम्लेन बहुशः परिभाव्याक्षमात्रां गुटिकां कारयेत्ततःप्रातरेकैकां वातविकारी भक्षयेत् । अथैषयोगः कासश्वासगुल्मोदरारोचकहृद्रोगाध्मानपार्श्वोदरवस्तिशूलानाहमूत्रकृच्छ्रप्लीहार्शस्तूणीप्रतूणीरपहन्ति ॥

भवन्ति चात्र ॥ केवलो दोषयुक्तो वा धातुभिर्व्वावृतोऽनिलः ।
विज्ञेयो लक्षणोहाभ्यां चिकित्सा वाऽविरोधतः ॥
रुजावन्तं घनं शीतं शोफं मेदोयुतोऽनिलः ।
करोति यस्य तं वैद्यः शोथवत्समुपाचरेत् ॥
कफमेदोवृतो वायुर्यदोरू प्रतिपद्यते ।

तदाङ्गमर्दस्थैमित्यरोमहर्षरुजाज्वरैः ॥
निद्रया चार्दितौ स्तब्धौ शीतलावप्रचेतनौ ।
गुरुकावस्थिरावूरू न स्वाविव च मन्यते ॥
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ।
स्नेहवर्ज्जं पिबेत्तत्र चूर्णं षट्धरणं नरः ॥
हितमुष्णाम्बुना तद्वत्पिप्पल्यादिगणैः कृतं ।
लिह्याद्वा त्रैफलं चूर्णं क्षौद्रेण कटुकान्वितं ॥
मूत्रैर्वा गुग्गुलुं श्रेष्ठं पिबेद्वापि शिलाजतु ।
ततो हन्ति कफाक्रान्तं समेदस्कं प्रभञ्जनं ॥
हृद्रोगमरुचिं गुल्मं तथाभ्यन्तरविद्रधिं ।
सञ्चारमूत्रस्वेदांश्च रूक्षाण्युत्सादनानि च ॥
कुर्य्याद्दिह्याच मूत्राढ्यैः करञ्जफलसर्षपैः ।
भोज्याः पुराणश्यामाककोद्रवोद्दालशालयः ॥
शुष्कमूलकयूषेण पटोलस्य रसेन वा ।
जाङ्गलैरघृतैर्मांसैः शाकैश्चालवणैर्हितैः ॥
यदा स्यातां परिक्षीणे भूयिष्ठे कफमेदसी ।
तदा स्नेहादिकं कर्म्म पुनरत्रावचारयेत् ॥
सुगन्धिः सुलघुः सूक्ष्मस्तीक्ष्णोष्णः कटुको रसः ।
कटुपाकः सरो हृद्यो गुग्गुलुः स्निग्धपिच्छिलः ॥
स नवो बृंहणो वृष्यः पुराणस्त्वपकर्षणः ।
तैक्ष्ण्यौष्ण्यात्कफवातघ्नः सरत्वान्मलपित्तनुत् ॥

सौगन्ध्यात् पूतिकोष्ठघ्नः सौक्ष्म्याच्चानलदीपनः ।
तम्प्रातस्त्रिफलादार्व्वीपटोलकुशवारिभिः ॥
पिबेदावाप्य वा मूत्रैः क्षारैरुष्णोदकेन वा ।
जीर्णे यूषरसक्षीरैर्भुञ्जानो हन्ति मासतः ॥
गुल्मं मेहमुदावर्त्तमुदरं सभगन्दरं ।
कृमिकण्डूरुचिश्वित्राण्यर्वुदग्रन्थिमेव च ॥
नाड्याढ्यवातश्वयथुकुष्ठदुष्टव्रणांश्च सः ।
कोष्ठसन्ध्यस्थिगं वायुं वृक्षमिन्द्राशनिर्यथा ॥

---

## ॥ षष्ठोऽध्यायः ॥

अथातोऽर्शसां चिकित्सितं व्याख्यास्यामः ॥

चतुर्व्विधोऽर्शसां साधनोपायः ॥ तद्यथा भेषजं क्षारोऽग्निः शस्त्रमिति तत्राचिरकालजातान्यल्पदोषलिङ्गोपद्रवाणि भेषजसाध्यानि मृदुप्रसृतावगाढान्युच्छ्रितानि क्षारेण । कर्कशस्थिरपृथुकठिनान्यग्निना । तनुमूलान्युच्छ्रितानि क्लेदवन्ति च शस्त्रेण । तत्र भेषजसाध्यानामर्शसामदृश्यानाञ्च भेषजं भवति क्षाराग्निशस्त्रसाध्यानान्तु विधानमुच्यमानमुपधारय ॥

तत्र बलवन्तमातुरमर्शोभिरुपद्रुतमुपस्निग्धं परिस्विन्नमनिलवेदनाभिवृद्धिप्रशमार्थं स्निग्धमुष्णमल्पमन्नं द्रवप्रायं भुक्तवन्तमुपवेश्य सम्भृते शुचौ देशे साधारणे व्यभ्रे काले समे फलके

शय्यायां वा प्रत्यादित्यगुदमन्यस्योत्सङ्गे निषण्णपूर्व्वकायमुत्तानं किञ्चिदुन्नतकटिकं वस्त्रकम्बलकोपविष्टं यन्त्रशाटकेन परिक्षिप्त ग्रीवासक्थं परिकर्म्मिभिः सुपरिगृहीतमस्पन्दनशरीरं कृत्वा ततोऽस्मिन् घृताभ्यक्तं यन्त्रमृज्वग्रमुखं पायौ शनैः शनैः प्रवाहमाणस्य प्रणिधाय प्रविष्टे चार्शो वीक्ष्य शलाकयोत्पीड्य पिचुवस्त्रयोरन्यतरेण प्रमृज्य क्षारं पातयेत् पातयित्वा च पाणिना यन्त्रद्वारं पिधाय वाक्शतमात्रमुपेक्षेत । ततः प्रमृज्य क्षारबलं व्याधिबलञ्चावेक्ष्य पुनरालेपयेत् । अथार्शः पक्वजाम्बवप्रतीकाशमभिसमीक्ष्यावसन्नमीषन्नतमुपावर्त्तयेत् ॥ क्षारं प्रक्षालयेद्धान्याम्लेन दधिमस्तुशुक्तफलाम्लैर्व्वा ततो यष्टीमधुकमिश्रेण सर्पिषा निर्व्वाप्य यन्त्रमपनीयोत्थाप्यातुरमुष्णोदकोपविष्टं शीताभिरद्भिः परिषिञ्चेदशीताभिरित्येके ॥ ततोनिर्व्वातमागारं प्रवेश्याचारिकमादिशेत् सावशेषं पुनर्द्दहेत् । एवं सप्तरात्रात्सप्तरात्रादेकैकमुपक्रमेत तत्र बहुषु पूर्व्वं दक्षिणं साधयेद्दक्षिणाद्वामं वामात्पृष्ठजं ततोऽग्रजमिति ॥

तत्र वातश्लेष्मनिमित्तान्यग्निक्षाराभ्यां साधयेत् क्षारेणैव मृदुना पित्तरक्तनिमित्तानि । तत्र वातानुलोम्यमन्नरुचिरग्निदीप्तिर्लाघवं बलवर्णोत्पत्तिर्मनस्तुष्टिरिति सम्यग्दग्धलिङ्गानि ॥ अतिदग्धे तु गुदावदरणं दाहमूर्च्छा ज्वरः पिपासा शोणितातिप्रवृत्तिस्तन्निमित्ताश्चोपद्रवा भवन्ति ॥ श्यामाल्पव्रणता कण्डूरनिलवैगुण्यमिन्द्रियाणामप्रसादो विकारस्य चाशान्तिर्हीनदग्धे ॥

महान्तिच प्राणवतश्छित्वा दहेत् । निर्गतानि चात्यर्थं दोषपूर्णानि यन्त्रादिना स्वेदाभ्यङ्गस्नेहावगाहोपनाहविस्रावण लेपक्षाराग्निशस्त्रैरुपाचरेत् ॥ प्रवृत्तरक्तानि च रक्तपित्तविधानेन भिन्नपुरीषाणि चातीसारविधानेन बद्धवर्चांसि स्नेहपानविधाने नोदावर्त्तविधानेन वा । एष सर्व्वस्थानगतानामर्शसां दहनकल्पः ॥

आसाद्य च दर्व्वीकूर्चकशलाकानामन्यतमेन क्षारं पातेयत् ॥ भ्रष्टगुदस्य तु विना यन्त्रेण क्षारादिकर्म्म प्रयुञ्जीत सर्व्वेषुच शालिषष्टिकयवगोधूमान्नं सर्पिःस्निग्धमुपसेवेत पयसा निम्ब यूषेण पटोलयूषेण वा यथादोषशाकैर्वास्तूकतण्डुलीयकजीवन्त्यु पोदिकाश्वबलाबालमूलकपालङ्क्यसर्न्निचिल्लीचुचूकलायवल्लीभिरन्यै र्व्वा ॥ यच्चान्यदपि स्निग्धमग्निदीपनमर्शोघ्नं सृष्टमूत्रपुरीषञ्च तदुपसेवेत ॥

दग्धेषु चार्शस्स्वभ्यक्तोऽनलसन्धुक्षणार्थमनिलप्रकोपसंरक्षणा र्थञ्च स्नेहादीनां सामान्यतो विशेषतस्तु क्रियापथमुपसेवेत॥ सर्पींषि च दीपनीयवातहरसिद्धानि हिङ्ग्वादिभिश्चूर्णैः प्रतिसंसृज्य पिवेत्॥ पित्तार्शस्सु पृथक्पर्ण्यादीनां कषायेण दीपनीयप्रतीवापं भद्रदा र्व्वादिपिप्पल्यादिसर्पिः ॥ शोणितार्शस्सु मञ्जिष्ठामुरङ्ग्यादीनां क षाये श्लेष्मार्शस्सु सुरसादीनां कषाये सर्पिः । उपद्रवांश्च यथास्वमु पचरेत् ॥

परञ्च यत्नमास्थाय गुदे क्षाराग्निशस्त्राण्यवचारयेत्तद्वि भ्रमाद्धि षाण्ढ्यशोफदाहमदमूर्च्छाटोपानाहातीसारप्रवाहणानि

भवन्ति मरणं वा ॥

अतऊर्द्ध्वं यन्त्रप्रमाणमुपदेक्ष्यामः ॥

तत्र यन्त्रं लौहं दान्तं शार्ङ्गं वार्क्षं वा गोस्तनाकारं चतुरङ्गुलायतं पञ्चाङ्गुलपरिणाहं पुंसां षडङ्गुलपरिणाहं नारीणां तलायतं तद्द्विच्छिद्रं दर्शनार्थमेकं छिद्रमेकं छिद्रन्तु कर्म्मणि । एकद्वारे हि शस्त्रक्षाराग्नीनामतिक्रमो न भवति ॥ छिद्रप्रमाणन्तु त्र्यङ्गुलायतमङ्गुष्ठोदरपरिणाहं यदङ्गुलमवशिष्टं तस्यार्द्धाङ्गुलमधस्तादर्द्धाङ्गुलोच्छ्रितोपरि वृत्तकर्णिकमेष यन्त्राकृतिसमासः ॥

अतऊर्द्ध्वमर्शसामालेपान्वक्ष्यामः ॥ स्नुहीक्षीरयुक्तं हरिद्राचूर्णमालेपः प्रथमः ॥ कुक्कुटपुरीषगुञ्जाहरिद्रापिप्पलीचूर्णमिति गोमूत्रपित्तपिष्टो द्वितीयः ॥ दन्तीचित्रकसुवर्च्चिकालाङ्गलीकल्को वा गोपित्तपिष्टस्तृतीयः ॥ पिप्पलीसैन्धवकुष्ठशिरीषफलकल्कः स्नुहीक्षीरपिष्टोऽर्कक्षीरपिष्टो वा चतुर्थः ॥ कासीसहरितालसैन्धवाश्वमारकविडङ्गपूतीककृतवेधनजम्ब्वर्कोत्तमारणीदन्तीचित्रकालर्कस्नुहीपयःसु तैलं विपक्वमभ्यञ्जनेनार्शः शातयति ॥

अतऊर्द्ध्वमदृश्येष्वर्शस्सु योगान्पातनार्थं वक्ष्यामः॥ प्रातः प्रातर्गुडहरीतकीमासेवेत ॥ ब्रह्मचारी गोमूत्रद्रोणसिद्धं वा हरीतकीशतं प्रातःप्रातर्यथाबलमुपयुञ्जीत क्षौद्रेण ॥ अपामार्गमूलं वा तण्डुलोदकेन सक्षौद्रमहरहः ॥ शतावरीमूलकल्कं वा क्षीरेण ॥ चित्रकचूर्णयुक्तं वा सीधुपराद्धं ॥ भल्लातचूर्णयुक्तं वा सक्तुमन्थमल

वणं तक्रेण ॥ कलशेवान्तश्चित्रकमूलकल्कावलिप्ते निषिक्तं तक्रम म्लमनम्लं वा पानभोजनेषूपयुञ्जीत । एष एव भार्ग्यास्फोताय वान्यामलकगुडूचीषु तक्रकल्पः ॥ पिप्पलीपिप्पलीमूलचव्यचित्रकविडङ्गशुण्ठीहरीतकीषु च पूर्व्वव देव निरन्नो वा तक्रमहरहर्मासमुपसेवेत ॥ शृङ्गवेरपुनर्नवाचित्रक कषायसिद्धं वा पयः ॥ कुटजमूलत्वक्फाणितं वा पिप्पल्यादि प्रतीवापं क्षौद्रेण ॥ वातश्चाभ्युक्तं हिङ्ग्वादिचूर्णमुपसेवेत तक्राहारः क्षीराहारो वा ॥ क्षारलवणांश्चित्रकमूलक्षारोदकसिद्धान्वा कु ल्माषान्भक्षयेत् ॥ चित्रकमूलक्षारोदसिद्धं वा पयः ॥ पलाशतरु क्षारसिद्धान्वा कुल्माषान् ॥ पाटलापामार्गबृहतीपलाशक्षारं वा परिस्रुतमहरहर्घृतसंसृष्टं ॥ कुटजवन्दाकीमूलकल्कं वा तक्रेण ॥ चित्रकपूतीकनागरकल्कं वा पूतीकक्षारेण क्षारोदकसिद्धं वा सर्पिः पिप्पल्यादिप्रतीवापं॥कृष्णतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनु सेवेत शीतोदकानुपानं। एभिरभिवर्द्धतेऽग्निरर्शांसि चोपशाम्यन्ति॥

द्विपञ्चमूलीदन्तीचित्रकपथ्यानां तुलामाहृत्यजलचतुर्द्रोणे वि पाचयेत् । ततः पादावशिष्टं कषायमादाय सुशीतं गुडतुलया सहोन्मिश्र्य घृतभाजने निःक्षिप्य मासमुपेक्षेत यवपल्ले ततः प्रातः प्रातर्मात्रां पाययेत तेनार्शोग्रहणीदोषपाण्डुरोगोदावर्त्तारो चका न भवन्ति दीप्तोऽग्निश्च भवति ॥ पिप्पलीमरिचविडङ्गैलवा लुकलोध्राणां द्वे द्वे पले इन्द्रवारुण्याः पञ्च पलानि कपित्थमध्यस्य दश पथ्याफलानामर्द्धप्रस्थः प्रस्थो धात्रीफलानामेतदेकध्यं जलचतुर्द्रोणे

विपाच्य पादावशेषं परिस्राव्य सुशीतं गुडतुलाद्वयेनाभिमिश्र्य घृतभाजने निःक्षिप्य पक्षमुपेक्षेत यवपल्ले ततः प्रातः प्रातर्यथाबलमुपयुञ्जीत। एष खल्वरिष्टः प्लीहाग्निसङ्गार्शोग्रहणीहृत्पाण्डुरोगशोफकुष्ठगुल्मोदरकृमिहरो बलवर्णकरश्चेति॥

तत्र वातप्रायेषु स्नेहस्वेदवमनविरेचनास्थापनानुवासनमप्रतिषिद्धं ॥ पित्तजेषु विरेचनं ॥ एवं रक्तजेषु संशमनं ॥ कफजेषु शृङ्गवेरकुलत्थोपयोगः। सर्व्वदोषहरं यथोक्तं सर्व्वजेषु यथास्वौषधसिद्धं वा पयः सर्व्वेष्विति॥

अत ऊर्द्ध्वं भल्लातकविधानमुपदेक्ष्यामः॥ भल्लातकानि परिपक्वान्यनुपहतान्याहृत्यैकमादाय द्विधा त्रिधा चतुर्द्धा वा छेदयित्वा कषायकल्पेन विपाच्य कषायस्य शुक्तिमनुष्णां घृताभ्यक्ततालुजिह्वौष्ठः प्रातः प्रातरुपसेवेत ततोऽपराह्णे क्षीरं सर्पिरोदन इत्याहार एवमेकैकं वर्द्धयेत्तावद्यावत्पञ्चेति ततः पञ्च पञ्चाभिवर्द्धयेद्यावत्सप्ततिरिति प्राप्य च सप्ततिमपकर्षयेद्भूयः पञ्च पञ्च यावत्पञ्चेति पञ्चभ्यस्त्वेकैकं यावदेकमिति। एवं भल्लातकसहस्रमुपयुज्य सर्व्वकुष्ठार्शोभिर्विमुक्तो बलवानरोगः शतायुर्भवति॥

द्विव्रणीयोक्तेन विधानेन भल्लातकनिश्च्युतितं स्नेहमादाय प्रातः प्रातः शुक्तिमात्रमुपयुञ्जीत जीर्णे पूर्ववदाहारः फलप्रकर्षश्च॥ भल्लातकमज्जभ्यो वा स्नेहमादायापकृष्टदोषः प्रतिसंसृष्टभक्तो निवातमागारं प्रविश्य यथाबलं प्रसृतिं प्रकुञ्चं चोपयुञ्जीत॥ तस्मिन् जीर्णे क्षीरं सर्पिरोदन इत्याहारः॥ एवं मासमुपयुज्य मासत्रय

मादिष्टाहारो रक्षेदात्मानं ॥ ततः सर्व्वोपतापानपहृत्य वर्णवान्बलवान् श्रवणग्रहणधारणशक्तिसम्पन्नो वर्षशतायुर्भवति। मासे मासे च प्रयोगे वर्षशतं वर्षशतमायुषोऽभिवृद्धिर्भवति। एवं दशमासानुपयुज्य वर्षसहस्रायुर्भवति ॥

भवन्ति चात्र॥ यथा सर्व्वाणि कुष्ठानि हतः खदिरवीजकौ।
तथैवार्शांसि सर्व्वाणि वृत्तकारुष्करौ हतः ॥
असाध्या नातिवर्त्तन्ते प्रमेहा रजनीं यथा।
क्षाराग्निनातिवर्त्तन्ते तथा दुश्या गुदोद्भवाः ॥
घृतानि दीपनीयानि लेहायस्कृतयः सुराः।
आसवाश्च प्रयोक्तव्या वीक्ष्य दोषसमुच्छ्रितिम् ॥
वेगावरोधस्त्रीपृष्ठयानान्युत्कटुकासनं।
यथास्वन्दोषलं चान्नमर्शःसु परिवर्जयेत् ॥

---

॥ सप्तमोऽध्यायः ॥

अथातोऽश्मरीचिकित्सितं व्याख्यास्यामः ॥
अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः।
औषधैस्तरुणः साध्यः प्रवृद्धश्छेदमर्हति ॥
तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥
पाषाणभेदो वसुको वशिराश्मन्तकौ तथा।
शतावरी श्वदंष्ट्रा च बृहती कण्टकारिका ॥

कपोतवङ्कार्त्तगलः ककुभोशीरकुब्जकः ।
वृचादनी भल्लुकश्च वरुणः शाकजं फलं ॥
यवाः कुलत्थाः कोलानि कतकस्य फलानि च ।
ऊषकादिप्रतीवापमेषां कार्यघृतं श्रुतं ॥
भिनत्ति वातसंभूतामश्मरीं चिप्रमेव तु ।
चारान्यवागूर्यूषांश्च कषायाणि पयांसि च ॥
भोजनानि च कुर्वीत वर्गेऽस्मिन्वातनाशने ।
कुशः काशः शरो गुन्द्रा उत्कटो मोरटोऽश्मभित् ॥
वरी विदारी वाराही शालिमूलत्रिकण्टकं ।
भल्लूकः पाटला पाठा पत्तूरोऽथ कुरुण्टिका ॥
पुनर्नवा शिरीषश्च क्वथितास्तेषु साधितं ।
घृतं शिलाजमधुकबीजैरिन्दीवरस्य च ॥
त्रपुसैर्वारुकादीनां बीजैश्चावापितं शुभं ।
भिनत्ति पित्तसम्भूतामश्मरीं चिप्रमेव तु ॥
चारान्यवागूर्यूषांश्च कषायाणि पयांसि च ।
भोजनानि च कुर्वीत वर्गेऽस्मिन् पित्तनाशने ॥
गणे वरुणकादिस्तु गुग्गुल्वेलाहरेणवः ।
कुष्ठभद्रादिमरिचचित्रकैः ससुराह्वयैः ॥
एतैः सिद्धमजासर्पिरूषकादिगणेन च ।
भिनत्ति कफसंभूतामश्मरीं चिप्रमेव तु
चारान्यवागूर्यूषांश्च कषायाणि पयांसि च ।

भोजनानि च कुर्वीत वर्गेऽस्मिन् कफनाशने ॥
पिचुकाङ्कोलकतकशाकेन्दीवरजैः फलैः।
चूर्णितैः सगुडं तोयं शर्कराशमनं पिवेत् ॥
क्रौञ्चोष्ट्ररासभास्थीनि श्वदंष्ट्रा तालमूलिका।
अजमोदा कदम्बस्य मूलं नागरमेव च ॥
पीतानि शर्करां भिन्द्युः सुरयोष्णोदकेन वा।
त्रिकण्टकस्य वीजानां चूर्णं माचिकसंयुतं॥
अविचीरेण सप्ताहमश्मरीभेदनं पिवेत्।
द्रव्याणान्तु घृतोक्तानां चारोऽवीमूत्रगालितः ॥
ग्राम्यसत्वशकृत्चारैः संयुक्तः साधितः शनैः।
तत्रोषकादिरावापः कार्य्यस्त्रिकटुकान्वितः ॥
एष चारोऽश्मरीं गुल्मं शर्कराञ्च भिनत्त्यपि।
तिलापामार्गकदलीपलाशयववल्कजः ॥
चारःपेयोऽविमूत्रेण शर्करानाशनः परः।
पाटलाकरवीराणां चारमेवं समाचरेत् ॥
श्वदंष्ट्रायष्टिकाब्राह्मीकल्कं वाचसमं पिवेत्।
सहैडकाख्यौ पेयौ वा शोभाञ्जनकमार्कवौ ॥
कपोतवङ्कामूलं वा पिवेदम्लसुरादिभिः।
तत्सिद्धं वा पिवेत्चीरं वेदनाभिरुपद्रुतः ॥
हरीतक्यादिसिद्धं वा वर्षाभूसिद्धमेव वा।
सर्व्वथैवोपयोज्यः स्यादृणो वीरतरादिकः ॥

घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरवस्तिभिः।
यदि नोपशमं गच्छेच्छेदस्तत्रोत्तरो विधिः॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरिहाध्रुवा।
उपक्रमो जघन्योऽयमतः स परिकीर्त्तितः॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्।
तस्मादापृच्छ्य कर्त्तव्यमीश्वरं साधुकारिणा॥

अथ रोगान्वितमुपस्निग्धमपकृष्टदोषमीषत्कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतवलिमङ्गलस्वस्तिवाचनमग्रोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य ततो बलवन्तमविक्लवमाजानुसमे फलके प्रागुपवेश्य पुरुषञ्च तस्योत्सङ्गे निषण्णपूर्व्वकायमुत्तानमुन्नतकटीकं वस्त्रधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण शाटकैर्व्वा ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीडयेदधोनाभेर्य्यावदश्मर्य्यधः प्रपन्नेति। ततः स्नेहाभ्यक्ते कृत्तनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्वलीकमनायतमविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पीडयेदङ्गुलिभ्यां यथा ग्रन्थिरिवोन्नतं शल्यं भवति॥

सचेद्गृहीतशल्ये तु विवृताक्षो विचेतनः।
हतवल्लम्बशीर्षश्च निर्व्विकारो मृतोपमः॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः।
विनात्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत्॥

सव्ये पार्श्वे सेवनीं यवमात्रेण मुक्त्वावचारयेत् शस्त्रमश्मरी प्रमाणं दक्षिणतो वा क्रियासौकर्य्यहेतोरित्येके ॥ यथा च न भिद्यते चूर्ण्यते वा तथा प्रयतेत चूर्णमल्पमप्यवस्थितं हि पुनः परिवृद्धिमेति तस्मात्समस्तामग्रवक्रेणाददीत ॥ स्त्रीणान्तु वस्ति पार्श्वगतो गर्भाशयः सन्निकृष्टः तस्मात्तासामुत्सङ्गवच्छस्त्रं पात येदतोऽन्यथा खल्वासां मूत्रस्रावी व्रणो भवेत् ॥ पुरुषस्य वा मूत्रप्रसेकक्षणनान्मूत्रक्षरणं ॥ अश्मरी व्रणादृते भिन्ना वस्तिरे कधा न भवति द्विधा भिन्नवस्तिराश्मरिको न सिध्यति ॥ अश्मरीव्रणनिमित्तमेकधाभिन्नवस्तिर्जीवति क्रियाभ्यासात् शास्त्र विहितच्छेदान्निःस्यन्दपरिवृद्धत्वाच्च शल्यस्येति । उद्धृतशल्यं तूष्णोदकद्रोण्यामवतार्य्य स्वेदयेत्तथाहि वस्तिरसृजा न पूर्य्यते पूर्णे वा क्षीरवृक्षकषायं पुष्पनेत्रेण विदध्यात् ॥

भवति चात्र ॥ क्षीरवृक्षकषायन्तु पुष्पनेत्रेण योजितं ।

निर्हरेदश्मरीं तूर्णं रक्तं वस्तिगतञ्च यत् ॥

मूत्रमार्गविशोधनार्थं चास्मै गुडसौहित्यं वितरेत् ॥ उद्धृत्य चैनां मधुघृताभ्यक्तव्रणं मूत्रविशोधनद्रव्यसिद्धामुष्णां सघृतां य वागूं पाययेदुभयकालं त्रिरात्रं त्रिरात्रादूर्द्ध्वं गुडप्रगाढेन पयसा मृद्वोदनमल्पं भोजयेद्दशरात्रं मूत्रासृग्विशुद्ध्यर्थं व्रणक्लेद नार्थञ्च दशरात्रादूर्द्ध्वं फलाम्लैर्जाङ्गलरसैरुपाचरेत् ॥ ततो दश रात्रं चैनमप्रमत्तः स्वेदयेत् स्वेदेन द्रवस्वेदेन वा ॥ क्षीरवृक्षक षायेण वास्य व्रणं प्रक्षालयेत् ॥ रोध्रमधुकमञ्जिष्ठाप्रपौण्डरीक

कल्कैर्व्रणं प्रतिग्राहयेत् ॥ एतेष्वेव हरिद्रायुतेषु तैलं घृतं वा विपक्वं व्रणाभ्यञ्जनमिति। स्त्यानशोणितं चोत्तरवस्तिभिरुपाचरेत्। सप्तरात्राच्च स्वमार्गमप्रतिपद्यमाने मूत्रे व्रणं यथोक्तेन विधिना दहेदग्निना। स्वमार्गप्रतिपन्ने चोत्तरवस्त्यास्थापनानुवासनैरुपाचरेन्मधुरकषायैरिति ॥ यदृच्छया वा मूत्रमार्गप्रतिपन्नामन्तरासक्तां शुक्राश्मरीं शर्करां वा स्रोतसापहरेत्। एवं चाशक्ये विदार्य्य वा नाडीं शस्त्रेण वडिशेनाद्धरेत्। रूढव्रणस्त्वाङ्गनाश्वनगनागरथद्रुमान्नारोहेत वर्षं नाप्सु स्रवेत भुञ्जीत वा गुरु ॥

मूत्रवहशुक्रवहमुष्कस्रोतोमूत्रप्रसेकसेवनीयोनिगुदवस्तीन्परिहरेत्। तत्र मूत्रवहच्छेदान्मरणं मूत्रपूर्णवस्तेः शुक्रवहच्छेदान्मरणं क्लैव्यंवा। मुष्कस्रोतउपघाताद्ध्वजभङ्गः। मूत्रप्रसेकक्षणनान्मूत्रप्रक्षरणं। सेवनीयोनिच्छेदाद्रुजः प्रादुर्भावः वस्तिगुदविद्धलक्षणं प्रागुक्तमिति ॥

भवतश्चात्र ॥ मर्म्माण्यष्टावसम्बुध्य स्रोतोजानि शरीरिणां।

व्यापादयेद्बहून्मर्त्यान् शस्त्रकर्म्मा पटुर्भिषक् ॥

सेवनी शुक्रहरणी स्रोतसी फलयोर्गुदं।

मूत्रसेकं मूत्रवहं मूत्रवस्तिस्तथाष्टमः ॥

॥ अष्टमोऽध्यायः ॥

अथातो भगन्दराणां चिकित्सितं व्याख्यास्यामः ॥

पञ्च भगन्दराः ख्यातास्तेष्वसाध्यः शम्बूकावर्त्तः शल्यनिमित्तश्चेति शेषाः कृच्छ्रसाध्याः ॥

तत्र भगन्दरपिडकोपद्रुतमातुरमपतर्पणादिविरेचनान्तेनैकादशविधेनोपक्रमेणोपक्रमेतापक्वपिडकं । पक्वेषु चोपस्निग्धमवगाहस्विन्नं शय्यायां सन्निवेश्यार्शसमिव यन्त्रयित्वा भगन्दरं समीक्ष्य पराचीनमवाचीनं वा बहिर्मुखमन्तर्मुखं वा ततः प्रणिधायैषणीमुन्नम्य साशयमुद्धरेच्छस्त्रेण ॥ अन्तर्मुखे चैवं सम्यग्यन्त्रं प्रणिधाय प्रवाहमाणस्य भगन्दरमुखमासाद्यैषणीं दत्वा शस्त्रं पातयेत् ॥ आसाद्य वाग्निक्षारं चेत्येतत्सामान्यं सर्व्वेषु ॥

विशेषतस्तु ॥

नाड्यन्तरे व्रणान्कुर्य्याद्भिषक् तु शतपोनके ।
ततस्तेषूपरूढेषु शेषा नाडीरुपाचरेत् ॥
गतयोऽन्योऽन्यसम्बद्धा वाह्याश्छेद्यास्त्वनेकधा ।
नाडीरनभिसम्बद्धा यश्छिनत्त्येकधा भिषक् ॥
स कुर्य्याद्विहृतं जन्तोर्व्रणं गुदविदारणं ।
तस्य तद्विहृतं मार्गं विण्मूत्रमनुगच्छति ॥
आटोपगुदशूलञ्च करोति पवनो भृशं ।
तच्चाधिगततन्त्रोऽपि भिषङ्मुह्येदसंशयं ॥
तस्मान्न विहृतः कार्य्यो व्रणस्तु शतपोनके ।

व्याधौ तत्र बहुच्छिद्रे भिषजा वै विजानता ॥
अर्द्धलाङ्गलकश्छेदः कार्य्यो लाङ्गलकोऽपि वा।
सर्व्वतोभद्रको वापि कार्य्यो गोतीर्थकोऽपि वा ॥
द्वाभ्यां समाभ्यां पार्श्वाभ्यां छेदो लाङ्गलको मतः।
ह्रस्वमेकतरं यच्च सोऽर्द्धलाङ्गलकः स्मृतः ॥
सेवनीं वर्जयित्वा च चतुर्द्धा दारिते गुदे।
सर्व्वतोभद्रकं च्छेदमाहुश्छेदविदो जनाः ॥
पार्श्वागतेन शस्त्रेण छेदो गोतीर्थको भवेत्।
सर्व्वतः स्रावमार्गांस्तु दहेद्वैद्यस्तथाग्निना ॥
सुकुमारस्य भीरोर्हि दुष्करः शतपोनकः।
रुजास्रावापहं तत्र स्वेदमाशु प्रयोजयेत् ॥
स्वेदश्चैर्यथोद्दिष्टैः कृशरापायसादिभिः।
ग्राम्यानूपौदकैर्मांसैर्लावाद्यैश्चापि विष्किरैः ॥
वृचादनीमथैरण्डं बिल्वादिञ्च गणं तथा।
कषायं सुकृतं कृत्वा स्नेहकुम्भे निषेचयेत्।
नाडीस्वेदेन तेनास्य तं व्रणं स्वेदयेद्भिषक् ॥
तिलैरण्डातसीमाषयवगोधूमसर्षपान्।
लवणान्यम्लवर्गञ्च स्थाल्यामेवोपसाधयेत् ॥
आतुरं स्वेदयेत्तेन तथा सिध्यति कुर्वतः।
स्विन्नञ्च पाययेदेनं कुष्ठञ्च लवणानि च ॥
वचाहिङ्गुजमोदञ्च सममाभानि सर्पिषा।

मार्द्वीकेनाथ वाम्लेन सुरासौवीरकेणवा ॥
ततो मधुकतैलेन तस्य सिञ्चेद्भिषग्व्रणं ।
परिषिञ्चेद्गुदं चास्य तैलैर्वातरुजापहैः ॥
विधिनानेन विण्मूत्रं स्वमार्गमधिगच्छति ।
अन्ये चोपद्रवास्तीव्राः सिध्यन्त्यत्र न संशयः ॥
शतपोनक आख्यात उष्ट्रग्रीवे क्रियां शृणु ।
अथोष्ट्रग्रीवमेषित्वाच्छित्वा चारं निपातयेत् ॥
पूतिमांसव्यपोहार्थमग्निरत्र न पूजितः ।
अथैनं घृतसंसृष्टैस्तिलैः पिष्टैः प्रलेपयेत् ॥
बन्धं ततोऽनुकुर्वीत परिषेकन्तु सर्पिषा ।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक् ॥
ततः शुद्धं विदित्वा च रोपयेत्तु यथाक्रमं ।
उत्कृत्यास्रावमार्गन्तु परिस्राविणि बुद्धिमान् ।
चारेण वा स्रावगतिं दहेद्धुतवहेन वा ॥
सुखोष्णेनाणुतैलेन सेचयेद्गुदमण्डलं ।
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्विताः ।
वामनीयौषधैः कार्य्याः परिषेकाश्च मात्रया ॥
मृदुभूतं विदित्वैनमल्पस्रावरुगन्वितं ।
गतिमन्विष्य शस्त्रेण छिन्द्यात्खर्ज्जूरपत्रकं ॥
चन्द्रार्द्धं चन्द्रचक्रञ्च सूचीमुखमवाङ्मुखं ।
छित्त्वाग्निना दहेत्सम्यगेवं चारेण वा पुनः ॥

ततः संशोधनैरेवं मृदुपूर्व्वैर्विशोधयेत्।
वहिरन्तर्मुखश्चापि शिशोर्य्यस्य भगन्दरः॥
तस्याहितं विरेकाग्निशस्त्रक्षारावचारणं।
यद्यन्मृदु च तीक्ष्णञ्च तत्तत्तस्यावचारयेत्॥
आरग्वधनिशाकालाचूर्णं मधुघृताप्लुतं।
अग्रवर्त्तिप्रणिहितं व्रणानां शोधनं हितं॥
योगोऽयं नाशयत्याशु गतिं मेघमिवानिलः।
आगन्तुजे भिषङ्नाडीं शस्त्रेणोत्कृत्य यत्नतः॥
जाम्बोष्ठेनाग्निवर्णेन तप्तया वा शलाकया।
दहेद्यथोक्तं मतिमांस्तं व्रणं सुसमाहितः॥
कृमिघ्नञ्च विधिं कुर्य्याच्छल्यानयनमेव च।
प्रत्याख्यायैष चारेभ्यो वर्ज्यश्चापि त्रिदोषजः॥
एतत्कर्म्म समाख्यातं सर्व्वेषामनुपूर्व्वशः।
एषान्तु शस्त्रपतनाद्वेदना यत्र जायते॥
तत्राणुतैलेनोष्णेन परिषेकः प्रशस्यते।
वातघ्नौषधसंपूर्णां स्थालीं छिद्रशराविकां॥
स्नेहाभ्यक्तगुदस्तत्रामध्यासीत सवाष्पकां।
नाड्या वास्याहरेत्स्वेदं शयानस्य रुजापहं॥
उष्णोदकेऽवगाह्यो वा तथा शाम्यति वेदना।
कदलीमृगलोपाकप्रियकाजिनसम्भृतान्॥
कारयेदुपनाहांश्च शाल्वणादीन्विचक्षणः।

कटुत्रिकं वचाहिङ्गुलवणान्यथ दीप्यकं ॥
पाययेच्चाम्लकौलत्थसुरासौवीरकादिभिः ।
ज्योतिष्मतीलाङ्गलकीश्यामादन्तीत्रिवृत्तिलाः ॥
कुष्ठं शताह्वा गोलोमी तिल्वको गिरिकर्णिका ।
कासीसकाञ्चनक्षीर्य्यौ वर्गः शोधन इष्यते ॥
त्रिवृत्तिलानागदन्तीमञ्जिष्ठाःपयसा सह ।
उत्सादनं भवेदेतत्सैन्धवक्षौद्रसंयुतं ॥
रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठानिम्बपल्लवाः ।
त्रिवृत्तेजोवतीदन्तीकल्को नाडीव्रणापहः ॥
कुष्ठं त्रिवृत्तिला दन्तीमागध्यः सैन्धवं मधु ।
रजनी त्रिफला तुत्थं हितं स्याद्व्रणशोधनं ॥
मागध्यो मधुकं रोध्रं कुष्ठमेलाहरेणवः ।
समङ्गा धातकी चैव सारिवा रजनीद्वयं ॥
प्रियङ्गवः सर्जरसः पद्मकं पद्मकेसरं ।
सुधां वचां लाङ्गलकीं मधूच्छिष्टं ससैन्धवं ॥
एतत्संभृत्य सम्भारान् तैलं धीरो विपाचयेत् ।
एतद्वै गण्डमालासु मण्डलेष्वथ मेहिषु ॥
रोपणार्थं हितं तैलं भगन्दरविनाशनं ।
न्यग्रोधादिगणश्चैव हितः शोधनरोपणे ॥
तैलं घृतं वा तत्पक्वं भगन्दरविनाशनं ।
त्रिवृद्दन्तीहरिद्रार्कमूलं लोहाश्ममारकौ ॥

विडङ्गसारं त्रिफला कुष्ठ्यकपयसी मधु ।
मधूच्छिष्टसमायुक्तैस्तैलमेतैर्व्विपाचयेत् ॥
भगन्दरविनाशार्थमेतद्योज्यं विशेषतः ।
चित्रकार्कौ त्रिवृत्पाठे मलपू हयमारकं ।
सुधां वचां लाङ्गलकीं सप्तपर्णं सुवर्चिकां ॥
ज्योतिष्मतीञ्च सम्भृत्य तैलं धीरो विपाचयेत् ।
एतद्धि स्यन्दनं तैलं भृशं दद्याद्भगन्दरे ॥
शोधनं रोपणं चैव सवर्णकरणं तथा ।
द्विव्रणीयमवेक्षेत व्रणावस्थासु बुद्धिमान् ॥
छिद्रादूर्द्धं हरेद्दोष्मर्शोयन्त्रस्य यन्त्रवित् ।
ततो भगन्दरे दद्यादेतदर्द्धेन्दुसन्निभं ॥
व्यायामं मैथुनं कोपं पृष्ठयानं गुरूणि च ।
संवत्सरं परिहरेदुपरूढव्रणो नरः ।

---

## ॥ नवमोऽध्यायः ॥

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः ॥ विरुद्धाध्यशनासात्म्यवेग विघातैः स्नेहादीनां चायथारम्भैः पापक्रियया पुराकृतकर्म्म योगाच्च त्वग्दोषा भवति ॥

तत्र त्वग्दोषी मांसवसादुग्धदधितैलकुलत्थमाषनिष्पावेक्षु विकाराम्लविरुद्धाध्यशनाजीर्णविदाह्यभिष्यन्दीनि दिवास्वप्नं व्यवायञ्च परिहरेत् ॥

ततः शालिषष्टिकयवगोधूमकोरदूषश्यामाकोद्दालकादीन नवान् भुञ्जीत मुद्गाढक्योरन्यतरस्य यूषेण सूपेन वा निम्बपत्रारुष्करव्यामिश्रेण मण्डूकपर्णीवल्गुजाटरूषकरूपिकापुष्पैः सर्पिःसिद्धैः सर्षपतैलसिद्धैर्वा तिक्तवर्गेण वाभिहितेन॥ मांससात्म्याय वा जाङ्गलमांसममेदस्कं वितरेत्। तैलं वज्रकमभ्यङ्गार्थे। आरग्वधादिकषायमुत्सादनार्थे। पानपरिषेकावगाहादिषु च खदिरकषायमित्येष आहाराचारविभागः॥

तत्र पूर्व्वरूपेषूभयतः संशोधनमासेवेत॥ तत्र त्वक्संप्राप्ते शोधनालेपनानि॥ शोणितप्राप्ते संशोधनालेपनकषायपानशोणितावसेचनानि। मांसप्राप्ते शोधनालेपनकषायपानशोणितावसेचनारिष्टमन्थप्राशाः। चतुर्थं कर्म्मगुणप्राप्तं याप्यमात्मवतः संविधानवतश्च। तत्र संशोधनाच्छोणितावसेचनाच्चोर्द्ध्वं भल्लातशिलाजतुगुग्गुल्वगुरुतुवरकखदिरासनायस्कृतिविधानमासेवेत पञ्चमं नैव चोपक्रमेत्॥

तत्र प्रथममेव कुष्ठिनं स्नेहपानविधानेनोपपादयेत्॥ मेषशृङ्गीश्वदंष्ट्राशार्ङ्गेष्टागुडूचीद्विपञ्चमूलीसिद्धं तैलं घृतंवा वातकुष्ठिनां पानाभ्यङ्गयोर्व्विदध्यात्॥

धवाश्वकर्णककुभपलाशपिचुमर्द्दपर्प्पटकमधुकरोध्रसमङ्गासिद्धं सर्पिः पित्तकुष्ठिनां॥

पियालशालारग्वधनिम्बसप्तपर्णचित्रकमरिचवचाकुष्ठसिद्धं श्लेष्मकुष्ठिनां॥

भल्लातकाभयाविडङ्गसिद्धंवा सर्व्वेषां। तुवरकतैलं भल्लातक

तैलं वेति ॥ सप्तपर्णारग्वधातिविषापाठाकटुरोहिण्यमृतात्रिफला पटोलपिचुमर्दपर्पटकदुरालभात्रायमाणामुस्ताचन्दनपद्मकहरिद्रोपकुल्याविशालामूर्वाशतावरीसारिवेन्द्रयवाटरूषकषड्ग्रन्थामधुकभूनिम्बग्रष्टिका इति समभागाः कल्कः स्यात्कल्काच्चतुर्गुणं सर्पिः प्रक्षिप्य तद्द्विगुणो धात्रीफलरसस्तच्चतुर्गुणा आपस्तदैकध्यं समालोड्य विपचेदेतन्महातिक्तकं नाम सर्पिः कुष्ठविषमज्वररक्तपित्तहृद्रोगोन्मादापस्मारगुल्मपिडकासृग्दरगलगण्डगण्डमालाश्लीपदपाण्डुरोगविसर्पषाण्ढ्यकण्डूपामादींश्च शमयेदिति ॥

त्रिफलापटोलपिचुमन्दाटरूषककटुरोहिणीदुरालभात्रायमाणापर्पटकाश्चैतेषां द्विपलिकान्भागान् जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्याणीमानि भेषजान्यर्द्धपलिकानि त्रायमाणामुस्तेन्द्रयवचन्दनकिराततिक्तानि पिप्पल्यश्चैतानि घृतप्रस्थे समावाप्य विपचेदेतत्तिक्तकं नाम सर्पिः कुष्ठविषमज्वरगुल्मार्शोग्रहणीदोषशोफपाण्डुरोगविसर्पषाण्ढ्यशमनं चेति ॥ अतोऽन्यतमेन घृतेन स्निग्धस्विन्नस्यैकां द्वे तिस्रश्चतस्रः पञ्च वा सिरा विध्येन्मण्डलानि चोत्सन्नान्यवलिखेदभीक्ष्णं प्रच्छयेद्वा । समुद्रफेणशाकगोजीकाकोडुम्बरिकापत्रैर्वावघृष्यालेपयेल्लाक्षासर्जरसरसाञ्जनप्रपुन्नाडावल्गुजतेजोवत्यश्वमारकार्ककुटजारेवतमूलकल्कैर्मूत्रपिष्टैः पित्तपिष्टैर्वा स्वर्जिकातुल्यकासीसविडङ्गागारधूमचित्रककटुकसुधाहरिद्रासैन्धवकल्कैर्वा । एतान्येवावाप्य क्षारकल्पेन निस्रुते पालाशे क्षारे ततो विपाच्य फाणितमिव सञ्जात

मवतार्य्य लेपयेत् । ज्योतिष्कफललाक्षामरिचपिप्पलीसुमनःपत्रै र्व्वा हरितालमनःशिलार्कक्षीरतिलशिग्रुमरिचकल्कैर्व्वा र्सार्जिका कुष्ठतुत्यकुटजचित्रकविडङ्गमरिचमनःशिलाकल्कैर्वा हरीतकीक रञ्जिकाविडङ्गसिद्धार्थकलवणरोचनावल्गुजहरिद्राकल्कैर्व्वा ॥

सर्व्वे कुष्ठापहाः सिद्धा लेपाः सप्त प्रकीर्त्तिताः ।
वैशेषिकानतस्त्वूर्द्ध्वं दद्रूश्वित्रेषु मे शृणु ॥

लाक्षा कुष्ठं सर्षपाः श्रीनिकेतं रात्रिर्व्योषं चक्रमर्द्दस्य बीजं ।
क्लैकस्थं तक्रपिष्टः प्रलेपो दद्रूघ्नो मूलकाद्बीजयुक्तः ॥
सिन्धूद्भूतं चक्रमर्द्दस्य बीजमिक्षूद्भूतं केशरं तार्क्ष्यशैलं ।
पिष्टो लेपोऽयं कपित्थाद्रसेन दद्रूस्तूर्णं नाशयत्येष योगः ॥
हैमक्षीरी व्याधिघातः शिरीषो निम्बः सर्ज्जो वत्सकः साजकर्णः ।
शीघ्रं तीव्रा नाशयन्तीह दद्रूः स्नानालेपोद्वर्षणेषु प्रयुक्ताः ॥
भद्रासंज्ञोडुम्बरीमूलतुल्यं दत्वा मूलं क्षोदयित्वा मलघ्नाः ।
सिद्धन्तोयम्पीतमुष्णे सुखोष्णं स्फोटान् श्वित्रे पुण्डरीके च कुर्य्यात् ॥
द्वैपं दग्धं चर्म्म मातङ्गजं वा भिन्ने स्फोटे तैलयुक्तं प्रलेपः ।
पूतिः कीटो राजवृक्षोद्भवेन क्षारेणाक्तः श्वित्रमेको निहन्ति ॥
कृष्णस्य सर्पस्य मसी सुदग्धा वैभीतकं तैलमथ द्वितीयं ।
एतत्समस्तं मृदितं प्रलेपात् श्वित्राणि सर्व्वाण्यपहन्ति शीघ्रं ॥
अध्यर्द्धतोये सुमतिस्रुतस्य क्षारस्य कल्पेन तु सप्तकृत्वः ।
तैलं शृतं तेन चतुर्गुणेन श्वित्रापहं स्रक्षणमेतदग्र्यं ॥
घृतेन युक्तं प्रपुनाडबीजं कुष्ठञ्च यष्टीमधुकञ्च पिष्ट्वा ।

श्वेताय दद्याद्गृहकुक्कुटाय चतुर्थभक्ताय बुभुक्षिताय ॥
तस्योपसंगृह्य च तत्पुरीषमुत्पाचितं सर्व्वत एव लिम्पेत्।
अभ्यन्तरं मासमिमं प्रयोगं प्रयोजयेच्छ्वित्रमथो निहन्ति ॥
क्षारे सुदग्धे गजलेण्डजे तु गजस्य मूत्रेण बहुस्रुते च ।
द्रोणप्रमाणे दशभागयुक्तं दत्वा पचेद्बीजमवल्गुजस्य ॥
एतद्यदा चिक्कणतामुपैति तदा समस्ता गुटिका विदध्यात्।
श्वित्रं प्रलिम्पेदथ सम्प्रघृष्य तया व्रजेदाशु सवर्णभावं॥
कषायकल्पेन सुभावितान्तु दत्वचं चूतहरीतकीनां।
तान्ताम्रदीपे प्रणिधाय धीमान्वर्त्तिं वटक्षीरसुभावितान्तु ॥
आदीप्य तज्जातमसीं गृहीत्वा तां चापि पथ्याम्भसि भावयित्वा।
संघृष्टितं तद्व्रणशः किलासं तैलेन सिक्तं कटुना प्रयाति ॥
आवल्गुज बीजमथ्यन्नदीजं काकाङ्कानोडुम्बरी या च लाक्षा।
लौहं चूर्णं मागधीतार्क्ष्यशैलं तुल्याः कार्य्याः कृष्णवर्णास्तिलाश्च ॥
वर्त्तिं कृत्वा तां गवां पित्तपिष्टां लेपः कार्य्यः श्वित्रिणां श्वित्रहारी।
लेपात्पित्तं शैखिनं श्वित्रहारि ह्रीवेरं वा दग्धमेतेन युक्तं ॥

तुत्थालकटुकाव्योषसिंहार्कहयमारकाः।
कुष्ठावल्गुजभल्लातक्षीरिणीसर्षपाः स्नुही ॥
तिल्वकारिष्टपीलूनां पत्राण्यारग्वधस्य वा।
बीजं विडङ्गाश्वहन्त्रोर्हरिद्रे बृहतीद्वयं ॥
आभ्यां श्वित्राणि योगाभ्यां लेपान्नश्यन्त्यशेषतः।
वायसी फल्गुतिक्तानां शतं दत्वा पृथक्पृथक् ॥

द्वे लोहरजसः प्रस्थे त्रिफला व्याढकं तथा ।
त्रिद्रोणेऽपां पचेद्यावद्भागौ द्वावसनादपि ॥
शिष्टञ्च विपचेद्भूय एतैः श्लक्ष्णप्रपेषितैः ।
कल्कैरिन्द्रयवव्योषत्वग्दारुचतुरङ्गुलैः ॥
पारावतपदीदन्तीवाकुचीकेशराह्वयैः ।
कण्टकार्य्या च तत्पक्कं घृतं कुष्ठिषु योजयेत् ॥
दोषधात्वाश्रितं पानादभ्यङ्गात्त्वग्गतं तथा ।
अप्यसाध्यं नृणां कुष्ठं नाम्ना नीलं नियच्छति ॥
त्रिफलात्वक् त्रिकटुका सुरसा मदयन्तिका ।
वायस्यारग्वधानाञ्च तुलां कुर्य्यात्पृथक् पृथक् ।
काकमाच्यर्कवरुणदन्तीकुटजचित्रकान् ।
दार्व्वीनिदिग्धिकाभ्यान्तु पृथग्दशपलं तथा ॥
त्रिद्रोणेऽपां पचेद्यावत्षट्प्रस्थं परिशेषितं ।
शकृद्रसदधिक्षीरं मूत्राणां पृथगाढकं ॥
तदद्धृतस्य तत्साध्यं भूनिम्बव्योषचित्रकैः ।
करञ्जफलनीलिकाश्यामावल्गुजपीलुभिः ॥
नीलिनीनिम्बकुसुमैः सिद्धं कुष्ठापहं घृतं ।
भक्षणादङ्गसावर्ण्यं श्वित्रिणां जनयेन्नृणां ॥
भगन्दरं कृमीनर्शो महानीलं नियच्छति ।
मूत्रं गव्यं चित्रकव्योषयुक्तं सर्पिःकुम्भे क्षौद्रयुक्तं स्थितं हि ।
पक्षादूर्द्ध्वं श्वित्रिभिः पेयमेतत्कुर्य्याच्चास्मिन्कुष्ठदिष्टं विधानं ॥

पूतीकार्कस्नुग्नरेन्द्रद्रुमाणां मूत्रैः पिष्टाः पल्लवाः सौमनाश्च ।
लेपः श्वित्रं हन्ति दद्रूव्रणांश्च दुष्टान्यर्शांस्येव नाडीव्रणांश्च ॥
अस्मादूर्द्ध्वं निःस्रुते दुष्टरक्ते जातप्राणं सर्पिषा स्नेहयित्वा ।
तीक्ष्णैर्योगैश्छर्द्दयित्वा प्रगाढं पश्चाद्दोषं निर्हरेच्चाप्रमत्तः ॥
दुर्व्वान्तो वा दुर्व्विरिक्तोऽथ वा स्यात्कुष्ठी दोषैरुद्धतैर्व्याप्तदेहः ।
निःसन्दिग्धं यात्यसाध्यत्वमाशु तस्मात्कृत्स्नान्निर्हरेत्तस्य दोषान् ॥
पक्षात्पक्षाच्छर्दनान्यभ्युपेयान्मासान्मासात्स्रंसनं चापि देयं ।
स्राव्यं रक्तं वत्सरे हि द्विरल्पं नस्यं दद्याच्च त्रिरात्रात्त्रिरात्रात् ॥
पथ्याव्योषं सेक्षुजातं सतैलं लीढ्वा शीघ्रं मुच्यते कुष्ठरोगात् ।
धात्रीपथ्याक्षोपकुल्याविडङ्गान् क्षौद्राज्याभ्यामेकतोवावलिह्यात् ॥
पीत्वा मासं वा पलांशां हरिद्रां मूत्रेणान्तं पापरोगस्य गच्छेत् ।
एवं पेयश्चित्रकः श्लक्ष्णपिष्टः पिप्पल्यो वा पूर्व्ववन्मूत्रयुक्ताः ॥
तद्वत्ताप्यं मासमात्रञ्च पेयं तेनाजस्रं देहमालेपयेच्च ।
आरिष्टत्वक् साप्तपर्णी च तुल्या लाक्षा मुस्तं पञ्चमूल्यौ हरिद्रे ॥
मञ्जिष्ठाक्षौ वासको देवदारु पथ्यावल्की व्योषधात्रीविडङ्गं ।
सामान्यांशं योजयित्वा विडङ्गैश्चूर्णं कृत्वा तत्पलोन्मानमश्नन् ॥
कुष्ठाज्जन्तुर्म्मुच्यते त्रैफलं वा सर्पिर्द्रौणं व्योषयुक्तञ्च युञ्जन् ।
गोमूत्राम्बुद्रोणसिद्धेऽक्षपीडे सिद्धं सर्पिर्नाशयेच्चापि कुष्ठं ॥
आरग्वधे सप्तपर्णे पटोले सवृक्षके नक्तमाले सनिम्बे ।
जीर्णं पक्वं तद्धरिद्राद्वयेन हन्यात्कुष्ठं मुष्कके चापि सर्पिः ॥
रोध्रारिष्टं पद्मकं रक्तसारः सप्ताह्वाक्षौ वृक्षको वीजकश्च ।

योज्याःस्थाने दह्यमानस्य जन्तोः पेया वा स्यात्क्षौद्रयुक्ता त्रिभण्डी ॥
खादेत्कुष्ठी मांसपाते पुराणान्मुद्गान्सिद्धान्निम्बतोये सतैलान्।
निम्बक्वाथं जातसत्वः पिबेद्वा क्वाथं वार्काालर्कसप्तच्छदानां ॥
जग्धिष्वङ्गेष्वश्मारस्य मूलं लेपो युक्तः स्याद्विडङ्गैः समूत्रैः।
मूत्रैश्चैनं सेचयेद्भोजयेच्च सर्व्वाहारान्संप्रयुक्तान्विडङ्गैः॥
कारञ्जं वा सार्षपं वा घृतेषु चेष्यं तैलं शिग्रुकोशाम्रयोर्वा।
पक्वं सर्व्वैर्वा कटूष्णैः सतिक्तैः शेषं च स्याद्दुष्टवत्सं विधानं॥

सप्तपर्णकरञ्जार्कमालतीकरवीरजं।
स्नुहीशिरीषयोर्मूलं चित्रकास्फोतयोरपि॥
विषलाङ्गलवज्राख्यकासीसालननःशिलाः।
करञ्जवीजं त्रिकटु त्रिफलां रजनीद्वयं॥
सिद्धार्थकान्विडङ्गानि प्रपुन्नाडञ्च संहरेत्।
मूत्रपिष्टैः पचेदेतैस्तैलं कुष्ठविनाशनं॥
एतदञ्जकमभ्यङ्गान्नाडीदुष्टव्रणापहं।
सिद्धार्थककरञ्जौ द्वौ द्वे हरिद्रे रसाञ्जनं॥
कुटजश्च प्रपुन्नाडसप्तपर्णौ मृगादनी॥
लाक्षासर्जरसोऽर्कश्च सास्फोतारग्वधौ स्नुही।
शिरीषस्तुवराख्यस्तु कुटजारुष्करौ वचा॥
कुष्ठं क्रिमिघ्नं मञ्जिष्ठा लाङ्गली चित्रकं तथा।
मालती कटुतुम्बी च गन्धाक्वा मूलकं तथा॥
सैन्धवं करवीरश्च गृहधूमं विषं तथा॥

कम्पिल्लकं ससिन्दूरं तेजोह्वातुल्यकाह्वये।
समभागानि सर्व्वाणि कल्कपेष्याणि कारयेत् ॥
गोमूत्रं द्विगुणं दद्यात्तिलतैलाच्चतुर्गुणं।
कारञ्जं वा महावीर्य्यं सार्षपं वा महागुणं॥
अभ्यङ्गात्सर्व्वकुष्ठानि गण्डमालाभगन्दरान्।
नाडीदुष्टव्रणान्घोरान्नाशयेन्नात्र संशयः॥
महावज्रकमित्येतन्नाम्ना तैलं महागुणं।
पित्तावापैर्मूत्रपिष्टैस्तैलं लाक्षादिकैः कृतं॥
सप्ताहं कटुकालाब्वां निदधीत चिकित्सकः।
पीतवन्तं ततो मात्रां तेनाभ्यक्तञ्च मानवं॥
शोषयेदातपे तस्य दोषा गच्छन्ति सर्व्वशः।
स्रुतदोषं समुत्थाप्य स्नातं खदिरवारिणा।
यवागूं पाययेदेनं साधितां खदिराम्बुना।
एवं संशोधने वर्गे कुष्ठघ्नेष्वौषधेषु च॥
कुर्य्यात्तैलानि सर्प्पींषि प्रदेहोद्वर्षणानि च।
प्रातः प्रातश्च सेवेत योगान्वैरेचनान् शुभान्॥
पञ्च षट्सप्तचाष्टौ वा यैरुत्थानं न गच्छति।
कारभं वा पिबेन्मूत्रं जीर्णे तत्क्षीरभोजनं॥
जातसलानि कुष्ठानि मासैः षड्भिरपोहति।
दिदृक्षुरन्तं कुष्ठस्य खदिरं कुष्ठपीडितः॥
सर्वथैव प्रयुञ्जीत स्नानपानाशनादिषु।

यथा हन्ति प्रवृद्धत्वात्कुष्ठमातुरमोजसा ॥
तथा हन्त्युपयुक्तस्तु खदिरः कुष्ठमोजसा ।
नीचरोमनखोऽश्रान्तो हिताश्यौषधतत्परः ॥
योषिन्मांससुरावर्जी कुष्ठी कुष्ठमपोहति ।

---

## ॥ दशमोऽध्यायः ॥

॥ अथातो महाकुष्ठचिकित्सितं व्याख्यास्यामः ॥

कुष्ठेषु मेहेषु कफामयेषु सर्व्वाङ्गशोफेषु च दारुणेषु ।
कृशत्वमिच्छत्सु च मेदुरेषु योगानिमानग्र्यमतिर्व्विदध्यात् ॥

तुषान्यवान्निःपूतान् रात्रौ गोमूत्रपर्य्युषितान्महति किलिञ्जे शोषयेदेवं सप्तरात्रं भावयेत् शोषयेच्च ततस्तान्कपालभ्रष्टान् शक्तून्कारयित्वा प्रातःप्रातरेव कुष्ठिनं प्रमेहिणं वा सालसारादिकषायेण कण्टकिवृक्षकषायेण वा पाययेत भल्लातकप्रपुन्नाडावल्गुजार्कचित्रकविडङ्गमुस्तचूर्णचतुर्भागयुक्तान् ॥ एवमेव सालसारादिकषायपरिपीतानामारग्वधादिकषायपरिपीतानां वा गोशकृद्भूतानां वा यवानां शक्तून् कारयित्वा भल्लातकादीनां चूर्णान्यावाप्य खदिराशननिम्बराजवृक्षरोहितकगुडूचीनामन्यतमस्य कषायेण शर्करामधुमधुरेण द्राक्षायुक्तेन दाडिमवेतसाम्लेन सैन्धवलवणान्वितेन पाययेदेष सर्व्वमन्यकल्पः ॥

यावकांश्च भक्ष्यान्धानालुञ्चककुल्माषापूपपूर्णकोशोत्कारिकाश्च

ष्कुलिकाकुणावीकोनालिप्रभृतीन् सेवेत ॥ यवविधानेन गोधूमवेणुयवानुपयुञ्जीत ॥

अरिष्टानतो वक्ष्यामः ॥ पूतीकचव्यचित्रकसुरदारुसारिवादन्तीत्रिकटुकानां प्रत्येकं षड्वलिका भागा बदरकुडवस्त्रिफलाकुडव इत्येतेषां चूर्णानि ततः पिप्पलीमधुघृतैरन्तःप्रलिप्ते घृतभाजने प्राकृतसंस्कारे सप्तोदककुडवानयोरजोऽर्द्धकुडवमर्द्धतुलाञ्च गुडस्याभिहितानि चूर्णान्यावाप्य स्वनुगुप्तं कृत्वा यवपल्ले सप्तरात्रं वासयेत्ततो यथाबलमुपयुञ्जीतैषोऽरिष्टः कुष्ठमेहमेदःपाण्डुरोगश्वयथूनपहन्ति ॥ एवं शालसारादौ न्यग्रोधादावारग्वधादौ वारिष्टान्कुर्वीत ॥

आसवानतो वक्ष्यामः ॥ पलाशभस्मपरिस्रुतस्योष्णोदकस्य शीतीभूतस्य त्रयोभागा द्वौ फाणितस्यैकध्यमरिष्टकल्पेन विदध्यात् ॥ एवं तिलादीनां क्षारेषु शालसारादौ न्यग्रोधादावारग्वधादौ मूत्रेषु चासवान्विदध्यात् ॥

अथ सुरा वक्ष्यामः ॥ शिंशपाखदिरयोः सारमादायोत्पाद्य चोत्तमारणीब्राह्मीकोशातकीस्तत्सर्व्वमेकतः कषायकल्पेन विपाच्योदकमाददीत मण्डोदकार्थं किण्वपिष्टमभिषुणुयाच्च यथोक्तमेवं सुरा ॥ शालसारादौ न्यग्रोधादावारग्वधादौ च विदध्यात् ॥

अतोऽवलेहान्वक्ष्यामः ॥ खदिरासननिम्बराजवृक्षशालसारक्वाथे तत्सारपिण्डान् श्लक्ष्णपिष्टान्प्रक्षिप्य विपचेत् ततो नातिद्रवं

नातिसान्द्रमवतार्य्य तस्य पाणितलपूर्णमप्रातराशी मधुमिश्रं लिह्यादेवं शालसारादौ न्यग्रोधादावारग्वधादौ च लेहान्कारयेत्॥

अतश्चूर्णक्रियां वक्ष्यामः। शालसारादीनां सारचूर्णप्रस्थमाहृत्यारग्वधादिकषायपरिपीतमनेकशः शालसारादिकषायेणैव पाययेत्। एवं न्यग्रोधादीनां फलेषु पुष्पेष्वारग्वधादीनां चूर्णक्रियां कारयेत्॥

अत ऊर्द्ध्वमयस्कृतीर्वक्ष्यामः॥ तीक्ष्णलोहपत्राणि तनूनि लवणवर्गप्रदिग्धानि गोमयाग्निप्रतप्तानि त्रिफलाशालसारादिकषायेण निर्वापयेत् षोडशवारांस्ततः खदिराङ्गारतप्तान्युपशान्ततापानि सूक्ष्मचूर्णानि कारयेद्गाढतान्तवपरिस्रावितानि ततो यथाबलं मात्रां सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत। जीर्णे यथाव्याध्यनम्लमलवणमाहारं कुर्व्वीत। एवं तुलामुपयुज्य कुष्ठमेहमेदःश्वयथुपाण्डुरोगोन्मादापस्मारानपहृत्य वर्षशतं जीवति। तुलायां तुलायां वर्षशतगुणोत्कर्षः। एतेन सर्व्वलोहेष्वयस्कृतयो व्याख्याताः॥

त्रिवृच्छ्यामाग्निमन्थसप्तलाकेवुकशङ्खिनीतिल्वकत्रिफलापलाशशिंशपानां स्वरसमादाय पालाश्यां द्रोण्यामभ्यासिच्य खदिराङ्गारतप्तमयःपिण्डं त्रिःसप्तकृत्वो निर्व्वाप्य तमादाय पुनरासिच्य स्थाल्यां गोमयाग्निना विपचेत् सिध्यति चास्मिन् पिप्पल्यादिचूर्णभागौ द्वौ मधुनस्तावद्घृतस्येति दद्यात् ततश्चतुर्थभागावशिष्टमवतार्य्य परिस्राव्य भूयोऽग्नितप्तान्ययःपत्राणि प्रक्षिपेत्। ततः प्रशान्तमायसे पात्रे

स्वनुगुप्तं निदध्यात् ततो यथायोगं शुक्तिं प्रकुञ्चं चोपयुञ्जीत जीर्णे यथाव्याध्याहारमुपसेवेत । एषौषधायस्कृतिर साध्यं कुष्ठं प्रमेहं वा साधयति स्थूलमपकर्षति शोफमुपहन्ति सन्नमग्निमुद्धरति विशेषेण चोपदिश्यते राजयक्ष्मिणां वर्षशतायुस्त्वानया पुरुषो भवति ॥ शालसारादिकाथमासिच्य पालाश्यां द्रोण्यामयोघनं तप्तं निर्व्वाप्य कृतसंस्कारे कलशेऽभ्यासिच्य पिप्पल्यादिचूर्णभागं चौद्रं गुडमिति च दत्वा स्वनुगुप्तं निदध्यादेतां महौषधायस्कृतिं मासमर्द्धं मासं वा स्थितां यथाबलमुपयुञ्जीत। एवं न्यग्रोधादावारेवतादिषु च विदध्यात्॥

अतः खदिरविधानमुपदेक्ष्यामः ॥ प्रशस्तदेशजातमनुपहतमध्यमवयसं खदिरं परितः खानयित्वा मध्यममूलं छित्त्वायोमयं कुम्भं तस्मिन्नन्तरे निदध्याद्यथा रसग्रहणसमर्थो भवति । ततस्तं गोमयमृदावलिप्तमवकीर्य्येन्धनैर्गोमयमिश्रैरादीपयेत् । यथास्य दह्यमानस्य रसः स्रवत्यधस्ताद्यदा जानीयात्पूर्णं भाजनमित्यथैवमुद्धृत्य परिस्राव्य रसमन्यस्मिन् पात्रे निधायानुगुप्तं निदध्यात्ततो यथायोगं मात्रामामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत जीर्णे भल्लातकविधानवदाहारः परिहारश्च प्रस्थे चोपयुक्ते शतं वर्षाणामायुषोऽभिवृद्धिर्भवति ॥ खदिरसारतुलामुदकद्रोणे विपाच्य षोडशांशावशिष्टमवतार्य्यानुगुप्तं निदध्यात् तमामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत। एष एव सर्व्ववृक्षसारेषु कल्पः॥ खदिरसारचूर्णतुलां खदिरसारकाथमात्रां वा प्रातः

प्रातरुपसेवेत खदिरसारक्वाथसिद्धमाविकं वा सर्पिः ॥ अमृतवल्ली स्वरसं क्वाथं वा प्रातःप्रातरुपसेवेत तत्सिद्धं वा सर्पिः । अपराह्णे ससर्पिष्कमोदनमामलकयूषेण भुञ्जीतैवं मासमुपयुज्य सर्व्वकुष्ठै र्व्विमुच्यत इति ॥

कृष्णतिलभल्लातकतैलामलकरससर्पिषांद्रोणं शालसारादिकषा यस्य च त्रिफलात्रिकटुकपरूषफलमज्जविडङ्गफलसारचित्राङ्काव ल्गुजहरिद्राद्वयत्रिवृद्दन्तीन्द्रयववयष्टीमधुकातिविषारसाञ्जनप्रिय ङ्गूनां पालिकान्भागांस्तानैकध्यं स्नेहपाकविधानेन पचेत् तत्सा धुसिद्धमवतार्य्य परिस्राव्यानुगुप्तं निदध्यात् तत उपसंस्कृतश रीरः प्रातः प्रातरुत्थाय पाणिशुक्तिमात्रं चौद्रेण प्रतिसंसृज्यो पयुञ्जीत जीर्णे मुद्गामलकयूषेणालवणेन सर्पिष्मन्तं खदिरोदक सिद्धं मृद्वोदनमश्नीयात् खदिरोदकसेवीत्येवं द्रोणमुपयुज्य सर्व्व कुष्ठैर्व्विमुक्तः शुद्धतनुः स्मृतिमान्वर्षशतायुररोगो भवति ॥

भवति चात्र ॥ सुरामन्यासवारिष्टांल्लेहांश्चूर्णान्ययस्कृतीः ।
सहस्रशोऽपि कुर्वीत वीजेनानेन बुद्धिमान् ॥

---

॥ एकादशोऽध्यायः ॥

अथातः प्रमेहचिकित्सितं व्याख्यास्यामः ॥ द्वौ प्रमेहौ सहजो ऽपथ्यनिमित्तश्च भवतः । तत्र सहजो मातृपितृवीजदोषकृतः । अहिताहारजो ऽपथ्यनिमित्तः । तयोः पूर्व्वेणोपद्रुतः कृशोरूक्षो ऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति । उत्तरेण स्थूलो

बह्वाशी स्निग्धः शय्यासनस्वप्नशीलः प्रायेणेति ॥ तत्र कृशमन्नपान प्रतिसंस्कृताभिः क्रियाभिश्चिकित्सेत्। स्थूलमपतर्पणयुक्ताभिः ॥

सर्व्व एव च परिहरेयुः सौवीरकतुषोदकशुक्तमैरेयसुरासव तोयपयस्तैलघृतेचुविकारदधिपिष्टान्नाम्लपानकानि ग्राम्यानूपौदक मांसानि चेति ॥

ततः शालिषष्टिकयवगोधूमकोद्रवोद्दालकाननद्यान्नुञ्जीत ॥ चणकाढकीकुलत्थमुद्गविकल्पेन तिक्तकषायाभ्यां शाकगणाभ्यां निकुम्भेङ्गुदीसर्षपातसीतैलसिद्धाभ्यां बद्धमूत्रैर्वा जाङ्गलैर्मांसैरपहृत मेदोभिरनम्लैरघृतैश्चेति ॥

तत्रादित एव प्रमेहिणं स्निग्धमन्यतमेन तैलेन प्रियङ्ग्वादि सिद्धेन वा घृतेन वामयेत्प्रगाढं विरेचयेच्च। विरेचनादनन्तरं सुरसादिकषायेणास्थापयेन्मंहौषधभद्रदारुमुस्तावापेन मधुसैन्ध वयुक्तेन दह्यमानञ्च न्यग्रोधादिकषायेण निःस्नेहेन ततः शुद्ध देहमामलकरसेन हरिद्रां मधुसंयुक्तां पाययेत् त्रिफलाविशाला देवदारुमुस्तकषायं वा शालकम्पिल्लकमुष्ककल्कमक्षमात्रं वा मधु मधुरमामलकरसेन हरिद्रायुतम् । कुटजकपित्थरोहितविभीतक सप्तपर्णपुष्पकल्कं वा। निम्बारग्वधसप्तपर्णमूर्व्वाकुटजसोमवृक्षपला शानां वा त्वक्पत्रमूलफलपुष्पकषायाणि ॥ एते पञ्च प्रयोगाः सर्व्व मेहानामपहन्तारो व्याख्याताः ॥

विशेषतश्चात ऊर्द्ध्वं ॥ तत्रोदकमेहिनं पारिजातकषायं पाय येत् । इक्षुमेहिनं वैजयन्तीकषायम् । सुरामेहिनं निम्बकषाय

। सिकतामेहिनं चित्रककषायं । शनैर्मेहिनं खदिरकषायं। लवणमेहिनं पाठागुरुकषायं । पिष्टमेहिनं हरिद्रादारुहरिद्रा कषायं । सान्द्रमेहिनं सप्तपर्णकषायं । शुक्रमेहिनं दुर्व्वाशै वलप्लवहठकरञ्जकसेरुककषायं ककुभचन्दनकषायं वा ॥ फेण मेहिनं त्रिफलारग्वधमृद्वीकाकषायं मधुरं कफजे तु मधु मधुरमिति। पैत्तिकेषु नीलमेहिनं शालसारादिकषायमश्वत्थ कषायं वा पाययेत् ॥ हरिद्रामेहिनं राजवृक्षकषायम् । अम्ल मेहिनं न्यग्रोधादिकषायं मधुमिश्रं । क्षारमेहिनं त्रिफला कषायं । मञ्जिष्ठामेहिनं मञ्जिष्ठाचन्दनकषायं । शोणितमेहिनं गुडूचीतिन्दुकास्थिकाश्मर्य्यखर्जूरकषायं मधुमिश्रं ॥

अतऊर्द्ध्वमसाध्येष्वपि योगान्यापनार्थं वक्ष्यामः ॥ तद्यथा ॥ सर्पिर्मेहिनं कुष्ठकुटजपाठाहिङ्गुकटुरोहिणीकल्कं गुडूचीचित्रक कषायेण पाययेत् । वसामेहिनमग्निमन्थकषायं शिंशपाकषायं वा। क्षौद्रमेहिनं खदिरक्रमुककषायं हस्तिमेहिनं तिन्दुककपित्थशिरी षपलाशपाठामूर्व्वादुःस्पर्शाकषायं मधुमिश्रं हस्त्यश्वशूकरखरोष्ट्रा स्थिक्षारं चेति ॥ दह्यमानमौदककन्दक्वाथसिद्धां यवागूं क्षीरेक्षु रसमधुरां पाययेत् ॥

ततः प्रियङ्ग्वनन्तायूथिकापद्माचायन्तिकालोहितिकाम्बष्ठादाडि मत्वक्शालपर्णीपद्मतुङ्गकेशरधातकीवकुलशाल्मलीश्रीवेष्टकमोच रसेष्वरिष्टानयस्कृतीर्लेहानासवान्कुर्व्वीत॥ शृङ्गाटकगिलोड्यवि मृणालकसेरुकमधुकाम्रजम्ब्वसनतिनिशककुभकदङ्गरोध्रभल्लातकच

श्लेष्मगिरिकर्णिकाशीतशिवनिचुलदाडिमाजकर्णहरिद्रचराजादनगोपघोण्टाविकङ्कतेषु वा ॥ यवान्नविकारांश्च सेवेत। यथोक्तकषायसिद्धां चास्मै यवागूं प्रयच्छेत् ॥ कषायाणि वा पातुं महाधनमहिताहारमौषधद्वेषिणमीश्वरं वा पाठाभल्लातचित्रकप्रगाढमनल्पमाक्षिकमन्यतममासवं पाययेदङ्गारधूमकुम्भगन्धं वा माध्वीकमभीक्ष्णम् ॥ मधुकपित्थमरिचानुविद्धानि चास्मै पानान्युपहरेत्। उष्ट्राश्वतरखरपुरीषचूर्णानि चास्मै दद्यादन्नेषु। हिङ्गुसैन्धवयुक्तैर्यूषैःसार्षपैश्च रागैर्भोजयेत्। अविरुद्धानि चास्मै पानभोजनान्युपहरेद्द्रवन्ति। प्रवृद्धमेहास्तु व्यायामनियुद्धक्रीडागजतुरगरथपदातिचर्य्यापरिक्रमणान्यस्त्रोपास्त्रे वा सेवेरन् ॥

अधनस्त्वबान्धवो वा पादत्राणातपत्रविरहितो भैक्षाशी ग्रामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत् ॥ महाधनो वा श्यामाकनीवारवृत्तिरामलककपित्थतिन्दुकाश्मन्तकफलाहारो मृगैः सह वसेत्तन्मूत्रशकृद्वृत्ती सततमनुव्रजेद्गां ब्राह्मणो वा शिलोञ्छवृत्तिर्भूत्वा ब्रह्मरथमुपधारयेत्। पदैस्ततमितरः खनेद्वा कूपं। क्षमन्तु सततं रक्षेत् ॥

भवति चात्र॥ अधनो वैद्यसन्देशादेवं कुर्व्वन्नतन्द्रितः।
संवत्सरादन्तराद्वा प्रमेहात्प्रतिमुच्यते॥

---

॥ द्वादशोऽध्यायः ॥

अथातः प्रमेहपिडकाचिकित्सितं व्याख्यास्यामः ॥

शराविकाद्या नव पिडकाःप्रागुक्तास्ताः प्राणवतोऽल्पास्त्वङ्मांसप्राप्ता मृद्वोऽल्परुजः क्षिप्रपाकभेदिन्यश्च साध्याः ॥

ताभिरुपद्रुतं प्रमेहिणमुपचरेत्तत्र पूर्वरूपेष्वपतर्प्पणं कषायं वस्तमूत्रं चोपदिशेत् । एवमकुर्वतस्तस्य मधुराहारस्य मूत्रं स्वेदः श्लेष्मा च मधुरीभवति प्रमेहश्चाभिव्यक्तो भवति तत्रोभयतः संशोधनमासेवेत । एवमकुर्व्वतस्तस्य दोषाः प्रवृद्धा मांसशोणितं प्रदूष्य शोफं जनयन्त्युपद्रवान्वा कांश्चित्तत्रोक्तः प्रतीकारः शिरामोक्षश्च । एवमकुर्व्वतस्तस्य शोफो वृद्धोऽतिमात्ररुजो विदाहमापद्यते तत्र शस्त्रप्रणिधानमुक्तं व्रणक्रियोपसेवा च॥ एवमकुर्व्वतस्तस्य पूयोऽभ्यन्तरमवदार्य्योत्सङ्गंमहान्तमवकाशं कृत्वा प्रवृद्धो भवत्यसाध्यः । तस्मादादित एव प्रमेहिणमुपक्रमेत् ॥

भल्लातकबिल्वाम्बुपिप्पलीमूलोदकीर्य्यावर्षाभूपुनर्नवाचित्रकशठीस्नुहीवरुणकपुष्करदन्तीपथ्यादशपलोन्मितान् यवकोलकुलत्थांश्च प्रास्थिकान्सलिलद्रोणे निःक्वाथ्य चतुर्भागावशिष्टेऽवतार्य्य वचात्रिवृत्कम्पिल्लकभार्गीनिचुलशुण्ठीगजपिप्पलीविडङ्गशिरीषाणां भागैरर्द्धपलिकैर्घृतप्रस्थं विपाचयेन्मेहश्वयथुकुष्ठगुल्मोदरार्शःप्लीहविद्रधिपिडकानां नाशनं नाम्ना धान्वन्तरं ॥

दुर्व्विरेच्या हि मधुमेहिनो भवन्ति मेदोऽभिव्याप्तशरीरत्वात्तस्मात्तीक्ष्णमेतेषां शोधनं कुर्व्वीत ॥ पिडकापीडिताः सोपद्रवाः सर्व्व

एव प्रमेहा मूत्रादिमाधुर्य्ये मधुगन्धसामान्यात्पारिभाषिकीं मधुमेहतां लभन्ते। नचैतान्कथञ्चिदपि खेदयेत् मेदोबहुत्वादेवैषां विशीर्य्यते देहः खेदेन रसायनीनाञ्च दौर्ब्बल्यान्नोर्द्धमुत्तिष्ठन्ति प्रमेहिणां दोषाः। ततो मधुमेहिनामधःकाये पिडकाः प्रादुर्भवन्ति। अपक्वानां पिडकानां शोफवत्प्रतीकारः पक्वानां व्रणवदिति। तैलन्तु व्रणरोपणादौ कुर्व्वीत। आरग्वधादिकषायमुत्सादनार्थे शालसारादिकषायं परिषेचने पिप्पल्यादिकषायं पानभोजनेषु पाठाचित्रकशार्ङ्गेष्टाक्षुद्रदृहतीसारिवासोमवल्कसप्तपर्णारग्वधकुटजमूलचूर्णानि मधुमिश्राणि प्राश्नीयात्। शालसारादिवर्गकषायं चतुर्भागावशिष्टमवतार्य्य परिस्राव्य पुनरुपनीय साधयेत् सिध्यति चामलकरोध्रप्रियङ्गुदन्तीकृष्णायस्ताम्रचूर्णान्यावपेत्तदनुपदग्धलेहीभूतमवतार्य्यानुगुप्तं निदध्यात्ततो यथायोगमुपयुञ्जीत। एष लेहः सर्वमेहानां हन्ता॥

त्रिफलाचित्रकत्रिकटुविडङ्गमुस्तानां नव भागास्तावन्त एव कृष्णायश्चूर्णस्य तत्सर्व्वमेकध्यं कृत्वा यथायोगं मात्रां सर्पिर्म्मधुभ्यां संसृज्योपयुञ्जीत। एतन्नवायसमेतेन जाठर्य्यं न भवति मन्दोऽग्निराप्यायते दुर्नामशोफपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति॥

शालसारादिनिर्यूहे चतुर्थांशावशेषिते।
परिस्रुते ततः शीते मधु माक्षिकमावपेत्॥
फाणितीभावमापन्नं गुडं शोधितमेव च।

श्लक्ष्णपिष्टानि चूर्णानि पिप्पल्यादिगणस्य च ॥
ऐकध्यमावपेत्कुम्भे संस्कृते घृतभाविते ।
पिप्पलीचूर्णमधुभिः प्रलिप्तेऽन्तः शुचौ दृढे ॥
श्लक्ष्णानि तीक्ष्णलोहस्य तत्र पत्राणि बुद्धिमान् ।
खदिराङ्गारतप्तानि बहुशः सन्निपातयेत् ॥
सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ।
मासांस्त्रींश्चतुरो वापि यावदालोहसङ्क्षयात् ॥
ततो जातरसं तन्तु प्रातः प्रातर्यथाबलं ।
निषेवेत यथायोगमाहारं चास्य कल्पयेत् ॥
कार्श्यकृद्दलिनामैष सन्नस्याग्नेः प्रसाधकः ।
शोफनुद्गुल्महृत्कुष्ठमेहपाण्ड्वामयापहः ॥
श्लीहोदरहरः शीघ्रं विषमज्वरनाशनः ।
अभिष्यन्दापहरणो लोहारिष्टो महागुणः ॥

प्रमेहिणो यदा मूत्रमपिच्छिलमनाविलं ।
विशदन्तिक्तकटुकं तदारोग्यं प्रचक्ष्यते ॥

---

## ॥ त्रयोदशोऽध्यायः ॥

अथातोमधुमेहचिकित्सितं व्याख्यास्यामः ॥
मधुमेहित्वमापन्नं भिषग्भिः परिवर्जितं ।
योगेनानेन मतिमान् प्रमेहिणमुपाचरेत् ॥

मासे शुक्रे शुचौ चैव शैलाः सूर्य्यांशुतापिताः ।
जतुप्रकाशं स्वरसं शिलाभ्यः प्रस्रवन्ति हि ॥
शिलाजत्विति विख्यातं सर्व्वव्याधिविनाशनं ।
त्रप्वादीनान्तु लोहानां षण्णामन्यतमान्वयं ॥
ज्ञेयं स्वगन्धतश्चापि षड्योनिप्रथितं चितौ ।
लोहाद्भवति तद्यस्माच्छिलाजतु जतुप्रभं ॥
तस्य लोहस्य तद्वीर्य्यं रसञ्चापि बिभर्त्ति तत् ।
त्रपुसीसायसादीनि प्रधानान्युत्तरोत्तरं ॥
यथा तथा प्रयोगेऽपि श्रेष्ठे श्रेष्ठगुणाः स्मृताः ।
यत्सर्व्वं तिक्तकटुकं कषायानुरसं सरं ॥
कटुपाक्युष्णवीर्य्यञ्च शोषणं च्छेदनं तथा ।
तेषु यत्कृष्णमलघु स्निग्धं निःशर्करञ्च यत् ॥
गोमूत्रगन्धि यच्चापि तत्प्रधानं प्रचक्षते ।
तद्भावितं सारगणैर्हृतदोषो दिनोदये ॥
पिबेत्सारोदकेनैव श्लक्ष्णपिष्टं यथाबलं ।
जाङ्गलेन रसेनान्नं तस्मिञ्जीर्णे तु भोजयेत् ॥
उपयुज्य तुलामेवं गिरिजादमृतोपमात् ।
वपुर्वर्णबलोपेतो मधुमेहविवर्जितः ॥
जीवेद्वर्षशतं पूर्णमजरोऽमरसन्निभः ।
शतं शतं तुलायान्तु सहस्रं दश तौलिके ॥
भल्लातकविधानेन परिहारविधिः स्मृतः ।

मेहं कुष्ठमपस्मारमुन्मादं श्लीपदं गरं ॥
शोषं शोफार्शसी गुल्मं पाण्डुतां विषमज्वरं ।
अपोहत्यचिरात्कालाच्छिलाजतु निषेवितं ॥
न सोऽस्ति रोगो यश्चापि निहन्यान्न शिलाजतु ।
शर्करां चिरसम्भूतां भिनत्ति च तथाश्मरीं ॥
भावनालोडने चास्य कर्त्तव्ये भेषजैर्हितैः ।
एवञ्च माक्षिकं धातुं तापीजमम्हतोपमं ॥
मधुरं काञ्चनाभासमम्लं वा रजतप्रभं ।
पिवन्हन्ति जराकुष्ठमेहपाण्ड्वामयक्षयान् ॥
तद्भावितः कपोतांश्च कुलत्थांश्च विवर्जयेत् ।
पञ्चकर्म्मगुणातीतं श्रद्धावन्तं जिजीविषुं ॥
योगेनानेन मतिमान्साधयेत्कुष्ठिनं नरं ।
वृक्षास्तुवरका ये स्युः पश्चिमार्णवभूमिषु ॥
वीचीतरङ्गविक्षेपमारुतोद्धूतपल्लवाः ।
तेषां फलानि गृह्णीयात्सुपक्वान्यम्बुदागमे ॥
मज्जस्तेभ्योऽपि संहृत्य शोषयित्वा विचूर्ण्य च ।
तिलवत्पीडयेद्द्रोण्यां क्वाथयेद्वा कुसुम्भवत् ॥
तत्तैलं संहृतं भूयः पचेदातोयसंक्षयात् ।
अवतार्य्य करीषे च पक्षमात्रं निधापयेत् ॥
स्निग्धः स्विन्नो हृतमलः पश्चादूर्द्ध्वं प्रयत्नवान् ।
चतुर्थभक्तान्तरितः शुक्लादौ दिवसे शुभे ॥

मन्त्रपूतस्य तैलस्य पिबेन्मात्रां यथाबलं ।
तत्र मन्त्रं प्रवच्यामि येनेदमभिमन्त्र्यते ॥
मज्जसार महावीर्य्य सर्वान्धातून्विशोधय ।
शङ्खचक्रगदापाणिस्त्वामाज्ञापयतेऽच्युतः ॥
तेनास्योर्द्धमधश्चापि दोषा यान्त्यसकृत्ततः ।
अस्नेहलवणां सायं यवागूं शीतलां पिबेत् ॥
पञ्चाहं प्रपिबेत्तैलमनेन विधिना नरः ।
पत्रं परिहरेच्चापि मुद्गयूषौदनाशनः ॥
पञ्चभिर्दिवसैरेवं सर्वकुष्ठैर्व्विमुच्यते ।
तदेव खदिरक्वाथे त्रिगुणे साधु साधितं ॥
निहन्ति पूर्व्ववत्पक्वं पिबेन्मासमतन्द्रितः ।
तेनाभ्यक्तशरीरश्च कुर्व्वीताहारमीरितं ॥
भिन्नस्वरं रक्तनेत्रं विशीर्णं कृमिभक्षितं ।
अनेनाशु प्रयोगेण साधयेत् कुष्ठिनं नरं ॥
सर्पिर्म्मधुयुतं पीतं तदेव खदिराम्बुना ।
पचिमांसरसाहारं करोति द्विशतायुषं ॥
तदेव नस्ये पञ्चाशद्दिवसानुपयोजितं ।
वपुष्मन्तं श्रुतिधरं करोति त्रिशतायुषं ॥
शोधयन्ति नरं पीता मज्जानस्तस्य मात्रया ।
महावीर्य्यस्तुवरकः कुष्ठमेहापहः परः ॥

सान्तर्द्धूमस्तस्य मज्जा तु दग्धः चिप्तस्तैले सैन्धवं चाञ्जनञ्च।
ऐन्द्रं हन्यादर्म्मनक्तान्ध्यकाचान्नीलीरोगं तैमिरं चाञ्जनेन॥

———

## ॥ चतुर्द्दशोऽध्यायः ॥

अथात उदराणां चिकित्सितं व्याख्यास्यामः॥

अष्टावुदराणि पूर्व्वमुद्दिष्टानि तेष्वसाध्यं बद्धगुदं परिस्रावि चावशिष्टानि कृच्छ्रसाध्यानि सर्व्वाण्येव च प्रत्याख्यायोपक्रमेत। तेष्वाद्यश्चतुर्व्वर्गो भेषजसाध्यः। कालप्रकर्षात्सर्व्वाण्येव शस्त्रसाध्यानि वर्जयितव्यानि वा॥

उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिशितपरिषेकावगाहान्परिहरेत्। शालिषष्टिकयवगोधूमनीवारान्नित्यमश्नीयात्॥

तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा स्नेहयित्वा तिल्वकविपक्वेनानुलोम्य चित्राफलतैलप्रगाढेन विदारिगन्धाकषायेणास्थापयेदनुवासयेच्च शाल्वणेन चोपनाहयेदुदरं। भोजयेच्चैनं विदारिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन चाभीक्ष्णं स्वेदयेत्॥

पित्तोदरिणन्तु मधुरगणविपक्वेन सर्पिषा स्नेहयित्वा श्यामात्रिफलात्रिवृद्विपक्वेनानुलोम्य शर्करामधुघृतप्रगाढेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च पायसेनोपनाहयेदुदरं भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा॥

श्लेष्मोदरिणं पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्निह्य स्नुहीक्षीर

विपक्केनानुलोम्य त्रिकटुकमूत्रक्षारतैलप्रगाढेन मुष्ककादिकषायेणास्थापयेदनुवासयेच्च शणातसीधातकीकिण्वसर्षपमूलकवीजकल्कैश्चोपनाहयेदुदरं भोजयेच्चैनं त्रिकटुकप्रगाढेन कुलत्थयूषेण पायसेन वा स्वेदयेच्चाभीक्ष्णं ॥

दूष्योदरिणन्तु प्रत्याख्याय सप्तलाशङ्खिनीस्वरससिद्धेन सर्पिषा विरेचयेन्मासमर्द्धं मासं वा महावृक्षक्षीरसुरागोमूत्रसिद्धेन वा शुद्धकोष्ठन्तु मद्येनाश्वमारकगुञ्जाकाकादनीमूलकल्कं पाययेत्। इक्षुकाण्डानि वा कृष्णसर्पेण दंशयित्वा भक्षयेत्। वल्लीफलानि वा मूलजं कन्दजं वा विषमासेवयेत् तेनागदो भवत्यन्यं वा भावमापद्यते ॥

भवति चात्र ॥ कुपितानिलमूलत्वात्सञ्चितत्वान्मलस्य च।
सर्व्वोदरेषु शंसन्ति बहुशस्त्वनुलोमनं ॥

अत ऊर्द्धं सामान्ययोगान्वक्ष्यामः ॥ तद्यथा। एरण्डतैलमहरहर्म्मासं द्वौ वा केवलमूत्रयुक्तं क्षीरयुक्तं वा सेवेतोदकवर्ज्जी माहिषं वा मूत्रं क्षीरेण निराहारः सप्तरात्रं॥ उष्ट्रीक्षीराहारो वान्नवारिवर्ज्जी पिप्पलीं वा मासं पूर्व्वोक्तेन विधानेनासेवेत ॥ सैन्धवाजमोदायुक्तं वा निकुम्भतैलं॥ आर्द्रकशृङ्गवेररसपात्रशतसिद्धं वा वातशूलेऽवचार्य्यं॥ शृङ्गवेररसविपक्कं क्षीरमासेवेत ॥ चव्यशृङ्गवेरकल्कं वा पयसा सरलदेवदारुचित्रकमेव वा ॥ मुरङ्गीशालपर्णीश्यामापुनर्नवाकल्कं वा ॥ ज्योतिष्मफलतैलं वा क्षीरेण स्वर्जिकाहिङ्गुमिश्रं पिबेत्॥ गुडद्वितीयां वा हरीतकीं भक्षयेत्॥ स्नुहीक्षीरभावि

तानां वा पिप्पलीनां सहस्रं कालेन पथ्याकृष्णाचूर्णं वा स्नुहीभावितामुत्कारिकां पक्वां दापयेत् । हरीतकीचूर्णप्रस्थमाढके घृतस्याग्नारेष्वभिविलाप्य खजेनाभिमथ्यानुगुप्तं कृत्वार्द्धमासं यवपल्ले वासयेत् ततस्तोद्धृत्य परिस्राव्य हरीतकीक्वाथाम्लदधीन्यावाप्य विपचेत् तद्यथायोगं मासमर्द्धमासं वा पाययेत् ॥ गव्ये पयसि महावृक्षक्षीरमावाप्य विपचेद्विपक्वं चावतार्य्य शीतीभूतं मन्थानेनाभिमथ्य नवनीतमादाय भूयो महावृक्षक्षीरेणैव विपचेत्तद्यथायोगं मासं मासार्द्धं वा पाययेत् ॥ चव्यचित्रकदन्त्यतिविषाकुष्ठसारिवात्रिफलाजमोदहरिद्राशङ्खिनीत्रिवृत्त्रिकटुकानामर्द्धकार्षिका भागा राजवृक्षफलमज्जानामष्टौ कर्षा महावृक्षक्षीरपले द्वे गवां क्षीरमूत्रयोरष्टावष्टौ पलानि एतत्सर्वं घृतप्रस्थे समावाप्य विपचेत् तद्यथायोगंमासमर्द्धं मासं वा पाययेत् ॥ एतानि तिल्वकघृतचतुर्थानि सर्पीष्युदरगुल्मविद्रध्यष्ठीलानाहकुष्ठोन्मादापस्मारेषूपयोज्यानि विरेचनार्थं ॥ मूत्रासवारिष्टसुराश्चाभीक्ष्णं महावृक्षक्षीरसंस्कृताः सेवेत ॥ विरेचनद्रव्यकषायं वा शृङ्गवेरदेवदारुप्रगाढं ॥ वमनविरेचनद्रव्याणां पालिका भागाः पिप्पल्यादिवचादिहरिद्रादिपरिपठितानाञ्च द्रव्याणां श्लक्ष्णपिष्टानां यथोक्तानाञ्च लवणानां तत्सर्वं मूत्रगणे प्रक्षिप्य महावृक्षक्षीरप्रस्थञ्च मृद्वग्निना घट्टयन्विपचेदप्रदग्धकल्कं तत्साधुसिद्धमवतार्य्य शीतीभूतमक्षमात्रां गुटिकां वर्त्तयेत्तासामेकां द्वे तिस्रो वा गुटिका बलापेक्षया मासांस्त्रींश्च

तुरो वा सेवेत। एषानाहवर्त्तिक्रिया विशेषेण महाव्याधिषूपयुज्यते कोष्ठजांश्च कृमीनपहन्ति कासश्वासकृमिकुष्ठप्रतिश्यायारोचकाविपाकोदावर्त्तांश्च नाशयति॥ मदनफलमज्जकुटजजीमूतकेक्ष्वाकुधामार्गवचित्रकत्रिकटुसर्षपलवणानि महावृक्षक्षीरमूत्रयोरन्यतरेण पिष्ट्वाङ्गुष्ठमात्रां वर्त्तिं कृत्वोदरिण आनाहे तैललवणाभ्यक्तगुदस्यैकां द्वे वा पायौ निदध्यादेषानाहवर्त्तिक्रिया वातमूत्रपुरीषोदावर्त्ताध्मानानाहेषु विधेया॥

प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुक्तवतो वामबाहौ कुर्प्पराभ्यन्तरतः सिरां विध्येद्विमर्द्दयेत्पाणिना प्लीहानं रुधिरस्यन्दनार्थं ततः संशुद्धदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत हिङ्गुसौवर्चिकाक्षारेण स्रुतेन पलाशक्षारेण वा यवक्षारं। पारिजातकेक्षुरकापामार्गक्षारं वा तैलसंसृष्टं। शोभाञ्जनकषायं वा पिप्पलीसैन्धवचित्रकयुक्तं। पूतिकरञ्जक्षारं वाम्लस्रुतं विडलवणपिप्पलीप्रगाढं॥

पिप्पलीपिप्पलीमूलचित्रकशृङ्गवेरयवक्षारसैन्धवानां पालिका भागा घृतप्रस्थं तत्तुल्यं क्षीरं तदैकध्यं विपाचयेदेतत्षट्पलकं नाम सर्पिः प्लीहाग्निसङ्गगुल्मोदरोदावर्त्तश्वयथुपाण्डुरोगकासश्वासप्रतिश्यायोर्द्ध्ववातविषमज्वरानपहन्ति मन्दाग्निर्वा हिङ्ग्वादिकं चूर्णमुपयुञ्जीत यकृद्दाल्येऽप्येष एव क्रियाविभागः विशेषतस्तु दक्षिणबाहौ सिराव्यधः॥

मणिबन्धं सकृन्नाम्य वामाङ्गुष्ठसमीरितां ।
दहेत्सिरां शरेणाशु प्लीह्नो वैद्यः प्रशान्तये ॥

बद्धगुदे परिस्राविणि च स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणान्यन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं बालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा बाह्यं व्रणमुदरस्य सीव्येत्। परिस्राविण्यप्येवमेव शल्यमुद्धृत्यान्त्रस्रावान्संशोध्य तच्छिद्रमन्त्रं समाधाय कालपिपीलिकाभिर्दंशयेत् दष्टे च तासां कायानपहरेन्न शिरांसि ततः पूर्ववत्सीव्येत् सन्धानञ्च यथोक्तं कारयेत् यष्टीमधुकमिश्रया च कृष्णमृदावलिप्य बन्धेनोपचरेत्ततो निवातमागारं प्रवेश्याचारिकमुपदिशेद्वासयेच्चैनं तैलद्रोण्यां सर्पिर्द्रोण्यां वा पयोवृत्तिमिति ॥

उदकोदरिणस्तु वातहरतैलाभ्यक्तस्योष्णोदकस्विन्नस्य स्थितस्याप्तैः सुपरिगृहीतस्याकक्षात्परिवेष्टितस्याधोनाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येत्। तत्र त्रप्वादीनामन्यतमस्य नाडीं द्विद्वारां पक्षनाडीं वा संयोज्य दोषोदकमवसिञ्चेत्ततो नाडीमपहृत्य तैललवणेनाभ्यज्य व्रणं बन्धेनोपचरेन्न चैकस्मिन्नेव दिवसे सर्व्वं दोषोदकमपहरेत् सहसा ह्यपहृते तृष्णाज्वराङ्गमर्दातीसारश्वासपाददाहा उत्पद्येरन्नापूर्य्यते वा भृशतरमुदरमसञ्जातप्राणस्य तस्मात्तृतीयचतुर्थपञ्चमषष्ठा

ष्टमदशमद्वादशषोडशरात्राणामन्यतममन्तरीकृत्य दोषोदकमल्पाल्पमवसिञ्चेत्। निःसुते निःसुते च दोषे गाढतरमाविककाशेयचर्म्मणामन्यतमेन परिवेष्टयेदुदरं तथा नाध्मायति वायुः षण्मासांश्च पयसा भोजयेज्जाङ्गलरसेन वा तत्र त्रीन्मासानर्द्धोदकेन पयसा फलाम्लेन जाङ्गलरसेन वावशिष्टं मासत्रयमन्नं लघु हितं वा सेवेतैवं संवत्सरेणागदी भवति ॥

भवति चात्र ॥

आस्थापने चैव विरेचने च पाने तथाहारविधिक्रियासु।
सर्व्वोदरिभ्यः कुशलैः प्रयोज्यं चोरं शृतं जाङ्गलजो रसो वा ॥

---

॥ पञ्चदशोऽध्यायः ॥

अथातो मूढगर्भचिकित्सितं व्याख्यास्यामः ॥

नातः कष्टतममस्ति यथामूढगर्भशल्योद्धरणमत्र हि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म कर्त्तव्यं स्पर्शेन। उत्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीडनर्जूकरणदारणानि चैकहस्तेन गर्भं गर्भिणीं वा हिंसता तस्मादधिपतिमापृच्छ्य परञ्च यत्नमास्थायोपक्रमेत ॥

तत्र समासेनाष्टविधा मूढगर्भगतिरुद्दिष्टा स्वभावगता अपित्रयः सङ्गा भवन्ति शिरसोवैगुण्यादंसयोर्जघनस्य वा। जीवति तु गर्भे सूतिका गर्भनिर्हरणे प्रयतेत निर्हर्त्तुमशक्ये च्यवनान्मन्त्रानुपश्रृणुयात् तान्वक्ष्यामः ॥

इहामृतञ्च सोमश्च चित्रभानुश्च भामिनि।
उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते॥
इदममृतमपां समुद्धृतं वै तव लघु गर्भमिमं प्रमुञ्चतु स्त्री।
तदनलपवनार्कवासवास्ते सहलवणाम्बुधरैर्दिशन्तु शान्तिं॥
मुक्ताः पशोर्व्विपाशाश्च मुक्ताः सूर्य्येण रश्मयः।
मुक्तः सर्व्वभयाद्गर्भ एह्येहि विरमावितः॥

औषधानि च विदध्याद्यथोक्तानि। मृते चोत्तानाया आभुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वननगवृत्तिकाशाल्मलीमृत्स्नघृताभ्यां भ्रक्षयित्वा हस्तं योनौ प्रवेश्य गर्भमुपहरेत्। तत्र सक्थिभ्यामागतमनुलोममेवाच्छेत्। एकसक्थिप्रपन्नस्येतर सक्थि प्रसार्य्यापहरेत्। स्फिग्देशेनागतस्य स्फिग्देशं प्रपीड्योर्द्धमुत्क्षिप्य सक्थिनी प्रसार्य्यापहरेत्। तिर्य्यगागतस्य परिघस्येव तिरश्चीनस्य पश्चादर्द्धमूर्द्धमुत्क्षिप्य पूर्व्वार्द्धमपत्यपथं प्रत्यार्जवमानीयापहरेत्। पार्श्वापवृत्तशिरसमंसम्प्रपीड्योर्द्धमुत्क्षिप्य शिरोऽपत्यपथमानीयापहरेत्। बाहुद्वयप्रतिपन्नस्योर्द्धमुत्पीड्यांसौ शिरोऽनुलोममानीयापहरेत्। द्वावन्त्यावसाध्यौ मूढगर्भौ॥ एवमशक्ये शस्त्रमवचारयेत्॥

सचेतनञ्च शस्त्रेण न कथञ्चन दारयेत्।
दार्य्यमाणो हि जननीमात्मानं चैव घातयेत्॥

तत्र स्त्रियमाश्वास्य मण्डलाग्रेणाङ्गुलीशस्त्रेण वा शिरो विदार्य्य शिरःकपालान्याहृत्य शङ्कुना गृहीत्वोरसि कक्षायां वापहरेद्

भिन्ने शिरसि चाक्षिकूटे गण्डे वा अंससंसक्तस्यांसदेशे बाहुं छित्त्वा दृतिमिवाततं वातपूर्णोदरं वा विदार्य्य निरस्यान्त्राणि शिथिलीभूतमाहरेज्जघनसक्तस्य वा जघनकपालानीति॥

यद्यदङ्गं हि गर्भस्य तस्य सजति तद्भिषक्।
सम्यग्विनिर्हरेच्छित्त्वा रक्षेन्नारीं च यत्नतः॥
गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः।
तत्रानल्पमतिर्वैद्यो वर्त्तेत विधिपूर्व्वकं॥
नोपेक्षेत मृतं गर्भं मुहूर्त्तमपि पण्डितः।
स ह्याशु जननीं हन्ति निरुच्छ्वासं पशुं यथा॥
मण्डलाग्रेण कर्त्तव्यं छेद्यमन्तर्व्विजानता।
वृद्धिपत्रं हि तीक्ष्णाग्रं नारीं हिंस्यात्कदाचन॥
अथापतन्तीमपरां पातयेत्पूर्व्ववद्भिषक्।
हस्तेनापहरेद्वापि पार्श्वाभ्यां परिपीड्य वा॥
धुनुयाच्च मुहुर्नारीं पीडयेद्वांसपिण्डिकां।
तैलाक्तयोनेरेवं तां पातयेन्मतिमान्भिषक्॥
एवं निर्हृतशल्यान्तु सिञ्चेदुष्णेन वारिणा।
ततोऽभ्यक्तशरीराया योनौ स्नेहं निधापयेत्॥
एवं मृद्वीभवेद्योनिस्तच्छूलं चोपशाम्यति।
कृष्णातन्मूलशुण्ठ्येलाहिङ्गुभार्गीस्दीप्यकाः॥
वचामतिविषां रास्नां चव्यं सञ्चूर्ण्य पाययेत्॥
स्नेहेन दोषस्यन्दार्थं वेदनोपशमाय च।

क्वाथं पेयां तथा कल्कं चूर्णं वा स्नेहवर्जितं ॥
शाकलत्त्विङ्गुतिविषापाठाकटुकरोहिणीः ।
तथा तेजोवतीं चापि पाययेत्पूर्व्ववद्भिषक् ॥
त्रिरात्रं पञ्चसप्ताहं ततः स्नेहं पुनः पिबेत् ।
पाययेदासवं नक्तमरिष्टं वा सुसंस्कृतं ॥
शिरीषककुभाभ्याञ्च तोयमाचमने हितं ॥
उपद्रवाश्च येऽन्ये स्युस्तान्यथास्वमुपाचरेत् ।
सर्व्वतः परिशुद्धा च स्निग्धपथ्याल्पभोजना ॥
स्वेदाभ्यङ्गपरा नित्यं भवेत्क्रोधविवर्जिता ।
पयो वातहरैः सिद्धं दशाहं भोजने हितं ॥
रसं दशाहं शेषे तु यथायोगमुपाचरेत् ।
व्युपद्रवां विशुद्धाञ्च ज्ञात्वा च बलवर्णिनीं ॥
ऊर्द्ध्वं चतुर्भ्यो मासेभ्यो विसृजेत्परिहारतः ।
योनिसन्तर्पणेऽभ्यङ्गे पाने वस्तिषु भोजने ॥
बलातैलमिदं वाथ दद्यादनिलवारणं ।
बलामूलकषायस्य दशमूलीकृतस्य च ॥
यवकोलकुलत्थानां क्वाथस्य पयसस्तथा ।
अष्टावष्टौ शुभा भागास्तैलादेकस्तदेकतः ॥
पचेदावाप्य मधुरं गणं सैन्धवसंयुतं ।
तथागुरुं सर्जरसं सरलं देवदारु च ॥
मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुसारिवां ।

मांसीं शैलेयकं पत्रं तगरं शारिवां वचां।
शतावरीमश्वगन्धां शतपुष्पां पुनर्नवां॥
तत्साधु सिद्धं सौवर्णे राजते मृन्मयेऽपि वा॥
प्रक्षिप्य कलशे सम्यक् स्वनुगुप्तं निधापयेत्।
बलातैलमिदं ख्यातं सर्ववातविकारनुत्॥
यथाबलमतो मात्रां सूतिकायै प्रदापयेत्।
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान्॥
वातक्षीणे मर्माहते मथितेऽभिहते तथा।
भग्ने श्रमाभिपन्ने च सर्वथैवोपयुज्यते॥
एतदाक्षेपकादींश्च वातव्याधीनपोहति।
हिक्कां कासमधीमन्थं गुल्मं श्वासञ्च दुस्तरं॥
षण्मासानुपयुज्यैतदन्त्रवृद्धिमपोहति।
प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः॥
राज्ञामेतद्धि कर्त्तव्यं राजमात्राश्च ये नराः।
सुखिनः सुकुमाराश्च धनिनश्चापि ये नराः॥
बलाकषायपीतो यस्तिलेभ्यो वाप्यनेकशः।
तैलमुत्पाद्य तत्कायशतपाककृतं शुभं॥
निवाते निभृतागारे प्रयुञ्जीत यथाबलं।
जीर्णेऽस्मिन्पयसा स्निग्धमश्नीयात्षष्टिकौदनं॥
अनेन विधिना द्रोणमुपयुज्यान्नमीरितं।
भुञ्जीत द्विगुणं कालं बलवर्णान्वितस्ततः॥

सर्व्वपापैर्व्विनिर्मुक्तः शतायुः पुरुषो भवेत् ।
शतं शतं तयोत्कर्षो द्रोणे द्रोणे प्रकीर्त्तितः ॥
बलाकल्पेनातिबलागुडूच्यादित्यपर्णिषु ।
सैरेयके वीरतरौ शतावर्य्यां त्रिकण्टके ॥
तैलानि मधुके कुर्य्यात् प्रसारण्याञ्च बुद्धिमान् ।
नीलोत्पलं वरीमूलं गव्ये चीरे विपाचयेत् ॥
शतपाकं ततस्तेन तिलतैलं पचेद्भिषक् ।
बलातैलस्य कल्कांस्तु सुपिष्टांस्तत्र दापयेत् ॥
सर्व्वेषामेव जानीयादुपयोगं चिकित्सकः ।
बलातैलवदेतेषां गुणांश्चैव विशेषतः ॥

---

॥ षोडशोऽध्यायः ॥

अथातोविद्रधीनां चिकित्सितं व्याख्यास्यामः ॥

उक्ता विद्रधयः षड्वि तेष्वसाध्यस्तु सर्वजः ।
शेषेष्वामेषु कर्त्तव्या त्वरितं शोफवत्क्रिया ॥
मुरङ्गीमूलकल्कैस्तु घृततैलवसायुतैः ।
सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ॥
सानूपौदकमांसस्तु काकोल्यादिः सतर्पणः ।
स्नेहाम्लसिद्धो लवणः प्रयोज्यश्चोपनाहने ॥
वेशवारैः सकृशरैः पयोभिः पायसैस्तथा ।
स्वेदयेत्सततं चापि निर्हरेच्चापि शोणितं ॥

सचेदेवमुपक्रान्तः पाकायाभिमुखो यदि।
तं पाचयित्वा शस्त्रेण भिन्द्याद्भिन्नञ्च शोधयेत्॥
पञ्चमूलकषायेण प्रक्षाल्य लवणोत्तरैः।
तैलैर्भद्रादिमधुकसंयुक्तैः प्रतिपूरयेत्॥
वैरेचनिकयुक्तेन चैवृतेन विशोध्य च।
पृथक्पर्ण्यादिसिद्धेन चैवृतेन च रोपयेत्॥
पैत्तिकं शर्कराक्षाजामधुकैः सारिवायुतैः।
प्रदिह्यात्क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः॥
पाक्यैः शीतकषायैर्वा क्षीरैरिक्षुरसैस्तथा।
जीवनीयघृतैर्वापि सेचयेच्छर्करायुतैः॥
त्रिवृद्धरीतकीनाञ्च चूर्णं लिह्यान्मधुद्रवं।
जलौकोभिर्हरेच्चासृक् पक्वं चापाद्य बुद्धिमान्॥
क्षीरवृक्षकषायेण प्रक्षाल्यौदकजेन वा।
तिलैः सयष्टिमधुकैः सक्षौद्रैः सर्पिषा युतैः॥
उपदिह्य प्रतनुना वाससा वेष्टयेद्व्रणं।
प्रपौण्डरीकमञ्जिष्ठामधुकोशीरपद्मकैः॥
सहरिद्रैः कृतं सर्पिः सक्षीरं व्रणरोपणं।
क्षीरशुङ्गापृथक्पर्णीसमङ्गारोध्रचन्दनैः॥
न्यग्रोधादिप्रवालेषु तेषां त्वक्षथवा कृतं।
नक्तमालस्य पत्राणि तरुणानि फलानि च॥
सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा।

द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी ॥
प्रियङ्गुः कुशमूलञ्च निचुलस्य त्वगेवच ।
मञ्जिष्ठाचन्दनोशीरमुत्पलं सारिवा त्रिवृत् ॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ।
दुष्टव्रणप्रशमनं नाडीव्रणविशोधनं ॥
सद्यश्छिन्नव्रणानाञ्च करञ्जाद्यमिदं शुभं ।
दुष्टव्रणाश्च ये केचिद्ये चोत्सृष्टक्रिया व्रणाः ॥
नाड्यो गम्भीरिका याश्च सद्यश्छिन्नास्तथैव च ।
अग्निक्षारक्षताश्चैव ये व्रणा दारुणा अपि ॥
करञ्जाद्येन हविषा प्रशाम्यन्ति न शंसयः ।
इष्टकासिकतालोहगोशकृत्तुषपांशुभिः ॥
मूत्रैरुष्णैश्च सततं स्वेदयेत्श्लेष्मविद्रधिं ।
कषायपानैर्वमनैरालेपैरुपनाहनैः ॥
हरेद्दोषानभीक्ष्णं चाप्यलाब्वास्रकथैव च ।
आरग्वधकषायेण पक्कं चापाद्य धावयेत् ॥
हरिद्राचित्रिवृताशक्तुतिलैर्मधुसमायुतैः ।
पूरयित्वा व्रणं सम्यग्बध्नीयात्कीर्त्तितं यथा ॥
ततः कुलत्थिकादन्तीत्रिवृच्छ्यामार्कतिल्वकैः ।
कुर्य्यात्तैलं सगोमूत्रं हितं तत्र ससैन्धवं ॥
पित्तविद्रधिवत्सर्व्वाः क्रिया निरवशेषतः ।
विद्रध्योः कुशलः कुर्य्याद्रक्तागन्तुनिमित्तयोः ॥

वरुणादिगणक्काथमपक्केऽभ्यन्तरोत्थिते।
ऊषकादिप्रतीवापं पिबेद्विद्रधिशान्तये॥
अनयोर्वर्गयोः सिद्धं सर्पिर्व्वैरेचनेन च।
अचिराद्विद्रधिं हन्ति प्रातःप्रातर्निषेवितं॥
एभिरेव गणैश्चापि संसिद्धं स्नेहसंयुतं।
कार्य्यमास्थापनं चिप्रं तथैवाप्यनुवासनं॥
पानालेपनभोज्येषु मधुशिग्रुद्रुमोऽपि वा।
दत्तावापो यथादोषमपक्वं हन्ति विद्रधिं॥
तोयधान्याम्लमूत्रैस्तु पेयो वापि सुरादिभिः॥
यथादोषगणक्काथैः पिबेदापि शिलाजतु॥
प्रधानं गुग्गुलुञ्चापि शुण्ठीं च सुरदारु च।
स्नेहोपनाहौ कुर्य्याच सदा चाप्यनुलोमनं॥
यथोद्दिष्टां सिरां विध्येत्कफजे विद्रधौ भिषक्।
रक्तपित्तानिलोत्थेषु केचिदाहौ वदन्ति तु॥
पक्वं वा वहिरुन्नद्धं भित्त्वा व्रणवदाचरेत्।
स्रुतेपूर्द्धमधो वापि मैरेयाम्लसुरासवैः॥
पेयो वरुणकादिस्तु मधुशिग्रुद्रुमोऽपि वा।
शिग्रुमूलजले सिद्धं ससिद्धार्थकमोदनं॥
यवकोलकुलत्थानां यूषैर्भुञ्जीत मानवः।
प्रातःप्रातश्च सेवेत मात्रया तैल्वकं घृतं॥
त्रिवृतादिगणक्काथसिद्धं वाय्वुपशान्तये।

नोपगच्छेद्यथापाकं प्रयतेत तथा भिषक् ॥
पक्वागते विद्रधौ तु सिद्धिर्नैकान्तिकी स्मृता ।
प्रत्याख्याय तु कुर्व्वीत मज्जजातं तु विद्रधिं॥
स्नेहस्वेदोपपन्नानां कुर्य्याद्रक्तावसेचनं ।
विद्रध्युक्तां क्रियां कुर्य्यात्पक्वे वास्थि तु भेदयेत् ॥
निःशल्यमथ विज्ञाय कर्त्तव्यं व्रणशोधनं ॥
धावेत्तिक्तकषायेण तिक्तं सर्पिस्तथा हितं ।
यदि मज्जपरिस्रावो न निवर्त्तेत देहिनः ॥
कुर्य्यात्संशोधनीयानि कषायादीनि बुद्धिमान् ।
प्रियङ्गुधातकीरोध्रकट्फलं तिनिशैन्धवं ॥
एतैस्तैलं विपक्तव्यं विद्रधिव्रणरोपणं ॥

---

॥ सप्तदशोऽध्यायः ॥

अथातो विसर्पनाडीस्तनरोगचिकित्सितं व्याख्यास्यामः ॥
साध्या विसर्पास्त्रय आदितो ये न सन्निपातक्षतजौ हि साध्यौ ।
साध्येषु तत्पथ्यगणैर्व्विदध्यात्कृतानि सेकांश्च तथोपदेहान् ॥
मुस्ताशताह्वासुरदारुकुष्ठं वाराहिकुस्तुम्बुरुकृष्णगन्धाः ।
वातात्मके चोष्णगणाः प्रयोज्याः सेकेषु लेपेषु तथा घृतेषु ॥
यत्पञ्चमूलं खलु कण्टकाख्यमल्पं महच्चाप्यथ वल्लिजञ्च ।
तच्चोपयोज्यं भिषजा प्रदेहे सेके घृते चापि तथैव तैले ॥
कसेरुशृङ्गाटकपद्मगुन्द्राः सशैवलाः सोत्पलकर्दमाश्च ।

वस्त्रान्तराः पित्तकृते विसर्पे लेपा विधेयाः सघृताः सुशीताः।
ह्रीवेरलामज्जकचन्दनानि स्रोतोजमुक्तामणिगैरिकाश्च।
क्षीरेण पिष्टाः सघृताः सुशीता लेपाः प्रयोज्यास्तनवः सुखाय॥
प्रपौण्डरीकं मधुकं पयस्या मञ्जिष्ठिका पद्मकचन्दने च॥
सुगन्धिका चेति सुखाय लेपाः पैत्ते विसर्पे भिषजा प्रयोज्याः॥
न्यग्रोधवर्गैः परिषेचनञ्च घृतञ्च कुर्य्यात्स्वरसेन तस्य।
शीतैः पयोभिश्च मधूदकैश्च सशर्करैरिक्षुरसैश्च सेकान्॥
घृतस्य गौरीमधुकारविन्दरोध्राम्बुराजादनगैरिकेषु।
तथार्षभे पद्मकसारिवासु काकोलिमेदाकुमुदोत्पलेषु॥
सचन्दनायां मधुशर्करायां द्राक्षास्थिराप्श्निशताङ्कयासु।
कल्कीकृतासूदकमत्र दत्वा न्यग्रोधवर्गस्य तथा स्थिरादेः॥
गणस्य विल्वादिकपञ्चमूल्याश्चतुर्गुणं चीरमथापि तद्वत्।
प्रस्थं विपक्वं परिषेचनेन पैत्तीर्निहन्यात्तु विसर्पनाडीः॥
विस्फोटदुष्टव्रणशीर्षरोगान्पाकं तथास्यस्य निहन्ति पानात्।
अन्नाहिते शोषिणि चापि बाले घृतं हि गौर्य्यादिकमेतदिष्टं॥
अजाश्वगन्धा सरला सकाला सैकैषिका चाप्यथवाजशृङ्गी।
गोमूत्रपिष्टो विहितः प्रदेहो हन्याद्विसर्प्पं कफजं स शीघ्रं॥
कालानुसार्य्यागुरुचोचगुञ्जारास्नावचाशीतशिवेन्द्रपर्ण्यः।
पालिन्दिमुञ्जातमहीकदम्बा हिता विसर्प्पेषु कफात्मकेषु
गणस्तु योज्यो वरुणप्रवृत्तः क्रियासु सर्वासु विचक्षणेन।
संशोधनं शोणितमोक्षणञ्च श्रेष्ठं विसर्पेषु चिकित्सितं हि॥

सर्व्वांश्च पक्वान्परिशोध्य धीमान्व्रणक्रमेणोपचरेद्यथोक्तं ।
नाडी त्रिदोषप्रभवा न सिध्येच्छेषास्त्वतस्त्वः प्रतियत्नसाध्याः ॥
तत्रानिलोत्थामुपनाह्य पूर्व्वमशेषतः पूयगतिं विदार्य्य ।
तिलैरपामार्गफलैश्च पिष्ट्वा ससैन्धवैर्ब्बन्धनमत्र कुर्य्यात् ॥
प्रक्षालने चापि सदा व्रणस्य योज्यं महद्यत्खलु पञ्चमूलं ।
हिंस्रां हरिद्रां कटुकां बलाञ्च गोजिह्विकाञ्चापि सविल्वमूलां ।
संहृत्य तैलं विपचेद्व्रणस्य संशोधनं पूरणरोपणञ्च ।
पित्तात्मिकां प्रागुपनाह्य धीमानुत्कारिकाभिः सपयोघृताभिः ॥
निपात्य शस्त्रं तिलनागदन्तीयष्ट्याह्वकल्कैः परिपूरयेत्तां ।
प्रक्षालने चापि ससोमनिम्बा निशा प्रयोज्या कुशलेन नित्यं ॥
श्यामात्रिभण्डीत्रिफलासु सिद्धं हरिद्रयोरोध्रकट्फलयोश्च ।
घृतं सदुग्धं व्रणतर्पणेन हन्यान्गतिं कोष्ठगतापि या स्यात् ॥
नाडीं कफोत्थामुपनाह्य सम्यक्कुलत्थसिद्धार्थकशक्तुकिण्वैः ।
मृदूकृतामेष्य गतिं विदित्वा निपातयेच्छस्त्रमशेषकारी ॥
दद्याद्व्रणे निम्बतिलान्सुपिष्टान् सुराष्ट्रजासैन्धवसम्प्रयुक्तान् ।
प्रक्षालने चापि करञ्जनिम्बजात्यचपीलुस्वरसाः प्रयोज्याः ॥
सुवर्चिकासैन्धवचित्रकेषु निकुम्भतालीनलरूपिकासु ।
फलेष्वपामार्गभवेषु चैव कुर्य्यात्समूत्रेषु हिताय तैलं ॥
नाडीन्तु शल्यप्रभवां विदार्य्य निर्हृत्य शल्यं प्रविशोध्य मार्गं ।
संशोधयेत्क्षौद्रघृतप्रगाढैस्तिलैस्ततो रोपणमस्य कुर्य्यात् ॥
कुम्भीकखर्जूरकपित्थविल्ववनस्पतीनाञ्च शलाटुवर्गे ।

कृत्वा कषायं विपचेत्तु तैलमावाप्य मुस्तासरलाप्रियङ्गूः ॥
सुगन्धिकामोचरसाहिपुष्पं रोध्रं विदध्यादपि धातकीञ्च ।
एतेन शल्यप्रभवा च नाडी रोहेद्व्रणो वा सुखमाशु चैव ॥

कृशदुर्ब्बलभीरूणां नाडी मर्म्माश्रिता च या ।
क्षारसूत्रेण तां छिन्द्यान्नतु शस्त्रेण बुद्धिमान् ॥
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीं ।
सूचीं निदध्याद्गत्यन्ते तथोन्नम्याशु निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढं बन्धं समाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत्प्रवेशयेत् ॥
क्षाराक्तं मतिमान्वैद्यो यावन्नच्छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
अर्ब्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत् ।
सूचीभिर्यववक्त्राभिराचितं वा समन्ततः ।
मूले सूत्रेण बध्नीयाच्छिन्ने चोपचरेद्व्रणं ॥

या द्विव्रणीयेऽभिहितास्तु वर्त्यस्ताः सर्वनाडीषु भिषग्विदध्यात् ।
घोण्टाफलत्वग्लवणानि लाक्षा पूगीफलं वा लवणञ्च पत्रं ॥
स्नुह्यर्कदुग्धेन तु कल्क एष वर्त्तीकृतो हन्त्यचिरेण नाडीः ।
विभीतकाद्यास्थिवटप्रवाला हरेणुकाशङ्खिनिवीजमस्य ॥
वाराहिकन्दश्च तथा प्रदेयो नाडीषु तैलेन च मिश्रयित्वा ।

धुत्तूरजं मदनकोद्रवजञ्च वीजं
कोशातकीशुकनसाम्हगभोजनी च ।

अङ्कोठवीजकुसुमं गतिषु प्रयोज्यं
लाचोदकाद्रुतमलासु विकृत्य चूर्णं ॥
चूर्णीकृतैरथ विमिश्रितमेभिरेव
तैलप्रयुक्तमचिरेण गतिं निहन्ति ।
एष्वेव मूत्रमथितेषु विधाय तैलं
तत्साधितं गतिमपोहति सप्तरात्रात् ।
पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सैंधवेषु ॥
तैलं कृतं गतिमपोहति शीघ्रमेत
त्कन्देषु चामरवरायुधसाङ्कयेषु ।
भल्लातकार्कमरिचैर्लवणोत्तमेन
सिद्धं विडङ्गरजनीद्वयचित्रकैश्च ।
स्यान्मार्कवस्य च रसेन निहन्ति तैलं
नाडीं कफानिलकृतामपचीं व्रणांश्च ॥
स्तन्ये गते विकृतिमाशु भिषक्तु धात्रीं
पीतां घृतं परिणतेऽहनि वामयेत्तु ।
निम्बोदकेन मधुमागधिकायुतेन
वान्तागतेऽहनि च मुद्गरसाशना स्यात् ॥
एवं त्र्यहं चतुरहं षडहं वमेद्वा
सर्पिः पिबेत्त्रिफलया सह संयुतं वा ।
भार्गीं वचामतिविषां सुरदारु पाठां

मुस्तादिकं मधुरसां कटुरोहिणीञ्च ॥
धात्रीं पिवेत्तु पयसः परिशोधानर्थ
मारग्वधादिषु वरं मधुना कषायं।
सामान्यमेतदुपदिष्टमतोविशेषा
द्दोषान्पयोनिपतितान् शमयेद्यथास्वं ॥
रोगं स्तनोत्थितमवेच्य भिषग्विदध्या
द्यद्विद्रधावभिहितं बजशो विधानं।
सम्पच्यमानमपि तन्तु विनोपनाहैः
सम्भोजनेन खलु पाचयितुं यतेत ॥
शीघ्रं स्तनोहि मृदुमांसतयोपनद्धः
सर्व्वं प्रकोथमुपयात्यवदीर्य्यते च।
पक्के च दुग्धहरिणीः परिहृत्य नाडीः
कृष्णञ्च चूचुकयुगं विदधीत शस्त्रं ॥
आमे विदाहिनि तथैव गते च पाकं
धात्र्याः स्तनौ सततमेव च निर्दहीत ॥

---

॥ अष्टादशोऽध्यायः ॥

अथातो ग्रन्थ्यपच्यर्व्वुदगलगण्डचिकित्सितं व्याख्यास्यामः ॥
ग्रन्थिष्वथामेषु भिषग्विदध्याच्छोफक्रियायां विहितं विधिज्ञः।
रक्षेद्बलं चापि नरस्य नित्यं तत्रचितं व्याधिबलं निहन्ति ॥
तैलं पिवेत्सर्पिरथो दयं वा दत्वा वसां वा त्रिवृतं विदध्यात्।

अपेहिवातादग्रमूलसिद्धं वैद्यश्चतुःस्नेहमथो द्वयं वा ॥
हिंस्राथ रोहिण्यमृताथ भार्गी श्योनाकविल्वागुरुकृष्णगन्धाः।
गोजी च विष्टा सहतालपत्र्या ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान्विविधांश्च कुर्य्यात्तथा प्रसिद्धानपरांश्च लेपान्।
विदार्य्य वा पक्कमपोह्य पूयं प्रक्षाल्य विल्वार्कनरेन्द्रतोयैः ॥
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः संशोधयेत्सैन्धवसम्प्रयुक्तैः।
शुद्धं व्रणं वाप्युपरोपयेयुस्तैलेन रास्नासरलान्वितेन ॥
विडङ्गयष्टीमधुकामृताभिः सिद्धेन वा क्षीरसमन्वितेन।
जलौकसः पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनं च ॥
काकोलिवर्गस्य च शीतलानि पिबेत्कषायाणि सशर्कराणि।
द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिबेच्चापि हरीतकीनां ॥
मधूकजम्ब्वर्ज्जुनवेतसानां त्वग्भिः प्रदेहानवचारयेत।
सशर्करैर्व्वा तृणशून्यकन्दैर्दिह्यादभीक्ष्णं मुचुकुन्दजैर्व्वा ॥
विदार्य्य वा पक्कमपोह्य पूयं धावेत्कषायेण वनस्पतीनां।
तिलैः सयष्टीमधुकैर्व्विशोध्य सर्पिः प्रयोज्यं मधुरैर्व्विपक्कं ॥
हृतेषु दोषेषु यथानुपूर्व्या ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु।
स्विन्नस्य विम्लापनमेव कुर्य्यादङ्गुष्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकनन्तीकाकादनीतापसवृक्षमूलैः।
आलेपयेत्पिण्डफलार्कभार्ग्गीकरञ्जकालामदनैश्च विद्वान् ॥
अमर्म्मजातं श्रममप्रयातमपक्कमेवापहरेद्विदार्य्य।
दहेत्स्थिते वासृजि सिद्धकर्म्मा सद्यःक्षताक्तञ्च विधिं विदध्यात् ॥

या मांसकन्दाः कठिना वृहत्यस्तास्वेष योज्यश्च विधिर्व्विधिज्ञैः ।
शस्त्रेण वापाद्य सुपक्कमाशु प्रक्षालयेत्पथ्यतमैः कषायैः ॥
संशोधनैस्तञ्च विशोधयेयुः क्षारोत्तरैः क्षौद्रघृतप्रगाढैः ।
शुद्धे च तैलं त्ववचारणीयं विडङ्गपाठारजनीविपक्कं ॥
मेदःसमुत्थे तिलकल्कदिग्धं दत्वोपरिष्टाद्द्विगुणं पटान्तं ।
ऊताशतप्तेन मुहुः प्रमृज्याल्लोहेन धीमान्दहनं हिताय ॥
प्रलिप्य दार्व्वीमथ लाक्षया वा प्रतप्तया स्वेदनमस्य कार्य्यं ।
निपात्य वा शस्त्रमपोह्य मेदो दहेत्सुपक्कन्त्वथ वा विदार्य्यं ॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्चिकाद्यैर्हरितालमिश्रैः ।
ससैन्धवैः क्षौद्रघृतप्रगाढैः क्षारोत्तरैरेनमभिप्रशोध्य ॥
तैलं विदध्याद्द्विकरञ्जगुञ्जावंशावलेखेङ्गुदमूत्रसिद्धं ।
जीमूतकैः कोशवतीफलैश्च दन्तीद्रवन्तीत्रिवृतासु चैव ॥
सर्पिः कृतं हन्त्यपचीं प्रवृद्धां द्विधाप्रवृत्तं तदुदारवीर्य्यं ।
निर्गुण्डिजातीवरिहिष्ठयुक्तं जीमूतकं माक्षिकसैन्धवाढ्यं ॥
अभिप्रतप्तं वमनं प्रगाढं दुष्टापचीषूत्तममादिशन्ति ।
कैटर्य्यविम्बीकरवीरसिद्धं तैलं हितं मूर्द्धविरेचनञ्च ॥
शाखोटकस्य स्वरसेन सिद्धं तैलं हितं नस्यविरेचनेषु ।
मधूकसारश्च हितोऽवपीडे फलानि शिग्रोः खरमञ्जरेर्व्वा ॥
ग्रन्थीनमर्म्मप्रभवानप क्वानुद्धृत्य चाग्निं विदधीत पश्चात् ।
क्षारेण वापि प्रतिसारयेत्तु संलिख्य शस्त्रेण यथोपदेशं ॥
पार्ष्णिं प्रति द्वादशचाङ्गुलानि भित्वेन्द्रवस्तिं परिवर्ज्य धीमान् ।

विदार्य्य मत्स्याण्डनिभानि वैद्यो निःकृष्य जालान्यनलं विदध्यात् ॥
आगुल्फकर्णात्सुमितस्य जन्तोस्तस्याष्टभागं खुलकाद्विभज्य ।
घोणर्जुवेधः सुरराजवस्तेर्हित्वाक्षिमात्रं त्वपरे वदन्ति ॥

मणिबन्धोपरिष्टाद्वा कुर्य्याद्रेखात्रयं भिषक् ।
अङ्गुल्यन्तरितं सम्यगपचीनां निवृत्तये ॥

चूर्णस्य काले प्रचलाककाकगोधाहिकूर्म्मप्रभवां मसीन्तु ।
दद्याच्च तैलेन सहेङ्गुदीनां यद्वच्यते श्लीपदिनाञ्च तैलं ॥
विरेचनं धूममुपाददीत भवेच्च नित्यं यवमुद्गभोजी ।
कर्क्कारुकैर्व्वारुकनारिकेरपियालपञ्चाङ्गुलवीजचूर्णैः ॥
वातार्वुदं क्षीरघृताम्बुसिद्धैरुष्णैः सतैलैरुपनाहयेत्तु ।
कुर्य्याच्च मुख्यान्युपनाहनानि सिद्धैश्च मांसैरथ वेसवारैः ॥
स्वेदं विदध्यात्कुशलस्तु नाड्या शृङ्गेन रक्तं बहुशो हरेच्च ।
वातघ्ननिर्यूहपयोऽम्लभागैः सिद्धं शताख्यं त्रिवृतं पिवेद्वा ॥
स्वेदोपनाहा मृदवस्तु पथ्याः पित्तार्व्वुदे कायविरेचनञ्च ।
विघृष्य चोडुम्बरशाकगोजीपत्रैर्भृशं क्षौद्रयुतैः प्रलिम्पेत् ॥
श्लक्ष्णीकृतैः सर्जरसप्रियङ्गुपत्तङ्गरोध्राञ्जनयष्टिकाह्वैः ।
विस्राव्य चारग्वधगोजिसोमाः श्यामा च योज्या कुशलेन लेपे ॥
श्यामागिरिह्वाञ्जनकीरसेषु द्राक्षारसे सप्तलिकारसे च ।
घृतं पिवेत्क्लीतकसंप्रसिद्धं पित्तार्वुदी तज्जठरी च जन्तुः ॥
शुद्धस्य जन्तोः कफजेऽर्वुदे तु रक्तेऽवसिक्ते तु ततोऽर्वुदं तत् ।
द्रव्याणि यान्यूर्द्धमधश्च दोषान्हरन्ति तैः कल्ककृतैः प्रदिह्यात् ॥

कपोतपारावतविड्विमिश्रैः सकांस्यनीलैः शुकलाङ्गलाख्यैः।
मूत्रैस्तु काकादनिमूलमिश्रैः क्षारप्रदिग्धैरथ वा प्रदिह्यात्॥
निष्पावपिण्याककुलत्थकल्कैर्मांसप्रगाढैर्दधिमस्तुयुक्तैः।
लेपं विदध्यात् कृमयो यथात्र मूर्च्छन्ति मूर्च्छन्त्यथ मक्षिकाश्च॥
अल्पावशिष्टे कृमिभिः कृते च लिखेत्ततोऽग्निं विदधीत पश्चात्।
यदल्पमूलं त्रपुताम्रसीसपट्टैः समावेष्ट्य तदायसैर्वा॥
क्षाराग्निशस्त्राण्यसकृद्दध्यात्प्राणानहिंसन् भिषगप्रमत्तः।
आस्फोतजातीकरवीरपत्रैः कषायमिष्टं व्रणशोधनार्थं॥
शुद्धे च तैलं विदधीत भार्गीविडङ्गपठात्रिफलाविपक्कं।
यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद्विधिज्ञः॥
मेदोऽर्बुदं स्विन्नमथो विदार्य्य विशोध्य सीव्येद्गतरक्तमाशु।
ततो हरिद्रागृहधूमरोध्रपत्तङ्गचूर्णैः समनःशिलालैः॥
व्रणं प्रतिग्राह्य मधुप्रगाढैः करञ्जतैलं विदधीत शुद्धे।
सशेषदोषाणि हि योऽर्बुदानि करोति तान्याशु पुनर्भवन्ति॥
तस्मादशेषाणि समुद्धरेत्तु हन्युः सशेषाणि यथाहि वह्निः।
संस्वेद्य गण्डं पवनोत्थमादौ नाड्यानिलघ्नौषधपत्रभङ्गैः॥
अम्लैः समूत्रैर्विविधैः पयोभिरुष्णैः सतैलैः पिशितैश्च विद्वान्।
विस्रावयेत्स्विन्नमतन्द्रितश्च शुद्धं व्रणं चाप्युपनाहयेत्तु॥
शणातसीमूलकशिग्रुकिण्वप्रियालमज्जानुयुतैस्तिलैस्तु।
कालामृताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः॥
एकैषिकाष्टचक्रतिल्वकैश्च सुराम्लपिष्टैरसकृद्दिदिह्यात्॥

तैलं पिबेच्चामृतवल्लिनिम्बहंसाह्वयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगे ॥
स्वेदोपनाहैः कफसम्भवन्तु संस्वेद्य विस्रावणमेव कुर्य्यात् ।
ततोऽजगन्धातिविषाविशल्याविषाणिकाकुष्ठशुकाह्वयाभिः ॥
पलाशभस्मोदकपेषिताभिर्दिह्यात्सगुञ्जाभिरशीतलाभिः ।
दशार्द्धसङ्ख्यैर्लवणैश्च युक्तं तैलं पिबेन्मागधिकादिसिद्धं ॥
प्रच्छर्दनं मूर्द्धविरेचनञ्च धूमश्च वैरेचनिको हितस्तु ।
पाकक्रमो वापि सदा विधेयो वैद्येन पाकं गतयोः कथञ्चित् ॥
कटुत्रिकक्षौद्रयुताः समूत्रा भक्ष्या यवान्नानि रसाश्च मौद्गाः ।
सशृङ्गवेराः सपटोलनिम्बा हिताय देया गलगण्डरोगे ॥
मेदःसमुत्थे तु यथोपदिष्टां विध्येत्सिरां स्निग्धतनोर्नरस्य ।
श्यामासुधालोहपुरीषदन्तीरसाञ्जनैश्चापि हितः प्रदेहः ॥
मूत्रेण वालोड्य हिताय सारं प्रातः पिबेच्छालमहीरुहाणां ।
शस्त्रेण वापाद्य विदार्य चैनं मेदः समुद्धृत्य हिताय सीव्येत् ॥
मज्जाज्यमेदोमधुभिर्द्दहेद्वा दग्धे च सर्पिर्मधु चावचार्य्यं ।
कासीसतुत्थे च ततोऽत्र देये चूर्णीकृते रोचनया समेते ।
तैलेन चाभ्यज्य हिताय दद्यात्सारोद्भवं गोमयजञ्च भस्म ॥
हितश्च नित्यं त्रिफलाकषायो गाढश्च बन्धो यवभोजनञ्च ॥

—

॥ एकोनविंशोऽध्यायः ॥

अथातो वृद्ध्युपदंशश्लीपदानां चिकित्सितं व्याख्यास्यामः ॥

अन्त्रवृद्धिं विना षड्भ्यो वृद्धयस्तासु वर्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहं ॥
अत्यासनं चङ्क्रमणमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ त्रैवृतस्निग्धमातुरं ॥
स्विन्नं चैनं यथान्यायं पाययेत विरेचनं ।
कोशाम्रतिल्वकैरण्डफलतैलानि वा नरं ॥
सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवं ।
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ।
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनं ॥
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्नेहोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्जयेत् ॥
भिन्द्यात्ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ।
पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ॥
पक्वां वा भेदयेद्भिन्नां शोधयेत्क्षौद्रसर्पिषा ।
शुद्धायाश्च भिषग्दद्यात्तैलं कल्कञ्च रोपणं ॥
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतं ।
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ॥

वृद्धिं कफात्मिकामुष्णैर्मूत्रपिष्टैः प्रलेपयेत् ।
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतं ॥
विम्लापनादृते वापि श्लेष्मग्रन्थिक्रमो हितः ।
पक्वायाञ्च विभिन्नायां तैलं शोधनमिष्यते ॥
सुमनारुष्करांकोठसप्तपर्णेषु साधितं ।
मेदःसमुत्थां संस्वेद्य लेपयेत्सुरसादिना ॥
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ।
स्विन्नां चावेष्ट्य पट्टेन समाश्वास्य तु मानवं ॥
रक्षेत्फले सेवनीञ्च वृद्धिपत्रेण दारयेत् ।
मेदस्ततः समुद्धृत्य दद्यात्कासीससैन्धवे ॥
बध्नीयाच्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।
मनःशिलाललवणैः सिद्धमारुष्करेषु च ॥
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन तु ॥
अथात्र द्विमुखां नाडीं दत्वा विस्रावयेद्भिषक् ।
मूत्रं नाडीमथोद्धृत्य स्थगिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्त्रहेतुकीं ।
अप्राप्तफलकोशायां वातवृद्धिक्रमो हितः ॥
तत्र या वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्त्रया ।
सम्यग्मार्गावरोधार्थं कोशप्राप्तां तु वर्ज्जयेत् ॥
त्वचं भित्त्वाङ्गुष्ठमध्ये दहेच्चाङ्गविपर्य्ययात् ।

अनेनैव विधानेन वृद्धौ वातकफात्मिके ॥
मदेहेत्प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ।
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीं ॥
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये ।
उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिनः ॥
सिरां विध्येन्मेढ्रमध्ये पातयेद्वा जलौकसः ।
हरेदुभयतश्चापि दोषानत्यर्थमुच्छ्रितान् ॥
सद्योऽपहृतदोषस्य रुक्शोफावुपशाम्यतः ।
यदि वा दुर्ब्बलो जन्तुर्नवा प्राप्तं विरेचनं ॥
निरूहेण हरेत्तस्य दोषानत्यर्थमुच्छ्रितान् ।
प्रपौण्डरीकयष्ट्याह्ववर्षाभूकुष्ठदारुभिः ॥
सरलागुरुरास्नाभिर्व्वातजं संप्रलेपयेत् ।
निचुलैरण्डबीजानि यवगोधूमसक्तवः ॥
एतैश्च वातजं स्निग्धैः सुखोष्णैः सम्प्रलेपयेत् ।
प्रपौण्डरीकपूर्ब्बैश्च द्रव्यैः सेकः प्रशस्यते ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलपयेत् ॥
पद्मोत्पलमृणालैश्च ससर्ज्जार्जुनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथ वापि सुशीतेन कषायेण वटादिना ॥

शालाश्वकर्णाजकर्णधवत्वग्भिः कफोत्थितं ।
सुरापिष्टाभिरुष्णाभिः सतैलाभिः प्रलेपयेत् ॥
रजन्यतिविषामुस्तासरलासुरदारुभिः ।
सपत्रपाठापत्तूरैरथ वा सम्प्रलेपयेत् ॥
सुरसारग्वधाद्यास्य क्वाथाभ्यां परिषेचयेत् ।
एवं संशोधनालेपसेकशोणितमोक्षणैः ॥
प्रतिकुर्य्यात्क्रियायोगैः प्राक्स्थानोक्तैर्हितैरपि ।
नायाति च यथापाकं प्रयतेत तथा भिषक् ॥
विदग्धैस्तु सिरास्नायुलङ्घ्यांसैः चीयते ध्वजः ।
शस्त्रेणोपचरेच्चापि पाकमागतमाशु वै ॥
तदापोह्य तिलैः सर्पिःक्षौद्रयुक्तैः प्रलेपयेत् ।
करवीरस्य पत्राणि जात्यारग्वधयोस्तथा ॥
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ।
सौराष्ट्रीगैरिकं तुत्थं पुष्पकासीससैन्धवं ॥
रोध्रं रसाञ्जनं दार्व्वीं हरितालं मनःशिलां ।
हरेणुकैले च तथा सूक्ष्मचूर्णानि कारयेत् ॥
तच्चूर्णं क्षौद्रसंयुक्तमुपदंशेषु पूजितं ।
जम्ब्वाम्रसुमनानिम्बश्वेताकाम्बोजिपल्लवाः ॥
शल्लकीवदरीविल्वपलाशतिनिशत्वचः ।
क्षीरिणाञ्च त्वचो योज्याः क्वाथे त्रिफलया सह ॥
तेन क्वाथेन नियतं व्रणं प्रक्षालयेद्भिषक् ।

अस्मिन्नेव कषाये तु तैलं धीरो विपाचयेत् ॥
गोजीविडङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतं ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्जिकातुत्थकासीसं शैलेयञ्च रसाञ्जनं ।
मनःशिलासमैश्चूर्णं व्रणत्रीसर्पनाशनं ॥
गुन्द्रान्दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परं ॥
मार्कवस्त्रिफलादन्ती ताम्रचूर्णमथोरजः ।
उपदंशं निहन्त्येष वृत्तमिन्द्राशनिर्यथा ॥
उपदंशद्वयेऽप्येतां प्रत्याख्यायाचरेत्क्रियां ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलं ॥
उपदंशे विशेषेण शृणु भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात्कुथितं मेहनं त्यजेत् ॥
जाम्बौष्ठेनाग्निवर्णेन पश्चाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धञ्च विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात्कल्कं तैलं हितञ्च यत् ।
स्नेहस्वेदापपन्ने तु श्लीपदेऽनिलजे भिषक् ॥
कृत्वा गुल्फोपरि सिरां विध्येत्तु चतुरङ्गुले ।
समाप्यायितदेहञ्च वस्तिभिः समुपाचरेत् ॥
मासमेरण्डजं तैलं पिवेन्मूत्रेण संयुतं ।
पयश्चोदनमश्नीयोन्नागरकथितेन च ॥

चैवृतं चोपयुञ्जीत शस्तो दाहस्तथाग्निना।
गुल्फस्याधःसिरां विध्येच्छ्लीपदे पित्तसम्भवे॥
पित्तघ्नीञ्च क्रियां कुर्य्यात् पित्तार्वुदविसर्पवत्।
सिरां सुविदितां विध्येदङ्गुष्ठे श्लैष्मिके भिषक्॥
मधुयुक्तानि वाभीक्ष्णं कषायाणि पिवेन्नरः।
पिवेद्वाप्यभयाकल्कं मूत्रेणान्यतमेन च।
कटुकामसृतां शुण्ठीं विडङ्गं दारु चित्रकं॥
हितं वा लेपने नित्यं भद्रदारु सचित्रकं॥
विडङ्गमरिचार्केषु नागरे चित्रकेऽथ वा।
भद्रदार्व्वेलुकाख्ये च सर्व्वेषु लवणेषु च॥
तैलं पक्कं पिवेद्वापि यवान्नञ्च हितं सदा।
पिवेत्सर्षपतैलं वा श्लीपदानां निवृत्तये॥
पूतीकरञ्जपत्राणां रसं वापि यथावलं।
अनेनैव विधानेन पुत्रञ्जीवकजं रसं॥
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित्।
केचुकाकन्दनिर्य्यासं लवणं लथ पाकिमं॥
रसं दत्वाथ पूर्व्वोक्तं पेयमेतद्भिषग्जितं।
काकादनीं काकजङ्घां वृहतीं कण्टकारिकां॥
कदम्बपुष्पीं मन्दारीं लम्बां शुकनसां तथा।
दग्ध्वा मूत्रेण तद्भस्म स्रावयेत्क्षारकल्पवित्॥
तत्र दद्यात्प्रतीवापं काकोडुम्बरिकारसं।

मदनाच्च फलात्क्वाथं शुकाख्याखरसं तथा ॥
एष क्षारस्तु पानीयः श्लीपदं हन्ति सेवितं।
अपचीं गलगण्डञ्च ग्रहणीदोषमेव च॥
भक्तस्यानशनं चैव हन्यात्सर्व्वविषाणि च।
एष्वेव तैलं संसिद्धं नस्याभ्यङ्गेषु पूजितं ॥
एतानेवामयान्हन्ति ये च दुष्टव्रणा नृणां।
द्रवन्तीं चिह्नतां दन्तीं नीलीं श्यामां तथैव च॥
सप्तलां शङ्खिनीं चैव दग्ध्वा मूत्रेण गालयेत्।
दद्याच्च त्रिफलाक्वाथमेष क्षारस्तु साधितः॥
अधो गच्छति पीतस्तु पूर्व्वैश्चाप्याग्निषः समाः।

---

॥ विंशतितमोऽध्यायः ॥

अथातः क्षुद्ररोगचिकित्सितं व्याख्यास्यामः॥

अत्राजगल्लिकामामां जलौकोभिरुपाचरेत्।
शुक्तिश्युगीयवक्षारकल्कैश्चालेपयेद्भिषक्॥
श्यामालाङ्गलकीपाठाकल्कैर्व्वापि विचक्षणः।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्॥
अन्धालजीं यवप्रख्यां पनसीं कच्छपी तथा।
पाषाणगर्द्दभं चैव पूर्व्वं स्वेदेन योजयेत्॥
मनःशिलातालकुष्ठदारुकल्कैः प्रलेपयेत्।
परिपाकगतान् भित्त्वा व्रणवत्समुपाचरेत्॥

विवृतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभं।
इरिविल्लां गन्धनाम्नीं कचां विस्फोटकांस्तथा॥
पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक्।
रोपयेत् सर्पिषा पक्वान् सिद्धेन मधुरौषधैः॥
चिप्पमुष्णाम्बुना सिक्तमुत्कृत्य स्रावयेद्भिषक्।
चक्रतैलेन चाभ्यज्य सर्जचूर्णेन चूर्णयेत्॥
बन्धेनोपचरेच्चैनमशक्यं चाग्निना दहेत्।
मधुरौषधसिद्धेन ततस्तैलेन रोपयेत्॥
कुनखे विधिरप्येष कार्य्योहि भिषजा भवेत्।
विदारिकां समभ्यज्य स्विन्नां विम्लाप्य लेपयेत्॥
नगवृन्तिकवर्षाभूविल्वमूलैः सुपेषितैः।
व्रणभावगतायां वा कृत्वा संशोधनक्रियां॥
रोपणार्थं हितं तैलं कषायमधुरैः शृतं।
प्रच्छानैर्वा जलौकोभिः स्राव्याऽपक्वा विदारिका॥
अजकर्णैः सपालाशैर्मूलकल्कैः प्रलेपयेत्।
पक्वां विदार्य्य शस्त्रेण पटोलपिचुमन्दयोः॥
कल्केन तिलयुक्तेन सर्पिर्मिश्रेण लेपयेत्।
बद्धा च चीरवृक्षस्य कषायैः खदिरस्य च॥
व्रणं प्रक्षालयेच्छुद्धास्ततस्तां रोपयेत्पुनः।
मेदोऽर्ब्बुदविधानेन साधयेच्छर्करार्ब्बुदं॥
कच्छूं विचर्च्चिकां पामां कुष्ठवत् समुपाचरेत्।

लेपश्च शस्यते सिक्थशताङ्कगैारसर्षपैः ॥
वचादार्व्वीसर्षपैर्व्वा तैलं वा नक्तमालजं ॥
सारतैलमथाभ्यङ्गे कुर्व्वीत कटुकैः शृतं ।
पाददार्य्यां सिरां विद्धा स्वेदाभ्यङ्गौ प्रयोजयेत् ॥
मधूच्छिष्टवसामज्जसर्ज्जचूर्णघृतैः कृतः ।
यवाक्षगौरिकोन्मिश्रैः पादलेपः प्रशस्यते ॥
पादौ सिक्तारनालेन लेपनं ह्यलसे हितं ।
कल्कीकृतैर्निम्बतिलकासीसालैः ससैन्धवैः ॥
लाक्षारसोऽभया वापि कार्य्यं स्याद्रक्तमोक्षणं ।
सिद्धं रसे कण्टकार्य्यास्तैलं वा सार्षपं हितं ॥
कासीसरोचणशिलाचूर्णैर्व्वा प्रतिसारणं ।
उद्धृत्य दग्ध्वा स्नेहेन जयेत्कदरसंज्ञकं ॥
इन्द्रलुप्ते सिरां मूर्द्ध्नि स्निग्धस्विन्नस्य मोक्षयेत् ।
कल्कैः समरिचैर्दिह्याच्छिलाकासीसतुत्थकैः ॥
कुटन्नटादारुकल्कैर्लेपनंवा प्रशस्यते ।
प्रच्छयित्वावगाढंवा गुञ्जाकल्कैर्मुहुर्मुहुः ॥
लेपयेदुपशान्त्यर्थं कुर्य्याद्वापि रसायनं ।
मालतीकरवीराग्निनक्तमालविपाचितं ।
तैलमभ्यञ्जने शस्तमिन्द्रलुप्तापहं परं ॥
अरुंषिकां हृते रक्ते सेचयेन्निम्बवारिणा ॥
दिह्यात् सैन्धवयुक्तेन वाजिविष्ठारसेन तु ।

हरितालनिशानिम्बकल्कैर्वा सपटोलजैः ॥
यष्टीनीलोत्पलैरण्डमार्कवैर्वा प्रलेपयेत्।
सिरां दारुणके विद्धा स्निग्धखिन्नस्य मूर्द्धनि ॥
अवपीडं शिरोवस्तिमभ्यङ्गञ्च प्रयोजयेत्।
चालने कोद्रवतृणचारतोयं प्रशस्यते ॥
उपरिष्टात्प्रवक्ष्यामि विधिं पलितनाशनं।
मसूरिकायां कुष्ठघ्नलेपनादिक्रिया हिता ॥
पित्तश्लेष्मविसर्पोक्ता क्रियावा संप्रशस्यते।
जतुमणिं समुत्कृत्य मशकं तिलकालकं ॥
चारेण प्रदहेद्युक्त्या वह्निना वा शनैः शनैः।
न्यच्छे व्यङ्गे सिरामोक्षो नीलिकायाञ्च शस्यते ॥
यथान्यायं यथाभ्यासं ललाट्यादिसिराव्यधः।
घृष्ट्वा दिद्यात्त्वचं पिष्ट्वा चीरिणां चीरसंयुतां ॥
बलातिबलयष्ट्याह्वरजनीर्वा प्रलेपनं।
पयस्यागुरुकालीयलेपनं वा सगैरिकं ॥
चौद्राज्ययुक्तया लिम्पेद्दंष्ट्रया शूकरस्य च।
कपित्थराजादनयोः कल्कं वा हितमुच्यते ॥
यौवने डिडकास्वेष विशेषाच्छर्द्दनं हितं।
लेपनञ्च वचारोध्रसैन्धवैः सर्षपान्वितैः ॥
कुस्तुम्बुरुवचालोध्रकुष्ठैर्वा लेपनं हितं।
पद्मिनीकण्टके रोगेच्छर्दयेन्निम्बवारिणा ॥

तेनैव सिद्धं सक्षौद्रं सर्पिः पानं प्रदापयेत्।
निम्बारग्वधयोः क्वाथो हित उत्सादने भवेत्॥
परिवृत्तिं घृताभ्यक्तां सुस्विन्नामुपनाहयेत्।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः॥
ततोऽभ्यज्य शनैश्चर्म्म चानयेत् पीडयेन्मणिं।
प्रविष्टे च मणौ चर्म्म स्वेदयेदुपनाहनैः॥
दद्यादातहरान् वस्तीन्स्निग्धान्यन्नानि भोजयेत्।
अवपाटिकां जयेदेवं यथादोषं चिकित्सकः॥
निरुद्धप्रकशे नाडीं लौहीमुभयतोमुखीं।
दारवीं वा जतुकृतां घृताभ्यक्तां प्रवेशयेत्॥
परिषेके वसामज्ज शिशुमारवराहयोः।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतं॥
त्र्यहात्त्र्यहात् स्थूलतरां सम्यङ्नाडीं प्रवेशयेत्।
स्रोतो विवर्द्धयेदेवं स्निग्धमन्नञ्च भोजयेत्॥
भित्त्वा वा सेवनीं मुक्त्वा सद्यः क्षतवदाचरेत्।
सन्निरुद्धगुदं रोगं वल्मीकं वह्निरोहिणीं॥
प्रत्याख्याय यथायोगं चिकित्सितमथाचरेत्।
विसर्पोक्तेन विधिना साधयेदग्निरोहिणीं॥
संनिरुद्धगुदे योज्या निरुद्धप्रकशक्रिया।
शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत्।
विधानेनार्वुदोक्तेन शोधयित्वा च रोपयेत्॥

वल्मीकन्तु भवेद्यस्य नातिवृद्धममर्म्मजं ॥
तत्र संशोधनं कृत्वा शोणितं मोचयेद्भिषक् ।
कुलत्थिकाया मूलैश्च गुडूच्या लवणेन च ॥
आरेवतस्य मूलैश्च दन्तीमूलैस्तथैव च ।
श्यामामूलैः सपललैः शक्तुमिश्रैः प्रलेपयेत् ॥
सुस्निग्धैश्च सुखोष्णैश्च भिषक्तमुपनाहयेत् ।
पक्कं वा तद्विजानीयाद्गतीः सर्व्वा यथाक्रमं ॥
अभिज्ञाय ततश्छित्त्वा प्रदहेन्मतिमान्भिषक् ।
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ॥
व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान्भिषक् ।
सुमना ग्रन्थयश्चैव भल्लातकमनःशिले ॥
कालानुसारी सूक्ष्मैला चन्दनागुरुणी तथा ।
एतैः सिद्धं निम्बतैलं वल्मीके रोपणं हितं ॥
पाणिपादोपरिष्टात्तु च्छिद्रैर्व्वहुभिरावृतं ।
वल्मीकं यत्सशोफं स्यादसाध्यं तत्तु विजानता ॥
धात्र्याःस्तन्यं शोधयित्वा वाले साध्याहिपूतना ।
पटोलपत्रत्रिफलारसाञ्जनविपाचितं ॥
पीतं घृतं नाशयति कृच्छ्रामप्यहिपूतनां ।
त्रिफलाकोलखदिरकषायं व्रणरोपणं ॥
कासीसरोचनातुत्थहरितालरसाञ्जनैः ।
लेपोऽम्लपिष्टो वदरीत्वग्वा सैन्धवसंयुता ॥

कपालतुल्यजं चूर्णं चूर्णकाले प्रयोजयेत्।
चिकित्सन्मुष्ककच्छूञ्चाप्यहिपूतनपानवत्॥
गुदभ्रंशे गुदं खिन्नं स्नेहाभ्यक्तं प्रवेशयेत्।
कारयेद्गोफणाबन्धं मध्यच्छिद्रेण चर्म्मणा॥
विनिर्गमार्थं वायोश्च स्वेदयेच्च मुहुर्मुहुः।
क्षीरं महापञ्चमूलं मूषिकां चान्त्रवर्जितां॥
ततस्तस्मिन् पचेत्तैलं वातघ्नौषधसंयुतं।
गुदभ्रंशमिदं कृच्छ्रं पानाभ्यङ्गात् प्रसाधयेत्॥

---

## ॥ एकविंशतितमोऽध्यायः॥

अथातः शूकरोगचिकित्सितं व्याख्यास्यामः॥

संलिख्य सर्षपीं सम्यक् कषायैरवचूर्णयेत्।
कषायेष्वेव तैलञ्च कुर्व्वीत व्रणरोपणं॥
अष्ठीलिकाञ्जलौकोभिर्ग्राहयेत् कुशलो भिषक्।
तथाचानुपशाम्यन्तीं कफग्रन्थिवदुद्धरेत्॥
स्वेदयेद्ग्रथितं शश्वन्नाडीस्वेदेन बुद्धिमान्।
सुखोष्णैरुपनाहैश्च सुस्निग्धैरुपनाहयेत्॥
कुम्भीकां पाकमापन्नां भिन्द्याच्छुद्धां तु रोपयेत्।
तैलेन त्रिफलालोध्रतिन्दुकाम्रातकेन तु॥
ग्राहयित्वा जलौकोभिरलजीं सेचयेत्ततः।

कषायैस्त्रिषु सिद्धञ्च तैलं रोपणमिष्यते॥
बलातैलेन कोष्णेन मृदितं परिषेचयेत्।
मधुरैः सर्पिषा स्निग्धैः सुखोष्णैरुपनाहयेत्।
संमूढपिडकां चिप्रं जलौकोभिरुपाचरेत्।
भित्त्वा पर्य्यागतां चापि लेपयेत् चौद्रसर्पिषा॥
अवमन्थे गते पाकं भिन्ने तैलं विधीयते।
धवाश्वकर्णपत्तङ्गसल्लकीतिन्दुकीकृतं॥
क्रियां पुष्करिकायान्तु शीतां सर्व्वां प्रयोजयेत्।
जलौकोभिर्हरेच्चास्रुक्सर्पिषा चावसेचयेत्॥
स्पर्शहान्यां हरेद्रक्तं प्रदिह्यान्मधुरैरपि।
चीरेचुरससर्पिर्भिः सेचयेच्च सुशीतलैः॥
पिडकामुत्तमाख्याञ्च बडिशेनोद्धरेद्भिषक्।
उद्धृत्य मधुसंयुक्तैः कषायैरवचूर्णयेत्॥
रसक्रिया विधातव्या लिखिते शतपोनके।
पृथक्पर्ण्यादिसिद्धञ्च देयं तैलमनन्तरं॥
क्रियां कुर्य्याद्भिषक् प्राज्ञस्त्वक्पाकस्य विसर्पवत्।
रक्तविद्रधिवच्चापि क्रिया शोणितजेऽर्व्वुदे॥
कषायकल्कसर्पींषि तैलं चूर्णं रसक्रिया।
शोधनं रोपणञ्चैव वीक्ष्य वीक्ष्यावचारयेत्॥
यथास्वं सर्पिषः पानं पथ्यञ्चापि विरेचनं।
हितः शोणितमोचश्च यच्चापि लघु भोजनं॥

अर्बुदं मांसपाकञ्च विद्रधिं तिलकालकं।
प्रत्याख्याय प्रकुर्व्वीत भिषक् सम्यक्प्रतिक्रियां ॥

---

## ॥ द्वाविंशतितमोऽध्यायः ॥

अथातो मुखरोगाणां चिकित्सितं व्याख्यास्यामः ॥

चतुर्व्विधेन स्नेहेन मधूच्छिष्टयुतेन च।
वातजेऽभ्यञ्जनं कुर्य्यान्नाडीस्वेदञ्च बुद्धिमान् ॥
मतिमानोष्ठकोपे तु शाल्वणं चोपनाहने।
मस्तिष्के चैव नस्ये च तैलं वातहरं हितं ॥
श्रीवेष्टकं सर्जरसं सुरदारु सगुग्गुलु।
यष्टीमधुकचूर्णन्तु विदध्यात्प्रतिसारणं ॥
पित्तरक्ताभिघातोत्थं जलौकोभिरुपाचरेत्।
पित्तविद्रधिवच्चापि क्रियां कुर्य्यादशेषतः ॥
शिरोविरेचनं धूमः स्वेदः कवल एव च।
हृते रक्ते प्रयोक्तव्यमोष्ठकोपे कफात्मके ॥
व्यूषणं स्वर्जिकाक्षारो यवक्षारो विडं तथा।
क्षौद्रयुक्तं विधातव्यमेतच्च प्रतिसारणं ॥
मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हितः।
प्रियङ्गुत्रिफलारोध्रं सक्षौद्रं प्रतिसारणं ॥
एतद्दोषप्रकोपानां साध्यानां कर्म्म कीर्त्तितं।
दन्तमूलगतानान्तु रोगाणां कर्म्म वक्ष्यते ॥

शीतादे हृतरक्ते तु तोये नागरसर्षपान् ।
निःक्वाथ्य त्रिफलामुस्तं गण्डूषः सरसाञ्जनः ॥
प्रियङ्गवश्च मुस्तञ्च त्रिफला च प्रलेपनं ।
नस्यञ्च त्रिफलासिद्धं मधुकोत्पलपद्मकैः ॥
दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणं ।
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणं ॥
हितः शिरोविरेकश्च नस्यं स्निग्धञ्च भोजनं ।
विस्राविते दन्तवेष्टे व्रणांस्तु प्रतिसारयेत् ॥
रोध्रपत्तङ्गयष्ट्याह्वलाक्षाचूर्णैर्मधूत्तरैः ।
गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ॥
काकोल्यादौ दशक्षीरसिद्धं सर्पिश्च नस्यतः ।
शौषिरे हृतरक्ते तु रोध्रमुस्तरसाञ्जनैः ॥
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ।
सारिवोत्पलयष्ट्याह्वसावरागुरुचन्दनैः ॥
क्षीरे दशगुणे सिद्धं सर्पिर्नस्ये च पूजितं ।
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ॥
संशोध्योभयतः कार्य्यं शिरश्चोपकुशे तथा ।
काकोडुम्बरिकागोजीपत्रैर्विस्रावयेदसृक् ॥
क्षौद्रयुक्तैश्च लवणैः सव्योषैः प्रतिसारयेत् ।
पिप्पलीसर्षपांश्चैव नागरं नैचुलं फलं ॥
सुखोदकेन संसृष्टं कवलं चापि धारयेत् ।

घृतं मधुरकैः सिद्धं हितं कवलनस्ययोः ॥
शस्त्रेण दन्तवैदर्भे दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
कृमिदन्तकवच्चापि विधिः कार्य्यो विजानता ॥
छित्त्वाधिमांसं सक्षौद्रैरेभिश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठासर्जिकायावशूकजैः ॥
क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र कीर्त्तितः ।
पटोलत्रिफलानिम्बकषायश्चात्र धावने ॥
हितः शिरोविरेकश्च धूमो वैरेचनश्च यः ।
सामान्यं कर्म नाडीनां विशेषं चात्र मे शृणु ॥
यन्दन्तमधिजायेत नाडी तं दन्तमुद्धरेत् ।
छित्त्वा मांसानि शस्त्रेण यदि नोपरिजो भवेत् ॥
शोधयित्वा दहेद्वापि क्षारेण ज्वलनेन वा ।
भिनत्त्युपेक्षिते दन्ते हनुकास्थिगतिर्ध्रुवं ॥
समूलं दशनं तस्मादुद्धरेद्भग्नमस्थि च ।
उद्धृतेऽत्तरे दन्ते समूले स्थिरबन्धने ॥
रक्तातियोगात्पूर्व्वोक्ता रोगा घोरा भवन्ति हि ।
काणः सञ्जायते जन्तुरर्दितं चास्य जायते ॥
चलमप्युत्तरं दन्तमतो नापहरेद्भिषक् ।
धावने जातिमदनस्वादुकण्टकखादिरं ॥

कषायं जातिमदनकटुकस्वादुकण्टकैः ।
यष्ट्याह्वरोध्रमञ्जिष्ठाखदिरैश्चापि यत्कृतं ॥
तैलं संशोधनं तद्धि हन्याद्दन्तगतां गतिं ।
कीर्त्तिता दन्तमूले तु क्रिया दन्तेषु वक्ष्यते ॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य वा ।
निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः ॥
स्नैहिकश्च हितो धूमो नस्यं स्निग्धञ्च भोजनं ।
रसो रसयवाग्व्यश्च क्षीरं सन्तानिका घृतं ।
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः ॥
अहिंसन्दन्तमूलानि शर्करामुद्धरेद्भिषक् ।
लाक्षाचूर्णैर्मधुयुतैस्ततस्ताः प्रतिसारयेत् ॥
दन्तहर्षक्रिया वापि कुर्य्यान्निरवशेषतः ।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥
जयेद्विस्रावणैः स्विन्नमचलं कृमिदन्तकं ।
तथावपीडैर्व्वातघ्नैः स्नेहगण्डूषधारणैः ॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः ।
चलमुद्धृत्य च स्थानं विदहेच्छुषिरस्य च ॥
ततो विदारीयष्ट्याह्वशृङ्गाटककसेरुकैः ।
तैलं दशगुणे क्षीरे सिद्धं नस्ये हितं भवेत् ॥
हनुमोक्षे समुद्दिष्टां कुर्य्याच्चार्द्दितवत्क्रियां ।
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनं ॥

तथातिकठिनान्भक्ष्यान्दन्तरोगी विवर्ज्जयेत् ।
साध्यानां दन्तरोगाणां चिकित्सितमुदीरितं ॥
जिह्वागतानां साध्यानां कर्म्म वक्ष्यामि सिद्धये ।
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितं ॥
कण्टकेष्वनिलोत्थेषु तत्कार्य्यं भिषजा भवेत् ।
पित्तजेषु विघृष्टेषु निःसृते दुष्टशोणिते ॥
प्रतिसारणगण्डूषं नस्यञ्च मधुरं हितं ।
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये ॥
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ।
गृह्णीयात्कवलांश्चापि गौरसर्षपसैन्धवैः ॥
पटोलनिम्ववार्त्ताकुक्षारयूषैश्च भोजयेत् ।
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ॥
शिरोविरेकगण्डूषधूमैश्चैनमुपाचरेत् ।
जिह्वागतानां कर्म्मोक्तं तालव्यानां प्रवक्ष्यते ॥
अङ्गुष्ठाङ्गुलिसन्दंशेनाकृष्य गलशुण्डिकां ।
छेदयेन्मण्डलाग्रेण जिह्वोपरि तु संस्थितां ॥
नोत्कृष्टञ्चैव हीनञ्च त्रिभागं छेदयेद्भिषक् ।
अत्यादानात्स्रवेद्रक्तं तन्निमित्तं म्रियेत च ॥
हीनच्छेदाद्भवेच्छोफो लालानिद्राभ्रमस्तमः ।
तस्माद्वैद्यः प्रयत्नेन दृष्टकर्म्मा विशारदः ॥
गलशुण्डीन्तु संच्छिद्य कुर्य्यात्प्राप्तमिमं क्रमं ।

मरिचातिविषापाठावचाकुष्ठकुटन्नटैः ॥
क्षौद्रयुक्तैः सलवणैस्ततस्तां प्रतिसारयेत् ।
वचामतिविषां पाठां रास्नां कटुकरोहिणीं ॥
निःक्वाथ्य पिचुमन्दञ्च कवलं तत्र योजयेत् ।
इङ्गुदीकिणिहीदन्तीसरलासुरदारुभिः ॥
पश्चाङ्गीङ्कारयेत्पिष्टैर्वर्त्तिं गन्धोत्तरां शुभां ।
ततो धूमं पिवेज्जन्तुर्हृतरक्तः कफनाशनं ॥
क्षारसिद्धेषु मुद्गेषु यूषश्चाप्यशने हितः ।
तुण्डिकेर्य्यध्रुषे कूर्म्मे सङ्घाते तालुपुप्पुटे ॥
एष एव विधिः कार्य्यो विशेषः शस्त्रकर्म्मणि ।
तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनं ॥
स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ।
कीर्त्तितं तालुजानान्तु कण्ठ्यानां कर्म्म वक्ष्यते ॥
साध्यानां रोहिणीनान्तु हितं शोणितमोक्षणं ।
छर्दनं धूमपानञ्च गण्डूषो नस्यकर्म च ॥
वातिकीन्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान्स्नेहगण्डूषान्धारयेच्चाप्यभीक्ष्णशः ॥
पत्तङ्गशर्कराक्षौद्रैः पैत्तिकीं प्रतिसारयेत् ।
द्राक्षापरूषकक्वाथौ हितौ च कवलग्रहे ॥
आगारधूमकटुकैः श्लैष्मिकीं प्रतिसारयेत् ।
श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवं ॥

नस्यकर्म्मणि योक्तव्यं तथा कवलधारणे।
पित्तवत्साधयेद्वैद्यो रोहिणीं रक्तसम्भवां॥
विस्राव्य कण्टशालूकं साधयेत्तुण्डिकेरिवत्।
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः॥
उपजिह्विकवच्चापि साधयेदधिजिह्विकां।
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत्॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत्।
अमर्म्मस्थं सुपक्वञ्च भेदयेद्गलविद्रधिं॥
वातात्सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत्।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः॥
ततोऽस्मै स्नैहिकं धूममिमं दद्याद्विचक्षणः।
शालराजादनैरण्डसारेङ्गुदिमधूकजाः॥
मज्जानो गुग्गुलुध्याममांसीकालानुसारिवाः।
श्रीसर्जरसशैलेयमधूच्छिष्टानि वाहरेत्॥
तत्सर्व्वं सुकृतं चूर्णं स्नेहेनालोड्य युक्तितः।
टुण्टूकवृन्तं सचीद्रं मतिमांस्तेन लेपयेत्॥
एष सर्व्वसरे धूमः प्रशस्तः स्नैहिको मतः।
कफघ्नो मारुतघ्नश्च मुखरोगविनाशनः॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः।
सर्व्वः पित्तहरः कार्य्यो विधिर्मधुरशीतलः॥
प्रतिसारणगण्डूषधूमसंशोधनानि च।

कफात्मके सर्व्वसरे विधिं कुर्य्यात्कफापहं ॥
पिबेदतिविषां पाठां मुस्तञ्च सुरदारु च ।
रोहिणीं कटुकाख्याञ्च कुटजस्य फलानि च ॥
गवां मूत्रेण मनुजो भागैर्धरणसम्मितैः ।
एष सर्व्वान्कफकृतान्रोगान्योगोऽपकर्षति ॥
क्षीरेक्षुरसगोमूत्रदधिमस्त्वम्लकाञ्जिकैः ।
विदध्यात्कवलान्वीक्ष्य दोषं तैलघृतैरपि ।
रोगाणां मुखजातानां साध्यानां कर्म्म कीर्त्तितं ॥
असाध्या अपि वक्ष्यन्ते रोगा ये यत्र कीर्त्तिताः ।
ओष्ठप्रकोपा वर्ज्याः स्युर्मांसरक्तत्रिदोषजाः ॥
दन्तमूलेषु वर्ज्यौ तु त्रिलिङ्गगतिशौषिरौ ।
दन्तेषु च न सिध्यन्ति श्यावदालनभञ्जनाः ॥
जिह्वागतेष्वलासस्तु तालव्येष्वर्ब्बुदं तथा ।
स्वरघ्नो बलयो वृन्दो बलासश्च विदारिका ॥
गलौघो मांसतानश्च शतघ्नी रोहिणी गले ।
असाध्याः कीर्त्तिता ह्येते रोगा नव दशैव च ।
तेषां चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥

---

॥ त्रयोविंशतितमोऽध्यायः ॥

अथातः शोफानां चिकित्सितं व्याख्यास्यामः ॥

षड्विधोऽवयवसमुत्थः शोफोऽभिहितो लक्षणतः प्रतीकारतश्च

सर्व्वसरस्तु पञ्चविधः ॥ तद्यथा ॥ वातपित्तश्लेष्मसन्निपातविषनिमित्तः ॥ तत्रापि तर्पितस्याध्वगमनादतिमात्रमभ्यवहरतो वा पिष्टान्नहरितकशाकलवणानि क्षीणस्य वातिमात्रमम्लमुपसेवमानस्य मृत्पङ्कलोष्टकटशर्करानूपौदकमांससेवनादजीर्णिनो वा ग्राम्यधर्म्मसेवनाद्विरुद्धाहारसेवनाद्धस्त्यश्वोष्ट्ररथपदातिसङ्क्षोभणाद्दोषा धातून्प्रदूष्य श्वयथुमापादयन्त्यखिले शरीरे ॥

तत्र वातश्वयथुररुणः कृष्णो वा मृदुरनवस्थितस्तोदादयश्चात्र वेदनाविशेषाः ॥

पित्तश्वयथुः पीतो रक्तो वा शीघ्रानुसार्य्योषचोषादयश्चात्र वेदनाविशेषाः ॥

श्लेष्मश्वयथुः पाण्डुः शुक्लोवा स्निग्धः कठिनः शीतो मन्दानुसारी कण्ड्वादयश्चात्र वेदनाविशेषाः ॥

सन्निपातश्वयथुः सर्व्ववर्णवेदनः ॥

विषनिमित्तस्तु गरोपयोगाद्दुष्टतोयसेवनात्प्रकोथोदकावगाहनात्सविषसलदिग्धचूर्णेनावचूर्णनाद्वा सविषमूत्रपुरीषशुक्रस्पृष्टानां तृणकाष्ठादीनां संस्पर्शनात् स तु मृदुः चिप्रोत्थानोऽवलम्बी चलो वा दाहपाकप्रायश्च भवति ॥

भवन्ति चात्र ॥ दोषाः श्वयथुमूर्द्धं हि कुर्व्वन्त्यामाशयस्थिताः ।
पक्वाशयस्था मध्ये च वर्च्चःस्थानगतास्त्वधः ॥
कृत्स्नं देहमनुप्राप्ताः कुर्य्युः सर्व्वसरं तथा ।
श्वयथुर्मध्यदेशे यः स कष्टः सर्व्वगश्च यः ॥

अर्द्धाङ्गेऽरिष्टभूतस्य यस्योर्द्धं परिसर्पति ।
श्वासः पिपासा दौर्ब्बल्यं ज्वरश्छर्दिररोचकः ॥
हिक्कातीसारकासश्च शूनं सङ्कपयन्ति हि ।
सामान्यतो विशेषाच्च तेषां वक्ष्यामि भेषजं ॥

शोफिनः सर्व्व एव परिहरेयुरम्ललवणदधिगुडवसापयस्तैल घृतपिष्टमयगुरूणि ॥

तत्र वातश्वयथौ त्रैवृतमैरण्डतैलं वा मासमर्द्धमासं वा पाययेत् । न्यग्रोधादिककषायसिद्धं सर्पिः पित्तश्वयथौ । आरग्वधादिसिद्धं श्लेष्मश्वयथौ । सन्निपातश्वयथौ सुहीक्षीरपात्रं द्वादशभिरम्लपात्रैः प्रतिसंसृष्टं दन्तीप्रतिवापं सर्पिः पाचयित्वा पाययेत् । विषनिमित्ते कल्पेषु प्रतीकारः ॥

अथातः सामान्यचिकित्सितं व्याख्यास्यामः ॥

तिल्वकघृतचतुर्थानि यान्युक्तान्युदरेषु तु ततोऽन्यतममुपयुज्यमानं श्वयथुमपहन्ति । मूत्रवर्त्तिक्रियां वा सेवयेत् । नवायसं वाहरहर्मधुना । विडङ्गातिविषाकुटजफलभद्रदारुनागरमरिचचूर्णं वा धरणमुष्णाम्बुना । त्रिकटुक्षारायश्चूर्णानि वा त्रिफलाकषायेण मूत्रं वा तुल्यक्षीरं हरितकीं वा तुल्यगुडामुपयुञ्जीत । देवदारु शुण्ठीं वा गुग्गुलुं वा मूत्रेण वर्षाभूकषायानुपानं वा तुल्यगुडं शृङ्गवेरं वा वर्षाभूकषायं मूलकल्कं वा सशृङ्गवेरं पयोऽनुपानमहरहर्मासं । व्योषवर्षाभूकषायसिद्धेन वा सर्पिषा मुद्गोलुम्बान्भचयेत् ॥ पिप्पलीपिप्पलीमूलं चव्यचित्रकमयूरवर्षाभूसिद्धं वा क्षीरं

पिबेत्। महौषधमुरङ्गीमूलसिद्धं वा। त्रिकटुकैरण्डमूलश्यामामूलसिद्धं वा। वर्षाभूशृङ्गवेरमहादेवदारुसिद्धं वा तथालाबूविभीतकफलकल्कं वा तण्डुलाम्बुना ॥

क्षारपिप्पलीमरिचशृङ्गवेरानुसिद्धेन च मुद्गयूषेणालवणेनाल्पस्नेहेन भोजयेद्यवान्नं गोधूमान्नं वा वृषकार्कनक्तमालनिम्बवर्षाभूक्वाथैश्च परिषेकः सर्षपसौवर्चलसैन्धवशार्ङ्गेष्टाभिश्च प्रदेहः कार्य्यः। यथादोषञ्च विरेचनास्थापनानि तीक्ष्णान्यजस्रमुपसेवेत स्नेहस्वेदोपनाहांश्च सिराभिश्चाभीक्ष्णं शोणितमवसेचयेदन्यत्रोपद्रवशोफादिति ॥

॥ भवति चात्र ॥

पिष्टान्नमम्लं लवणानि मद्यं मृदं दिवास्वप्नमजाङ्गलञ्च ।
स्त्रियो घृतं तैलपयोगुरूणि शोफं जिघांसुः परिवर्जयेत्तु ॥

---

## ॥ चतुर्विंशतितमोऽध्यायः ॥

अथातोऽनागताबाधप्रतिषेधनीयं चिकित्सितं व्याख्यास्यामः ॥

उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता ।
धीमता यदनुष्ठेयं तत्सर्वं सम्प्रवक्ष्यते ॥
तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतं ।
कनिष्ठिकापरीणाहमृज्वग्रथितमव्रणं ॥
अयुग्मग्रन्थि यच्चापि प्रत्यग्रं शस्तभूमिजं ।
अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत् ॥

कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः ।
निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा ॥
मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा ।
क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च ॥
चूर्णेन तेजोवत्याश्च दन्तान्नित्यं विशोधयेत् ।
एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च ॥
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ॥
तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति ।
वैशद्यमन्नाभिरुचिं सौमनस्यं करोति च ॥
न खादेद्गलताल्वोष्ठजिह्वारोगसमुद्भवे ।
अथास्यपाके श्वासे च कासहिक्कावमीषु च ॥
दुर्ब्बलो जीर्णभक्तश्च मूर्च्छार्त्तो मदपीडितः ।
शिरोरुगार्त्तस्तृषितः श्रान्तः पानक्लमान्वितः ॥
अर्द्दिती कर्णशूली च दन्तरोगी च मानवः ।
जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च ॥
तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलं ।
मुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं सुखं ॥
दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणं ।
क्षीरवृक्षकषायैर्व्वा क्षीरेण च विमिश्रितैः ॥
भिल्लोदककषायेण तथैवामलकस्य वा ।
प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा ॥

निलीकां मुखशोषञ्च पिडकां व्यङ्गमेव च ।
रक्तपित्तकृतान् रोगान्सद्य एव विनाशयेत् ॥
सुखं लघु निरीक्षेत दृढं पश्यति चक्षुषा ।
मतं श्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भव ॥
दाहकण्डूमलघ्नञ्च दृष्टिक्लेदरुजापहं ।
अक्ष्णोरूपावहञ्चैव सहते मारुतातपौ ॥
न नेत्ररोगा जायन्ते तस्मादञ्जनमाचरेत् ।
भुक्तवान् शिरसा स्नातः श्रान्तश्छर्दनवाहनैः ॥
रात्रौ जागरितश्चापि नाञ्ज्याज्ज्वरित एव च ।
कर्पूरजातिकक्कोललवङ्गकटुकाक्वयैः ॥
सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभं ।
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकं ॥
हनुदन्तस्वरमलजिह्वेन्द्रियविशोधनं ।
प्रसेकशमनं हृद्यं गलामयविनाशनं ॥
पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे ।
रक्तपित्तक्षतक्षीणतृष्णामूर्च्छापरीतिनां ॥
रूक्षदुर्ब्बलमर्त्यानां न हितं चास्यशोषिणां ।
शिरोगतांस्तथा रोगाञ्छिरोऽभ्यङ्गोऽपकर्षति ॥
केशानां मार्द्दवं दैर्घ्यं बहुलं स्निग्धकृष्णतां ।
करोति शिरसस्तृप्तिं सुलक्कमपि चाननं ॥
सन्तर्पणं चेन्द्रियाणां शिरसः प्रतिपूरणं ।

मधुकं क्षीरशुक्ला च सरलं देवदारु च ॥
क्षुद्रकं पञ्चनामानं समभागानि संहरेत्।
तेषां कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ॥
सदैव शीतलं जन्तोर्मूर्द्ध्नि तैलं प्रदापयेत्।
केशप्रसाधनी केश्या रजोजन्तुमलापहा ॥
हनुमन्याशिरःकर्णशूलघ्नं कर्णपूरणं।
अभ्यङ्गो मार्दवकरः कफवातनिरोधनः ॥
धातूनां पुष्टिजननो मृजावर्णबलप्रदः।
सेकः श्रमघ्नोऽनिलहृद्भग्नसन्धिप्रसाधकः ॥
क्षताग्निदग्धाभिहतविघृष्टानां रुजापहः।
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः ॥
तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते।
सिरामुखैरोमकूपैर्धमनीभिश्च तर्पयन् ॥
शरीरबलमाधत्ते युक्तस्नेहो ऽवगाहने।
तत्र प्रकृतिसात्म्यर्त्तुदेशदोषविकारवित् ॥
तैलं घृतं वा मतिमान्युञ्ज्यादभ्यङ्गसेकयोः।
केवलं सामदोषेषु न कथञ्चन योजयेत् ॥
तरुणज्वर्य्यजीर्णी च नाभ्यक्तव्यौ कथञ्चन।
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ॥
पूर्व्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा।
शेषाणां तदहः प्रोक्ता अग्निमान्द्यादयोगदाः ॥

सन्तर्पणसमुत्थानां रोगाणां नैव कारयेत् ।
शरीरायासजननं कर्म्म व्यायामसंज्ञितं ॥
तत्कृत्वा तु सुखं देहं विमृद्नीयात्समन्ततः ।
शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ॥
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा ।
श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता ॥
आरोग्यं चापि परमं व्यायामादुपजायते ।
न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणं ॥
नच व्यायामिनं मर्त्त्यमर्द्दयन्त्यरयो भयात् ।
नचैनं सहसाक्रम्य जरा समधिरोहति ॥
स्थिरीभवति मांसञ्च व्यायामाभिरतस्य च ।
व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्त्तितस्य च ॥
व्याधयो नोपसर्पन्ति सिंहं क्षुद्रमृगा इव ।
वयोरूपगुणैर्हीनमपि कुर्य्यात्सुदर्शनं ॥
व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनं ।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते ॥
व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनां ।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥
सर्व्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः ।
बलस्यार्द्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा ॥
हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते ।

व्यायामं कुर्वतो जन्तोस्तद्बलार्द्धस्य लक्षणं ॥
वयोबलशरीराणि देशकालाशनानि च ।
समीक्ष्य कुर्य्याद्व्यायाममन्यथा रोगमाप्नुयात् ॥
क्षयस्तृष्णारुचिच्छर्दिरक्तपित्तभ्रमक्लमाः ।
कासशोषज्वरश्वासा अतिव्यायामसम्भवाः ॥
रक्तपित्ती कृशः शोषी श्वासकासक्षतातुरः ।
भुक्तवान्स्त्रीषु च क्षीणो भ्रमार्त्तश्च विवर्ज्जयेत् ॥
उद्वर्त्तनं वातहरं कफमेदोविलापनं ।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परं ॥
सिरामुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनं ।
उद्घर्षणोत्सादनाभ्यां जायेयातामसंशयं ॥
उत्सादनाद्भवेत्स्त्रीणां विशेषात्कान्तिमद्वपुः ।
प्रहर्षसौभाग्यमृजालाघवादिगुणान्वितं ॥
उद्घर्षणन्तु विज्ञेयं कण्डूकोठानिलापहं ।
ऊर्व्वोः सञ्जनयत्याशु फेनकः स्थैर्य्यलाघवे ॥
कण्डूकोठानिलस्तम्भमलरोगापहश्च सः ।
तेजनं त्वग्गतस्याग्नेः सिरामुखविरेचनं ॥
उद्घर्षणन्त्विष्टिकया कण्डूकोठविनाशनं ।
निद्रादाहश्रमहरं स्वेदकण्डूतृषापहं ॥
हृद्यं मलहरं श्रेष्ठं सर्व्वेन्द्रियविशोधनं ।
तन्द्रापापोपशमनं तुष्टिदं पुंस्त्ववर्द्धनं ॥

रक्तप्रसादनं चापि स्नानमग्नेश्च दीपनं।
उष्णेन शिरसः स्नानमहितश्चक्षुषः सदा ॥
शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत्।
श्लेष्ममारुतकोपेतु ज्ञात्वा व्याधिबलाबलं॥
काममुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत्।
अतिशीताम्बुशीते च श्लेष्ममारुतकोपनं॥
अत्युष्णमुष्णकाले च पित्तशोणितवर्द्धनं।
तच्चातिसारज्वरितकर्णशूलानिलार्त्तिषु ॥
आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितं।
सौभाग्यदं वर्णकरं प्रीत्योजोबलवर्द्धनं॥
स्वेददौर्गन्ध्यवैवर्ण्यश्रमघ्नमनुलेपनं।
स्नानं येषां निषिद्धन्तु तेषामप्यनुलेपनं॥
रक्षोघ्नमथ चौजस्यं सौभाग्यकरमुत्तमं।
सुमनोऽम्बररत्नानां धारणं प्रीतिवर्द्धनं॥
मुखालेपाद्दृढं चक्षुःपीनगण्डं तथाननं।
अव्यङ्गपिडकं कान्तं भवत्यम्बुजसन्निभं॥
पक्ष्मलं विशदं कान्तममलोज्ज्वलमण्डलं।
नेत्रमञ्जनसंयोगाद्भवेच्चामलतारकं॥
यशस्यं स्वर्ग्यमायुष्यं धनधान्यविवर्द्धनं।
देवतातिथिविप्राणां पूजनं गोत्रवर्द्धनं॥
आहारः प्रीणनः सद्योबलकृद्देहधारकः।

आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः ॥
पादप्रचालनं पादमलरोगश्रमापहं ।
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनं ॥
निद्राकरो देहसुखश्चक्षुष्यः श्रमसुप्तिनुत् ।
पादत्वङ्मृदुकारी च पादाभ्यङ्गः सदा हितः ॥
पादरोगहरं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनं ।
सुखप्रचारमौजस्यं सदापादत्रधारणं ॥
अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत ।
पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणां ॥
पापोपशमनं केशनखरोमापमार्ज्जनं ।
हर्षलाघवसौभाग्यकरमुत्साहवर्द्धनं ॥
वाणवारं मृजावर्णतेजोबलविवर्द्धनं ।
पवित्रं केश्यमुष्णीषं वातातपरजोऽपहं ॥
वर्षानिलरजोघर्महिमादीनां निवारणं ।
वर्ण्यं चक्षुष्यमौजस्यं शङ्करं छत्रधारणं ॥
श्वुनः सरीसृपव्यालविषाणिभ्यो भयापहं ।
श्रमस्खलनदोषघ्नं स्थविरेच प्रशस्यते ॥
सत्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनं ।
अवष्टम्भकरश्चापि भयघ्नं दण्डधारणं ॥
आस्या वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा ।
अध्वा वर्णकफस्थौल्यसौकुमार्य्यविनाशनः ।

अत्यध्वा विपरीतोऽस्माज्जरादौर्ब्बल्यकृच्च सः ॥
यत्तु चंक्रमणं नातिदेहपीडाकरं भवेत्।
तदायुर्ब्बलमेधाग्निप्रदमिन्द्रियबोधनं॥
श्रमानिलहरं वृष्यं पुष्टिनिद्राधृतिप्रदं ।
सुखं शय्यासनं दुःखं विपरीतगुणं मतं॥
बालव्यजनमौजस्यं मक्षिकादीनपोहति।
शोषदाहश्रमस्वेदमूर्च्छाघ्नो व्यजनानिलः॥
प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहं।
संवाहनं मांसरक्तत्वक्प्रसादकरं सुखं॥
प्रवातं रौक्ष्यवैवर्ण्यस्तम्भकृद्दाहपक्तिनुत्।
स्वेदमूर्च्छापिपासाघ्नमप्रवातमतोऽन्यथा॥
सुखं वातं प्रसेवेत ग्रीष्मे शरदि मानवः ।
निवातं ह्यायुषे सेव्यमारोग्याय च सर्व्वदा॥
आतपः पित्ततृष्णाग्निस्वेदमूर्च्छाभ्रमास्रकृत्।
दाहवैवर्ण्यकारी च छाया चैतानपोहति॥
अग्निर्व्वातकफस्तम्भशीतवेपथुनाशनः।
आमाभिष्यन्दजरणो रक्तपित्तप्रदूषणः॥
पुष्टिवर्णबलोत्साहमग्निदीप्तिमतन्द्रितां।
करोति धातुसाम्यञ्च निद्रा काले निषेविता॥

तत्रादित एव नीचनखरोम्णा शुचिना शुक्लवाससा लघूष्णीष च्छत्रोपानत्केन दण्डपाणिना काले हितमितमधुरपूर्व्वाभिभा

षिणा बन्धुभूतेन भूतानान्तु गुरुवृद्धानुमतेन सुसहायेनानन्यमनसा खल्पचरितव्यं तदपि न रात्रौ न केशास्थिकण्टकाश्मतुषभस्मोत्करकपालाङ्गारामेध्यस्नानबलिभूमिषु न विषमेन्द्रकीलचतुष्पथश्वभ्राणामुपरिष्टात् ॥

न राजद्विष्टपरुषपैशुन्यानृतानिवेदत्। न देवब्राह्मणपितृपरिवादांश्च न नरेन्द्रद्विष्टोन्मत्तपतितक्षुद्रनीचाचारानुपासीत ॥

वृक्षपर्व्वतप्रपातविषमवल्मीकदुष्टवाजिकुञ्जराद्यधिरोहणानि परिहरेत् पूर्णनदीसमुद्राविदितपल्वलश्वभ्रकूपावतरणानि ॥ भिन्नशून्यागारश्मशानविजनारण्यवासाग्निसम्भ्रमव्यालभुजङ्गकीटसेवाग्रामाघातकलहशस्त्रसन्निपाताग्निसम्भ्रमव्यालसरीसृपशृङ्गिसन्निकर्षांश्च ॥

नाग्निगोगुरुब्राह्मणप्रेङ्खागदम्पत्यन्तरेणाभियायात्। न शवमनुयायात्। देवगोब्राह्मणचैत्यध्वजरोगिपतितपापकारिणाञ्च छायां नाक्रमेत। नास्तं गच्छन्तमुद्यन्तं वादित्यं वीक्षेत। गान्धयन्तीं परशस्यं वा चरन्तीं परस्मै न कस्मैचिदाचक्षीत नचोल्कापातेन्द्रधनूंषि। नाग्निं मुखेनापधमेत्। नापो भूमिं वा पाणिपादेनाभिहन्यात् ॥

न वेगान्धारयेत्। न बहिर्वेगान् ग्रामनगरदेवतायतनश्मशानचतुष्पथसलिलाशयपथिसन्निकृष्टानुत्सृजेन्न प्रकाशं न वाय्वग्निसलिलसोमार्कगोगुरुप्रतिमुखं ॥

न भूमिं विलिखेत्। नासम्वृतमुखः सदसि जृम्भोद्गारश्वासक्षव

थूनुत्सृजेत्। न पर्य्यस्तिकावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्य्यात्॥

न बालकर्णनासाश्रोतोदशनविवराण्यभिकुष्णीयात्। न वीजयेत्केशमुखनखवस्त्रगात्राणि। न गात्रनखवक्त्रवादित्रं कुर्य्यात्। न काष्ठलोष्टतृणादीनभिहन्याच्छिन्द्याद्वा॥

न प्रतिवातातपं सेवेत न भुक्तमात्रोऽग्निमुपासीत नोत्कटुकस्तिष्ठेत्। नाल्पकाष्ठासनमध्यासीत। न ग्रीवां विषमं धारयेत्। न विषमकायः क्रियां भजेद्भुञ्जीत वा। न प्रततमीक्षेत विशेषाज्ज्योतिर्भास्करसूक्ष्मचलभ्रान्तानि। न भारं शिरसा वहेत्। न स्वप्नजागरणशयनासनस्थानचङ्क्रमणयानवाहनप्रधावनलङ्घनप्लवनप्रतरणहास्यभाष्यव्यवायव्यायामादीनुचितानप्यतिसेवेत॥

उचितादप्यहितात्क्रमशो विरमेत् हितमनुचितमप्यासेवेत क्रमशो न चैकान्ततः पादहीनात्॥

नावाक्शिराः शयीत न भिन्नपात्रे नाञ्जलिपुटे नापः पिबेत्। काले हितमितस्निग्धमधुरप्रायमाहारं वैद्यप्रत्यवेक्षितमश्नीयात्। ग्रामगणगणिकापणिकशत्रुशठपतितभोजनानि परिहरेत्। शेषाण्यपि चानिष्टरूपरसगन्धस्पर्शशब्दमानसान्यन्यान्यवज्ञुणान्यपि वा सम्भूयदत्तानि तान्यपि मक्षिकाबालोपहतानि। नाप्रक्षालितपाणिपादो भुञ्जीत मूत्रोच्चारपीडितो न सन्ध्ययोर्नापाश्रितो नातीतकालं हीनमतिमात्रञ्चेति नभुञ्जीतोद्धृतस्नेहं॥

नोदके पश्येदात्मानं न नग्नः प्रविशेज्जलं।
न नक्तं दधि भुञ्जीत न वाप्यघृतशर्करं॥

नामुद्गयूषं नाचाद्रं नोष्णैर्नामलकैर्व्विना ।

अन्यथा कुष्ठवीसर्पादिं जनयेत्। द्यूतमद्यातिस्त्रीप्रतिभूसा चित्वसमाक्रानगोष्ठीवादित्राणि न सेवेत । स्रजञ्छत्रोपानद्धै कनकमतीतवासांसि न चान्यैर्धृतानि धारयेत् । ब्राह्मणमग्निं गाश्च नोच्छिष्टः स्पृशेत् ॥

भवन्ति चात्र ॥ सुखमात्रं समासेन सद्वृत्तस्यैतदीरितं ।

आरोग्यमायुरर्थौ वा नासद्भिः प्राप्यते नृभिः ॥

यस्मिन्यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनां ॥

तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥

वर्षासु न पिवेत्तोयं पिवेच्छरदि मात्रया ।

वर्षासु चतुरो मासान्मात्रावदुदकं पिवेत् ॥

उष्णं हैमे वसन्ते च कामं ग्रीष्मे तु शीतलं ।

हेमन्ते च वसन्ते च सीध्वरिष्टौ पिवेन्नरः ॥

शृतशीतं पिवेद्ग्रीष्मे प्राष्टट्काले रसं पिवेत्।

यूषं वर्षति तस्यान्ते प्रपिवेच्छीतलं जलं ॥

स्वस्थ एवमतोऽन्यस्तु दोषाहारमतानुगः ।

स्नेहं सैन्धवचूर्णेन पिप्पलीभिश्च संयुतं ॥

पिवेदग्निविदृद्ध्यर्थं नच वेगान्विधारयेत्।

अग्निदीप्तिकरं नृणां रोगाणां शमनं प्रति ॥

प्राष्टट्शरद्वसन्तेषु सम्यक् स्नेहादिमाचरेत्।

कफे प्रच्छर्द्दनं पित्ते विरेको वस्तिरीरणे ॥

शस्यते त्रिष्वपि सदा व्यायामो दोषनाशनः।
भुक्तं विरुद्धमपथ्यं व्यायामान्न प्रकुप्यति ॥
उत्सर्गमैथुनाहारशोधने स्यात्तु तन्मनाः।
नेच्छेद्रोगभयात्प्राज्ञः पीडां वा कायमानसीं ॥
अतिस्त्रीसंप्रयोगाच्च रक्षेदात्मानमात्मवान्।
शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयाः ॥
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः।
आयुष्मन्तो मन्दजरा वपुर्व्वर्णबलान्विताः ॥
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः।
त्रिभिस्त्रिभिरहोभिर्हि समीयात्प्रमदां नरः ॥
सर्व्वेष्वृतुषु घर्म्मेषु पक्षात्पक्षाद्व्रजेद्बुधः।
रजस्वलामकामाञ्च मलिनामप्रियां तथा ॥
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीडितां।
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्वितां ॥
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि।
सन्ध्यापर्व्वस्वगम्याञ्च नोपेयात्प्रमदां नरः ॥
गोसर्गे चार्द्धरात्रे च तथामध्यन्दिनेषु च।
लज्जासमावहे देशे विवृतेऽशुद्ध एव च ॥
क्षुधितो व्याधितश्चैव क्षुब्धचित्तश्च मानवः।
वातविण्मूत्रवेगी च पिपासुरतिदुर्ब्बलः ॥
तिर्य्यग्योनावयोनौ च प्राप्तशुक्रविधारणं।

दुष्टयोनौ विसर्गन्तु बलवानपि वर्जयेत् ॥
रेतसश्चातिमात्रन्तु मूर्द्धावरणमेव च ।
स्थितावुत्तानशयने विशेषेणैव गर्हितं ॥
क्रीडायामपि मेधावी हितार्थी परिवर्जयेत् ।
रजस्वलां प्राप्नवतो नरस्यानियतात्मनः ॥
दृष्ट्यायुस्तेजसां हानिरधर्म्मश्च ततो भवेत् ।
लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु ॥
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः ।
गर्भिण्यां गर्भपीडा स्याद्व्याधितायां बलक्षयः ॥
हीनाङ्गीं मलिनां द्वेष्यां कामं बन्ध्यामसंवृते ।
देशेऽशुद्धे च शुक्रस्य मनसश्च क्षयो भवेत् ॥
क्षुधितः क्षुब्धचित्तस्य मध्याह्ने तृषितोऽबलः ।
स्थितस्य हानिं शुक्रस्य वायोः कोपञ्च विन्दति ॥
अतिप्रसङ्गाद्भवति शोषः शुक्रक्षयावहः ।
व्याधितस्य रुजा क्लीबा मृत्युर्मूर्च्छा च जायते ।
प्रत्यूषस्यर्द्धरात्रे च वातपित्ते प्रकुप्यतः ॥
तिर्य्यग्योनावयोनौ च दुष्टयोनौ तथैव च ।
उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ॥
उच्चारिते मूत्रिते च रेतसश्च विधारणे ।
उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यास्तु सम्भवः ॥
सर्व्वं परिहरेत्तस्मादेतल्लोकद्वये हितं ।

शुक्रं चोपस्थितं मोहान्न सन्धार्य्यं कथञ्चन॥
वयोरूपगुणोपेतां तुल्यशीलां गुणान्वितां।
अभिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृतां॥
सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः।
भक्ष्याः सशर्कराः क्षीरं ससितं रस एव च॥
स्नानं सव्यजनं स्वप्नो व्यवायान्ते हितानि तु।

---

॥ पञ्चविंशतितमोऽध्यायः॥

॥ अथातो मिश्रकचिकित्सितं व्याख्यास्यामः॥
पाल्यामयास्तु विज्ञाप्या इत्युक्तं प्राग्निबोध तान्॥
परिपोटस्तथोत्पात उन्मन्थो दुःखवर्द्धनः।
पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः॥
सौकुमार्य्याच्चिरोत्सृष्टे सहसाभिप्रवर्द्धिते।
कर्णशोफो भवेत्पाल्यां सरुजः परिपोटवान्॥
कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः।
गुर्व्वाभरणसंयोगात्ताडनाद्घर्षणादपि॥
शोफः पाल्यां भवेच्छ्यावो दाहपाकरुगन्वितः।
रक्तो वा रक्तपित्ताभ्यामुत्पातः सगदो मतः॥
बलाद्वर्द्धयतः कर्णं पाल्यां वायुः प्रकुप्यति।
गृहीत्वा सकफं कुर्य्याच्छोफं तद्वर्णवेदनं॥
उन्मन्थकः सकण्डूको विकारः कफवातजः।

वर्द्धमाने यदा कर्णे कण्डूदाहरुगन्वितः ॥
शोफो भवति पाकश्च त्वकस्थोऽसौ दुःखवर्द्धनः ।
कफासृक्कृमयः कुर्य्युः सर्षपाभा विकारिणीः ॥
स्राविणीः पिडकाः पाल्यां कण्डूदाहरुगन्विताः ।
कफासृक्कृमिसम्भूतः सविसर्पान्वितस्ततः ॥
लिह्यात्सशष्कुलीं पालीं परिलेहीति स स्मृतः ।
पाल्यामया ह्यमी घोरा नरस्याप्रतिकारिणः ॥
मिथ्याहारविहारस्य पालिं हिंस्युरुपेक्षिताः।
तस्मादाशु भिषक्तेषु स्नेहादिक्रममाचरेत् ॥
तथाभ्यङ्गपरीषेकप्रदेहासृग्विमोक्षणं ।
सामान्यतो विशेषाच्च वक्ष्याम्यभ्यञ्जनं प्रति ॥
खरमञ्जरियष्ट्याह्वसैन्धवामरदारुभिः ।
सुपिष्टैः साश्वगन्धैश्च मूलकावल्गुजैः फलैः ॥
सर्पिस्तैलवसामज्जमधूच्छिष्टानि पाचयेत् ।
सक्षीराण्यथ तैः पालिं प्रदिह्यात्परिपोटके ॥
मञ्जिष्ठातिलयष्ट्याह्वसारिवोत्पलपद्मकैः ।
सरोध्रैः सकदम्बैश्च बलाजम्ब्वाम्रपल्लवैः ॥
सिद्धं धान्याम्लसंयुक्तं तैलमुत्पातनाशनं ।
तालपत्र्यश्वगन्धार्कवाकूचीफलसैन्धवैः ।
तैलं कुलीरगोधाभ्यां वसया सह पाचितं ॥
सरलालाङ्गलीभ्याञ्च हितमुन्मन्थनाशनं ।

तथाम्रन्तकजम्ब्वाम्रपत्रक्काथेन सेचनं॥
प्रपौण्डरीकमधुकमञ्जिष्ठारजनीद्वयैः।
चूर्णैरुद्वर्त्तनैः पालीं तैलाक्तामवचूर्णयेत्॥
लाक्षाविडङ्गकल्केन तैलं पक्वावचारयेत्।
स्विन्नां गोमयपिण्डेन प्रदिह्यात्परिलेहिकां॥
पिष्टैर्व्विडङ्गैरथ वा त्रिवृच्छ्यामार्कसंयुतैः।
करञ्जेङ्गुदिबीजैर्व्वा कुटजारग्वधायुतैः॥
सर्व्वैर्व्वा सार्षपं तैलं सिद्धं मरिचसंयुतं॥
सनिम्बपत्रैरभ्यङ्गे मधूच्छिष्टान्वितं हितं।
पालीषु व्याधियुक्तासु तन्वीषु कठिनासु च॥
पुष्ट्यर्थं मार्द्दवार्थञ्च कुर्य्यादभ्यञ्जनं हितं।
लोपाकानूपमज्जानं वसां तैलं नवं घृतं॥
पचेद्दशगुणं क्षीरमावाप्य मधुरं गणं।
अपामार्गाश्वगन्धे च तथा लाक्षारसं शुभं॥
तत्सिद्धं परिपूतञ्च स्वनुगुप्तं निधापयेत्।
तेनाभ्यञ्ज्यात् सदा पालिं सुस्विन्नामतिमर्द्दितां॥
एतेन पाल्यो वर्द्धन्ते निरुजो निरुपद्रवाः।
मृद्व्यः पुष्टाः समाः स्निग्धा जायन्ते भूषणक्षमाः॥
नीलीदलं भृङ्गरजोऽर्जुनत्वक्पिण्डीतकं कृष्णमयोरजश्च।
बीजोद्भवं साहचरञ्च पुष्पं पथ्याक्षधात्रीसहितं विचूर्ण्य॥
एकीकृतं सर्व्वमिदं प्रमाय पङ्केन तुल्यं नलिनीभवनं।

संयोज्य पत्रं कलशे निधाय लौहे घटे सद्मनि सापिधाने॥
अनेन तैलं विपचेद्विमिश्रं रसेन भृङ्गत्रिफलाभवेन।
आसन्नपाके च परीक्षणार्थं पत्रं बलाकाभवमाक्षिपेच्च॥
भवेद्यदा तद्भ्रमराञ्जनीलं तदा विपक्वं विनिधाय पात्रं।
कृष्णायसे मासमवस्थितं तदभ्यङ्गयोगात्पलितानि हन्यात्॥
सैरीयजम्ब्वर्जुनकाश्मरीजं पुष्पं तिलान्मार्कवचूतबीजे।
पुनर्नवाकर्दमकण्टकार्य्यौ कासीसपिण्डीतकबीजसारं॥
फलत्रयं लोहरजोऽञ्जनञ्च यष्ट्याह्वयं नीरजसारिवे च।
पिष्ट्वाथ सर्व्वं सहमोदयन्त्या साराम्भसा बीजकसम्भवेन॥
साराम्भसः सप्तभिरेव पश्चात्प्रस्थैःसमालोड्य दशाहगुप्तं।
लौहे सुपात्रे विनिधाय तैलमक्षोद्भवं तच्च पचेत्प्रयत्नात्॥
पक्वञ्च लौहेऽभिनवे निधाय नस्यं विदध्यात्परिशुद्धकायः।
अभ्यङ्गयोगैश्च नियुज्यमानं भुञ्जीत माषान्कृशरामथो वा॥
मासोपरिष्टाद्घनकुञ्चिताग्राः केशा भवन्ति भ्रमराञ्जनाभाः।
केशास्तथान्ये खलतौ भवेयुर्जरा न चैनं सहसाभ्युपैति॥
बलं परं सम्भवतीन्द्रियाणां भवेच्च वक्त्रं बलिभिर्व्विमुक्तं।
नाकामिनेऽनर्थिनि नाकृताय नैवारये तैलमिदं प्रदेयं॥
लाक्षारोध्रं द्वे हरिद्रे शिलाले कुष्ठं नागं गैरिकावर्णकाश्च।
मञ्जिष्ठोग्रा स्यात्सुराष्ट्रोद्भवा च पत्तङ्गो वै रोचना चाञ्जनञ्च॥
हेमाङ्गत्वक्पाण्डुपत्रं वटस्य कालीयं स्यात् पद्मकं पद्ममध्यं।
रक्तं श्वेतं चन्दनं पारदञ्च काकोल्यादिः क्षीरपिष्टश्च वर्गः॥

मेदोमज्जासिक्थकल्कैर्घृतञ्च दुग्धं क्वाथः चीरिणाञ्च द्रुमाणां।
एतत्सर्व्वं पक्वमेकध्यतस्तु वक्त्राभ्यङ्गे सर्पिरुक्तं प्रधानं॥
हन्याद्व्यङ्गं नीलिकाञ्चातिदुष्टां वक्त्रेजाताः स्फोटिकाश्चापि काश्चित्।
पद्माकारं निर्व्यलीकञ्च वक्त्रं कुर्य्यादेतत्पीनगण्डं मनोज्ञं॥
राज्ञामेतद्योषितां चापि नित्यं कुर्य्याद्वैद्यस्तत्समानां नृणाञ्च।
कुष्ठघ्नं वै सर्पिरेतत्प्रधानं येषां पादे सन्ति वैपादिकाश्च॥
हरीतकीचूर्णमरिष्टपत्रं चूतत्वचं दाडिमपुष्पवृन्तं।
पत्रञ्च दद्यान्मदयन्तिकाया लेपाङ्गरागो नरदेवयोग्यः॥

---

॥ षड्विंशतितमोऽध्यायः॥

॥ अथातः चीणबलीयं वाजीकरणचिकित्सितं व्याख्यास्यामः॥

कल्यस्योदग्रवयसो वाजीकरणसेविनः।
सर्व्वेष्वृतुष्वहरहर्व्यवायो न निवारितः॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छतां।
योषित्प्रसङ्गात्क्षीणानां क्लीवानामल्परेतसां॥
विलासिनामर्थवतां रूपयौवनशालिनां।
नृणाञ्च बहुभार्य्याणां योगा वाजीकरा हिताः॥
सेवमानो यदौचित्याद्वाजीवात्यर्थवेगवान्।
नारीस्तर्पयते तेन वाजीकरणमुच्यते॥
भोजनानि विचित्राणि पानानि विविधानि च।
वाचः श्रोत्रानुगामिन्यस्त्वचः स्पर्शसुखास्तथा॥

यामिनी सेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिराःस्रजः ॥
मनसश्चाप्रतिघातो वाजीकुर्व्वन्ति मानवं ॥
तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
द्वेष्यस्त्रीसम्प्रयोगाच्च क्लैव्यं तन्मानसं स्मृतं ॥
कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयो दृष्टः क्लैव्यं तदपरं स्मृतं ॥
अतिव्यवायशीलो यो नच वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकं ॥
महता मेढ्ररोगेण मर्मच्छेदेन वा पुनः ।
क्लैव्यमेतच्चतुर्थं स्यान्नृणां पुंस्त्वोपघातजं ॥
जन्मप्रभृति यः क्लीवः क्लैव्यं तत्सहजं स्मृतं ।
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्य्यतः ॥
षष्ठं क्लैव्यं मतं तत्तु स्थिरशुक्रनिमित्तजं ।
असाध्यं सहजं क्लैव्यं मर्मच्छेदाच्च यद्भवेत् ॥
साध्यानामितरेषान्तु कार्य्या हेतुविपर्य्ययः ।
विधिर्वाजीकरो यस्तु तं प्रवक्ष्याम्यतः परं ॥
तिलमाषविदारीणां शालीनां चूर्णमेव वा ।
पौण्ड्रकेक्षुरसेनार्द्रं मर्दितं सैन्धवान्वितं ॥
वराहमेदसा युक्तां घृतेनोत्कारिकां पचेत् ।
तां भक्षयित्वा पुरुषो गच्छेत्तु प्रमदाशतं ॥

वस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ।
शिशुमारवसापक्वाः शष्कुल्यस्तैस्तिलैः कृताः ॥
यः खादेत्स पुमान्गच्छेत् स्त्रीणां शतमपूर्व्ववत् ।
पिप्पलीलवणोपेतं वस्ताण्डं चीरसर्पिषा ॥
साधितं भक्षयेद्यस्तु स गच्छेत्प्रमदाशतं ।
पिप्पलीमाषशालीनां यवगोधूमयोस्तथा ॥
चूर्णभागैस्समैस्तैस्तु घृते पूपालिकां पचेत् ।
तां भक्षयित्वा पीत्वातु शर्करामधुरं पयः ॥
नरश्चटकवद्गच्छेद्दश वारान्निरन्तरं ।
चूर्णं विदार्य्याः सुकृतं स्वरसेनैव भावितं ॥
सर्पिर्म्मधुयुतं लीढ्वा दश स्त्रीरधिगच्छति ॥
एवमामलकं चूर्णं स्वरसेनैव भावितं ।
शर्करामधुसर्पिर्भिर्युक्तं लीढ्वा पयः पिवेत् ॥
एतेनाशीतिवर्षोऽपि युवेव परिहृष्यति ।
पिप्पलीलवणोपेते वस्ताण्डे घृतसाधिते ॥
शिशुमारस्य वा खादेत्ते तु वाजीकरे भृशं ।
कुलीरकूर्म्मनक्राणामण्डान्येवं तु भक्षयेत् ॥
महिषर्षभवस्तानां पिवेच्छुक्राणि वा नरः ।
अश्वत्थफलमूलत्वक्छुङ्गासिद्धं पयो नरः ॥
पीत्वा सशर्कराक्षौद्रं कुलिङ्ग इव हृष्यति ।
विदारिमूलकल्कान्तु घृतेन पयसा नरः ॥

उडुम्बरसमं पीत्वा वृद्धोऽपि तरुणायते ।
माषाणां पलमेकन्तु संयुक्तं क्षौद्रसर्पिषा ॥
अवलिह्य पयः पीत्वा तेन वाजीभवेन्नरः ।
क्षीरपक्वांस्तु गोधूमानात्मगुप्ताफलैः सह ॥
शीतान्घृतयुतान्खादेत्ततः पश्चात्पयः पिबेत् ।
नक्रमूषिकमण्डूकचटकाण्डकृतं घृतं ॥
पादाभ्यङ्गेन कुरुते बलं भूमिन्तु न स्पृशेत् ।
यावत्स्पृशति नो भूमिं तावद्गच्छेन्निरन्तरं ॥
स्वयंगुप्तेक्षुरकयोः फलचूर्णं सशर्करं ।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ॥
उच्चटाचूर्णमप्येवं क्षीरेणोक्तममिष्यते ।
शतावर्य्युच्चटामूलं पेयमेवं बलार्थिना ॥
स्वयंगुप्ताफलैर्युक्तं माषसूपं पिबेन्नरः ।

गुप्ताफलं गोक्षुरकाच्च बीजं तथोच्चटां गोपयसा विपाच्य ।
खजाहतं शर्करया च युक्तं पीत्वा नरो हृष्यति सर्व्वरात्रं ॥
माषान् विदारीमपि सोच्चटाञ्च क्षीरे गवां क्षौद्रघृतोपपन्नां ।
पीत्वा नरः शर्करया सुयुक्तां कुलिङ्गवद्धृष्यति सर्व्वरात्रं ॥

गृष्टीनां वृद्धवत्सानां माषपर्णभृतां गवां ।
यत्क्षीरं तत्प्रशंसन्ति बलकामेषु जन्तुषु ॥
क्षीरमांसगणः सर्व्वः काकोल्यादिश्च पूजितः ।
वाजीकरणहेतोर्हि तस्मात्तत्तु प्रयोजयेत् ॥

एते वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।
सेव्या विशुद्धोपचितदेहैः कालाद्यपेक्षया ॥

---

॥ सप्तविंशोऽध्यायः ॥

अथातः सर्व्वोपघातशमनीयं रसायनं व्याख्यास्यामः ॥

पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनं ।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ॥
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ।
न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः ॥
शरीरस्योपघाता ये दोषजा मानसास्तथा ।
उपदिष्टाः प्रदेशेषु तेषां वच्यामिवारणं ॥
शीतोदकं पयः चौद्रं सर्पिरित्येकशो द्विशः ।
त्रिशः समस्तमथ वा प्राक्पीतं स्थापयेद्वयः ॥

तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत शीततोयं चानुपिबेदेवमहरहर्मासं तद्देव मधुयुक्तं भल्लातककाथेन वा मधुद्राचाकाथयुक्तं वा मध्वामलकरसाभ्यां वा गुडूचीक्काथेन वा। एवमेते पञ्च प्रयोगा भवन्ति जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात्। एते खल्वर्शांसि चपयन्ति क्रमीनुपघ्नन्ति ग्रहणधारणशक्तिं जनयन्ति मासे मासे प्रयोगे वर्षशतमायुषोऽभिवृद्धिर्भवति ॥

विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत्स्वेद्य विगतकषायं स्विन्नमवतार्य्य दृषदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्रावृषि भस्मराशावन्तर्गृहे चतुरो मासान्निदध्यात् वर्षाभिगमे चोद्धृत्योपसंस्कृतशरीरः सहस्रसम्पाताभिहुतं कृत्वा प्रातः प्रातर्यथाबलमुपयुञ्जीत। जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात् पांशुशय्यायां शयीत तस्य मासादूर्द्ध्वं सर्व्वाङ्गेभ्यः कृमयो निःक्रामन्ति तानणुतैलेनाभ्यक्तस्य वंशविदलेनापहरेत्। द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत् चतुर्थे दन्तनखरोमाण्यवशीर्य्यन्ते पञ्चमे प्रशस्तगुणलक्षणानि जायन्ते। अमानुषं चादित्यप्रकाशं वपुरधिगच्छति दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति रजस्तमसी चापोह्य सत्वमधितिष्ठति। श्रुतिनिगाद्यपूर्व्वोत्पादी गजबलोऽश्वयवः पुनर्युवाष्टौ वर्षशतान्यायुरवाप्नोति। तस्याणुतैलमभ्यङ्गार्थे। अजकर्णकषायमुत्सादनार्थे सोशीरं कूपोदकं स्नानार्थे चन्दनमुपलेपनार्थे भल्लातकविधानवदाहारः परिहारश्च। काश्मर्य्याणां निष्कुलीकृतानामेष एव कल्पः पांशुशय्याभोजनवर्ज्जं। अत्र हि पयसा शृतेन भोक्तव्यं। आशिषश्च पूर्व्वेण समानाः शोणितपित्तनिमित्तेषु विकारेष्वेतेषामुपयोगः॥

यथोक्तमागारं प्रविश्य बलामूलार्द्धपलं पलं वा पयसालोड्य पिवेत्। जीर्णे पयःसर्पिरोदनइत्याहारः। एवं द्वादशरात्रमुपयुज्य द्वादश वर्षाणि वयस्तिष्ठति। एवं दिवसशतमुपयुज्य वर्षशतं वयस्तिष्ठति॥ एवमेवातिबलानागबलाविदारीशतावरीणामुपयोगः।

विशेषतस्त्वतिबलामुदकेन नागबलाचूर्णं मधुना विदारीचूर्णं वा क्षीरेण शतावरीमप्येवं पूर्व्वेणान्यत्समानमाशिषश्च समाः॥ एतास्त्वौषधयो बलकामानां शोणितच्छर्दयतां विरिच्यमानानां चोपदिश्यन्ते।

वाराहीमूलतुलाचूर्णं कृत्वा ततोमात्रां मधुयुक्तां पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदन इत्याहारः। प्रतिषेधोऽत्र पूर्व्ववत्क्रियाप्रयोगमुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चाचयतां॥ एतेनैव चूर्णेन पयोऽवचूर्ण्य शृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायम्प्रातरेककालं वा जीर्णे पयःसर्पिरोदन इत्याहारः। एवं मासमुपयुज्य वर्षशतायुर्भवति। जीर्णे पयःसर्पिरोदन इत्याहारः॥

चक्षुःकामः प्राणकामो वा वीजकसाराग्निमन्थमूलं निःक्वाथ्य माषप्रस्थं साधयेत् तस्मिन्स्विद्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागं ततः स्विन्नमवतार्य्य सहस्वसम्पाताभिहुतं कृत्वा शीतीभूतं मधुसर्पिभ्यां संसृज्योपयुञ्जीत यथाबलं लवणं परिहरन्भक्षयेत् जीर्णे मुद्गामलकयूषेणालवणेन घृतवन्तमोदनमश्नीयात् पयसा वा मासत्रयमेवमाभ्यां प्रयोगाभ्यां चक्षुःसौपर्ण्यवद्भवत्यनल्पबलो बलवांस्त्रीषु चाक्षयो वर्षशतायुर्भवतीति॥

भवति चात्र॥ पयसा सह सिद्धानि नरः सनफलानि यः।
भक्षयेत्पयसा सार्द्धं वयस्तस्य न शीर्य्यते॥

॥ अष्टाविंशोऽध्यायः ॥

अथातो मेधायुष्कामीयं रसायनं चिकित्सितं व्याख्यास्यामः॥

मेधायुःकामः श्वेतावल्गुजफलान्यातपपरिशुष्काण्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सह समालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात् सप्तरात्रादुद्धृत्य हृतदोषस्य यथाबलं पिण्डं प्रयच्छेदनुदिते सूर्य्ये उष्णोदकं चानुपिबेत्॥ भल्लातकविधानवच्चागारप्रवेशो जीर्णौषधश्चापराह्ने हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टिकानां च पयसा शर्करामधुरेणौदनमश्नीयादेवं षण्मासानुपयुज्य विगतपाप्मा बलवर्णोपेतः श्रुतिनिगादी स्मृतिमानरोगो वर्षशतायुर्भवति॥ कुष्ठिनं पाण्डुरोगिणमुदरिणं वा कृष्णाया गोर्मूत्रेणालोड्यार्द्धपलिकं पिण्डं विगतलौहित्ये सवितरि पाययेत पराह्ने चालवणेनामलकयूषेण सर्पिष्मन्तमोदनमश्नीयात्। एवं मासमुपयुज्य स्मृतिमानरोगो वर्षशतायुर्भवति॥ एष एवोपयोगश्चित्रमूलानां रजन्याश्चित्रकमूले विशेषो द्विपलिकं पिण्डं परं प्रमाणं शेषं पूर्व्ववत्॥

हृतदोष एव प्रतिसंसृष्टभक्तो यथाक्रममागारं प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलं पयसालोड्य पिबेत्पयोऽनुपानं वा तस्यां जीर्णायां यवान्नं पयसोपयुञ्जीत तिलैर्वा सह भक्षयित्वा त्रीन्मासान्पयोऽनुपानं जीर्णे पयःसर्पिरोदन इत्याहारः। एवमुपयुञ्जानो ब्रह्मवर्चसी श्रुतनिगादी भवति वर्षशतमायुरवाप्नोति त्रिरात्रोपोषितश्च त्रिरात्र

मेनां भक्षयेत्। त्रिरात्रादूर्द्ध्वं पयःसर्पिररिति चोपयुञ्जीत ॥ विल्वमात्रं पिण्डं वा पयसालोड्य पिबेदेवं दशरात्रमुपयुज्य मेधावी वर्षशतायुर्भवति ॥

हृतदोष एवागारं प्रविश्य प्रतिसंसृष्टभक्तो ब्राह्मीस्वरसमादाय सहस्रसम्पाताभिहुतं कृत्वा यथाबलमुपयुञ्जीत जीर्णौषध्या पराह्णे यवागूमलवणां पिबेत् चीरसात्म्यो वा पयसा भुञ्जीत। एवं सप्तरात्रमुपयुज्य ब्रह्मवर्चसी मेधावी भवति। द्वितीयं सप्तरात्रमुपयुज्य ग्रन्थमीप्सितमुत्पादयति। नष्टञ्चास्य प्रादुर्भवति। तृतीयं सप्तरात्रमुपयुज्य द्विरुच्चारितं शतमप्यवधारयति। एवमेकविंशतिरात्रमुपयुज्यालक्ष्मीरपक्रामति मूर्त्तिमती चैनं वाग्देव्यनुप्रविशति सर्व्वाश्चैनं श्रुतय उपतिष्ठन्ति। श्रुतधरः पञ्चवर्षशतायुर्भवति ॥

ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं विडङ्गतण्डुलानां कुडवं द्वे द्वे पले वचात्रिवृतयोर्द्वादश हरीतक्यामलकविभीतकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा स्वनुगुप्तं निदध्यात्। ततः पूर्व्वविधानेन मात्रां यथाबलमुपयुञ्जीत जीर्णे पयःसर्पिरोदन इत्याहारः ॥ एतेनोर्द्ध्वमधस्तिर्य्यक्कृमयो निःक्रामन्ति। अलक्ष्मीरपक्रामति। पुष्करकर्णः स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवत्येतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतग्रहेष्वन्येषु च महाव्याधिषु च संशोधनमादिशन्ति ॥

हृतदोष एवागारं प्रविश्य हैमवत्या वचायाः पिण्डमाम

लकमात्रमभिहुतं पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदन इत्याहार एवन्द्वादशरात्रमुपयुञ्जीत ततोऽस्य श्रोत्रं विव्रियते द्विरभ्यासात्स्मृतिमान् भवति त्रिरभ्यासाच्छ्रुतमादत्ते चतुर्द्दा दशरात्रमुपयुज्य सर्व्वं तरति किल्बिषं तार्क्ष्यदर्शनमुत्पद्यते शता युश्च भवति। द्वे द्वे पले इतरस्या वचाया निःक्काथ्य पिबेत् पयसा समानं भोजनं समाः पूर्व्वेणाशिषश्च ॥

वचाशतपाकं वा सर्पिर्द्रोणमुपयुज्य पञ्चवर्षशतायुर्भवति गलगण्डापचीश्लीपदस्वरभेदांश्चापहन्तीति ॥

अथायुःकामीयं वक्ष्यामः ॥

मन्त्रौषधसमायुक्तं संवत्सरफलप्रदं।
बिल्वस्य चूर्णं पुष्ये तु हुतं वारान्सहस्रशः ॥
श्रीसूक्तेन नरः काल्ये ससुवर्णं दिने दिने।
सर्पिर्मधुयुतं लिह्यादलक्ष्मीनाशनं परं ॥
त्वचं बिल्वस्य मूलस्य मूलक्काथं दिने दिने।
प्राश्नीयात्पयसा सार्द्धं स्नात्वा हुत्वा समाहितः ॥
दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत्।
हुत्वा बिशानां क्काथन्तु मधुलाजैश्च संयुतं ॥
अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतं।
सुवर्णपद्मवीजानि मधुलाजाः प्रियङ्गवः ॥
गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत्।
नीलोत्पलदलक्काथो गव्येन पयसा श्रृतः ॥

ससुवर्णतिलैः सार्द्धमलक्ष्मीनाशनः स्मृतः ।
गव्यं पयः सुवर्णञ्च मधूच्छिष्टञ्च माक्षिकं ॥
पीतं शतसहस्राभिहुतं युक्तरथं स्मृतं ।
वचाघृतसुवर्णञ्च बिल्वचूर्णमिति त्रयं ॥
मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्द्धनं ।
वासामूलतुलाक्काथे तैलमावाप्य साधितं ॥
हुत्वा सहस्रमश्नीयान्मेध्यमायुष्यमुच्यते ।
यावत्कांस्तावकान्कश्चिदभिभूयययवांस्तथा ॥
पिप्पलीमधुसंयुक्तान् शिखाचरणवद्भवेत् ।
मध्वामलकचूर्णानि सुवर्णमिति च त्रयं ॥
प्राश्यारिष्टगृहीतोऽपि मुच्यते प्राणसंशयात् ।
शतावरीघृतं सम्यगुपयुक्तं दिने दिने ॥
सचौद्रं ससुवर्णञ्च नरेन्द्रं स्नापयेद्वशे ।
गोचन्दनामोहनिकामधुकं माक्षिकं मधु ॥
सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता ।
पद्मनीलोत्पलक्काथे यष्टीमधुकसंयुते ।
सर्पिरासादितं गव्यं ससुवर्णं सदा पिबेत् ॥
पयश्चानुपिबेत्सिद्धं तेषामेव समुद्भवे ।
अलक्ष्मीघ्नं सदायुष्यं राज्याय सुभगाय च ॥
यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने ।
शब्दिता तत्र सर्व्वत्र गायत्री त्रिपदी भवेत् ॥

पाप्मानं नाशयन्त्येता दद्युश्चौषधयः श्रियं ।
कुर्य्युर्नागबलं चापि मनुष्यममरोपमं ॥
सतताध्ययनं वादः परतन्त्रावलोकनं ।
तद्विद्याचार्य्यसेवा च बुद्धिमेधाकरो गणः ॥
आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणं ।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्जनं ।

---

॥ एकोनत्रिंशत्तमोऽध्यायः ॥

अथातः स्वभावव्याधिप्रतिषेधनीयं रसायनं व्याख्यास्यामः ॥
ब्रह्मादयोऽसृजन्पूर्वममृतं सोमसंज्ञितं ।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥

एक एव खलु भगवान्सोमः स्थाननामाकृतिवीर्य्यविशेषैस्तु चतुर्विंशतिधा भिद्यते ।

तद्यथा ॥ अंशुमान्मुञ्जवांश्चैव चन्द्रमा रजतप्रभः ।
दूर्व्वासोमः कनीयांश्च श्वेताक्षः कनकप्रभः ॥
प्रतानवांस्तालवृन्तः करवीरोऽंशवानपि ।
स्वयम्प्रभो महासोमो यश्चापि गरुडाहृतः ॥
गायत्र्यस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा ।
अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥
गायत्र्या त्रिपदा युक्तो यश्चोडुपतिरुच्यते ।
एते सोमाः समाख्याता वेदोक्तैर्नामभिः शुभैः ॥

सर्व्वेषामेव चैतेषामेको विधिरुपासने ।
सर्व्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते ॥

अतोऽन्यतमं सोममुपयुयुक्षुः सर्व्वोपकरणपरिचारकोपेतः प्रशस्तदेशे त्रिवृतमागारं कारयित्वा हृतदोषः प्रतिसंसृष्टभक्तः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादायाध्वरकल्पेनाहृतमभिषुतमभिहुतं चान्तरागारे कृतमङ्गलः सोमकन्दं सुवर्णसूच्या विदार्य्य पयोगृह्णीयात्सौवर्णे पात्रेऽञ्जलिमात्रं ततः सकृदेवोपयुञ्जीत नास्वादयंस्ततउपस्पृश्य शेषमप्सु प्रवेश्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत् ॥

रसायनं पीतवांस्तु निवाते तन्मनाः शुचिः ।
आसीत तिष्ठेत्क्रामेच्च न कथञ्चन संविशेत् ॥

सायं वा भुक्तवान् श्रुतशान्तिः कुशशय्यायां कृष्णाजिनोत्तरायां सुहृद्भिरुपास्यमानः शयीत तृषितो वा शीतोदकमात्रं पिबेत् ततः प्रातरुत्थायोपश्रुतशान्तिः कृतमङ्गलो गां स्पृष्ट्वा तथैवासीत। तस्य जीर्णे सोमे छर्दिरुपपद्यते ततः शोणिताक्तं कृमिव्यामिश्रं छर्दितवतः सायं शृतशीतं क्षीरं वितरेत्। ततस्तृतीयेऽहनि कृमिव्यामिश्रमतिसार्य्यते स तेनानिष्टप्रतिग्रहभुक्तप्रभृतिभिर्विशेषैर्मुक्तः शुद्धतनुर्भवति ततःसायं स्नातस्य पूर्व्ववदेव क्षीरं वितरेत्। क्षौमवस्त्रास्तृतायां चैनं शय्यायां शाययेत ततश्चतुर्थेऽहनि तस्य श्वयथुरुत्पद्यते। ततः सर्व्वाङ्गेभ्यः कृमयो निष्क्रामन्ति तदहश्च शय्यायां पांशुभिरवकीर्य्यमाणः शयीत। ततः सायं पूर्व्ववदेव क्षीरं वित

रेत्। एवं पञ्चमषष्ठयोर्दिवसयोर्वर्त्तेत केवलमुभयकालमस्मै क्षीरं वितरेत्ततः सप्तमेऽहनि निर्मांसस्त्वगस्थिभूतः केवलं सोमपरिग्रहादेवोच्छ्वसिति। तदहस्य क्षीरेण सुखोष्णेन परिषिच्य तिलमधुकचन्दनानुलिप्तदेहं पयः पाययेत्। ततोऽष्टमेऽहनि प्रातरेव क्षीरपरिषिक्तं चन्दनप्रदिग्धगात्रं पयः पाययित्वा पांशुशय्यां समुत्सृज्य क्षौमास्तृतायां शाययेत्ततो मांसमाप्याय्यते त्वक्चावदलति। दन्तनखरोमाणि चास्य पतन्ति। तस्य नवमदिवसात्प्रभृत्यणुतैलाभ्यङ्गः सोमवल्ककषायपरिषेकः। ततो दशमेऽहन्येतदेव वितरेत् ततोऽस्य त्वक् स्थिरतामुपैति। एवमेकादशद्वादशयोर्व्वर्त्तेत। तत्र त्रयोदशात्प्रभृति सोमवल्ककषायपरिषेकः। एवमाषोडशाद्वर्त्तेत ततः सप्तदशाष्टादशयोर्द्दिवसयोर्दशना जायन्ते शिखरिणः स्निग्धवज्रवैदूर्य्यस्फटिकनिकाशाः समाः स्थिराः सहिष्णवः। तदा प्रभृति चानवैः शालितण्डुलैः क्षीरयवागूमुपसेवेत यावत्पञ्चविंशतिरिति। ततोऽस्मै दद्याच्छाल्योदनं मृदूभयकालं पयसा ततोऽस्य नखा जायन्ते विद्रुमेन्द्रगोपकतरुणादित्यप्रकाशाः स्थिराः स्निग्धा लक्षणसम्पन्नाः केशाश्च जायन्ते त्वक्च नीलोत्पलातसीपुष्पवैदुर्यप्रकाशा। ऊर्द्ध्वञ्च मासात्केशान्वापयेद्वापयित्वा चोशीरचन्दनकृष्णतिलकल्कैः शिरः प्रदिह्यात् पयसा वा स्नापयेत्॥

ततोऽस्यानन्तरं सप्तरात्रात्केशा जायन्ते भ्रमराञ्जननिभाः कुञ्चिताः स्निग्धास्ततस्त्रिरात्रात्प्रथमपरिसरान्निःक्रम्य मुहूर्त्तं

स्थित्वा पुनरेवान्तःप्रविशेत्। ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यं। यवपिष्टमुद्वर्त्तनार्थे। सुखोष्णञ्च पयः परिषेकार्थे। अजकर्ण कषायमुत्सादनार्थे। सौशीरं कूपोदकं स्नानार्थे चन्दनमनुलेपार्थे। आमलकरसविमिश्राश्चास्य यूषसूपविकल्पाः। क्षीर मधुकसिद्धञ्च कृष्णतिलमवचारणार्थे। एवं दशरात्रं ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्त्तेत। ततस्तृतीये परिसरे स्थिरीकुर्वन्नात्मानमन्यद्दशरात्रमासीत। किञ्चिदातपपवनान् वा सेवेत पुनस्त्वान्तःप्रविशेत्। नचात्मानमादर्शेषु वा निरीक्षेत रूपशालित्वात् ततोऽन्यद्दशरात्रं क्रोधादीन् परिहरेदेवं सर्व्वेषामुपयोगः। विशेषतस्तु वल्लीप्रतानक्षुपाढ्यः सोमा भक्षयितव्याः। तेषान्तु प्रमाणमर्द्धं चतुर्थमुष्टयः॥

अंशुवन्तं सौवर्णे पात्रेऽभिषुणुयात्। चन्द्रमसं राजते चोपयुज्याष्टगुणमैश्वर्य्यमवाप्येशानन्देवमनुप्रविशति। शेषांस्तु ताम्रमये मृन्मये वा रोहिते वा चर्म्मणि वितते शूद्रवर्ज्जं त्रिभिर्वर्णैः सोमा उपयोक्तव्याः। ततश्चतुर्थे मासे पौर्णमास्यां शुचौ देशे ब्राह्मणानर्चयित्वा कृतमङ्गलो निःक्रम्य यथोक्तं व्रजेदिति॥

ओषधीनां पतिं सोममुपयुज्य विचक्षणः।
दशवर्षसहस्राणि नवान्धारयते तनुं॥
नाग्निर्न तोयं न विषं न शस्त्रं नास्त्रमेव च।
तस्यालमायुःक्षपणे समर्थाश्च भवन्ति हि॥
भद्राणां षष्टिवर्षाणां प्रसुतानामनेकधा।

कुञ्जराणां सहस्रस्य बलं समधिगच्छति ॥
क्षीरोदं शक्रसदनमुत्तरांश्च कुरूनपि ।
यत्रेच्छति स गन्तुं वा तत्राप्रतिहता गतिः ॥
कन्दर्प इव रूपेण कान्त्या चन्द्र इवापरः ।
प्रह्लादयति भूतानां मनांसि स महाद्युतिः ॥
साङ्गोपाङ्गांश्च निखिलान्वेदान्विन्दति तत्त्वतः ।
चरत्यमोघसङ्कल्पो देववच्चाखिलं जगत् ॥
सर्व्वेषामेव सोमानां पत्राणि दशपञ्च च ।
तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च ॥
एकैकं जायते पत्रं सोमस्याहरहस्तदा ।
शुक्लस्य पौर्णमास्यान्तु भवेत्पञ्चदशच्छदः ॥
शीर्य्यते पत्रमेकैकं दिवसे दिवसे पुनः ।
कृष्णपक्षक्षये चापि लता भवति केवला ॥
अंशुमानाज्यगन्धस्तु कन्दवान्रजतप्रभः ।
कदल्याकारकन्दस्तु मुञ्जवाल्लशुनच्छदः ॥
चन्द्रमाः कनकाभासो जले चरति सर्व्वदा ।
गरुडाहृतनामा च श्वेताक्षश्चापि पाण्डुरौ ॥
सर्पनिर्म्मोकसदृशौ तौ वृक्षाग्रावलम्बिनौ ।
तथान्यैर्मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते ॥
सर्व एव तु विज्ञेयाः सोमाः पञ्च दशच्छदाः ।
क्षीरकन्दलतावन्तः पत्रैर्नानाविधैः स्मृताः ॥

हिमवत्यर्बुदे सह्ये महेन्द्रमलये तथा।
श्रीपर्व्वते देवगिरौ गिरौ देवसहे तथा॥
पारियात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा।
उत्तरेण वितस्तायाः प्रवृद्धा ये महीधराः॥
पंच तेषामधो मध्ये सिन्धुनामा महानदः॥
ह्रठवत्प्लवते तत्र चन्द्रमाः सोमसत्तमः॥
तस्योद्देशेषु चाप्यस्ति मुञ्जवानंशुमानपि॥
काश्मीरेषु सरोदिव्यं नाम्ना क्षुद्रकमानसं॥
गायत्र्यस्त्रैष्टुभः पांक्तो जागतः शाङ्करस्तथा॥
अत्र सन्त्यपरे चापि सोमाः सोमसमप्रभाः।
न तान्पश्यन्त्यधर्म्मिष्ठाः कृतघ्नाश्चापि मानवाः॥
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा।

---

॥ त्रिंशत्तमोऽध्यायः ॥

अथातो निवृत्तसन्तापीयं रसायनं व्याख्यास्यामः॥
यथानिवृत्तसन्तापा मोदन्ते दिवि देवताः।
तथौषधीरिमाः प्राप्य मोदन्ते भुवि मानवाः॥

अथ सप्त पुरुषा रसायनं नोपयुञ्जीरन्। तद्यथा। अनात्मवानलसो दरिद्रः प्रमादी व्यसनी पापकृद्भेषजापमानी चेति। सप्तभिरेव कारणैर्न सम्पद्यते। अज्ञानादनारम्भादस्थिरचित्तत्वाद्दारिद्र्यादनायत्तत्वादधर्मादौषधालाभाच्चेति॥

अथौषधीर्व्याख्यास्यामः। श्वेतकापोती कृष्णकापोती गोनसी वाराही कन्या छत्रातिच्छत्रा करेणुरजा चक्रका आदित्यपर्णिनी ब्रह्मसुवर्चला श्रावणी महाश्रावणी गोलोमी चाजलोमी महावेगवती चेत्यष्टादश सोमसमवीर्य्या महौषधयो व्याख्याताः॥ तासां सोमवद्विधायाशीःस्तुतयः शास्त्रेऽभिहितास्तासामागारेऽभिहुतानां याः क्षीरवत्यस्तासां क्षीरकुडवं सकृदेवोपयुञ्जीत॥

यास्त्वक्षीरा मूलवत्यस्तासां प्रदेशिनीप्रमाणानि त्रीणि काण्डानि प्रमाणमुपयोगे। श्वेतकापोती समूलपत्रा भक्षयितव्या गोनस्यजगरीकृष्णकापोतीनां सनखमुष्टिं खण्डशः कल्पयित्वा क्षीरेण विपाच्य परिस्रावितमभिहुतञ्च सकृदेवोपभुञ्जीत। चक्रकायाः पयःसकृदेव। ब्रह्मसुवर्चला सप्तरात्रमुपयोक्तव्या॥

भक्ष्यकल्पेन शेषाणां पञ्च पलानि क्षीराढककथितानि प्रस्थेऽवशिष्टेऽवतार्य्य परिस्राव्य सकृदेवोपयुञ्जीत। सोमवदाहारविहारौ व्याख्यातौ केवलन्तु नवनीतमभ्यङ्गार्थे शेषं सोमवदानिर्गमादिति॥

भवन्ति चात्र॥ युवानं सिंहविक्रान्तं कान्तं श्रुतनिगादिनं।
कुर्य्युरेताः क्रमेणैव द्विसाहस्रायुषं नरं॥
अङ्गदी कुण्डली मौली दिव्यस्रक्चन्दनाम्बरः।
चरत्यमोघसङ्कल्पो नभस्यम्बुददुर्गमे॥
व्रजन्ति पक्षिणो येन जललम्बाश्च तोयदाः।
गतिः सौषधिसिद्धस्य सोमसिद्धगतिः परा॥

अथ वक्ष्यामि विज्ञानमौषधीनां पृथक् पृथक्।
मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चपर्णिनी ॥
पञ्चारत्निप्रमाणा वा विज्ञेयाजगरी बुधैः।
निष्पत्रा कनकाभासा मूले द्व्यङ्गुलसम्मिता ॥
सर्पाकारा लोहितान्ता श्वेतकापोतिरुच्यते।
द्विपर्णिनीं मूलभवामरुणां कृष्णमण्डलां ॥
द्व्यरत्निमात्रां जानीयाद्गोनसीं गोनसाकृतिं।
सक्षीरां रोमशां मृद्वीं रसेनेक्षुरसोपमां ॥
एवं रूपरसाञ्चापि कृष्णकापोतिमादिशेत्।
कृष्णसर्पस्वरूपेण वाराही कन्दसम्भवा ॥
एकपत्रा महावीर्य्या भिन्नाञ्जनसमप्रभा।
छत्रातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसम्भवे ॥
जरामृत्युनिवारिण्यौ श्वेतकापोतिसंस्थिते।
कान्तैर्द्वादशभिः पत्रैर्मयूराङ्गरुहोपमैः ॥
कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी।
करेणुः सुबहुक्षीरा कन्देन गजरूपिणी ॥
हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी ॥
अजास्तनाभकन्दातु सक्षीरा क्षुपरूपिणी।
अजा महौषी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा ॥
श्वेतां विचित्रकुसुमां काकादन्या समां क्षुपां।
चक्रकामौषधीं विद्याज्जरामृत्युनिवारिणीं ॥

मूलिनी पञ्चभिः पत्त्रैः सुरक्तांशुककोमलैः ।
आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्त्तिनी ॥
कनकाभा जलान्तेषु सर्व्वतः परिसर्पति ।
सक्षीरा पद्मिनीप्रख्या देवी ब्रह्मसुवर्चला ॥
अरत्निमात्रक्षुपका पत्त्रैर्द्व्यङ्गुलसम्मितैः ।
पुष्पैर्नीलोत्पलाकारैः फलैश्चाञ्जनसन्निभैः ।
श्रावणी महती ज्ञेया कनकाभा पयस्विनी ।
श्रावणी पाण्डराभासा महाश्रावणिलक्षणा ॥
गोलोमी चाजलोमी च रोमशे कन्दसम्भवे ।
हंसपादीव विच्छिन्नैः पत्त्रैर्मूलसमुद्भवैः ॥
अथवा शङ्खपुष्पी च समाना सर्व्वरूपतः ।
वेगेन महताविष्टा सर्पनिर्म्मोकसन्निभा ॥
एषा वेगवती नाम जायते ह्यम्बुदक्षये ।
सप्तादौ सर्व्वरूपिण्यो याश्चौषध्यः प्रकीर्त्तिताः ॥
तासामुद्धरणं कार्य्यं मन्त्रेणानेन सर्व्वदा ।
महेन्द्ररामकृष्णानां ब्राह्मणानां गवामपि ॥
तपसा तेजसा वापि प्रशाम्यध्वं शिवाय वै ।
मन्त्रेणानेन मतिमान् सर्व्वानप्यभिमन्त्रयेत् ॥
अश्रद्दधानैरलसैः कृतघ्नैः पापकर्म्मभिः ।
नैवासादयितुं शक्याः सोमाः सोमसमास्तथा ॥
पीतावशेषममृतं देवैर्ब्रह्मपुरोगमैः ।

निहितं सोमवीर्य्यास्तु सोमे चाप्योषधीपतौ ॥
देवसुन्दे ह्रदवरे तथा सिन्धौ महानदे ।
दृश्यते च जलान्तेषु मध्ये ब्रह्मसुवर्चला ॥
आदित्यपर्णिनी ज्ञेया तथैवह्नि हि मचय ।
दृश्यतेऽजगरी नित्यं गोनसी चाम्बुदागमे ॥
काश्मीरेषु सरो दिव्यं नाम्ना चुद्रकमानसं ।
करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा ॥
गोलोमी चाजलोमीच महती श्रावणी तथा ॥
वसन्ते कृष्णसर्पाख्या गोनसी च प्रदृश्यते ।
कौशिकीं सरितं तीर्त्वा सञ्जयन्त्यास्तु पूर्व्वतः ॥
चितिप्रदेशो वल्मीकैराचितो योजनत्रयं ।
विज्ञेया तत्र कापोती श्वेता वल्मीकमूर्द्धसु ॥
मलये नलसेतौ च वेगवत्योषधी ध्रुवा ।
कार्त्तिक्यां पौर्णमास्याञ्च भक्षयेत्तामुपोषितः ।
सोमवद्यात्र वर्त्तेत फलं तावच्च कीर्त्तितं ॥
सर्वा विचेयास्त्वोषध्यः सोमेचाप्यर्बुदे गिरौ ।
रुग्शृङ्गैर्देवचरितैरम्बुदानीकभेदिभिः ॥
व्याप्तस्तीर्थैश्च विख्यातैः सिद्धर्षिसुरसेवितैः ।
गुहाभिर्भीमरूपाभिः सिंहोन्नादितकुक्षिभिः ॥
गजालोडिततोयाभिरापगाभिः समन्ततः ।
विविधैर्धातुभिश्चित्रैः सर्व्वतैवोपशोभितः ॥

नदीषु शैलेषु सरस्सु चापि पुण्येष्वरण्येषु तथाश्रमेषु ।
सर्वत्र सर्वाःपरिमार्गितव्याः सर्वत्र भूमिर्हि वसूनि धत्ते॥

---

॥ एकत्रिंशत्तमोऽध्यायः ॥

अथातः स्नेहोपयौगिकं चिकित्सितं व्याख्यास्यामः ॥

स्नेहसारोऽयं पुरुषःप्राणाश्च स्नेहभूयिष्ठाः स्नेहसाध्याश्च भवन्ति। स्नेहोहि पानानुवासनमस्तिष्कशिरोवस्त्युत्तरवस्तिनस्यकर्णपूरणगा चाभ्यङ्गभोजनेषूपयोज्यः ॥

तत्र द्वियोनिश्चतुर्व्विकल्पो ऽभिहितः स्नेहः स्नेहगुणाश्च । तत्र जङ्गमेभ्यो गव्यं घृतं प्रधानम् । स्थावरेभ्यस्तिलतैलं प्रधानमिति॥

अत ऊर्द्धं यथाप्रयोजनं यथाविधानं च स्थावरस्नेहानुपदे क्ष्यामः ।

तत्र तिल्वकैरण्डकोशाम्रदन्तीद्रवन्तीसप्तलाशङ्खिनीपलाशविषा णिकागवाचीकम्पिल्लकशम्पाकनीलिनीस्नेहा विरेचयन्ति ॥ जीमूत ककुटजकृतवेधनेक्ष्वाकुधामार्गवमदनस्नेहा वामयन्ति ॥ विडङ्ग खरमञ्जरीमधुशिग्रुसूर्य्यवल्लीपीलुसिद्धार्थकज्योतिष्मतीस्नेहाः शिरो विरेचयन्ति ॥

करञ्जपूतिककृतमालमातुलुङ्गेङ्गुदीकिराततिक्तकस्नेहा दुष्ट व्रणेषूपयुज्यन्ते । तुवरककपित्थकम्पिल्लकभल्लातकपटोलस्नेहा महा व्याधिषु । त्रपुसैर्व्वारुककर्कारुकतुम्बीकुष्माण्डस्नेहा मूत्रसङ्गेषु । कपोतवङ्कावल्गुजहरीतकीस्नेहाः शर्कराश्मरीषु। कुसुम्भसर्षपातसी

पिचुमर्दातिमुक्तकभाण्डीकटुतुम्बीकटभीस्नेहाः प्रमेहेषु । ताल नालिकेरपनसमोचपियालबिल्वमधूकश्लेष्मातकाम्रातकफलस्नेहाः पित्तसंसृष्टे वायौ। बिभीतकभल्लातकपिण्डीतकस्नेहाः कृष्णीकरणे श्रवणकङ्कुकटुण्डुकस्नेहाः पाण्डुकरणे। शिंशपागुरुसारस्नेहा दद्रु कुष्ठकिटिभेषु ॥

सर्व्व एव स्नेहा वातमुपघ्नन्ति। तैलगुणाश्च समासेन व्याख्याताः ॥

अतऊर्द्ध्वं कषायस्नेहपाकक्रममुपदेक्ष्यामः ॥

तत्र केचिदाहुस्त्वक्पत्रमूलादीनां भागस्तच्चतुर्गुणजलमावाप्य चतुर्भागावशेषं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः। स्नेह प्रभृतेषु षट्सु चतुर्गुणं द्रवमावाप्य चतुरस्राक्षसमान् भेषजपिण्डा नित्येष स्नेहपाककल्पः। एतत्तु न सम्यक्कस्मादागमाविद्धत्वात् ॥

पलकुडवादीनामतो मानन्तु व्याख्यास्यामः ॥

तत्र द्वादश धान्यमाषा मध्यमाः सुवर्णमाषकः। ते षोडश सु वर्णं। अथ मध्यमनिष्पावा वा एकोनविंशतिर्द्धरणं। तान्यर्द्ध तृतीयानि कर्षः। ततश्चोर्द्ध्वं चतुर्गुणमभिवर्द्धयन्तः पलकुडवप्रस्था ढकद्रोणा इत्यभिनिष्पद्यन्ते तुला पलशतं तानि विंशतिर्भारः शुष्काणामिदं मानमार्द्रद्रवाणाञ्च द्विगुणमिति ॥

तत्रान्यतमपरिमाणसंमितानां यथायोगं त्वक्पत्रमूलादीनामा तपपरिशोषितानां छेद्यानि खण्डशश्छेदयित्वा भेद्यान्यणुशो भेदयित्वावकुट्याष्टगुणेन षोडशगुणेन वाम्भसाभिषिच्य स्थाल्यां चतुर्भागावशिष्टं क्वाथयित्वापहरेदित्येष कषायपाककल्पः स्ने

हाञ्चतुर्गुणो द्रवः स्नेहचतुर्थांशो भेषजकल्कस्तदैकध्यं संसृज्य वि
पचेदित्येष स्नेहपाककल्पः ॥

अथ वा तत्रोदकद्रोणे त्वक्पत्रमूलादीनां तुलामावाप्य चतु
र्भागावशिष्टं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः । स्नेहकुडवे
भेषजपलं पिष्टं कल्कं चतुर्गुणं द्रवमावाप्य विपचेदित्येष स्नेह
पाककल्पः ॥

भवतश्चात्र ॥ स्नेहभेषजतोयानां प्रमाणं यत्र नेरितं ।
तत्रायं विधिरास्थेयो निर्दिष्टे तत्तदेव तु ॥
अनुक्तद्रवकार्य्ये तु सर्व्वत्र सलिलं मतं ।
कल्कक्वाथावनिर्द्दिश्य गणात्तस्मात्प्रयोजयेत् ॥

अतऊर्द्धं स्नेहपाकक्रममुपदेक्ष्यामः ॥

स तु त्रिविधस्तद्यथा मृदुर्मध्यमः खर इति । तत्र स्नेहौषधि
विवेकमात्रं यत्र भेषजं स मृदुरिति । मधूच्छिष्टमिव विशदमवि
लेपि यत्र भेषजं स मध्यमः । कृष्णमवसन्नमीषद्विशदं चिक्कणं च
यत्र भेषजं स खर इति । अतऊर्द्धं दग्धस्नेहो भवति । तं पुनः
साधु साधयेत् ॥ तत्र पानाभ्यवहारयोर्मृदुः । नस्याभ्यङ्गयोर्म
ध्यमः । वस्तिकर्णपूरणयोस्तु खर इति ॥

भवतश्चात्र ॥ शब्दस्योपशमे प्राप्ते फेणस्योपरमे तथा ।
गन्धवर्णरसादीनां सम्पत्तौ सिद्धिमादिशेत ॥
घृतस्यैवं विपक्वस्य जानीयात्कुशलो भिषक् ।
फेणोऽतिमात्रं तैलस्य शेषं घृतवदादिशेत ॥

अतऊर्द्धं स्नेहपानक्रममुपदेक्ष्यामः ॥ अथ लघुकोष्ठायातुराय कृतमङ्गलस्वस्तिवाचनायोदयगिरिशिखरसंस्थिते प्रतप्तकनकनिकरपीतलोहिते सवितरि यथाबलं तैलस्य घृतस्य वा मात्रां पातुं प्रयच्छेत्। पीतमात्रे चोष्णोदकेनोपस्पृश्य सोपानत्को यथासुखं विहरेत् ॥

रूक्षक्षतविषार्त्तानां वातपित्तविकारिणां।
हीनमेधास्मृतीनाञ्च सर्पिःपानं प्रशस्यते ॥
क्रमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः ।
पिवेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनश्चये ॥
व्यायामकर्षिताः शुष्करेतोरक्तामहारुजः।
महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः ॥
क्रूराशयाः क्लेशसहा वातार्त्ता दीप्तवह्नयः।
मज्जानमाप्नुयुः सर्व्वे सर्पिर्व्वा स्वौषधान्वितम् ॥
केवलं पैत्तिके सर्पिर्व्वातिके लवणान्वितं।
देयं बहुकफे चापि व्योषक्षारसमायुतम् ॥
दोषाणामल्पभूयस्त्वं संसर्गं समवेक्ष्य च।
युञ्ज्यात्त्रिषष्टिधा भिन्नैः समासव्यासतो रसैः ॥
स्नेहसात्म्यः क्लेशसहः काले नात्युष्णशीतले ।
अच्छमेव पिवेत्स्नेहमच्छपानं हि पूजितम् ॥
शीतकाले दिवास्नेहमुष्णकाले पिवेन्निशि।
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा।

वातपित्ताधिकस्योष्णे तृण्मूर्च्छोन्मादकारकः ॥
शीते वातकफार्त्तस्य गौरवारुचिशूलकृत् ।
स्नेहपीतस्य चेत्तृष्णा पिबेदुष्णोदकं नरः ॥
एवं चानुपशाम्यन्त्यां स्नेहमुष्णाम्बुना वमेत् ।
दिह्याच्छीतैः शिरः शीतं तोयं चाप्यवगाहयेत् ॥
या मात्रा परिजीर्य्येत चतुर्भागगतेऽहनि ।
सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता ॥
या मात्रा परिजीर्य्येत तथार्द्धदिवसे गते ।
सा वृष्या वृंहणी चैव मध्यदोषे च पूजिता ॥
या मात्रा परिजीर्य्येत चतुर्भागावशेषिते ।
स्नेहनीया च सा मात्रा बहुदोषे च पूजिता ॥
या मात्रा परिजीर्य्येत्तु तथा परिणतेऽहनि ।
ग्लानिमूर्च्छामदान्हित्वा सा मात्रा पूजिता भवेत् ॥
अहोरात्रादसन्दुष्टा या मात्रा परिजीर्य्यति ।
सा तु कुष्ठविषोन्मादग्रहापस्मारनाशिनी ॥
यथाग्नि प्रथमां मात्रां पाययेत विचक्षणः ।
पीतोह्यतिबहुस्नेहो जनयेत्प्राणसंशयं ॥
मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्य्यति ।
विष्टभ्यचापि जीर्य्येत्तं वारिणोष्णेन वामयेत् ॥
जीर्णाजीर्णविशङ्कायां स्नेहस्योष्णोदकं पिबेत् ।
तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा ॥

स्युः पच्यमाने तृड्दाहभ्रममदारतिक्लमाः ।
परिषिच्याद्भिरुष्णाभिर्जीर्णस्नेहं ततो नरं ॥
यवागूं पाययेच्चोष्णां कामं क्लिन्नाल्पतण्डुलां ।
देयौ यूषरसौ वापि सुगन्धी स्नेहवर्जितौ ॥
कृतौ वात्यल्पसर्पिष्कौ यवागूर्वा विधीयते ।
पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहं तथा ॥
सप्त रात्रात्परं स्नेहः सात्मीभवति सेवितः ।
सुकुमारं कृशं वृद्धं शिशुं स्नेहद्विषं तथा ॥
तृष्णार्त्तमुष्णकाले च सह भक्तेन पाययेत् ।
पिप्पल्यो लवणं स्नेहाश्चत्वारो दधिमस्तुकः ॥
पीतमेकध्यमेतद्धि सद्यःस्नेहनमुच्यते ।
भृष्टमांसरसे स्निग्धा यवागूः सूपकल्पिता ॥
सक्षुद्रा पीयमाना तु सद्यःस्नेहनमुच्यते ।
सर्पिष्मती पयःसिद्धा यवागूः स्वल्पतण्डुला ॥
सुखोष्णा सेव्यमाना तु सद्यः स्नेहनमुच्यते ।
शर्करार्चूर्णसंसृष्टे दोहनस्थे घृते तु गां ॥
दुग्ध्वा क्षीरं पिबेद्यः सद्यःस्नेहनमुच्यते ।
यवकोलकुलत्थानां क्वाथो भागत्रयान्वितः ॥
पयोदधिसुराक्षीरघृतभागैः समन्वितः ।
सिद्धमेतैर्घृतं पीतं सद्यःस्नेहनमुत्तमं ॥
राज्ञे राजसमेभ्यो वा देयमेतद्घृतोत्तमं ।

बलहीनेषु वृद्धेषु मृद्वग्निस्त्रीमहात्मसु ॥
अल्पदोषेषु योज्याः स्युर्ये योगाः सम्यगीरिताः ।
विवर्जयेत्स्नेहपानमजीर्णी चोदरी ज्वरी ॥
दुर्बलोऽरोचकी स्थूलो मूर्च्छार्त्तो मदपीडितः ।
च्छर्द्यर्दितः पिपासार्त्तः श्रान्तः पानक्लमान्वितः ॥
दत्तवस्तिर्व्विरिक्तश्च वान्तो यश्चापि मानवः ।
अकाले दुर्दिने चैव नच स्नेहं पिवेन्नरः ॥
अकाले च प्रसूता स्त्री स्नेहपानं विवर्जयेत् ।
स्नेहपानाद्भवन्त्येषां नृणां नानाविधा गदाः ॥
गदा वा कृच्छ्रतां यान्ति न सिध्यन्त्यथ वा पुनः ।
गर्भाशये सशेषाः स्युरक्तक्लेदमलास्ततः ॥
स्नेहं जह्यान्निषेवेत पाचनं रूक्षमेव च ।
दश रात्रात्ततः स्नेहं यथावदवचारयेत् ॥
पुरीषं ग्रथितं रूक्षं कृच्छ्रादन्नं विपच्यते ।
उरोविदहते वायुः कोष्ठादुपरि धावति ॥
दुर्व्वर्णो दुर्व्वलश्चैव रूक्षो भवति मानवः ।
ग्लानिः सदनमङ्गानामधस्तात्स्नेहदर्शनं ॥
सम्यक स्निग्धस्य लिङ्गानि स्नेहदोषस्तथैव च ।
भक्तद्वेषो मुखस्रावो गुददाहः प्रवाहिका ॥
पुरीषातिप्रवृत्तिश्च भृशस्निग्धस्य लक्षणं ।
रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणं ॥

श्यामाककोरदूषान्नतक्रपिण्याकशक्तुभिः ॥
दीप्तान्तरग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्ब्बलवर्णयुक्तः ।
दृढेन्द्रियो मन्दजरः शतायुःस्नेहोपयोगी पुरुषो भवेत्तु ॥
स्नेहो हितो दुर्ब्बलवह्निदेहसन्धुक्षणे व्याधिनिपीडितस्य
बलान्वितोभोजनदोषजातैः प्रमर्द्दितुं तौ सहसा न साध्यौ॥

---

॥ द्वात्रिंशत्तमोऽध्यायः ॥

अथातः स्वेदावचारणीयं चिकित्सितं व्याख्यास्यामः ॥

चतुर्व्विधः स्वेदस्तद्यथा । तापस्वेद उष्मस्वेद उपनाहस्वेदो द्रवस्वेद इति । अत्र सर्व्वस्वेदविकल्पावरोधः ॥

तत्र तापस्वेदः । पाणिकांस्यकन्दुकपालवालुकावस्त्रैः प्रयुज्यते शयानस्य चाङ्गतापो बहुशः खादिराङ्गारैरिति ॥

उष्मस्वेदस्तु कपालपाषाणेष्टकालोहपिण्डानग्निवर्णानद्भिरासिञ्चेदम्लद्रव्यैर्वातैरार्द्रलक्तकपरिवेष्टितमङ्गप्रदेशं स्वेदयेत्॥ मांसरसपयोदधिधान्याम्लवातहरपत्रभङ्गक्वाथपूर्णां वा कुम्भीमनुतप्तां प्राच्छाद्योष्माणं गृह्णीयात् ॥ पार्श्वच्छिद्रेण वा कुम्भेनाधोमुखेन तस्य मुखमभिन्धाय तस्मिन् छिद्रे हस्तिशुण्डाकारां नाडीं प्रणिधाय तं स्वेदयेत् ॥

सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणं ॥
सुखा सर्व्वाङ्गगा ह्येषा न च क्लिश्नाति मानवं।

व्यामार्द्धमात्रा त्रिवक्रा हस्तिहस्तसमाकृतिः ॥
स्वेदनार्थे हिता नाडी कैलिञ्जी हस्तिशुण्डिका ।
पुरुषायाममात्राञ्च भूमिमुत्कीर्य्य खादिरैः ॥
काष्ठैर्दग्ध्वा तथाभ्युक्ष्य चीरधान्याम्लवारिभिः ।
पत्रभङ्गैरवच्छाद्य शयानं स्वेदयेत्ततः ॥
पूर्ववत्स्वेदयेद्दग्ध्वा भस्मापोह्यापि वा शिलां ।

पूर्ववत् कुटीं वा चतुर्द्वारां कृत्वा तस्यामुपविष्टस्यान्तश्चतुर्द्वारेऽङ्गारानुपसन्धाय तं स्वेदयेत् ॥ धान्यानि वा सम्यगुपस्वेद्यास्तीर्य्य किलिञ्जेऽन्यस्मिन्वा तत्प्रतिरूपके शयानं प्रावृत्य स्वेदयेदेवं पांशुगोशकृत्तुषबुसपलालोष्मभिः स्वेदयेत् ॥

उपनाहस्वेदस्तु वातहरमूलकल्कैरम्लपिष्टैर्लवणप्रगाढैः सुस्निग्धैःसुखोष्णैः प्रदिह्य स्वेदयेत् । एवं काकोल्यादिभिःसुरसादिभिस्तिलातसीसर्षपकल्कैः कृशरापायसोत्कारिकाभिर्व्वेशवारैः शाल्वणैर्व्वा तनुवस्त्रावनद्धैः स्वेदयेत् ॥

द्रवस्वेदस्तु वातहरद्रव्यक्वाथपूर्णे कोष्ण कटाहे द्रोण्यां वा विगाह्य स्वेदयेत् । एवं पयोमांसरसयूषतैलधान्याम्लघृतवसामूत्रेष्ववगाहेत सुखोष्णैः कषायैः परिषिञ्चेदिति ॥

तत्र तापोष्मस्वेदौ विशेषतः श्लेष्मघ्नौ ॥ उपनाहस्वेदो वातघ्नः ॥ अन्यतरस्मिन्पित्तसंसृष्टे द्रवस्वेद इति ॥ कफमेदोऽन्विते वायौ निवातातपगुरुप्रावरणनियुद्धाध्वव्यायामभारहरणामर्षैः स्वेदमुत्पादयेदिति ॥

भवन्ति चात्र ॥ चतुर्व्विधो योऽभिहितो द्विधा स्वेदः प्रयुज्यते।
सर्व्वस्मिन्नेव देहे तु देहस्यावयवे तथा ॥
येषां नस्यं विधातव्यं वस्तिश्चैवहि देहिनां ।
शोधनीयाश्च ये केचित्पूर्व्वं स्वेद्यास्तु ते मताः ॥
पश्चात्स्वेद्या हृते शल्ये मूढगर्भानुपद्रवाः ।
सम्यक् प्रजाता काले या पश्चात्स्वेद्या विजानता ॥
स्वेद्यं पूर्व्वं च पश्चाच्च भगन्दर्य्यर्शसस्तथा ।
अश्मर्य्यातुरो जन्तुः शेषान् शास्त्रे प्रचक्ष्महे ॥
नानभ्यक्ते नापि चास्निग्धदेहे स्वेदो योज्यः स्वेदविद्भिः कथञ्चित्।
दृष्टं लोके काष्ठमस्निग्धमाशु गच्छेद्भङ्गं स्वेदयोगैर्गृहीतं ॥
अग्नेर्दीप्तिं मार्द्दवं त्वक्प्रसादं भक्तश्रद्धां श्रोतसां निर्म्मलत्वं ।
कुर्य्यात्स्वेदो हन्ति निद्रां सतन्द्रां सन्धींस्तब्धांश्चेष्टयेदाशु युक्तः॥
स्नेहक्लिन्ना धातुसंस्थाश्च दोषाः स्वस्थानस्था ये च मार्गेषु लीनाः।
सम्यक्स्वेदैर्व्याजितैस्ते द्रवत्वं प्राप्ताः कोष्ठं यान्ति देहादशेषात ॥
स्वेदास्रावो व्याधिहानिर्लघुत्वं शीतार्थित्वं मार्द्दवं चातुरस्य।
सम्यक् स्विन्ने लक्षणं प्राहुरेतन्मिथ्या स्विन्ने व्यत्ययेनैतदेव॥
स्विन्नेऽत्यर्थं सन्धिपीडा विदाहः स्फोटोत्पत्तिः पित्तरक्तप्रकोपः।
मूर्च्छाभ्रान्तिर्द्दाहतृष्णे क्लमश्च कुर्य्यात्तूर्णं तत्र शीतं विधानं॥
पाण्डुर्म्मेही पित्तरक्ती क्षयार्त्तः क्षामोऽजीर्णी चोदरार्त्तो विषार्त्तः।
तृट्छर्द्यार्त्तो गर्भिणी पीतमद्यानैते स्वेद्या यश्च मर्त्त्योऽतिसारी ॥
स्वेदादेषां यान्तिदेहा विनाशञ्चासाध्यत्वं यान्ति चैषां विकाराः।

एतेषां स्वेदसाध्या ये व्याधयस्तेषु बुद्धिमान् ।
मृदून्स्वेदान् प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥
सर्व्वान् स्वेदान्निवाते च जीर्णान्नस्यावचारयेत् ।
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ॥
स्विद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत् ।
सम्यक् स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः ॥
स्वभ्यक्तं प्रावृताङ्गञ्च निवातशरणस्थितम् ।
भोजयेदनभिष्यन्दि सर्व्वं वाचारमादिशेत ॥

---

॥ त्रयस्त्रिंशत्तमोऽध्यायः ॥

॥ अथातो वमनविरेचनसाध्योपद्रवचिकित्सितं व्याख्यास्यामः ॥

दोषाः क्षीणा वृंहयितव्याः कुपिताः प्रशमयितव्या वृद्धा निर्हर्त्तव्याः समाः परिपाल्या इति सिद्धान्तः । प्राधान्येन वमनविरेचने वर्त्तेते निर्हरणे दोषाणां । तस्मात्तयोर्व्विधानमुच्यमानमुपधारय ॥

तथातुरं स्निग्धं स्विन्नमभिष्यन्दिभिराहारैरनवबद्धदोषमवलोक्य श्वोवमनं पाययितास्मीति सम्भोजयेत् तीक्ष्णाग्निं बलवन्तं बहुदोषं महाव्याधिपरीतं वमनसात्म्यञ्च ॥

भवति चात्र ॥ पेशलैर्व्विविधैरन्नैर्दोषानुत्क्लेश्य देहिनः ।
स्निग्धस्विन्नाय वमनं दत्तं सम्यक्प्रवर्त्तते ॥

अथापरेद्युःपूर्व्वाह्णे साधारणे काले वमनद्रव्यकषायकल्कचूर्ण

स्नेहानामन्यतमस्य मात्रां पाययित्वा वामयेत्। यथायोगं कोष्ठविशेषमवेक्ष्यासात्म्यबीभत्सदुर्गन्धदुर्दर्शनानि च वमनानि विदध्यात्। अतो विपरीतानि विरेचनानि॥

तत्र सुकुमारं कृशं बालं वृद्धं भीरुं वा वमनसाध्येषु विकारेषु क्षीरदधितक्रयवागूनामन्यतममाकण्ठं पाययेत्। पीतौषधञ्च पाणिभिरग्नितप्तैः प्रताप्यमानं मुहूर्त्तमुपेक्षेत॥

तस्य च स्वेदप्रादुर्भावेण शिथिलतामापन्नं स्वेभ्यः स्थानेभ्यः प्रचलितं कुक्षिमनुसृतं जानीयात्ततः प्रवृत्तहृल्लासं ज्ञात्वा जानुमात्रासनोपविष्टमाप्तैर्ललाटे पृष्ठे पार्श्वयोः कण्ठे च पाणिभिः सुपरिगृहीतमङ्गुलीगन्धर्व्वहस्तोत्पलनालानामन्यतमेन कण्ठमभिस्पृशन्तं वामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति॥

॥ भवतश्चात्र॥

कफप्रसेकं हृदयाविशुद्धिं कण्डूञ्च दुश्छर्द्दितलिङ्गमाहुः।
पित्तातियोगञ्च विसंज्ञताञ्च हृत्कण्ठपीडामपि चातिवान्ते॥
पित्ते कफस्यानुसुखं प्रवृत्ते शुद्धेषु हृत्कण्ठशिरःसु चापि।
लघौ च देहे कफसंस्रवे च स्थितेसुवान्तं पुरुषं व्यवस्येत्॥

सम्यग्वान्तं चैनमभिसमीक्ष्य स्नेहनविरेचनशमनानां धूमानामन्यतमं सामर्थ्यतः पाययित्वाचारिकमादिशेत्॥

॥ भवन्तिचात्र॥

ततोऽपराह्णे शुचिशुद्धदेहमुष्णाभिरद्भिः परिषिक्तगात्रं।
कुलत्थमुद्गाढकिजाङ्गलानां यूषैरसैर्व्वाप्युपभोजयेत्तु॥

कासोपलेपस्वरभेदनिद्रातन्द्रास्यदौर्गन्ध्यविषोपसर्गाः ।
कफप्रसेकग्रहणीप्रदोषा न सन्ति जन्तोर्व्वमतः कदाचित् ।
छिन्ने तरौ पुष्पफलप्ररोहा यथा विनाशं सहसा व्रजन्ति ॥
तथा हृते श्लेष्मणि शोधनेन तज्जा विकाराः प्रशमं प्रयान्ति ।
न वामयेत्तैमिरिकोर्द्ध्ववातगुल्मोदरप्लीहकृमिश्रमार्त्तान् ॥
स्थूलक्षतक्षीणकृशातिवृद्धमूत्रातुरान्केवलवातरोगान् ।
स्वरोपघाताध्ययनप्रसक्तदुश्छर्द्दिदुःकोष्ठहृडार्त्तबालान् ॥
ऊर्द्ध्वास्रपित्तिक्षुधितातिरूक्षगर्भिण्युदावर्त्तिनिरूहितांश्च ।

अवम्यवमनाद्रोगाः कृच्छ्रतां यान्ति देहिनां ।
असाध्यतां वा गच्छन्ति नैते वाम्यास्ततः स्मृताः ॥
एतेऽप्यजीर्णव्यथिता वाम्या ये च विषातुराः ।
अतीव चोल्वणकफास्ते च स्युर्मधुकाम्बुना ॥

वाम्यास्तु विषशोषस्तन्यदोषविषममन्दाग्न्युन्मादापस्मारश्लीपदार्बुदविदारिकामेदोमेहगरज्वरारुच्यपच्यामातीसारहृद्रोगचित्तविभ्रमविसर्पविद्रध्यजीर्णमुखप्रसेकहृल्लासश्वासकासपीनसपूतीनासकण्ठौष्ठवक्त्रपाककर्णस्रावाधिजिह्वोपजिह्विकागलशुण्डिकाधःशोणितपित्तिनः कफस्थानजेषु विकारेष्वन्येषु कफव्याधिपरीतेष्विति॥

विरेचनमपि स्निग्धस्विन्नाय वान्ताय च देयं ॥ अथातुरं श्वोविरेचनं पाययितास्मीति लघु भोजयेत् फलाम्लमुष्णोदकं चैनमनुपाययेत्॥ अथापरेऽहनि विगतश्लेष्माणमातुरोपक्रमणीयादवेक्ष्यातुरमथास्मै औषधमात्राम्पातुं प्रयच्छेत् ॥

तत्र मृदुः क्रूरो मध्य इति त्रिविधः कोष्ठो भवति॥ तत्र बहुपित्तो मृदुः स दुग्धेनापि विरिच्यते। बहुवातश्लेष्मा क्रूरः स दुर्व्विरेच्यः। समदोषो मध्यमः स साधारण इति। तत्र मृदो मात्रा मृद्वी तीक्ष्णा क्रूरे मध्ये मध्या कर्त्तव्येति। पीतौषधश्च तन्मनाः शय्याभ्यासे विरिच्यते॥

विरेचनं पीतवांस्तु न वेगान्धारयेद्बुधः।
निवातशायी शीताम्बु न स्पृशेन्न प्रवाहयेत्॥

यथा च वमने प्रसेकौषधकफपित्तानिलाः क्रमेण गच्छन्ति। एवं विरेचने मूत्रपुरीषपित्तौषधकफा इति॥

भवन्ति चात्र॥

स्याद्दुर्व्विरिक्ते कफपित्तकोपो दाहोऽरुचिर्गौरवमग्निसादः।
हृत्कुक्ष्यशुद्धिः परिदाहकण्डूविण्मूत्रसङ्गाश्च न सद्विरिक्ते॥
मूर्च्छागुदभ्रंशकफातियोगाः शूलोद्गमश्चातिविरिक्तलिङ्गं।
गतेषु दोषेषु कफान्वितेषु नाभ्या लघुत्वे मनसश्च तुष्टौ॥
गतेऽनिले चाप्यनुलोमभावं सम्यग्विरिक्तं मनुजं व्यवस्येत्॥
मन्दाग्निमक्षीणमसद्विरिक्तं न पाययेताहनि तत्र पेयां।
क्षीणं तृडार्त्तं सुविरेचितञ्च तन्वीमशीतां लघु पाययेत॥
बुद्धेः प्रसादं बलमिन्द्रियाणां धातुस्थिरत्वं बलमग्निदीप्तिं।
चिराच्च पाकं वयसः करोति विरेचनं सम्यगुपास्यमानं॥
यथोदकानामुदकेऽपनीते चरस्थिराणां भवति प्रणाशः।
पित्ते हृते त्वेवमुपद्रवाणां पित्तात्मकानां भवति प्रणाशः॥

मन्दाग्न्यतिस्नेहितबालवृद्धस्थूलाः क्षतक्षीणभयोपतप्ताः ।
श्रान्तस्तृडार्त्तोऽपरिजीर्णभक्तो गर्भिण्यधोगच्छति यस्य चासृक् ॥
नवप्रतिश्यायमदात्ययी च नवज्वरी या च नवप्रसूता ।
शल्यार्दिताश्चाप्यविरेचनीयाः स्नेहादिभिर्येत्वनुपस्कृताश्च ॥
अत्यर्थपित्ताभिपरीतदेहान्विरेचयेत्तानपि मन्दवीर्य्यैः ।
विरेचनैर्यान्ति नरा विनाशमज्ञप्रयुक्तैरविरेचनीयाः ॥

विरेच्यास्तु ज्वरगरारुच्यर्शोऽर्बुदोदरग्रन्थिविद्रधिपाण्डुरोगापस्मारहृद्रोगवातरक्तभगन्दरच्छर्दियोनिरोगविसर्पगुल्मपक्वाशयरुग्विबन्धविसूचिकालसकमूत्राघातकुष्ठविस्फोटकप्रमेहानाहप्लीहशोफवृद्धिशस्त्रक्षतक्षाराग्निदग्धदुष्टव्रणाक्षिपाककाचतिमिराभिष्यन्दशिरःकर्णाक्षिनासास्यगुदमेढ्रदाहोर्द्धरक्तपित्तकृमिकोष्ठिनः पित्तस्थानजेषु विकारेष्वन्येषु च पैत्तिकव्याधिपरीताश्चेति ॥

सरत्वसौक्ष्म्यतैक्ष्ण्यौष्ण्यविकाशित्वैर्विरेचनं ।
वमनन्तु हरेद्दोषंप्रकृत्यागतमन्यथा ॥
यात्यधोदोषमादाय पच्यमानं विरेचनं ।
गुणोत्कर्षाद्व्रजत्यूर्द्धमपक्वं वमनं पुनः ॥
मृदुकोष्ठस्य दीप्ताग्नेरतितीक्ष्णं विरेचनं ।
न सम्यग्निर्हरेद्दोषानतिवेगप्रधावितान् ॥
पीतं यदौषधं प्रातर्भुक्तपाकसमे क्षणे ।
पक्तिं गच्छति दोषांश्च निर्हरेत्तत्प्रशस्यते ॥
दुर्बलस्य चलान्दोषानल्पानल्पान्पुनः पुनः ।

हरेत् प्रभूतानल्पांस्तु शमयेत्प्रच्युतानपि ॥
हरेद्दोषांश्चलान्पक्वान्बलिनो दुर्बलस्य च।
चला ह्युपेक्षिता दोषाः क्लेशयेयुश्चिरं नरं ॥
मन्दाग्निं क्रूरकोष्ठञ्च सक्षारलवणैर्घृतैः।
सन्धुक्षिताग्निं स्निग्धञ्च स्विन्नञ्चैव विरेचयेत् ॥
स्निग्धस्विन्नस्य भैषज्यैर्दोषस्तूत्क्लेशितो बलात्।
विलीयते न मार्गेषु स्निग्धे भाण्ड इवोदकं ॥
नचातिस्नेहपीतस्तु पिबेत्स्नेहविरेचनं।
दोषाः प्रचलिताः स्थानाद्भूयः श्लिष्यन्ति वर्त्मसु ॥
विषाभिघातपिडकाशोफपाण्डुविसर्पिणः।
नातिस्निग्धा विशोध्याः स्युस्तथा कुष्ठप्रमेहिणः ॥
विरूक्ष्य स्नेहसात्म्यन्तु भूयः संस्नेह्य शोधयेत्।
तेन दोषा हृतास्तस्य भवन्ति बलवर्द्धनाः ॥
प्रागपीतं नरं शोध्यं पाययेतौषधं मृदु।
ततो विज्ञातकोष्ठस्य कार्य्यं संशोधनं पुनः ॥
सुखं दृष्टफलं हृद्यमल्पमात्रं महागुणं।
व्यापत्स्वल्पात्ययं चापि पिबेन्नृपतिरौषधं ॥
स्नेहस्वेदावनभ्यस्य यस्तु संशोधनं पिबेत्।
दारुशुष्कमिवानामे देहस्तस्य विशीर्य्यते ॥
स्नेहस्वेदप्रचलिता रसैः स्निग्धैरुदीरिताः।
दोषाः कोष्ठगता जन्तोः सुखा हर्त्तुं विशोधनैः ॥

---

## ॥ चतुस्त्रिंशत्तमोऽध्यायः ॥

अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः ॥

वैद्यातुरनिमित्तं वमनं विरेचनं च पञ्चदशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्धं विरेचनस्येति पृथक्। सामान्यमुभयोः सावशेषौषधत्वं जीर्णौषधत्वं हीनाधिकदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावः प्रवाहिका हृदयोपसरणं विबन्ध इति ॥

तत्र बुभुक्षापीडितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चावतिष्ठमानं दुर्ब्बलस्य वा गुणसामान्यभावाद्वमनमधोगच्छति। तत्रेप्सितानवाप्तिर्दोषोत्कर्षश्च तमाशु स्नेहयित्वा भूयस्तीक्ष्णतरैर्वामयेत्। अपरिशुद्धामाशयस्योत्क्लिष्टश्लेष्मणः सशेषान्नस्य वाऽहृद्यमतिप्रभूतं विरेचनं पीतमूर्द्धं गच्छति तत्राशुद्धामाशयमुल्बणश्लेष्माणमाशु वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत्। आमान्वये त्वामवत्संविधानं। अहृद्ये ऽतिप्रभूते च हृद्यं प्रमाणं युक्तञ्च। अतऊर्द्धमुत्तिष्ठत्यौषधे न तृतीयं पाययेत्। ततस्त्वेनं मधुघृतफाणितयुक्तैर्लेहैर्विरेचयेत्॥

दोषविग्रथितमल्पमौषधमवस्थितमूर्द्धभागिकमधोभागिकं वा न स्रंसयति दोषान्। तत्र तृष्णापार्श्वशूलं छर्द्दिर्मूर्च्छापर्वभेदो हृल्लासारत्युद्गाराविशुद्धिश्च भवति। तमुष्णाभिरद्भिराशु वामयेत्। सावशेषौषधमतिप्रधावितदोषमतिबलमसम्यग्विरिक्तमप्येवं वामयेत। क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्तवत्पाकमुपैति तत्र समुदीर्णा दोषा यथा कालमनिह्रियमाणा व्याधिं बलवि

भ्रमञ्चापादयन्ति। तमनल्पममन्दमौषधञ्च पाययेत्॥ अस्निग्ध स्विन्नेनाल्पगुणं वा भेषजमुपयुक्तमल्पान्दोषानहन्ति॥

तत्र वमने दोषशेषः गौरवमुत्क्लेशं हृदयाविशुद्धिं व्याधिवृद्धिं करोति तत्र यथायोगं पाययित्वा वामयेद्दृढतरं। विरेचने गुद परिकर्त्तनमाध्मानं शिरोगौरवमनिस्सरणं वा वायोर्व्याधिवृद्धिं करोति। तमुपपाद्य भूयःस्नेहस्वेदाभ्यां विरेचयेद्दृढतरं। दृढं बहुप्रचलितदोषं वा तृतीये दिवसे ऽल्पगुणं चेति।

अस्निग्धस्विन्नेन रूक्षमौषधमुपयुक्तमब्रह्मचारिणा वा वायुं कोपयति। तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणिमन्यामर्म्मशूलं मूर्च्छां भ्रमं संज्ञानाशञ्च करोति। तमभ्यज्य धान्यस्वेदेन स्वेदयित्वा यष्टीमधुकविपक्वेन तैलेनानुवासयेत्। स्नेहस्वेदाभ्यामविभावितशरीरेणाल्पमौषधमल्पगुणं वा पीतमूर्द्ध्वमधोवा नाभ्येति दोषांश्चोत्क्लिश्य तैः सह बलक्षयमापादयति। तत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति तमयोगमित्याचक्षते तमाशु वामयेन्मदनफललवणाम्बुभिर्व्विरेचयेत्तीक्ष्णतरैः कषायैश्च। दुर्व्वान्तस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपिडकाज्वराङ्गमर्दनिस्तोदनानि कुर्व्वन्ति॥ ततस्तानवशेषान्महौषधेनापहरेत्। अस्निग्धस्विन्नस्य मृदुविरिक्तस्याधोनाभेःस्तब्धपूर्णोदरता शूलं वातपुरीषसङ्गः कण्डूमण्डलप्रादुर्भावो भवति तमास्थाप्य पुनःसंस्नेह्य विरेचयेत्तीक्ष्णेन। नातिवप्रर्त्तमाने तिष्ठति वा दुष्टसंशोधने तत्सन्तेजनार्थमुष्णोदकं पाययेत पाणितापैश्च पार्श्वोदरमुपस्वेदयेत्। ततःप्रवर्त्तन्ते

दोषाः । अनुप्रवृत्ते चाल्पदोषे जीर्णौषधं बहुदोषमहःशेषं बलञ्चावेक्ष्य भूयोमात्रां विदध्यात् । अप्रवृत्तदोषं दशरात्रादूर्द्धमुपसंस्कृतदेहं स्नेहस्वेदाभ्यां भूयः शोधयेत् । दुर्विरेच्यमास्थाप्य पुनः संस्नेह्य विरेचयेत् ॥

ह्रीभयलोभैर्वेगाघातशीलाः प्रायशः स्त्रियो राजसमीपस्था वणिजः श्रोत्रियाश्च भवन्ति । तस्मादेते दुर्विरेच्या बहुवातत्वादत एव तानतिस्निग्धान् स्वेदोपपन्नान् शोधयेत् । स्निग्धस्विन्नस्यातिमात्रमतिमृदुकोष्ठस्य वा तीक्ष्णाधिकदत्तमौषधमतियोगं कुर्य्यात् ॥

तत्र वमनातियोगे पित्तातिप्रवृत्तिर्बलविस्रंसो वातकोपश्च बलवान् भवति तं घृतेनाभ्यज्यावगाह्य शीतास्वप्सु शर्करामधुमिश्रैर्लेहैरुपचरेद्यथास्वं ॥ विरेचनातियोगे कफस्यातिप्रवृत्तिरुत्तरकालञ्च सरक्तस्य तत्रापि बलविस्रंसो वातकोपश्च बलवान्भवति तमतिशीताम्बुभिः परिषिच्यावगाह्य वा शीतैस्तण्डुलाम्बुभिर्मधुमिश्रैश्छर्द्दयेत् । पिच्छावस्तिं चास्मै दद्यात् क्षीरसर्पिषा चैनमनुवासयेत् प्रियङ्ग्वादिं चास्मै तण्डुलाम्बुना पातुं प्रयच्छेत् । क्षीररसयोश्चान्यतरेण भोजयेत् ॥

तस्मिन्नेव वमनातियोगे प्रवृद्धे शोणितं ष्ठीवति छर्दयति वा तत्र जिह्वानिःसरणमक्ष्णोर्व्यावृत्तिर्हनुसंहननं तृष्णा हिक्का ज्वरो वैसंज्ञ्यमित्युपद्रवा भवन्ति तमजास्टक्चन्दनोशीराञ्जनलाजचूर्णैः सशर्करोदकैर्मन्थं पाययेत् ॥ फलरसैर्वा सघृतक्षौद्रशर्करैः

शुङ्गाभिर्वा वटादीनां पेयां सिद्धां सक्षौद्रां वर्चोग्राहिभिर्वा पयसा जाङ्गलरसेन वा भोजयेत्। अतिस्रुतशोणितविधानेनोपचरेत्॥

जिह्वामतिसर्पितान्त्रिकटुकलवणचूर्णप्रघृष्टां तिलद्राक्षाप्रलिप्तां वा पीडयेत् प्रविष्टायामम्लमन्ये तस्य पुरस्तात्खादयेयुः। व्यावृत्ते चाक्षिणी घृताभ्यक्ते पीडयेत्। हनुसंहनने वातश्लेष्महरं नस्यं स्वेदांश्च विदध्यात्। तृष्णादिषु च यथास्वं प्रतिकुर्वीत। विसंज्ञे वेणुवीणागीतस्वनं श्रावयेत्॥

विरेचनातियोगे च सचन्द्रकं सलिलमधःस्रवति ततो मांसधावनप्रकाशमुत्तरकालं जीवशोणितञ्च ततोगुदनिःसरणं वेपथुर्वमनातियोगोपद्रवाश्चास्य भवन्ति तमपि निस्रुतशोणितविधानेनोपचरेत्। निःसर्पितगुदस्य गुदमभ्यज्य परिस्वेद्यान्तःपीडयेत् क्षुद्ररोगचिकित्सितं वा वीक्षेत। वेपथौ वातव्याधिविधानं कुर्वीत॥ जिह्वानिस्सरणादिषूक्तः प्रतीकारः। अतिप्रवृत्ते वा जीवशोणिते काश्मरीफलबदरीदूर्वोशीरैः शृतेन पयसा घृतमण्डाञ्जनयुक्तेन सुशीतेनास्थापयेत्। न्यग्रोधादिकषायक्षीरेक्षुरसघृतशोणितसंसृष्टैश्चैनं वस्तिभिरुपाचरेत्। शोणितष्ठीवने रक्तपित्तरक्तातीसारक्रियाश्चास्य विदध्यात्। न्यग्रोधादिञ्चास्य विदध्यात्पानभोजनेषु।

जीवशोणितरक्तपित्तयोश्च जिज्ञासार्थं तस्मिन् पिचुश्लोतं वाक्षिपेत्। यद्युष्णोदकप्रक्षालितमपि वस्त्रं रञ्जयति तज्जी

वशोणितमवगन्तव्यं सभक्तंच शुने दद्यात् भक्तसंमिश्रं वा स यद्युप भुञ्जीत तज्जीवशोणितमवगन्तव्यं ॥

सशेषान्नेन बहुदोषेण रूक्षेणानिलप्रायकोष्ठेनानुष्णमस्निग्धं वा पीतमौषधमाध्मापयति तत्रानिलमूत्रपुरीषसङ्गः समुन्नद्धोदरता पार्श्वभङ्गो गुदवस्तिनिस्तोदनं भक्तारुचिश्च भवति तच्चाध्मानमित्याचक्षते तमुपस्वेद्यानाहवर्त्तिदीपनवस्तिक्रियाभिरुपचरेत् ॥

क्षामेणातिमृदुकोष्ठेन मन्दाग्निना रूक्षेण वातितीक्ष्णोष्णातिलवणमतिरूक्षं वा पीतमौषधं पित्तानिलौ प्रदूष्य परिकर्त्तिकामापादयति तत्र गुदनाभिमेढ्रवस्तिशिरःसु परिकर्त्तनमनिलसङ्गो वायुविष्टम्भो भक्तारुचिश्च भवति तत्र पिच्छावस्तिर्यष्टीमधुककृष्णतिलकल्कमधुघृतयुक्तः । शीताम्बुपरिषिक्तञ्चैनं पयसा भुक्तवन्तं घृतमण्डेन यष्टीमधुकसिद्धेन तैलेन वानुवासयेत् ॥

क्रूरकोष्ठस्यातिप्रभूतदोषस्य मृद्वौषधमवचारितं समुत्क्लिश्य दोषान्न निःशेषानपहरति ततस्ते दोषाः परिस्रावमापादयन्ति तत्र दौर्ब्बल्योदरविष्टम्भारुचिगात्रसदनानि भवन्ति सवेदनौ चास्य पित्तश्लेष्माणौ परिस्रवतस्तं परिस्रावमित्याचक्षते तमजकर्णधवतिनिशपलाशकषायैर्मधुरसंयुक्तैरास्थापयेत् । उपशान्तदोषं स्निग्धञ्च भूयःसंशोधयेत् । अतिरूक्षेऽतिस्निग्धे वा भेषजमवचारितमप्राप्तं वा वातवर्च्चउदीरयेत् । वेगाघातेन वा प्रवाहिका भवति तत्र सवातं सदाहं सशूलं सश्वेतं सपिच्छिलं कृष्णं रक्तं वा भृशं प्रवाहमाणः कृच्छ्रमुपविशति तं परिस्रावविधानेनोपचरेत् ॥

यस्तूर्द्ध्वमधोवा भेषजवेगं प्रवृत्तमज्ञत्वाद्विनिहन्ति तस्योपसरणं हृदि कुर्व्वन्ति दोषाः। तत्र प्रधानमर्म्मसन्तापाद्वेदनाभिरत्यर्थं पीड्यमानो दन्तान् किटकिटायते उद्धताक्षो जिह्वां खादति प्रताम्यत्यचेताश्च भवति तं परिवर्ज्जयन्ति मूर्खाः। तमभ्यज्य धान्यस्वेदेन स्वेदयेद्यष्टिमधुकसिद्धेन च तैलेनानुवासयेत्। शिरोविरेचनं चास्मै तीक्ष्णं विदध्यात्। ततो यष्टिमधुकमिश्रेण तण्डुलाम्बुना छर्द्दयेद्यथा दोषोच्छ्रायेण चैनं वस्तिभिरुपाचरेत्॥

यस्तूर्द्ध्वमधोवा प्रवृत्तदोषः शीतागारमुदकमनिलमन्यद्वा सेवेत। तस्य दोषाः स्रोतःस्ववलीयमानाः घनीभावमापन्ना वातमूत्रशकृद्ग्रहमापाद्य विबध्यन्ते तस्याटोपो दाहो ज्वरो वेदनाश्च तीव्रा भवन्ति तमाशु वामयित्वा प्राप्तकालां क्रियां कुर्व्वीत। अधोभागे त्वधोभागहरद्रव्यसम्भवाम्लमूत्रसंसृष्टं विरेचनं पाययेत्। आस्थापनमनुवासनञ्च यथादोषं विदध्यात्। यथादोषमाहारक्रमञ्चोभयतोभागेतूपद्रवविशेषान्यथास्वं प्रतिकुर्व्वीत॥

यातु विरेचने गुदपरिकर्त्तिका तद्वमने कण्ठक्षणनं यदधः परिस्रवणं सऊर्द्ध्वभागे श्लेष्मप्रसेको यात्वधः प्रवाहिका सातूर्द्ध्वे शुष्कोद्गारा इति॥

भवति चात्र॥ यास्त्वेता व्यापदः प्रोक्ता दश पञ्च च तत्त्वतः।
एता विरिक्तातियोगदुर्य्योगायोगजाः स्मृताः॥

---

## ॥ पञ्चत्रिंशत्तमोऽध्यायः ॥

अथातो नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः ॥

तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्म प्रधानतममाहुराचार्य्याः। कस्मादनेककर्म्मकरत्वाद्वस्तेरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसङ्ग्रहणानि करोति। क्षीणशुक्रं वाजीकरोति कृशं वृंहयति स्थूलं कर्षयति चक्षुः प्रीणयति वलीपलितमुपहन्ति वयःस्थापयति। शरीरोपचयं वर्णबलमारोग्यमायुषः परिवृद्धिञ्च करोति वस्तिःसम्यगुपासितः॥ तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्थार्द्दिताक्षेपकपक्षाघातैकाङ्गसर्वाङ्गरोगाध्मानोदरशर्कराशूलवृद्ध्युपदंशानाहमूत्रकृच्छ्रगुल्मवातशोणितवातमूत्रपुरीषोदावर्त्तशुक्रार्त्तवस्तन्यनाशहृद्ग्रहहनुमन्याग्रहार्शोऽश्मरीमूढगर्भप्रभृतिषु चात्यर्थमुपयुज्यते ॥

भवति चात्र ॥ वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते।
संसर्गे सन्निपाते च वस्तिरेव हितः सदा ॥

तत्र सांवत्सरिकाष्टादशाष्टवर्षाणां षडष्टदशाङ्गुलप्रमाणानि कनिष्ठिकानामिकामध्यमाङ्गुलिपरिणाहान्यग्रेऽध्यर्द्धाङ्गुलद्व्यङ्गुलार्द्धतृतीयाङ्गुलसन्निविष्टकर्णिकानि कङ्कश्येनवर्हिपत्रनाडीतुल्यप्रवेशानि मुद्गमाषकलायमात्रस्रोतांसि विदध्यान्नेत्राणि तेषु चास्थापनद्रव्यप्रमाणमातुरहस्तसम्मितेन प्रसृतेन सम्मितौ प्रसृतौ द्वौ चत्वारोऽष्टौ विधेयाः ॥

भवति चात्र ॥ वर्षान्तरेषु नेत्राणां वस्तिमानस्य चैव हि।
वयोबलशरीराणि समीक्ष्य वर्द्धयेद्विधिं ॥

पञ्चविंशतेरूर्द्धं द्वादशाङ्गुलं मूलेऽङ्गुष्ठोदरपरीणाहमग्रे कनिष्ठिकोदरपरीणाहमग्रे व्यङ्गुलसन्निविष्टकर्णिकं गृध्रपत्रनाडीतुल्यप्रवेशं कोलास्थिमात्रं छिद्रं क्लिन्नकलायमात्रं छिद्रमित्येके॥ सर्व्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि। आस्थापनद्रव्यप्रमाणं तु विहिता द्वादशप्रसृताः॥ सप्ततेरूर्द्धं नेत्रप्रमाणमेतदेव द्रव्यप्रमाणन्तु द्विरष्टवर्षवत्॥

तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि श्लक्ष्णानि दृढानि गोपुच्छाकृतीन्यृजूनि गुटिकामुखानि। वस्तयस्त्वाद्धानां मृदवो नातिबहला दृढाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणां॥

नेत्रालाभे हिता नाडी नलवंशास्थिसम्भवा।
वस्त्यलाभे हितं चर्म सूक्ष्मं वा तान्तवं घनम्॥
वस्तिं निरुपदिग्धन्तु शुद्धं सुपरिमार्जितं।
मृदनुद्धतहीनञ्च मुहुः स्नेहविमर्द्दितं।
नेत्रमूले प्रतिष्ठाप्य न्युब्जन्तु विवृताननम्॥
बद्धा लोहेन तप्तेन चर्मस्रोतसि निर्द्दहेत्।
परिवर्त्त्य ततो वस्तिं बद्धा गुप्तं निधापयेत्॥
आस्थापनञ्च तैलञ्च यथावत्तेन दापयेत्।
मृदुर्वस्तिः प्रयोक्तव्यो विशेषाद्बालवृद्धयोः॥

तयोस्तीक्ष्णः प्रयुक्तस्तु वस्तिर्हिंस्याद्वलायुषी ॥

तत्र द्विविधो वस्तिः नैरूहिकः स्नैहिकश्च। आस्थापनं निरूह इत्यनर्थान्तरम्। तस्य विकल्पोमाधुतैलिकः। तस्य पर्य्यायशब्दो यापनोयुक्तरथः सिद्धवस्तिरिति। स दोषनिर्हरणाच्छरीररोगहरणाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वास्थापनम्। माधुतैलिकविधानञ्च निरूहक्रमचिकित्सिते वक्ष्यामः ॥

तत्र यथाप्रमाणगुणविहितःस्नेहवस्तिविकल्पोऽनुवासनः पादावकृष्टः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः॥ तस्यापि विकल्पोऽर्द्धार्द्धमात्रावकृष्टोऽपरिहार्य्यो मात्रावस्तिरिति॥

निरूहः शोधनो लेखी स्नेहनो बृंहणो मतः।
निरूहशोधितान्मार्गान्सम्यक् स्नेहोऽनुगच्छति॥
अपेतसर्व्वदोषासु नाडीष्विव वहज्जलम्।
सर्व्वदोषहरश्चासौ शरीरस्य च जीवनः॥
तस्माद्विशुद्धदेहस्य स्नेहवस्तिर्व्विधीयते॥

तत्रोन्मादभयशोकपिपासारोचकाजीर्णार्शःपाण्डुरोगभ्रममदमूर्च्छाच्छर्दिकुष्ठमेहोदरस्थौल्यश्वासकासकण्ठशोषशोफोपसृष्टक्षतक्षीणचतुस्त्रिमासगर्भिणीदुर्व्वलाग्न्यसहा बालवृद्धौ च वातरोगादृते क्षीणा नानुवास्या नास्थापयितव्याः॥

उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः।
अवश्यं स्थापनीयाश्च नानुवास्याः कथञ्चन॥
असाध्यता विकाराणां स्यादेषामनुवासनात्।

असाध्यत्वेऽपि भूयिष्ठं गात्राणां सदनं भवेत् ॥
पक्वाशये तथा श्रोण्यां नाभ्यधस्ताच्च सर्व्वतः ।
सम्यक्प्रणिहितो वस्तिःस्थानेष्वेतेषु तिष्ठति ॥
पक्वाशयाद्वस्तिवीर्य्यं खैर्देहमुपसर्प्पति ।
वृक्षमूले निषिक्तानामपां वीर्य्यमिव द्रुमम् ॥
सचापि सहसा वस्तिः केवलः समलोऽपि वा ।
प्रत्येति त्वनिलैर्वीर्य्यमपानाद्यैर्व्विनीयते ॥
वीर्य्येण वस्तिरादत्ते दोषानापादमस्तकात् ।
पक्वाशयस्थोऽम्बरगो भूमेरर्क्को रसानिव ॥
सकटीपृष्ठकोष्ठस्थान्वीर्य्येणालोड्य सञ्चयान् ।
उत्खातमूलान् हरति दोषाणां साधुयोजितः ॥
दोषत्रयस्य यस्माच्च प्रकोपे वायुरीश्वरः ।
तस्मात्तस्यातिवृद्धस्य शरीरमभिनिघ्नतः ॥
वायोर्व्विघहते वेगं नान्या वस्तेर्ऋते क्रिया ।
पवनाविद्धतोयस्य वेलावेगमिवोदधेः ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृद्धिंच वस्तिः सम्यगुपासितः ॥

अतऊर्द्ध्वं व्यापदोवक्ष्यामः ॥

तत्रनेत्रं चलितं विवर्त्तितं पार्श्वावपीडितमत्युत्क्षिप्तमवसन्नं तिर्य्यक्क्षिप्तमिति षट्प्रणिधानदोषाः ॥ अतिस्थूलं कर्क्कशमवनतमणु भिन्नं सन्निकृष्टविप्रकृष्टकर्णिकं सूक्ष्मातिच्छिद्रमतिदीर्घमति

ह्रस्वमित्येकादश नेत्रदोषाः । बहलताल्पतासच्छिद्रता प्रस्तीर्णता दुर्ब्बद्धतेति पञ्च वस्तिदोषाः ॥ अतिपीड़िततता शिथिलपीड़िततता भूयोभूयोऽवपीडनं कालातिक्रम इति चत्वारः पीडनदोषाः ॥ आमता हीनतातिमात्रताऽतिशीततात्युष्णतातितीक्ष्णतातिमृदुतातिस्निग्धतातिरूक्षतातिसान्द्रतातिद्रवतेत्येकादश द्रव्यदोषाः ॥ अवाक् शीर्षोच्छीर्षन्युब्जोत्तानसङ्कुचितदेहस्थितता दक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषाः ॥ एवमेतास्तु चत्वारिंशद्व्यापदो वैद्यनिमित्ताः । आतुरनिमित्ताः पञ्चदश आतुरोपद्रवचिकित्सिते वक्ष्यन्ते ॥

स्नेहस्त्वष्टाभिः कारणैः प्रतिहतो न प्रत्यागच्छति त्रिभिर्दोषैरन्नाभिभूतो मलव्यामिश्रो दूरानुप्रविष्टोऽस्विन्नस्यानुष्णोऽल्पोऽभुक्तवतोऽल्पाशनस्य चेति वैद्यातुरनिमित्ता भवन्ति॥ अयोगस्त्वभयोराध्मानं परिकर्त्तिका परिस्रावः प्रवाहिका हृदयोपसरणमङ्गग्रहोऽतियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्ति भवति चात्र। षट्सप्ततिः समासेन व्यापदः परिकीर्त्तिताः ।

तासां वक्ष्यामि विज्ञानं सिद्धिञ्च तदनन्तरं॥

---

॥ षट्चत्वारिंशत्तमोऽध्यायः ॥

अथातो नेत्रवस्तिव्यापच्चिकित्सितं व्याख्यास्यामः॥

अथ नेत्रे विचलिते तथा चैव विवर्त्तिते।

गुदे चतं रुजा वा स्यात्तत्र सद्यःचतक्रियाः ॥
अत्युत्क्षिप्तेऽवसन्ने च नेत्रे पायौ भवेद्रुजा ।
विधिरत्रापि पित्तघ्नः कार्य्यः स्नेहैश्च सेचनं ॥
तिर्य्यक्प्रणिहिते नेत्रे तथा पार्श्वावपीडिते ।
मुखस्यावरणाद्वस्तिर्न सम्यक्प्रतिपद्यते ॥
ऋजु नेत्रं विधेयं स्यात्तत्र सम्यग्विजानता ।
अतिस्थूले कर्कशे च नेत्रे चावनते तथा ॥
गुदे भवेत्क्षतं रुक्च साधनं पूर्व्ववत् स्मृतं ।
आसन्नकर्णिके नेत्रे भिन्नेऽणौ वाप्यपार्थकः ॥
अवसेको भवेद्वस्तेस्तस्माद्दोषान्विवर्जयेत् ।
प्रकृष्टकर्णिके रक्तं गुदमर्म्मप्रपीडनात् ॥
चरत्यत्रापि पित्तघ्नो विधिर्वस्तिश्च पिच्छिलः ।
ह्रस्वेऽल्पस्रोतसि च क्लेशो वस्तिश्च पूर्व्ववत् ॥
प्रत्यागच्छंस्ततः कुर्य्याद्रोगान्वस्तिविघातजान् ।
दीर्घे महास्रोतसि च ज्ञेयमत्यवपीडवत् ॥
प्रस्तीर्णे बहले चापि वस्तौ दुर्ब्बद्धदोषवत् ।
वस्तावल्पेऽल्पता वापि द्रव्यस्याल्पगुणा मताः ॥
दुर्बद्धे चाणुभिन्ने च विज्ञेयं भिन्ननेत्रवत् ।
अतिप्रपीडितो वस्तिः प्रयात्यामाशयं ततः ॥
वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते ।
तत्र तूर्णं गलापीडं कुर्य्याच्चाप्यवधूननं ॥

शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान्।
शनैः प्रपीडितो वस्तिः पक्वाधानं न गच्छति ॥
न च सम्पादयत्यर्थांस्तस्माद्युक्तं प्रपीडयेत्।
भूयोभूयोऽवपीडेन वायुरन्तः प्रपीड्यते।
तेनाध्मानं रुजश्चोग्रा यथास्वं तत्र वस्तयः॥
कालातिक्रमणात् क्लेशो व्याधिश्चाभिप्रवर्द्धते।
तत्र व्याधिबलघ्नन्तु भूयो वस्तिं निधापयेत्॥
गुदोपदेहशोफौ तु स्नेहोऽपक्वः करोति हि।
तत्र संशोधनो वस्तिर्हितं चापि विरेचनं।
हीनमात्रावुभौ वस्ती नातिकार्य्यकरौ मतौ॥
अतिमात्रौ तथानाहक्लमातीसारकारकौ।
मूर्च्छादाहमतीसारं पित्तं चात्युष्णतीक्ष्णकौ॥
मृदुशीतावुभौ वातविबन्धाध्मानकारकौ।
तत्र हीनादिषु हितः प्रत्यनीकः क्रियाविधिः॥
तत्र सान्द्रे तनुं वस्तिं तनौ सान्द्रञ्च दापयेत्।
स्निग्धोऽतिजाड्यकृद्रूक्षः स्तम्भाध्मानकृदुच्यते॥
वस्तिं रूक्षमतिस्निग्धे स्निग्धं रूक्षे च दापयेत्।
अतिपीडितवद्दोषान्विधिं चाप्यवशीर्षके॥
उच्छीर्षके समुन्नाहं वस्तिः कुर्य्याच्च मेहनं।
तत्रोत्तरो हितो वस्तिः सुस्विन्नस्य सुखावहः॥
न्युब्जस्य वस्तिर्नाप्नोति पक्वाधानं विमार्गगः॥

हृद्गुदं बाधते चात्र वायुः कोष्ठमथापि च।
उत्तानस्यावृते मार्गे वस्तिर्नान्तःप्रपद्यते ॥
नेत्रसम्वेजनभ्रान्तो वायुश्चान्तः प्रकुप्यति।
देहे सङ्कुचिते दत्तः सक्थ्नोरण्युभयोस्तथा ॥
न सम्यगनिलाविष्टो वस्तिः प्रत्येति देहिनः।
स्थितस्य वस्तिर्दत्तस्तु क्षिप्रमायात्यवाङ्मुखः ॥
नचाशयं तर्पयति तस्मान्नार्थकरो हि सः।
नाप्नोति वस्तिर्दत्तस्तु कृत्स्नं पक्वाशयं पुनः ॥
दक्षिणाश्रितपार्श्वस्य वामपार्श्वानुगो हितः।
न्युब्जादीनां प्रदानञ्च वस्तेर्नैव प्रशस्यते ॥
पश्चादनिलकोपोऽत्र यथास्वं तत्र कारयेत्।
व्यापदः स्नेहवस्तेस्तु वक्ष्यन्तेऽत्र चिकित्सिते ॥
अयोगाद्यास्तु वक्ष्यामि व्यापदः सचिकित्सिताः।
अनुष्णोऽल्पौषधो हीनो वस्तिर्नैति प्रयोजितः ॥
विष्टम्भाध्मानशूलैश्च तमयोगं प्रचक्षते।
तत्र तीक्ष्णो हितो वस्तिस्तीक्ष्णं चापि विरेचनं ॥
सशेषान्ने तथाभुक्ते बहुदोषे च योजितः।
अत्याशितस्यातिबहुर्वस्तिर्मन्दोष्ण एव स ॥
अनुष्णलवणस्नेहो ह्यतिमात्रोऽथवा पुनः।
तथा बहुपुरीषं च क्षिप्रमाध्मापयेन्नरं ॥
हृत्कटीपार्श्वपृष्ठेषु शूलं तत्रातिदारुणं।

तत्र तीक्ष्णतरोवस्तिर्हितं चाप्यनुवासनं ॥
अतितीक्ष्णोष्णलवणो रूक्षो वस्तिः प्रयोजितः ।
सपित्तं कोपयेद्वायुं कुर्य्याच्च परिकर्त्तिकां ॥
नाभिवस्तिगुदं तत्रच्छिनत्तीवाति देहिनः ।
पिच्छावस्तिर्हितस्तत्र स्नेहश्च मधुरैः शृतः ॥
अत्यम्ललवणस्तीक्ष्णः परिस्रावाय कल्पते ।
दौर्ब्बल्यमङ्गसादश्च जायते तत्र देहिनः ॥
परिस्रवेत्ततः पित्तं दाहं सञ्जनयेद्गुदे ।
पिच्छावस्तिर्हितस्तत्र वस्तिः क्षीरघृतस्य च ॥
प्रवाहिका भवेत्तीक्ष्णान्निरूहात्सानुवासनात् ।
सदाहशूलं कृच्छ्रेणवासृक्तोपवेक्ष्यते ॥
पिच्छावस्तिर्हितस्तत्र पयसा चव भोजनं ।
सर्पिर्मधुरकैः सिद्धं तैलं चाप्यनुवासनं ॥
अतितीक्ष्णेनिरूहो वा सवाते चानुवासनः ।
हृदयस्योपसरणं कुरुते चाङ्गपीडनं ॥
दोषैस्तत्र रुजस्तास्ता मदो मूर्च्छाङ्गगौरवं ।
सर्वदोषहरं वस्तिं शोधनं तत्र दापयेत् ॥
रूक्षस्य बहुवातस्य तथा दुःशयितस्य च ।
वस्तिरङ्गग्रहं कुर्य्याद्रूक्षो मृद्वल्पभेषजः ॥
तत्राङ्गसादः प्रस्तम्भो जृम्भोद्वेष्टनवेपकाः ।
पर्व्वभेदश्च तत्रेष्टाः स्वेदोऽभ्यञ्जनवस्तयः ॥

अत्युष्णतीक्ष्णोऽतिबहुर्दत्तोऽतिस्वेदितस्य च।
अल्पदोषस्य वा वस्तिरतियोगाय कल्पते॥
विरेचनातियोगेन समानं तच्चिकित्सितं।
पिच्छावस्तिप्रयोगश्च तत्र शीतः सुखावहः॥
अतियोगात्परं यत्र जीवादानं विरिक्तवत्।
देयस्तत्र हितस्यापि पिच्छावस्तिः सशोणितः॥
नवैता व्यापदो यास्तु निरूहं प्रत्युदाहृताः।
स्नेहवस्तिष्वपि हिता विज्ञेया कुशलैरिह॥
इत्युक्ता व्यापदः सर्व्वाः सलक्षणचिकित्सिताः।
भिषजा च तथा कार्य्यं यथैता न भवन्ति हि॥
पश्चाद्विरेको वान्तस्य ततश्चापि निरूहणं।
सद्योनिरूढोऽनुवास्यः सप्तरात्राद्विरेचितः॥

---

## ॥ सप्तत्रिंशत्तमोऽध्यायः ॥

यातोऽनुवासनोत्तरवस्तिचिकित्सितं व्याख्यास्यामः॥

विरेचनात्सप्तरात्रे गते जातबलाय च
कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः॥
यथावयोनिरूहाणां या मात्राः परिकीर्त्तिताः।
पादावकृष्टास्ताः कार्य्याः स्नेहवस्तिषु देहिनां॥
उत्सृष्टानिलविण्मूत्रे नरे वस्तिं विधापयेत्।
एतैर्हि विहतः स्नेहो नैवान्तः प्रतिपद्यते॥

स्नेहवस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः ॥
स्नेहवीर्य्यं तथा दत्ते देहं चानुविसर्पति ।
अत ऊर्द्धं प्रवक्ष्यामि तैलानीह यथाक्रमं ॥
पानान्वासननस्येषु यानि हन्युर्गदान्बहून् ।
शठीपुष्करकृष्णाह्वामदनामरदारुभिः ॥
शताह्वाकुष्ठयष्ट्याह्ववचाविल्वहुताशनैः ॥
सुपिष्टैर्द्विगुणं क्षीरं तैलं तोयचतुर्गुणम् ।
पक्वा वस्तौ विधातव्यं मूढवातानुलोमनम् ॥
अर्शांसि ग्रहणीदोषमानाहं विषमज्वरम् ।
कट्यूरुपृष्ठकोष्ठस्थान्वातरोगांश्च नाशयेत् ॥
वचापुष्करकुष्ठैलामदनामरसिन्धुजैः ।
काकोलीद्वययष्ट्याह्वमेदायुग्मनराधिपैः ॥
पाठाजीवकजीवन्तीभार्गीचन्दनकट्फलैः ।
सरलागुरुविल्वाम्बुवाजिगन्धाग्निदृद्धिभिः ॥
विडङ्गारग्वधश्यामाच्छिन्नामागधिकर्द्धिभिः ।
पिष्टैस्तैलं पचेत्क्षीरं पञ्चमूलरसान्वितम् ॥
गुल्मानाहाग्निसङ्गार्शोग्रहणीमूत्रसङ्गिना ।
अन्वासनविधौ युक्तं शस्यतेऽनिलरोगिणाम् ॥
चित्रकातिविषापाठादन्तीविल्ववचामिषैः ।
सरलांशुमतीरास्नानीलिनीचतुरङ्गुलैः ॥
चव्याजमोदकाकोलीमेदायुग्मसुरद्रुमैः ।

जीवकर्षभवर्षाभूवत्सगन्धशताह्वयैः ॥
रेणुश्वगन्धामञ्जिष्ठाशटीपुष्करतस्करैः ।
सचीरं विपचेत्तैलं मारुतामयनाशनम् ॥
गृध्रसीखञ्जकुब्जाढ्यमूत्रोदावर्त्तरोगिणाम् ।
शस्यतेऽल्पबलाग्नीनां वस्तावाप्नु नियोजितं ॥
भूतिकैरण्डवर्षाभूरास्नावृषकरोहिषैः
दशमूलसहाभार्गीषड्ग्रन्थामरदारुभिः ॥
बलानागबलामूर्व्वावाजिगन्धामृताह्वयैः ।
सहाचरवरीविश्वाकाकनासाविदारिभिः ॥
यवमाषातसीकोलकुलत्थैः कथितैः शृतं ।
जीवनीयप्रतीवापं तैलं चीरचतुर्गुणम् ॥
जङ्घोरुत्रिकपार्श्वांसबाहुमन्याशिरःस्थितान् ।
हन्याद्वातविकारांस्तु वस्तियोगैर्न्निषेवितं ॥
जीवन्त्यतिबलामेदाकाकोलीद्वयजीवकैः ।
ऋषभातिविषाकृष्णाकाकनासावचामरैः ॥
रास्नामदनयष्ट्याह्वसरलाभीरुचन्दनैः ।
स्वयङ्गुप्ताशटीशृङ्गीकलसीसारिवाह्वयैः ॥
पिष्टैस्तैलघृतं पक्वं चीरेणाष्टगुणेन तु ।
तच्चानुवासने देयं शुक्राग्निबलवर्द्धनम् ॥
बृंहणं वातपित्तघ्नं गुल्मानाहहरं परम् ।
नस्ये पाने च संयुक्तमूर्द्धजत्रुगदापहम् ॥

मधुकाशोरकाश्मर्य्यकटुकोत्पलचन्दनैः ।
श्यामापद्मकजीमूतशक्राह्वातिविषाम्बुभिः ॥
तैलपादं पचेत्सर्प्पिः पयसाष्टगुणेन च ।
न्यग्रोधादिगणक्वाथयुक्तं वस्तिषु योजितं ॥
दाहासृग्दरवीसर्पवातशोणितविद्रधीन् ।
पित्तरक्तज्वराद्यांश्च हन्यात्पित्तकृतान्गदान् ॥
मृणालोत्पलशालूकसारिवाद्वयकेशरैः ।
चन्दनद्वयभूनिम्बपद्मवीजकसेरुकैः ॥
पटोलकटुकारक्तागुन्द्रापर्पटवासकैः ।
पिष्टैस्तैलमिदं पक्वं तृणमूलरसेन च ॥
क्षीरद्विगुणसंयुक्तं वस्तिकर्म्मणि योजितम् ।
नस्येऽभ्यञ्जनपाने वा हन्यात्पित्तगदान्बहून् ॥
त्रिफलातिविषामूर्व्वात्रिवृच्चित्रकवासकैः ।
निम्बारग्वधषड्ग्रन्थासप्तपर्णनिशाद्वयैः ॥
गुडूचीन्द्रसुराकृष्णाकुष्ठसर्षपनागरैः ॥
तैलमेभिः समैः पक्वं सुरसादिरसाप्लुतम् ।
पानाभ्यञ्जनगण्डूषनस्यवस्तिषु योजितम् ॥
स्थूलतालस्यकण्ड्वादीन् जयेत्कफकृतान्गदान् ।
पाठाजमोदाशार्ङ्गेष्टापिप्पलीद्वयनागरैः ॥
सरलागुरुकालीयभार्गीचव्यामरद्रुमैः ।
मरिचैलाभयाकट्वीशटीग्रन्थिककट्फलैः ॥

तैलमेरण्डतैलं वा पक्वमेभिः समायुतम्।
वल्लीकण्टकमूलाभ्यां क्वाथेन द्विगुणेन च॥
हन्याद्न्वासनैर्दत्तं सर्वान्कफकृतान् गदान्।
विडङ्गैदीच्यसिन्धूत्थशटीपुष्करचित्रकैः॥
कट्फलातिविषाभार्गीवचाकुष्ठसुराह्वयैः।
मेदामदनयष्ट्याह्वश्यामानिचुलनागरैः॥
शताह्वानीलिनीरास्नाकदलीवृषरेणुभिः।
बिल्वाजमोदकृष्णाह्वादन्तीचव्यनराधिपैः॥
तैलमेरण्डतैलं वा मुष्ककादिरसाप्लुतम्।
प्लीहोदावर्त्तवातासृग्गुल्मानाहकफामयान्॥
प्रमेहशर्कराशांसि हन्यादाश्वनुवासनात्।
अरूक्षमपि वा तेन केवलेनातिपीडितम्॥
अहोरात्रस्य कालेषु सर्व्वेष्वेवानुवासयेत्।
रूक्षस्य बहुवातस्य द्वौ त्रीनप्यनुवासनं॥
दत्वा स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत्।
अस्निग्धमपि वा तेन केवलेनातिपीडितं॥
स्नेहप्रगाढैर्भतिमान्निरूहैः समुपाचरेत्।
अथ सम्यङ्निरूढन्तु वातादिष्वनुवासयेत्॥
बिल्वयष्ट्याह्वमदनफलतैलैर्यथाक्रमं।
रात्रौ वस्तिं न दद्यात्तु दोषोत्क्लेशो हि रात्रिजः॥
स्नेहो वीर्य्ययुतः कुर्य्यादाध्मानं गौरवं ज्वरं।

अक्लिष्टस्थानस्थिते दोषे वह्नौ वान्नरसान्विते ।
स्फुटस्रोतोमुखे देहे स्नेहौजः परिसर्पति ॥
पित्तेऽधिके कफे क्षीणे रुक्षे वातरुगर्दिते ।
नरे रात्रौ च दातव्यं काले चोष्णेऽनुवासनं ॥
उष्णे पित्ताधिके वापि दिवा दाहादयो गदाः ।
सम्भवन्ति यतस्तस्मात् प्रदोषे योजयेद्भिषक् ॥
शीते वसन्ते च दिवा ग्रीष्मे प्राविड्घनात्यये ।
स्नेहो दिनान्ते पानोक्तान्दोषान्परिजिहीर्षता ॥
अहोरात्रेषु कालेषु सर्वेष्वेवानिलाधिकम् ।
तीव्रायां रुजि जीर्णान्नं भोजयित्वानुवासयेत् ॥
नचाभुक्तवतः स्नेहः प्रणिधेयः कथञ्चन ।
शुद्धत्वाच्छून्यकोष्ठस्य स्नेह ऊर्द्ध्वमथोत्पतेत् ॥
सदानुवासयेच्चापि भोजयित्वार्द्रपाणिनम् ।
ज्वरं विदग्धभुक्तस्य कुर्यात्स्नेहः प्रयोजितः ॥
नचातिस्निग्धमशनं भोजयित्वानुवासयेत् ।
मदं मूर्च्छां च जनयेद्द्विधा स्नेहः प्रयोजितः ॥
रुक्षं भुक्तवतो ह्यन्नं बलं वर्णं च ह्रापयेत् ।
युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत् ॥
यूषक्षीररसैस्तस्माद्यथाव्याधिमवेक्ष्य वा ।
यथोचितात्पादहीनं भोजयित्वानुवासयेत् ॥
अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।

भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः ॥
विसर्ज्य च शकृन्मूत्रं योजयेत्स्नेहवस्तिना ।
प्रणिधानविधानन्तु निरूहे च प्रवक्ष्यते ॥
ततः प्रणिहिते स्नेह उत्तानो वाक्कृतं भवेत् ।
प्रसारितैः सर्वगात्रैस्तथा वीर्य्यं विसर्पति ॥
ताडयेत्तलयोरेनं त्रींस्त्रीन्वारान् शनैः शनैः ।
स्फिजोश्चैनं ततः शय्यां त्रीन्वारानुत्क्षिपेत्ततः ॥
एवं प्रणिहिते वस्तौ मन्दायासोऽथ मन्दवाक् ।
स्वास्तीर्णे शयने काममासीताचारिके रतः ॥
स तु सैन्धवचूर्णेन शताह्वेन च योजितः ।
देयः सुखोष्णश्च तथा निरेति सहसा सुखम् ॥
यस्यानुवासनो दत्तः सक्तदन्वत्तमाव्रजेत् ।
अत्यौष्ण्यादतितैक्ष्ण्याद्वा वायुना वा प्रपीडितः ॥
सवातोऽधिकमात्रो वा गुरुत्वाद्वा सभेषजः ।
तस्यान्योऽल्पतरो देयो नहि स्निह्यत्यतिष्ठति ॥
विष्टब्धानिलविण्मूत्रः स्नेहहीनोऽनुवासनः ।
दाहक्लमप्रवाहार्त्तिकरस्स्यात्यनुवासनः ॥
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
श्रोषचोषौ विना शीघ्रं स सम्यगनुवासितः ॥
जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥

प्रातरुष्णोदकं देयं धान्यनागरसाधितम् ।
तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते ॥
स्नेहवस्तिक्रमेष्वेव विधिमाहुर्मनीषिणः ।
अनेन विधिना षड्वा सप्त वाष्टौ नवैव वा ॥
विधेया वस्तयस्तेषामन्तरा तु निरूहणम् ।
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवङ्क्षणौ ॥
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ।
जनयेद्बलवर्णौ च तृतीयस्तु प्रयोजितः ॥
रसं चतुर्थो रक्तन्तु पञ्चमः स्नेहयेत्तथा ।
षष्ठस्तु स्नेहयेन्मांसं मेदः सप्तम एव च ॥
अष्टमो नवमश्चास्थि मज्जानं च यथाक्रमं ।
एवं शुक्रगतान्दोषान्द्विगुणः साधु साधयेत् ॥
अष्टादशाष्टादशकान्वस्तीनां यो निषेवते ।
यथोक्तेन विधानेन परिहारक्रमेण तु ॥
स कुञ्जरबलोऽश्वस्य जवेस्तुल्योऽमरप्रभः ।
वीतपाप्मा श्रुतिधरः सहस्रायुर्नरो भवेत् ॥
स्नेहवस्तिं निरूहंवा नैकमेवातिशीलयेत् ।
स्नेहादग्निवधोत्क्लेशौ निरूहात्पवनाद्भयं ॥
तस्मान्निरूढोऽनुवास्यो निरूह्यश्चानुवासितः ।
नैव पित्तकफोत्क्लेशौ स्यातां न पवनाद्भयम् ॥
रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने ।

दद्याद्देयस्ततोऽन्येषामन्याबाधभयात्त्र्यहात् ॥
स्नेहोऽल्पमात्रो रूक्षाणां सर्वकालमनत्ययः ।
तथा निरूहः स्निग्धानां स्वल्पमात्रः प्रशस्यते ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्वन्त्युपद्रवान्स्नेहः सचापि न निवर्त्तते ॥
तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भा वातरुजस्तास्ता वेपथुर्विषमज्वरः ॥
पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः स्वेदो नेत्रमूत्राङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्दिरुच्छ्वासः कृच्छ्रः शीतज्वरोऽरुचिः ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥
अत्याशितेऽन्नाभिभवात्स्नेहो नैति यदा तदा ।
गुरुरामाशयः शूलं वायोश्चाप्रतिसञ्चरः ।
हृत्पीडामुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्मानौ श्वासः शूलञ्च जायते ॥

पक्वाशयगुरुत्वंच तत्र दद्यान्निरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धं चाप्यनुवासनम् ॥
शुद्धस्य दूरानुगते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्वेन्द्रियाणामुपलेपोऽवसादनम् ॥
स्नेहगन्धि मुखं तत्र कासश्वासावरोचकः ।
अतिपीडितवत्तत्र विधिरास्थापनं तथा ॥
अखिन्नस्याविशुद्धस्य स्नेहोऽल्पः सम्प्रयोजितः ।
शीतोमृदुश्च नाभ्येति ततोमन्दं प्रवाहयेत् ।
विबन्धगौरवाध्मानशूलाः पक्वाशयं प्रति ॥
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ।
अल्पं भुक्तवतोऽल्पोहि स्नेहो मन्दगुणस्तथा ॥
दत्तो नैति क्लमोत्क्लेशौ भ्रंशं वारतिमावहेत् ।
तत्रवास्थापनं कार्य्यं शोधनीयेन वस्तिना ॥
अन्वासनञ्च स्नेहेन शोधनीयेन शस्यते ।
अहोरात्रादपि स्नेहः प्रत्यागच्छन्न दूष्यति ॥
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्त्वल्पगुणो भवेत् ।
यस्य नोपद्रवं कुर्य्यात्स्नेहवस्तिरनिःसृतः ॥
सर्वोऽल्पो वा हृतो रौक्ष्यादुपेक्ष्यः स विजानता ।
अनायान्तं त्वहोरात्रात्स्नेहं संशोधनैर्जयेत् ॥
स्नेहवस्तावनायाते नान्यः स्नेहो विधीयते ।
इत्युक्ता व्यापदः सर्वाः सलक्षणचिकित्सिताः ॥

वस्तेरुत्तरसंज्ञस्य विधिं वक्ष्याम्यतः परं।
चतुर्द्दशाङ्गुलं नेत्रमातुराङ्गुलसम्मितम्॥
मालतीपुष्पवृन्ताग्रं छिद्रं सर्षपनिर्गमम्।
मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः॥
स्नेहप्रमाणं परमं कुडवश्चात्र प्रकीर्त्तितः।
पञ्चविंशादधोमात्रां विदध्याद्बुद्धिकल्पिताम्।
निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुले॥
मूत्रस्रोतःपरीणाहं मुद्गवाहिद्विशाङ्गुलम्।
तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम्॥
द्व्यङ्गुलं मूत्रमार्गे तु कन्यानान्त्वेकमङ्गुलं।
विधेयं चाङ्गुलं तासां विधिवद्वक्ष्यते यथा॥
स्नेहस्य प्रसृतश्चात्र स्वाङ्गुलीमूलसंमितम्।
देयं प्रमाणं परममर्वाग्बुद्धिविकल्पितम्॥
औरभ्रः शौकरो वापि वस्तिराजस्य पूजितः।
तदलाभे प्रयुञ्जीत गलचर्म्म तु पक्षिणाम्॥
अस्यालाभे दृतेः पादो मृदुचर्म ततोपि वा।
अथातुरमुपस्निग्धं सुस्विन्नं प्रथिताशयम्॥
यवागूं सघृतक्षीरां पीतवन्तं यथाबलं।
निषण्णमाजानुसमे पीठे स्थानाश्रये समे॥
स्वभ्यक्तवस्तिमूर्द्धानं तैलेनोष्णेन मानवं।
ततः समं स्थापयित्वा नालमस्य प्रहर्षितम्॥

पूर्वं शलाकयान्विष्य ततो नेत्रमनन्तरम्।
शनैः शनैर्घृताभ्यक्तं विदध्यादङ्गुलानि षट्॥
ततोऽवपीडयेद्वस्तिं शनैर्नेत्रंच निर्हरेत्।
ततः प्रत्यागतस्नेहमपराह्णे विचक्षणः॥
भोजयेत्पयसामात्रां यूषेणाथ रसेन वा।
अनेन विधिना दद्याद्वस्तींस्त्रींश्चतुरोऽपिवा॥
ऊर्द्ध्वजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः।
कल्पेतरस्मै कन्यायै दद्यात्सुम्हदु पीडित॥
त्रिकर्णिकेन नेत्रेण दद्याद्योनिमुखं प्रति।
गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु।
अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते॥
भूयोवस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः।
गुदे वर्त्तिं निदध्याद्वा शोधनद्रव्यसम्भृतां॥
प्रवेशयेद्वा मतिमान्वस्तिद्वारमथैषणीम्।
पीडयेद्वाप्यधोनाभेर्बलेनोत्तरमुष्टिना॥
आरग्वधस्य पत्रेषु निर्गुण्ड्याः स्वरसेषु च।
कुर्य्याद्गोमूत्रपिष्टेषु वर्त्तीर्वापि ससैन्धवाः॥
मुद्गैलासर्षपसमाः प्रविभज्य वयांसितु।
वस्तेरागमनार्थाय ता निदध्याच्छलाकया॥
आगारधूमवृहतीपिप्पलीफलसैन्धवैः।
कृता वा शुक्तगोमूत्रसुरापिष्टैः सनागरैः॥

अनुवासनसिद्धिञ्च वीच्य कर्म प्रयोजयेत्।
शर्करामधुमिश्रेण शीतेन मधुकाम्बुना ॥
दह्यमाने तदा वस्तौ दद्याद्वस्तिं विचक्षणः।
चीरवृक्षकषायेण पयसा शीतलेन च ॥
शुक्रं दुष्टं शोणितं चाङ्गनानां पुष्पोद्रेकं तस्य नाशञ्च कष्टं।
मूत्राघातान्मूत्रदोषान् प्रवृद्धान्योनिव्याधिं संस्थितिं चापरायाः ॥
शुक्रोत्सेकं शर्करामश्मरीञ्च शूलं वस्तौ वङ्क्षणे मेहने च।
घोरानन्यान्वस्तिजांश्चापि रोगान्हित्वा मेहानुत्तरो हन्ति वस्तिः॥
सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च।
वस्तेरुत्तरसंज्ञस्य समानं स्नेहवस्तिना ॥

---

॥ अष्टात्रिंशत्तमोध्यायः ॥

अथातो निरूहोपक्रमचिकित्सितं व्याख्यास्यामः ॥

अथानुवासितमास्थापयेत्स्वभ्यक्तस्विन्नशरीरमुत्सृष्टवहिर्वेगम प्रवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्यायामधःसुपरिग्रहायां श्रोणिप्रदेशव्यूढायामनुपधानायां वामपार्श्वशायिनमाकुञ्चित दक्षिणसक्थिमितरप्रसारितसक्थिं सुमनसं जीर्णान्नंवाग्यतं सुनि षण्णदेहं विदित्वा ततो वामपादस्योपरि नेत्रं कृत्वेतरपादाङ्गुष्ठा ङ्गुलिभ्यां कर्णिकामुपरिनिष्पीड्य सव्यपाणिकनिष्ठिकानामिकाभ्यां वस्तेर्मुखाद्धं सङ्कोच्य मध्यमप्रदेशिन्यङ्गुष्ठैरर्द्धन्तु विवृतास्यं कृत्वा वस्तावौषधं प्रक्षिप्य दक्षिणहस्ताङ्गुष्ठप्रदेशिनीभ्यां चानुसिक्तमना

यतमबुद्बुदमसङ्कुचितमवातमौषधासन्नमुपसंगृह्य पुनरितरेण गृहीत्वा दक्षिणेनावसिञ्चेत्ततः सूत्रेणैवौषधान्ते द्विस्त्रिर्वावेष्ट्य बध्नीयात्। अथ दक्षिणेनोत्तानेन पाणिना वस्तिं गृहीत्वा वा सहस्तमध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रमुपसंगृह्याङ्गुष्ठेन नेत्रद्वारं पिधाय घृताभ्यक्ताग्रनेत्रं घृताक्तगुदाय प्रयच्छेदनुपृष्ठवंशं सममुन्मुखमाकर्णिकं नेत्रं प्रणिधत्स्वेति ब्रूयात्॥

वस्तिं सव्ये करे कृत्वा दक्षिणेनावपीडयेत्।
एकेनैवावपीडेन न द्रुतं न विलम्बितम्॥

ततोनेत्रमपनीय त्रिंशन्मात्राः पीडनकालादुपेक्ष्योत्तिष्ठेत्यातुरं ब्रूयात्। आतुरमुपवेशयेदुत्कटुकं वस्त्यागमनार्थं। निरूहप्रत्यागमनकालस्तु मुहूर्त्तो भवति॥

अनेन विधिना वस्तिं दद्याद्वस्तिविशारदः।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथार्थतः॥
सम्यग्निरूढलिङ्गे तु प्राप्ते वस्तिं निवारयेत्।
अपि हीनक्रमं कुर्य्यान्न तु कुर्य्यादतिक्रमम्॥
विशेषात्सुकुमाराणां हीनएव क्रमो हितः।
यस्य स्याद्वस्तिरत्यल्पवेगो हीनमलानिलः॥
दुर्निरूढः स विज्ञेयो मूत्रार्त्त्यरुचिजाड्यवान्।
यान्येव प्राक्प्रयुक्तानि लिङ्गान्यतिविरेचिते॥
तान्येवातिनिरूढेऽपि विज्ञेयानि विपश्चिता।
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः॥

लाघवं चोपजायेत सुनिरूढं तमादिशेत्।
सुनिरूढं ततोजन्तुं स्नानवन्तं तु भोजयेत्॥
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात्।
सर्व्वं वा जाङ्गलरसैर्भोजयेदविकारिभिः॥
त्रिभागहीनमर्द्धं वा हीनमात्रमथापि वा।
यथाग्निदोषं मात्रेयं भोजनस्य विधीयते॥
अनन्तरं ततो युञ्ज्याद्यथास्वं स्नेहवस्तिना।
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः॥
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणं।
तदहस्तस्य पवनाद्भयं बलवदिष्यते॥
रसौदनस्तेन शस्तस्तदहश्चानुवासनम्।
पश्चादग्निबलं मत्वा पवनस्य च चेष्टितम्॥
अन्नोपस्तम्भिते कोष्ठे स्नेहवस्तिर्व्विधीयते।
अनायान्तं मुहूर्त्तात्तु निरूहं शोधनैर्हरेत्॥
तीक्ष्णैर्निरूहैर्मतिमान्क्षारमूत्राम्लसंयुतैः।
विगुणानिलविष्टब्धं चिरं तिष्ठन्निरूहणं॥
शूलारतिज्वरानाहं मरणं वा प्रवर्त्तयेत्।
नतु भुक्तवते देयमास्थापनमिति स्थितिः॥
विसूचिकां वा जनयेच्छर्द्दिं वापि सुदारुणम्।
कोपयेत्सर्व्वदोषान्वा तस्माद्दद्यादभोजिते॥
जीर्णान्नस्याशये दोषाः पुंसः प्रव्यक्तिमागताः।

निःशेषाः सुखमायान्ति भोजनेनाप्रपीडिताः ॥
न वास्थापनविक्षिप्तमन्नमग्निः प्रधावति ।
तस्मादास्थापनं देयं निराहाराय जानता ॥
आवस्थिकं क्रमञ्चापि मत्वा कार्य्यं निरूहणम् ।
मलेऽपकृष्टे दोषाणां बलवत्त्वं न विद्यते ॥
क्षीराण्यम्लानि मूत्राणि स्नेहाः क्वाथा रसास्तथा ।
लवणानि फलक्षौद्रं शताह्वा सर्षपं वचा ॥
एला त्रिकटुकं रास्ना सरलं देवदारु च ।
रजनी मधुकं हिङ्गु कुष्ठं संशोधनानि च ॥
कटुका शर्करा मुस्तमुशीरं चन्दनं शठी ।
मञ्जिष्ठा मदनं चण्डा त्रायमाणा रसाञ्जनम् ॥
बिल्वमध्यं यमानी च फलिनी शक्रजा यवाः ।
काकोली क्षीरकाकोली जीवकर्षभकावुभौ ॥
तथा मेदा महामेदा ऋद्धिर्वृद्धिर्मधूलिका ।
निरूहेषु यथालाभमेष वर्गो विधीयते ॥
स्वस्थे क्वाथस्य चत्वारो भागाः स्नेहस्य पञ्चमः ।
क्रुद्धेऽनिले चतुर्थस्तु षष्ठः पित्ते कफेऽष्टमः ॥
सर्व्वेषु चाष्टमो भागः कल्कानां लवणं पुनः ।
क्षौद्रं मूत्रं फलं क्षीरमम्लं मांसरसं तथा ॥
युक्त्या प्रकल्पयेद्धीमान् निरूहे कल्पनाविधिः ।
कल्कस्नेहकषायाणामविवेकाद्भिषग्वरैः ॥

वस्तिस्तु कल्पितःसम्यक्तस्यादानं यथार्थकृत् ।
दत्वादौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम् ॥
पात्रे तलेन मथ्नीयादनुस्नेहं शनैःशनैः ।
सम्यक्सुमथिते दद्यात्फलकल्कमतः परम् ॥
ततो यथोचितान्कल्कान्भागैः स्वैः सूक्ष्मपेषितान् ।
गम्भीरे भाजनेऽन्यस्मिन्मथ्नीयात्तं खजेन च ॥
यथा च साधु मन्येत न सान्द्रो न तनुः समः ।
कषायप्रसृतान्पञ्च सुपूतांस्तत्र दापयेत् ।
रसक्षीराम्लमूत्राणां दोषावस्थामवेक्ष्य तु ॥

अतऊर्द्धं द्वादशप्रसृतान्वक्ष्यामः ॥

दत्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयं ।
विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयं ॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितं ॥
वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितं ।
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत् ॥
ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितं ।
अपह्रासे भिषक्कुर्य्यात्तद्वत्प्रसृतिह्रापनं ॥
यथावयो निरूहाणां कल्पनेयमुदाहृता ।
सैन्धवादिद्रवान्तानां सिद्धिकामैर्भिषग्वरैः ॥

अत ऊर्द्धं प्रवक्ष्यन्ते वस्तयोऽत्र विभागशः ।

यथादोषं प्रयुक्ता ये हन्युर्नानाविधान्गदान् ॥
शम्पाकोरुवुवर्षाभूवाजिगन्धानिशाच्छदैः ।
पञ्चमूलीबलारास्नागुडूचीसुरदारुभिः ॥
क्वथितैः पालिकैरेभिर्मदनाष्टकसंयुतैः ।
कल्कैर्मागधिकाम्भोदहवुषामिसिसैन्धवैः ॥
वत्साक्षयप्रियङ्गूग्रायष्ट्याह्वयरसाञ्जनैः ।
दद्यादास्थापनं कोष्णं क्षौद्राद्यैरभिसंस्कृतं ॥
पृष्ठोरुत्रिकशूलाश्मविण्मूत्रानिलसङ्गिनां ।
ग्रहणीमारुतार्शोघ्नं रक्तमांसबलप्रदं ॥
गुडूचीत्रिफलारास्नादशमूलबलापलैः ।
क्वथितैः श्लक्ष्णपिष्टैस्तु प्रियङ्ग्वञ्जनसैन्धवैः ॥
शतपुष्पावचाकृष्णायवानीकुष्ठविल्वजैः ।
सगुडैरक्षमात्रैस्तु मदनार्द्धपलान्वितैः ॥
क्षौद्रतैलघृतक्षीरशुक्तकाञ्जिकमस्तुभिः ।
समालोड्य च मूत्रैस्तु दद्यादास्थापनं परं ॥
तेजोवर्णबलोत्साहवीर्य्याग्निप्राणबर्द्धनं ।
सर्व्वमारुतरोगघ्नं वयःस्थापनमुत्तमं ॥
कुशादिपञ्चमूलाब्दत्रिफलोत्पलवासकैः ।
शारिवोशीरमञ्जिष्ठारास्नारेणुपरूषकैः ॥
पालिकैः क्वथितैः सम्यग्द्रव्यैरेभिश्च पेषितैः ।
शृङ्गाटकात्मगुप्तेभकेसरागुरुचन्दनैः ॥

विदारीमिसिमञ्जिष्ठाश्यामेन्द्रयवसिन्धुजैः ।
फलपद्मकयष्ट्याह्वैः चौद्रचीरघृताप्लुतैः ॥
दत्तमास्थापनं शीतमम्लहीनैस्तथाद्रवैः ।
दाहासृग्दरपित्तासृक्पित्तगुल्मज्वराञ्जयेत् ॥
रोध्रचन्दनमञ्जिष्ठारास्नानन्ताबलर्द्धिभिः ।
सारिवावृषकाश्मर्य्यमेदामधुकपद्मकैः ॥
स्थिरादितृणमूलैश्च क्वाथैः कर्षत्रयोन्मितैः ।
पिष्टैर्जीवककाकोलीयुगर्द्धिमधुकोत्पलैः ॥
प्रपौण्डरीकजीवन्तीमेदारेणुपरूषकैः ।
अभीरुमिसिमिञ्जूत्यवत्सकोशीरपद्मकैः ॥
कसेरुशर्करायुक्तैः सर्पिर्मधुपयःप्लुतैः ।
द्रवैस्तोत्ताम्लवर्ज्यैश्च दत्तो वस्तिःसुशीतलः ॥
गुल्मासृग्दरहृत्पाण्डुरोगान्सविषमज्वरान् ।
असृक्पित्तातिसारौ च हन्यात्पित्तकृतानगदान् ॥
भद्रानिम्बकुलत्थार्ककोशातक्यमृतामरैः ।
सारिवावृहतीपाठामूर्व्वारग्वधवत्सकैः ॥
क्वाथः कल्कास्तु कर्त्तव्या बलामदनसर्षपैः ।
सैन्धवामरकुष्ठलापिप्पलीविल्वनागरैः ॥
कटुतैलमधुक्षारमूत्रतैलाम्बुसंयुतैः ।
कार्य्यमास्थापनं तूर्णं कामलापाण्डुमेहिनां ॥
मेदस्विनामनशीनां कफरोगाशनर्दिषां ।

गलगण्डगरश्वानिश्लीपदोदररोगिणां ॥
दशमूलीनिशाविल्वपटोलत्रिफलामरैः ।
क्वथितैः कल्कपिष्टैस्तु मुस्तसैन्धवदारुभिः ॥
पाठामागधिकेन्द्राह्वैस्तैलक्षारमधुप्लुतैः ।
कुर्य्यादास्थापनं सम्यग्मूत्राम्लफलयोजितं ॥
कफपाण्डुमदालस्यमूत्रमारुतसंज्ञिनां ।
आमाटोपापचीश्लेष्मगुल्मक्रिमिविकारिणां ॥
वृषाश्मभेदवर्षाभूधान्यगन्धर्व्वहस्तकैः ।
दशमूलबलामूर्व्वायवकोलनिशाच्छदैः ॥
कुलत्थविल्वभूनिम्बैः क्वथितैः पलसम्मितैः ।
कल्कैर्मदनयष्ट्याह्वषड्ग्रन्थामरसर्षपैः ॥
पिप्पलीमूलसिन्धूत्थयमानीमिसिवत्सकैः ।
क्षौद्रेक्षुक्षीरगोमूत्रसर्पिस्तैलरसप्लुतैः ॥
तूर्णमास्थापनं कार्य्यं संसृष्टबहुरोगिणां ।
अश्मरीशर्कराष्ठीलातूणीगुल्मगदापहं ॥
रास्नारग्वधवर्षाभूकटुकोशीरवारिदैः ।
त्रायमाणामृतारक्तापञ्चमूलविभीतकैः ॥
सबलैः पालिकैः क्वाथः कल्कस्तु मदनान्वितैः ।
यष्ट्याह्वमिशिसिन्धूत्थफलिनीन्द्रयवाह्वयैः ॥
रसाञ्जनरसक्षौद्रद्राक्षासौवीरसंयुतैः ।
युक्तो वस्तिः सुखोष्णोऽयं मांसशुक्रबलौजसां ॥

आयुषोऽग्नेश्च संस्कर्त्ता हन्ति चाशु गदानिमान्।
गुल्मासृग्दरवीसर्पमूत्रकृच्छ्रक्षतक्षयान्॥
विषमज्वरमर्शांसि ग्रहणीं वातकुण्डलीं।
जानुजङ्घाशिरोवस्तिग्रहोदावर्त्तमारुतान्॥
वातासृक्शर्कराष्ठीलाकुक्षिशूलोदरारुचीः।
रक्तपित्तकफोन्मादप्रमेहाध्मानहृद्ग्रहान्॥
वातघ्नौषधनिःक्वाथाः सैन्धवत्रिवृतायुताः।
साम्लाः सुखोष्णा योज्याः स्युर्वस्तयः कुपितेऽनिले॥
न्यग्रोधादिगणक्वाथाः काकोल्यादिसमायुताः।
विधेया वस्तयः पित्ते ससर्पिष्काः सशर्कराः॥
आरग्वधादिनिःक्वाथाः पिप्पल्यादिसमायुताः।
सक्षौद्रमूत्रा देयाः स्युर्वस्तयः कुपिते कफे॥
शर्करेक्षुरसक्षीरघृतयुक्ताः सुशीतलाः।
क्षीरवृक्षकषायाढ्या वस्तयः शोणिते हिताः॥
शोधनद्रव्यनिःक्वाथास्तत्कल्कस्नेहसैन्धवैः।
युक्ताः खजेन मथिता वस्तयः शोधनाः स्मृताः॥
त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः।
ऊषकादिप्रतीवापा वस्तयो लेखनाः स्मृताः॥
बृंहणद्रव्यनिःक्वाथाः कल्कैर्मधुरकैर्युताः।
सर्प्पिर्मांससरसोपेता वस्तयो बृंहणाः स्मृताः॥
चटकाण्डोत्कटाक्वाथाः सक्षीरघृतशर्कराः।

आत्मगुप्ताफलावापाः स्मृता वाजीकरा नृणाम् ॥
विदार्य्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः ।
क्षीरसिद्धाः क्षौद्रयुताः सास्राः पिच्छिलसंज्ञिताः ॥
वाराहमाहिषौरभ्रवैडालैणेयकौक्कुटम् ।
सद्यस्कमसृगाजं वा देयं पिच्छिलबस्तिषु ॥
प्रियङ्ग्वादिगणक्वाथा अम्बष्ठाद्येन संयुताः ।
सक्षौद्राः सघृताश्चैव ग्राहिणो वस्तयः स्मृताः ॥
एतेष्वेव च योगेषु स्नेहाः सिद्धाः पृथक्पृथक् ।
समस्तेष्वथ वा सम्यग्विधेयाः स्नेहवस्तयः ॥
बन्ध्यानां शतपाकेन शोधितानां यथाक्रमम् ।
बलातैलेन देयाः स्युर्व्वस्तयस्त्रिवृतेन च ॥
नरस्योत्तमसत्त्वस्य तीक्ष्णं वस्तिं निधापयेत ।
मध्यमं मध्यसत्त्वस्य विपरीतस्य वै मृदुं ॥
एवं कालं बलं दोषं विकारञ्च विकारवित् ।
वस्तिद्रव्यबलं चैव वीक्ष्य वस्तीन् प्रयोजयेत् ॥
दद्यादुत्क्लेशनं पूर्व्वं मध्ये दोषहरं पुनः ।
पश्चात्संशमनीयञ्च दद्याद्वस्तिं विचक्षणः ॥
एरण्डवीजं मधुकं पिप्पलीसैन्धवं वचा ।
हवुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥
शताह्वा मधुकं वीजं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥

प्रियङ्गुमधुकं मुस्ता तथैव च रसाञ्जनम्।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः परः॥
नृपाणां तत्समानानां तथा सुमहतामपि।
नारीणां सुकुमाराणां शिशुस्थविरयोरपि॥
दोषनिर्हरणार्थाय बलवर्णोदयाय च।
समासेनोपदेच्यामि विधानं माधुतैलिकं॥
यानस्त्रीभोज्यपानेषु नियमश्चात्र नोच्यते।
फलञ्च विपुलं दृष्टं व्यापदाञ्चाप्यसम्भवः॥
योऽयस्त्वतः सुखेनैव निरूहक्रममिच्छता।
यदेच्छति तदेवैष प्रयोक्तव्यो विपश्चिता॥
मधुतैले समे स्यातां क्वाथश्चैरण्डमूलजः।
पलार्द्धं शतपुष्पायास्ततोऽर्द्धं सैन्धवस्य च॥
फलेनैकेन संयुक्तः खजेन च विलोडितः।
देयः सुखोष्णो भिषजा माधुतैलिकसंज्ञितः॥
वचामधुकतैलञ्च क्वाथः सरससैन्धवः।
पिप्पलीफलसंयुक्तो वस्तिर्युक्तरथः स्मृतः॥
सुरदारु वरा रास्ना शतपुष्पा वचा मधु।
हिङ्गुसैन्धवसंयुक्तो वस्तिर्दोषहरः स्मृतः॥
पञ्चमूलीकषायञ्च तैलं मागधिका मधु।
वस्तिरेष विधातव्यः सशताङ्गः ससैन्धवः॥
यवकोलकुलत्थानां क्वाथो मागधिका मधु।

ससैन्धवः समधुकः सिद्धवस्तिरिति स्मृतः ॥
मुस्तापाठामृतातिक्ताबलारास्नापुनर्नवाः।
मञ्जिष्ठारग्वधोशीरत्रायमाणाख्यगोक्षुरान् ॥
पालिकान्पञ्चमूलाव्यसहितान्मदनाष्टकम्।
जलाढके पचेत्क्वाथं पादशेषं पुनः पचेत् ॥
क्षीरप्रस्थेन संयुक्तं क्षीरशेषं परिस्रुतम्।
पादेन जाङ्गलरसस्तथा मधुघृतं समम् ॥
शताह्वाफलिनीयष्टीवत्सकैः सरसाञ्जनैः।
कार्षिकैः सैन्धवयुतैः कल्कैर्वस्तिः प्रयोजितः ॥
वातासृग्मोहशोफार्शोगुल्ममूत्रविबन्धनुत्।
विसर्पज्वरविड्भङ्गरक्तपित्तविनाशनः ॥
बल्यः सञ्जीवनो वृष्यश्चक्षुष्यः शूलनाशनः।
स्थापनानामयं राजा वस्तिर्मुस्तादिको मतः ॥
अवेक्ष्य भेषजं बुद्ध्या विकारञ्च विकारवित्।
बीजेनानेन मतिमान्कुर्य्याद्वस्तिशतान्यपि ॥
अजीर्णे न प्रयुञ्जीत दिवास्वप्नं च वर्ज्जयेत्।
आहाराचारिकं शेषमन्यद्युक्तं समाचरेत् ॥
यस्मान्मधु च तैलञ्च प्राधान्येन प्रदीयते।
माधुतैलिक इत्येवं भिषग्भिर्वस्तिरुच्यते ॥
रथेष्वपि च युक्तेषु हस्त्यश्वे चापि कल्पिते।
यस्मान्न प्रतिषिद्धोऽयमतो युक्तरथः स्मृतः ॥

बलोपचयवर्णानां यस्माद्व्याधिशतस्य च ।
भवत्येतेन सिद्धिस्तु सिद्धबस्तिरतोमतः ॥
सुखिनामल्पदोषाणां नित्यं स्निग्धाश्च ये नराः ।
मृदुकोष्ठाश्च ये तेषां विधेया माधुतैलिकाः ॥
मृदुत्वात्पादहीनत्वादकृत्स्नविधिसेवनात् ।
एकबस्तिप्रदानाच्च सिद्धबस्तिष्वयन्त्रणा ॥

---

॥ एकोनचत्वारिंशत्तमोऽध्यायः ॥

अथात आतुरोपद्रवचिकित्सितं व्याख्यास्यामः ॥
स्नेहपीतस्य वान्तस्य विरिक्तस्य सुतामृजः ।
निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥
सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति ।
अल्पोमहद्भिर्बहुभिश्छादितोऽग्निरिवेन्धनैः ॥
सचाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते ।
काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥
हृतदोषप्रमाणेन सदाहारविधिःस्मृतः ।
त्रीणि चात्र प्रमाणानि प्रस्थोऽर्द्धाढकमाढकं ॥
तत्रावरं प्रस्थमात्रं द्वे शेषे मध्यमोत्तमे ॥
प्रस्थे परिस्रुते देया यवागूः स्वल्पतण्डुला ।
द्वे चैवार्द्धाढके देये तिस्रश्चाप्याढके गते ॥
विलेपीमुचितान्नाच्चतुर्थीमकृतां ततः ।

दद्याद्युक्तेन विधिना क्लिन्नसिक्थामपिच्छिलां ॥
अस्निग्धलवणां स्वच्छमुद्गयूषयुतान्ततः ।
अंशद्वयप्रमाणेन दद्यात्सुस्निग्धमोदनं ॥
ततः सघृतमण्डेन हृद्येनेन्द्रियबोधिना ॥
चीनंशान्वितरेद्भोक्तुमातुरायौदनं मृदुं ।
ततो यथोचितं भक्तम्भोक्तुमस्मै विचक्षणः ॥
लावणैर्हरिणादीनां रसैर्द्यात्सुसंस्कृतैः ।
हीनमध्योत्तमेष्वेव विरेकेषु विधिः स्मृतः ॥
एकद्वित्रिगुणः सम्यगाहारस्य क्रमो हितः ।
कफपित्ताधिकान्मद्यनित्यान्हीनविशोधितान् ॥
पेयाभिष्यन्दयेत्तेषां तर्पणादिक्रमो हितः ।
वेदनालाभनियमशोकवैचित्यहेतुभिः ॥
नरानुपोषितांश्चापि विरिक्तवदुपाचरेत् ।
आढकार्द्धाढकप्रस्थसञ्ज्ञा श्लेषा विरेचने ॥
एको विरेकः श्लेष्मान्तो न द्वितीयोऽस्ति कश्चन ।
बलं यत्त्रिविधं प्रोक्तमतस्तत्र क्रमस्त्रिधा ॥
तत्रानुक्रमभेकन्तु बलस्थः सकृदाचरेत् ।
द्विराचरेन्मध्यबलस्त्रीन्वारान्दुर्बलस्तथा ॥
केचिदेवं क्रमं प्राहुर्मन्दमध्योत्तमाग्निषु ।
संसर्गेण विवृद्धेऽग्नौ दोषकोपभयाद्व्रजेत् ॥

प्राक्स्वादुतिक्तौ स्निग्धाम्ललवणान्कटुकं ततः ।
स्वादम्ललवणान्भूयः स्वादुतिक्तावतः परं ॥
स्निग्धरूक्षान्रसांश्चैव व्यत्यासात्स्वस्थवत्ततः ।
केवलं स्नेहपीतो वा वान्तो यश्चापि केवलं ॥
स सप्तरात्रं मनुजो भुञ्जीत लघु भोजनं ।
क्षतः सिराव्यधो यस्य क्षतं यस्य च शोधनं ॥
स ना परिहरेन्मासं यावद्वा बलवान्भवेत् ।
एकैकस्मिन्परिहरेद्दस्तौ वस्तौ त्र्यहं त्र्यहं ॥
तृतीये तु परीहारे यथायोगं समाचरेत् ।
तैलपूर्णामत्रद्भाण्डसधर्माणो व्रणातुराः ॥
स्निग्धशुद्धाचिररोगार्त्ता ज्वरातीसारिणश्च ये ।
क्रुध्यतः कुपितं पित्तं कुर्यात्तांस्तानुपद्रवान् ॥
आयास्यतः शोचतो वा चित्तं विभ्रममृच्छति ।
मैथुनोपगमाद्घोरान्व्याधीनाप्नोति दुर्मतिः ॥
आक्षेपकं पक्षघातमङ्गप्रग्रहमेव च ।
गुह्यप्रदेशे श्वयथुं कासश्वासौ च दारुणौ ॥
शुक्रवच्चापि रुधिरं सरजस्कं प्रवर्त्तते ।
लभते च दिवास्वप्नात्तांस्तान्व्याधीन्कफात्मकान् ॥
प्लीहोदरं प्रतिश्यायं पाण्डुतां श्वयथुं ज्वरं ।
मोहं सदनमङ्गानामविपाकं तथारुचिं ॥
तमसा चाभिभूतस्तु स्वप्नमेवाभिनन्दति ।

उच्चैःसम्भाषणाद्वायुः शिरस्यापादयेद्रुजं ॥
आन्ध्यं जाड्यमजिघ्रत्वं बाधिर्य्यं मूकतां तथा ॥
हनुमोक्षमधीमन्थमर्द्दितञ्च सुदारुणं ।
नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरं ॥
लभते दन्तचालंच तांस्तांश्चान्यानुपद्रवान् ।
यानयानात्तु लभते च्छर्द्दिमूर्च्छाभ्रमक्लमान् ॥
तथैवाङ्गग्रहं घोरमिन्द्रियाणाञ्च विभ्रमं ।
चिरासनात्तथा स्थानाच्छ्रोण्यां भवति वेदना ॥
अतिचंक्रमणाद्वायुर्जङ्घयोः कुरुते रुजः ।
सक्थिप्रशोषं शोफं वा पादहर्षमथापि वा ॥
शीतरूक्षोगतोयानां सेवा मारुतवृद्धये ।
ततोऽङ्गमर्द्दविष्टम्भशूलाध्मानप्रवेपकाः ॥
वातातपाभ्यां वैवर्ण्यं ज्वरं चापि समाप्नुयात् ।
विरुद्धाध्यशनान्मृत्युं व्याधिं वा घोरमृच्छति ॥
असात्म्यभोजनं हन्याद्बलवर्णमसंशयं ।
अनात्मवन्तः पशुवद्भुञ्जते ये प्रमाणतः ॥
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ।
व्यापदां कारणं वीक्ष्य व्यापत्स्वेतासु बुद्धिमान् ॥
प्रयतेतातुरारोग्ये प्रत्यनीकेन हेतुना ॥
विरिक्तवान्तैर्हरिणैणलावकाः शशश्च रुव्यः समयूरतित्तिरिः ।
सषष्टिकाश्चैव पुराणशालयस्तथैव मुद्गा लघु यच्च कीर्त्तितं ॥

॥ चत्वारिंशत्तमोऽध्यायः ॥

अथातो धूमनस्यकवलग्रहचिकित्सितं व्याख्यास्यामः ॥

धूमः पञ्चविधो भवति। तद्यथा। प्रायोगिकः स्नैहनो वैरेचनः कासघ्नो वामनीयश्चेति ॥

तत्रैलादिना कुष्ठतगरवर्ज्जेण श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं क्षौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्तिः प्रायोगिके। स्नेहफलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नैहने। शिरोविरेचनद्रव्यैर्वैरेचने। बृहतीकण्टकारिकात्रिकटुककासमर्द्दहिङ्गिङ्गुदीत्वङ्मनःशिलाछिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्ने। स्नायुचर्म्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवल्लूरकृमिप्रभृतिभिर्वामनीयैश्च वामनीये ॥

तत्र वस्तिनेत्रद्रव्यैर्धूमनेत्रद्रव्याणि व्याख्यातानि भवन्ति। धूमनेत्रन्तु कनिष्ठिकापरिणाहमग्रे कलायमात्रं स्रोतो मूलेऽङ्गुष्ठपरिणाहं धूमवर्त्तिप्रवेशस्रोतोऽङ्गुलान्यष्टचत्वारिंशत्प्रायोगिके। द्वात्रिंशत्स्नैहने। चतुर्विंशतिर्वैरेचने। षोडशाङ्गुलं कासघ्ने वामनीयेच। एतेऽपि कोलास्थिमात्रच्छिद्रे भवतः। व्रणनेत्रमष्टाङ्गुलं व्रणधूपनार्थं कलायपरिमण्डलं कुलत्थवाहिस्रोत इति ॥

अथ सुखोपविष्टः सुमनाश्चर्ज्वधोदृष्टिरतन्द्रितः स्नेहाक्तां प्रदीप्तायां वर्त्तिं नेत्रस्रोतसि प्रणिधाय धूमं पिबेत्।

मुखेन तं पिबेत्पूर्वं नासिकाभ्यां ततः पिबेत्।
मुखपीतं मुखेनैव वमेत्पीतञ्च नासया ॥

मुखेन धूममादाय नासिकाभ्यां न निर्हरेत्।
तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते ॥

विशेषतस्तु प्रायोगिकं घ्राणेनाददीत स्नैहनं मुखनासाभ्यां नासिकया वैरेचनं मुखेनैवेतरौ तत्र प्रायोगिकीं वर्त्तिं व्यपगतशरकाण्डां निवातातपशुष्कामङ्गारेष्ववदीप्य नेत्रमूलस्रोतसि प्रयुज्य धूममाहरेतिब्रूयात्। एवं स्नैहनं वैरेचनिकञ्च कुर्य्यादिति। इतरयोर्थ्येतधूमेऽङ्गार स्थिरे समाहिते शरावे प्रक्षिप्य वर्त्तिं मूलच्छिद्रेणान्येन शरावेण पिधाय तस्मिन् छिद्रे नेत्रमूलं संयोज्य धूममासेवेत ॥ प्रशान्ते धूमे वर्त्तिमवशिष्टां प्रक्षिप्य पुनरपि धूमं पाययेदादोषविशुद्धेरेष धूमपानोपायविधिः ॥

तत्र शोकश्रमभयामर्षौष्ण्यविषरक्तपित्तमदमूर्च्छादाहपिपासापाण्डुरोगतालुशोषच्छर्द्दिशिरोऽभिघातोद्गारापतर्पिततिनिरप्रमेहोदराध्मानोर्द्धवातार्त्ता बालवृद्धदुर्बलविरिक्तास्थापितजागरितगर्भिणीरूक्षक्षीणक्षतोरस्कमधुघृतदधिदुग्धमत्स्यमद्ययवागूपीताल्पकफाश्च न धूममासेवेरन् ॥

अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः।
घ्राणश्रोत्राक्षिजिह्वानामुपघातञ्च दारुणं ॥

आद्यास्तु त्रयो धूमा द्वादशसु कालेषूपादेयाः। तद्यथा। क्षुतदन्तप्रक्षालननस्यस्नानभोजनदिवास्वप्नमैथुनच्छर्दिमूत्रोच्चाररुषितशस्त्रकर्मान्तेष्विति। तत्र मूत्रोच्चारक्षवथुरुषितमैथुनान्तेषु स्नैहिकः स्नानच्छर्दनदिवास्वप्नान्तेषु वैरेचनः ॥

दन्तप्रक्षालननस्यस्नानभोजनशस्त्रकर्मान्तेषु प्रायोगिक इति ॥ तत्र स्नैहिको वातं शमयति स्नेहादुपलेपाच्च वैरेचनः श्लेष्माणमुत्क्लेश्यापकर्षति रौक्ष्यात्तैक्ष्ण्यादौष्ण्याद्वैशद्याच्च। प्रायोगिकः श्लेष्माणमुत्क्लेशयत्युत्क्लिष्टं चापकर्षति साधारणत्वात्पूर्वाभ्यामिति ॥

भवति चात्र ॥ नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुसुगन्धिविशदाननः ॥

कासश्वासारोचकास्योपलेपस्वरभेदमुखास्रावक्षवथुतन्द्रानिद्राहनुमन्यास्तम्भपीनसशिरोरोगकर्णाक्षिशूलवातकफनिमित्ताश्चास्य मुखरोगा न भवन्ति।

तस्य योगातियोगौ विज्ञातव्यौ तत्र योगो रोगप्रशमनोऽतियोगो रोगाप्रशमनस्तालुगलशोषपरिदाहपिपासामूर्च्छाभ्रममदकर्णाक्षिदृष्टिनाशारोगदौर्बल्यानीत्ययोगो जनयति ॥

प्रायोगिकं त्रींस्त्रीनुच्छ्वासानाददीत । मुखनासिकाभ्याञ्च पर्य्यायांस्त्रींश्चतुरोवेति । स्नैहिकं यावदश्रुप्रवृत्तिः । वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीयः । ग्रासान्तरेषु कासघ्न इति । व्रणधूमं शरावसम्पुटोपनीतेन नेत्रेण व्रणमानयेत् धूमनाद्वेदनोपशमो व्रणवैशद्यमास्रावोपशमश्च भवति ॥

विधिरेष समासेन धूमस्याभिहितो मया ।
नस्यस्यातः प्रवक्ष्यामि विधिं निरवशेषतः ॥

औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च तद्द्विधमपि पञ्चधा। तद्य

था नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीडः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीडः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः ॥ तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन्वैशेषिको नस्यशब्दः ॥ तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषापबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु मुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥

शिरोविरेचनं श्लेष्मणाभिव्याप्ततालुकण्ठशिरसामरोचकशिरोगौरवशूलपीनसार्द्धावभेदकक्रिमिप्रतिश्यायापस्मारगन्धाज्ञानेष्वन्येषु चोर्द्ध्वजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तत्सिद्धेन वा स्नेहेनेति ॥

तत्रैतद्द्विविधमभुक्तवतोऽन्नकाले पूर्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥

अथ पुरुषाय शिरोविरेचनीयाय दन्तकाष्ठधूमपानाभ्यां विशुद्धवक्त्रस्रोतसे पाणितापपरिस्विन्नमृदितगलकपोलललाटप्रदेशाय वातातपरजोहीनवेश्मन्युत्तानशायिने प्रसारितकरचरणाय किञ्चित् प्रविलम्बितशिरसे वस्त्राच्छादितनेत्राय वामहस्तप्रदेशिन्यग्रोन्नामितनासाग्राय विशुद्धस्रोतसि दक्षिणहस्तेन स्नेहमुष्णानुतप्तं रजतसुवर्णताम्रमृत्पात्रशुक्तीनामन्यतमस्थं शुक्त्या पिचुना वा सु

कोष्णं स्नेहमद्रुतमासिञ्चेदव्यवच्छिन्नधारं यथा नेत्रे न प्राप्नोति ॥

स्नेहेऽवसिच्यमाने तु शिरो नैव प्रकम्पयेत् ।
न कुप्येन्न प्रभाषेच्च न क्षुयान्न हसेत्तथा ॥
एतैर्हि विहतः स्नेहो न सम्यक्प्रतिपद्यते ।
ततः कासप्रतिश्यायशिरोऽक्षिगदसम्भवः ॥

तस्य प्रमाणमष्टौ बिन्दवः प्रदेशिनीपर्वद्वयनिःसृताः प्रथममात्रा द्वितीया शुक्तिस्तृतीया पाणिशुक्तिरित्येतास्तिस्रो मात्रा यथाबलं प्रयोज्याः। स्नेहनस्यं नचोपगिलेत्कथंचिदपि ॥

शृङ्गाटकमभिप्लाव्य निरेति वदनाद्यथा ।
कफोत्क्लेशभयाच्चैव निष्ठीवेदविधारयन् ॥

दत्ते च पुनरपि संस्वेद्य गलकपोलादीन्धूममासेवेत भोजयेच्चैनमभिष्यन्दि ततोऽस्याचारिकमादिशेत । रजोधूमस्नेहातपमद्यद्रवपानशिरःस्नानातियानक्रोधादीनि च परिहरेत् ।
तस्य योगातियोगानां विज्ञानं भवति ॥

लाघवं शिरसो योगे सुखस्वप्नप्रबोधनम् ।
विकारोपशमः शुद्धिरिन्द्रियाणां मनःसुखम् ॥
कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः ।
लक्षणं मूर्ध्न्यतिस्निग्धे रूक्षं तत्रावचारयेत् ॥
अयोगे चैव वैगुण्यमिन्द्रियाणाञ्च रूक्षता ।
रोगाशान्तिश्च तत्रेष्टं भूयो नस्यं प्रयोजयेत् ॥
चत्वारो बिन्दवः षड्वा तथाष्टौ वा यथाबलं ।

शिरोविरेकस्नेहस्य प्रमाणमभिनिर्दिशेत्॥
नस्ये चोक्तुपदिष्टानि लक्षणानि प्रयोगतः।
शुद्धहीनातिसंज्ञानि विशेषाच्छास्त्रचिन्तकैः॥
लाघवं शिरसः शुद्धिः स्रोतसां व्याधिनिर्जयः।
चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम्॥
कण्डूपदेहौ गुरुता स्रोतसाङ्कफसंस्रवः।
मूर्द्ध्नि हीनविशुद्धे तु लक्षणं परिकीर्त्तितम्॥
मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः।
शून्यता शिरसश्चापि मूर्द्ध्नि गाढविरेचिते॥
हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्।
सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं निषेचयेत्॥
एकान्तरं द्व्यन्तरं वा सप्ताहं वा पुनः पुनः।
एकविंशतिरात्रं वा यावद्वा साधु मन्यते॥
मारुतेनाभिभूतस्य वात्यन्तं यस्य देहिनः।
द्विकालञ्चापि दातव्यं नस्यं तस्य विजानता॥

अवपीडस्तु शिरोविरेचनवदभिष्यन्दसर्पदष्टविसंज्ञेभ्यो दद्यात्। शिरोविरेचनद्रव्याणामन्यतममवपीड्यावपिब्य चेतोविकारकृमिविषाभिपन्नानां चूर्णं प्रधमेत्। शर्करेक्षुरसक्षीरघृतमांसरसानामन्यतमं क्षीणानां शोणितपित्ते च विदध्यात्॥

कृशदुर्बलभीरूणां सुकुमारस्य योषिताम्।
शस्ताः स्नेहाः शिरःशुद्धौ कल्कस्तेभ्यो यथाहितः॥

नस्येन परिहर्त्तव्यो भुक्तवानपतर्पितोऽत्यर्थतरुणप्रतिश्यायी
गर्भिणी पीतस्नेहोदकमद्यद्रवोऽजीर्णी दत्तवस्तिः क्रुद्धो गरार्त्त
स्तृषितः शोकाभिभूतः श्रान्तो बालो वृद्धो वेगावरोधितः शिरः
स्नातुकामश्चेति॥ अनार्त्तवे चाभ्रे नस्यधूमौ परिहरेत्॥ तत्र
हीनातिमात्रातिशीतोष्णसहसाप्रदानातिप्रविलम्बितशिरस उच्छिं
घतो विचलतोऽभ्यवहरतो वा प्रतिषिद्धप्रदानाच्च व्यापदो
भवन्ति तृष्णोद्गारादयो दोषनिमित्ताः क्षयजाश्च॥

भवतश्चात्र॥ नस्ये शिरोविरेके च व्यापदो द्विविधाः स्मृताः।
दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ता यथाक्रमम्॥
दोषोत्क्लेशनिमित्तांस्तु जयेच्छमनशोधनैः।
अथ क्षयनिमित्तांस्तु यथास्वं बृंहणं हितम्॥

प्रतिमर्शश्चतुर्दशसु कालेषूपादेयः। तद्यथा। तल्पोत्थितेन
प्रक्षालितदन्तेन गृहान्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन
मूत्रोच्चारकवलाञ्जनान्ते भुक्तवता छर्दितवता दिवास्वप्नोत्थितेन सा
यञ्चेति॥

तत्र तल्पोत्थितेनासेवितः प्रतिमर्शो रात्रावुपचितनासास्रो
तोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रक्षालितदन्तेनासे
वितो दन्तानां दृढतां वदनसौगन्ध्यं चापादयति॥ गृहान्निर्गच्छता
सेवितो नासास्रोतसः क्लिन्नतया रजो धूमो वा नाबाधते॥ व्याया
ममैथुनाच्च परिश्रान्तेनासेवितः श्रममुपहन्ति॥ मूत्रोच्चारान्ते वा
सेवितो दृष्टेर्गुरुत्वमपनयति॥ कवलाञ्जनान्ते सेवितो दृष्टिं प्रसा

दयति ॥ अभुक्तवता सेवितः स्रोतसां विशुद्धिं लघुतां चापाद यति ॥ वान्तेनासेवितः स्रोतोविलग्नं श्लेष्माणमपोह्य भक्तकाङ्क्षामा पादयति ॥ दिवास्वप्नोत्थितेनासेवितो निद्राशेषं गुरुत्वं मलं चा पोह्य चित्तैकाग्र्यं जनयति ॥ सायं चासेवितः सुखनिद्राप्रबोधं चेति ॥

ईषदुच्छिंघतः स्नेहो यावद्वक्त्रं प्रपद्यते ।
नस्ये निषिक्तं तं विद्यात्प्रतिमर्शं प्रमाणतः ॥
नस्येन रोगाः शाम्यन्ति नराणामूर्द्ध्वजत्रुजाः ।
इन्द्रियाणां च वैमल्यं कुर्य्यादास्यं सुगन्धि च ॥
हनुदन्तशिरोग्रीवात्रिकबाहूरसां बलम् ।
वलीपलितखालित्यव्यङ्गानां चाप्यसम्भवः ॥
तैलं कफे सवाते स्यात्केवलं पवने वसाम् ।
दद्यात्सर्पिः सदा पित्ते मज्जानं च समारुते ॥
चतुर्विधस्य स्नेहस्य विधिरेव प्रकीर्त्तितः ।
श्लेष्मस्थानाविरोधित्वात्तेषु तैलं विधीयते ॥
अतः परं प्रवक्ष्यामि कवलग्रहणे विधिम् ।
चतुर्द्धा कवलः स्नेही प्रसादी शोधिरोपणौ ॥
स्निग्धोष्णैः स्नेहिको वाते स्वादुशीतैः प्रसादनः ।
पित्ते कट्वम्ललवणैरुक्षोष्णैः शोधनः कफे ॥
कषायतिक्तमधुरैः कटूष्णैरोपणो व्रणे ।
चतुर्विधस्य चैवास्य विशेषोऽयं प्रकीर्त्तितः ॥

तत्र त्रिकटुकवचासर्षपहरीतकीकल्कमालोड्य तैलशुक्तसुरामूत्र क्षारमधूनामन्यतमेन सलवणमभिप्रतप्तमुपस्विन्नमृदितगलकपोल ललाटप्रदेशो धारयेत्॥

सुखं सञ्चार्य्यते यातु मात्रा सा कवलस्मृता ।
असञ्चार्य्या तु या मात्रा गण्डूषः स प्रकीर्त्तितः॥

तावच्च धारयितव्योऽनन्यमनसोन्नतदेहेन यावद्दोषपरिपूर्ण कपोलत्वं नासास्रोतोनयनपरिस्रावश्च भवति तदा विमोक्तव्यः पुनश्चान्यो गृहीतव्य इति॥

एवं स्नेहपयःक्षौद्ररसमूत्राम्लसम्भृताः ।
कषायोष्णोदकाभ्याञ्च कवला दोषतो हिताः॥
व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवं ।
इन्द्रियाणां प्रसादश्च कवले शुद्धिलक्षणं॥
हीने जाड्यकफोत्क्लेशावरसज्ञानमेव च ।
अतियोगान्मुखे पाकः शोषतृष्णारुचिक्लमाः॥
शोधनीयविशेषेण भवन्त्येवं न संशयः ।
तिला नीलोत्पलं सर्पिः शर्करा क्षीरमेव च॥
सक्षौद्रो दग्धवक्त्रस्य गण्डूषो दाहनाशनः।
कवलस्य विधिर्ह्येष समासेन प्रकीर्त्तितः॥
विभज्य भेषजं बुद्ध्या कुर्व्वीत प्रतिसारणं ।
कल्को रसक्रिया क्षौद्रं चूर्णं चेति चतुर्व्विधं॥
अङ्गुल्यग्रप्रणीतन्तु यथास्वं मुखरोगिणां ।

तस्मिन्योगमयोगञ्च कवलोक्तं विभावयेत् ॥
तानेव शमयेद्व्याधीन्कवलो यानपोहति।
दोषघ्नमनभिष्यन्दि भोजयेच्च तथा नरं ॥

इति श्रीसौश्रुत आयुर्वेदशास्त्रे चतुर्थं चिकित्सितस्थानं समाप्तं ॥

# कल्पस्थानं ।

## ॥ प्रथमोऽध्यायः ॥

॥ अथातोऽन्नपानरक्षाकल्पं व्याख्यास्यामः ॥

धन्वन्तरिः काशिपतिस्तपोधर्म्मभृतांवरः ।
सुश्रुतप्रभृतीन् शिष्यान् शशासाहतशासनः ॥
रिपवो विक्रमाक्रान्ता ये च स्वे कृत्यतां गताः ।
सिसृक्षवः क्रोधविषं विवरं प्राप्य तादृशं ॥
विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः ।
स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया ॥
विषकन्योपयोगाद्वा क्षणाज्जह्यादसून्नरः ।
तस्माद्वैद्येन सततं विषाद्रक्ष्यो नराधिपः ॥
यस्माच्च चेतोऽनित्यत्वमश्ववत् प्रथितं नृणां ।
न विश्वस्यात्ततो राजा कदाचिदपि कस्यचित् ॥
कुलीनं धार्म्मिकं स्निग्धं सुभृतं सततोत्थितं ।
अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनं ॥

क्रोधपारुष्यमात्सर्य्यमदालस्यविवर्ज्जितं ।
जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितं ॥
मेधाविनमसंश्रान्तमनुरक्तं हितैषिणं ।
पटुं प्रगल्भं निपुणं दक्षं मायाविवर्ज्जितं ॥
पूर्व्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदं ।
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितं ॥
प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि ।
सजालकं गवाक्षाढ्यमात्मवर्गनिषेवितं ॥
विकक्षसृष्टसंसृष्टं सवितानं कृतार्च्चनं ।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसं ॥
तत्राध्यक्षं नियुञ्जीत प्रायोवैद्यगुणान्वितं ।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः ॥
संविभक्ताः सुमनसो नीचकेशनखाः स्थिराः ।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः ॥
तस्य चाज्ञाविधेयाः स्युर्विविधाः परिकर्म्मिणः ।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः ॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत् ।
माहानसिकवोढारः सौपौदनिकपौपिकाः ।
भवेयुर्वैद्यवशगा येचाप्यन्ये तु केचन ।
इङ्गितज्ञो मनुष्याणां वाक्चेष्टमुखवैकृतैः ॥
विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान ।

न ददात्युत्तरं पृष्टो विवचन् मोहमेति च॥
अपार्थं बहु सङ्कीर्णं भाषते चापि मूढवत्।
स्फोटयत्यङ्गुलीर्भूमिमकस्मादिलिखेद्धसेत्॥
वेपथुर्जायते तस्य त्रस्तश्चान्योऽन्यमीक्षते।
क्षामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि॥
आलभेतासकृद्दीनः करेण च शिरोरुहान्।
निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः॥
वर्त्तते विपरीतस्तु विषदाता विचेतनः।
केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया॥
असतामपि सन्तोऽपि चेष्टां कुर्व्वन्ति मानवाः।
तस्मात् परीक्षणं कार्य्यं भृत्यानामादितो नृपैः॥
अन्ने पाने दन्तकाष्ठे तथाभ्यङ्गेऽवलेखने।
उत्सादने कषाये च परिषेकेऽनुलेपने॥
स्रक्षु वस्त्रेषु शय्यासु कवचाभरणेषु च।
पादुकापादपीठेषु पृष्ठेषु गजवाजिनां॥
विषजुष्टेषु चान्येषु नस्यधूमाञ्जनादिषु।
लक्षणानि प्रवक्ष्यामि चिकित्सामप्यनन्तरं॥
नृपभक्तादलिं न्यस्तं सविषं भक्षयन्ति ये।
तत्रैव ते विनश्यन्ति मक्षिकावायसादयः॥
हुतभुक्तेन चान्नेन भृशं चटचटायते।
मयूरकण्ठप्रतिमो जायते चापि दुःसहः॥

भिन्नार्चिस्तीक्ष्णधूमश्च न चिराच्चोपशाम्यति ।
चकोरस्याक्षिवैराग्यं जायते क्षिप्रमेव तु ॥
दुष्टान्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः ।
कोकिलः स्वरवैकृत्यं क्रौञ्चस्तु मदमृच्छति ॥
हृष्येन्मयूर उद्विग्नः क्रोशतः शुकसारिके ।
हंसः क्ष्वेडति चात्यर्थं भृङ्गराजस्तु कूजति ॥
पृषतो विसृजत्यश्रु विष्ठां मुञ्चति मर्कटः ।
सन्निकृष्टांस्ततः कुर्य्याद्राज्ञस्तान् मृगपक्षिणः ॥
वेश्मनोऽथ विभूषार्थं रक्षार्थञ्चात्मनः सदा ।
उपक्षिप्तस्य चान्नस्य वाष्पेणोर्द्ध्वं प्रसर्प्पता ॥
हृत्पीडा भ्रान्तनेत्रत्वं शिरोदुःखञ्च जायते ।
तत्र नस्याञ्जने कुष्ठं रामठं नलदं मधु ॥
कुर्य्याच्छिरीषरजनीचन्दनैश्च प्रलेपनं ।
हृदि चन्दनलेपस्तु तथासुखमवाप्नुयात् ॥
पाणिप्राप्तं पाणिदाहं नखशातं करोति च ।
अत्र प्रलेपःश्यामेन्द्रगोपासोमोत्पलानि च ॥
स चेत् प्रमादान्मोहाद्वा तदन्नमुपसेवते ।
अष्ठीलावत्ततो जिह्वा भवत्यरसवेदिनी ॥
तुद्यते दह्यते चापि श्लेष्मा चास्यात् प्रसिच्यते ।
तत्र वाष्पेरितं कर्म्म यच्च स्याद्दान्तकाष्ठिकं ॥
मूर्च्छां छर्द्दिमतीसारमाध्मानं दाहवेपथू ।

इन्द्रियाणाञ्च वैकृत्यं कुर्य्यादामाशयं गतं ॥
तत्राशु मदनालाबुविम्बीकोशातकीफलैः ।
छर्द्दनं दध्युदश्विद्भ्यामथ वा तण्डुलाम्बुना ॥
दाहं मूर्च्छामतीसारं नृणामिन्द्रियवैकृतं ।
आटोपपाण्डुतां कार्श्यं कुर्य्यात्पक्वाशयं गतं ॥
विरेचनं ससर्पिष्कं तत्रोक्तं नीलिनीफलं ।
दध्ना दूषी विषारिश्च पेयो वा मधुसंयुतः ॥
द्रवद्रव्येषु सर्व्वेषु क्षीरमद्योदकादिषु ।
भवन्ति विविधा राज्यः फेणबुद्बुदजन्म च ।
छायाश्चात्र न दृश्यन्ते दृश्यन्ते यदि वा पुनः ॥
भवन्ति यमलाश्छिद्रास्तन्वयो वा विकृतास्तथा ।
शाकसूपान्नमांसानि क्लिन्नानि विरसानि च ॥
सद्यः पर्य्युषितानीव विगन्धानि भवन्ति च ।
गन्धवर्णरसैर्हीनाः सर्व्वे भक्ष्याः फलानि च ॥
पक्वान्याशु विशीर्य्यन्ते पाकमामानि यान्ति च ।
विशीर्य्यते कूर्चकस्तु दन्तकाष्ठगते विषे ॥
जिह्वादन्तौष्ठमांसानां श्वयथुश्चोपजायते ।
अथास्य धातकीपुष्पपथ्याजम्बूफलास्थिभिः ॥
सक्षौद्रैः प्रच्छिते शोफे कर्त्तव्यं प्रतिसारणं ।
अथ वाङ्कोठमूलानि त्वचः सप्तच्छदस्य वा ॥
शिरीषमाषका वापि सक्षौद्राः प्रतिसारणं ।

जिह्वानिर्लेखकवलौ दन्तकाष्ठवदादिशेत् ।
पिच्छिलो बहुलोऽभ्यङ्गो विवर्णो वा विषान्वितः ॥
स्फोटजन्मरुजास्रावत्वक्पाकः स्वेदनं ज्वरः ।
दरणं चापि मांसानामभ्यङ्गे विषसंयुते ॥
'तत्र शीताम्बुसिक्तस्य कर्त्तव्यमनुलेपनं ।
चन्दनं तगरं कुष्ठमुशीरं वेणुपत्रिका ॥
सोमवल्ल्यमृता श्वेता पद्मं कालीयकं त्वचं ।
कपित्थरसमूत्राभ्यां पानमेतच्च युज्यते ॥
उत्सादने परीषेके कषाये चानुलेपने ।
शय्यावस्त्रतनुत्रेषु ज्ञेयमभ्यङ्गलक्षणैः ॥
केशशातः शिरोदुःखं खेभ्यश्च रुधिरागमः ।
ग्रन्थिजन्मोत्तमाङ्गेषु विषजुष्टे तु लेपने ॥
प्रलेपो बहुशस्तत्र भाविताः कृष्णमृत्तिकाः ।
स्वश्वपित्तघृतश्यामापालिन्दीतण्डुलीयकैः ॥
गोमयस्वरसोवापि हितो वा मालतीरसः ।
रसो मूषिकपर्ण्यावा धूमोवागारसम्भवः ॥
शिरोऽभ्यङ्गः शिरस्त्राणंस्नानमुष्णीषमेव च ।
स्रजश्च विषसंसृष्टाः साधयेदनुलेपवत् ॥
मुखलेपे मुखं श्यावं युक्तमभ्यङ्गलक्षणैः ।
पद्मिनीकण्टकप्रख्यैः कण्टकैश्चोपचीयते ॥
तत्र क्षौद्रघृतं पानं प्रलेपश्चन्दनं घृतं ।

पयस्या मधुकं फञ्जी बन्धुजीवपुनर्नवा ॥
अस्वास्थ्यं कुञ्जरादीनां लालास्रावोऽक्षिरक्तता ।
स्फिक्पायुमेढ्रमुष्केषु युक्तेषु स्फोटसम्भवः ॥
तत्राभ्यङ्गवदेवेष्टा याश्ववाहनयोः क्रिया ।
शोणितागमनं खेभ्यः शिरोरुक् कफसंस्रवः ॥
नस्यधूमगते लिङ्गमिन्द्रियाणान्तु वैकृतं ।
तत्र दुग्धैर्गवादीनां सर्पिः सातिविषैः शृतं ॥
पाने नस्ये च सश्वेतं हितं समदयन्तिकं ।
गन्धहानिर्व्विवर्णत्वं पुष्पाणां म्लानता भवेत् ॥
जिघ्रतश्च शिरोदुःखं वारिपूर्णे च लोचने ।
तत्र वाष्पेरितं कर्म्म मुखालेपे च यत्स्मृतं ॥
कर्णतैलगते श्रोत्रवैगुण्यं शोफवेदने ।
कर्णस्रावश्च तत्राशु कर्त्तव्यं प्रतिपूरणं ॥
स्वरसो बहुपुत्रायाः सघृतः क्षौद्रसंयुतः ।
सोमवल्करसश्चापि सुशीतो हित इष्यते ॥
अश्रूपदेहो दाहश्च वेदनादृष्टिविभ्रमः ।
अञ्जने विषसंसृष्टे भवेदान्ध्यमथापि वा ॥
तत्र सद्योघृतं पेयं तर्पणञ्च समागधं ।
अञ्जनं मेषशृङ्गस्य निर्य्यासो वरुणस्य च ॥
मुष्ककस्याजकर्णस्य फेणो गोपित्तसंयुतः ।
कपित्थमेषशृङ्ग्योश्च पुष्पं भल्लातकस्य वा ॥

एकैकं कारयेत् पुष्पं बन्धूकाङ्कोठयोरपि ।
शोफः स्रावस्तथास्वापः पादयोः स्फोटजन्म च ॥
भवन्ति विषजुष्टाभ्यां पादुकाभ्यामसंशयं ।
उपानत्पादपीठानि पादुकावत् प्रसाधयेत् ॥
भूषणानि हतार्चींषि न विभान्ति यथा पुरा ।
स्वानि स्थानानि हन्युश्च दाहपाकावदारणैः ॥
पादुकाभूषणे युक्तमभ्यङ्गविधिमाचरेत् ।
विषोपसर्गौ वाष्पादिर्भूषणान्तोयदीरितः ॥
समीक्ष्योपद्रवांस्तस्य विदधीत चिकित्सितं ।
महासुगन्धिमगदं यं प्रवक्ष्यामि तं भिषक् ॥
पानालेपननस्येषु विदधीताञ्जनेषु च ।
विरेचनानि तीक्ष्णानि कुर्य्यात् प्रच्छर्दनानि च ॥
सिराश्च व्यधयेत् क्षिप्रं प्राप्ते विस्रावणे यदि ।
मूषिकाजरुहा वापि हस्ते बद्धा तु भूपतेः ॥
करोति निर्व्विषं सर्व्वमन्नं विषसमायुतं ।
हृदयावरणं नित्यं कुर्य्याच्च मित्रमध्यगः ॥
पिवेद्घृतमजेयाख्यममृताख्यञ्च बुद्धिमान् ।
सर्पिर्दधिपयः क्षौद्रं पिवेद्वा शीतलं जलं ॥
मयूरान्नकुलान् गोधाः पृषतान् हरिणानपि ।
सततं भक्षयेच्चापि रसांस्तेषां पिवेदपि ॥
गोधानकुलमांसेषु हरिणस्य च बुद्धिमान् ।

दद्यात् सुपिष्टां पालिन्दीं मधुकं शर्करान्तथा ॥
शर्करातिविषे देये मायूरे समहौषधे।
पार्षते चापि देयाः स्युः पिप्पल्यः समहौषधाः ॥
सचौद्रः सघृतश्चैव शिम्बीयूषो हितः सदा।
विषघ्नानि च सेवेत भक्ष्यभोज्यानि बुद्धिमान् ॥
पिप्पलीमधुकचौद्रशर्करेक्षुरसाम्बुभिः।
छर्दयेद्भुक्तवद्यो भक्षितं यदि वा विषं ॥

---

॥ द्वितीयोऽध्यायः ॥

अथातः स्थावरविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥

स्थावरञ्जङ्गमञ्चैव द्विविधं विषमुच्यते।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोडशाश्रयं ॥
मूलं पत्रं फलं पुष्पं त्वक् चीरं सार एव च।
निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥

तत्र क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविद्युच्छिखा विजयानीत्यष्टौ मूलविषाणि ॥

विषपत्रिकालम्बावरदारुककरम्भमहाकरम्भाणि पञ्च पत्र विषाणि ॥

कुमुदतीवेणुकाकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरी भगन्धासर्पघातिनन्दनसारपाकानीति द्वादश फलविषाणि ॥

वेत्रकादम्बवल्लिजकरम्भमहाकरम्भाणि पञ्च पुष्पविषाणि ॥

अन्त्रपाचककर्त्तरीयसौरीयककरघाटकरम्भनन्दनवराटकानि सप्तत्वक्सारनिर्य्यासविषाणि ॥

कुमुदघ्नीस्नुहीजालक्षीर्य्याणि त्रीणि क्षीरविषाणि ॥

फेणाश्मभस्म हरितालञ्च द्वे धातुविषे ॥

कालकूटवत्सनाभसर्षपकपालककर्दमकवैराटकमुस्तकशृङ्गीविषप्रपौण्डरीकमूलकहालाहलमहाविषकर्कटकानीति त्रयोदश कन्दविषाणि। इत्येवं पञ्च पञ्चाशत् स्थावरविषाणि भवन्ति ॥

चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते।
षट्चैव सर्षपाण्याहुः शेषाण्येकैकमेव तु ॥
उद्वेष्टनं मूलविषैः प्रलापो मोह एव च।
जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पत्रविषेण तु ॥
मुष्कशोफः फलविषैर्दाहोऽन्नद्वेष एव च।
भवेत्पुष्पविषैश्छर्द्दिराध्मानं मोह एव च ॥
त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि।
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥
फेणागमः क्षीरविषे विड्भेदो जिह्वजिह्वता।
हृत्पीडनं धातुविषैर्मूर्च्छा दाहश्च तालुनि ॥
प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत्।
कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरं ॥
स्पर्शाज्ञानं कालकूटे वेपथुः स्तम्भ एव च।

ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ॥
सर्षपे वातवैगुण्यमानाहो ग्रन्थिजन्म च।
ग्रीवादौर्ब्बल्यवाक्सङ्गौ पालकेऽनुमताविह ॥
प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता।
वैराटके नाङ्गदुःखं शिरोरोगश्च जायते ॥
गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु।
शृङ्गीविषेणाङ्गसाददाहोदरविवृद्धयः ॥
पुण्डरीकेण रक्तत्वमक्ष्णोर्वृद्धिस्तथोदरे।
वैवर्ण्यं मूलकैश्छर्द्दिर्हिक्काशोफप्रमूढताः ॥
चिरेणोच्छ्वसिति श्यावो नरो हालाहलेन वै।
महाविषेण हृदये ग्रन्थिशूलोद्गमौ भृशं ॥
कर्क्कटेनोत्पतत्यूर्द्ध्वं हसन् दन्तान्दशत्यपि।
कन्दजान्युग्रवीर्य्याणि प्रयुक्तानि त्रयोदश ॥
सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः।
रूक्षमुष्णं तथातीक्ष्णं सूक्ष्ममाशुव्यवायि च ॥
विकाशि विशदञ्चैव लघ्वपाकि च तत् स्मृतं।
तद्रौक्ष्यात्कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितं ॥
मानसं मोहयेत्तैक्ष्ण्यादङ्गबन्धान्छिनत्त्यपि।
शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च।
आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं भजेत्।
क्षपयेच्च विकाशित्वाद्दोषान्धातून्मलानपि ॥

वैशद्यादतिरिच्येत दुश्चिकित्स्यश्च लाघवात्।
दुर्ज्जरश्चाविपाकित्वात्तस्मात् क्लेशयते चिरं ॥
स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषं।
सद्योव्यापादयेत्तत्तु ज्ञेयं दशगुणान्वितं ॥

यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत्।
जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा ॥
स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति।
वीर्य्याल्पभावान्न निपातयेत्तत् कफावृतं वर्षगणानुबन्धि ॥
तेनार्द्दितो भिन्नपुरीषवर्णो विगन्धवैरस्यमुखः पिपासी।
मूर्च्छन् वमन् गद्गदवाग्विषण्णो भवेच्च दुष्योदरलिङ्गजुष्टः ॥
आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी।
भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः ॥
स्थितं रसादिष्वथ वा यथोक्तान् करोति धातुप्रभवान् विकारान्।
कोपञ्च शीतानिलदुर्द्दिनेषु यात्याशुपूर्व्वं शृणु तत्र रूपं ॥
निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावथवाङ्गमर्द्दः।
ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमोहान् ॥
धातुक्षयं पादकरास्यशोफं दकोदरं छर्द्दिमथातिसारं।
वैवर्ण्यमूर्च्छाविषमज्वरान्वा कुर्य्यात् प्रवृद्धां प्रबलां तृषां वा ॥
उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत् क्षपयेच्च शुक्रं।
गाद्गद्यमन्यज्जनयेच्च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान् ॥

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः।

यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतं ॥
स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणां ।
श्यावा जिह्वा भवेत् स्तब्धा मूर्च्छा श्वासश्च जायते ॥
द्वितीये वेपथुः स्वेदो दाहः कण्डुरुजस्तथा ।
विषमामाशयप्राप्तं कुरुते हृदि वेदनां ॥
तालुशोषं तृतीये तु शूलं चामाशये भृशं ।
दुर्व्वर्णे हरिते शूने जायेते चास्य लोचने ॥
पक्वाशयगते तोदोहिक्का कासोऽन्त्रकूजनं ।
चतुर्थे जायते वेगे शिरसश्चातिगौरवं ॥
कफप्रसेको वैवर्ण्यं पर्व्वभेदश्च पञ्चमे ।
सर्व्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥
षष्ठे प्रज्ञाप्रणाशश्च भृशं वाप्यतिसार्य्यते ।
स्कन्धपृष्ठकटीभङ्गः सन्निरोधश्च सप्तमे ॥
प्रथमे विषवेगे तु वान्तं शीताम्बुसेवितं ।
अगदं मधुसर्पिर्भ्यां पाययेत समायुतं ॥
द्वितीये पूर्व्ववद्वान्तं पाययेत्तु विरेचनं ।
तृतीयेऽगदपानन्तु हितं नस्ये तथाञ्जनं ॥
चतुर्थे स्नेहसंमिश्रं पाययेतागदं भिषक् ।
पञ्चमे चौद्रमधुककाथयुक्तं प्रदापयेत् ॥
षष्ठेऽतीसारवत्सिद्धिरवपीडश्च सप्तमे ।
मूर्द्ध्नि काकपदं कृत्वा सासृग्वा पिशितं चिपेत ॥

वेगान्तरे त्वन्यतमे कृते कर्म्मणि शीतलां ।
यवागूं सघृतक्षौद्रामिमां दद्याद्विचक्षणः ॥
कोषातक्यग्निकः पाठासूर्य्यवल्ल्यमृताभयाः ।
शिरीषः किणिही शेलुर्गिर्य्याह्वारजनीद्वयं ॥
पुनर्नवे हरेणुश्च त्रिकटुः सारिवे बला ।
एषां यवागूर्निःक्वाथे कृता हन्ति विषद्वयं ॥
मधुकं तगरं कुष्ठं भद्रदारु हरेणवः ।
पुन्नागैलैलवालूनि नागपुष्पोत्पलं सिता ॥
विडङ्गं चन्दनं पत्रं प्रियङ्गुर्ध्यामकं तथा ।
हरिद्रे द्वे बृहत्यौ च सारिवे च स्थिरा सहा ॥
कल्कैरेषां घृतं सिद्धमजेयमिति विश्रुतं ।
विषाणि हन्ति सर्व्वाणि शीघ्रमेवाजितं क्वचित् ॥
दूषीविषार्त्तं सुस्विन्नमूर्द्ध्वञ्चाधश्च शोधितं ।
पाययेतागदं नित्यमिमं दूषीविषापहं ॥
पिप्पल्यो ध्यामकं मांसी सावरः परिपेलवं ।
सुवर्च्चिका ससूक्ष्मैला तोयं कनकगैरिकं ॥
क्षौद्रयुक्तोऽगदो ह्येष दूषीविषमपोहति ।
एष नाम्ना विषारिस्तु नचान्यत्रापि वार्य्यते ॥
ज्वरे दाहे च हिक्कायामानाहे शुक्रसंक्षये ।
शोफेऽतिसारे मूर्च्छायां हृद्रोगे जठरेऽपि वा ॥
उन्मादे वेपथौ चैव ये चान्ये स्युरुपद्रवाः ।

यथास्वं तेषु कुर्व्वीत विषघ्नैरौषधैः क्रियां।
साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितं॥
दूषीविषमसाध्यन्तु क्षीणस्याहितसेविनः।

---

॥ तृतीयोऽध्यायः ॥

अथाऽतो जङ्गमविषविज्ञानीयमध्यायं व्याख्यास्यामः॥

जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोडश।
समासेन मया यानि विस्तरस्तेषु वक्ष्यते॥

तत्र दृष्टिनिश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तवमुखसन्दंश विशर्द्धितगुदास्थिपित्तशूकशवानीति॥

तत्र दृष्टिनिश्वासविषास्तु दिव्याः सर्पाः। भौमास्तु दंष्ट्रा विषाः। मार्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाक गृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः॥

चिपिटपिच्चटककषायवासिकसर्षपवासिकतोटकवर्च्चःकीटकौण्डिल्यकाःशकृन्मूत्रविषाः॥

मूषिकाः शुक्रविषाः॥ लूताश्च लालामूत्रपुरीषमुखसन्दंशनख शुक्रार्त्तवविषाः॥

वृश्चिकविश्वम्भरराजीवमत्स्योच्चिटिङ्गाः समुद्रवृश्चिकाश्चाल विषाः॥

चित्रशिरःसरावकुर्दिशतदारुकारिमेदकशारिकामुखा मुख

सन्दंशविशर्द्धितमूत्रपुरीषविषाः ॥ मक्षिकाकणभजलायुका मुख सन्दंशविषाः ॥

विषहृतास्थिसर्पकण्टकवरटीमत्स्यास्थिचेत्यस्थिविषाणि ॥ शकुली मत्स्यरक्तराजीचरकीमत्स्याश्च पित्तविषाः ॥

सूक्ष्मतुण्डोच्चिटिङ्गवरटीशतपदीशूकवलभिकाशृङ्गीभ्रमराः शूकतुण्डविषाः ॥

कीटसर्पदेहा गतासवः शवविषाः शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः ॥

॥ भवन्ति चात्र ॥

राज्ञोऽरिदेशे रिपवस्तृणाम्बुमार्गान्नधूमश्वसनान् विषेण।
संदूषयन्त्येभिरतिप्रदुष्टान् विज्ञाय लिङ्गैरभिशोधयेच्च ॥
दुष्टं जलं पिच्छिलमुग्रगन्धि फेणान्वितं राजिभिरावृतञ्च ।
मण्डूकमत्स्यं म्रियते विहङ्गा मत्ताश्च सानूपचरा भ्रमन्ति ॥
मज्जन्ति ये चात्र नराश्वनागास्तेच्छर्दिमोहज्वरदाहशोफान् ।
गच्छन्ति तेषामपहृत्य दोषान् दुष्टं जलं शोधयितुं यतेत ॥
धवाश्वकर्णासनपारिभद्राः सपाटलाः सिद्धकमोचकौ च ।
दग्धाः सराजद्रुमसोमवल्कास्तद्भस्मशीतं वितरेत्सरःसु ॥
भस्माञ्जलिञ्चापि घटे निधाय विशोधयेदीप्सितमेवमम्भः ।
क्षितिप्रदेशं विषदूषितन्तु शिलास्थलीं तीर्थमथेरिणं वा ॥
स्पृशन्ति गात्रेण तु येन येन गोवाजिनागोष्ट्रखरा नरा वा ।
तच्छूनतां यात्यथ दह्यते च विशीर्य्यते रोमनखास्तथैव ॥

तत्राप्यनन्तां सहसर्व्वगन्धैः पिष्ट्वा सुराभिर्व्विनियोज्य मार्गं ।
सिञ्चेत् पयोभिस्तु मृदन्वितैस्तं विडङ्गपाठाकटभीजलैर्वा ॥
तृणेषु भक्तेषु च दूषितेषु सीदन्ति मूर्च्छन्ति वमन्ति चान्ये ।
विड्भिद्‌स्रृच्छन्त्यथ वा म्रियन्ते तेषां चिकित्सा प्रणयेद्यथोक्तां ॥
विषापहैर्व्वाप्यगदैर्व्विलिप्य वाद्यानि चित्राण्यपि वादयेत ।
तारः सुतारः ससुरेन्द्रगोपः सर्व्वैश्च तुल्यः कुरुविन्दभागः ॥
पित्तेन युक्तैः कपिलान्वयेन वाद्यप्रलेपो विहितः प्रशस्तः ।
वाद्यस्य शब्देन हि यान्ति नाशं विषाणि घोराण्यपि यानि सन्ति॥
धूमेऽनिले वा विषसम्प्रयुक्ते खगाः श्रमार्त्ताः प्रपतन्ति भूमौ ।
कासप्रतिश्यायशिरोरुजश्च भवन्ति तीव्रा नयनामयाश्च ॥
लाचाहरिद्रातिविषाभयाब्दहरेणुकैलादलवल्ककुष्ठं ।
प्रियङ्गुकाञ्चाप्यनले निधाय धूमानिलौ चापि विशोधयेत ॥

प्रजामिमामात्मयोनेर्ब्रह्मणः सृजतः किल ।
अकरोदसुरोविघ्नं कैटभोनाम दर्पितः ॥
ततः क्रुद्धस्य वै वक्त्राद्ब्रह्मणस्तेजसोनिधेः ।
क्रोधो विग्रहवान् भूत्वा निःपपाताऽथ दारुणः ॥
स तं ददाह गर्ज्जन्तमन्तकाभमहाबलं ।
ततोऽसुरं घातयित्वा तत्तेजोऽवर्द्धताद्भुतं ॥
ततो विषादो देवानामभवत्तं निरीक्ष्य वै ।
विषादजननत्वाच्च विषमित्यभिधीयते ॥
ततः सृष्ट्वा प्रजाः शेषं तदा तं क्रोधमीश्वरः ।

विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च ॥
यथाव्यक्तरसं तोयमन्तरीचान्महीगतं।
तेषु तेषु प्रदेशेषु रसन्तं तं नियच्छति ॥
एवमेवं विषं यद्यद्द्रव्यं व्याप्यावतिष्ठते।
स्वभावादेव तं तस्य रसं समनुवर्त्तते॥
विषे यस्माद्गुणाः सर्व्वे तीक्ष्णाः प्रायेण सन्ति हि।
विषं सर्व्वमतो ज्ञेयं सर्व्वदोषप्रकोपणं ॥
ते तु वृत्तिं प्रकुपिता जहति स्वां विषार्द्दिताः।
नोपयाति विषं पाकमतः प्राणान् रुणद्धि च ॥
श्लेष्मणावृतमार्गत्वादुच्छ्वासो ऽस्य निरुध्यते ।
विसंज्ञः सति जीवेऽपि तस्मात्तिष्ठति मानवः ॥
शुक्रवत् सर्व्वसर्पाणां विषं सर्व्वशरीरगं।
क्रुद्धानामेति चाङ्गेभ्यः शुक्रं निर्म्मन्थनादिव ॥
तेषां वडिशवद्दंष्ट्रास्तासु सज्जति चागतं।
अनुद्वृत्ता विषं तस्मान्न मुञ्चन्ति च भोगिनः॥
यस्मादत्यर्थमुष्णञ्च तीक्ष्णञ्च पठितं विषं।
अतः सर्व्वविषेषूक्तः परिषेकस्तु शीतलः ॥
मन्दकीटेषु नात्युक्तं बहुवातकफं विषं।
अतः कीटविषे चापि स्वेदो न प्रतिषिध्यते ॥
कीटैर्द्दष्टानुग्रविषैः सर्पवत् समुपाचरेत्।
स्वभावादेव तिष्ठन्तु प्रहारादंसयोर्व्विषं।

व्याप्य सावयवं देहं दिग्धविद्धाद्धिदष्टयोः ॥
लौल्याद्विषान्वितं मांसं यः खादेन्मृतमात्रयोः।
यथाविषं स रोगेण क्लिश्यते म्रियते ऽपि वा ॥
अतश्चाप्यनयोर्मांसमभक्ष्यं मृतमात्रयोः।
मुहूर्त्तात्तदुपादेयं प्रहारादंशवर्जितं ॥
सवातं गृहधूमाभं पुरीषं योऽतिसार्य्यते।
आध्मातोऽत्यर्थमुष्णास्यो विवर्णः सादपीडितः ॥
उद्वमत्यथ फेणञ्च विषपीतं तमादिशेत्।
नचास्य हृदयं वह्निर्विषदुष्टं दहत्यपि ॥
तद्धि स्थानं चेतनायाः स्वभावाद्व्याप्य तिष्ठति।

अश्वत्थदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु।
याम्ये सपित्रे परिवर्ज्जनीया ऋक्षे नरा मर्म्मसु ये च दष्टाः ॥
दर्व्वीकराणां विषमाशुघाति सर्व्वाणि चोष्णे द्विगुणीभवन्ति।
अजीर्णपित्तातपपीडितेषु बालप्रमेहेष्वथ गर्भिणीषु ॥
वृद्धातुरक्षीणबुभुक्षितेषु रूक्षेषु भीरुष्वथ दुर्द्दिनेषु।
शस्त्रक्षते यस्य न रक्तमस्ति राज्यो लताभिश्च न सम्भवन्ति ॥
शीताभिरद्भिश्च न रोमहर्षो विषाभिभूतं परिवर्ज्जयेत्तं।
जिह्वा सिता यस्य च केशशातो नासावभङ्गश्च सकण्ठभङ्गः ॥
कृष्णः सरक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वञ्च स वर्ज्जनीयः।
वर्त्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेदूर्द्ध्वमधश्च यस्य ॥
दंष्ट्रानिपाताः सकलाश्च यस्य तञ्चापि वैद्यः परिवर्ज्जयेत्तु ॥

उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्वरं वाप्यथ वा विवर्णं ।
सारिष्टमत्यर्थमवेगिनञ्च जह्याच्च तं कर्म्म न तत्र कुर्य्यात् ॥

---

चतुर्थोऽध्यायः ॥

अथातः सर्पदष्टविषविज्ञानीयमध्यायं व्याख्यास्यामः ॥

धन्वन्तरिं महाप्राज्ञं सर्व्वशास्त्रविशारदं ।
पादयोरुपसंगृह्य सुश्रुतः परिपृच्छति ॥
सर्प्पसङ्ख्यां विभागञ्च दष्टलक्षणमेव च ।
ज्ञानञ्च विषवेगानां भगवन् वक्तुमर्हसि ॥
तस्य तद्वचनं श्रुत्वा प्राब्रवीद्भिषजांवरः ।
असङ्ख्या वासुकिमुखा विख्यातास्तक्षकादयः ॥
महीधराश्च नागेन्द्रा हुताग्निसमतेजसः ।
येचाप्यजस्रं गर्ज्जन्ति वर्षन्ति च तपन्ति च ॥
ससागरा गिरिद्वीपा यैरियं धार्य्यते मही ।
क्रुद्धा निःश्वासदृष्टिभ्यां ये हन्युरखिलं जगत् ॥
नमस्तेभ्योऽस्तु नो तेषां कार्य्यं किञ्चिच्चिकित्सया ।
ये तु दंष्ट्राविषा भौमा ये दशन्ति च मानुषान् ॥
तेषां सङ्ख्यां प्रवक्ष्यामि यथावदनुपूर्व्वशः ।
अशीतिस्त्वेव सर्प्पाणां भिद्यते पञ्चधा तु सा ॥
दर्व्वीकरा मण्डलिनो राजिमन्तस्तथैवच ।
निर्व्विषा वैकरञ्जाश्च त्रिविधास्ते पुनः स्मृताः ॥

दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः॥
द्वाविंशतिर्म्मण्डलिनो राजिमन्तस्तथा दश।
निर्व्विषा द्वादश ज्ञेया वैकरञ्जास्त्रयस्तथा॥
वैकरञ्जोद्भवाः सप्त चित्रा मण्डलिराजिलाः।
पदाभिमृष्टा दुष्टा वा क्रुद्धा ग्रासार्थिनोऽपि वा॥
ते दशन्ति महाक्रोधास्त्रिविधं भीमदर्शनाः।
सर्पितं रदितं वापि तृतीयमथ निर्व्विषं॥
सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः।
पदानि यत्र दन्तानामेकं द्वे वा बहूनि च॥
निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि।
चञ्चुमालकयुक्तानि वैकल्यकरणानि च॥
सङ्क्षिप्तानि सशोफानि विद्यात्तत् सर्पितं भिषक्।
राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा॥
विज्ञेयं रदितं तत्तु ज्ञेयमल्पविषञ्च तत्।
अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः॥
पदं पदानि वा विद्यादविषं तच्चिकित्सकः।
सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः॥
कस्यचित् कुरुते शोफं सर्पाङ्गाभिहतन्तु तत्।
व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु॥
तथातिवृद्धबालातिदष्टमल्पविषं स्मृतं।

सुपर्णदेवब्रह्मर्षियक्षसिद्धनिषेविते ॥
विषघ्नौषधियुक्ते च देशे न क्रमते विषं।
रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ॥
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः।
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः ॥
ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः।
स्निग्धा विविधवर्णाभिस्तिर्य्यगूर्द्ध्वन्तु राजिभिः ॥
चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः।
मुक्तारूप्यप्रभा ये च कपिला ये च पन्नगाः ॥
सुगन्धिनः सुवर्णाभास्ते जात्या ब्राह्मणाः स्मृताः।
क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भृशकोपनाः ॥
सूर्य्यचन्द्रार्क्कातच्छत्रलक्ष्म तेषां तथाम्बुजं।
कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा।
धूम्राः पारावताभाश्च वैश्यास्ते पन्नगाः स्मृताः ॥
महिषद्वीपवर्णाभास्तथैव परुषत्वचः।
भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः ॥
कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु।
पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः ॥
अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणं।
ज्ञेयौ दोषैश्च दम्पत्योर्विशेषश्चात्र वक्ष्यते ॥
रजन्याः पश्चिमे यामे सर्पाश्चित्राश्चरन्ति हि।

शेषेषूक्ता मण्डलिनो दिवा दर्व्वीकराः स्मृताः॥
दर्व्वीकरास्तु तरुणा वृद्धा मण्डलिनस्तथा।
राजिमन्तो वयोमध्ये जायन्ते मृत्युहेतवः॥
नकुलाकुलिता बाला वारिविप्रहताः कृशाः।
वृद्धा मुक्तत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः।

तत्र दर्व्वीकराः। कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो वलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरःपुष्पाभिकीर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्दो आशीविष इति॥

मण्डलिनस्तु। आदर्शमण्डलःश्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसो वृद्धगोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिंहिरः पिङ्गलस्तन्तुकःपुष्पपाण्डुःषडङ्गोऽग्निको वभ्रुः कषायः कलुषः पारावतो हस्ताभरणश्चित्रक एणीपद इति॥

राजिमन्तस्तु। पुण्डरीको राजिचित्रोऽङ्गुलराजिर्विन्दुराजिःकर्द्दमकस्तृणशोषकः सर्षपकः श्वेतहनुर्दर्भपुष्पश्चक्रको गोधूमकः किक्किसाद इति॥

निर्व्विषास्तु। गलगोली शूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकः पुष्पकोऽहिपताकोऽन्धाहिकोगौराहिको वृक्षेशय इति॥

वैकरञ्जास्तु त्रयाणां दर्व्वीकरादीनां व्यतिकराज्जाताः। तद्यथा। माकुलिः पोटगलः स्निग्धराजिरिति । तत्र कृष्णसर्पेण गोनस्यां वैपरित्येन वा जातो माकुलिः। राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः। कृष्णसर्पेण राजिमत्यां वैपरीत्येनवा जातः स्निग्ध राजिरिति। तेषामाद्यस्य पितृवदुत्कर्षो द्वयोर्मातृवदित्येके॥

त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त तेषामाद्यास्त्रयो राजिलवत् शेषा मण्डलिवत्। एवमेतेषां सर्पाणामशीतिरिति॥

तत्र महानेत्रजिह्वास्यशिरसः पुमांसः सूक्ष्मनेत्रजिह्वास्यशिरसः स्त्रियः। उभयलक्षणमन्दविषा अक्रोधा नपुंसका इति॥

तत्र सर्व्वेषां सर्पाणां सामान्यतएव दष्टलक्षणं वक्ष्यामः॥

किं कारणं विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यमाशुकारि मुहूर्त्तमप्युपेक्षितमातुरमतिपातयति । नचावकाशोऽस्ति वाक्समूहमनुसर्त्तुं।

प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्पत्रैविध्यं भवति॥ तस्मात्त्रैविध्यमेव वक्ष्यामः॥ एतच्चातुरहितमसम्मोहकरञ्च। अपि चात्रैव सर्व्वसर्पव्यञ्जनावरोधः॥

तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदनाकटीपृष्ठग्रीवादौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारःकासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावःफेणागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति॥

मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्द्ध्वमधश्च मांसानामवशातनं श्वयथुर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्ताश्च पित्तवेदना भवन्ति ॥

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षस्तब्धत्वं गात्राणामादंशशोफः सान्द्रकफप्रसेकश्छर्द्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरकउच्छ्वासनिरोधस्तमःप्रवेशस्तास्ताश्च कफवेदना भवन्ति ॥

पुरुषाभिदष्ट ऊर्द्ध्वं प्रेक्षतेऽधस्तात् स्त्रिया शिराश्चोत्तिष्ठन्ति ललाटे। नपुंसकाभिदष्टस्तिर्य्यक्प्रेक्षी भवति। गर्भिण्या पाण्डुमुखो ध्मातश्च। सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति। ग्रासार्थिनान्नं काङ्क्षति। वृद्धेन मन्दा वेगाश्च। बालेनाशु मृदवश्च। निर्व्विषेणाविषलिङ्गं। अन्धाहिकेनान्धत्वमित्येके। ग्रसनादजगरः शरीरप्राणहरो न विषात्। तत्र सद्यः प्राणहरा हिदष्टः पतति शस्त्राशनिहत इव भूमौ स्रस्ताङ्गः स्वपिति ॥

तत्र सर्व्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति ॥

तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान्दो

षान् दूषयति। तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति । पञ्चमे ऽस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्व्वभेदो हिक्का दाहश्च भवति । षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति तेन गात्राणां गौरवमतीसारो हृत्पीडा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गश्च सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति ॥

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति तत्तत्र प्रदुष्टं पीततामुपैति तत्र परिदाहःपीतावभासता चाङ्गानां भवति। द्वितीये मांसं दूषयति तेनात्यर्थं पीततापरिदाहौ दंशे श्वयथुश्च भवति। तृतीये मेदो दूषयति तेन पूर्व्ववच्चक्षुर्ग्रहणं तृष्णा दंशे क्लेदः स्वेदश्च। चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति पञ्चमे परिदाहं सर्व्वगात्रेषु करोति। षष्ठसप्तमयोः पूर्व्ववत् ॥

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति तत्प्रदुष्टं पाण्डुतामुपैति तेन रोमहर्षःशुक्लावभासश्च पुरुषो भवति। द्वितीये मांसं दूषयति तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति। तृतीये मेदो दूषयति तेन चक्षुर्ग्रहणं दन्तक्लेदः स्वेदो घ्राणाक्षिस्रावश्च भवति। चतुर्थे कोष्ठमनुप्रविश्य मन्यास्तम्भं शिरोगौरवं चापादयति॥ पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति षष्ठसप्तमयोः पूर्व्ववदिति॥

भवन्ति चात्र॥ धात्वन्तरेषु याः सप्त कलाः सम्परिकीर्त्तिताः।

तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषं ॥
येनान्तरेण हि कलां कालकल्पं भिनत्ति हि।
समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतं ॥
शूनाङ्गः प्रथमे वेगे पशुर्ध्यायति दुःखितः।
लालास्रावो द्वितीये तु कृष्णाङ्गः पीड्यते हृदि ॥
तृतीये च शिरोदुःखं कण्ठग्रीवञ्च भज्यते।
चतुर्थे वेपते मूढः खादन् दन्तान् जहात्यसून् ॥
केचिद्वेगत्रयं प्राहुरन्तश्चैतेषु तद्विदः।
ध्यायति प्रथमे वेगे पक्षी मुह्यत्यतः परं ॥
द्वितीये विह्वलः प्रोक्तस्तृतीये मृत्युमृच्छति
केचिदेकं विहङ्गेषु विषवेगमुशन्ति हि।
मार्ज्जारनकुलादीनां विषं नातिप्रवर्त्तते ॥

---

॥ पञ्चमोऽध्यायः ॥

अथातः सर्पदष्टकल्पचिकित्सितं व्याख्यास्यामः ॥
सर्व्वैरेवादितः सर्पैः शाखादष्टस्य देहिनः।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥
प्लोतचर्म्मान्तवल्कानां मृदुनान्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितं ॥
दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते।
आचूषणच्छेददाहाः सर्व्वत्रैव तु पूजिताः ॥

प्रतिपूर्य्य मुखं वस्त्रैर्हितमाचूषणं भवेत् ।
स दष्टव्योऽथ वा सर्प्पो लोष्टो वापि हि तत्क्षणं ॥
अथ मण्डलिना दष्टं न कथञ्चन दाहयेत् ।
स पित्तविषबाहुल्याद्दंशो दाहाद्विसर्प्पति ॥
अरिष्टामपि मन्त्रैश्च बध्नीयान्मन्त्रकोविदः ।
सा तु रज्ज्वादिभिर्ब्बद्धा विषप्रतिकरी मता ॥
देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः ।
भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरं ॥
विषं तेजोमयैर्म्मन्त्रैःसत्यब्रह्मतपोमयैः ।
यथा निवार्य्यते क्षिप्रं प्रयुक्तैर्न्न तथौषधैः ॥
मन्त्राणां ग्रहणं कार्य्यं स्त्रीमांसमधुवर्ज्जिना ।
जिताहारेण शुचिना कुशास्तरणशायिना ॥
गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः ।
पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः ॥
मन्त्रास्तु विधिना प्रोक्ता हीना वा स्वरवर्णतः ।
यस्मान्न सिद्धिमायान्ति तस्माद्योज्योऽगदक्रमः ॥
समन्ततः सिरादंशाद्विध्येत्तु कुशलो भिषक् ।
शाखाग्रे वा ललाटे वा वेध्यास्ता विसृते विषे ॥
रक्ते निर्ह्रियमाणे तु कृत्स्नं निर्ह्रियते विषं ।
तस्माद्विस्रावयेद्रक्तं साह्यस्य परमा क्रिया ॥
समन्तादगदैर्दंशं प्रच्छयित्वा प्रलेपयेत् ।

चन्दनोशीरयुक्तेन वारिणा परिषेचयेत् ॥
पाययेतागदांस्तांस्तान् चीरचौद्रघृतादिभिः।
तदलाभे हिता वा स्यात् कृष्णा वल्मीकमृत्तिका ॥
कोविदारशिरीषार्ककटभीर्व्वापि भचयेत्।
न पिबेत्तैलकौलत्थमद्यसौवीरकाणि च ॥
द्रवमन्यत्तु यत्किञ्चित् पीत्वा पीत्वा तदुद्वमेत्।
प्रायोहि वमनेनैव सुखं निर्ह्रियते विषं ॥
फणिनां विषवेगे तु प्रथमे शोणितं हरेत्।
द्वितीये मधुसर्प्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्यकर्म्माञ्जने युञ्ज्यात्तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तितां ॥
सप्तमे त्ववपीडेन शिरस्तीक्ष्णेन शोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णशस्त्रेण मूर्द्ध्नि च ॥
कुर्य्यात् काकपदं चर्म्म सासृग्वा पिशितं चिपेत्।
पूर्व्वे मण्डलिनां वेगे दर्व्वीकरवदाचरेत् ॥
अगदं मधुसर्पिर्भ्यां द्वितीये पाययेतच।
वामयित्वा यवागूञ्च पूर्व्वोक्तामथ दापयेत् ॥
तृतीये शोधितं तीक्ष्णैर्य्यवागूं पाययेद्धितां।
चतुर्थे पञ्चमे वापि दर्व्वीकरवदाचरेत् ॥

काकोल्यादिर्हितः षष्ठे पयश्च मधुरो गणः ।
हितोऽवपीडे त्वगदः सप्तमे विषनाशनः ॥

अथ राजिमतां वेगे प्रथमे शोणितं हरेत् ।
अगदं मधुसर्प्पिर्भ्यां संयुक्तं पाययेत च ॥
वान्तं द्वितीये त्वगदं पाययेद्विषनाशनं ।
तृतीयादिषु त्रिष्वेव विधिर्द्व्वीकरो हितः ॥
षष्ठेऽञ्जनं तीक्ष्णतममवपीडश्च सप्तमे ।
गर्भिणीबालवृद्धानां सिराव्यधविवर्जितं ॥
विषार्त्तानां यथोद्दिष्टं विधानं शस्यते मृदु ।
रक्तावसेकाञ्जनानि नरतुल्यान्यजाविके ॥
गवश्वयोश्च द्विगुणं त्रिगुणं महिषोष्ट्रयोः ।
चतुर्गुणन्तु नागानां केवलं सर्व्वपक्षिणां ॥
परिषेकान् प्रदेहांश्च सुशीतानवचारयेत् ।
माषकं त्वञ्जनस्येष्टं द्विगुणं नस्यतो हितं ॥
पाने चतुर्गुणं पथ्यं वमनेऽष्टगुणं पुनः ।
देशप्रकृतिसात्म्यर्त्तुविषवेगबलाबलं ॥
प्रधार्य्य निपुणो बुद्ध्या ततः कर्म्म समाचरेत् ।
वेगानुपूर्व्वमित्येतत् कर्म्मोक्तं विषनाशनं ॥
कर्म्मावस्थाविशेषेण विषयोरुभयोः शृणु ।
विवर्णे कठिने शूने सरुजेऽङ्गे विषार्द्दिते ॥
ध्रुवं विस्रावणं कार्य्यमुक्तेन विधिना ततः ।

क्षुधार्त्तमनिलप्रायं तद्विषार्त्तं समाहितः ॥
पाययेद्दधितक्रं वा सर्पिः क्षौद्रं तथारसं ।
तृड्दाहघर्म्मसंमोहे पैत्तं पैत्ते विषातुरं ॥
शीतैः संवाहनस्नानप्रदेहैः समुपाचरेत् ।
शीते शीतप्रसेकार्त्तं श्लैष्मिकं कफकृद्विषं ॥
वामयेद्वमनैस्तीक्ष्णैस्तथा मूर्च्छामदान्वितं ।
कोष्ठदाहरुजाध्मानमूत्रसङ्गरुगन्वितं ॥
विरेचयेच्छकृद्वायुसङ्गपित्तातुरं नरं ।
शूनाक्षिकूटं निद्रार्त्तं विवर्णाविललोचनं ॥
विवर्णञ्चापि पश्यन्तमञ्जनैः समुपाचरेत् ।
शिरोरुग्गौरवालस्यहनुस्तम्भगलग्रहे ॥
शिरो विरेचयेत् क्षिप्रं मन्यास्तम्भे च दारुणे ।
नष्टसङ्गं विवृत्ताक्षं भग्नग्रीवं विरेचनैः ॥
चूर्णैः प्रधमनैस्तीक्ष्णैर्विषार्त्तं समुपाचरेत् ।
ताडयेच्च सिराः क्षिप्रं तस्य शाखाललाटजाः ॥
तास्वप्रसिच्यमानासु मूर्द्ध्नि शस्त्रेण शस्त्रवित् ।
कुर्य्यात् काकपदाकारं व्रणमेवं स्रवन्ति ताः ॥
सरक्तं चर्म्म मांसंवा निक्षिपेच्चास्य मूर्द्ध्नि च ।
चर्म्मवृक्षकषायंवा चूर्णं वा कुशलो भिषक् ॥
वादयेच्चागदैर्लिप्ता दुन्दुभीस्तस्य पार्श्वयोः ।
लब्धसङ्गं पुनश्चैनमूर्द्ध्वञ्चाधश्च शोधयेत् ॥

निःशेषं निर्हरेच्चैव विषं परमदुर्ज्जयं ।
अल्पमप्यवशिष्टं हि भूयो वेगाय कल्पते ॥
कुर्य्याद्वा सादवैवर्ण्य ज्वरकासशिरोरुजः ।
शोफशोषप्रतिश्यायतिमिरारुचिपीनसान् ॥
तेषु चापि यथादोषं प्रतिकर्म्म प्रयोजयेत् ।
विषार्त्तोपद्रवांश्चापि यथास्वं समुपाचरेत् ॥
अथारिष्टां विमुच्याशु प्रच्छयित्वाङ्कितं तथा ।
दिह्यात्तत्र विषं स्कन्नं भूयो वेगाय कल्पते ॥
एवं क्रियाक्रमैर्मन्त्रैरौषधीभिश्च यत्नतः ।
विषे ह्वतगुणे देहाद्यदा दोषः प्रकुप्यति ॥
तदा पवनमुद्वृत्तं स्नेहाद्यैः समुपाचरेत् ।
तैलमत्स्यकुलत्थाम्लवर्ज्जैर्मारुतनाशनैः ॥
पित्तज्वरहरैः पित्तं कषायैः स्नेहवस्तिभिः ।
कफमारग्वधाद्येन सक्षौद्रेण गणेन तु ॥
श्लेष्मघ्नैरगदैश्चापि तिक्तै रुक्षैश्च भोजनैः ।
वृक्षप्रपातविषमपतितं मृतमम्भसि ॥
उद्वृत्तञ्च मृतं सद्यश्चिकित्सेन्नष्टसञ्ज्ञवत् ॥

गाढं बद्धेऽरिष्टया प्रच्छितेऽपि तीक्ष्णैर्लेपैस्तद्विधैर्व्वा विशेषैः ।
शूने गात्रे क्लिन्नमत्यर्थपूति ज्ञेयं मांसं तद्विषात्पूतिकष्टं ॥
सद्योविद्धं निस्रवेत् कृष्णरक्तं पाकं यायाद्दह्यते चाप्यभीक्ष्णं ।
कृष्णीभूतं क्लिन्नमत्यर्थपूति शीर्णं मांसं यात्यजस्रं चताच ॥

तृष्णा मूर्च्छा भ्रान्तिदाहौ ज्वरश्च यस्य स्युस्तं दिग्धविद्धं व्यवस्येत्।
पूर्व्वोद्दिष्टं लक्षणं सर्व्वमेतज्जुष्टं यस्मात्तं विषेण व्रणाःस्युः॥
लूतादष्टा दिग्धविद्धा विषैर्व्वा जुष्टा ये स्युर्य्ये व्रणाः पूतिमांसाः।
तेषां युक्त्या पूतिमांसान्यपोह्य वार्य्योकोभिः शोणितं चापहृत्य॥
हृत्वा दोषान् क्षिप्रमूर्द्धन्त्वधश्च सम्यक् सिञ्चेत् क्षीरिणां त्वक्कषायैः।
अन्तर्वस्त्रं दापयेच्च प्रदेहान् शीतैर्द्रव्यैराज्ययुक्तैर्विषघ्नैः॥
भिन्नेऽश्मा वै दुष्टजातेन कार्य्यः पूर्व्वो मार्गः पैत्तिके यो विषे च।
त्रिवृद्विशल्ये मधुकं हरिद्रे रक्ता नरेन्द्रो लवणश्च वर्गः॥
कटुत्रिकं चैव विचूर्णितानि शृङ्गे निदध्यान्मधुसंयुतानि।
एषोऽगदो हन्ति विषं प्रयुक्तः पानाञ्जनाभ्यञ्जननस्ययोगैः॥
अवार्य्यवीर्य्यो विषवेगहन्ता महागदो नाम महाप्रभावः।
विडङ्गपाठात्रिफलाजमोदाहिङ्गूनि चक्रं त्रिकटूनि चैव॥
सर्व्वश्च वर्गो लवणश्च सूक्ष्मः सचित्रकः क्षौद्रयुतो निधेयः।
शृङ्गे गवां शृङ्गमयेन चैव प्रच्छादितः पक्षमुपेक्षितश्च॥
एषोऽगदः स्थावरजङ्गमानां जेता विषाणामजितो हि नाम्ना।
प्रपौण्डरीकं सुरदारुमुस्ता कालानुसार्य्या कटुरोहिणी च॥
स्थौणेयकं ध्यामकपद्मकानि पुन्नागतालीशसुवर्च्चिका च।
कुटन्नटैलासितसिन्धुवाराः शैलेयकुष्ठे तगरं प्रियङ्गु॥
रोध्रं जलं काञ्चनगैरिकञ्च समागधञ्चन्दनसैन्धवञ्च।
सूक्ष्माणि चूर्णानि समानि कृत्वा शृङ्गे निदध्यान्मधुसंयुतानि॥
एषोऽगदस्तार्क्ष्य इति प्रदिष्टो विषं निहन्यादपि तक्षकस्य।

मांसीहरेणुत्रिफलामुरङ्गीरक्तालतायष्टिकपद्मकानि ॥
विडङ्गतालीशसुगन्धिकैलालकुष्ठपत्राणि सचन्दनानि।
भार्गीपटोलं किणिही सपाठा मृगादनी कर्कटिका पुरञ्च॥
पालिन्द्यशोकौ क्रमुकं सुरस्याः प्रसूनमारुष्करजञ्च पुष्पं।
चूर्णान्यथैषां निहितानि शृङ्गे न्यसेच पित्तानि समाचिकानि॥
वराहगोधाशिखिशल्लकानां मार्जारजं पार्षतनाकुले च।
यस्यागदोऽयं सुकृतो गृहे स्यान्नाम्नर्षभो नाम नरर्षभस्य॥
न तत्र सर्पाः कुत एव कीटाः त्यजन्ति वीर्य्याणि विषाणि चैव।
एतेन भेर्य्यः पटहाश्च दिग्धा नानद्यमाना विषमाशु हन्युः॥
दिग्धाः पताकाश्च निरीक्ष्य सद्यो विषाभिभूता ह्यविषा भवन्ति।
लाक्षाहरेणुर्नलदं प्रियङ्गु शिग्रुद्वयं यष्टिकग्रन्थिकाश्च॥
चूर्णीकृतोऽयं रजनीविमिश्रो वर्गो निधेयो मधुसर्पिषाक्तः।
शृङ्गे गवां पूर्व्ववदापिधानस्ततः प्रयोज्योऽञ्जननस्यपानैः॥
सञ्जीवनो नाम गतासुकल्पमेषोऽगदो जीवयतीह मर्त्यं।
श्लेष्मातकी कट्फलमातुलुङ्गः श्वेता गिरिह्वा किणिही सिता च॥
सतण्डुलीयोऽगद एष मुख्यो विषेषु दर्व्वीकरराजिलानां।
द्राक्षासुगन्धानगवृत्तिका च पिष्टा समङ्गा समभागयुक्ता॥
देयो द्विभागः सुरसाच्छदस्य कपित्थविल्वादपि दाडिमाच॥
तथार्द्धभागोऽसितसिन्धुवारादङ्कोठमूलादपि गैरिकाच।
एषोऽगदः चौद्रयुतो निहन्ति विशेषतो मण्डलिनां विषाणि॥
वंशलगार्द्रामलकं कपित्थं कटुत्रिकं हैमवती सकुष्ठा।

करञ्जवीजं तगरं शिरीषपुष्पञ्च गोपित्तयुतं निहन्ति ॥
विषाणि लूतोन्दुरुपन्नगानां कीटञ्च लेपाञ्जननस्ययोगैः।
पुरीषमूत्रानिलगर्भसङ्गानिहन्ति वर्त्त्यञ्जननाभिलेपैः ॥
काचार्म्मकोथान् पटलांश्च घोरान् पुष्पञ्च हन्त्यञ्जननस्ययोगैः।
समूलपुष्पाङ्कुरवल्कवीजात् क्वाथः शिरीषात्त्रिकटुप्रगाढः ॥
सलावणः चौद्रयुतोऽथ पीतो विशेषतः कीटविषं निहन्ति ॥

कुष्ठं त्रिकटुकं दार्व्वीमधूकलवणद्वयं।
मालतीनागपुष्पञ्च सर्व्वाणि मधुराणि च।
कपित्थरसपिष्टोऽयं शर्करा चौद्रसंयुतः।
विषं हन्त्यगदः सर्व्वं मूषिकाणां विशेषतः ॥
सोमराजीफलं पुष्पं कटभीसिन्धुवारकः।
चोरको वरुणः कुष्ठं सर्व्वगन्धा ससप्तला ॥
पुनर्नवा शिरीषस्य पुष्पमारग्वधार्कजं।
श्यामाम्बष्ठा विडङ्गानि तथाम्राः सप्तकानि च ॥
भूमी कुरवकश्चैव गण एकसरः स्मृतः ॥
एकशोद्विशिखशो वापि प्रयोक्तव्यो विषापहः।

---

॥ षष्ठोऽध्यायः ॥

अथातो मूषिककल्पं व्याख्यास्यामः ॥

पूर्व्वमुक्ताः शुक्रविषा मूषिका ये समासतः।
नामलक्षणभैषज्यैरष्टादश निबोध तान् ॥

लालनः पुत्रकः कृष्णो हंसिरश्चिक्किरस्तथा ।
छुछुन्दरोऽलसश्चैव कषायदशनोऽपि च ॥
कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा ।
कोकिलोऽरुणसञ्ज्ञश्च महाकृष्णस्तथोन्दुरः ॥
श्वेतेन महता सार्द्धं कपिलेनाखुना तथा ।
मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः ॥
शुक्रं पतति यत्रैषां शुक्रघृष्टैः स्पृशन्ति वा ।
नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदुष्यति ॥
जायन्ते ग्रन्थयः शोफाः कर्णिका मण्डलानि च ।
पिडकोपचयश्चोग्रा विसर्पाः किटिभानि च ॥
पर्व्वभेदो रुजस्तीव्रा ज्वरो मूर्च्छा च दारुणा ।
दौर्ब्बल्यमरुचिः श्वासो वमथुर्लोमहर्षणं ॥

दष्टरूपं समासोक्तमेतच्च व्यासतः शृणु ।
लालास्रावो लालनेन हिक्काच्छर्द्दिश्च जायते ॥
तण्डुलीयककल्कन्तु लिह्यात्तत्र समाक्षिकं ।
पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते ॥
चीयते ग्रन्थिभिश्चाङ्गमाखुशावकसन्निभैः ।
शिरीषेङ्गुदकल्कान्तु लिह्यात्तत्र समाक्षिकं ॥
कृष्णेनासृक् च्छर्द्दयति दुर्द्दिनेषु विशेषतः ।
शिरीषफलकुष्ठन्तु पिवेत् किंशुकभस्मना ॥
हंसिरेणान्नविद्वेषो जृम्भा लोमाञ्चहर्षणं ।

पिवेदारग्वधादिन्तु सुवान्तस्तत्र मानवः ॥
चिक्किरेण शिरोदुःखं शोफो हिक्का वमी तथा ।
जालिनीमदनाङ्कोठकषायैर्वामयेत्तुतं ॥
छुछुन्दरेण विड्भङ्गो ग्रीवास्तम्भो विजृम्भणं ।
यवनालर्षभचारं हृहत्याश्चात्र दापयेत् ॥
ग्रीवास्तम्भोऽलसेनोर्द्ध्ववायुर्दंशे रुजा ज्वरः ।
महागदं ससर्पिष्कं लिह्यात्तत्र समाचिकं ॥
निद्रा कषायदन्तेन हृच्छोषः कार्श्यमेव च ।
चौद्रोपेताः शिरीषस्य लिह्यात् सारफलत्वचः ।
कुलिङ्गेन रुजः शोफो राज्यश्च दंशमण्डले ॥
सहे ससिन्धुवारे च लिह्यात्तत्र समाचिके ।
अजितेन वमी मूर्च्छा हृद्ग्रहः कृष्णनेत्रता ॥
तत्र स्नुहीचीरपिष्टां पालिन्दीं मधुना लिहेत् ।
चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह तृष्णया ॥
सभद्रकाष्ठां सजटां चौद्रेण त्रिफलां लिहेत् ।
कपिलेन व्रणे कोथो ज्वरो ग्रन्थ्युद्गमस्तथा ॥
चौद्रेण लिह्यात्त्रिफलां श्वेतांचापि पुनर्नवां ।
ग्रन्थयः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः ॥
वर्षाभूनीलिनीक्वाथसिद्धं तत्र घृतं पिवेत् ।
अरुणेनानिलः क्रुद्धो वातजान् कुरुते गदान् ॥
महाकृष्णेन पित्तञ्च श्वेतेन कफ एव च ।

महता कपिलेनाष्टक् कपोतेन चतुष्टयं ॥
भवन्ति चैषां दंशेषु ग्रन्थिमण्डलकर्णिकाः ।
पिडकोपचयाश्चोग्राः शोफश्च भृशदारुणः ॥
दधिक्षीरघृतप्रस्थास्त्रयः प्रत्येकशो मताः ॥
करञ्जारग्वधव्योषहृहत्यंशुमतीस्थिराः ।
निःक्वाथ्य चैषां क्वाथस्य चतुर्थांशः पुनर्भवेत् ॥
त्रिवृत्तिलामृताचक्रसर्पगन्धा समृत्तिका ।
कपित्थदाडिमलक्ष सुपिष्टानि तु दापयेत् ॥
तत्सर्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् ।
पञ्चानामरुणादीनां विषमेतद्व्यपोहति ॥
काकादनीकाकमाचीखरसेष्वथ वा कृतं ।
सिराश्च स्रावयेत् प्राज्ञः कुर्य्यात् संशोधनानि च ॥
सर्व्वेषाञ्च विधिः कार्य्यो मूषिकाणां विषेष्वयं ।
दग्ध्वा विस्रावयेद्दंशं प्रच्छितञ्च प्रलेपयेत् ॥
शिरीषरजनीकुष्ठकुङ्कुमैरमृतायुतैः ।
छर्द्दनं जालिनीक्वाथैः शुकाख्याङ्कोठयोरपि ॥
शुकाख्याकोषवत्योश्च मूलं मदन एव च ॥
देवदालीफलञ्चैव दध्ना पीत्वा विषं वमेत् ।
फलं वचा देवदाली कुष्ठं गोमूत्रपेषितं ।
पूर्व्वकल्पेन योज्याःस्युः सर्व्वान्दुरविषच्छिदः ॥
विरेचने त्रिवृद्दन्ती त्रिफला कल्का दृश्यते ।

शिरोविरेचने सारः शिरीषफलमेव च ॥
कटुत्रिकाद्यस्य हिता गोमयस्वरसोऽञ्जने ।
कपित्थगोमयरसः सक्षौद्रो लेहइष्यते ॥
रसाञ्जनहरिद्रेन्द्रयवकट्वीषु वा कृतं ।
कल्कं सातिविषं प्रातर्लिह्याच्च क्षौद्रसंयुतं ॥
तण्डुलीयकमूलेषु सर्पिः सिद्धं पिबेन्नरः ।
आस्फोतमूलसिद्धं वा पञ्चकापित्थमेव वा ॥
मूषिकाणां विषं प्रायः कुप्यत्यभ्रेषु निर्द्दतं।
तत्राप्येषु विधिः कार्य्यो यश्च दूषीविषापहः ॥
स्थिराणां रुजतां वापि व्रणानां कर्णिका भिषक्।
पाटयित्वा यथादोषं व्रणवच्चापि शोधयेत् ॥
शृगालश्वतरक्षृक्षव्याघ्रादीनां यदानिलः ।
श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः ॥
तदा प्रस्रस्तलाङ्गूलहनुस्कन्धोऽतिलालवान् ।
अत्यर्थबधिरोऽन्धश्च सोऽन्योन्यमभिधावति ॥
तेनोन्मत्तेन दष्टस्य दंष्ट्रिणा सविषेण तु ।
सुप्तता जायते दंशे कृष्णञ्चातिस्रवत्यसृक् ॥
दिग्धविद्धस्य लिङ्गेन प्रायशश्चोपलक्षितः ।
येन चापि भवेद्दष्टस्तस्य चेष्टा रुतं नरः ॥
बहुशः प्रतिकुर्व्वाणः क्रियाहीनो विनश्यति।
दंष्ट्रिणा येन दष्टश्च तद्रूपं यदि पश्यति॥

अप्सु वा यदि वादर्शे रिष्टं तस्य विनिर्द्दिशेत्।
त्रस्यत्यकस्माद्यो ऽभीक्ष्णं श्रुत्वा दृष्ट्वापि वा जलं॥
जलत्रासन्तु विद्यात्तं रिष्टं तमपि कीर्त्तितं।
अदष्टोवा जलत्रासी न कथञ्चन सिध्यति॥
प्रसुप्तोऽथोत्थितोवापि स्वस्थस्त्रस्तो न सिध्यति।
विस्राव्य दंशं तैर्दंष्टे सर्पिषा परिदाहितं॥
प्रदिह्यादगदैः सर्पिः पुराणं वापि पाययेत्।
अर्कक्षीरयुतञ्चास्य दद्याच्छीर्षविरेचनं॥
श्वेतां पुनर्नवाञ्चास्य दद्याद्धत्तूरकायुतां।
पललं तिलतैलञ्च रूपिकायाः पयो गुडः॥
निहन्ति विषमालर्कं मेघवृन्दमिवानिलः।
मूलस्य शरपुङ्खायाः कर्षं धुत्तूरकार्द्धिकं॥
तण्डुलोदकमादाय पेषयेत्तण्डुलैः सह।
उन्मत्तकस्य पत्रैस्तु संवेष्ट्यापूपकं पचेत्॥
खादेदौषधकाले तदलर्कविषदूषितः।
करोत्यन्यान् विकारांस्तु तस्मिन् जीर्य्यति चौषधे॥
विकाराः शिशिरे याप्या गृहे वारिविवर्ज्जिते।
ततः शान्तविकारस्तु स्नात्वा चैवापरेऽहनि॥
शालिषष्टिकयोर्भक्तं क्षीरेणोष्णेन भोजयेत्।
दिनत्रये पञ्चमे वा विधिरेषोऽर्द्धमात्रया॥
कर्त्तव्यो भिषजावश्यमलर्कविषनाशनः।

कुप्येत् स्वयं विषं यस्य न स जीवति मानवः ॥
तस्मात् प्रकोपयेदाशु स्वयं यावन्न कुप्यति ।
बीजरत्नौषधीगर्भैः कुम्भैः शीताम्बुपूरितैः ॥
स्नापयेत्तं नदीतीरे समन्त्रैर्वा चतुष्पथे ।
बलिं निवेद्य तत्रापि पिण्याकपललं दधि ॥
माल्यानि च विचित्राणि मांसं पक्वामकं तथा ।
अलकाधिपते यक्ष सारमेयगणाधिप ॥
अलर्कजुष्टमेतन्मे निर्व्विषं कुरु माचिरात् ।
दद्यात् संशोधनं तीक्ष्णमेवं स्नातस्य देहिनः ॥
अशुद्धस्य सुरूढेऽपि व्रणे कुप्यति तद्विषं ।
आदयोऽभिहिता व्याला वातपित्तप्रकोपणाः ॥
अतः करोति दष्टस्तु तेषां चेष्टां रुतं नरः ।
बहुशः प्रतिकुर्व्वाणो नचिराम्प्रियते च सः ॥
नखदन्तक्षतं व्यालैर्यत्क्षतं तद्विमर्द्दयेत् ।
सिञ्चेत्तैलेन कोष्णेन ते हि वातप्रकोपजाः ॥

---

॥ सप्तमोऽध्यायः ॥

अथातो दुन्दुभिस्वनीयमध्यायं व्याख्यास्यामः ॥

धवाश्वकर्णतिनिशपलाशपिचुमर्द्दपाटलिपारिभद्रकाम्रोडु

खरकरहाटकार्जुनककुभसर्ज्जकपीतनश्लेष्मातकाङ्कोठामलकप्रग्रह कुटजशमीकपित्थाश्मन्तकार्कचिरबिल्वमहावृक्षारुष्करारलुमधुक मधुशिग्रुशाकगोजीमूर्व्वातिल्वकेक्षुरकगोपघण्टारिमेदानां भस्मा न्याहृत्य गवां मूत्रेण क्षारकल्पेन परिस्राव्य विपचेद्दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोचकमञ्जिष्ठाकरञ्जिकाहस्तिपि प्पलीमरिचोत्पलसारिवाविडङ्गगृहधूमानन्तासोमसरलावाह्लीक गुहाकोशाम्रश्वेतसर्षपवरुणलवणप्लक्षनिचुलकवर्द्धमानवञ्जुलपुत्र श्रेणीसप्तपर्णदण्डकैलवालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठह रिद्रावचाचूर्णानि लोहानाञ्च समभागानि ततः क्षारवदागतपा कमवतार्य्य लोहकुम्भे निदध्यात् ॥

अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च ॥
श्रवणाद्दर्शनात् स्पर्शात् विषात् सम्प्रतिमुच्यते ।
एष क्षारागदो नाम शर्कराश्मरीषु च ॥
अर्शःसु वातगुल्मेषु कासशूलोदरेषु च ।
अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे ॥
शोफे सर्व्वसरे चापि देयः श्वासे च दारुणे ।
एष सर्व्वविषार्त्तानां सर्व्वथैवोपयुज्यते ॥
तथा तक्षकमुख्यानामयं दर्पाङ्कुशोऽगदः ।
विडङ्गत्रिफलादन्तीभद्रदारुहरेणवः ॥
तालीशपत्रमञ्जिष्ठा केशरोत्पलपद्मकं ।
दाडिमं मालतीपुष्पं रजन्यौ सारिवे स्थिरे ॥

प्रियङ्गुस्तगरं कुष्ठं वृहत्यौ चैलवालुकं ।
सचन्दनगवाचीभिरेतैः सिद्धं विषापहं ॥
सर्पिः कल्याणकं ह्येतद्ग्रहापस्मारनाशनं ।
पाण्ड्वामयगरश्वासमन्दाग्निज्वरकासनुत् ॥
शोषिणां स्वल्पशुक्राणां बन्ध्यानाञ्च प्रशस्यते ।
अपामार्गस्य वीजानि शिरीषस्य तथैव च ॥
श्वेते द्वे काकमाचीं च गवां मूत्रेण पेषयेत् ।
सर्पिरेतैस्तु संसिद्धं विषसंशमनं परं ॥
अमृतं नाम विख्यातमपि सञ्जीवयेन्मृतं ।
चन्दनागुरुणी कुष्ठं तगरं तिलपर्णिकं ॥
प्रपौण्डरीकं नलदं सरलं देवदारु च ।
भद्रश्रियं यवफलां भार्गीं नीलीं सुगन्धिकां ॥
कालेयकं पद्मकञ्च मधुकं नागरं जटां ।
पुन्नागैलैलवालूनि गैरिकं ध्यामकं बलां ॥
तोयं सर्ज्जरसं मांसीं सितपुष्पां हरेणुकां ।
तालीशपत्रं क्षुद्रैलां प्रियङ्गुं सकुटन्नटां ॥
शैलपुष्पं सशैलेयं पत्रं कालानुसारिवां ।
कटुत्रिकं शीतशिवं काश्मर्य्यं कटुरोहिणीं ॥
सोमराजीमतिविषां पृश्निकामिन्द्रवारुणीं ।
उशीरं वरुणं मुस्तं नखं कुस्तुम्बुरुं तथा ॥
श्वेते हरिद्रे स्थौणेयं लाचाञ्च लवणानि च ।

कुमुदोत्पलपद्मानि पुष्पञ्चापि तथार्कजं ॥
चम्पकाशोकसुमनस्तिलकप्रसवानि च।
पाटलीशाल्मलीशैलुशिरीषाणां तथैव च ॥
सुरस्यास्तृणशून्यायाश्च सिन्धुवारस्य यानि च।
धवाश्वकर्णयोश्चापि पुष्पाणि तिनिशस्य च ॥
गुग्गुलुं कुङ्कुमं बिम्बीं सर्पाक्षीं गन्धनाकुलीं।
एतत् सम्भृत्य सम्भारं सूक्ष्मचूर्णानि कारयेत् ॥
गोपित्तमधुसर्पिर्भिर्युक्तं शृङ्गे निधापयेत्।
भग्नस्कन्धं विवृत्ताक्षं मृत्योर्दंष्ट्रान्तरं गतं ॥
अनेनागदमुख्येन मनुष्यं पुनराहरेत्।
एषोऽग्निकल्पं दुर्व्वारं क्रुद्धस्यामिततेजसः ॥
विषं नागपतेर्हन्यात् प्रसभं वासुकेरपि।
महासुगन्धिनामायं पञ्चाशीत्यङ्गयोजितः ॥
राजा गदानां सर्व्वेषां राज्ञो हस्ते भवेत् सदा।
तेनानुलिप्तस्तु नृपो भवेत् सर्व्वजनप्रियः ॥
भ्राजिष्णुताञ्च लभते शक्रमध्यगतोऽपि सन्।
उष्णवर्ज्यो विधिःकार्य्यो विषार्त्तानां विजानता ॥
मुक्ता कीटविषं तद्धि शीतेनाभिप्रवर्द्धते।
अन्नपानविधावुक्तमुपधार्य्य शुभाशुभं ॥
शुभं देयं विषार्त्तेभ्यो विरुद्धेभ्यश्च वारयेत्।
फाणितं शिग्रुसौवीरमजीर्णाध्यशनं तथा ॥

वर्ज्जयेच्च समासेन नवधान्यादिकं गणं ।
दिवास्वप्नं व्यवायञ्च व्यायामं क्रोधमातपं ॥
सुरातिलकुलत्थांश्च वर्ज्जयेद्धि विषातुरः ।
प्रसन्नदोषं प्रकृतिस्थधातुमन्नाभिकाङ्क्षं सममूत्रजिह्वं ॥
प्रसन्नवर्णेन्द्रियचित्तचेष्टं वैद्योऽवगच्छेदविषं मनुष्यं ॥

---

## ॥ अष्टमोऽध्यायः ॥

अथातः कीटकल्पं व्याख्यास्यामः ॥
सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः ।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥
सर्व्वदोषप्रकृतिभिर्युक्तास्त्वापरिणामतः ।
कीटत्वेऽपि सुघोरास्ते सर्व्वे एव चतुर्व्विधाः ॥
कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः ।
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका ॥
आवर्त्तकस्तथोरभ्रसारिकामुखवैदलौ ।
शरावकुर्द्दोऽभीराजो परुषश्चित्रशीर्षकः ॥
शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः ।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ।
कौण्डिन्यकः कणभको वरटी पत्रवृश्चिकः ॥
विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा ।

वाह्यकी पिच्चिटः कुम्भी वर्चःकीटोऽरिमेदकः॥
पद्मकीटो दुन्दुभिको मकरः शतपादकः।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी॥
क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः।
एते ह्यग्निप्रकृतयश्चतुर्व्विंशः प्रकीर्त्तिताः॥
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः।
विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः॥
सैरेयकः प्रचलको वलभः किटिमस्तथा।
सूचीमुखः कृष्णगोधा यश्च काषायवासिकः॥
कीटगर्द्दभकश्चैव तथा चोटक एव च।
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः॥
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः।
तुङ्गीनाभो विचिलकस्तालको वाहकस्तथा।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः॥
तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा।
अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः॥
क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः।
ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः॥
छर्द्द्यतीसारतृष्णा च दाहो मोहविजृम्भिका॥

वेपथुश्वासहिक्काश्च दाहः शीतञ्च दारुणं ॥
पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च।
दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च॥
तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः।
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत्॥
दूषीविषप्रकोपाच्च तथैव विषलेपनात्।
लिङ्गं तीक्ष्णविषेष्वेतच्छृणु मन्दविषेष्वतः॥
प्रसेकोऽरोचकश्छर्द्दिःशिरोगौरवशीतता।
पिडकाकोठकण्डूनां जन्म दोषविभागतः॥
योगैर्न्नानाविधैरेषां चूर्णानि गरमादिशेत्।
दूषीविषप्रकाराणां तथैवाप्यनुलेपनात्॥
एकजातीनतस्त्वर्द्धं कीटान् वक्ष्यामि भेदतः।
सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च॥
त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः।
चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः॥
तैर्दष्टस्य श्वयथुरङ्गमर्दो गुरुता गात्राणां दंशःकृष्णश्च भवति॥
प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः।
तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः॥
गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिक

त्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति। सर्षपिकया हृदयपीडातिसारश्च ॥

शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये। श्वेताग्नि प्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च।

मण्डूकाः कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भ्रकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशकण्डूर्भवति पीतफेणागमश्च वक्त्रात्। भ्रकुटीकोटिकाभ्यामेतदेव दाहश्छर्द्दिर्मूर्च्छा चातिमात्रं॥

विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति॥

अहिण्डुकाभिर्दष्टे तोददाहकण्डुश्वयथवो मोहश्च। कण्डूमका भिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते। शूकवृन्ता दिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकञ्चात्र लक्ष्यते॥

पिपीलिकाः स्थूलशीर्षा सम्वाहिका ब्राह्मणिकाङ्गुलिका कपि लिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः॥

मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका का षायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः स्थालिका काषायीभ्यामेतदेव पिडकाश्च सोपद्रवा भवन्ति॥

मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्व्वतीयस्तु कीटैः

प्राणहरैस्तुल्यलक्षणः ॥ नखावकृष्टेऽत्यर्थं पिडकाः सदाहपाका भवन्ति॥ जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च ॥
भवन्ति चात्र ॥ गोधेरकःस्थालिका च ये च श्वेताग्निसंप्रभे ।

भृकुटीकोटिकश्चैव न सिध्यन्त्येकजातिषु ॥
शवमूत्रपुरीषैस्तु सविषैरवमर्षणात् ।

स्युः कण्डूदाहकोठास्रःपिडकातोदवेदनाः ॥

प्रक्लेदवांस्तथास्रावो भ्रंशं सम्पाचयेत्त्वचं ।
दिग्धविद्धक्रियास्तत्र यथावदवचारयेत् ॥
नावसन्नं नचोत्सन्नमतिसंरम्भवेदनं ।
दंशादौ विपरीतार्त्ति कीटदष्टं सुबाधकं ॥
कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत् ।
त्रिविधानान्तु सर्पाणां त्रैविध्येन क्रिया हिता ॥
स्वेदमालेपनं सेकं चोष्णमत्रावचारयेत् ।
अन्यत्र मूर्च्छिताद्दंशात् पाककोथप्रपीडितात् ॥
विषघ्नञ्च विधिं सर्व्वं कुर्य्यात्संशोधनानि च ॥
शिरीषकटुकं कुष्ठं वचा रजनिसैन्धवैः ।
क्षीरमज्जवसासर्पिः शुण्ठीपिप्पलिदारुषु ॥
उत्कारिका स्थिरादौवा सुकृता स्वेदने हिता ।
न स्वेदयेत्तथा दंशं धूमं वक्ष्यामि वृश्चिके ॥
अगदानेकजातीषु प्रवक्ष्यामि पृथक्पृथक् ।
कुष्ठं चक्रं वचा विल्वमूलं पाठा सुवर्च्चिका ॥

गृहधूमं हरिद्रे द्वे त्रिकण्टकविषे हिताः ।
अगारधूमरजनीचक्रं कुष्ठं पलाशजं ॥
गलगोलिकदष्टानामगदो विषनाशनः ।
कुङ्कुमं तगरं शिग्रु पद्मकं रजनीद्वयं ॥
अगदो जलपिष्टोऽयं शतपदिविषनाशनः ।
मेषशृङ्गी वचा पाठा निचुलो रोहिणी जलं ॥
सर्वमण्डूकदष्टानामगदो विषनाशनः ।
वचाश्वगन्धातिबलाबलाशातिगुहागुहाः ॥
विश्वम्भराभिदष्टानामगदो विषमाशनः ।
शिरीषं तगरं कुष्ठं हरिद्रेऽशुंमती सहे ॥
अहिण्डुकाभिदष्टानामगदो विषनाशनः ॥
कण्डूमकाभिर्दष्टानां रात्रौ शीताः क्रिया हिताः ।
दिवा ते नैव सिध्यन्ति सूर्य्यरश्मिबलाद्दिताः ॥
चक्रं कुष्ठमपामार्गः शूकवृन्तविषेऽगदः ।
भृङ्गस्वरसपिष्टा वा कृष्णवल्मीकमृत्तिका ॥
पिपीलिकाभिर्दष्टानां मक्षिकामशकैस्तथा ।
गोमूत्रेण युतो लेपः कृष्णवल्मीकमृत्तिका ॥
प्रतिसूर्य्यकदष्टानां सर्पदष्टवदाचरेत् ।
त्रिविधा वृश्चिकाः प्रोक्ता मन्दमध्यमहाविषाः ॥
गोशकृत्कोथजा मन्दा मध्याः काष्ठेष्टिकोद्भवाः ।
सर्पकोथोद्भवास्तीक्ष्णा ये चान्ये विषसम्भवाः ॥

मन्दा द्वादश मध्यास्तु त्रयः पञ्चदशोत्तमाः।
दशविंशतिरित्येते सङ्ख्यया परिकीर्त्तिताः॥

कृष्णःश्यावः कर्व्वुरः पाण्डुवर्णो गोमूत्राभः कर्कशो मेचकश्च।
श्वेतारक्तो रोमशः शाद्वलाभो रक्तश्चैते मन्दवीर्य्या मतास्तु॥
एभिर्दष्टे वेदना वेपथुश्च गात्रस्तम्भः कृष्णरक्तागमश्च।
शाखादष्टे वेदना चोर्द्धमेति दाहस्वेदौ दंशशोफो ज्वरश्च॥
रक्तःपीतः कापिलेनोदरेण सर्व्वे धूम्रा पर्व्वभिश्च त्रिभिः स्युः।
एते मूत्रोच्चारपूत्यण्डजाता मध्या ज्ञेयास्त्रिप्रकारोरगाणां॥
यश्चैतेषामन्वयाद्यः प्रसूतो दोषोत्पत्तिं तत्स्वरूपाच्च कुर्य्यात्।
जिह्वाशोफो भोजनस्यावरोधो मूर्च्छा चोग्रा मध्यवीर्य्याभिदष्टे॥
श्वेतश्चित्रः श्यामलो लोहिताभो रक्तः श्वेतो रक्तनीलोदरौ च।
पीतो रक्तो नीलपीतोऽपरस्तु रक्तो नीलो नीलशुक्लस्तथा च॥
रक्तो वभ्रुः पूर्व्ववच्चैकपर्व्वा यश्चापर्व्वा पर्व्वणी द्वे च यस्य।
नानारूपा वर्णतश्चापि घोरा ज्ञेयाश्चैते वृश्चिकाः प्राणचौराः॥
जन्मैतेषां सर्पकोथात्प्रदिष्टं देहेभ्योवा घातितानां विषेण।
एभिर्दष्टे सर्पवेगप्रवृत्तिः स्फोटोत्पत्तिर्भ्रान्तिदाहौ ज्वरश्च।
खेभ्यः कृष्णं शोणितञ्चापि तीव्रं तस्मात् प्राणैस्त्यज्यते शीघ्रमेव॥

उग्रमध्यविषैर्दष्टं चिकित्सेत् सर्पदष्टवत्।
दंशं मन्दविषाणान्तु चक्रतैलेन सेचयेत्॥
विदार्य्यादिसुसिद्धेन सुखोष्णेनाथ वा पुनः।
कुर्य्याच्चोत्कारिकास्वेदं विषघ्नैरुपनाहनैः॥

आदंशं स्वेदितं चूर्णैः प्रच्छितं प्रतिसारयेत् ।
रजनीसैन्धवव्योषशिरीषफलपुष्पजैः ॥
मातुलुङ्गाम्लगोमूत्रपिष्टञ्च सुरसाग्रजं ।
लेपे स्वेदे सुखोष्णञ्च गोमयं हितमिष्यते ॥
पाने क्षौद्रयुतं सर्पिः क्षीरंवा बहुशर्करं ।
गुडोदकं वा सुहिमं चातुर्जातकवासितं ॥
पानमस्मै प्रदातव्यं क्षीरं वा सगुडं हिमं ।
शिखिकुक्कुटबर्हाणि सैन्धवं तैलसर्पिषी ॥
धूपो हन्ति प्रयुक्तोऽयं शीघ्रं वृश्चिकजं विषं ।
कुसुम्भपुष्पं रजनी निशा वा कोद्रवं तृणं ॥
एभिर्घृताक्तैर्धूपस्तु पायुदेशे प्रयोजितः ।
नाशयेदाशु कीटोत्थं वृश्चिकस्य च यद्विषं ॥
लूताविषं घोरतमं दुर्व्विज्ञेयतमन्तु तत् ।
दुश्चिकित्स्यतमं वापि भिषग्भिर्मन्दबुद्धिभिः ॥
सविषं निर्व्विषञ्चैतदित्येवं परिशङ्किते ।
विषघ्नमेव कर्त्तव्यमविरोधि यदौषधं ॥
अगदानां हि संयोगो विषजुष्टस्य युज्यते ।
निर्व्विषे मानवे युक्तोऽगदः सम्पद्यते सुखं ॥
तस्मात् सर्व्वैः प्रयत्नेन ज्ञातव्यो विषनिश्चयः ।
अज्ञात्वा विषसद्भावं भिषग्व्यापादयेन्नरं ॥
प्रोद्भिद्यमानस्तु यथाङ्कुरेण न व्यक्तजातिः प्रविभाति वृक्षः ।

तद्दुरालक्ष्यतमं हि तासां विषं शरीरे प्रविकीर्णमात्रं ॥
ईषच्च कण्डूप्रचलं सकोठमव्यक्तवर्णं प्रथमेऽहनि स्यात्।
अन्तेषु शूनं परिनिम्नमध्यं अव्यक्तरूपञ्च दिने द्वितीये ॥
त्र्यहेण तद्दर्शयतीह दंशं विषं चतुर्थेऽहनि कोपमेति।
अतोऽधिकेऽह्नि प्रकरोति जन्तोर्व्विषप्रकोपप्रभवान् विकारान् ॥
षष्ठे दिने विप्रसृतञ्च सर्व्वान् मर्म्मप्रदेशान् भृशमावृणोति।
तत् सप्तमे ऽत्यर्थपरीतगात्रं व्यापादयेन्मर्त्यमतिप्रवृद्धं ॥
यास्तीक्ष्णचण्डोग्रविषा हि लूतास्ताः सप्तरात्रेण विनाशयन्ति।
अतोऽधिकेनापि निहन्युरन्या यासां विषं मध्यमवीर्य्यमुक्तं ॥
यासां कनीयो विषवीर्य्यमुक्तं ताः पक्षमात्रेण विनाशयन्ति॥
तस्मात् प्रयत्नं भिषगत्र कुर्य्यादादंशपाताद्विषघातियोगैः ॥
विषन्तु लालानखमूत्रदंष्ट्रारजःपुरीषैरथ चेन्द्रियेण।
सप्तप्रकारं विसृजन्ति लूतास्तदुग्रमध्यावरवीर्य्ययुक्तं ॥
सकण्डुकोठं स्थिरमल्पमूलं लालाकृतं मन्दरुजं वदन्ति।
शोफश्च कण्डूश्च पुलानिका च धूमायनं चैव नखाग्रदंशे ॥
दंशन्तु मूत्रेण सकृष्णमध्यं सरक्तपर्य्यन्तमवेहि दीर्णं।
दंष्ट्राभिरुग्रं कठिनं विवर्णं जानीहि दंशं स्थिरमण्डलञ्च ॥
रजःपुरीषेन्द्रियजं हि विद्धि स्फोटं विपक्वामलपीलुपाण्डुं।
एतावदेतत् समुदाहृतन्तु वक्ष्यामि लूताप्रभवं पुराणं ॥
सामान्यतो दृष्टमसाध्यसाध्यं चिकित्सितञ्चापि यथाविशेष।

विश्वामित्रो नृपवरः कदाचिदृषिसत्तमं।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटात्स्वेदविन्दवः।
अपतन्दर्शनादेवमधस्तात्तीक्ष्णवर्च्चसः॥
लूने तृणे महर्षीणां धेन्वर्थं सम्भृतेऽपि च।
ततो जातास्त्विमा घोरा नानारूपा महाविषाः॥
अपकाराय वर्त्तन्ते नृपसाधनवाहने।
यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदविन्दवः॥
तस्माल्लूतेति भाष्यन्ते सङ्ख्यया ताश्च षोडश।
कृच्छ्रसाध्यास्तथाऽसाध्या लूतास्तु द्विविधाः स्मृताः।
तासामष्टौ कृच्छ्रसाध्या वर्ज्यास्तावत्य एव तु॥
त्रिमण्डला तथा श्वेता कपिला पीतिका तथा॥
आलमूत्रविषा रक्ता कसना चाष्टमी स्मृता।
ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना॥
भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः।
सौवर्णिका लाजवर्णा जालिन्येणीपदी तथा॥
कृष्णाग्निवर्णा काकाण्डा मालागुणाष्टमी स्मृता।
ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च॥
ज्वरोदाहोऽतिसारश्च गदास्युश्च त्रिदोषजाः।
पिडका विविधाकारा मण्डलानि महान्ति च॥
शोफा महान्तो मृदवो रक्ताःश्यावाश्चलास्तथा।

सामान्यं सर्व्वलूतानामेतदादंशलक्षणं ॥
विशेषलक्षणं तासां वक्ष्यामि सचिकित्सितं ।
त्रिमण्डलाया दंशेऽसृक् कृष्णं स्रवति दीर्य्यते ॥
बाधिर्य्यं कलुषा दृष्टिस्तथा दाहश्च नेत्रयोः ।
तत्रार्कमूलं रजनी नाकुली पृश्निपर्णिका ॥
नस्तःकर्म्मणि शस्यन्ते पानाभ्यङ्गाञ्जनेषु च ।
श्वेतायाः पिडका दंशे श्वेता कण्डुमती भवेत् ॥
दाहमूर्च्छाज्वरवती विसर्पक्लेदरुक्करी ।
तत्र चन्दनरास्नैला हरेणुनलवञ्जुलाः ॥
कुष्ठं लामज्जकं चक्रं नलदं चागदो हितः ।
आदंशे पिडका ताम्रा कपिलायाः स्थिरा भवेत् ॥
शिरसो गौरवं दाहस्तिमिरं भ्रमएव च ॥
तत्र पद्मककुष्ठैलाकरञ्जककुभत्वचः ।
स्थिरार्कपर्णपामार्गदूर्व्वा ब्राह्मी विषापहाः ॥
आदंशे पीतिकायास्तु पिडका जायते स्थिरा ।
तथाच्छर्दिर्ज्वरः शूलं रक्ते स्याताञ्च लोचने ॥
तत्रेष्टाः कुटजोशीरतुङ्गपद्मकवञ्जुलाः ।
शिरीषकिणिहीशेलुकदम्बककुभत्वचः ॥
रक्तमण्डनिभे दंशे पिडकाः सर्षपा इव,
जायन्ते तालुशोषश्च दाहश्चालविषान्विते ॥
तत्र प्रियङ्गु ह्रीवेरं कुष्ठं लामज्जवञ्जुलाः ।

अगदः शतपुष्पा च सपिप्पलवटाङ्कुराः ॥
पूतिमूत्रविषादंशो विसर्पी कृष्णशोणितः।
कासश्वासवमीमूर्च्छाज्वरदाहसमन्वितः ॥
मनःशिलालमधुककुष्ठचन्दनपद्मकैः।
मधुमिश्रैः सलामज्जैरगदस्तत्र कीर्त्तितः ॥
दंशश्च पाण्डुपिडको दाहक्लेदसमन्वितः।
रक्ताया रक्तपर्य्यन्तो विज्ञेयो रक्तसंयुतः ॥
कार्य्यस्तत्रागदस्तोयचन्दनोशीरपद्मकैः।
तथैवार्जुनशेलुभ्यां त्वग्भिराम्रातकस्य च ॥
पिच्छिलं कसनादंशाद्रुधिरं शीतलं स्रवेत्।
कासश्वासौ च तत्रोक्तं रक्तलूताचिकित्सितं॥
पुरीषगन्धिरल्पासृक् कृष्णाया दंशएव तु।
ज्वरमूर्च्छावमीदाहकासश्वाससमन्वितः ॥
तत्रैलाचक्रसर्पाक्षीगन्धनाकुलिचन्दनैः।
महासुगन्धिसहितैः प्रत्याख्यायागदः स्मृतः ॥
दंशे दाहोऽग्निवर्णायाः स्रावोऽत्यर्थं ज्वरस्तथा।
चोषकण्डूरोमहर्षा दाहश्च स्फोटजन्म च ॥
कृष्णाप्रशमनं चात्र प्रत्याख्याय प्रयोजयेत्।
सारिवोशीरयष्ट्याह्वचन्दनोत्पलपद्मकं ॥
सर्व्वासामेव युञ्जीत विषे श्लेष्मातकत्वचं।
भिषक् सर्व्वप्रकारेषु तथा च चोरपिप्पलं ॥

कृच्छ्रसाध्यविषा ह्यष्टौ प्रोक्ता द्वे च यदृच्छया।
अवार्य्यविषवीर्य्याणां लक्षणानि निबोध मे॥
श्वातः सौवर्णिकादंशः सफेणो मत्स्यगन्धकः।
श्वासकासौ ज्वरस्तृष्णा मूर्च्छा चात्र सुदारुणा॥
आदंशे लाजवर्णाया आमं पूति सवेदरुक्।
दाहोमूर्च्छातिसारश्च शिरोदुःखञ्च जायते।
घोरदंशस्तु जालिन्या राजिमानवदीर्य्यते॥
स्तम्भःश्वासस्तमोवृद्धिस्तालुशोषश्च जायते।
एणीपाद्यास्तथा दंशो भवेत् कृष्णतिलाकृतिः॥
तृष्णामूर्च्छाज्वरच्छर्द्दिकासश्वाससमन्वितः।
दंशः काकण्डकादष्टे पाण्डुरक्तोऽतिवेदनः।
रक्तो मालागुणादंशो धूमगन्धोऽतिवेदनः।
विदीर्य्यते च बहुधा दाहमूर्च्छाज्वरान्वितः॥
असाध्यानां भिषक्प्राज्ञः प्रयुञ्जीत चिकित्सितं।
दोषोच्छ्रायविशेषेणच्छेदकर्म्मविवर्ज्जितं।
साध्याभिरभिलूताभिर्दष्टमात्रस्य देहिनः॥
वृद्धिपत्रेण मतिमान् सम्यगादंशमुद्धरेत्।
जम्बोष्ठेनाग्नितप्तेन दहेदाकरवारणात्॥
अमर्मणि विधानज्ञो वर्ज्जितस्य ज्वरादिभिः।
दंशस्योत्कर्त्तनं कुर्य्यादल्पश्वयथुकस्य च॥
मधुसैन्धवसंयुक्तैरगदैर्लेपयेत्ततः।

प्रियङ्गुरजनीकुष्ठसमङ्गामधुकैस्तथा ।
सारिवा मधुकं द्राक्षा पयस्यां क्षीरमोरटं ॥
विदारीगोक्षुरक्षौद्रमधुकं पाययेत वा ।
क्षीरिणां त्वक्कषायेण सुशीतेन च सेचयेत् ॥
उपद्रवान् यथादोषं विषघ्नैश्च प्रसाधयेत् ॥
नस्याञ्जनाभ्यञ्जनपानधूमं तथावपीडं कवलग्रहञ्च ।
संशोधनञ्चोभयतः प्रयुञ्ज्याद्रक्तं हरेच्चापि जलायुकाभिः ॥
कीटदुष्टव्रणान् सर्व्वानहिदष्टव्रणानि च ।
आदंशपाकयत्नेन चिकित्सेत् सर्पदष्टवत् ॥
विनिवृत्ते ततः शोफे कर्णिकापातनं हितं ॥
निम्बपत्रं त्रिवृद्दन्ती कुसुम्भं रजनी मधु ।
गुग्गुलुः सैन्धवं किण्वं वर्चः पारावतस्य च ॥
विषवृद्धिकरञ्चान्नं हित्वा सम्भोजनं हितं ॥
विषेभ्यः खलु सर्व्वेभ्यो कर्णिकामरुजां स्थिरां ।
प्रच्छयित्वा मधुयुतैः शोधनीयैरुपाचरेत् ॥
सप्तषष्टस्य कीटानां शतस्यैतद्विभागशः ।
दष्टलक्षणमाख्यातं चिकित्साचाप्यनन्तरं ॥
सविंशमध्यायशतमेतदुक्तं विभागशः ।
दक्षोद्दिष्टाननिर्द्दिष्टान् सर्व्वान् वक्ष्याम्यथोत्तरे ॥
सनातनत्वाद्वेदानामक्षरत्वात्तथैव च ॥
तथा दृष्टफलत्वाच्च हितत्वादपि देहिनां ।

वाक्समूहार्थविस्तारात् पूजितत्वाच्च देहिभिः ॥
चिकित्सितात्पुण्यतमं न किञ्चिदपि सुश्रुमः ।
ऋषेरिन्द्रप्रभावस्याम्टतयोनेर्भिषग्गुरोः ॥
धारयित्वा तु विमलं मतं परमसम्मतं ।
उक्ताहारसमाचारद्दह प्रेत्य च मोदते ॥

इति सौश्रुते आयुर्व्वेदशास्त्रे पञ्चमं कल्पस्थानं समाप्तं ॥

---

# ॥ उत्तरतन्त्रं ॥

नमोधन्वन्तरये ॥

अथात औपद्रविकमध्यायं व्याख्यास्यामः ॥

अध्यायानां शते विंशे यदुक्तमसकृन्मया ।
वक्ष्यामि बहुधा सम्यगुत्तरेऽर्थानिमानिति ॥
इदानीन्तत् प्रवक्ष्यामि तन्त्रमुत्तरमुत्तमं ।
निखिलेनोपदिश्यन्ते यत्र रोगाः पृथग्विधाः ॥
शालाक्यशास्त्राभिहिता विदेहाधिपकीर्त्तिताः ।
ये च विस्तरतो दृष्टाः कुमाराबाधहेतवः ॥
षट्सु कायचिकित्सासु ये चोक्ताः परमर्षिभिः ।
उपसर्गादयो रोगा ये चाप्यागन्तवः स्मृताः ॥
त्रिषष्टीरससंसर्गाः स्वस्थवृत्तन्तथैव च ।
युक्तार्था युक्तयश्चैव दोषभेदास्तथैव च ॥
यत्रोक्ता विविधा अर्था रोगसाधनहेतवः ।
महतस्तस्य तन्त्रस्य दुर्गाधस्याम्बुधेरिव ॥

आदावेवोत्तमाङ्गस्थान् रोगानभिदधाम्यहं।
सङ्ख्यया लक्षणैश्चापि साध्यासाध्यक्रमेण च ॥
विद्याद्द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसम्मितं।
द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषङ्नयनबुद्बुदं ॥
सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवं।
पलं भुवोऽग्नितो रक्तं वातात्कृष्णं सितं जलात् ॥
आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे।
दृष्टिश्चात्र तथावक्ष्ये यथाब्रूयाद्विशारदः ॥
नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते।
कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः ॥
मण्डलानि च सन्धींश्च पटलानि च लोचने।
यथाक्रमं विजानीयात् पञ्च षट् च षडेव च ॥
पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां मण्डलानि तु।
अनुपूर्व्वन्तु ते मध्याश्चत्वारो ऽन्त्यायथोत्तरं ॥
पक्ष्मवर्त्मगतः सन्धिर्व्वर्त्मशुक्लगतोऽपरः।
शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः ॥
ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः।
द्वे वर्त्मपटले विद्याच्चत्वार्य्यन्यानि चाक्षिणि ॥
जायन्ते तिमिरं येषु व्याधिः परमदारुणः।
तेजोजलाश्रितं वाह्यं तेष्वन्यत् पिशिताश्रितं ॥
मेदस्तृतीयं पटलमाश्रितन्त्वस्थि चापरं।

पञ्चमांशसमं दृष्टेस्तेषां बाहल्यमिष्यते॥
शिराणां कण्डराणाञ्च मेदसः कालकस्य च ।
गुणाः कालत्परः श्लेष्मा बन्धने ऽक्ष्णोः शिरायुतः॥
शिरानुसारिभिर्दोषैर्विगुणैरूर्द्धमागतैः ।
जायन्ते नेत्रभागेषु रोगाः परमदारुणाः ॥
तत्राविलं ससंरम्भमश्रुपूर्णोपदेहवत् ।
गुरूषाचोषरागाद्यैर्जुष्टञ्चाव्यक्तलक्षणैः ॥
सशूलं वर्त्मकोषेषु शूकपूर्णाभमेव च ।
विहन्यमानं रूपे वा क्रियास्वक्षि यथा पुरा ॥
दृष्ट्वैव धीमान् बुध्येत दोषेणाधिष्ठितञ्च तत् ।
तत्र सम्भवमासाद्य यथादोषं भिषग्जितं ॥
विदध्यान्नेत्रजा रोगा बलवन्तः स्युरन्यथा ।
सङ्क्षेपतः क्रियायोगो निदानपरिवर्ज्जनं ॥
वातादीनां प्रतीघातः प्रोक्तो विस्तरतः पुनः ।
उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्य्ययाच्च॥
प्रसक्तसंरोदनशोककोपक्लेशाभिघातादतिमैथुनाच्च ।
शुक्तारनालाम्लकुलत्थमाषनिषेवणाद्वेगविनिग्रहाच्च ॥
स्वेदाद्रजोधूमनिषेवणाच्च छर्द्देर्व्विघातादमनातियोगात् ।
वाष्पग्रहात्सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः ॥
वाताद्दश तथापित्तात् कफाच्चैव त्रयोदश ।
रक्तात् षोडश विज्ञेयाः सर्व्वजाः पञ्चविंशतिः ॥

तथा वाह्यौ पुनर्द्वौ च रोगाः षट्सप्ततिः स्मृताः।
हताधिमन्थो निमिषो दृष्टिर्गम्भीरिका च या ॥
यच्च वातहतं वर्त्म न ते सिध्यन्ति वातजाः।
याप्यो ऽथ तन्मयः काचः साध्याः स्युः सान्यमारुताः ॥
शुष्काक्षिपाकाधीमन्थस्यन्दमारुतपर्य्ययाः।
असाध्यो ह्रस्वजात्यो यो जलस्रावश्च पैत्तिकः ॥
परिस्रायी च नीलश्च याप्यः काचोऽथ तन्मयः।
अभिष्यन्दोऽधिमन्थोऽम्लाध्युषितं शुक्तिकाक्षया ॥
दृष्टिः पित्तविदग्धा च पोथक्यो लगणश्च यः।
असाध्यः कफजस्रावो याप्यः काचोऽथ तन्मयः ॥
अभिष्यन्दोऽधिमन्थश्च बलासग्रथितश्च यत्।
दृष्टिःश्लेष्मविदग्धा च पोथक्यो लगणश्च यः ॥
क्रिमिग्रन्थिपरिक्लिन्नवर्त्मशुक्लार्म्मपिष्टकाः।
श्लेष्मोपनाहः साध्यस्तु कथिताः श्लेष्मजेषु तु ॥
रक्तस्रावोऽजकाजातं शोणितार्शोऽवलम्बितं।
शुक्रं न साध्यं काचश्च याप्यस्तज्जः प्रकीर्त्तितः ॥
मन्थस्यन्दौ क्लिष्टवर्त्महर्षोत्पातौ तथैव च।
सिराजावञ्जनाख्या च सिराजालञ्च यत् स्मृतं ॥
पर्व्वण्यथाव्रणं शुक्रं शोणितार्म्मार्ज्जुनश्च यः ॥
एते साध्या विकारेषु रक्तजेषु भवन्तिहि ॥
पूयस्रावो नाकुलान्ध्यमक्षिपाकात्ययोऽलजी।

असाध्याः सर्व्वजा याप्याः काचः कोपश्च पक्ष्मणः॥
वर्त्मावबन्धो यो व्याधिः सिरासु पिडका च या।
प्रस्तार्य्यर्माधिमांसार्मस्नाय्वर्मोत्सङ्गिनी च या॥
पूयालसश्चार्व्बुदञ्च श्यावकर्दमवर्त्मनी।
तथार्शो वर्त्मशुक्रार्शःशर्करावर्त्म यच्च वै॥
सशोफश्चाप्यशोफश्च पाको बहलवर्त्म च।
अक्लिन्नवर्त्म कुम्भीका विसवर्त्म च सिध्यति॥
सनिमित्तोऽनिमित्तश्च द्वावसाध्यौतु वाह्यजौ।
षट्सप्ततिविकाराणामेषा संग्रहकीर्त्तना॥
नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः।
शुक्रभागे दशैकश्च चत्वारः कृष्णभागजाः॥
सर्व्वाश्रयाः सप्तदश दृष्टिजा द्वादशैवतु।
वाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ॥
भूय एतान् प्रवक्ष्यामि सङ्ख्यारूपचिकित्सितैः॥

---

॥ द्वितीयोऽध्यायः॥

अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः॥
पूयालसः सोपनाहः स्रावाः पर्व्वणिकालजी।
क्रिमिग्रन्थिश्च विज्ञेया रोगाः सन्धिगता नव॥
पक्वः शोफः सन्धिजः संस्रवेद्यः सान्द्रं पूयं पूतिपूयालसः सः।
ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकः कण्डूप्रायो नीरुजस्तूपनाहः॥

गत्वासन्धीनश्रुमार्गेण दोषाः कुर्य्युःस्रावान् रुग्विहीनान्स्वलिङ्गान्।
तान्वै स्रावान् नेत्रनाडीमथैके तस्या लिङ्गं कीर्त्तयिष्ये चतुर्धा ॥
पाकः सन्धौ संस्रवेद्यश्च पूयं पूयास्रावो नैकरूपः प्रदिष्टः।
श्वेतं सान्द्रं पिच्छिलं यः स्रवेच्च श्लेष्मास्रावो नीरुजः स प्रदिष्टः ॥
रक्तास्रावः शोणितोत्थः सरक्तं कोष्णं नाल्पं संस्रवेन्नातिसान्द्रं ।
पीताभासं नीलमुष्णं जलाभं पित्तस्रावं स स्रवेत् सन्धिमध्यात् ॥
ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ज्ञेया पर्व्वणी वृत्तशोफा।
जाता सन्धौ कृष्णशुक्ले ऽलजी स्यात्तस्मिन्नेवाख्यापिता पूर्व्वलिङ्गैः॥
क्रिमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्य्युः क्रमयः सन्धिजाताः।
नानारूपा वर्त्मशुक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषन्ति ॥

---

॥ तृतीयोऽध्यायः ॥

अथतोवर्त्मगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ।

पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः ।
सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः ॥
विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्।
विकाराञ्जनयन्त्याशु नामतस्तान्निबोधत ॥
उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा ।
तथार्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका ॥
बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः।
क्लिष्टकर्दमवर्त्माख्यौ श्याववर्त्म तथैव च ॥

प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतन्तु यत्।
अर्ब्बुदं निमिषश्चापि शोणितार्शश्च यत्स्मृतं ॥
लगणो विषनामा च पक्ष्मकोपस्तथैव च।
एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः ॥

नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रचक्ष्महे।

पिडकाभ्यन्तरमुखी वाह्याधोवर्त्मसंश्रया ॥
विज्ञेयोत्सङ्गिनी नाम तद्रूपपिडकान्विता।
कुम्भीकबीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः ॥
आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः।
कण्डूस्रावान्विता गुर्व्वी रक्तसर्षपसन्निभाः ॥
पिडकाश्च रुजावत्यः पोथक्य इति संज्ञिताः।
पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता ॥
पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा।
सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शो वर्त्म कीर्त्त्यते ॥
दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसम्भवः।
व्याधिरेष समाख्यातः शुष्कार्श इति संज्ञितः ॥
दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा।
मृदी मन्दरुजा सूक्ष्मा ज्ञेया सा ऽञ्जननामिका ॥
वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः।
सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म तत् ॥
कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः।

न समं छादयेदक्षि भवेद्बन्धः स वर्त्मनः ॥
मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च।
अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म तदादिशेत्॥
क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा।
तदाक्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमं॥
यद्वर्त्म वाह्यतोऽन्तश्च श्यावं शूनं सवेदनं।
दाहकण्डूपरिक्लेदि श्याववर्त्मेति तन्मतं॥
अरुजं वाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि।
कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म तदुच्यते॥
यस्य धौतानि धौतानि सम्बध्यन्ते पुनः पुनः।
वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म तत्॥
विमुक्तसन्धिनिश्चेष्टं वर्त्म यन्न निमील्यते॥
एतद्वातहतं विद्यात् सरुजं यदिवारुजं।
वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनं॥
विज्ञेयमर्बुदं पुंसां सरक्तमवलम्बितं।
निमेषणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः।
चालयेदतिवर्त्मानि निमेषः स गदो मतः॥
छिन्नाश्छिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः।
दाहकण्डूरुजोपेतास्तेऽर्शः शोणितसम्भवाः॥
अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः।
सकण्डूः पिच्छिलः कोलप्रमाणो लगणस्तु सः॥

शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितं ।
बिसमन्तर्जल इव बिसवर्त्मेति तन्मतं ॥
पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च ।
निर्वर्त्तयन्ति पक्ष्माणि तैर्जुष्टञ्चाक्षि दूयते ॥
उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते ।
वातातपानलद्वेषी पक्ष्मकोपः स उच्यते ॥

---

## ॥ चतुर्थोऽध्यायः ॥

अथातः शुक्लगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥
प्रस्तारिशुक्लक्षतजाधिमांसस्नाय्वर्मसंज्ञाः खलु पञ्च रोगाः ।
स्युः शुक्तिकाचार्ज्जुनपिष्टकौ च जालं सिराणां पिडकाश्च याःस्युः ॥
रोगा बलासग्रथितेन सार्द्धमेकादशाक्ष्णः खलु शुक्लभागे ।
प्रस्तारि ग्रथितमिहार्म्म शुक्लभागे विस्तीर्णं तनु रुधिरप्रभं सनीलं ॥
शुक्लाख्यं मृदु कथयन्ति शुक्लभागे सश्वेतं सममिह वर्द्धते चिरेण ।
यन्मांसं प्रचयमुपैति शुक्लभागे पद्माभं तदुपदिशन्ति लोहितार्म्म ॥

विस्तीर्णं मृदु बहलं यकृत्प्रकाशं
श्यावं वा तदधिकमांसजार्म्म विद्यात् ।
शुक्ले यत् पिशितमुपैति वृद्धिमेत
त्स्नाय्वर्मेत्यभिपठितं खरं प्रपाण्डु ॥
श्यावाः स्युः पिशितनिभास्तु बिन्दवो ये
शुक्तिर्वा सितनयने स शुक्तिसंज्ञः ।

एको यः शशरुधिरोपमः सुबिन्दुः
शुक्लाख्यो भवति तमर्ज्जुनं वदन्ति॥
उत्सन्नः सलिलनिभोऽथ पिष्टशुक्लो
बिन्दुर्यः सम्भवति पिष्टकःसुवृत्तः।
जालाभः कठिनशिरो महान् स रक्तः
सन्तानःस्मृत इह जालसंज्ञितस्तु॥
शुक्लस्थाः सितपिडकाः शिरावृता
यास्ता विद्यादसितसमीपजाः शिराजाः।
कांस्याभो भवति शिरावृतः सिते यो
बिन्दुर्व्वा स तु निरुजो बलासकाख्यः॥

---

॥ पञ्चमोऽध्यायः॥

अथातः कृष्णगतरोगविज्ञानीयमध्याय व्याख्यास्यामः॥
यत्सव्रणं शुक्रमथाव्रणं वा पाकात्ययश्चाप्यजका तथैव।
चत्वार एतेऽभिहिताः विकारा कृष्णाश्रयाः संग्रहतः पुरस्तात्॥
निमग्नरूपं हि भवेत्तु कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै।
स्रावं स्रवेदुष्णमतीव रुक् च तत्सव्रणं शुक्रमुदाहरन्ति॥
दृष्टेः समीपे न भवेत्तु यच्च नचावगाढं न च संस्रवेद्धि।
अवेदनावन्न च युग्मशुक्रं तत्सिद्धिमाप्नोति कदाचिदेव॥
सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगश्रुयुक्तं।
विहायसीवाभ्रदलानुकारि तदव्रणं साध्यतमं वदन्ति॥

गम्भीरजातं बहलञ्च शुक्रं चिरोत्थितञ्चापि वदन्ति कृच्छ्रं ॥
विच्छिन्नमध्यं पिशितावृतं वा चलं सिरासक्तमदृष्टिकृच्च।
द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितञ्चापि विवर्ज्जनीयं ॥
उष्णाश्रुपातः पिडका च कृष्णे यस्मिन्भवेन्मुद्गनिभञ्च शुक्रं।
तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत्तित्तिरिपक्षतुल्यं॥
संच्छाद्यते श्वेतनिभेन सर्व्वदोषेण यस्यासितमण्डलन्तु।
तमक्षिपाकात्ययमक्षिकोपसमुत्थितं तीव्ररुजं वदन्ति ॥
अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः।
विदार्य्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत्॥

---

॥ षष्ठोऽध्यायः॥

अथातः सर्व्वगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥
स्यन्दास्तु चत्वार इहोपदिष्टास्तावन्त एवेह तथाधिमन्थाः।
शोफान्वितोऽशोफयुतश्च पाकावित्येवमेते दश सम्प्रदिष्टाः॥
हताधिमन्थोऽनिलपर्य्ययश्च शुष्काक्षिपाको ऽन्यत एव वातः।
दृष्टिस्तथाम्लाध्युषिता सिराणामुत्पातहर्षावपि सर्व्वभागाः॥
प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः।
तस्मादभिष्यन्दमुदीर्य्यमाणमुपाचरेदाशु हिताय धीमान्॥
निस्तोदनं स्तम्भनरोमहर्षसङ्घर्षपारुष्यशिरोऽभितापाः।
विशुष्कभावाः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति॥

दाहप्रपाकौ शिशिराभिनन्दा धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताक्षिशोफः कण्डूपदेहौ सितताऽतिशैत्यं ।
स्रावो मुहुः पिच्छिल एवचापि कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च राज्यः समन्तादतिलोहिताश्च ।
पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति ॥

वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावतां ।
तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः ॥
उत्पाठ्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा ।
शिरसोऽर्द्धन्तु तं विद्यादधिमन्थं स्वलक्षणैः ॥
नेत्रमुत्पाठ्यत इव मथ्यतेऽरणिवच्च यत् ।
सङ्घर्षतोदनिर्भेदमांससंरब्धमाविलं ॥
कुञ्चनास्फोटनाध्मानवेपथुव्यथनैर्युतं ।
शिरसोऽर्द्धञ्च येन स्यादधिमन्थः स मारुतात् ॥
रक्तराजिचितं स्रावि वह्निनेवावदह्यते ।
यकृत्पिण्डोपमं दाहि क्षारेणाक्तमिव क्षतं ॥
प्रपक्वोच्छूनवर्णान्तं सस्वेदं पीतदर्शनं ।
मूर्च्छाशिरोदाहयुतं पित्तेनाक्ष्यधिमन्थितं ॥
शोफवन्नातिसंरब्धं स्रावकण्डूसमन्वितं ।
शैत्यगौरवपैच्छिल्यदूषिकाहर्षणान्वितं ॥
रूपं पश्यति दुःखेन पांशुपूर्णमिवाविलं ।

नासाध्मानशिरोदुःखयुतं श्लेष्माधिमन्थितं ॥
बन्धुजीवप्रतीकाशं ताम्यति स्पर्शनाक्षमं।
रक्तास्रावं सनिस्तोदं पश्यत्यग्निनिभा दिशः ॥
रक्तमग्नारिष्टवच्च कृष्णभागश्च लक्ष्यते।
यद्दीप्तं रक्तपर्य्यन्तं तद्रक्तेनाधिमन्थितं ॥

हन्याद्दृष्टिं सप्तरात्रात्कफोत्थोऽधीमन्थोऽसृक्सम्भवः पञ्चरात्रात्।
षड्रात्राद्वा मारुतोत्थो निहन्यान्मिथ्याचारात्पैत्तिकः सद्य एव ॥

कण्डूपदेहाश्रुयुतः पक्वोडुम्बरसन्निभः।
दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः ॥
जुष्टो मुहुःस्रवेदास्रमुष्णशीताम्बु पिच्छिलं।
संरम्भी पच्यते यस्य नेत्रपाकः सशोफजः ॥
शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे।
अन्तःसिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् ॥
हताधिमन्थं जनयेत्तमसाध्यं विदुर्ब्बुधाः।

पक्ष्मद्वयाक्षिभ्रुवमाश्रितस्तु यत्रानिलः सञ्चरति प्रदुष्टः।
पर्य्यायशश्चापि रुजः करोति तं वातपर्य्यायमुदाहरन्ति ॥
यत्कूणितं दारुणरूक्षवर्त्म विलोकने चाविलदर्शनं यत्।
सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि ॥
यस्यावटूकर्णशिरोहनुस्थो मन्यागतो वाप्यनिलोऽन्यतो वा।
कुर्य्याद्रुजोऽतिभ्रुवि लोचने वा तमन्यतोवातमुदाहरन्ति ॥
अम्लेन भुक्तेन विदाहिना वा सञ्छाद्यते सर्व्वत एव नेत्रं।

शोफान्वितं लोहितकं सनीलैरेतादृगक्षाध्युषितं वदन्ति ॥
अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः ।
मुहुर्विरज्यन्ति च ताः समन्ताद्व्याधिः सिरोत्पात इति प्रदिष्टः ॥
महान्स्सिरोत्पातउपेक्षितस्तु जायेत रोगस्तु सिराप्रहर्षः ।
ताम्राच्छमस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुञ्च ॥

---

## ॥ सप्तमोऽध्यायः ॥

अथातो दृष्टिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥
मसूरदलमात्रान्तु पञ्चभूतप्रसादजां ।
खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥
आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिं ।
शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः ॥
रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्ष्महे ।
पटलानुप्रविष्टस्य तिमिरस्य च लक्षणं ॥
सिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरे भृशं ।
प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः ॥
अव्यक्तानि स रूपाणि सर्वाण्येव प्रपश्यति ।
दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ॥
मक्षिकान् मशकान् केशान् जालकानि च पश्यति ।
मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥
परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि वा ।

दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥
समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात्।
यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥
ऊर्द्धं पश्यति नाधस्तात्तृतीयं पटलं गते।
महान्त्यपि च रूपाणिच्छादितानीव वाससा ॥
कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते।
यथादोषञ्च रज्येत दृष्टिर्दोषे बलीयसि ॥
अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते।
पार्श्वस्थिते तथा दोषे पार्श्वस्थानि न पश्यति ॥
समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति।
दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥
द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते।
तिमिराख्यः स वै दोषश्चतुर्थपटलङ्गतः ॥
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशः स उच्यते।
तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥
चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः।
निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः।
तत्र वातेन रूपाणि भ्रमन्तीव स पश्यति ॥
आविलान्यरुणाभानि व्याविद्धानि च मानवः।
पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ॥

शिखिबर्हविचित्राणि नीलकृष्णानि पश्यति।
गौरचामरगौराणि श्वेताभ्रप्रतिमानि च ॥
पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रे चैवाभ्रसंप्लवं।
सलिलप्लावितानीव परिजाड्यानि मानवः॥
तथा रक्तेन रक्तानि तमांसि विविधानि च।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च।
हरितश्यावकृष्णानि धूमधूम्राणि चेक्षते ॥
सन्निपातेन चित्राणि विप्लुतानीव पश्यति।
बहुधा वा द्विधा वापि सर्व्वाण्येव समन्ततः।
हीनाधिकाङ्गान्यथवा ज्योतींष्यपि च पश्यति ॥
पित्तं कुर्य्यात्परिम्लायि मूर्च्छितं रक्ततेजसा।
पीता दिशस्तथोद्यन्तमादित्यमिव पश्यति॥
विकीर्य्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव च।
वक्ष्यामि षड्विधैरागैर्लिङ्गनाशमतः परं॥
रागोऽरुणो मारुतजः प्रदिष्टः पित्तात् परिम्लाय्ययवापि नीलः।
कफात् सितः शोणितजस्तु रक्तः समस्तदोषोऽथ विचित्ररूपः॥
रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभं।
परिम्लायिनि रोगे स्यान्म्लाय्यानीलञ्च मण्डलं॥
दोषक्षयात् कदाचित्स्यात्स्वयं तत्र च दर्शनं॥
अरुणं मण्डलं वाताच्चञ्चलं परुषन्तथा।
पित्तान्मण्डलमानीलं कांस्याभं पीतमेव वा॥

श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरं ।
चलत्पद्मपलाशस्थं शुक्लविन्दुरिवाम्भसः ॥
मृद्यमाने च नयने मण्डलं तद्विसर्पति ।
प्रबालपद्मपत्राभं मण्डलं शोणितात्मकं ॥
दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे ।
यथास्वदोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥

षड् लिङ्गनाशाःषडिमे च रागा दृष्ट्याश्रयाः षड्च षडेव चक्षुः
तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यस्त्वथ धूमदर्शी ॥
यो ह्रस्वजात्यो नकुलान्धता च गम्भीरसंज्ञा च तथैव दृष्टिः ॥
पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च मन्यते यः स मानवः पित्तविदग्धदृष्टिः ॥
प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येन्निशि वीक्षते च ।
तथा नरः श्लेष्मविदग्धदृष्टिस्तान्येव शुक्लानि हि मन्यते तु ॥
त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यानुगृहीतदृष्टिर्वीक्षेत रूपाणि कफाल्पभावात् ॥
शोकज्वरायासशिरोभितापैरभ्याहता यस्य नरस्य दृष्टिः ।
सधूमकान्पश्यति सर्व्वभावांस्तं धूमदर्शीति वदन्ति रोगं ॥
स ह्रस्वजात्यो दिवसेषु कृच्छ्राद्ध्रस्वानि रूपाणि च यो न पश्येत् ।
रात्रौ स शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत् ॥
विद्योतते येन नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत् सवै विकारो नकुलान्ध्यसंज्ञः ।

दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यते ऽभ्यन्तरतश्च याति॥
रुजावगाढा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः।
बाह्यौ पुनर्द्वाविह सम्प्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च॥
निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनैश्च।
सुरर्षिगन्धर्व्वमहोरगाणां सन्दर्शनेनापि च भासुराणां॥
हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः।
तत्राक्षि विस्पष्टमिवावभाति वैदूर्य्यवर्णा विमला च दृष्टिः।
विदीर्य्यते सीदति हीयते वा नृणामभीघातहता तु दृष्टिः।
इत्येते नयनगता महाविकाराः सङ्ख्याताः पृथगिह षट् च सप्ततिश्च।
एतेषां पृथगिह विस्तरेण सर्व्वं वक्ष्येऽहं तदनुचिकित्सितञ्च तावत्॥

---

### अष्टमोऽध्यायः॥

अथातश्चिकित्सितप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः॥

षट्सप्ततिर्य्येऽभिहिता व्याधयो नामलक्षणैः।
चिकित्सितमिदं तेषां समासाद्व्यासतः शृणु॥
छेद्यास्तेषु दशैकश्च नव लेख्याः प्रकीर्त्तिताः।
भेद्याःपञ्च विकाराः स्युर्व्यध्याः पञ्चदशैव तु॥
द्वादशाः शस्त्रकृत्याश्च याप्याः सप्त भवन्ति हि।
रोगा वर्ज्जयितव्याश्च दश पञ्च च जानता॥
असाध्यौ वा भवेतान्तु याप्यौ वागन्तुसंज्ञितौ॥

अर्शोऽन्वितं भवति वर्त्म तु यत्तथार्शः
शुष्कं तथार्बुदमथो पिडकाः सिराजाः।
जालं सिराजमपि पञ्चविधं तथार्म
च्छेद्या भवन्ति सहपर्व्वणिकामयेन॥
उत्सङ्गिनी बहलकर्दमवर्त्मनी च
श्यावञ्च यच्च पठितन्त्विह बद्धवर्त्म।
क्लिष्टञ्च पोथकियुतं खलु यच्च वर्त्म
कुम्भीकिनीच सहशर्करया च लेख्याः॥
श्लेष्मोपनाहलगणौ च विसञ्च भेद्या
ग्रन्थिश्च यः कृमिकृतोऽञ्जननामिका च॥
आदौ सिरा निगदिताश्च ययोः प्रयोगे
पाकौ च यौ नयनयोः पवनोऽन्यतश्च।
पूयालसानिलविपर्य्ययमन्यसंज्ञाः
स्यन्दास्तु यान्त्युपशमं हि सिराव्यधेन॥
शुष्काक्षिपाककफपित्तविदग्धदृष्टिष्व
म्लाख्यशुक्रसहितार्ज्जुनपिष्टकेषु।
अक्लिन्नवर्त्मकृतभुग्ध्वजदर्शिशुक्ति
प्रक्लिन्नवर्त्मसु तथैव बलाससंज्ञे।
आगन्तुनामययुगेन च दूषितायां
दृष्टौ न शस्त्रपतनं प्रवदन्ति तज्ज्ञाः॥

सम्पश्यतः षडपि ये ऽभिहितास्तु काचा
स्ते पक्ष्मकोपसहितास्तु भवन्ति याप्याः ॥
चत्वार एव पवनप्रभवास्त्वसाध्या
द्वौ पित्तजौ कफनिमित्तज एकएव ।
अष्टाद्धिका रुधिरजाश्च गदास्त्रिदोषा
स्तावन्त एव गदितावपि बाह्यजौ द्वौ ॥

---

॥ नवमोऽध्यायः ॥

अथातो वाताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥
पुराणसर्पिषा स्निग्धौ स्यन्दाधीमन्थपीडितौ ।
स्वेदयित्वा यथान्यायं सिरामोक्षेण योजयेत् ॥
सम्पादयेद्वस्तिभिश्च सम्यक्स्नेहविरेचितौ ।
तर्प्पणैः पुटपाकैश्च धूमैराश्च्योतनैस्तथा ॥
नस्यस्नेहपरीषेकैः शिरोवस्तिभिरेव च ।
वातघ्नानूपजलजमांसाम्लक्काथसेचनैः ॥
स्नेहैश्चतुर्भिरुष्णैश्च तत्पीताम्बरधारणैः ।
पयोभिर्वेसवारैश्च साल्वणैः पायसैस्तथा ॥
भिषक् सम्पादयेदेतानुपनाहैश्च पूजितैः ।
तथाचोपरि भुक्तस्य सर्पिःपानं प्रशस्यते ॥
त्रिफलाक्काथसंसिद्धं केवलं जीर्णमेव वा ।
सिद्धं वातहरैः क्षीरं प्रथमेन गणेन वा ॥

स्नेहास्तैलादिना सिद्धा वातघ्नैस्तर्पणे हिताः ।
स्नैहिकः पुटपाकश्च धूमो नस्यञ्च तद्विधं ॥
नस्यादिषु स्थिराक्षीरमधुरैस्तैलमिष्यते ।
एरण्डपल्लवे मूले त्वचि वाजं पयः शृतं ॥
कण्टकार्य्याश्च मूलेषु सुखोष्णं सेचने हितं ।
सैन्धवोदीच्ययष्ट्याह्वपिप्पलीभिः शृतं पयः ॥
हितमर्द्धोदकं सेके तथाश्च्योतनमेव च ।
ह्रीवेरचक्रमञ्जिष्ठोडुम्बरत्वक्षु साधितं ॥
साम्भश्छागं पयोवापि शूलाश्च्योतनमुत्तमं ।
मधुकं रजनीं पथ्यां देवदारु च पेषयेत् ॥
आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनं ।
गैरिकं सैन्धवं कृष्णां नागरञ्च यथोत्तरं ॥
द्विगुणं पिष्टमद्भिस्तु गुटिकाञ्जनमिष्यते ।
स्नेहाञ्जनं हितं चात्र वक्ष्यते तद्यथाविधि ॥
रोगो यस्मान्यतो वातो यश्च मारुतपर्य्ययः ।
अनेनैव विधानेन भिषक्तावपि साधयेत् ॥
पूर्व्वभक्तं हितं सर्प्पिःक्षीरं वाप्यथ भोजने ।
वृक्षादन्यां कपित्थे च पञ्चमूले महत्यपि ॥
सक्षीरं कर्कटरसे सिद्धं चात्र घृतं पिबेत् ।
सिद्धं वा हितमत्राङ्गःपत्तूरार्त्तगलाग्निकैः ॥
सक्षीरं मेषशृङ्ग्या वा सर्पिर्व्वीरतरेण वा ।

सैन्धवं दारु शुण्ठीं च मातुलुङ्गरसे घृतं ॥
स्तन्योदकाभ्यां कर्त्तव्यं शुष्कपाके तदञ्जनं।
पूजितं सर्प्पिषश्चात्र पानमक्ष्णोश्च तर्प्पणं ॥
घृतेन जीवनीयेन नस्यं तैलेन चाणुना।
परिषेके हितञ्चात्र पयः शीतं ससैन्धवं ॥
रजनीदारुसिद्धं वा सैन्धवेन समायुतं।
सर्प्पिर्युतं स्तन्यघृष्टमञ्जनञ्च महौषधं ॥
वसा वानूपजलजा सैन्धवेन समायुता।
नागरोन्मिश्रिता किञ्चिच्छुष्कपाके तदञ्जनं ॥
पवनप्रभवा रोगा ये केचिद्दृष्टिनाशनाः।
बीजेनानेन मेधावी तेषु कर्म्म प्रयोजयेत् ॥

---

## ॥ दशमोऽध्यायः ॥

अथातः पित्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥
पित्तस्यन्दे पैत्तिके चाधिमन्थे रक्तास्रावः स्रंसनञ्चापि कार्य्यं।
अक्ष्णोः सेकालेपनस्याञ्जनानि पैत्ते च स्याद्यद्विसर्प्पे विधानं ॥
गुन्द्रां शालिं शैवलं शैलभेदं दार्वीमेलामुत्पलं रोध्रमभ्रं।
पद्मात्पत्रं शर्क्करा दर्भमिक्षुं तालं रोध्रं वेतसं पद्मकञ्च ॥
द्राक्षां चौद्रं चन्दनं यष्टिकाह्वं योषित्क्षीरं रात्र्यनन्ते च पिष्ट्वा।
सर्प्पिःसिद्धं तर्प्पणे सेकनस्ये शस्तं क्षीरं सिद्धमेतेषु वाजं ॥
योज्यो वर्गो व्यस्त एषोऽन्यथा वा सम्यङ्नस्येऽष्टाङ्गसङ्ख्योऽपि नित्यं।

क्रियाः सर्व्वाः पित्तहर्त्र्यः प्रशस्तास्त्र्यहाच्चोर्द्ध्वं क्षीरसर्पिश्च नस्यं ॥
पालाशं स्याच्छोणितं चाञ्जनार्थे शल्लक्या वा शर्कराक्षौद्रयुक्तं ।
रसक्रियां शर्कराक्षौद्रयुक्तां पालिन्द्यां वा मधुके वापि कुर्य्यात् ॥
मुक्ता फेनः सागरस्योत्पलञ्च कनिष्ठैलाधात्रिबीजाद्रसश्च ।
तालीशैलागैरिकोशीरशङ्खैरेवं युञ्ज्यादञ्जनं स्तन्यपिष्टैः ॥
चूर्णं कुर्य्यादञ्जनार्थे रसो वा स्तन्योपेतो धातकीस्यन्दनाभ्यां ।
योषित्स्तन्यं शातकुम्भं विघृष्टं क्षौद्रोपेतं कैंशुकस्यापि पुष्पं ॥
रोध्रं द्राक्षां शर्करामुत्पलञ्च नार्य्याः क्षीरे यष्टिकाह्वं वचाञ्च ।
पिष्ट्वा क्षीरे वर्णकस्य त्वचं वा तोयोन्मिश्रे चन्दनोडम्बरे च ॥
कार्य्यः फेनः सागरस्याञ्जनार्थे नारीस्तन्ये माक्षिके चापि घृष्टः ।
योषित्स्तन्ये स्थापितं यष्टिकाह्वं रोध्रं द्राक्षां शर्करामुत्पलञ्च ॥
क्षौमाबद्धं पथ्यमाश्च्योतने वा सर्पिर्घृष्टं यष्टिकाह्वं सरोध्रं ।
तोयोन्मिश्राः काश्मरीधात्रिपथ्यास्तद्वच्चाक्षः कट्फलञ्चाम्बुनैव ॥
एषोऽम्लाख्येऽनुक्रमश्चापि शुक्तौ कार्य्यः सर्व्वः स्यात्सिरामोक्षवर्ज्यः ।
सर्पिःपेयं त्रैफलं तैल्वकं वा पेयं वा स्यात्केवलं यत्पुराणं ॥
दोषेऽधस्ताच्छुक्तिकायामपास्ते शीतैर्द्रव्यैरञ्जनं कार्य्यमाशु ।
वैदूर्य्यं यत् स्फाटिकं वैद्रुमञ्च मौक्तं शाङ्खं राजतं शातकुम्भं ॥
चूर्णं सूक्ष्मं शर्कराक्षौद्रयुक्तं शुक्तिं हन्यादञ्जनं चैतदाशु ।
युञ्ज्यात्सर्पिर्धूमदर्शी नरस्तु शेषं कुर्य्याद्रक्तपित्ते विधानं ॥
यच्चैवान्यत्पित्तहृच्चापि सर्व्वं यद्वीसर्पे पैत्तिके वै विधानं ॥

---

॥ एकादशोऽध्यायः ॥

अथातः श्लेष्माभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥

स्यन्दाधिमन्थौ कफजौ प्रवृद्धौ जयेत्सिराणामथ मोक्षणेन ।
स्वेदावपीडाञ्जनधूमसेकप्रलेपयोगैः कवडग्रहैश्च ॥
रूक्षैस्तथाश्च्योतनसंविधानैस्तथैव रूक्षैः पुटपाकयोगैः ।
त्र्यहात्त्र्यहाच्चाप्यपतर्पणान्ते प्रातस्तयोस्तिक्तघृतं प्रशस्तं ॥
तदन्नपानञ्च समाचरेद्धि यच्छ्लेष्मणो नैव करोति वृद्धिं ।
कुटन्नटास्फोतफणिज्झविल्वपत्तूरपिल्वर्ककपित्थभङ्गैः ॥
स्वेदं विदध्यादथवानुलेपं वर्हिष्ठशुण्ठीसुरकाष्ठकुष्ठैः ।
सिन्धूत्थहिङ्गुत्रिफलामधूकप्रपौण्डरीकाञ्जनतुत्थताम्रैः ॥
पिष्टैर्जलेनाञ्जनवर्त्तयः स्युःपथ्याहरिद्रामधुकाञ्जनैर्वा ।
क्षीणूषणानि त्रिफला हरिद्रा विडङ्गसारश्च समानि च स्युः ॥
वर्हिष्ठकुष्ठामरकाष्ठशङ्खपाठानलव्योषमनःशिलाश्च ।
पिष्ट्वाम्बुना वा कुसुमानि जातीकरञ्जशोभाञ्जनजानि युञ्ज्यात् ॥
फलम्प्रकीर्य्यादथ वापि शिग्रोः पुष्पञ्च तुल्यं बृहतीद्वयस्य ।
रसाञ्जनं चन्दनसैन्धवञ्च मनःशिलाले लशुनञ्च तुल्यं ॥
पिष्ट्वाञ्जनार्थं कफजेषु धीमान्वर्त्तीर्विदध्यान्नयनामयेषु ।
रोगे बलासग्रथितेऽञ्जनञ्चःकर्त्तव्यमेतत्सुविशुद्धकाये ॥
नीलान्यवान्गव्यपयोऽनुपीतान्शलाकिनः शुष्कतनून्विदह्य ।
तथार्ज्जकास्फोतकपित्थविल्वनिर्गुण्डिजातीकुसुमानि चैव ॥
तद्क्षारवत्सैन्धवतुत्थरोचनं पक्वं विदध्यादथ लोहनाड्यां ।

एतद्बलावग्रथितेऽञ्जनं स्यादेषोऽनुकल्पस्तु फणिज्झकादौ ॥
महौषधं मागधिकाश्च मुस्तां ससैन्धवं यन्मरिचञ्च शुक्लं ।
तन्मातुलुङ्गस्वरसेन पिष्टं नेत्राञ्जनं पिष्टकमाशु हन्यात् ॥
फलं बृहत्या मगधोद्भवानामादाय कल्कं फलपाककाले ।
स्रोतोजयुक्तं खलु सप्तरात्रात्तदुद्धृतं स्यात्तु तथैव पथ्यं ॥
वार्ताकुशिग्रिन्द्रसुरापटोलकिराततिक्तामलकीफलेषु ।
कासीससामुद्ररसाञ्जनानि जात्यास्तथा कोरकमेव चापि ॥
प्रक्लिन्नवर्त्मन्युपदिश्यते तु योगाञ्जनं तन्मधुनावघृष्टं ।
नादेयमग्र्यं मरिचञ्च शुक्लं नेपालजाता च समप्रमाणा ॥
समातुलुङ्गद्रव एष योगः कण्डूं निहन्यात्सकृदञ्जनेन ।
सशृङ्गवेरं सुरदारु मुस्तं सिन्धुप्रसूतं मुकुलानि जात्याः ॥
सुरासुपिष्टन्त्विदमञ्जनं हि कण्ड्वाञ्च शोफे च हितं वदन्ति ।
स्यन्दाधिमन्थक्रमसाचरेच्च सर्व्वेषु चैतेषु सदाऽप्रमत्तः ॥

---

## ॥ द्वादशोऽध्यायः ॥

अथातो रक्ताभिष्यन्दप्रतिषेधं व्याख्यास्यामः ॥
मन्थं स्यन्दं सिरोत्पातं सिराहर्षञ्च रक्तजं ।
एकैकेन विधानेन चिकित्सेच्चतुरो गदान् ॥
व्याध्यार्त्तांस्तु तुरोऽप्येतान् स्निग्धान्कौम्भेन सर्प्पिषा ।
रसैरुदारैरथवा सिराभिः वेध योजयेत् ॥
विरिक्तानां प्रकामञ्च शिरांस्येषां विशोधयेत् ।

वैरेचनिकसिद्धेन सितायुक्तेन सर्प्पिषा ॥
ततः प्रदेहाः परिषेचनानि नस्यानि धूमाश्च यथास्वमेव ।
आश्च्योतनाभ्यञ्जनतर्प्पणानि स्निग्धाश्च कार्य्याः पुटपाकयोगाः ॥
नीलोत्पलोशीरकटङ्कटेरी कालीययष्टीमधुमुस्तरोध्रैः ।
सपद्मकैर्धौतघृतप्रदिग्धैरक्ष्णोः प्रलेपं परितः प्रकुर्य्यात् ॥
रुजायां चाप्यतिभृशं स्वेदाश्च मृदवो हिताः ।
अक्ष्णोः समन्ततः कार्य्यं पातनञ्च जलौकसां ॥
घृतस्य महती मात्रा पीता चार्त्तिं नियच्छति ।
पित्ताभिष्यन्दशमनो विधिश्चाप्युपपादितः ॥
कसेरुमधुकाभ्यां वा चूर्णमम्बरसंहृतं ।
न्यस्तमप्स्वान्तरिक्षासु हितमाश्च्योतनम्भवेत् ॥
पाटल्यर्जुनश्रीपर्णीधातकीधात्रिबिल्वतः ।
पुष्पाण्यथ बृहत्योश्च बिम्बी लोटाच्च तुल्यशः ॥
समञ्जिष्ठानि मधुना पिष्टानीक्षुरसेन वा ।
रक्ताभिष्यन्दशान्त्यर्थमेतदञ्जनमिष्यते ॥
चन्दनं कुमुदं पत्रं शिलाजतु सकुङ्कुमं ।
अयस्ताम्ररजस्तुल्यं निम्बनिर्यासमञ्जनं ॥
त्रपु कांस्यमलं चापि पिष्ट्वा पुष्परसेन तु ।
विपुला याः कृता वर्त्त्यः पूजितास्त्वाञ्जने सदा ॥
स्यादञ्जनं घृतं चार्द्रं शिरोत्पातस्य भेषजं ।
तद्वत्सैन्धवकासीसस्तन्यघृष्टञ्च पूजितं ॥

मधुना शङ्खनेपालीतुत्थदार्व्यः ससैन्धवाः।
रसः शिरीषपुष्पाच्च सुरामरिचमाक्षिकैः॥
युक्तन्तु मधुना वापि गैरिकं हितमञ्जनं।
सिराहर्षेऽञ्जनं कुर्य्यात्फाणितं मधुसंयुतं॥
मधुना तार्च्छजं वापि कासीसं वा ससैन्धवं।
वेत्राम्लस्तन्यसंयुक्तं फाणितन्तु ससैन्धवं॥
पैत्तं विधिमशेषेण कुर्य्यादर्ज्जुनशान्तये।
इक्षुक्षौद्रसितास्तन्यदार्व्वीमधुकसैन्धवैः॥
सेकाञ्जनं चात्र हितमम्लैराश्च्योतनं तथा।
सितामधुककट्वङ्गमस्तुक्षौद्राम्लसैन्धवैः॥
बीजपूरककोलाम्लदाडिमाम्लैश्च युक्तितः।
एकशो वा द्विशो वापि योजितं वा त्रिभिस्त्रिभिः॥
स्फटिकं विद्रुमं शङ्खो मधुकं मधुचैव हि।
शङ्खक्षौद्रसितायुक्तः सामुद्रः फेन एव च॥
द्वाविमौ विहितौ योगावञ्जनेऽर्ज्जुननाशनौ।
सैन्धवक्षौद्रकतकाः सक्षौद्रं वा रसाञ्जनं॥
कासीसं मधुना वापि योज्यमत्राञ्जने सदा।
लोहचूर्णानि सर्व्वाणि धातवो लवणानि च॥
रत्नानि दन्ताः शृङ्गाणि गणश्चाप्यवसादनः।
कुक्कुटाण्डकपालानि लशुनं कटुकत्रयं॥
करञ्जबीजमेनाश्च लेख्याञ्जनमिदं स्मृतं।

पुटपाकावसानेन रक्तविस्रावणादिना ॥
सम्पादितस्य विधिना कृत्स्नेन स्यन्दघातिना ।
अनेनापहरेच्छुक्रमव्रणं कुशलो भिषक् ॥
उत्तानमवगाढं वा कर्कशं वापि सव्रणं ।
शिरीषवीजमरिचपिप्पलीसैन्धवैरपि ॥
शुक्रस्य घर्षणं कार्य्यमथवा सैन्धवेन तु ।
कुर्य्यात्ताम्ररजःशङ्खशिलामरिचसैन्धवैः ॥
अन्त्याद्द्विगुणितैरेभिरञ्जनं शुक्रनाशनं ।
कुर्य्यादञ्जनयोगौ वा सम्यक्श्लोकार्द्धकाविमौ ॥
शङ्खकोलास्थिकतकद्राक्षामधुकमाक्षिकैः ।
क्षौद्रदन्तार्णवमलशिरीषकुसुमैरपि ॥
क्षाराञ्जनं वा वितरेद्बलाशग्रथितापहं ।
मुद्गान्वा निस्तुषान्भृष्टान् शङ्खक्षौद्रसितायुतान् ॥
मधूकसारं मधुना योजयेच्चाञ्जने सदा ।
विभीतकास्थिमज्जा वा सक्षौद्रः शुक्रनाशनः ॥
शङ्खशुक्तिमधुद्राक्षामधूककतकानि च ।
द्वित्वग्गते सशूले वा वातघ्नं तर्पणं हितं ॥
वंशजारुष्करौ तालं नारिकेलञ्च दाहयेत् ।
विस्राव्य क्षारवच्चूर्णं भावयेत्करभास्थिजं ॥
बहुशोऽञ्जनमेतत्स्याच्छुक्रवैवर्ण्यनाशनं ।
अजकां पार्श्वतो विद्धां सूच्या विस्राव्य चोदकं ॥

व्रणं गोमांसचूर्णेन पूरयेत्सर्पिषा सह ।
बङ्गशोऽवलिखेच्चापि वर्त्माश्रोपगतं यदि ॥
सशोफश्चाप्यशोफश्च द्वौ पाकौ यौ प्रकीर्त्तितौ ।
स्नेहस्वेदोपपन्नस्य तत्र विद्धा शिरां भिषक् ॥
सेकाश्च्योतननस्यानि पुटपाकांश्च कारयेत् ।
सर्व्वतश्चापि शुद्धस्य कर्त्तव्यमिदमञ्जनं ॥
ताम्रपात्रस्थितं मांसं सर्पिः सैन्धवसंयुतं ।
मैरेयं वापि दध्येवं दध्युत्तरकमेव च ॥
घृतं कांस्यमलोपेतं स्तन्यं वापि ससैन्धवं ।
मधूकसारमधुना तुल्यांशङ्गैरिकेण वा ॥
सर्पिःसैन्धवताम्राणि योषित्स्तन्ययुतानि च ।
दाडिमारेवताश्मन्तकोलाम्लैश्च ससैन्धवं ॥
रसक्रियां वा वितरेत्सम्यक्पाकजिघांसया ।
मांसं सैन्धवसंयुक्तं स्थितं सर्प्पिषि नागरं ॥
आश्च्योतनाञ्जनं योज्यमबलाक्षीरसंयुतं ।
जात्याः पुष्पं सैन्धवं शृङ्गवेरं कृष्णावीजं कीटशत्रोश्च सारं ।
एतत्पिष्टं नेत्रपाकेऽञ्जनार्थं क्षौद्रोपेतं निर्व्विशङ्कं प्रयोज्यं ॥
पूयालसे शोणितमोक्षणञ्च हितं तथैवाप्युपनाहनञ्च ।
कृत्स्नो विधिश्चेक्षणपाकघाती यथाविधानं भिषजा प्रयोज्यः ॥
कासीससिन्धुप्रभवार्द्रकैस्तु हितं भवेदञ्जनमेव चात्र ।
क्षौद्रान्वितैरेभिरथोपयुञ्ज्यादन्यत्तु ताम्रायसचूर्णयुक्तैः ॥

स्नेहादिना सम्यगपास्य दोषांस्तृप्तं विधायाथ यथास्वमेव।
प्रक्लिन्नवर्त्मानमुपक्रमेत सेकाञ्जनाश्च्योतननस्यधूमैः ॥
मुस्ताहरिद्रामधुकं प्रियङ्गुसिद्धार्थरोध्रोत्पलसारिवाभिः।
क्षुण्णाभिराश्च्योतनमेव कार्य्यमत्राञ्जनञ्चाञ्जनमाक्षिकं स्यात् ॥
पत्रं फलञ्चामलकस्य पक्त्वा क्रियां विदध्यादथवाञ्जनार्थे।
वंशस्य मूलेन रसक्रियां वा वर्त्तीकृतां ताम्रकपालपक्वां ॥
रसक्रियां वा त्रिफलाविपक्वां पलाशपुष्पैः खरमञ्जरेर्व्वा।
पिष्ट्वाच्छगल्याः पयसा मलं वा कांसस्य दग्ध्वा सह तान्तवेन ॥
प्रत्यञ्जने तन्मरिचैरुपेतं चूर्णेन ताम्रस्य सहोपयोज्यं।
समुद्रफेनं लवणोत्तमञ्च शङ्खोऽथ मुद्गा मरिचञ्च शुक्लं ॥
चूर्णाञ्जनं योज्यमथापि कण्डूमक्लिन्नवर्त्मान्युपहन्ति शीघ्रं।
प्रक्लिन्नवर्त्मन्यपि चैत एव योगाः प्रयोज्यास्तु समीक्ष्य दोषान्।
सकज्जलं ताम्रघटे च घृष्टं सर्प्पिर्युतं तुल्यकमञ्जनं च ॥

---

॥ त्रयोदशोऽध्यायः ॥

अथातो लेख्यरोगप्रतिषेधं व्याख्यास्यामः ॥

नव येऽभिहिता लेख्याः सामान्यस्तेष्वयं विधिः।
स्निग्धवान्तविरिक्तस्य निवातातपसद्मनि ॥
सुखोदकप्रतप्तेन वाससा सुसमाहितः।
स्वेदयेद्वर्त्म निर्भुज्य वामाङ्गुष्ठाङ्गुलिस्थितं ॥

अङ्गुल्यङ्गुष्ठकाभ्यान्तु निर्भुग्नं वर्त्म यत्नतः।
प्लोतान्तरीकृतं नैव चलति स्रंसतेऽपि वा ॥
ततः प्रमृज्य प्लोतेन वर्त्म शस्त्रपदाङ्कितं।
लिखेच्छस्त्रेण पत्रैर्वा ततो रक्ते स्थिते पुनः ॥
स्विन्नं मनोह्वाकासीसव्योषाञ्जनकसैन्धवैः।
श्लक्ष्णपिष्टैः समाक्षीकैः प्रतिसार्य्योष्णवारिणा ॥
प्रक्षाल्य हविषा सिक्तं व्रणवत्समुपाचरेत्।
स्वेदावपीडप्रभृतींस्त्र्यहादूर्द्ध्वं प्रयोजयेत् ॥
व्यासतस्ते समुद्दिष्टं विधानं लेख्यकर्म्मणि।
असृगास्रावरहितं कण्डूशोफविवर्ज्जितं ॥
समं नखनिभं वर्त्म लिखितं सम्यगिष्यते।
रक्तमक्षि स्रवेत्स्कन्नं क्षताच्छस्त्रकृताद्ध्रुवं ॥
रागशोफपरिस्रावास्तिमिरं व्याध्यनिर्ज्जयः।
वर्त्म श्यावङ्गुरु स्तब्धं कण्डूहर्षोपदेहवत् ॥
नेत्रपाकमुदीर्णं वा कुर्व्वीताप्रतिकारिणः।
एतद्दुर्लिखितं ज्ञेयं स्नेहयित्वा पुनर्लिखेत् ॥
व्यावर्त्तते यदा वर्त्म पक्ष्म चापि विमुञ्चति।
स्यात्सरुक् स्रावभूयिष्ठं तदतिस्रावितं विदुः ॥
स्नेहस्वेदादिरिष्टः स्यात्क्रमस्तत्रानिलापहः।
वर्त्मावबन्धं क्लिष्टञ्च बहलं यच्च कीर्त्तितं ॥
पोथकी चाप्यवलिखेत्प्रच्छयित्वाग्रतः शनैः।

समं लिखेत्तु मेधावी श्यावकर्द्दमवर्त्मनी ॥
कुम्भीकिनीं शर्कराञ्च तथैवोत्सङ्गिनीमपि ।
कर्त्तयित्वा तु शस्त्रेण लिखेत्पश्चादतन्द्रितः ॥
भवेयुर्व्वर्त्मसु च याः पिडकाः कठिना भृशं ।
ह्रस्वास्तास्तास्तु ताः पक्वा भिन्द्याद्भिन्ना लिखेदपि ॥
तरुणीश्चाल्पसंरम्भाः पिडका वाह्यवर्त्मजाः ।
विदित्वैताः प्रशमयेत्स्वेदालेपनशोधनैः ॥

---

॥ चतुर्दशोऽध्यायः ॥

अथातो भेद्यरोगप्रतिषेधं व्याख्यास्यामः ॥
स्वेदयित्वा विसग्रन्थिं छिद्राण्यस्य निराश्रयं ।
पक्वं भित्त्वा तु शस्त्रेण सैन्धवेनावचूर्णयेत् ॥
कासीसमागधीपुष्पैर्नेपाल्यैलायुतेन तु ।
ततः क्षौद्रघृतं दत्वा सम्यग्बन्धमुपाचरेत् ॥
रोचनाक्षारतुत्थानि पिप्पल्यः क्षौद्रमेव च ।
प्रतिसारणमेकैकं भिन्ने लगण इष्यते ॥
महत्यपि च युञ्जीत क्षाराग्निविधिकोविदः ।
स्विन्नां भिन्नां विनिष्पीड्य भिषगञ्जननामिकां ॥
शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत् ।
रसाञ्जनमधुभ्यां वा भिन्नां वा शस्त्रकर्म्मवित् ॥
प्रतिसार्य्याञ्जनैर्युञ्ज्यादुष्णैर्दीपशिखोद्भवैः ।

सम्यक्स्विन्ने कृमिग्रन्थौ भिन्ने स्यात्प्रतिसारणं ॥
त्रिफलातुत्थकासीससैन्धवैस्तु रसक्रियां ।
भित्त्वोपनाहं कफजं पिप्पलीमधुसैन्धवैः ॥
लेखयेन्मण्डलाग्रेण समन्तात्प्रच्छयेदपि ।
संस्विद्य पत्रभङ्गैश्च स्वेदयित्वा यथासुखं ॥
आपाकाद्विधिनोक्तेन पक्वं भेद्यानुपारेत् ।
सर्व्वेष्वेतेषु विहितं विधानं स्नेहपूर्ब्बकं ।
सम्यक्के प्रयतो भूत्वा कुर्व्वीत व्रणरोपणं ॥

---

॥ पञ्चदशोऽध्यायः ॥

अथातश्छेद्यरोगप्रतिषेधं व्याख्यास्यामः ॥
स्निग्धं भुक्तवतो ह्यन्नमुपविष्टस्य यत्नतः ।
संरोषयेत्तु नयनं भिषक्चूर्णैस्तु लावणैः ॥
ततः संरोषितं त्वर्णं सुस्विन्नं परिघट्टितं ।
अर्म्म यत्र वलीजातं तत्रैतल्लगयेद्भिषक् ॥
अपाङ्गं प्रेक्षमाणस्य वडिशेन समाहितः ।
मुचुण्ड्याग्टह्य मेधावी सूचीसूत्रेण वा पुनः ॥
नचोत्थापयता क्षिप्रं कार्य्यमभ्युन्नतं तु तत् ।
शस्त्रपातभयाच्चास्य वर्त्मनी ग्राहयेद्दृढं ॥
ततः प्रशिथिलीभूतं त्रिभिरेव विलम्बितं ।
उल्लिखन्मण्डलाग्रेण तीक्ष्णेन परिशोधयेत् ॥

विमुक्तं सर्व्वतश्चापि कृष्णाच्छुक्लाच्च मण्डलात् ॥
नीला कनीनकोपान्तं छिन्द्यान्नातिकनीनकं ।
चतुर्भागस्थिते मांसे नाक्षिव्यापत्तिमर्हति ॥
कनीनकवधादस्रं नाडी चाप्युपजायते ।
हीनच्छेदात्पुनर्वृद्धिं शीघ्रमेवाधिगच्छति ॥
अर्म्म यज्जालवच्चापि तदप्युन्मार्ज्य लम्बितं ।
छिन्द्याद्वक्रेण शस्त्रेण वर्त्मशुक्लान्तमाश्रितं ॥
प्रतिसारणमक्ष्णोस्तु ततः कार्य्यमनन्तरं ।
यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ॥
स्वेदयित्वा ततः पश्चाद्बध्नीयात्कुशलो भिषक् ।
देशर्त्तुबलकालज्ञः स्नेहं दत्वा यथाहितं ॥
व्रणवत् संविधानन्तु तस्य कुर्य्यादतःपरं ।
त्र्यहान्मुक्त्वा करस्वेदं दत्वा शोधनमाचरेत् ॥
करञ्जवीजामलकमधुकैः साधितं पयः ।
हितमाश्च्योतनं शूले द्विरक्तः क्षौद्रसंयुतं ॥
मधुकोत्पलकिञ्जल्कदूर्व्वाकल्कैश्च मूर्द्धनि ।
प्रलेपः सघृतः शीतः क्षीरपिष्टः प्रशस्यते ॥
लेख्याञ्जनैरपहरेदर्म्मशेषं भवेद्यदि ।
अर्म्म चाल्पन्दधिनिभन्नीलं रक्तमथापि वा ॥
धूसरन्तनु यच्चापि शुक्रवत्तदुपाचरेत् ।
चर्म्माभम्बहलं यत्तु स्नायुमांसघनावृतं ॥

छेद्यमेव तदर्म्म स्यात्कृष्णमण्डलगञ्च यत् ।
विशुद्धवर्णमक्लिष्टं क्रियास्वक्षिगतक्लमं ॥
छिन्नेऽर्म्मणि भवेत्सम्यग्यथास्वमनुपद्रवं ।
सिराजाले सिरा यास्तु कठिनास्ताश्च बुद्धिमान् ॥
उल्लिखेन्मण्डलाग्रेण बडिशेनावलम्बिताः ।
सिरासु पिडका जाता या न सिध्यन्ति भेषजैः ॥
अर्म्मवन्मण्डलाग्रेण तासाञ्छेदनमिष्यते ।
रोगयोश्चैतयोः कार्य्यमर्म्मोक्तं प्रतिसारणं ॥
विधिश्चापि यथादोषं लेखनद्रव्यसम्भृतः ।
सन्धौ संस्वेद्य शस्त्रेण पर्व्वणीकां विचक्षणः ॥
उत्तरे च त्रिभागे च बडिशेनावलम्बितां ।
छिन्द्यात्ततोऽर्द्धमग्रे स्यादश्रुनाडी ह्यतोऽन्यथा ॥
प्रतिसारणमत्रापि सैन्धवक्षौद्रमिष्यते ।
लेखनीयानि चूर्णानि व्याधिशेषस्य भेषजं ॥
शङ्खं समुद्रफेनञ्च मण्डूकीञ्च समुद्रजां ।
स्फटिकं कुरुविन्दञ्च प्रवालाश्मन्तकन्तथा ॥
वैदूर्य्यंपलकं मुक्तामयस्ताम्ररजांसि च ।
समभागानि सम्पिष्य सार्द्धं स्रोतोञ्जनेन तु ॥
चूर्णाञ्जनं कारयित्वा भाजने मेषशृङ्गजे ।
संस्थाप्योभयतः कालमञ्जयेत्सततं बुधः ॥
अर्म्माणि पिडकां हन्यात्सिराजालानि तेन वै ।

अर्शस्तथा यच्च नाम्ना शुष्कार्शोऽर्बुदमेव च ॥
अभ्यन्तरं वर्त्मशया विधानं तेषु वक्ष्यते ।
वर्त्मोपस्वेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः ॥
मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याद्भिषग्वरः ।
ततः सैन्धवकासीसकृष्णाभिः प्रतिसारयेत् ॥
स्थिते च रुधिरे वर्त्म दहेत्सम्यक्शलाकया ।
क्षारेणावलिखेच्चापि व्याधिशेषो भवेद्यदि ॥
तीक्ष्णैरुभयतो भागैस्ततो दोषमधिक्षिपेत् ।
वितरेच्च यथादोषमभिष्यन्दक्रियाविधिं ॥
शस्त्रकर्म्मण्युपरते मासञ्च स्यात्सुयन्त्रितः ॥

---

## ॥ षोडशोऽध्यायः ॥

अथातः पक्ष्मकोपप्रतिषेधं व्याख्यास्यामः ॥

याप्यस्तु यो वर्त्मभवो विकारः पक्ष्मप्रकोपोऽभिहितः पुरस्तात् ।
तत्रोपविष्टस्य नरस्य चर्म्म वर्त्मोपरिष्टादनुतिर्य्यगेव ॥
भ्रुवोरधस्तात्परिमुच्य भागौ पक्ष्माश्रितं चैकमतोऽवकृन्तेत् ।
कनीनकापाङ्गसमं समन्ताद्यवाकृति स्निग्धतनोर्नरस्य ॥
उत्कृत्य शस्त्रेण यवप्रमाणं बालेन सीव्येद्भिषगप्रमत्तः ।
दत्त्वा च सर्प्पिर्मधुनावशेषं कुर्य्याद्विधानं विदितं व्रणे यत् ॥
ललाटदेशे च निबद्धपट्टं प्राक्स्यूतमत्राप्यपरञ्च बद्ध्वा ।
स्थैर्य्यं गते चाप्यथ शस्त्रमार्गे बालान्विमुञ्चेत् कुशलोऽभिवीक्ष्य ॥

एवं नचेच्छाम्यति तस्य वर्त्म निर्भुज्य दोषोपहतां बलिञ्च ।
ततोऽग्निना वा प्रतिसारयेत्तां क्षारेण वा सम्यगवेक्ष्य धीरः ॥
छित्त्वा समं वाप्युपपक्ष्ममालां सम्यग्गृहीत्वा वडिशैस्त्रिभिश्च ।
पथ्याफलेन प्रतिसारयेत्तु पिष्टेन वा तौवरकेण सम्यक् ॥
चत्वार एते विधयो विहन्तुं पक्ष्मोपरोधं पृथगेव शस्ताः ।
विरेचनाश्च्योतनस्यधूमलेपाञ्जनस्नेहरसक्रियाश्च ॥

---

## ॥ सप्तदशोऽध्यायः ॥

अथातो दृष्टिगतरोगप्रतिषेधं व्याख्यास्यामः ॥
त्रयः साध्यास्त्रयोऽसाध्या याप्याः षट् च भवन्ति हि ।
तत्रैकस्य प्रतीकारः कीर्त्तितो धूमदर्शिनः ॥
दृष्टौ पित्तविदग्धायां विदग्धायां कफेन च ।
पित्तश्लेष्महरं कुर्य्याद्विधिं शस्त्रक्षताद्दृते ॥
नस्यसेकाञ्जनालेपपुटपाकैः सतर्पणैः ।
आद्ये तु त्रैफलं पेयं सर्प्पिस्त्रैवृतमुत्तरे ॥
तैल्वकं चोभयोः पथ्यं केवलं जीर्णमेव वा ।
गैरिकं सैन्धवं कृष्णां गोदन्तस्य मसीन्तथा ॥
गोमांसं मरिचं वीजं शिरीषस्य मनःशिला ।
वृन्तं कपित्थान्मधुना स्वयङ्गुप्ताफलानि च ॥
चत्वार एते योगाः स्युरुभयोरञ्जने हिताः ।
कुञ्जकाशोकशालाम्रप्रियङ्गुनलिनोत्पलैः ॥

पुष्पैर्हरेणुकृष्णाकापथ्यामलकसंयुतैः ।
सर्प्पिर्मधुयुतैश्चूर्णैर्वेणुनाड्यामवस्थितैः ॥
अञ्जयेद्द्वावपि भिषक् पित्तश्लेष्मविभावितौ ।
आम्रजम्बूद्भवं पुष्पं तद्रसेन हरेणुकां ॥
पिष्ट्वा क्षौद्राज्यसंयुक्तां प्रयोज्यमथवाञ्जनं ।
नलिनोत्पलकिञ्जल्कगैरिकैर्गोशकृद्रसैः ॥
गुडिकाञ्जनमेतद्वा दिनरात्र्यन्धयोर्हितं ।
रसाञ्जनरसक्षौद्रतालीशस्वर्णगैरिकं ॥
गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये ।
शीतं सौवीरकं वापि पिष्ट्वाथ रसभावितं ॥
कूर्म्मपित्तेन मतिमान्भावयेद्रोहितेन वा ।
चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये ॥
काश्मरीपुष्पमधुकदार्व्वीरोध्ररसाञ्जनैः ।
सक्षौद्रमञ्जनन्तद्वद्धितं नेत्रामये सदा ॥
स्रोतोजं सैन्धवं कृष्णां रेणुकाञ्चापि पेषयेत् ।
अजमूत्रेण ता वर्त्यःचण्दान्ध्याञ्जने हिताः ॥
कालानुसारिवां कृष्णां नागरं मधुकं तथा ।
तालीशपत्रं चण्दे गाङ्गेयञ्च शकृद्रसे ॥
कृतास्ता वर्त्तयः पिष्टाश्छायाशुष्काः सुखावहाः ।
मनःशिलाभयाव्योषबलाकालानुसारिवाः ॥
सफेना वर्त्तयः पिष्टाश्छागक्षीरसमन्विताः ।

गोमूत्रपित्तमदिराशकृद्धात्रीरसे पचेत् ॥
क्षुद्राञ्जनं रसे चान्ययकृतस्त्रैफलेऽपि वा ।
गोमूत्राज्यार्णवमलपिप्पलीक्षौद्रकट्फलं ॥
सैन्धवोपहितं युञ्ज्यान्निहितं वेणुगह्वरे ।
मेदोयकृद्घृतञ्चाजं पिप्पल्यः सैन्धवं मधु ॥
रसमामलकञ्चापि पक्वं सम्यङ्निधापयेत् ।
कोशे खदिरनिर्म्माणे तद्वत्क्षुद्राञ्जनं हितं ॥
हरेणुमगधाजास्थिमज्जैलायकृदन्वितं ।
शकृद्रसेनाञ्जनं वा श्लेष्मोपहतदृष्टये ॥

विपाच्य गोधायकृदर्द्धपाटितं सुपूरितं मागधिकाभिरग्निना।
निषेवितं तत्सकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु ॥
तथा यकृच्छागभवं हुताशने विपाच्य सम्यग्मगधासमन्वितं ।
प्रयोजितं पूर्व्ववदाश्वसंशयं जयेत्क्षपान्ध्यं सकृदञ्जनान्नृणां ॥
प्लीहा यकृच्चाप्युपभक्षिते उभे प्रकल्प्य शूल्ये घृततैलसंयुते ।
ते सार्षपस्नेहसमायुतेऽञ्जनं नक्तान्ध्यमाश्वेव हतः प्रयोजिते ॥
नदीजशिम्बीकटुकान्यथाञ्जनमनःशिला द्वे च निशे यकृद्रसे ।
सचन्दनेयं गुटिकाथवाञ्जनं प्रशस्यते वै दिवसेष्वपश्यतां ॥
भवन्ति याप्याः खलु ये षडामया हरेदसृक्तेषु सिराविमोक्षणैः ।
विरेचयेच्चापि पुराणसर्पिषा विरेचनाङ्गोपहितेन सर्व्वदा ॥
पयो विमिश्रम्प्लवनोद्भवे हितं वदन्ति पक्वाङ्गुलतैलमेव तु ।
भवेद्घृतं त्रैफलमेव शोधनं विशेषतः शोणितपित्तरोगयोः ॥

त्रिवृद्विरेकः कफजे प्रशस्यते त्रिदोषजे तैलमुशन्ति तत्कृतं ।
पुराणसर्पिस्तिमिरेषु सर्व्वतो हितं भवेदायसभाजनस्थितं ॥
हितं च विद्यात्त्रिफलाघृतं सदा कृतञ्च यन्मेषविषाणनामभिः ।
सदावलिह्यात्त्रिफलां सुचूर्णितां घृतप्रगाढां तिमिरेऽथ पित्तजे ॥
समीरजे तैलयुतां कफात्मके मधुप्रगाढां विदधीत युक्तितः ।
गवां शकृत्क्वाथविपक्कमुत्तमं हितन्तु तैलं तिमिरेषु लावनं ॥
हितं घृतं केवलमेव पैत्तिके ह्यजाविकं यन्मधुरैर्व्विपाचितं ।
तैलं स्थिरादौ मधुरे च यद्गणे तथाणुतैलं पवनासृगुत्थयोः ॥
सहाश्वगन्धातिबलावरीशृतं हितञ्च नस्ये त्रिवृतं यदीरितं ।
जलोद्भवानूपजमांससंस्कृताद्धृतं विधेयं पयसो यदुत्थितं ॥
ससैन्धवः क्रव्यभुजेणमांसयोर्हितः ससर्प्पिः समधुः पुटाह्वयः ।
वसाथ गृध्रोरगताम्रचूडजा सदा प्रशस्ता मधुकान्विताञ्जने ॥
प्रत्यञ्जनं स्रोतसि यत्समुत्थितं क्रमाद्रसक्षीरघृतेषु भावितं ।
स्थितं दशाहत्रयमेतदञ्जनं कृष्णोरगास्ये कुशसंप्रवेष्टिते ॥
तन्मालतीक्षारकसैन्धवायुतं सदाञ्जनं स्यात्तिमिरेऽथ रागिणि ।
सुभावितं वा पयसा दिनत्रयं काचापहं शास्त्रविदः प्रचक्षते ॥
हविर्हितं क्षीरभवन्तु पैत्तिके वदन्ति नस्ये मधुरौषधैः कृतं ।
तत्तर्पणे चैव हितं प्रयोजितं सजाङ्गलस्तेषु च यः पुटाह्वयः ॥
रसाञ्जनक्षौद्रसितामनःशिलाक्षुद्राञ्जनं तन्मधुकेन संयुतं ।
समाञ्जनं वा कनकाकरोद्भवं सुचूर्णितं श्रेष्ठमुशन्ति तद्विदः ॥
भिल्लोटगन्धोदकसेकसेवितं प्रत्यञ्जनञ्चात्र हितं तु तुत्थकं ।

समेषशृङ्गाञ्जनभागसम्मितं जलोद्भवं काचमलं व्यपोहति ॥
पलाशरोहीतमधूकजा रसाः क्षौद्रेण युक्ता मदिराग्रमिश्रिताः ।
उशीरलोध्रत्रिफलाप्रियङ्गुभिः पचेत्तु नस्यङ्कफरोगशान्तये ॥
विडङ्गपाठाकिणिहीङ्गुदीत्वचः प्रयोजयेद्धूममुशीरसंयुतं ।
वनस्पतिक्काथविपाचितं घृतं हितं हरिद्रानलदेऽवतर्पणे ॥
समागधो माक्षिकसैन्धवाढ्यः सजाङ्गलः स्यात्पुटपाकएव च ।
मनःशिलाव्यूषणशङ्खमाक्षिकैः ससिन्धुकासीसरसाञ्जनैः क्रियाः ॥
हितेच कासीसरसाञ्जने तथा वदन्ति पथ्ये गुडनागरैर्युते ।
यदञ्जनं वा बहुशो निषेचितं समूत्रवर्गे त्रिफलोदके शृते ॥
निशाचरास्थिस्थितमेतदञ्जनं क्षिपेच्च मासं सलिले स्थिरे पुनः ।
मेषस्य पुष्पैर्मधुकेन संयुतं तदञ्जनं सर्व्वकृते प्रयोजयेत् ॥
क्रियाश्च सर्व्वाः क्षतजोद्भवे हितः क्रमः परिस्रायिणि चापि पित्तहृत् ।
क्रमो हितः स्यन्दहरः प्रयोजितः समीक्ष्य दोषेषु यथास्वमेव च ॥
दोषोदयेनैव च विंशतिष्कृते द्रव्याणि नस्यादिषु योजयेद्बुधः ।
पुनश्च कल्पेऽञ्जनविस्तरः शुभः प्रवक्ष्यतेऽन्यस्तमपीह योजयेत् ॥
घृतं पुराणं त्रिफलां शतावरीं पटोलमुद्गामलकं यवानपि ।
निषेवमाणस्य नरस्य यत्नतो भयं सुघोरात्तिमिरान्न विद्यते ॥
शतावरीपायसएवकेवलस्तथाकृतो वामलकेषु पायसः ।
प्रभूतसर्प्पिस्त्रिफलोदकोत्तरो यवौदनो वा तिमिरं व्यपोहति ॥
जीवन्तिशाकं सुनिषण्णकञ्च सतण्डुलीयं वरवास्तुकञ्च ।
चिल्ली तथा मूलकपोतिका च दृष्टेर्हितं शाकुनजाङ्गलञ्च ॥

पटोलकर्कोटककारवेल्लवार्त्ताकुतर्कारिकरीरजानि ।
शाकानि शिग्र्वार्त्तगलानि चैव हितानि दृष्टेर्घृतसाधितानि ॥

विवर्ज्जयेत्सिरामोक्षं तिमिरे रागमागते ।
यन्त्रेणोत्पीडितो दोषो निहन्यादाशु दर्शनं ॥
अरागि तिमिरं साध्यमाद्यं पटलमाश्रितं ।
कृच्छ्रं द्वितीये रागि स्यात्तृतीये याप्यमुच्यते ॥
रागप्राप्तेष्वपि हितास्तिमिरेषु तथा क्रियाः ।
यापनार्थं यथोद्दिष्टाः सेव्याश्चापि जलौकसः ॥
श्लैष्मिके लिङ्गनाशे तु कर्म्म वक्ष्यामि सिद्धये ।
नचेदर्द्धेन्दुघर्म्माम्बुविन्दुमुक्ताकृतिः स्थिरः ॥
विषमो वा तनुर्म्मध्ये राजिमान्वा बहुप्रभः ।
दृष्टिस्थो लक्ष्यते दोषः सरुजो वा सुलोहितः ॥
स्निग्धस्विन्नस्य तस्याथ कालेनात्युष्णशीतले ।
यन्त्रितस्योपविष्टस्य स्वान्नासाम्पश्यतः समं ॥
मतिमान् शुक्लभागौ द्वौ कृष्णान्मुक्त्वाऽपाङ्गतः ।
उन्मील्य नयने सम्यक् सिराजालविवर्ज्जिते ॥
नाधो नोर्द्ध्वंच पार्श्वाभ्यां छिद्रे दैवकृते ततः ।
शलाकया प्रयत्नेन विश्वस्तं यववक्त्रया ॥
मध्यप्रदेशिन्यङ्गुष्ठस्थिरहस्तगृहीतया ।
दक्षिणेन भिषक्सव्यं विध्येत्सव्येन चेतरत् ॥
वारिविन्द्वागमः सम्यग्भवेच्छब्दस्तथा व्यधे ।

संसिच्य विद्धमात्रन्तु योषितस्तन्येन कोविदः ॥
स्थिरे दोषे चले वापि स्वेदयेदक्षि वाह्यतः ।
सम्यक् शलाकां संस्थाप्य भङ्गैरनिलनाशनैः ॥
शलाकाग्रेण तु ततो निर्लिखेद्दृष्टिमण्डलं ।
विध्यतो योऽन्यपार्श्वेऽक्ष्णस्तं रुद्धा नासिकापुटं ॥
उच्छिङ्घनेन हर्त्तव्यो दृष्टिमण्डलजः कफः ।
निरभ्रइव घर्म्मांशुर्यदा दृष्टिः प्रकाशते ॥
तदासौ लिखिता सम्यग्ज्ञेया याचापि निर्व्यथा ।
ततो दृष्टेषु रूपेषु शलाकामाहरेच्छनैः ॥
घृतेनाभ्यज्य नयनं वस्त्रपट्टेन वेष्टयेत् ।
ततो गृहे निराबाधे शयीतोत्तानएव च ॥
उद्गारकासक्षवथुष्ठीवनोज्जृम्भणानि च ।
तत्कालं नाचरेदूर्द्ध्वं विधिस्त्र स्नेहपीतवत् ॥
त्र्यहात्त्यहाच्च धावेत कषायैरनिलापहैः ।
वायोर्भयात्त्यहादूर्द्ध्वं स्वेदयेदक्षि पूर्व्ववत् ॥
दशाहमेवं संयम्य हितं दृष्टिप्रसादनं ।
पश्चात्कर्म्म च सेवेत लघ्वन्नञ्चापि मात्रया ॥
सिराव्यधविधौ पूर्व्वं नरा येच विवर्ज्जिताः ।
न तेषां नीलिकां विध्येदन्यत्राभिहिताद्भिषक् ॥
पूर्य्यते शोणितेनाक्षि सिरावेधाद्विसर्पता ।
तत्र स्त्रीस्तन्ययष्ठ्याह्वपक्वं सेके हितं घृतं ॥

अपाङ्गासन्नविद्धे तु शोफशूलाश्रुरक्तताः ।
तत्रोपनाहं भ्रूमध्ये कुर्य्याच्चोष्णाज्यसेचनं ॥
व्यधेनासन्नकृष्णेन भागः कृष्णस्य पीड्यते ।
तत्राधः शोधनं सेकः सर्प्पिषा रक्तमोक्षणं ॥
अथाप्युपरि विद्धे तु कष्टा रुक्संप्रवर्त्तते ।
तत्र कोष्णेन हविषा परिषेकः प्रशस्यते ॥
शूलाश्रुरागास्त्वत्यर्थमधोविद्धे भवन्ति हि ।
विदधीत भिषग्धीमान् तत्र पूर्व्वचिकित्सितं ॥
रागाश्रुवेदनास्तम्भहर्षाश्चातिविघट्टिते ।
स्नेहस्वेदौ हितौ तत्र हितं वाप्यनुवासनं ॥
दोषस्तथोपकृष्टोऽपि तरुणः पुनरूर्द्धगः ।
कुर्य्याच्छुक्रारुणं तत्तु तीव्ररुग्नष्टदर्शनं ॥
मधुरैस्तत्रसिद्धेन घृतेनाक्ष्णः प्रसेचनं ।
शिरोवस्तिश्च तेनैव दद्यान्मांसैश्च भोजनं ॥
दोषस्तु सञ्जातबलो घनः सम्पूर्णमण्डलः ।
प्राप्य नश्येच्छलाकाग्रं तच्चाभ्रमिव मारुतं ॥
मूर्द्धाभिघातव्यायामव्यवायवमिमूर्च्छनैः ।
दोषः प्रत्येति कोपाच्च विद्धोऽतितरुणश्च यः ॥
शलाका कर्क्कशा शूलं खरा दोषपरिस्रुतिं ।
व्रणं विशालं स्थूलाग्रा तीक्ष्णा हिंस्यादनेकधा ॥
जलास्रावन्तु विषमा क्रियासङ्गमयास्थिरा ।

करोति वर्ज्जिता दोषैस्तस्मादेभिर्हिता भवेत् ॥
अष्टाङ्गुलायता मध्ये सूत्रेण परिवेष्टिता ।
अङ्गुष्ठपर्व्वसमिता वक्त्रयोर्म्मुकुलाकृतिः ॥
ताम्रायसी शातकौम्भी शलाका स्यादनिन्दिता ।
रागः शोफोऽर्व्वुदश्चोषोबुद्बुदं शूकराचिता ॥
अधिमन्थादयश्चान्ये रोगाः स्युर्व्यधयोषजाः ।
अहिताचारतोवापि यथास्वं तानुपाचरेत् ॥
रुजायामक्षिरागे वा योगान्भूयो निबोध मे ।
गैरिकं सारिवा दूर्व्वा यवपिष्टं घृतं पयः ॥
मुखालेपः प्रयोज्योऽयं वेदनारागशान्तये ।
मृदुभ्रष्टैस्तिलैर्व्वापि सिद्धार्थकसमायुतैः ॥
मातुलुङ्गरसोपेतैः सुखालेपस्तदर्थकृत् ।
पयस्यासारिवापत्रमञ्जिष्ठामधुकैरपि ॥
अजाक्षीराम्वितैर्लेपः सुखोष्णः पथ्य उच्यते ।
दारुपद्मकशुण्ठीभिरेवमेव कृतोऽपि वा ॥
द्राक्षामधुककुष्ठैर्व्वा तद्वत्सैन्धवसंयुतैः ।
ससैन्धवैः शृतं क्षीरं रुजारागनिवर्हणं ॥
शतावरी पृथक्पर्णीमुस्तामलकपद्मकैः ।
साजक्षीरैः शृतं सर्प्पिर्द्दाहशूलनिवर्हणं ॥
वातघ्नसिद्धे पयसि सिद्धं सर्प्पिश्चतुर्गुणे ।
काकोल्यादिप्रतीवापं तद्युञ्ज्यात्सर्व्वकर्म्मसु ॥

शाम्यत्येवं नचेच्छूलं स्निग्धस्विन्नस्य मोक्षयेत्।
ततः सिरां दहेद्वापि मतिमान् कीर्त्तितं तथा॥
दृष्टेरतः प्रसादार्थमञ्जने शृणु मे शुभे।
मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि॥
सुमनायाश्च पुष्पाणि मुक्ता वैदूर्य्यमेव च।
अजाक्षीरेण सम्पिष्य ताम्रे सप्ताहमावपेत्॥
प्रविधाय च तद्वर्त्तीर्योजयेच्चाञ्जने भिषक्।
स्रोतोजं विद्रुमं फेनं सागरस्य मनःशिलां॥
मरिचानि च तद्वर्त्तीः कारयेच्चापि पूर्व्ववत्।
दृष्टिस्थैर्य्यार्थमेतत्तु विदध्यादञ्जने हितं॥
भूयो वक्ष्यामि मुख्यानि विस्तरेणाञ्जनानि च।
कल्पे नानाप्रकाराणि तान्यपीह प्रयोजयेत्॥

---

॥ अष्टादशोऽध्यायः ॥

अथातः क्रियाकल्पं व्याख्यास्यामः॥
सर्व्वशास्त्रार्थतत्वज्ञस्तपोदृष्टिरुदारधीः।
वैश्वामित्रं प्रशासाय शिष्यं कासिपतिर्म्मुनिः॥
तर्पणं पुटपाकश्च सेकश्चाश्च्योतनाञ्जने।
तत्र तत्रोपदिष्टानि तेषां व्यासं निबोध मे॥
संशुद्धदेहशिरसो जीर्णान्नस्य शुभे दिने।
पूर्व्वाह्ने चापराह्ने वा कार्य्यमक्ष्णोस्तु तर्प्पणं॥

वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोशयोः ।
पूरयेद्घृतमण्डस्य विलीनस्य सुखोदकैः ॥
आपक्ष्माग्रात्ततः स्थाप्यं पञ्च तद्वाक्शतानि च ।
स्वस्थे कफे षड्वित्तेऽष्टौ दश वाते तदुत्तमं ॥
रोगस्थानविशेषेण केचित्कालं प्रचक्षते ।
यथाक्रमोपदिष्टेषु त्रीण्येकं पञ्च सप्त च ॥
दश दृष्ट्यामथाष्टौ च वाक्शतानि विभावयेत् ।
ततश्चापाङ्गतः स्नेहं स्रावयित्वाक्षि शोधयेत् ॥
खिन्नेन यवपिष्टेन स्नेहवीर्य्येरितस्ततः ।
यथास्वं धूमपानेन कफमस्य विशोधयेत् ॥
एकाहं वा त्र्यहं वापि पञ्चाहं चेष्यते परं ।
तर्पणे तृप्तिलिङ्गानि नेत्रस्येमानि लक्षयेत् ॥
सुखस्वप्नावबोधत्वं वैशद्यं वर्णपाटवं ।
निर्वृतिर्व्याधिविध्वंसः क्रियालाघवमेव च ॥
गुर्व्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत् ।
ज्ञेयं दोषसमुत्क्लिष्टं नेत्रमत्यर्थतर्पितं ॥
रूक्षमाविलमस्राव्यमसहं रूपदर्शने ।
व्याधिवृद्धिश्च तज्ज्ञेयं हीनतर्प्पितमक्षि च ॥
अनयोर्दोषबाहुल्यात्प्रयतेत चिकित्सिते ।

धूमनस्याञ्जनैः सेकैः रूक्षैः स्निग्धैश्च योगवित् ॥
ताम्यत्यतिविशुष्कञ्च यद्रुचं चातिदारुणं ।
शीर्णपक्ष्माविलं जिह्मं रोगक्लिष्टञ्च यद्भृशं ॥
तदक्षि तर्प्पणादेव लभेतोर्ज्जामसंशयं ।
दुर्द्दिनात्युष्णशीतेषु चिन्तायां सम्भ्रमेषु च ॥
अशान्तोपद्रवे चाक्षिण तर्पणं न प्रशस्यते ।
पुटपाकस्तथैतेषु नस्यं येषु च गर्ह्हितं ॥
तर्प्पणार्हा न ये प्रोक्ताः स्नेहपानाक्षमाश्च ये ।
ततः प्रशान्तदोषेषु पुटपाकक्षमेषु च ॥
पुटपाकः प्रयोक्तव्यो नेत्रेषु भिषजा भवेत् ।
स्नेहनो लेखनीयश्च रोपणीयश्च स त्रिधा ॥
हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि च लेखनः ।
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् ॥
स्नेहमांसवसामज्जमेदःस्वादौषधैः कृतः ।
स्नेहनः पुटपाकस्तु धार्य्यौ द्वे वाक्शते तु सः ॥
आङ्गलानां यकृन्मांसैर्लेखनद्रव्यसम्भृतैः ।
कृष्णलोहरजस्ताम्रशङ्ख विद्रुमसिन्धुजैः ॥
समुद्रफेणकासीसस्रोतोजदधिमस्तुभिः ।
लेखनो वाक्शतं तस्य परं धारणमुच्यते ॥
स्तन्यजाङ्गलमध्वाज्यतिक्तद्रव्यविपाचितः ।
लेखनात्त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥

वितरेत्तर्प्पणोक्तन्तु धूमं हित्वा तु रोपणं।
स्नेहस्वेदौ द्वयोः कार्य्यौ कार्य्यौ नैव च रोपणे ॥
एकाहं वा द्व्यहं वापि त्र्यहं वाप्यवचारणं।
यन्त्रणा तु क्रियाकालाद्द्विगुणं कालमिष्यते ॥
तेजांस्यनिलमाकाशमादर्शं भास्वराणि च।
नेक्षेत तर्पिते नेत्रे पुटपाककृते तथा ॥
मिथ्योपचारादनयोर्य्यो व्याधिरुपजायते।
अञ्जनाश्च्योतनस्वेदैर्य्यथास्वन्तमुपाचरेत् ॥
प्रसन्नवर्णं विशदं वातातपसहं लघु।
सुखस्वप्नावबोध्यक्षि पुटपाकगुणान्वितं ॥
अतियोगाद्रुजः शोफः पिडकास्तिमिरोद्गमः।
पाकोऽश्रुहर्षणञ्चापि हीने दोषोद्गमस्तथा ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनं।
द्वौ विल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ ॥
द्रव्याणां विल्वमात्रन्तु द्रवाणां कुडवो मतः।
तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितं ॥
काश्मरीकुमुदैरण्डपद्मिनीकदलीभवैः।
मृदावलिप्तमङ्गारैः खादिरैरवकूलयेत् ॥
कतकाश्मन्तकैरण्डपाटलावृषवादरैः।
सक्षीरद्रुमकाष्ठैर्व्वा गोमयैर्व्वापि युक्तितः ॥
स्विन्नमुद्धृत्य निःपीड्य रसमादाय तं नृणां।

तर्पणोक्तेन विधिना यथावदवचारयेत् ॥
कनीनके निषेच्यः स्यान्नित्यमुत्तानशायिनः ।
रक्ते पित्ते च तौ शीतौ कोष्णौ वातकफापहौ ॥
अत्युष्णतीक्ष्णौ सततं दाहपाककरौ स्मृतौ ।
अशुतौ शीतलौ चाशुस्तम्भरुग्घर्षकारकौ ॥
अतिमात्रौ कषायत्वसङ्कोचस्फुरणावहौ ।
हीनप्रमाणौ दोषाणामुत्क्लेशजननौ भृशं ॥
युक्तौ कृतौ दाहशोफरुग्घर्षस्रावनाशनौ ।
कण्डूपदेहदूषीकारक्तराजिविनाशनौ ॥
तस्मात्परिहरन्दोषान् विदध्यात्तौ सुखावहौ ।
व्यापदश्च यथादोषं नस्यधूमाञ्जनैर्जयेत् ॥
आद्यन्तयोश्चाप्यनयोःस्वेदमुष्णाम्बुचैलिकः ।
तथाहितोऽवसाने च धूमः श्लेष्मसमुच्छ्रितौ ॥
यथादोषोपयुक्तन्तु नातिप्रबलमोजसा ।
रागमाश्च्योतनं हन्ति सेकस्तु बलवत्तरं ॥
तौ त्रिधैवोपयुज्येते रोगेषु पुटपाकवत् ।
लेखने सप्त चाष्टौ वा विन्दवः स्नैहिके दश ॥
आश्च्योतने प्रयोक्तव्या द्वादशैव तु रोपणे ।
सेकस्य द्विगुणः कालः पुटपाकात्परो मतः ॥
अथ वा कार्य्यनिर्वृत्तेरुपयोगो यथाक्रमं ।
पूर्व्वापराह्णे मध्याह्ने रुजाकालेषु चोभयोः ॥

योगायोगान् स्नेहमेके तर्प्पणोक्तान् प्रचक्षते ।
रोगान् शिरसि सम्भूतान् हत्वातिप्रबलान् गुणान् ॥
करोति शिरसो वस्तिरुक्ता ये मूर्द्धतैलिकाः ।
शुद्धदेहस्य सायाह्ने यथाव्याध्यशितस्य तु ॥
स्वभ्यासीनस्य बध्नीयादस्तिकोशं ततो दृढं ।
यथाव्याधिशृतस्नेहपूर्णं संयम्य धारयेत् ॥
तर्प्पणोक्तं दशगुणं यथादोषं विधानवित् ।
व्यक्तरूपेषु दोषेषु शुद्धकायस्य केवले ॥
नेत्रएव स्थिते दोषे प्राप्तमञ्जनमाचरेत् ।
लेखनं रोपणञ्चापि प्रसादनमथापि वा ॥
तत्र पञ्च रसान्व्यस्तानाद्यैकरसवर्ज्जितान् ।
पञ्चधा लेखनं युञ्ज्याद्यथादोषमतन्द्रितः ॥
नेत्रवर्त्मशिराकोशस्रोतःशृङ्गाटकाश्रितं ।
मुखनासाक्षिभिर्दोषमोजसा स्रावयेत्तु तत् ॥
कषायतिक्तकञ्चापि सस्नेहं रोपणं मतं ।
तत्स्नेहशैत्याद्वर्ण्यं स्याद्दृष्टेश्च बलवर्द्धनं ॥
मधुरं स्नेहसम्पन्नमञ्जनन्तु प्रसादनं ।
दृष्टिदोषप्रसादार्थं स्नेहनार्थञ्च तद्धितं ॥
यथादोषं प्रयोज्यानि तानि दोषविशारदैः ।
अञ्जनानि यथोक्तानि प्राह्णसायाह्नरात्रिषु ॥
गुटिकारसचूर्णानि त्रिविधान्यञ्जनानि तु ।

यथापूर्व्वं बलं तेषां श्रेष्ठमाहुर्मनीषिणः ॥
हरेणुमात्रा वर्त्तिः स्याल्लेखनस्य प्रमाणतः ।
प्रसादनस्य चाध्यर्द्धा द्विगुणा रोपणस्य च ॥
रसाञ्जनस्य मात्रा तु पिष्टवर्त्तिमिता मता ।
द्वित्रिचतुःशलाकास्तु चूर्णस्याप्यनुपूर्व्वशः ॥
तेषां तुल्यगुणान्येव विदध्याच्छ्लाजनान्यपि ।
सौवर्णं राजतं शार्ङ्गं ताम्रं वैदूर्य्यकांस्यजं ॥
आयसानि च योज्यानि शलाकास्तु यथाक्रमं ।
वक्त्रयोर्म्मुकुलाकारा कलायपरिमण्डला ॥
अष्टाङ्गुला तनुर्म्मध्ये सुकृता साधुनिग्रहा ।
औडुम्बर्य्यश्मजातापि शारीरी वा हिता भवेत् ॥
वामेनाक्षि विनिर्भुज्य हस्तेन सुसमाहितः ।
शलाकया दक्षिणेन क्षिपेत् कानीनमञ्जनं ॥
आपाङ्गं वा यथायोग्यं कुर्य्याच्चापि गतागतं ।
वर्त्मोपलेपि वा यत्तदङ्गुल्यैव प्रयोजयेत् ॥
अक्षि नात्यन्तयोरञ्ज्यादाधमानोऽपि वा भिषक् ।
नवा निर्व्वान्तदोषेऽक्ष्णि धावनं सम्प्रयोजयेत् ॥
दोषः प्रतिनिवृत्तः सन् हन्यादृष्टेर्ब्बलन्तथा ।
गतदोषमपेतास्रु पश्यद्यत्सम्यगञ्जसा ॥
प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनन्ततः ।
श्रमोदावर्त्तरुदितमद्यक्रोधभयज्वरैः ॥

वेगाघातशिरोदोषैश्चार्त्तानां नेष्यतेऽञ्जनं।
रागरुक्तिमिरास्रावशूलसंरम्भसंभ्रमान्॥
निद्राक्षये क्रियाशक्ति प्रवाते दृग्बलक्षयं।
रजोधूमहते रागस्रावाधीमन्यसम्भवं॥
संरम्भशूलौ नस्यान्ते शिरोरुजि शिरोरुजं।
शिरःस्नातेऽतिशीते च रवावनुदितेऽपि च॥
दोषस्थैर्य्यादपार्थं स्याद्दोषोत्क्लेशङ्करोति च।
अजीर्णेऽप्येवमेव स्यात्स्रोतोमार्गावरोधनात्॥
दोषवेगोदये दत्तं कुर्य्यात्तांस्तानुपद्रवान्।
तस्मात्परिहरन्दोषानञ्जनं साधु योजयेत्॥
लेखनस्य विशेषेण काल एष प्रकीर्त्तितः।
व्यापदश्च जयेदेताः सेकाश्च्योतनलेपनैः॥
यथास्वं धूमकवलैर्नस्यैश्चापि समुत्थिताः।
विशदं लघु नास्रावि क्रियापटु सुनिर्म्मलं॥
संशान्तोपद्रवं नेत्रं विरिक्तं सम्यगादिशेत्।
जिह्मं दारुणदुर्वर्णं स्रस्तं रूक्षमतीव च॥
नेत्रं विरेकातियोगे स्यन्दते चातिमात्रशः।
तत्र सन्तर्पणं कार्य्यं विधानं चानिलापहं॥
अपि मन्दविरिक्तं स्यादुदग्रतरदोषवत्।
धूमनस्याञ्जनैस्तत्र हितं दोषावसेचनं॥
स्नेहवर्णबलोपेतं प्रसन्नं दोषवर्ज्जितं।

ज्ञेयं प्रसादने सम्यगुपयुक्तेऽक्षिनिर्वृतं ॥
किञ्चिद्धीनविकारं स्यात्तर्पणादिकृतादति ।
तत्र दोषहरं रूक्षं भेषजं शस्यते मृदु ॥
साधारणमपि ज्ञेयमेवं रोपणलक्षणं ।
प्रसादनवदाचष्टे तस्मिन्युक्तेऽतिभेषजं ॥
स्नेहनं रोपणं वापि हीनयुक्तमपार्थकं ।
कर्त्तव्यं मात्रया तस्मादञ्जनं सिद्धिमिच्छता ॥
पुटपाकक्रियाद्यासु क्रियास्वेकैव कल्पना ।
सहस्रशश्चाञ्जनेषु वीजेनोक्तेन पूजिताः ॥
दृष्टेर्ब्बलविवृद्ध्यर्थं याप्यरोगक्षयाय च ।
राजार्हान्यञ्जनाग्र्याणि निबोधैतान्यतःपरं ॥
अष्टौ भागानञ्जनस्य नीलोत्पलसमत्विषः ।
औडुम्बरं शातकुम्भं राजतञ्च समासतः ॥
एकादशैतान् भागांस्तु योजयेत्कुशलो भिषक् ।
मूषाक्षिप्तं तदाध्मातमाहृतं जातवेदसि ॥
खदिराश्मन्तकाङ्गारैर्गोशकृद्भिरथापि वा ।
गवां शकृद्रसे मूत्रे दध्नि सर्प्पिषि माक्षिके ॥
तैलमद्यवसामज्जसर्व्वगन्धोदकेषु च ।
द्राक्षारसेक्षुत्रिफलारसेषु सुहिमेषु च ॥
सारिवादिकषाये च कषाये चोत्पलादिके ।
निषेचयेत्पृथक्चैनं ध्मातं ध्मातं पुनः पुनः ॥

ततोऽन्तरीक्षे सप्ताहं स्रोतबद्धं स्थितं जले ।
विशोष्य चूर्णयेन्मुक्ता स्फटिकं विद्रुमं तथा ॥
कालानुसारिवां चैव शुचिरावाप्य योगतः ।
एतच्चूर्णाञ्जनं श्रेष्ठं निहितं भाजने शुभे ॥
दन्तस्फटिकवैदूर्य्यशङ्खशैलासनोद्भवे ।
शातकुम्भेऽथ शार्ङ्गे वा राजते वा सुसंस्कृते ॥
सहस्रपाकवत्पूजां कृत्वा राज्ञः प्रयोजयेत् ।
तेनाञ्जितोक्षा नृपतिर्भवेत्सर्व्वजनप्रियः ॥
अधृष्यः सर्व्वभूतानां दृष्टिरोगविवर्ज्जितः ।
कुष्ठञ्चन्दनमेलाश्च पत्रं मधुकमञ्जनं ॥
मेषशृङ्गस्य पुष्पाणि चक्रं रत्नानि सप्त च ।
उत्पलस्य दृहत्योश्च पद्मस्यापिच केशरं ॥
नागपुष्पमुशीराणि पिप्पलीतुल्यमुत्तमं ।
कुक्कुटाण्डकपालानि दार्व्वीं पथ्यां सरोचनां ॥
मरिचान्यचमज्जानं तुल्याञ्च गृहगोधिकां ।
कृत्वा सूक्ष्मं शुचिच्चूर्णं न्यसेदभ्यर्च्य पूर्व्ववत् ॥
एतद्भद्रोदयं नाम सदैवार्हति भूमिपः ॥
चक्रं समरिचञ्चैव मांसीं शैलेयमेव च ।
तुल्यांशानि समानैस्तैः समग्रैश्च मनःशिला ।
पत्रस्य भागाश्चत्वारो द्विगुणं सर्व्वतोऽञ्जनं ॥
तावच्च यष्टीमधुकं पूर्व्ववच्चैतदञ्जनं ।

मनःशिला देवकाष्ठं रजन्यौ त्रिफलोषणं ॥
लाक्षालसुनमञ्जिष्ठासैन्धवैलाःसमाक्षिकाः ।
रोध्रं सावरकं चूर्णमायसं ताम्रमेव च ॥
कालानुसारिवाञ्चैव कुक्कुटाण्डदलानि च ।
तुल्यानि पयसा पिष्ट्वा गुटिकां कारयेद्बुधः ॥
कण्डूतिमिरशुक्लार्मरक्तराज्युपशान्तये ।
कांस्यापमार्ज्जनमसीमधुकं सैन्धवं नतं ॥
एरण्डमूलञ्च समं द्वयंशद्वयान्वितं ।
आजेन पयसा पिष्ट्वा ताम्रपात्रं प्रलेपयेत् ॥
सप्तरात्रस्तु ता वर्त्त्यश्छायाशुष्का रुजापहाः ।
पथ्यातुल्यकयष्ट्याह्वैस्तुल्यैर्मरिचषोडश ॥
पथ्या सर्व्वविकारेषु वर्त्ती शीताम्बुपेषिता ।
रसक्रिया विधानेन यथोक्तविधिकोविदः ॥
पिण्डाञ्जनानि कुर्व्वीत यथायोगमतन्द्रितः ॥

---

॥ एकोनविंशोऽध्यायः ॥

अथातो नयनाभिघातप्रतिषेधं व्याख्यास्यामः ॥
अभ्याहते तु नयने बहुधा नराणां
संरम्भरागतुमुलासु रुजासु धीमान् ।
नस्यप्रलेपपरिषेचनतर्पणाद्य

मुक्तं पुनः क्षतजपित्तजशूलपथ्यं ॥
दृष्टिप्रसादजननं विधिमाशु कुर्य्या
त्स्निग्धैर्हिमैश्च मधुरैश्च तथा प्रयोगैः ।
स्वेदाग्निधूमभयशोकरुजाभिघातै
रभ्याहतामपि तथैव भिषक्चिकित्सेत ॥
सद्योहते नयन एष विधिस्तदूर्द्धं
स्यन्देरितो भवति दोषमवेक्ष्य कार्य्यः ।
अभ्याहतं नयनमीषदथास्य वाष्प
संस्वेदितं भवति तन्निरुजं क्षणेन ॥
साध्यं क्षतं पटलमेकमुभे तु कृच्छ्रे
त्रीणि क्षतानि पटलानि विवर्ज्जयेत्तु ।
स्यात्पिच्चितञ्च नयनं ह्यतिचावसन्नं
स्रस्तं च्युतञ्च हतदृक्च भवेत्तु याप्यं ॥
विस्तीर्णदृष्टितनुरागमसत्प्रदर्शि
साध्यं यथास्थितमनाविलदर्शनञ्च ।
प्राणोपरोधवमनक्षवकण्ठरोधै
रुन्नम्यमाशु नयनं यदतिप्रविष्टं ॥
नेत्रे विलम्बिनि विधिर्व्विहितः पुर
स्तादुच्छिंहनं शिरसि वार्य्यवसेचनञ्च ।
षट्सप्ततिर्न्नयनजा य इमे प्रदिष्टा
रोगा भवन्त्यमहतां महताञ्च तेभ्यः ॥

स्तन्यप्रकोपकफमारुतपित्तरक्तै-
र्बालाक्षिवर्त्मभव एव कुकूणकोऽन्यः।
मृद्गाति नेत्रमतिकण्डुमथाक्षिकूट-
नासाललाटमपि तेन शिशुः स नित्यं॥
सूर्य्यप्रभां न सहते स्रवति प्रवृद्धं
तस्याहरेद्रुधिरमाशु विनिर्लिखेच्च।
क्षौद्रान्वितैश्च कटुभिः प्रतिसारयेत्तु
मातुः शिशोरभिहितञ्च विधिं विदध्यात्॥
तं वामयेत्तु मधुसैन्धवसम्प्रयुक्तैः
पीतम्पयः खलु फलैः खरमञ्जरीणां॥
स्यात्पिप्पलीलवणमाक्षिकसंयुतैर्व्वा
नैनं वमन्तमपि वामयितुं यतेत।
दत्वा वचामशनदुग्धभुजे प्रयोज्य
मूर्द्धं ततः फलयुतं वमनं विधिज्ञैः॥
जम्ब्वाम्रधात्र्यणुदलैः परिधावनार्थं
कार्य्यं कषायमवसेचनमेव चापि।
आश्च्योतने च हितमत्र घृतं गुडूची-
सिद्धं तथाङ्करपि च त्रिफलाविपक्वं॥
नेपालजामरिचशङ्खरसाञ्जनानि
सिन्धुप्रसूतगुडमाक्षिकसंयुतानि।
स्यादञ्जनं मधुरसामधुताम्रकैर्व्वा

कृष्णायसं घृतपयोमधु वापि दग्धं ॥
व्योषं पलाण्डु मधुकं लवणोत्तमञ्च
लाक्षाञ्च गैरिकयुतां गुटिकाञ्जनं वा ।
निम्बच्छदं मधुकदार्व्वि सताम्रलोध्र
मिच्छन्ति चात्र भिषजोऽञ्जनमंशतुल्यं ॥
स्रोतोजशङ्खदधिसैन्धवमङ्घ्रिपत्रं
शुक्रं भिनत्ति भावितमञ्जनेन ।
स्यन्दे कफादभिहितं क्रममाचरेच्च
बालस्य रोगकुशलोऽचिरदं जिघांसुः ॥
समुद्र इव गम्भीरं नैव शक्यं चिकित्सितं ।
वक्तुं निरवशेषेण श्लोकानामयुतैरपि ॥
सद्भरैरपिच प्रोक्तमर्थमल्पमतिर्न्नरः ।
तर्कग्रन्थार्थरहितो नैव स्पष्टात्यपण्डितः ॥
तदिदं बहुगूढार्थं चिकित्सावीजमीरितं ।
कुशलेनाभिपन्नं तद्बहुधाभिप्ररोहति ॥
तस्मान्मतिमता नित्यं नानाशास्त्रार्थदर्शिना ।
सर्व्वसूक्ष्ममगाधार्थं शास्त्रमागमबुद्धिना ॥

---

॥ विंशतितमोऽध्यायः ॥

अथातः कर्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥
कर्णशूलं प्रणादश्च वाधिर्य्यं क्ष्वेड एवच ।

कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
कृमिकर्णप्रतीनाहौ विद्रधिर्द्विविधस्तथा ।
कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्व्विधं ॥
तथार्व्वुदं सप्तविधं शोफश्चापि चतुर्व्विधः ।
एते कर्णगतारोगा अष्टाविंशतिरीरिताः ॥
समीरणः श्रोत्रगतोऽन्यथाचरः
समन्ततः शूलमतीव कर्णयोः ।
करोति दोषैश्च यथास्वमावृतः
स कर्णशूलः कथितो दुराचरः ॥
यदा तु नाडीषु विमार्गमागतः
स एव शब्दाभिवहासु तिष्ठति ।
शृणोति शब्दान्विविधांस्तदा नरः
प्रणादमेनं कथयन्ति चामयं ॥
स एव शब्दाभिवहा यदा शिराः
कफानुयातो व्यनुसृत्य तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत्तु वाधिर्य्यमसंशयं खलु ॥
श्रमात्क्षयाद्रुक्षकषायभोजनात्
समीरणः शब्दपथे व्यवस्थितः ।
विरिक्तशीर्षस्य च शीतसेविनः
करोति हि क्ष्वेडमतीव कर्णयोः ॥

शिरोऽभिघातादथ वा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेत्तु पूयं श्रवणोऽनिलार्द्दितः
सकर्णसंस्राव इति प्रकीर्त्तितः ॥
कफेन कण्डूः प्रचितेन कर्णयो
र्भृशं भवेत्स्रोतसि कर्णसंज्ञिते ।
विशोषिते श्लेष्मणि पित्ततेजसा
नृणां भवेत्स्रोतसि कर्णगूथकः ॥
स कर्णगूथो द्रवतां यदागतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा सकर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽभितापनः ॥
यदा तु मूर्च्छन्त्यथवापि जन्तवः
सृजन्त्यपत्यान्यथवापि मक्षिकाः ।
तदञ्जनत्वाच्छ्रवणो निरुच्यते
भिषग्भिराद्यैः क्रिमिकर्णकस्तु सः ॥
क्षताभिघातप्रभवस्तु विद्रधि
र्भवेत्तथा दोषकृतोऽपरः पुनः ।
स रक्तपीतारुणमस्रमास्रवे
त्प्रतोदधूमायनदाहचोषवान् ॥
भवेत्प्रपाकः खलु पित्तकोपतो

विकोथविक्लेदकरश्च कर्णयोः।
स्थिते कफे स्रोतसि पित्ततेजसा
विलाप्यमाने भृशसम्प्रतापनात्॥
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत्पूति स पूतिकर्णकः।
प्रदिष्टलिङ्गान्यर्शांसि तत्त्वत
स्तथैव शोफार्बुदलिङ्गमीरितं॥
मया पुरस्तात्प्रसमीक्ष्य योजये
दिहैव तानि प्रयतो भिषग्वरः॥

---

॥ एकविंशतितमोऽध्यायः॥ २१॥

अथातः कर्णगतरोगप्रतिषेधं व्याख्यास्यामः॥

सामान्यं कर्णरोगेषु घृतपानं रसायनं।
अव्यायामोऽशिरःस्नानं ब्रह्मचर्य्यमकत्यनं॥
कर्णशूले प्रणादे च बाधिर्य्यक्ष्वेडयोरपि।
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः॥
स्निग्धं वातहरैः स्वेदैर्नरं स्नेहविरेचितं।
नाडीस्वेदैरुपचरेत्पिण्डस्वेदैस्तथैव च॥
विल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभिः।
वस्तगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभिः॥
आरनालैः शृतैरेभिर्नाडीस्वेदः प्रयोजितः।

कफवातसमुत्थानं कर्णशूलं निरस्यति ॥
मीनकुक्कुटलावानां मांसजैः पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्व्वीत कर्णशूलनिवारणं ॥
अश्वत्थपत्रखल्लं वा विधाय बहुपत्रकं ।
तैलाक्तमस्तुसम्पूर्णं निदध्याच्छ्रवणोपरि ॥
यत्तैलं च्यवते तस्मात् खल्लादङ्गारसाधितात् ।
तत्प्राप्तं श्रवणश्रोतः सद्यो गृह्णाति वेदनां ॥
क्षौमगुग्गुल्वगुरुभिः सघृतैर्द्धूपयेच्च तं ।
भक्तोपरि हितं सर्प्पिर्व्वस्तिकर्म्म च पूजितं ॥
निरन्नो निशि तत्सर्प्पिः पीत्वोपरि पयः पिवेत् ।
मूर्द्धवस्तिषु नस्येच मस्तिस्के परिषेचने ॥
शतपाकं बलातैलं प्रशस्तञ्चापि भोजने ।
कण्टकारीमजाक्षीरे पक्त्वा क्षीरेण तेन च ॥
विपचेत्कुक्कुटवसां कर्णयोस्तत्प्रपूरणं ।
तण्डुलीयकमूलानि फलमङ्कोठजन्तथा ॥
अहिंस्राकेन्द्रकामूलं सरलं देवदारुच ।
लसुनं शृङ्गवेरञ्च तथा वंशावलेखनं ॥
कल्कैरेषां तथाम्लैश्च पचेत्स्नेहं चतुर्व्विधं ।
वेदनायाः प्रशान्त्यर्थं हितं तत्कर्णपूरणं ॥
लसुनार्द्रकशिग्रूणां मुरुङ्ग्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥

शृङ्गवेररसः क्षौद्रं सैन्धवं तैलमेव च।
कदुष्णं कर्णयोर्ज्ञेयमेतद्वा वेदनापहं॥
वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक्।
सर्पिः पचेत्तेन कर्णं पूरयेत्कर्णशूलिनः॥
महतः पञ्चमूलस्य काण्डमष्टादशाङ्गुलं।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः॥
यत्तैलं च्यवते तेभ्यो धृतेभ्यो भाजनोपरि।
ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनां॥
कुर्य्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारले।
मतिमान्दीपिकातैलं कर्णशूलनिवर्हणं॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान्।
सन्निदध्यात्स्नुहीकाण्डे कोरिते तच्छदावृते॥
पुटपाकक्रमस्विन्नान्पीडयेदारसागमात्।
सुखोष्णं तद्रसं कर्णे दापयेच्छूलशान्तये॥
कपित्थमातुलुङ्गाम्लशृङ्गवेररसैः शुभैः।
सुखोष्णैः पूरयेत्कर्णं तच्छूलविनिवृत्तये॥
कर्णं कोष्णेन चुक्रेण पूरयेत्कर्णशूलिनः।
समुद्रफेनचूर्णेन युक्त्या वाप्यवचूर्णयेत्॥
अष्टानामिह मूत्राणां मूत्रेणान्यतमेन वा।
कोष्णेन पूरयेत्कर्णं कर्णशूलोपशान्तये॥
मूत्रेष्वम्लेषु वातघ्ने गणे च क्वथिते भिषक्।

पचेच्चतुर्व्विधं स्नेहं पूरणं तच्च कर्णयोः ॥
एता एव क्रियाः कुर्य्यात् पित्तघ्नैः पित्तसंयुते ।
काकोल्यादौ दशक्षीरं तिक्तं चात्र हितं हविः ॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ।
कल्ककाथे परं पक्कं शर्करामधुकैः सरैः ॥
इङ्गुदीसर्षपस्नेहौ सकफे पूरणे हितौ ।
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥
सुरसादौ कृतं तैलं पञ्चमूले महत्यपि ।
मातुलुङ्गरसः शुक्तं लशुनार्द्रकयोरसः ॥
एकैकः पूरणे पथ्यस्तैलं तेष्वथवा कृतं ।
तीक्ष्णा मूर्द्धविरेकाश्च कवलाश्चात्र पूजिताः ॥
कर्णशूलविधिः कृत्स्नः पित्तघ्नः शोणिताहते ।
शूलप्रणादबाधिर्य्यक्ष्वेडानान्तु प्रकीर्त्तितं ॥
सामान्यतो विशेषेण बाधिर्य्ये पूरणं शृणु ।
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणं ।
सितामधुकबिम्बीभिः सिद्धं वाजे पयस्यथ ॥
सिद्धं वा बिल्वनिःक्वाथे शीतीभूतं तदुद्धृतं ।
पुनः पचेद्दशक्षीरं सितामधुकचन्दनैः ॥
बिल्वाम्बुगाढं तत्तैलं बाधिर्य्ये कर्णपूरणं ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ॥

वातव्याधिषु यश्चोक्तो विधिः स च हितोभवेत्।
कर्णस्रावे पूतिकर्णे तथैव क्रमिकर्णके॥
समानं कर्म्म कुर्व्वीत योगान्वैशेषिकानपि।
शिरोविरेचनञ्चैव धूपनं पूरणन्तथा॥
प्रमार्जनं धावनञ्च वीच्य वीच्यावचारयेत्।
राजवृक्षादितोयेन सुरसादिगणेन वा॥
कर्णप्रचालनं कार्य्यं चूर्णैरेषाञ्च पूरणं।
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितं॥
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह।
सर्ज्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः॥
योजितो मधुना वापि कर्णस्रावे प्रशस्यते।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणं॥
सशैवलमहावृक्षजम्ब्वाम्रप्रसवायुतं।
कुलीरशौद्रमण्डूकीसिद्धं तैलञ्च पूजितं॥
तिन्दुकान्यभयारोध्रं समङ्गामलकं मधु।
पूरणञ्चात्र पथ्यं स्यात्कपित्थरसयोजितं॥
रसमाम्रकपित्थानां मधूकधवशालजं।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्व्विपाचितं॥
प्रियङ्गुमधुकाम्बष्ठाधातकीशोतपर्णिभिः।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेनवा॥
पचेत्तैलं तदास्रावमवगृह्णाति पूरणात्।

घृष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतं ॥
प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके ।
निर्गुण्डीस्वरसे तैलं सिन्धुधूमरजोगुडः ॥
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ।
कृमिकर्णकनाशार्थं कृमिघ्नं योजयेद्विधिं ॥
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ।
कृमिघ्नं हरितालेन गवां मूत्रयुतेन च ॥
गुग्गुलुः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते ।
छर्द्दनं धूमपानञ्च कवडस्य च धारणं ॥
कर्णक्ष्वेडे हितं तैलं सार्षपञ्चैव पूरणं ।
विद्रधौ वापि कुर्व्वीत विद्रध्युक्तं चिकित्सितं ॥
प्रक्लेद्य धीमांस्तैलेन स्वेदेन प्रविलाप्य च ।
शोधयेत्कर्णविट्कन्तु भिषक् सम्यक्छलाकया ॥
नाडीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनं ।
विधिश्च कफहृत्सर्व्वः कर्णकण्डूमपोहति ॥
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ॥
कर्णपाकस्य भैषज्यं कुर्य्यात्पित्तविसर्प्पवत् ।
कर्णच्छिद्रे वर्त्तमानं कीटं क्लेदमलादि वा ॥
शृङ्गेणापहरेद्धीमानथवापि शलाकया ।
शेषाणान्तु विकाराणां प्राक्चिकित्सितमीरितं ॥

---

॥ द्वाविंशतितमोऽध्यायः ॥

अथातो नासागतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥

अपीनसः पूतिनस्यं नासापाकस्तथैव च।
तथा शोणितपित्तञ्च पूयशोणितमेव च॥
क्षवथुर्भ्रंशथुर्दीप्तो नासानाहःपरिस्रवः।
नासाशोषेण सहिता दशैकाश्चेरिता गदाः॥
चत्वार्य्यर्शांसि चत्वारः शोफाः सप्तार्व्वुदानि च।
प्रतिश्यायाश्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः॥
एकत्रिंशन्मितास्ते तु नासारोगाः प्रकीर्त्तिताः।

आनह्यते यस्य विधूप्यते च पापच्यते क्लिद्यति चापि नासा॥
न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत्तमपीनसेन।
तञ्चानिलश्लेष्मभवं विकारं ब्रूयात्प्रतिश्यायसमानलिङ्गं॥
दोषैर्व्विदग्धैर्गलतालुमूले संवासितो यस्य समीरणस्तु।
निरेति पूतिर्मुखनासिकाभ्यान्तं पूतिनस्यं प्रवदन्ति रोगं॥
घ्राणाश्रितं पित्तमरूंषि कुर्य्याद्यस्मिन्विकारे बलवांश्च पाकः।
तं नासिकापाकमिति व्यवस्येद्विक्लेदकोथावपि यत्र दृष्टौ॥
चतुर्व्विधं द्विप्रभवं द्विमार्गं वक्ष्यामि भूयः खलु रक्तपित्तं।
दोषैर्व्विदग्धैरथवापि जन्तोर्ल्ललाटदेशेऽभिहतस्य तैस्तु॥
नासा स्रवेत्पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगं।
घ्राणाश्रिते मर्मणि सम्प्रदुष्टे यस्यानिलो नासिकया निरेति॥
कफानुयातो बहुशः सशब्दस्तं रोगमाहुः क्षवथुं विधिज्ञाः।

तीक्ष्णोपयोगादति जिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा॥
सूत्रादिभिर्वा तरुणास्थिमर्म्मण्युद्घाटिते यः क्षवथुर्निरेति।
प्रभ्रश्यते नासिकयैव यश्च सान्द्रो विदग्धो लवणः कफस्तु॥
प्राक्सञ्चितो मूर्द्धिच पित्ततप्तः प्रभ्रंशथुं व्याधिमुदाहरन्ति।
घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः॥
नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिस्तु तं दीप्तमुदाहरन्ति।
कफावृतो वायुरुदानसंज्ञो यदा स्वमार्गे विगुणः स्थितः स्यात्॥
घ्राणं वृणोतीव तदा स रोगो नासाप्रतीनाह इति प्रदिष्टः।
अजस्रमच्छं सलिलप्रकाशं यस्याविवर्णं स्रवतीह नासा॥
रात्रौ विशेषेण हि तं विकारं नासापरिस्रावमिति व्यवस्येत्।
घ्राणश्रिते श्लेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च॥
समुच्छ्वसित्यूर्द्धमधश्च कृच्छ्राद्यस्तस्य नासापरिशोष उक्तः।
दोषैस्त्रिभिस्तैः पृथगेकशश्च ब्रूयात्तथार्शांसि तथैव शोफान्॥
शालाक्यसिद्धान्तमवेक्ष्य वापि सर्व्वात्मकं सप्तममर्व्वुदं तु।
रोगः प्रतिश्याय इह प्रदिष्टः स वक्ष्यते पञ्चविधःपुरस्तात्॥
शोफाश्च शोफविज्ञाने नासास्रोतोव्यवस्थिताः।
निदानेऽर्शांसि निर्दिष्टान्येवं तानि विभावयेत्॥

---

॥ त्रयोविंशोऽध्यायः ॥

॥ अथातो नासागतरोगप्रतिषेधं व्याख्यास्यामः ॥

पूर्व्वोद्दिष्टे पूतनस्ये च जन्तोः स्नेहस्वेदौ छर्द्दनं स्रंसनञ्च।

युक्तं भक्तं तीक्ष्णमल्पं लघुस्यादुष्णं तोयं धूमपानस्य काले॥
हिङ्गुव्योषं वत्सकाख्यं शिवाटी लाक्षा वीजं सौरभं कट्फलञ्च।
उग्रा कुष्ठं तीक्ष्णगन्धाविडङ्गं श्रेष्ठं नित्यं चावपीडे करञ्जं॥
एतैर्द्रव्यैः सार्षपं मूत्रयुक्तं तैलं धीमान्नस्यहेतोः पचेच्च।
नासापाके पित्तहृत्संविधानं कार्य्यं सर्व्वं वाह्यमाभ्यन्तरञ्च॥
हृत्वा रक्तं क्षीरवृक्षत्वचश्च साज्याःसेका योजनीयाश्च लेपाः।
वक्ष्यामूर्द्ध्वं रक्तपित्तोपशान्तिं नाडीवत्स्यात् पूयरक्ते चिकित्सा॥
वान्ते सम्यक् चावपीडं वदन्ति तीक्ष्णं धूमं शोधनं चात्र नस्यं।
सेव्यं नस्यं मूर्द्धवैरेचनीयैर्न्नाड्या चूर्णं क्षवथौ भ्रंशथौ च॥
कुर्य्यात्स्वेदान्मूर्द्ध्निवातामयघ्नान् स्निग्धान्धूमान् यच्चदन्यद्धितं च।
दीप्ते रोगे पैत्तिके संविधानं कुर्य्यात्सर्व्वं स्वादु यच्छीतलञ्च॥
नासानाहे स्नेहपानं प्रधानं स्निग्धा धूमा मूर्द्धवस्तिश्च नित्यं।
बलातैलं सर्व्वथैवोपयोज्यं वातव्याधावन्यदुक्तञ्च यद्यत्॥
नासास्रावे घ्राणतश्चूर्णमुक्तं नाड्या देयं योऽवपीडश्च तीक्ष्णः।
तीक्ष्णं धूमं देवदार्व्वग्निकाभ्यां मांसं वाजं युक्तमत्रादिशन्ति॥
नासाशोषे क्षीरसर्प्पिः प्रधानं सिद्धन्तैलं चाणुकल्पे च नस्ये।
सर्प्पिःपानं भोजनं जाङ्गलैश्च स्नेहः स्वेदः स्नैहिकश्चापि धूमः॥
शेषान् रोगान् घ्राणजान् सन्नियच्छेदुक्तं तेषां यद्यथासंविधानं।

---

## ॥ चतुर्विंशोऽध्यायः ॥

अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः ॥

नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतमतिप्रतापः ।
सन्धारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तं ॥
चयङ्गता मूर्द्धनि मारुतादयः पृथक्समस्ताश्च तथैव शोणितं ।
प्रकोप्यमाना विविधैः प्रकोपणैर्नृणां प्रतिश्यायकरा भवन्ति हि ॥
शिरोगुरुत्वं क्षवथोः प्रवर्त्तनं तथाङ्गमर्दः परिहृष्टरोमता ।
उपद्रवाश्चाप्यपरे पृथग्विधा नृणां प्रतिश्यायपुरःसराः स्मृताः ॥

आनद्धा पिहिता नासा तनुस्रावप्रवर्त्तिनी ।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥
स्वरोपघातश्च भवेत्प्रतिश्यायेऽनिलात्मके ।
उष्णः सपीतकः स्रावो घ्राणात्स्रवति पैत्तिके ॥
कृशोऽतिपाण्डुः सन्तप्तो भवेत्तृष्णाभिपीडितः ।
स धूमं सहसा वह्निं वमतीव च मानवः ॥
कफः कफकृते घ्राणाच्छुक्लः शीतः स्रवेन्मुहुः ।
शुक्लावभासः शूनाक्षो भवेद्गुरुशिरोमुखः ॥
शिरोगलोष्ठतालूनां कण्डूयनमतीव च ।
भूत्वा भूत्वा प्रतीश्यायो योऽकस्माद्विनिवर्त्तते ॥
सम्पक्वो वाप्यपक्वोवा स सर्व्वप्रभवः स्मृतः ।
लिङ्गानि चैव सर्व्वेषां पीनसानां च सर्व्वजे ॥
रक्तजे तु प्रतिश्याये रक्तास्रावः प्रवर्त्तते ।

ताम्राश्च भवेज्जन्तुरुरोघातप्रपीडितः ॥
दुर्गन्धोच्छ्वासवदनस्तथा गन्धान्न वेत्ति च ।
मूर्च्छन्ति चात्र कृमयः श्वेताः कृष्णास्तथाणवः ॥
कृमिमूर्द्धविकारेण समानं चास्य लक्षणं ।
प्रक्लिद्यति पुनर्न्नासा पुनश्च परिशुष्यति ॥
मुहुरानह्यते चापि मुहुर्व्विव्रियते तथा ।
निश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धान्न वेत्ति च ॥
एवं दुष्टप्रतिश्यायं जानीयात्कृच्छ्रसाधनं ।
सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः ॥
कालेन रोगजनना जायन्ते दुष्टपीनसाः ।
बाधिर्य्यमान्ध्यमघ्राणं घोरांश्च नयनामयान् ॥
कासाग्निसादशोफांश्च वृद्धाः कुर्व्वन्ति पीनसाः ॥

नवं प्रतिश्यायमपास्य सर्व्वमुपाचरेत्सर्प्पिष एव पानैः ।
स्वेदैर्व्विचित्रैर्व्वमनैश्च युक्तैः कालोपपन्नैरवपीड़नैश्च ॥
अपच्यमानस्य हि पाचनार्थं स्वेदो हितोऽम्लैरहिमश्च भोज्यः ।
निषेव्यमाणं पयसार्द्रकं वा सम्पाचयेदिक्षुविकारयोगैः ॥
पक्वं घनं चाप्यवलम्बमानं शिरोविरेकैरपकर्षयेत्तं ।
विरेचनास्थापनधूमपानैरवेक्ष्य दोषान् कवलग्रहैश्च ॥
निवातशय्यासनचेष्टनानि मूर्द्ध्नि गुरूष्णञ्च तथैव वासः ।
तीक्ष्णा विरेकाः शिरसः सधूमा रूक्षं यवान्नं विजया च सेव्या ॥
शीताम्बुयोषिच्छिशिरावगाहचिन्तातिरूक्षाशनवेगरोधान् ।

शोकञ्च मद्यानि नवानि चैव विवर्ज्जयेत्पीनसरोगजुष्टः ॥
छर्द्यङ्गसादज्वरगौरवार्त्तमरोचकारत्यतिसारयुक्तं ।
विलङ्घनैः पाचनदीपनीयैरुपाचरेत्पीनसिनं यथावत् ॥
बहुद्रवैर्व्वातकफोपसृष्टं प्रच्छर्दयेत्पीनसिनं वयःस्थं ।
उपद्रवांश्चापि यथोपदेशं स्वैर्भेषजैर्भोजनसंविधानैः ॥
जयेदिदिला मृदुतां गतेषु प्राग्लक्षणेषूक्तमथादिशेच ।

वातिके तु प्रतिश्याये पिवेत्सर्पिर्यथाक्रमं ।
पञ्चभिर्लवणैः सिद्धं प्रथमेन गणेन च ॥
नस्यादिषु विधिं कृत्स्नमवेक्षेतार्दितेरितं ।

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतं ॥

परिषेकान्प्रदेहांश्च कुर्य्यादपि च शीतलान् ।
श्रीसर्ज्जरसपत्तङ्गप्रियङ्गुमधुशर्करा: ॥
द्राक्षामधूलिकागोजीश्रीपर्णीमधुकैस्तथा ।
युञ्ज्यात्तु कवलांश्चात्र विरेको मधुरैरपि ॥
धवत्वक्त्रिफलाश्यामातिल्वकैर्मधुकेन च ।
श्रीपर्णीरजनीमिश्रैः क्षीरे दशगुणे पचेत् ॥
तैलं कालोपपन्नं तन्नस्यं स्यादनयोर्हितं ।

कफजे सर्पिषा स्निग्धं तिलमाषविपक्वया ॥

यवाग्वा वामयेद्वान्तः कफघ्नं क्रममाचरेत् ।
उभे वले बृहत्यौ च विडङ्गं सत्रिकण्टकं ॥
श्वेतामूलं सदां भद्रां वर्षाभूश्चात्र संहरेत् ।

तैलमेभिर्व्विपक्कन्तु नस्यमस्योपकल्पयेत्॥
सरलाकिणिहीदारुनिकुम्भेङ्गुदिभिः कृताः।
वर्त्तयश्चोपयोज्याः स्युर्धूमपाने यथाविधि॥
सर्प्पींषि कटुतिक्तानि तीक्ष्णधूमाः कटूनि च।
भेषजान्युपयुक्तानि हन्युः सर्व्वप्रकोपजम्॥
रसाञ्जने सातिविषे मुस्तायां भद्रदारुणि।
तैलं विपक्कं नस्यार्थे विदध्याच्चात्र बुद्धिमान्॥
मुस्तातेजोवतीपाठाकट्फलं कटुका वचा।
सर्षपाः पिप्पलीमूलं पिप्पल्यः सैन्धवाग्निकौ॥
तुत्थं करञ्जबीजञ्च लवणं भद्रदारु च।
एतैः कृतं कषायन्तु कवले संप्रयोजयेत्॥
हितं मूर्द्धविरेकेण तैलमेभिर्व्विपाचितं।
क्षीरमर्द्धजले क्वाथ्यं जाङ्गलैर्म्मृगपक्षिभिः॥
पुष्पैर्व्विमिश्रं जलजैर्व्वातघ्नैरौषधैरपि।
हिमे क्षीरावशिष्टेऽस्मिन् घृतमुत्पाद्य यत्नतः॥
सर्व्वगन्धासितानन्ता मधुकं चन्दनं तथा।
आवाप्य विपचेद्भूयो दशक्षीरन्तु तद्घृतं॥
नस्यप्रयुक्तमुद्रिक्तान् प्रतिश्यायान् व्यपोहति।
यथास्वं दोषशमनैस्तैलं कुर्य्याच्च यत्नतः॥
समूत्रपित्तास्तूद्दिष्टाः क्रियाः क्रिमिषु योजयेत्।
यापनार्थं क्रिमिघ्नानि भेषजानि च बुद्धिमान्॥

---

॥ पञ्चविंशोऽध्यायः ॥

अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥

शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्य्यावर्त्तान्तवाताढ्यावभेदकशङ्खकैः ।
एकादशप्रकारस्य लक्षणं संप्रवक्ष्यते ॥

यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रं ।
बन्धोपतापैश्च भवेद्विशेषः शिरोऽभितापः स समीरणेन ॥
यस्योष्णमङ्गारचितं यथैव भवेच्छिरो धूमवती च नासा ।
शीतेन रात्रौ च भवेद्विशेषः शिरोऽभितापः स तु पित्तकोपात् ॥
शिरोगलं यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमञ्च ।
शूनाक्षिकूटं वदनं च यस्य शिरोऽभितापः स कफप्रकोपात् ॥
शिरोऽभितापे त्रितयप्रवृत्ते सर्व्वाणि लिङ्गानि समुद्भवन्ति ।
रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च ॥
वसाबलासक्षतसम्भवानां शिरोगतानामिह संक्षयेण ।
क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रं ॥
संस्वेदनच्छर्द्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति ।
निस्तुद्यते यस्य शिरोऽतिमात्रं सम्भक्ष्यमाणं स्फुरतीव चान्तः ॥
घ्राणाच्च गच्छेत्सलिलं सरक्तं शिरोऽभितापः क्रिमिभिः स घोरः ।
सूर्य्योदयं या प्रतिमन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढं ॥
विवर्द्धते चांशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च ।

शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च ॥
तं भास्करावर्त्तमुदाहरन्ति सर्व्वात्मकं कष्टतमं विकारं ।
दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटां सुरुजां सुतीव्रां ॥
कुर्व्वन्ति साक्षिभ्रुवशङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु ।
गण्डस्य पार्श्वेषु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान् ॥
अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारं ।
यस्योत्तमाङ्गार्द्धमतीव जन्तोः सम्भेदतोदभ्रमशूलजुष्टं ॥
पक्षाद्दशाहादथवाप्यकस्मात्तस्यार्द्धभेदं त्रितयाद्व्यवस्येत् ।
शङ्खाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः ॥
रुजः सुतीव्राः प्रतनोति मूर्द्ध्नि विशेषतश्चापि हि शङ्खयोस्तु ।
सुकष्टमेनं खलु शङ्खकाख्यं महर्षयो वेदविदः पुराणाः ॥
व्याधिं वदन्त्युद्गतमृत्युकल्पं भिषक्सहस्रैरपि दुर्न्निवारं ॥

---

॥ षड्विंशोऽध्यायः ॥

अथातः शिरोरोगप्रतिषेधं व्याख्यास्यामः ॥
वातव्याधिविधिः कार्य्यः शिरोरोगेऽनिलात्मके ।
पयोऽनुपानं सेवेत घृतं तैलमथापि वा ॥
मुद्गान् कुलत्थान्माषांश्च खादेच्च निशि केवलान् ॥
कटूष्णांश्च सर्षपिष्कानुष्णं चानु पयः पिबेत् ।
पिबेद्वा पयसा तैलं तत्कल्कं वापि मानवः ॥
वातघ्नसिद्धैः क्षीरैश्च सुखोष्णैः सेकमादिशेत् ।

तत्सिद्धैः पायसैर्व्वापि सुखोष्णैर्लेपयेच्छिरः ॥
खिन्नैर्व्वा मत्स्यपिशितैः कृशरैर्व्वा ससैन्धवैः।
चन्दनोत्पलकुष्ठैर्व्वा सुश्लक्ष्णैर्म्मगधायुतैः ॥
स्निग्धस्य तैलं नस्यं स्यात्कुलीररससाधितं।
वरुणादौ गणे क्षुण्णे क्षीरमर्द्धोदकं पचेत् ॥
क्षीरशेषञ्च तन्मथ्यं शीतं सारमुपाहरेत्।
ततो मधुरकैः सिद्धं नस्ये तत्पूजितं हविः ॥
तस्मिन्विपक्के क्षीरे च पेयं सर्प्पिः सशर्करं।
धूमञ्चास्य यथाकालं स्नैहिकं योजयेद्भिषक् ॥
पानाभ्यञ्जननस्येषु वस्तिकर्म्मणि सेचने।
विदध्याच्चैद्वृतं धीमान् बलातैलमथापि वा ॥
भोजयेच्च रसैः स्निग्धैः पयोभिर्व्वा सुसंस्कृतैः।
पित्तरक्तसमुत्थानौ शिरोरोगौ निवारयेत् ॥
शिरोलेपैः सघृतसेकैः परीषेकैश्च शीतलैः।
क्षीरेक्षुरसधान्याम्लमस्तुचोद्र सिताजलैः ॥
नलवञ्जुलकल्हारचन्दनोत्पलपद्मकैः।
शङ्खशैवलयष्ट्याह्वमुस्ताम्भोरुहसंयुतैः ॥
शिरःप्रलेपः सघृतैर्व्वैसर्प्पैश्च तथाविधैः।
मधुरैश्च सुखालेपैर्नस्यकर्म्मभिरेव च ॥
आस्थापनैर्व्विरेकैश्च पथ्यैश्च स्नेहवस्तिभिः।
क्षीरसर्पिर्हितं नस्यं वसा वा जाङ्गला शुभा ॥

उत्पलादिविपक्वेन क्षीरेणास्थापनं हितं ।
भोजनं जाङ्गलरसैः सर्प्पिषा चानुवासनं ॥
मधुरैः क्षीरसर्प्पिस्तु स्नेहने च सशर्करं ।
पित्तरक्तघ्नमुद्दिष्टं यच्चान्यदपि तद्धितं ॥
कफोत्थितं शिरोरोगं जयेत्कफनिवारणैः ।
शिरोविरेकैर्व्वमनैस्तीक्ष्णैर्गण्डूषधारणैः ॥
अच्छञ्च पाययेत्सर्प्पिः स्वेदयेच्चाप्यभीक्ष्णशः ।
शिरोमधुकसारेण स्निग्धञ्चापि विरेचयेत् ॥
इङ्गुदस्य त्वचा वापि मेषशृङ्ग्या च वा भिषक् ।
आभ्यामेव कृता वर्त्तीर्धूमपाने प्रयोजयेत् ॥
श्रेयं कट्फलचूर्णञ्च कवलाश्च कफापहाः ।
शरलाकुष्ठशार्ङ्गष्टादेवकाष्ठैः सरोहिषैः ॥
क्षारपिष्टैः सलवणैः सुखोष्णैर्लेपयेच्छिरः ।
यवषष्टिकयोश्चान्नं व्योषक्षारसमायुतं ॥
पटोलमुद्गकौलत्थैर्मात्रावद्भोजयेद्रसैः ।
शिरोरोगे त्रिदोषोत्थे त्रिदोषघ्नो विधिर्हितः ॥
सर्प्पिःपानं विशेषेण पुराणं वा दिशन्ति हि ।
क्षयजे क्षयमासाद्य कर्त्तव्यो बृंहणो विधिः ॥
पाने नस्ये च सर्प्पिः स्याद्वातघ्नमधुरैः शृतं ।
क्षयकासापहं चात्र सर्प्पिः पथ्यतमं विदुः ॥
कृमिभिर्भक्ष्यमाणस्य वक्ष्यन्ते शिरसः क्रियाः ।

नस्यं हि शोणितं दद्यात्तेन मूर्च्छन्ति जन्तवः ॥
मत्ताः शोणितगन्धेन समायान्ति यतस्ततः ।
तेषां निर्हरणं कार्य्यं ततो मूर्द्धविरेचनैः ॥
कृष्णशिग्रुकबीजैर्वा कांस्यनीलीसमायुतैः ।
क्रिमिघ्नैरवपीडैश्च मूत्रपिष्टैरुपाचरेत् ॥
पूतिमत्स्ययुतान् धूमान् क्रिमिघ्नांश्च प्रयोजयेत् ।
भोजनानि क्रिमिघ्नानि पानानि विधानि च ॥
सूर्य्यावर्त्ते विधातव्यं नस्यकर्म्मादिभेषजं ।
भोजनं जाङ्गलप्रायं क्षीरान्नविकृतैर्घृतं ॥
तथार्द्धभेदके व्याधौ प्राप्तमन्यच्च यद्भवेत् ।
शिरीषमूलकफलैरवपीडोऽनयोर्हितः ॥
वंशमूलककर्पूरैरवपीडं प्रयोजयेत् ।
अवपीडो हितश्चात्र वचामागधिकायुतः ॥
मधुकेनावपीडो वा मधुना सह संयुतः ।
मनःशिलावपीडो वा मधुना चन्दनेन वा ॥
तेषामन्ते हितं नस्यं सर्प्पिर्म्मधुरसान्वितं ।
सारिवोत्पलकुष्ठानि मधुकं चाम्लपेषितं ॥
सर्प्पिस्तैलयुतो लेपो द्वयोरपि सुखावहः ।
एष एव प्रयोक्तव्यः शिरोरोगे कफात्मके ॥
अनन्तवाते कर्त्तव्यः सूर्य्यावर्त्तेरितो विधिः ।
सिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥

आहारश्च विधातव्यो वातपित्तविनाशनः।
मधुमस्तकसंयावघृतपूरैश्च भोजनैः॥
क्षीरसर्पिः प्रशंसन्ति नस्ये पाने च शङ्खके।
जाङ्गलानां रसैः स्निग्धैराहारश्चात्र शस्यते॥
शतावरीं तिलान्कृष्णान्मधुकं नीलमुत्पलं।
दूर्वां पुनर्नवाञ्चैव लेपे साध्ववचारयेत्॥
महासुगन्धामथ वा पालिन्दीञ्चाम्लपेषितां।
शीतांश्चात्र परीषेकान्प्रदेहानत्र योजयेत्॥
अवपीडश्च देयोऽत्र सूर्य्यावर्त्तनिवारणः।
कृमिचयकृतौ हित्वा शिरोरोगेषु बुद्धिमान्॥
मधुतैलसमायुक्तैः शिरांस्यतिविरेचयेत्।
पश्चात्सर्षपतैलेन ततो नस्यं प्रयोजयेत्॥
नचेच्छान्तिं व्रजत्येवं स्निग्धस्विन्नास्ततो भिषक्।
पश्चादुपाचरेत्सम्यक् सिराणामथ मोक्षणैः॥
षट्सप्ततिर्नेत्ररोगा दशाष्टादश कर्णजाः।
एकत्रिंशद्घ्राणगताः शिरस्येकादशेह तु॥
इति विस्तरतो दृष्टाः सलक्षणचिकित्सिताः।
संहितायामभिहिताः सप्तषष्टिर्मुखामयाः॥
एतावन्तो ययास्थूलमुत्तमाङ्गगता गदाः।
अस्मिन् शास्त्रे निगदिताः सङ्ख्यारूपचिकित्सितैः॥

इति सुश्रुताचार्य्यविरत आयुर्व्वेदशास्त्रे सुश्रुत उत्तरतन्त्रे शालाक्यतन्त्रं समाप्तं ॥

॥ सप्तविंशोऽध्यायः ॥

अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः ॥

बालग्रहाणां विज्ञानं साधनञ्चाप्यनन्तरं ।
उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु ॥
स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एवच ॥
शकुनी रेवती चैव पूतना चान्धपूतना ॥
पूतना शीतनामा च तथैव मुखमण्डिका ।
नवमो नैगमेषश्च यः पितृग्रहसंज्ञितः ॥

धात्रीमात्रोः प्राक्प्रदिष्टापचारा
शौचभ्रष्टान्मङ्गलाचारहीनान् ।
त्रस्तान् हृष्टांस्तर्ज्जितान्क्रन्दितान्वा
पूजाहेतोर्हिंस्युरेते कुमारान् ॥
ऐश्वर्य्यस्यास्ति न शक्या विशन्तो
देहं द्रष्टुं मानुषैर्व्विश्वरूपाः ।
आप्तं वाक्यं तत्समीक्ष्याभिधास्ये
लिङ्गान्येषां यानि देहे भवन्ति ॥
शूनाक्षः क्षतजसगन्धिकः स्तनद्वि

ह्यक्षाक्षो हतचलितैकपक्ष्मनेत्रः ।
उद्विग्नः सुलुलितचक्षुरल्परोदी
स्कन्दार्त्तो भवति च गाढमुष्टिवर्चाः ॥
निःसंज्ञो भवति पुनर्भवेत्ससंज्ञः
संरब्धः करचरणैश्च नृत्यतीव ।
विण्मूत्रे सृजति विनद्य जृम्भमाणः
फेनञ्च प्रसृजति तत्सखाभिपन्नः ॥
स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
संस्राविव्रणपरिपीडितः समन्तात् ।
स्फोटैश्च प्रततनुः सदाहपाकै
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥
रक्ताक्षो हरितमलोऽतिपाण्डुदेहः
श्यावो वा ज्वरमुखपाकवेदनार्त्तः ।
रेवत्या व्यथिततनुश्च कर्णनासं
मृद्गाति ध्रुवमभिपीडितः कुमारः ॥
स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड्भिन्नं सृजति च काकतुल्यगन्धिः ।
छर्द्यार्त्तो हृषिततनूरुहः कुमार
स्तृष्णालुर्भवति च पूतनागृहीतः ॥
यो द्वेष्टि स्तनमतिसारकासहिक्का
छर्दीभिर्ज्वरसहिताभिरर्द्यमानः ।

दुर्व्वर्णः सततमधःशयोऽम्लगन्धि
स्तं ब्रूयुर्भिषजोऽन्धपूतनार्त्तं॥
उद्विग्नो भृशमतिवेपते प्ररुद्यात्
संलीनः स्वपिति च यस्य चान्त्रकूजः ।
विस्राङ्गो भृशमतिसार्य्यते च यस्तं
जानीयाद्भिषगिह शीतपूतनार्त्तं ॥
म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो
बह्वाशी कलुषसिराहृतोदरो यः ।
सोद्वेगो भवति च मूत्रतुल्यगन्धिः
स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः ॥
यः फेणं वमति विनम्यते च मध्ये
सोद्वेगं विलपति चोर्द्ध्वमीक्षमाणः ।
ज्वर्य्येत प्रततमथो वसासगन्धि
र्न्निःसंज्ञो भवति हि नैगमेषजुष्टः ॥
प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः।
तं बालं नचिराद्धन्ति ग्रहः सम्पूर्णलक्षणः ॥
विपरीतमतःसाध्यं चिकित्सेदचिरार्द्दितं ।
गृहे पुराणहविषाभ्यज्य बालं शुचौ शुचिः ॥
सर्षपान् प्रकिरेत्तेषां तैलैर्द्दीपञ्च कारयेत्।
सदासन्निहितश्चापि जुहुयाद्धव्यवाहनं ॥
सर्व्वगन्धौषधीवीजैर्गन्धमाल्यैरलङ्कृतं ।

अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन् ॥
नमः स्कन्दाय देवाय ग्रहाधिपतये नमः ।
शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे बलिं ॥
निरुजो निर्व्विकारश्च शिशुर्मे जायतां ध्रुवं ॥

---

॥ अष्टाविंशोऽध्यायः ॥

अथातः स्कन्दग्रहप्रतिषेधं व्याख्यास्यामः ॥
स्कन्दग्रहोपसृष्टानां कुमाराणाञ्च शस्यते ।
वातघ्नद्रुमपत्राणां निःक्वाथः परिषेचने ॥
तेषां मूलेषु सिद्धञ्च तैलमभ्यञ्जने हितं ।
सर्व्वगन्धसुरामण्डकैटर्य्यावापमिष्यते ॥
देवदारुणि रास्नायां मधुरेषु द्रुमेषु च ।
सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत् ॥
सर्षपाः सर्पनिर्म्मोको वचा काकादनी घृतं ।
उष्ट्राजाविगवाञ्चैव रोमाण्युद्धूपनं शिशोः ॥
सोमवल्लीमिन्द्रवल्लीं शमीं विल्वस्य कण्टकान् ।
मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत् ॥
रक्तानि माल्यानि तथा पताका रक्ताश्च गन्धा विविधाश्च भक्ष्याः।
घण्टा च देवाय बलिर्न्निवेद्यः सकुक्कुटः स्कन्दगृहे हिताय ॥
स्नानं त्रिरात्रं निशि चत्वरेषु कुर्य्यात्पुनः शालियवैर्न्नवैस्तु ।
अद्भिश्च गायत्र्यभिमन्त्रिताभिः प्रज्वालनं चाहुतिभिश्च वह्नेः ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीं ।
अहन्यहनि कर्त्तव्या या भिषग्भिरतन्द्रितैः ॥
तपसां तेजसां चैव यशसां वपुषां तथा ।
निधनं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरः श्रीमान् रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्द्देवः पातु त्वां क्रौञ्चसूदनः ॥

---

॥ एकोनत्रिंशत्तमोऽध्यायः ॥

अथातः स्कन्दापस्मारप्रतिषेधं व्याख्यास्यामः ॥
विल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेके प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥
सर्व्वगन्धविपक्वन्तु तैलमभ्यञ्जने हितं ।
क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा ॥
विपक्तव्यं घृतं वापि पानीयं पयसान्वितं ।
उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितं ॥
गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतं ।
वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च ॥

अनन्तां कुक्कुटीं विम्बीं मर्कटीञ्चापि धारयेत्।
पक्वापक्वानि मांसानि प्रसन्नं रुधिरं पयः ॥
भूतोदनो निवेद्यश्च स्कन्दापस्मारिणे ऽवटे।
चतुःपथे च कर्त्तव्यं स्नानमस्य यतात्मना ॥
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा।
विशाखसंज्ञस्य शिशोः शिवोऽस्तु विकृताननः ॥

---

॥ त्रिंशत्तमोऽध्यायः ॥

॥ अथातः शकुनीप्रतिषेधं व्याख्यास्यामः ॥

शकुन्यभिपरीतस्य कार्य्यो वैद्येन जानता।
वेतसाम्रकपित्थानां निःक्वाथः परिषेचने ॥
कषायमधुरैस्तैलं कार्य्यमभ्यञ्जने शिशोः।
मधुकोशीरह्रीवेरसारिवोत्पलपद्मकैः ॥
रोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुं।
व्रणप्रोक्तानि चूर्णानि पथ्यानि विविधानि च ॥
स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत्।
शतावरीमृगैर्व्वारुनागदन्तीनिदिग्धिकाः ॥
लक्ष्मणां सहदेवाञ्च बृहतीञ्चापि धारयेत्।
तिलतण्डुलकं माल्यं हरितालं मनःशिला ॥
बलिरेष करञ्जेषु निवेद्यो नियतात्मना।
निकुञ्जे च प्रयोक्तव्यं स्नानमस्य यथाविधि ॥

स्कन्दग्रहोपशमनं घृतं तच्चेह पूजितं ।
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अधोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु ॥
दुर्द्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु ॥

---

॥ एकत्रिंशत्तमोऽध्यायः ॥

अथातो रेवतीप्रतिषेधं व्याख्यास्यामः ॥
अश्वगन्धाजशृङ्गी च सारिवा सपुनर्न्नवा ।
सहे विदरी च तथा कषायाः सेचने हिताः ॥
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसेऽपि वा ॥
धवाश्वकर्णककुभधातकीतिन्दुकीषु च ।
काकोल्यादिगणे चैव पानीयं सर्प्पिरिष्यते ॥
कुलत्थाः शङ्खचूर्णञ्च प्रदेहाः सर्व्वगन्धिकाः ।
गृध्रोलूकपुरीषाणि यवा यवफलो घृतं ॥
सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः ।
वरुणारिष्टकमयं रुचकं सेन्दुकं तथा ॥
सततं धारयेच्चापि छत्रं वा पौत्रजीविकं ।
शुक्लाः सुमनसो लाजाः पयःशाल्योदनं तथा ॥
बलिर्न्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ।

सङ्गमे च भिषक्स्नानं कुर्य्याद्धात्रीकुमारयोः ॥
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ॥
लम्बा कराला विनता तथैव बहुपुत्रिका ।
रेवती सततं माता सा ते देवी प्रसीदतु ॥

---

॥ द्वात्रिंशत्तमोऽध्यायः ॥

अथातः पूतनाप्रतिषेधं व्याख्यास्यामः ॥
कपोतवङ्काऽरलुको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥
वचा वयस्था गोलोमी हरितालं मनःशिलाः ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्गं इष्यते ॥
हितं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकेषु च ।
कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः ।
एलाहरेणवश्चापि योज्या उद्धूपने सदा ॥
गन्धनाकुलिकुम्भीकामज्जानो वदरस्य ।
कर्कटास्थि घृतश्चैव धूपनं सर्षपैः सह ॥
काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च धारयेत् ।
मत्स्यौदनञ्च कुर्व्वीत कृशरां पललं तथा ॥
शरावसम्पुटे कृत्वा बलिं शून्यगृहे हरेत् ॥

उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते।
पूज्या च पूतना देवी बलिभिः सोपहारकैः।
मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा॥
शून्यागाराश्रिता देवी दारकं पातु पूतना।
दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका॥
भिन्नागाराश्रया देवी दारकं पातु पूतना॥

---

॥ त्रयस्त्रिंशत्तमोऽध्यायः ॥

अथातोऽन्धपूतनाप्रतिषेधं व्याख्यास्यामः॥
तिक्तकद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने।
सुरासौवीरकं कुष्ठं हरितालं मनःशिला॥
तथा सर्ज्जरसश्चैव तैलार्थमुपदिश्यते।
पिप्पल्यः पिप्पलीमूलं वर्गो मधुरको मधु॥
शालपर्णी बृहत्यौ च घृतार्थमुपदिश्यते।
सर्व्वगन्धैः प्रदेहश्च गात्रेष्वव्रणेश्च शीतलैः॥
पुरीषं कौक्कुटं केशांश्चर्म्म सर्प्पत्वचन्तथा।
जीर्णाञ्च भिक्षुसङ्घाटीं धूपनायोपकल्पयेत्॥
कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत्।
मांसमामं तथा पक्वं शोणितञ्च चतुःपथे॥
निवेद्यमन्तश्च गृहे शिशोरक्षानिमित्ततः।
शिशोश्च स्नपनं कुर्य्यात्सर्व्वगन्धादिकैः शुभैः॥

कराला पिङ्गला मुण्डा कषायाम्बरवासिनी।
देवी बालमिमं प्रीता संरक्षत्वन्धपूतना॥

---

चतुस्त्रिंशत्तमोऽध्यायः॥

अथातःशीतपूतनाप्रतिषेधं व्याख्यास्यामः॥
कपित्थं सुवहां बिम्बीन्तथा विल्वं प्रचीबलं।
नन्दीं भल्लातकोञ्चापि परिषेके प्रयोजयेत्।
वस्तमूत्रं गवां मूत्रं मुस्तञ्च सुरदारु च॥
कुष्ठञ्च सर्व्वगन्धाश्च तैलार्थमवचारयेत्।
रोहिणीसर्ज्जखदिरपलाशककुभत्वचः॥
निःक्वाथ्य तस्मिन्निःक्वाथे सक्षीरं विपचेत् तं॥
गृध्रोलूकपुरीषाणि वस्तगन्धामहेत्वचः॥
निम्बपत्राणि मधुकं धूपनार्थे प्रयोजयेत्।
धारयेदपि लम्बाञ्च गुञ्जां काकादनीं तथा॥
नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनां।
देव्यै देयश्चोपहारो वारुणीरुधिरं तथा।
जलाशयान्ते बालस्य स्नपनं चोपदिश्यते॥
मुद्गौदनाशना देवी सुराशोणितपायिनी।
जलाशयालया देवी पातु त्वां शीतपूतना॥

---

पञ्चत्रिंशत्तमोऽध्यायः ॥

अथातो मुखमण्डिकाप्रतिषेधं व्याख्यास्यामः ॥

कपित्थबिल्वतर्क्कारीवांशीगन्धर्व्वहस्तकाः ।
कुबेराक्षी च योज्याः स्युर्ब्बालानां परिषेचने ॥
खरसैर्म्मृङ्गवृक्षाणां तथाजहरिगन्धयोः ।
तैलं वसाञ्च संयोज्य पचेदभ्यञ्जने शिशोः ॥
मधूलिकायां पयसि तुगाक्षीर्य्याङ्गणे तथा ।
मधुरे पञ्चमूले च कनीयसि घृतं पचेत् ॥
वचासर्ज्जरसः कुष्ठं सर्प्पिश्चोद्धूपने हितं ।
धारयेदपि जिह्वाश्च चाषचीरल्लिसर्प्पजाः ॥
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा ।
मनःशिलाञ्चोपहरेद्गोष्ठमध्ये बलिं तथा ॥
पायसं सपुरोडासं बल्यर्थमुपहारयेत् ।
मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितं ॥
अलङ्कृता रूपवती सुभगा कामरूपिणी ।
गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका ॥

---

॥ षट्त्रिंशत्तमोऽध्यायः ॥

अथातो नैगमेषप्रतिषेधं व्याख्यास्यामः ॥

बिल्वाग्निमन्थपूतीकाः कार्य्याः स्युः परिषेचने ।
सुराषौवीरधान्याम्लैः परिषेकश्च शस्यते ॥

प्रियङ्गुसरलानन्ताशतपुष्पाकुटन्नटैः।
पचेत्तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः॥
पञ्चमूलद्वयक्काथे चीरे मधुरकेषु च।
पचेद्घृतञ्च मेधावीखर्ज्जूरीमस्तकेऽपि च॥
वचां वयःस्थां गोलोमीं जटिलां वापि धारयेत्।
उत्सादनं हितं चात्र स्कन्दापस्मारनाशनं॥
सिद्धार्थकवचाहिङ्गुकुष्ठश्चैवाचतैः सह।
भल्लातकाजमोदाश्च हितमुद्धूपनं शिशोः॥
मर्क्कटोलूकगृध्राणां पुरीषाणि नवग्रहे।
धूपः सुप्ते जने कार्य्यो बालस्य हितमिच्छता॥
तिलतण्डूलकं माल्यं भक्ष्यांश्च विविधानपि।
कुमारपितृमेषाय वृत्तमूले निवेदयेत्॥
अधस्ताद्वटवृत्तस्य स्नपनं चोपदिश्यते।
बलिं न्यग्रोधवृत्तेषु तिथौ षष्ठ्यां निवेदयेत्॥
अजाननश्चलाचिभ्रूः कामरूपी महायशाः।
बालं पालयिता देवो नैगमेषोऽभिरचतु॥

---

॥ सप्तत्रिंशोऽध्यायः॥

अथातोग्रहोत्पत्तिमध्यायं व्याख्यास्यामः॥
नव स्कन्दादयः प्रोक्ता बालानां य इमे ग्रहाः।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः॥

एते गुहस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः।
सृष्टाः शरवणस्थस्य रक्षितस्यात्मतेजसा ॥
स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः।
गङ्गोमाकृत्तिकानाञ्च ते भागा राजसा मताः॥
नैगमेषस्तु पार्व्वत्या सृष्टो मेषाननो ग्रहः।
कुमारधारी देवस्य गुहस्यात्मसमः सखा॥
स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः।
स च स्कन्दसखा नाम विशाख इति चोच्यते॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
विभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः॥
बाललीलाधरो योऽयं देवो रुद्राग्निसम्भवः।
मिथ्याचारेषु भगवान् स्वयं नैष प्रवर्त्तते॥
कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः।
गृह्णातीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः॥
ततो भगवति स्कन्दे सुरसेनापतौ कृते।
उपतस्थुर्ग्रहाः सर्व्वे दीप्तशक्तिधरं गुहं॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्।
तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च।

देवा मनुष्यान् प्रीणन्ति तैर्य्यग्योनींस्तथैव च॥
वर्त्तमानैर्य्यथा कालं शीतवर्षोष्णमारुतैः।
इज्याञ्जलिनमस्कारजपहोममव्रतादिभिः॥
नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान्।
भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते॥
तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति।
कुलेषु येषु नेज्यन्ते देवाः पितर एव च॥
ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा।
निवृत्ताचारशौचेषु परपाकोपभोजिषु॥
उत्सन्नबलिभिक्षेषु भिन्नकांस्योपभोजिषु।
गृहेषु तेषु ये बालास्तान्गृह्णीध्वमशङ्किताः॥
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति।
एवं ग्रहाः समुत्पन्ना बालान् गृह्णन्ति चाप्यतः॥
ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः।
वैकल्यं मरणं चाशु ध्रुवं स्कन्दग्रहे मतं॥
स्कन्दग्रहोऽत्युग्रतमः सर्व्वेष्वेव यतःस्मृतः।
अन्योवा सर्व्वरूपस्तु न साध्यो ग्रह उच्यते॥

---

अष्टत्रिंशत्तमोऽध्यायः ॥

अथातो योनिव्यापत्प्रतिषेधं व्याख्यास्यामः ॥

प्रवृद्धलिङ्गं पुरुषं यात्यर्थमुपसेवते ।
रूक्षदुर्ब्बलबालायास्तस्या वायुः प्रकुप्यति ॥
स दुष्टो योनिमासाद्य योनिरोगाय कल्पते ।
त्रयाणामपि दोषाणां यथास्वं लक्षणेन तु ॥
विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसङ्ग्रहे ।
मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च ॥
जायन्ते वीजदोषाच्च दैवाच्च शृणु ताः पृथक् ।
उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता ॥
वातला चेति वातोत्था पित्तोत्था रुधिरक्षरा ।
वामिनी स्रंसिनी चापि पुत्त्रघ्नी पित्तला च या ॥
अत्यानन्दा च या योनिः कर्णिनी चरणाद्वयं ।
श्लैष्मिका सकफा ज्ञेया षण्डी च फलिनी तथा ॥
महती सूचिवक्त्रा च सर्व्वजेति त्रिदोषजा ।

सफेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति ॥

बन्ध्यां नष्टार्त्तवां विद्याद्विप्लुतां नित्यवेदनां ।
परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशं ॥
वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता ।
चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः ॥

सदाहं प्रक्षिरत्यस्रं यस्याः सा लोहितक्षरा ।

सवातमुद्गिरेद्वीजं वामिनी रजसायुतं ॥
प्रस्रंसिनी स्यन्दते तु क्षोभिता दुःप्रसूश्च या ।
स्थितं स्थितं हन्ति गर्भं पुत्त्रघ्नी रक्तसंस्रवात् ॥
अत्यर्थं पित्तला योनिर्द्दाहपाकज्वरान्विता ।
चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत् ॥
अत्यानन्दा न सन्तोषं ग्राम्यधर्म्मेण गच्छति ।
कर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यान्तु जायते ॥
मैथुनाचरणात्पूर्व्वं पुरुषादतिरिच्यते ।
बहुशश्चातिचरणादन्या बीजं न विन्दति ॥
श्लेष्मला पिच्छिला योनिः कण्डूयुक्तातिशीतला ।
चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत् ॥
अनार्त्तवस्तना षण्डी खरस्पर्शा च मैथुने ।
अतिकायगृहीतायास्तरुण्याः फलिनी भवेत् ॥
विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता ।
सर्व्वलिङ्गसमुत्थाना सर्व्वदोषप्रकोपजा ॥
चतसृष्वपि चाद्यासु सर्व्वलिङ्गोच्छ्रितिर्भवेत् ।
पञ्चासाध्या भवन्तीमा योनयः सर्व्वदोषजाः ॥
प्रतिदोषन्तु साध्यासु स्नेहादिक्रम इष्यते ।
दद्यादुत्तरवस्तींश्च विशेषेण यथोदितान् ॥
कर्कशां शीतलां स्तब्धामपस्पर्शाञ्च मैथुने ।
कुम्भीस्वेदैरुपचरेत्सानूपौदकसंयुतैः ॥

मधुरौषधसंयुक्तान् वेशवारांश्च योनिषु।
निक्षिपेद्धारयेच्चापि पिचुन्तैलमतन्द्रितः॥
धावनानि च पथ्यानि कुर्व्वीतापूरणानि च।
ओषचोषान्वितास्वक्तं कुर्य्याच्छीतं विधिं भिषक्।
दुर्गन्धां पिच्छिलां चापि चूर्णैः पञ्चकषायजैः॥
पूरयेद्राजवृक्षादिकषायैश्चापि धावनं॥
योन्यान्तु पूयस्राविन्यां शोधनद्रव्यसंभृतैः।
सगोमूत्रैः सलवणैः पिण्डैरापूरणं हितं॥
बृहतीफलकल्कस्य द्विहरिद्रायुतस्य च।
कण्डूमतीमपस्पर्शां पूरयेद्धूपयेत्तथा॥
वर्त्तिं प्रदद्यात्कर्णिन्यां शोधनद्रव्यसम्भृतां।
प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत्॥
पिधाय वेशवारेण ततो बन्धं समाचरेत्।
प्रतिदोषं विदध्याच्च सुरारिष्टासवान् भिषक्॥
प्रातःप्रातर्न्निषेवेत रसोनादुद्धृतं रसं।
क्षीरमांसरसप्रायमाहारं विदधीत च॥
शुक्रार्त्तवादयो दोषाः स्तनरोगाश्च कीर्त्तिताः।
क्लैव्योत्थानानि मूढस्य गर्भस्य विधिरेव च॥
गर्भिणीप्रतिरोगेषु चिकित्सा चाण्डदाहृता।
तां सर्व्वथा प्रयुञ्जीत योनिव्यापत्सु बुद्धिमान्॥
अपप्रजातारोगांश्च चिकित्सेदुत्तराद्भिषक्।

इति सुश्रुताचार्य्यविरचित आयुर्व्वेदशास्त्रे सुश्रुतउत्तरतन्त्रे कौमारभृत्यं समाप्तं॥

---

॥ एकोनचत्वारिंशत्तमोऽध्यायः ॥

अथातो ज्वरप्रतिषेधं व्याख्यास्यामः॥

येनामृतमपां मध्यादुद्धृतं पूर्व्वजन्मनि।
यतोऽमरत्वं सम्प्राप्तास्त्रिदशास्त्रिदिवेश्वरात्॥
शिष्यास्तं देवमासीनं पप्रच्छुः सुश्रुतादयः।
व्रणस्योपद्रवाः प्रोक्ताः व्रणिनामथतः परं॥
समासाद्व्यासतश्चैव ब्रूहि नो भिषजांवर।
उपद्रवेण जुष्टस्तु व्रणः कृच्छ्रेण सिध्यति॥
उपद्रवास्तु व्रणिनः कृच्छ्रसाध्याः प्रकीर्त्तिताः।
प्रक्षीणबलमांसस्य दोषधातुपरिक्षयात्॥
तस्मादुपद्रवान्कृत्स्नान् ब्रूहि नः सचिकित्सितान्।
सर्व्वकायचिकित्सासु ये दृष्टाः परमर्षिभिः॥
तेषां तद्वचनं श्रुत्वा प्राब्रवीद्भिषजांवरः।
ज्वरमादौ प्रवक्ष्यामि सरोगानीकराट् स्मृतः॥
रुद्रकोपाग्निसम्भूतः सर्वभूतप्रतापनः।
तैस्तैर्नामभिरित्येषां सत्वानां परिकीर्त्यते॥
जन्मादौ निधने चैव प्रायो विशति देहिनः।
अतः सर्व्वविकाराणामयं राजा प्रकीर्त्तितः॥

ऋते देवमनुष्येभ्यो नान्यो विषहते तु तं ।
कर्म्मणा लभते यस्माद्देवत्वं मानुषादपि ॥
पुनश्चैव च्युतः स्वर्गान्मानुष्यमनुवर्त्तते ।
तस्मात्ते देवभागेन सहन्ते मानुषा ज्वरं ॥
शेषाः सर्व्वे विपद्यन्ते तैर्य्यग्योना ज्वरार्दिताः ।
स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणं तथा ॥
विकारा युगपद्यस्मिन्ज्वरः स परिकीर्त्तितः ।
दोषैः पृथक समस्तैश्च द्वन्द्वैरागन्तुरेव च ॥
अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः ।
दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपनैः ॥
व्याप्य देहमशेषेण ज्वरमापादयन्ति हि ।
दुष्टाः स्वहेतुभिर्दोषाः प्राप्यामाशयमूष्मणा ॥
सहिता रसमागत्य रसस्वेदप्रवाहिणां ।
स्रोतसां मार्गमावृत्य मन्दीकृत्य हुताशनं ॥
निरस्य वहिरूष्माणं पक्तिस्थानाच्च केवलं ।
शरीरं समभिव्याप्य स्वकालेषु ज्वरागमं ॥
जनयन्त्यथ वृद्धिञ्च स्ववर्णञ्च त्वगादिषु ।
मिथ्यातियुक्तैरपि च स्नेहाद्यैः कर्म्मभिर्नृणां ॥
विविधादभिघाताच्च रोगोत्थानात्प्रपाकतः ।
श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यर्त्तुपर्य्ययात ॥
ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीडनात् ।

अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया ॥
स्त्रीणामपप्रजातानां प्रजातानां तथाहितैः।
स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्त्तते ॥
तैर्व्वेगवद्भिर्व्वहुधा समुद्भ्रान्तैर्विमार्गगैः।
विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु वहिश्चरः ॥
रुणद्धि चाप्यपान्धातुं यस्मात्तस्माज्ज्वरातुरः।
भवत्यत्युष्णगात्रश्च नच स्विद्यति सर्व्वशः ॥
श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनप्लवः।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ॥
सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनं ॥
सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे।
द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः ॥
वेपथुर्व्विषमो वेगः कण्ठोष्ठमुखशोषणं।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं वद्धविट्कता।
जृम्भाध्मानं तथा शूलं भवत्यनिलजे ज्वरे ॥
वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः।
कण्ठोष्ठमुखनासानां पाकः स्वेदश्च जायते ॥

प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥
गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता ।
स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता ॥
नात्युष्णगात्रताच्छर्दिरङ्गसादोऽविपाकता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ॥
निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गतारुचिः ।
तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा ॥
पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता ।
रसना परुषा कृष्णा सन्धिमूर्द्धास्थिजा रुजः ॥
निर्भुग्नकलुषे नेत्रे कर्णौ शब्दरुगन्वितौ ।
प्रलापः स्रोतसाम्पाकः कूजनं चेतनाच्युतिः ॥
स्वेदमूत्रपुरीषाणामल्पशः सुचिरात्सृतिः ।
सर्व्वजे सर्व्वलिङ्गानि विशेषश्चात्र मे शृणु ॥
नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः ।
खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः ॥
सास्रनिर्भुग्नहृदयो भक्तद्वेषी हतप्रभः ।
श्वसन् निपतितः शेते प्रलापोपद्रवायुतः ॥
तमभिन्यासमित्याहुर्हतौजसमथापरे ।
सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः ॥
निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसं ।

संन्यस्तगात्रं संन्यासं विद्यात्सर्व्वात्मके ज्वरे ॥
ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्रयात् ॥
स गात्रस्तम्भशीताभ्यां शयने स्यादचेतनः ।
अपि जाग्रत्स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ॥
संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः ।
ओजोनिरोधजं तस्य जानीयात्कुशलो भिषक् ॥
सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥
द्विदोषोच्छ्रायलिङ्गास्तु द्वन्द्वजास्त्रिविधाः स्मृताः ।
जृम्भाध्मानमदोत्कम्पपर्व्वभेदपरिक्षयाः ॥
हृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके ।
शूलकासकफोत्क्लेशशीतवेपथुपीनसाः ॥
गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे ।
शीतदाहारुचिस्तम्भस्वेदमोहमदभ्रमाः ॥
कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके ।
चामाणां ज्वरमुक्तानां मिथ्याहारविहारिणां ॥
दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः ।
सततान्येद्युष्काख्यचातुर्थान्सप्रलेपकान् ॥
कफस्थानविभागेन यथासङ्ख्यं करोति हि ।
अहोरात्रादहोरात्रात्स्थानात् स्थानं प्रपद्यते ॥
ततश्चामाशयं प्राप्य घोरं कुर्य्याज्ज्वरं नृणां ।

तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः ॥
दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत् ।
कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा ॥
विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान् ।
परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः ॥
आगन्तुश्चानुबन्धो हि प्रायशो विषमज्वरे ।
वाताधिकत्वात्प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च ।
औपात्यके मद्यसमुद्भवे च हेतुं ज्वरे पित्तकृतं वदन्ति ॥
प्रलेपकं वातबलाशकञ्च कफाधिकत्वेन वदन्ति तज्ज्ञाः ।
मूर्च्छानुबन्धा विषमज्वरा ये प्रायेण ते द्वन्द्वसमुत्थितास्तु ॥
त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ॥
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ।
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ॥
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ।
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ॥
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमः स्मृतः ।
प्रसक्तश्चाभिघातोत्थश्चेतनाप्रभवस्तु यः ॥
रात्र्यह्नोः षट्सु कालेषु कीर्त्तितेषु यथा पुरा ।
प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः ॥
सचापि विषमो देहं न कदाचिद्विमुञ्चति ।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते ॥

वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते ।
धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते ॥
अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः ।
दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः ॥
धातुमन्यतमं प्राप्य करोति विषमज्वरं ।
सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ॥
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ।
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करं ॥
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरं ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ॥
सन्तत्या योऽविसर्गी स्यात्सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥
अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
वातेनोद्धूयमानस्तु यथा पूर्य्येत सागरः ।
वातेनोदीरितास्तद्वद्दोषाः कुर्व्वन्ति वै ज्वरान् ॥
यथा वेगागमे वेलां छादयित्वा महोदधेः ।
वेगहानौ तदेवाम्भस्तत्रैवान्तर्न्निधीयते ॥
दोषवेगोदये तद्वदुदीर्य्येत ज्वरोऽस्य वा ।
वेगहानौ प्रशाम्येत यथाम्भः सागरे तथा ॥
विविधेनाभिघातेन ज्वरो यः सम्प्रवर्त्तते ।

यथादोषप्रकोपन्तु तथा मन्येत तं ज्वरं ॥
श्यावास्यता विषकृते दाहातीसारहृद्ग्रहाः ।
अभक्तारुक् पिपासा च तोदो मूर्च्छा बलक्षयः ॥
ओषधीगन्धजे मूर्च्छा शिरोरुक्‌वमथुस्तथा ।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभक्तरुक् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ।
भयात्प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः ॥
अभिचाराभिशापाभ्यां मोहस्तृष्णाभिजायते ।
भूताभिषङ्गादुद्वेगहास्यकम्पनरोदनं ॥
श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः ।
पूरयित्वाखिलं देहं ज्वरमापादयेद्भृशं ॥
रोगाणां तु समुत्थानाद्विदाहागन्तुतस्तथा ।
ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः ॥
दोषाणां स तु लिङ्गानि कदाचिन्नातिवर्त्तते ।
गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ॥
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ।
हतप्रभेन्द्रियं चामं दुरात्मानमुपद्रुतं ।
गभीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ।
हीनमध्याधिकैर्दोषैस्त्रिसप्तदादशाहिकः ॥
ज्वरवेगो भवेत्तीव्रो यथापूर्व्वं सुखक्रियः ।
इति ज्वराः समाख्याताः कर्म्मेदानीं प्रवक्ष्यते ॥

ज्वरस्य पूर्व्वरूपेषु वर्त्तमानेषु बुद्धिमान् ।
पाययेत घृतं स्वच्छं ततः स लभते सुखं ॥
विधिर्म्मारुतजेष्वेष पैत्तिकेषु विरेचनं ।
मृदु प्रच्छर्दनं तद्वत्कफजेषु विधीयते ॥
सर्व्वं द्विदोषजेषूक्तं यथादोषं विकल्पयेत् ।
अस्नेहनीयोऽशोध्यश्च संयोज्यो लङ्घनादिना ॥
रूपप्राग्रूपयोर्व्विद्यान्नानात्वं वह्निधूमवत् ।
प्रव्यक्तरूपेषु हितमेकान्तेनापतर्प्पणं ॥
आमाशयस्थे दोषे तु सोत्क्लेशे वमनं परं ।
आनद्धस्तिमितैर्द्दोषैर्य्यावन्तं कालमातुरः ॥
कुर्य्यादनशनं तावत्ततः संसर्गमाचरेत् ।
न लङ्घयेन्मारुतजे चयजे मानसे तथा ॥
अलङ्घ्याश्चापि ये पूर्व्वं द्विव्रणीये प्रकीर्त्तिताः ।
अनवस्थितदोषाग्नेर्ल्लङ्घनं दोषपाचनं ॥
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकं ।
सृष्टमारुतविण्मूत्रं क्षुत्पिपासाऽसहं लघुं ॥
प्रसन्नात्मेन्द्रियं चामं नरं विद्यात्सुलङ्घितं ।
बलक्षयस्तृषाशोषस्तन्द्रानिद्राभ्रमक्लमाः ॥
उपद्रवाश्च श्वासाद्याः सम्भवन्त्यतिलङ्घनात् ।
दीपनं कफविच्छेदि पित्तवातानुलोमनं ॥
कफवातज्वरार्त्तेभ्यो हितमुष्णाम्बु तृट्छिदं ।

तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा ॥
सेव्यमानेन तोयेन ज्वरः शीतेन वर्द्धते।
पित्तमद्यविषोत्थेषु शीतलं तिक्तकैः शृतं ॥
गाङ्गेयनागरोशीरपर्पटोदीच्यचन्दनैः।
दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥
अन्नकाले हिता पेया यथास्वम्पाचनैः कृता।
बहुदोषस्य मन्दाग्नेः सप्तरात्रात्परं ज्वरे ॥
लङ्घनान्ते यवागूभिर्यदा दोषो न पच्यते।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः ॥
कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत्।
पञ्चमूलीकषायन्तु पाचनं पवनज्वरे ॥
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतं।
पिप्पल्यादिकषायन्तु कफजे परिपाचनं ॥
द्वन्द्वजेषु तु संसृष्टं दद्यादथ विवर्ज्जयेत्।
पीताम्बुर्लङ्घितोभुक्तो जीर्णो क्षीणः पिपासितः ॥
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।
पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधं ॥
दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणं।
हृदयोद्वेष्टनं तन्द्रा लालास्रुतिररोचकः ॥
दोषाप्रवृत्तिरालस्यं विबन्धो बहुमूत्रता।
गुरूदरत्वमस्वेदो न पक्तिः शकृतोऽरतिः ॥

स्वापः स्तम्भो गुरुत्वञ्च गात्राणां वह्निमार्द्दवं।
मुखस्याशुद्धिरग्लानिः प्रसक्तो बलवान् ज्वरः॥
लिङ्गैरेभिर्व्विजानीयाज्ज्वरमामं विचक्षणः।
सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधं॥
दशरात्रात्परं केचिद्दातव्यमिति निश्चिताः।
पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते॥
अचिरज्वरितस्यापि देयं स्याद्दोषपाकतः।
भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरं॥
शोधनं शमनीयन्तु करोति विषमज्वरं।
च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं सदा॥
अतिप्रवर्त्तमानञ्च साधयेदतिसारवत्।
यदा कोष्ठानुगाः पक्वा विबद्धाः स्रोतसां मलाः॥
अचिरज्वरितस्यापि तदा दद्याद्विरेचनं।
पक्वोह्यनिर्हृतोदोषो देहे तिष्ठन् महात्ययं॥
विषमम् वा ज्वरं कुर्य्याद्बलव्यापदमेव च।
तस्मान्निर्हरणं कार्य्यं दोषाणां वमनादिभिः॥
प्राक्कर्म्म वमनं चास्य कार्य्यमास्थापनं तथा।
विरेचनं तथा कुर्य्याच्छिरसश्च विरेचनं॥
क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे।
पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये॥
सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणं।

कटीपृष्ठग्रहार्त्तस्य दीप्ताग्नेरनुवासनं ॥
शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनं ।
कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनं ॥
दुर्ब्बलस्य समाध्मातमुदरं सरुजं दिहेत् ।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥
अम्लपिष्टैः सुखोष्णैश्च पवनेतूर्द्धमागते ।
रुद्धमूत्रपुरीषाय गुदे वर्त्तिं निधापयेत् ॥
पिप्पलीपिप्पलीमूलयवानीचव्यसाधितां ।
पाययेत यवागूं वा मारुताद्यनुलोमनीं ॥
शुद्धस्योभयतो यस्य ज्वरः शान्तिं न गच्छति ।
सश्लेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत् ॥
कृशश्चैवाल्पदोषश्च शमनीयैरुपाचरेत् ।
उपवासैर्ब्बलस्थन्तु ज्वरे सन्तर्पणोत्थिते ॥
क्लिन्नां यवागूं मन्दाग्निं तृषार्त्तं पाययेन्नरं ।
तृट्छर्द्दिदाहघर्म्मार्त्तं मद्यपं लाजतर्पणं ॥
सक्षौद्रमम्भसा पश्चाज्जीर्णे यूषरसौदनं ।
उपवासश्रमकृते क्षीणे वाताधिके ज्वरे ॥
दीप्ताग्निं भोजयेत्प्राज्ञो नरं मांसरसौदनं ।
मुद्गयूषौदनश्चापि हितं कफसमुत्थिते ॥
स एव सितया युक्तः शीतः पित्तज्वरे हितः ।
दाडिमामलमुद्गानां यूषश्चानिलपैत्तिके ।

ह्रस्वमूलकयूषेण भोजयेत्कफवातिके ॥
पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके ।
दाहच्छर्द्दियुतं चामं निरन्नं तृष्णयार्दितं ॥
सिताक्षौद्रयुतं लाजतर्प्पणं पाययेत च ।
कफपित्तपरीतस्य ग्रीष्मेऽसृक्पित्तिनस्तथा ॥
मद्यनित्यस्य न हिता यवागूस्तमुपाचरेत् ।
यूषैरम्लैरनम्लैर्व्वा जाङ्गलैर्व्वा रसैर्हितैः ॥
मद्यं पुराणं मन्दाग्नेर्य्यवान्नोपहितं हितं ।
सव्योषं वितरेत्तक्रङ्कफारोचकपीडिते ॥
क्षीणोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्द्दितः ।
विबद्धः सृष्टदोषश्च रूक्षः पित्तानिलज्वरी ॥
पिपासार्त्तः सदाहो वा पयसा स सुखी भवेत् ।
तदेव तु पयः पीतं तरुणे हन्ति मानवं ॥
सर्व्वज्वरेषु सप्ताहं मात्रावद्भोजनं हितं ।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनं ॥
ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा ॥
गुर्व्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथञ्चन ।
नतु तस्याहितं भुक्तमायुषे वा सुखाय वा ॥
सततं विषमं वापि क्षीणस्य सुचिरोत्थितं ।
ज्वरं संभोजनैः पथ्यैर्लघुभिः समुपाचरेत् ॥

मुद्गान्मसूरांश्चणकान्कुलत्थान्समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥
लावान्कपिञ्जलानेणान् पृषतान् शरभान् शशान् ।
कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकान् ॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ।
सारसक्रौञ्चशिखिनः कुक्कुटांस्तित्तिरींस्तथा ॥
गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः ।
ज्वरितानां प्रकोपन्तु यदा याति समीरणः ॥
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ।
परिषेकावगाहांश्च स्नेहान् संशोधनानि च ॥
स्नानाभ्यङ्गदिवास्वप्नशीतव्यायामयोषितः ।
न भजेत ज्वरोत्सृष्टो यावन्नो बलवान्भवेत् ॥
त्यक्तस्यापि ज्वरेणाशु दुर्बलस्याहितैर्ज्वरः ।
प्रत्यापन्नो दहेद्देहं शुष्कं वृक्षमिवानलः ॥
तस्मात्कार्य्यः परीहारो ज्वरमुक्तेन जन्तुना ।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥
ज्वरे प्रमोहो भवति स्वल्पैरप्यवचेष्टितैः ।
निषण्णं भोजयेत्तस्मान्मूत्रोच्चारौ च कारयेत् ॥
अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु ।
शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः ॥
न जातु तर्पयेत्प्राज्ञः सहसा ज्वरकर्शितं ।

तेन सन्दूषिता ह्यस्य पुनरेव भवेज्ज्वरः ॥
चिकित्सेच्च ज्वरान् सर्व्वान्निमित्तानां विपर्य्ययैः ।
श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत् ॥
स्त्रीणामपप्रजातानां स्तन्यावतरणे च यः ।
तत्र संशमनं कुर्य्याद्यथादोषं विधानवित् ॥
अतःसंशमनीयानि कषायाणि निबोध मे ।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता ॥
पिप्पलीसारिवाद्राक्षाशतपुष्पाहरेणुभिः ।
कृतः कषायः सगुडो हन्याच्छ्वसनजं ज्वरं ॥
शृतशीतकषायं वा गुडूच्याः पेयमेव तु ।
बलादर्भश्वदंष्ट्राणां कषायं पादशेषितं ॥
शर्कराघृतसंयुक्तं पिबेद्वातज्वरापहं ।
शतपुष्पावचाकुष्ठं देवदारुहरेणुकाः ॥
कुस्तुम्बुरूणि नलदं मुस्तं चैवाप्सु साधयेत् ।
क्षौद्रेण सितया चापि युक्तः क्वाथोऽनिलात्मके ॥
द्राक्षागुडूचीकाश्मर्य्यत्रायमाणाः ससारिवाः ॥
निःक्वाथ्य सगुडं क्वाथं पिबेद्वातकृते ज्वरे ।
गुडूच्याः स्वरसो ग्राह्यः शतावर्य्याश्च तत्समः ।
निहन्यात्सगुडः पीतः सद्योऽनिलकृतं ज्वरं ॥
घृताभ्यङ्गस्वेदलेपानवस्थासु च योजयेत् ।
श्रीपर्णिचन्दनोशीरपरूषकमधूकजः ॥

शर्करामधुरो हन्ति कषायः पैत्तिकं ज्वरं ।
पीतं पित्तज्वरं हन्यात्सारिवाद्यं सशर्करं ॥
सयष्टीमधुकं हन्यात्तथैवोत्पलपूर्व्वकं ।
शृतशीतकषायं वा सोत्पलं शर्करायुतं ॥
गुडूचीपद्मरोध्राणां सारिवोत्पलयोस्तथा ।
शर्करामधुरः क्वाथः शीतः पित्तज्वरापहः ॥
द्राक्षारग्वधयोश्चापि काश्मर्य्यस्याथ वा पुनः ।
स्वादुतिक्तकषायाणां कषायैः शर्करायुतैः ॥
सुशीतैः शमयेत्तृष्णां प्रवृद्धां दाहमेव च ।
शीतं मधुयुतं तोयमाकण्ठाद्वा पिपासितं ॥
वामयेत्पाययित्वा तु तेन तृष्णा प्रशाम्यति ।
क्षीरैः क्षीरिकषायैश्च सुशीतैश्चन्दनायुतैः ॥
अन्तर्द्दाहे विधातव्यमेतैश्चान्यैश्च शीतलैः ।
निदध्यादप्सु चालोड्य निशापर्य्युषितं ततः ॥
क्षौद्रेण युक्तं पिबतो ज्वरदाहौ प्रशाम्यतः ।
पद्मकं मधुकं द्राक्षा पुण्डरीकमथोत्पलं ॥
यवान्मृष्टानुशीराणि समङ्गा काश्मरीफलं ।
जिह्वातालुगलक्लोमशोषे मूर्द्ध्नि च दापयेत् ॥
केशरं मातुलङ्गस्य मधुसैन्धवसंयुतं ।
शर्करादाडिमाभ्यां वा द्राक्षाखर्ज्जूरयोस्तथा ॥
वैरस्ये धारयेत्कल्कं गण्डूषञ्च यथा हितं ।

सप्तच्छदं गुडूचीञ्च निम्बस्फूर्ज्जकमेव च ॥
क्वाथयित्वा पिबेत्क्वाथं सक्षौद्रं कफजे ज्वरे ।
कटुत्रिकं नागपुष्पं हरिद्रा कटुरोहिणी ॥
कौटजञ्च फलं हन्यात्सेव्यमानं कफज्वरं ।
हरिद्रां चित्रकं निम्बमुशीरातिविषे वचां ॥
कुष्ठमिन्द्रयवान्मूर्व्वां पटोलं चापि साधितं ।
पिबेन्मरिचसंयुक्तं सक्षौद्रं कफजे ज्वरे ॥
सारिवातिविषाकुष्ठपुराख्यैः सदुरालभैः ।
मुस्तेन च कृतः क्वाथः पीतो हन्यात्कफज्वरं ॥
मुस्तं वृचकबीजानि त्रिफलाकटुरोहिणी ।
परूषकानि च क्वाथः कफज्वरविनाशनः ॥
राजवृचादिवर्गस्य कषायं मधुसंयुतं ।
कफवातज्वरं हन्याच्छीघ्रं कालेऽवचारितं ॥
नागरं धान्यकं भार्गीमभयां सुरदारु च ।
वचां पर्प्पटकं मुस्तम्भूतीकमथ कटफलं ॥
निःक्वाथ्य कफवातोत्थे चौद्रहिङ्गुसमन्वितं ।
पातव्यं श्वासकासघ्नं श्लेष्मोत्सेके गलग्रहे ॥
हिक्कासु कण्ठश्वयथौ शूले हृदयपार्श्वजे ।
एलापटोलत्रिफलायष्ट्याह्वानां वृषस्य च ॥
क्वाथो मधुयुतः पीतो हन्ति पित्तकफज्वरं ।
कटुकाविजयाद्राचामुस्तपर्प्पटकैः कृतः ॥

कषायो नाशयेत्पीतः श्लेष्मपित्तभवं ज्वरं ।
भार्गीवचापर्प्पटकधान्यहिंग्वभयाघनैः ॥
काश्मर्य्यनागरैः क्वाथः सक्षौद्रः श्लेष्मपित्तजे ।
सशर्करामक्षमात्रां तु कटुकामुष्णवारिणा ॥
पीत्वा ज्वरं जयेज्जन्तुः कफपित्तसमुद्भवं ।
किराततिक्तममृतं द्राक्षामामलकं शटीं ॥
निःक्वाथ्य वातपित्तोत्थे तं क्वाथं सगुडं पिबेत् ।
रास्ना वृषोत्थस्त्रिफलाराजवृक्षफलैः सह ॥
कषायः साधितः पीतो वातपित्तज्वरं जयेत् ।
सर्वदोषसमुत्थे तु संसृष्टानवचारयेत् ॥
यथा दोषोच्छ्रयं चापि ज्वरान् सर्व्वानुपाचरेत् ।
वृश्चीकविल्ववर्षाभूःपयश्चोदकमेव च ॥
पचेत्क्षीरावशिष्टंतु तद्धि सर्वज्वरापहं ।
उदकांशास्त्रयः क्षीरं शिंशपासारसंयुतं ॥
तत्क्षीरशेषं कथितं पेयं सर्वज्वरापहं ।
नलवेतसयोर्म्मूले मूर्व्वायां देवदारुणि ॥
कषायं विधिवत्कृत्वा पेयमेतज्ज्वरापहं ।
त्रैफले वा ससर्प्पिष्कः क्वाथःपेयस्त्रिदोषजे ॥
अनन्तां बालकं मुस्तां नागरं कटुरोहिणीं ।
सुखाम्बुना प्रागुदयात्पाययेताक्षसम्मितं ॥
एषसर्व्वज्वरान् हन्ति दीपयत्याशु चानलं ।

द्रव्याणि दीपनीयानि तथा वैरेचनानि च॥
एकशो वा द्विशो वापि ज्वरघ्नानि प्रयोजयेत् ।
सर्पिर्म्मध्वभयातैललेहोऽयं सर्व्वजं ज्वरं ॥
शान्तिं नयेत्तृहचापि सक्षौद्रा प्रबलं ज्वरं ।
ज्वरे तु विषमे कार्य्यमूर्द्ध्वं चाधस्य शोधनं॥
घृतं क्षीदोदरोक्तं वा निहन्याद्विषमज्वरं॥
गुडप्रगाढां त्रिफलां पिवेद्दा विषमार्द्दितः ॥
गुडूचीनिम्बधात्रीणां कषायं वा समाचिकं॥
प्रातः प्रातः ससर्पिष्कं रसोनमुपयोजयेत् ।
त्रिचतुर्भिः पचेत्क्काथं पञ्चभिर्व्वा समन्वितैः ॥
मधुकस्य पटोलस्य रोहिण्या मुस्तकस्य च ॥
हरीतक्याश्च सर्व्वोऽयं त्रिविधो योग इष्यते ।
सर्प्पिःक्षीरसिताक्षौद्रमागधीर्व्वा यथाबलं ॥
दशमूलीकषायेण मागधीर्व्वा प्रयोजयेत् ।
पिप्पलीवर्द्धमानं वा पिवेत् क्षीररसाशनः ॥
ताम्रचूडस्य मांसेन पिवेद्दा मद्यमुत्तमं ।
कोलाग्निमन्थत्रिफलाक्काथे दध्ना घृतं पचेत्॥
तिल्वकावापमेतद्धि विषमज्वरनाशनं ।
पिप्पल्यतिविषाद्राक्षासारिवाविल्वचन्दनैः ॥
कटुकेन्द्रयवोशीरसिंहीतामलकीघनैः ।
त्रायमाणास्थिराधात्रीविश्वभेषजचित्रकैः ॥

पक्वमेतैर्घृतं पीतं विजित्य विषमाग्नितां ।
जीर्णज्वरशिरःशूलगुल्मोदरहलीमकं ॥
क्षयकासं ससन्तापं पार्श्वशूलानपास्यति ।
गुडूचीत्रिफलावासात्रायमाणायवासकैः ॥
क्वथितैर्व्विधिवत्पक्वमेतैः कल्कीकृतैः समैः ।
द्राक्षामागधिकाम्भोदनागरोत्पलचन्दनैः ॥
पीतं सर्प्पिः क्षयश्वासकासाजीर्णज्वरान् जयेत् ।
कलशीबृहतीद्राक्षात्रायन्तीनिम्बगोक्षुरैः ॥
बलापर्प्पटकाम्भोदशालपर्णीयवासकैः ।
पक्वमुत्क्वथितैः सर्प्पिः कल्कैरेभिः समन्वितैः ॥
शटीतामलकीभार्गीमेदाकतकपौष्करैः ।
क्षीरद्विगुणसंयुक्तं जीर्णज्वरमपोहति ॥
शिरःपार्श्वरुजाकासक्षयप्रशमनं परं ।
पटोलीपर्प्पटारिष्टगुडूचीत्रिफलावृषैः ॥
कटुकाम्बुदभूनिम्बयासयष्ट्याह्वचन्दनैः ।
दार्व्वीशक्रयवोशीरत्रायमाणाकणोत्पलैः ॥
धात्रीमृङ्गरजोभीरुकाकमाक्षीरसैर्घृतं ।
सिद्धमाश्वपचीकुष्ठज्वरशुक्रार्ज्जुनव्रणान् ॥
हन्यान्नयनवदनकर्णजान् घ्राणजान् गदान् ।
विडङ्गत्रिफलामुस्तमञ्जिष्ठादाडिमोत्पलैः ।
प्रियंग्वेलैलवालूकचन्दनामरदारुभिः ॥

बर्हिष्ठकुष्ठरजनीपर्णिनीसारिवाद्वयैः ।
हरेणुकाह्वन्द्वन्तीवचातालीशकेसरैः ॥
द्विचीरं विपचेत्सर्पिर्मालतीकुसुमैः सह ।
विषमज्वरकश्वासगुल्मोन्मादगरापहं ॥
एतत्कल्याणकं नाम सर्पिर्माङ्गल्यमुत्तमं ।
अलक्ष्मीग्रहरक्षोऽग्निमान्द्यापस्मारपापनुत् ॥
शस्यते नष्टशुक्राणां बन्ध्यानां गर्भदं परं ।
मेध्यञ्चक्षुष्यमायुष्यं रेतोमार्गरुजापहं ॥
एतैरेव यथाद्रव्यैः सर्व्वगन्धैश्च साधितं ।
कपिलाया घृतप्रस्थं सुवर्णमणिसंयुतं ॥
तत्क्षीरेण सहैकध्यं प्रसाध्य कुसुमैरिमैः ।
सुमनश्चम्पकाशोकशिरीषकुसुमैर्घृतं ॥
तथानलदपद्मानां केशरैर्दाडिमस्य च ।
तिथौ प्रशस्ते नक्षत्रे साधकस्यातुरस्य च ॥
कृतं मनुष्यदेवाय ब्राह्मणैरभिमन्त्रितं ।
दत्तं सर्व्वज्वरान् हन्ति महाकल्याणकं घृतं ॥
दर्शनस्पर्शनाभ्यान्तु सर्व्वरोगहरं शिवं ।
अधृष्यः सर्व्वभूतानां बलीपलितवर्ज्जितः ॥
अस्याभ्यासाद्घृतस्येह जीवेद्दर्षशतत्रयं ।
गव्यं दधि च मूत्रञ्च चीरं सर्पिः शकृद्रसः ॥
समभागानि पाच्यानि कल्कांश्चैतान्समावपेत् ।

त्रिफलां चित्रकं मुस्तं हरिद्रे द्वे विषां वचां ॥
विडङ्गं त्र्यूषणञ्चव्यं सुरदारु तथैव च ।
पञ्चगव्यमिदं पानाद्विषमज्वरनाशनं ॥
पञ्चगव्यघृते गर्भात्याच्यमन्यद्वृषेण च ।
बलयाथ परं पाच्यं गुडूच्या तद्वदेव तु ॥
जीर्णज्वरे च शोफे च पाण्डुरोगे च पूजितं ।
एतेनैव तु कल्पेन घृतं पञ्चाविकं पचेत् ॥
पञ्चाजम्पञ्चमहिषं चतुरुष्ट्रमथापि वा ।
त्रिफलाशीरसम्पाककटुकातिविषान्वितैः ॥
शतावरीसप्तपर्णगुडूचीरजनीद्वयैः ।
चित्रकत्रिवृतामूर्व्वापटोलारिष्टवालकैः ॥
किराततिक्तकवचाविशालापद्मकोत्पलैः ।
सारिवाद्वययष्ट्याङ्कचविकारक्तचन्दनैः ॥
दुरालभापर्पटकत्रायमाणाटरूषकैः ।
रास्नाकुङ्कुममञ्जिष्ठामागधीनागरैस्तथा ॥
धात्रीफलरसैः सम्यग्द्विगुणैः साधितं हविः ।
परिसर्पज्वरश्वासगुल्मकुष्ठनिवारणं ॥
पाण्डुप्लीहाग्निमान्द्येभ्य एतदेव परं हितं ।
पटोलकटुकादार्व्वीनिम्बवासफलत्रिकं ॥
दुरालभापर्पटकत्रायमाणाः पलोन्मिताः ।
प्रस्थमामलकानाञ्च क्वाथयेत्सलिलार्म्मणे ॥

तेन पादावशेषेण घृतप्रस्थं विपाचयेत्।
रक्तपित्तकफस्वेदक्लेदपूयाङ्गशोषणं ॥
कामलाज्वरवीसर्प्पगण्डमालाहरं परं।
शृतम्पयः शर्करा च पिप्पल्यो मधुसर्प्पिषी ॥
पञ्चसारमिदं पेयं मथितं विषमज्वरे।
चतक्षीणे क्षये श्वासे हृद्रोगे चैतदिष्यते ॥
लाक्षाविश्वनिशामूर्वामञ्जिष्ठाखर्जिकामयैः।
षड्गुणेन च तक्रेण सिद्धं तैलं ज्वरान्तकृत् ॥
क्षीरिवृक्षासनारिष्टं जम्बूसप्तच्छदार्जुनैः।
शिरीषखदिरास्फोतामृतवल्ल्यटरूषकैः ॥
कटुकापर्पटोशीरवचातेजोवतीघनैः।
साधितं तैलमभ्यङ्गादाशु जीर्णज्वरापहं ॥
निर्व्विषैर्भुजगैर्न्नागैर्व्विनीतैः कृततस्करैः।
त्रासयेदागमे चैनं तदहर्भोजयेन्न च ॥
अत्यभिष्यन्दिगुरुभिर्व्वामयेद्वा पुनःपुनः।
मद्यं तीक्ष्णं पाययेत घृतं वा ज्वरनाशनं ॥
पुराणं वा घृतं काममुदारं वा विरेचनं।
निरूहयेद्वा मतिमान्सुखिन्नं तदहर्न्नरं ॥
अजाव्योश्चर्म्मरोमाणि वचाकुष्ठं पलङ्कषा।
निम्बपत्त्रम्मधुयुतं धूपनन्तस्य दापयेत् ॥
वैडालं वा शकृद्योज्यं वेपमानस्य धूपनं।

पिप्पलीसैन्धवं तैलं नैपालोचेक्षणाञ्जनं ॥
उदरोक्तानि सर्प्पींषि यान्युक्तानि पुरा मया ।
कल्पोक्तं चाजितं सर्प्पिः सेव्यमानं ज्वरं जयेत् ॥
भूतविद्यासमुद्दिष्टैर्ब्बन्धावेशनताडनैः ।
जयेद्भूताभिषङ्गोत्थं विज्ञानाद्यैश्च मानसं ॥
श्रमक्षयेच भुञ्जीत घृताभ्यक्तो रसौदनं ।
अभिशापाभिचारोत्थौ ज्वरौ होमादिना जयेत् ॥
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीडजौ ।
अभिघातज्वरे कुर्य्यात् क्रियामुष्णविवर्ज्जितां ॥
कषायमधुरां स्निग्धां यथा दोषमथापि वा ।
औषधीगन्धविषजौ विषपित्तप्रसाधनैः ।
जयेत् कषायं च हितं सर्व्वगन्धकृतं तथा ॥
निम्बदारुकषायं वा हितं सौमनसं तथा ।
यवान्नविकृतिः सर्पिर्मद्यञ्च विषमे हितं ॥
सम्पूजयेद्द्विजान् गाश्च देवमीशानमम्बिकां ।
कफवातोत्थयोश्चापि ज्वरयोः शीतपीडितं ॥
दिह्यादुष्णेन वर्गेण परश्चोष्णो विधिर्हितः ।
सिञ्चेत्कोष्णैरारनालशुक्तगोमूत्रमस्तुभिः ॥
दिह्यात्पलाशैरथ वा सुरसार्ज्जकशिग्रुजैः ।
क्षारतैलेन चाभ्यङ्गः सशुक्तेन विधीयते ॥
पानमारग्वधादेश्च कथितस्य विशेषतः ।

अवगाहः सुखोष्णश्च वातघ्नक्राथसंयुतः ॥
जित्वा शीतं क्रमैरेभिः सुखोष्णजलसेचितं ।
प्रवेश्यार्णिककार्पासकौशेयाम्बरसंवृतं ॥
शाययेद्ग्लानदेहञ्च कालागुरुविभूषितं ।
स्तनाढ्या रूपसम्पन्नाः कुशला नवयौवनाः ॥
भजेयुः प्रमदा गात्रैः शीतदैन्यापहारिभिः ।
शरच्छशाङ्कवदना नीलोत्पलदलेक्षणाः ।
स्फुरितभ्रूलताभङ्गललाटतटकम्पनाः ।
प्रलम्बिविलसत्काञ्च्यो विम्बीफलनिभाधराः ॥
कृशोदर्य्योऽतिविस्तीर्णजघनोद्वहनालसाः ।
कुङ्कुमागुरुदिग्धाङ्ग्यो घनतुङ्गपयोधराः ॥
सुगन्धिधूपितश्लक्ष्णस्रस्तांशुकविभूषणाः ।
गाढमालिङ्गयेयुस्तं नरं वनलता इव ॥
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत्पुनः ।
तासामङ्गवरश्लेषनिवारितहिमज्वरं ॥
भोजयेद्धितमन्नञ्च तथासुखमवाप्नुयात् ।
दाहाभिभूते तु विधिं कुर्य्याद्दाहविनाशनं॥
मधुफाणितयुक्तेन निम्बपत्राम्भसापि वा ।
दाहज्वरार्त्तं मतिमान् वामयेत् क्षिप्रमेव च ॥
शतधौतघृताभ्यक्तं दिह्याद्वा यवशक्तुभिः ।
कोलामलकसंयुक्तैः शूकधान्याम्लसंयुतैः ॥

अम्लपिष्टैः सुशीतैश्च फेणिलापल्लवैस्तथा ।
अम्लपिष्टैस्तु शीतैर्वा पलाशतरुजैर्द्दिहेत् ॥
वदरीपल्लवोत्थेन फेनेनारिष्टकस्य च ।
लिप्तेऽङ्गे दाहतृण्मूर्च्छा सर्व्वथैव प्रशाम्यति ॥
यवार्द्धकुडवं पिष्ट्वा मञ्जिष्ठार्द्धफलं तथा ।
अम्लप्रस्थशतोन्मिश्रं तैलप्रस्थं विपाचयेत् ॥
एतत्प्रह्लादनं तैलं ज्वरदाहविनाशनं ।
न्यग्रोधादिर्गणो यस्तु काकोल्यादिश्च यो गणः ॥
उत्पलादिर्गणो यस्तु पिष्टैर्वा तैः प्रलेपयेत् ।
तत्कषायाम्लसंसिद्धाः स्नेहाश्चाभ्यञ्जने हिताः ॥
तेषां शीतकषाये वा दाहार्त्तमवगाहयेत् ।
दाहवेगे त्वतिक्रान्ते तस्मादुद्धृत्य मानवं ॥
परिषिच्याम्बुभिः शीतैः प्रलिम्पेच्चन्दनादिभिः ।
सानन्दा दीनमनसमाश्लिषेयुर्व्वराङ्गनाः ॥
पेलवक्षौमसंवीताश्चन्दनार्द्रपयोधराः ।
बिभ्रत्योऽजस्रजस्त्रिचा मणिहारविभूषिताः ॥
भजेयुस्ताः स्तनैः शीतैः स्पृशन्त्योऽम्बुदहैः सुखैः ।
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत्पुनः ॥
हितं च भोजयेदन्नं तथाप्नोति सुखं महत् ।
पित्तज्वरोक्तं शमनं विरेकोऽन्यद्धितं च यत् ॥
निर्हरेत्पित्तमेवादौ ज्वरेषु समवायिषु ।

दुर्न्निवारतरं तद्धि ज्वरार्त्तेषु विशेषतः ॥
छर्द्दिमूर्च्छापिपासादीनविरोधाज्ज्वरस्य तु ।
उपद्रवान् जयेच्चापि प्रत्यनीकेन हेतुना ॥
विशेषमपरं चात्र शृणूपद्रवनाशनं ।
मधुकं रजनीमुस्तं दाडिमञ्चाम्लवेतसं ॥
अञ्जनं तित्तिरीकञ्च नलदं पत्रमुत्पलं ।
त्वचं व्याघ्रनखं चैव मातुलुङ्गरसो मधु ॥
दिह्यादेभिर्ज्वरार्त्तस्य मधुशुक्तयुतैः शिरः
शिरोऽभितापसंमोहवमिहिक्काप्रवेपथून् ॥
प्रदेहो नाशयत्येष ज्वरितानामुपद्रवान् ।
मधूकमथ ह्रीवेरमुत्पलानि मधूलिकां ॥
लीढ्वा चूर्णानि मधुना सर्पिषा च जयेद्वमिं ।
कफप्रसेकासृक्पित्तहिक्काश्वासांश्च दारुणान् ॥
लिहन् ज्वरार्त्तस्त्रिफलां पिप्पलींच समाक्षिकां ।
कासे श्वासे च मधुना सर्प्पिषा स सुखी भवेत् ।
विदारीदाडिमं लोध्रं दाधित्थं वीजपूरकं ॥
एभिः प्रदिह्यान्मूर्द्धानं तृड्दाहार्त्तस्य देहिनः ।
दाडिमस्य सितायाश्च द्राक्षामलकयोस्तथा ॥
वैरस्ये धारयेत्कल्कं गण्डूषञ्च यथाहितं ।
क्षीरेक्षुरसमाध्वीकसर्पिस्तैलोष्णवारिभिः ॥
शून्ये मूर्द्ध्नि हितं नस्यं जीवनीयशृतं घृतं ।

चूर्णितत्रिफलाश्यामात्रिवृत्पिप्पलिसंयुतः ॥
सक्षौद्रः शर्करायुक्तो विरेकस्तु प्रशस्यते ।
पक्वे पित्तज्वरे रक्ते चोर्द्धगे वेपथौ तथा ॥
कफवातात्ययोरेवं स्नेहाभ्यङ्गैर्व्विशोधयेत् ।
हृतदोषो भ्रमार्त्तस्तु लिह्यात् क्षौद्रसिताभयाः ॥
वातघ्नमधुरैर्य्योज्या निरूहा वातजे ज्वरे ।
विभज्य दोषं प्राणञ्च यथास्वं वानुवासनं ॥
उत्पलादिकषायाढ्यास्चन्दनोशीरसंयुताः ।
शर्करामधुराः शीताः पित्तज्वरहरा मताः ॥
आम्रादीनां त्वचं शङ्खं चन्दनामलकोत्पलैः ।
गैरिकाञ्जनमञ्जिष्ठामृणालान्यथ पद्मकं ॥
श्लक्ष्णपिष्टन्तु पयसा शर्करामधुसंयुतं ।
सुपूतं शीतलं वस्तिं दूयमानाय दापयेत् ॥
ज्वरदाहापहं तेषु सिद्धञ्चैवानुवासनं ।
आरग्वधगणक्वाथाः पिप्पल्यादिसमायुताः ॥
सक्षौद्रा एव देयाः स्युः कफज्वरविनाशनाः ।
कफघ्नैरेव संसिद्धा द्रव्यैश्चाप्यनुवासनाः ॥
संसर्गे सन्निपाते च संसृष्टा वस्तयो हिताः ।
संसृष्टैरेव संसृष्टा द्रव्यैश्चाप्यनुवासनाः ॥
वातरोगापहाः सर्व्वे स्नेहा ये सम्यगीरिताः ।
विना तैलं त एव स्युर्य्योज्या मारुतजे ज्वरे ॥

निखिलेनोपयोज्याश्च त एवाभ्यञ्जनादिषु।
पैत्तिके मधुरैस्तिक्तैः सिद्धं सर्प्पिः प्रयुज्यते ॥
श्लैष्मिके कटुतिक्तैश्च संसृष्टानीतरेषु च।
हृतावशेषं पित्तन्तु लक्ष्यं जनयति ज्वरं ॥
पिबेदिक्षुरसं तत्र शीतंवा शर्करोदकं।
शालिषष्टिकयोरन्नमश्नीयात्क्षीरसंप्लुतं ॥
कफवातोत्थयोरेव स्वेदाभ्यङ्गौ प्रयोजयेत्।
घृतं द्वादशरात्रात्तु देयं सर्व्वज्वरेषु च ॥
तेनान्तरेणाशयं स्वङ्गता दोषा भवन्ति हि।
धातून् प्रक्षोभयन् दोषो मोक्षकालेऽवलीयते ॥
तेन व्याकुलचित्तस्तु म्रियमाण इवेहते।
लघुत्वं शिरसः स्वेदो मुखमापाण्डुपाकि च ॥
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणं।
शम्भुक्रोधोद्भवो घोरो बलवर्णाग्निसादकः ॥
रोगराट् रोगसंघातो ज्वर इत्युपदिश्यते।
व्यापित्वात् सर्व्वसंस्पर्शात्त क्लृप्तादन्तसम्भवात् ॥
अन्तको ह्येष भूतानां ज्वर इत्युपदिश्यते।

---

॥ चत्वारिंशत्तमोऽध्यायः ॥

अथातोऽतीसारप्रतिषेधं व्याख्यास्यामः ॥
गुर्व्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः।

विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि भोजनैः ॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्व्विषाद्भयात् ।
शोकाद्दुष्टाम्बुमद्यातिपानात्सात्म्यर्त्तुपर्य्ययात् ॥
जलाभिरमणैर्व्वेगविघातैः क्रिमिदोषतः ।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥

संशम्यापां धातुरन्तः कृशानुं वर्च्चोमिश्रो मारुतेन प्रनुन्नः ।
वृद्धोऽतीवाधःसरत्येव यस्माद्व्याधिं घोरं तं त्वतीसारमाहुः ॥
एकैकशः सर्व्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ।
केचित्प्राहुर्न्नैकरूपप्रकारं नैवेत्येवं काशिराजस्त्ववोचत् ॥
दोषावस्थास्तस्य नैकप्रकाराः काले काले व्याधितस्योद्भवन्ति ।
हृन्नाभिपायूदरकुक्षितोदगात्रावसादानिलसन्निरोधाः ॥
विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥
शूलाविष्टः सक्तमूत्रोऽन्त्रकूजी स्रस्तापानः सन्नकट्यूरुजङ्घः ।
वर्च्चो मुञ्चत्यल्पमल्पं सफेनं रूक्षं श्यावं सानिलं मारुतेन ॥
दुर्गन्ध्युष्णं वेगवन्मांसतोयप्रख्यं भिन्नं स्विन्नदेहोऽतितीक्ष्णं ।
पित्तात्पीतं नीलमालोहितं वा तृष्णामूर्च्छादाहपाकज्वरार्त्तः ॥
तन्द्रा निद्रा गौरवोत्क्लेशसादी वेगाशङ्की सृष्टविट्कोऽपि भूयः ।
शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं भक्तद्वेषी निस्वनं हृष्टरोमा ॥
तन्द्रायुक्तो मोहसादास्यशोषी वर्च्चः कुर्य्यान्नैकवर्णं तृषार्त्तः ।
सर्व्वोद्भूतः सर्व्वलिङ्गोपपत्तिः कृच्छ्रश्चायं बालवृद्धेष्वसाध्यः ॥
तैस्तैर्भावैः शोचतोऽल्पाशनस्य वाष्पो वेगः पक्तिमाविध्य जन्तोः ।

कोष्ठं गत्वा क्षोभयन् यस्य रक्तं तच्चाधस्तात्काकनन्तीप्रकाशं ॥
वर्चोमिश्रं निःपुरीषं सगन्धं निर्गन्धं वा सार्य्यते तेन कोष्ठात्।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥
आमाजीर्णैः प्रद्रुताः क्षोभयन्तः कोष्ठं दोषाः सम्प्रदुष्टाः सभक्तं।
नानावर्णं नैकशः सारयन्ति कृच्छ्राज्जन्तोः षष्ठमेनं वदन्ति ॥

संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति।
पुरीषं भृशदुर्गन्धं विच्छिन्नं चामसंज्ञितं ॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य तु।
लाघवञ्च मनुष्यस्य तस्य पक्वं विनिर्द्दिशेत् ॥

सर्प्पिर्मेदोवेसवाराम्बुतैलमाजं क्षीरं क्षौद्ररूपं स्रवेद्यत।
मञ्जिष्ठाभं मस्तुलुङ्गोपमं वा विस्रं शीतं प्रेतगन्ध्यञ्जनाभं ॥
राजीमद्वा चन्द्रकैः सन्ततं वा पूयप्रख्यं कर्द्दमाभं तथोष्णं।
हन्यादेतद्यत्प्रतीपं भवेच्च क्षीणं हन्युश्चोपसर्गाः प्रभूताः ॥

असम्वृतगुदं क्षीणं दुराध्मातमुपद्रुतं।
गुदे पक्वे गतोष्माणमतीसारकिणं त्यजेत् ॥
शरीरिणामतीसारः संभूतो येन केनचित्।
दोषाणामेव लिङ्गानि कदाचिन्नाति वर्त्तते ॥
स्नेहाजीर्णनिमित्तस्तु बह्वशूलप्रवाहिकः।
विशूचिकानिमित्तस्तु चान्योऽजीर्णनिमित्तजः ॥
विषार्शःकृमिसम्भूतो यथास्वन्दोषलक्षणः।
आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः ॥

अतः सर्व्वातिसारास्तु ज्ञेयाः पक्वामलक्षणैः ।
तत्र लङ्घनमेवादौ पूर्व्वरूपेषु देहिनां ॥
ततः पाचनसंयुक्तं यवाग्वादिक्रमो हितः ।
अथ वा वामयित्वा तु शूलाध्माननिपीडितं ॥
पिप्पलीसैन्धवाम्भोभिर्लङ्घनाद्यैरुपाचरेत् ।
कार्य्यं च वमनस्यान्ते प्रायशो लघुभोजनं ॥
खडयूषयवागूषु पिप्पल्याद्यैव योजयेत् ।
अनेन विधिना चामं यस्य वै नोपशाम्यति ॥
हरिद्रादिं वचादिं वा पिवेत्प्रातः स मानवः ।
आमातिसारिणां कार्य्यं नादौ सङ्ग्रहणं नृणां ॥
तेषां दोषा विवद्धाः प्राग्जनयन्त्यामयानिमान् ।
प्लीहपाण्ड्वामयानाहमेहकुष्ठोदरज्वरान् ॥
शोफगुल्मग्रहण्यर्शःशूलालसकहृद्ग्रहान् ।
सशूलं बहुशः कृच्छ्रादिबन्धं योऽतिसार्य्यते ॥
दोषान्सन्निचितान् वाथ पथ्याभिः संप्रवर्त्तयेत् ।
योऽतिद्रवं प्रभूतञ्च पुरीषमतिसार्य्यते ॥
तस्यादौ वमनं कुर्य्यात्पश्चाल्लङ्घनपाचनं ।
स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्य्यते ॥
अभयापिप्पलीकल्कैः सुखोष्णैस्तं विरेचयेत् ।
आमे च लङ्घनं शस्तमादौ पाचनमेव वा ॥
योगाश्चात्र प्रवक्ष्यन्ते त्वामातीसारनाशनाः ।

देवदारुवचामुस्तानागरातिविषाभयाः ॥
कलिङ्गातिविषाहिङ्गुसौवर्च्चलवचाभयाः ।
अभयाधान्यकं मुस्तं बालकं विल्वमेव च ॥
मुस्तं पर्प्पटकं शुण्ठीवचाशातिविषाभयाः ।
अभयातिविषाहिङ्गुवचासौवर्च्चलं तथा ॥
चित्रकं पिप्पलीमूलं वचाकटुकरोहिणी ।
पाठावत्सकवीजानि हरीतकीमहौषधं ॥
मूर्व्वा निर्द्दहनी पाठा त्र्यूषणं गजपिप्पली ।
सिद्धार्थका भद्रदारु शताङ्गा कटुरोहिणी ॥
एला सावरकं कुष्ठं हरिद्रे कौटजा यवाः ।
मेषशृङ्गीलगेले च क्रमिघ्नं वृचकाणि च ॥
वृचादनी वीरतरुर्वृहत्यौ द्वे सहे तथा ।
एरण्डलक तैन्दुकी दाडिमी कौटजी शमी ॥
पाठा तेजोवती मुस्तं पिप्पलीकौटजं फलं ।
पटोल दीप्यको विल्वं हरिद्रे देवदारु च ॥
विडङ्गमभया पाठा शृङ्गवेरं घनं वचा ।
वचा वत्सकवीजानि सैन्धवं कटुरोहिणी ॥
हिङ्गुवत्सकवीजानि वचाविल्वशलाटु च ।
नागरातिविषा मुस्तं पिप्पल्यो वात्सकं फलं ॥
महौषधं प्रतिविषा मुस्तं चेत्यामपाचनाः ।
प्रयोज्या विंशतिर्य्योगाः श्लोकार्द्धविहितास्त्विमे ॥

धान्याम्लोष्णाम्बुमद्यानां पिवेदन्यतमेन वा ।
निःक्वाथान्वा पिवेदेषां सुखोष्णान् साम्बुसाधितान् ॥
निखिलेनोपदिष्टोऽयं विधिरामोपशान्तये ।
हरीतकीमतिविषां हिङ्गु सौवर्चलं वचां ॥
पिवेत्सुखाम्बुना जन्तुरामातीसारपीडितः ।
पटोलं दीप्यकं विल्वं वचापिप्पलिनागरम् ॥
मुस्तं कुष्ठं विडङ्गञ्च पिवेद्वापि सुखाम्बुना ।
शृङ्गवेरं गुडूचीञ्च पिवेदुष्णेन वारिणा ॥
लवणान्यथ पिप्पल्यो विडङ्गानि हरीतकी ।
चित्रकं शिंशपा पाठा शार्ङ्गेष्टा लवणानि च ॥
हिङ्गुवृचकबीजानि लवणानि च भागशः ।
हस्तिदन्त्यथ पिप्पल्यः कल्कावचसमौ स्मृतौ ॥
वचागुडूचीकाण्डानि योगोऽयं परमो मतः ।
एते सुखाम्बुना योगा देयाः पञ्च सतां मताः ।
पयस्युत्क्वाथ्य मुस्तानां विंशतिन्त्रिगुणाम्भसि ॥
क्षीरावशिष्टं तत्पीतं हन्त्यामं शूलमेव च ।
निवृत्तेष्वामशूलेषु यस्य न प्रगुणोऽनिलः ॥
स्तोकं स्तोकं रुजामच्च सशूलं योऽतिसार्य्यते ।
सक्षारलवणैर्युक्तं मन्दाग्निः प्रपिवेद्घृतं ॥
क्षीरनागरचाङ्गेरीकोलदध्यम्लसाधितं ।
सर्पिरच्छं पिवेद्वापि शूलातीसारशान्तये ।

दध्ना तैलघृतं पक्वं सव्योषजातिचित्रकैः॥
सविडङ्गपिप्पलीमूलदाडिमैर्व्वा रुगन्वितैः।
निखिलो विधिरुक्तोऽयं वातस्याभोपशान्तये॥
तीक्ष्णोष्णवर्ज्यमेनन्तु विदध्यात्पित्तजे भिषक्।
यथोक्तमुपवासान्ते यवागूश्च प्रशस्यते॥
बलधारंशुमत्याश्च स्वदंष्ट्राष्टहतीषु च।
शतावर्य्याञ्च संसिद्धाः सुशीता मधुसंयुताः॥
मुद्गादिषु च यूषाः स्युर्दीपनैः सुसंस्कृताः।
मृदुभिर्दीपनैस्तिक्तैर्द्रव्यैः स्यादामपाचनं॥
हरिद्रातिविषापाठावत्सबीजरसाञ्जनं।
रसाञ्जनं हरिद्रे द्वे बीजानि कुटजस्य च।
पाठा गुडूची भूनिम्बस्तथैव कटुरोहिणी॥
एतैः स्मे कार्द्धनिर्द्दिष्टैः काथाः स्युः पित्तपाचनाः।
मुस्तं कुटजबीजानि भूनिम्बं सरसाञ्जनं॥
दार्व्वी दुरालभा बिल्वं बालकं रक्तचन्दनं।
चन्दनं बालकं मुस्तं भूनिम्बं सदुरालभं॥
मृणालं चन्दनं रोध्रं नागरं नीलमुत्पलं।
पाठा मुस्तं हरिद्रे द्वे पिप्पली कौटजं फलं॥
फलत्वचं वत्सकस्य शृङ्गवेरघृते वचा।
षडेतेऽभिहिता योगाः पित्तातीसारनाशनाः॥
बिल्वशक्रयवाम्भोदबालकातिविषाकृतः।

कषायो हन्त्यतीसारं सामं पित्तसमुद्भवं ॥
मधुकोत्पलबिल्वाम्रह्रीवेरोशीरनागरैः ।
कृतः क्वाथो मधुयुतः पित्तातीसारनाशनः ॥
यदा पक्वोऽप्यतीसारः सरत्येव मुहुर्मुहुः ।
ग्रहण्या मार्द्दवाज्जन्तोस्तत्र संस्तम्भनं हितं ॥
समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रमुस्तकं ।
शाल्मलीवेष्टकं रोध्रं वृचदाडिमयोस्त्वचौ ॥
आम्रास्थिमध्यं लोध्रञ्च बिल्वमध्यं प्रियङ्गवः ।
मधुकं शृङ्गवेरञ्च दीर्घवृन्तत्वगेव च ॥
चत्वार एते योगाः स्युः पक्वातीसारनाशनाः ।
उक्ता य उपयोज्यास्ते सक्षौद्रास्तण्डुलाम्बुना ॥
भौस्त्वं कषायमेकं वा पेयं मधुसमायुतं ।
लोध्राम्बष्ठाप्रियङ्ग्वादीन् गणांस्तत्र प्रयोजयेत् ॥
पद्मां समङ्गां मधुकं बिल्वजम्बूशलाटु वा ।
पिबेत्तण्डुलतोयेन सक्षौद्रमगदङ्करं ॥
कच्छुरामूलकल्कं वा उडुम्बरफलोपमं ।
पयस्याचन्दनं पद्मा सितामुस्ताब्जकेशरं ।
पक्वातिसारं योगोऽयं जयेत्पीतः सशोणितं ॥
निरामरूपं शूलार्त्तं लङ्घनाद्यैश्च कर्षितं ।
नरं रुक्षमवेक्ष्याग्निं सक्षारं पाययेद्घृतं ॥
बलाबृहत्यंशुमती कच्छुरामूलसाधितं ।

मधूच्छितं समधुकं पिबेच्छूलैरभिद्रुतः ॥
दार्व्वीविल्वकणा द्राक्षाकटुकेन्द्रयवैर्घृतं ।
साधितं हन्त्यतीसारं वातपित्तकफात्मकं ॥
पयोघृतञ्च मधु च पिबेच्छूलैरभिद्रुतः ।
सिताजमोदकञ्जङ्गमधुकैरवचूर्णितं ॥
स्वेदनं सुसम्पक्कं दीप्ताग्नेः सुचिरोत्थितं ।
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥
त्वक्पिण्डं दीर्घवृन्तस्य पद्मकेशरसंयुतं ।
काश्मरीपद्मपत्रैश्चावेष्ट्य सूत्रेण तं दृढं ॥
मृदावलिप्तं सुक्तमङ्गारेष्ववकूलयेत् ।
स्विन्नमुद्धृत्य निःपीड्य रसमादाय तं ततः ॥
शीतं मधुयुतं कृत्वा पाययेतोदरामये ।
जीवन्तीमेषशृङ्ग्यादिष्वेवं द्रव्येषु साधयेत् ।
तित्तिरिं लुञ्चितं सम्यक् निःकृष्टान्त्रन्तु पूरयेत् ॥
न्यग्रोधादित्वचां कल्कैः पूर्व्ववच्चावकल्पयेत् ।
रसमादाय तस्याथ सुस्विन्नस्य समाक्षिकं ॥
शर्करोपहितं शीतं पाययेच्चोदरामये ॥
लोध्रचन्दनयष्ट्याह्वदार्व्वीपाठासितोत्पलान् ।
तण्डुलोदकसम्पिष्टान् दीर्घवृन्तत्वगन्वितान् ॥
पूर्व्ववत्कूलितात्तस्माद्रसमादाय शीतलं ।
मध्वाक्तम्पाययेच्चैतत्कफपित्तोदरामये ॥

एवं प्ररोहैः कुर्व्वीत वटादीनां विधानवित् ।
पुटपाकान् यथायोगं जाङ्गलोपहितान् शुभान् ॥
बद्धश्लेष्मसरक्तञ्च मन्दवातं चिरोत्थितं ।
कौटजं फाणितञ्चापि हन्त्यतीसारमोजसा ॥
अम्बष्ठादि मधुयुतं पिप्पल्यादिसमन्वितं ।
पृष्णिपर्णीबलाबिल्वशालकोत्पलधान्यकैः ॥
सनागरैः पिवेत्पेयां साधितामुदरामयी ।
अरलुत्वक्प्रियङ्गुञ्च मधुकं दाडिमाङ्कुरान् ॥
आवाप्य पिष्ट्वा दधनि यवागूं साधयेद्द्रवां ।
एषा सर्व्वानतीसारान् हन्ति पक्वानसंशयं ॥
रसाञ्जनं सातिविषं त्वग्बीजं कौटजं तथा ।
धातकी नागरश्चैव पाययेत्तण्डुलाम्बुना ॥
सशूलरक्तजं घ्नन्ति योगा मधुसमन्विताः ।
मधुकं विल्वपेश्यश्च शर्करा मधुसंयुताः ॥
अतीसारं निहन्युश्च शालिषष्टिकयोः कणाः ।
तद्वल्लीढं मधुयुतं वदरीमूलमेव तु ॥
वदर्य्यर्ज्जुनजम्बाम्रशल्लकीवेतसत्वचः ।
शर्कराः क्षौद्रसंयुक्ताः पीता घ्नन्त्युदरामयं ॥
एतैरेव यवागूश्च मण्डान् यूषांश्च कारयेत् ।
पाणीयानि च तृष्णासु द्रव्येष्वेतेषु बुद्धिमान् ॥
कृतं शाल्मलिवृन्तेषु कषायं हिमसंज्ञकं ।

निशापर्य्युषितं पेयं सक्षौद्रं मधुकान्वितं ॥
विबद्धवातविट्शूलपरीतः सप्रवाहिकः ।
सरक्तपित्तश्च पयः पिबेत्तृष्णासमन्वितः ॥
यथामृतं तथा क्षीरमतीसारेषु पूजितं ।
चिरोत्थितेषु तत्पथ्यमपाम्भागैस्त्रिभिः शृतं ॥
दोषशेषं हरेत्तद्धि तस्मात्पथ्यतमं स्मृतं ।
हितः स्नेहविरिक्तो वा वस्तयः पिच्छिलाश्च ये ॥
पिच्छिलास्वरसे सिद्धं हितं च घृतमुच्यते ।
शकृता यस्तु संसृष्टमतिसार्य्येत शोणितं ॥
प्राक्पश्चाद्वा पुरीषस्य सरुक्सपरिकर्त्तिकः ।
क्षीरिशुङ्गाशृतं सर्पिः पिबेत्सक्षौद्रशर्करं ॥
दार्व्वीत्वक्पिप्पलीशुण्ठीलाक्षाशक्रयवैर्घृतं ।
संयुक्तं भद्ररोहिण्या पक्वं पेयादिमिश्रितं ॥
त्रिदोषमप्यतीसारं पीतं हन्ति सुदारुणं ।
गौरवे वमनं पथ्यं यस्य स्यात्प्रबलः कफः ॥
ज्वरे दाहे सविड्बन्धे मारुताद्रक्तपित्तवत् ।
सम्पक्वे बहुदोषे च विबन्धे मूत्रशोधनैः ।
कार्य्यमास्थापनं क्षिप्रं तथाचैवानुवासनं ॥
प्रवाहिणे गुदभ्रंशे मूत्राघाते कटिग्रहे ।
मधुराम्लशृतं तैलं सर्पिश्चाप्यनुवासनं ॥
गुदपाकस्तु पित्तेन यस्य स्यादहिताग्निनः ।

तत्र पित्तहराः सेकास्तत्सिद्धाश्चानुवासनाः ॥
दधिमण्डसुराविल्वसिद्धं तैलं समाहरेत्।
भोजने च हितं क्षीरं कच्छूरामूलसाधितं ॥
अल्पाल्पं बहुशोरक्तं सरुग्य उपवेश्यते।
यदा वायुर्व्विबद्धश्च पिच्छावस्तिस्तदा हितः ॥
प्रायेण गुददौर्व्बल्यं दीर्घकालातिसारिणां।
भवेत्तस्माद्धितं तेषां गुदे तैलावचारणं ॥
कपित्थशाल्मलीफञ्जीवनकार्पासदाडिमाः।
पूथिकाकच्छुराशेलुः शणश्चुचूःसदाधिका ॥
शालपर्णी पृश्निपर्णी वृहती कण्टकारिका।
बलाश्वदंष्ट्राविल्वानि पाठानागरधान्यकं ॥
एष आहारसंयोगो हितः सर्व्वातिसारिणां।
तिलकल्को हितश्चात्र सौद्रोमुद्गरसस्तथा ॥
पित्तातिसारी यो मर्त्यः पित्तलानि निषेवते।
पित्तं प्रदुष्टं तस्याशु रक्तातीसारमावहेत् ॥
ज्वरं शूलं तृषं दाहं गुदपाकञ्च दारुणं।
यो रक्तं शकृतः पूर्व्वं पश्चाद्वा प्रतिसार्य्यते ॥
स पल्लवैर्व्वटादीनां सर्पिः साधितं पयः।
पिबेत् शर्कराक्षौद्रमथ वाप्यभिमथ्य तत् ॥
नवनीतमथो लिह्यात्तक्रं चानुपिबेत्ततः।
पियालशाल्मलीप्लक्षशल्लकीतिनिशत्वचः ॥

क्षीरे विमृदिताः पीताः सक्षौद्रा रक्तनाशनाः ।
मधुकं शर्करां लोध्रं पयस्यामथ सारिवां ॥
पिबेच्छागेन पयसा सक्षौद्रां रक्तनाशनीं ।
मञ्जिष्ठां सारिवां लोध्रं पद्मकं कुमुदोत्पलं ॥
पिबेत्पद्माञ्च दुग्धेन छागेनासृक्प्रशान्तये ।
शर्करोत्पललोध्राणि समङ्गा मधुकन्तिलाः ॥
तिलामोचरसो लोध्रं तथैव मधुकोत्पलं ।
कच्छुरा  तिलकल्कश्च योगाश्चत्वार एव तु ॥
आजेन पयसा पेयाः सरक्ते मधुसंयुताः ।
द्रवे सरक्ते स्रवति बालबिल्वं सफाणितं ॥
सक्षौद्रतैलं प्रागेव लिह्यादाशु हितं हि तत् ।
कोशकारं घृते भृष्टं लाजचूर्णं सिता मधु ॥
सशूलं रक्तपित्तोत्थं लीढं हन्त्युदरामयं ।
बिल्वमध्यं समधुकं शर्कराक्षौद्रसंयुतं ॥
तण्डुलाम्बुयुतो योगः पित्तरक्तोत्थितं जयेत् ।
गुदपाके च ये उक्तास्तेऽत्रापि विधयः स्मृताः ॥
रुजायां वाप्रशाम्यन्त्यां पिच्छावस्तिर्हितो भवेत् ।
रक्तविड्दोषबहुलं दीप्ताग्निर्योऽतिसार्य्यते ॥
विडङ्गत्रिफलाकृष्णाकषायैस्तं विरेचयेत् ।
अथवैरण्डसिद्धेन पयसा केवलेन वा ॥
यवागूर्व्वितरेत्तस्य वातघ्नैर्दीपनैः कृताः ।

दीप्ताग्निर्निःपुरीषो यः सार्य्यते फेणिलं शकृत्॥
स पिवेत्फाणितं शुण्ठीदधितैलपयोघृतं।
खिन्नानि गुडतैलाभ्यां भक्षयेद्वदराणि च॥
सुखिन्नान् पिष्टवद्वापि समं बिल्वशलाटुभिः।
दध्नोपयुज्य कुल्माषान् श्वेतामनुपिबेत्सुरां॥
शशमांसं सरुधिरं समज्ञां सघृतं दधि।
खादेद्विपाच्य सेवेत मृदन्नं शकृतः चये॥
संस्कृतो यमके माषयवकोलरसः शुभः।
भोजनार्थञ्च दातव्यो दधिदाडिमसाधितः॥
विडं बिल्वशलाटूनि नागरं चाम्लपेषितं।
दध्नः सरश्च यमके भृष्टो वर्च्चःचये हितः॥
सशूलं चीणवर्च्चा यो दीप्ताग्निरतिसार्य्यते।
स पिवेद्दीपनैर्युक्तं सर्प्पिस्तक्राह्वकैःसह॥
वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य।
प्रवाहमाणस्य मुहुर्मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः॥
प्रवाहिका वातकृता सशूला पित्तात्सदाहा सकफा कफाच्च।
सशोणिता शोणितसम्भवा स्तुताः स्नेहरूक्षप्रभवा मतास्तु॥
तासामतीसारवदादिशेच्च लिङ्गं क्रमंचामविपक्वताञ्च।
न शान्तिमायाति बिलङ्घनैर्या योगैरुदीर्णा यदि पाचनैर्व्वा॥
ताःचीरमेवाशु शृतं निहन्ति तैलं तिलाः पिच्छिलवस्तयश्च।
आर्द्रैः कुशैः संपरिवेष्टितानि वृन्तान्यथार्द्राणि हि शाल्मलीनां॥

पक्कानि सम्यक्पुटपाकयोगेनापीड्य तेभ्यो रसमाददीत ॥
क्षीरं शृतं तैलहविर्विमिश्रं कल्केन यष्टीमधुकस्य वापि ।
वस्तिं विदध्याद्भिषगप्रमत्तः प्रवाहिकामूत्रपुरीषसङ्गे ॥
द्विपञ्चमूलीक्वथितेन शूले प्रवाहमाणस्य समाक्षिकेण ।
क्षीरेण चास्थापनमग्र्यमुक्तं तैलेन युञ्ज्यादनुवासनंच ॥
वातघ्नवर्गे लवणेषु चैव तैलंच सिद्धं हितमन्नपाने ।
लोध्रं विडं विल्वशलाटु चैव लिह्याच्च तैलेन कटु त्रिकालं ॥
दध्ना ससारेण समाक्षिकेण भुञ्जीत निःसारकपीडितस्तु ।
सुतप्तकुप्यक्वथितेन वापि क्षीरेण शीतेन मधुप्लुतेन ॥
शूलार्द्दितो व्योषविदारिगन्धासिद्धेन दुग्धेन हिताय भोज्यः।
वातघ्नसंग्राहकदीपनीयैः कृतान्रसांश्चाप्युपभोजयेच्च ॥
खादेच्च मत्स्यान् रसमाप्नुयाच्च वातघ्नसिद्धं सघृतं सतैलं ।
एणाव्यजानान्तु वटप्रवालैः सिद्धानि सार्द्धं पिशितानि खादेत् ॥
मेध्यस्य सिद्धन्त्वथ वापि रक्तं वस्तस्य दध्ना घृततैलयुक्तं ।
खादेत्प्रयुक्तैः शिखिलावजैश्च भुञ्जीत यूषैर्द्दधिभिश्च मुख्यैः ॥
माषान् सुसिद्धान् घृतमण्डयुक्तान् खादेच्च दध्ना मरिचोपदंशान् ॥
महारुजे मूत्रकृच्छ्रे भिषग्वस्तिं प्रदापयेत् ।
पयोमधुघृतोन्मिश्रं मधुकोत्पलसाधितं ॥
स वस्तिः शमयेत्तस्य रक्तं दाहमथो ज्वरं ।
मधुरौषधसिद्धश्च हितं तस्यानुवासनं ॥
रात्रावहनि वा नित्यं रुजार्त्तो यो भवेन्नरः ।

यथायथा स तैलः स्यात्तथा तथा शान्तिस्तथा तथा ॥
प्रशान्ते मारुते वापि शान्तिं याति प्रवाहिका ।
तस्मात्प्रवाहिकारोगे मारुतं शमयेद्भिषक् ॥
पाठाजमोदा कुटजस्य बीजं शुण्ठीसमा मागधिकाश्च पिष्टाः ।
सुखाम्बुपीताः शमयन्ति रोगं सेव्यान्नसिद्धं सघृतं पयो वा ॥
शुण्ठी घृतं सचवकं सतैलं विपाच्य लीढ्वामयमाशु हन्यात् ।
गजाशनाकुम्भिकदाडिमानां रसैः कृते तैलघृते सदम्नि ॥
बिल्वान्विता पथ्यतमा यवागूर्धारोष्णदुग्धस्य तथा च पानं ।
लघूनि पथ्यान्यथ दीपनानि स्निग्धानि भोज्यान्युदरामयेषु ॥
हिताय नित्यं वितरेद्धि भोज्यं योगांश्च तांस्तान् भिषगप्रमत्तः ।
तृष्णापनयनी लघ्वी दीपनी वस्तिशोधनी ।
ज्वरे चैवातिसारे च यवागूः सर्व्वदा हिता ॥
रौक्ष्याज्जाते क्रिया स्निग्धा रूक्षा स्नेहनिमित्तजे ।
भयजे सान्त्वनापूर्व्वा शोकजे शोकनाशिनी ॥
विषार्शःकृमिसम्भूते हिता चोभयशर्म्मदा ।
छर्दिमूर्च्छातृडाद्यांश्च साधयेदविरोधतः ॥
समवाये तु दोषाणां पूर्व्वं पित्तमुपाचरेत् ।
ज्वरे चैवातिसारे च सर्व्वत्रान्यत्र मारुतं ॥
यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥
कर्म्मजा व्याधयः केचिद्दोषजाः सन्ति चापरे ।

कर्म्मदोषोद्भवाश्चान्ये कर्म्मजास्त्वहेतुकाः ॥
नश्यन्ति तत्क्रियाभिस्ते क्रियाभिः कर्म्मसङ्क्षये ।
शाम्यन्ति दोषसम्भूता दोषसंचयहेतुभिः ॥
तेषामल्पनिदाना ये प्रतिकष्टा भवन्ति च ।
मृदवो बहुदोषा वा कर्म्मदोषोद्भवास्तु ते ॥
कर्म्मदोषचयकृतास्तेषां सिद्धिर्व्विधीयते ।
दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः ॥
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥
तस्मात्कार्य्यः परीहारस्त्वतीसारे विरिक्तवत् ।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ॥
षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ।
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता ॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ।
तस्मात्संदूषिते वह्नौ ग्रहणी सम्प्रदुष्यति ॥
एकशः सर्व्वशश्चैव दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशोभुक्तमाममेव विमुञ्चति ॥
पक्वं वा सरुजं पूति मुहुर्ब्बद्धं मुहुर्द्रवं ।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥
तस्योत्पत्तौ विदाहान्नसदनालस्यतृट्क्लमाः ।
बलक्षयोऽरुचिः कासः कर्णक्ष्वेडान्त्रकूजनं ॥

अथ जाते भवेज्जन्तुः शूनपादकरः कृशः ।
पर्व्वरुग्लौल्यतृट्छर्दिज्वरारोचकदाहवान् ॥
उद्गिरेच्छुक्ततिक्ताम्ललोहधूमामगन्धिकं ।
प्रसेकमुखवैरस्यतमकारुचिपीडितः ॥
वाताच्छूलाधिकैः पाण्डुहृत्पार्श्वोदरमस्तकैः ॥
पित्तात्सदाहैर्गुरुभिः कफात्त्रिभिस्त्रिलचणैः ।
दोषवर्णनखैस्तद्वद्विण्मूत्रनयनाननैः ॥
हृत्पाण्डूदरगुल्मार्शःप्लीहाशङ्की च मानवः ।
यथादोषोच्छ्रयन्तस्य विशुद्धस्य यथाक्रमं ॥
पेयादिं वितरेत्सम्यग्दीपनीयोपसम्भृतं ।
ततः पाचनसङ्ग्राहिदीपनीयगणद्वयं ॥
पिवेत्प्रातःसुरारिष्टस्नेहमूत्रसुखाम्बुभिः ।
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते ॥
कृमिगुल्मोदरार्शोघ्नीः क्रियास्तत्रावचारयेत् ॥
चूर्णं हिंग्वादिकं चात्र घृतं वा प्लीहनाशनं ।
कल्केन मगधादेश्च चाङ्गेरीस्वरसेन वा ॥
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत् ।
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितं ॥
ज्वरादीनविरोधाच्च साधयेत्स्वैश्चिकित्सितैः ।

---

## ॥ एकचत्वारिंशत्तमोऽध्यायः ॥

अथातः शोषप्रतिषेधं व्याख्यास्यामः ॥

अनेकरोगानुगतो बहुरोगपुरोगमः ।
दुर्विज्ञेयो दुर्निवारः शोषो व्याधिर्महाबलः ॥
संशोषणाद्रसादीनां शोष इत्यभिधीयते ।
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते पुनः ॥
राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः ।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः ॥
संव्यस्तैर्जायते दोषैरिति केचिद्वदन्ति हि ।
एकादशानामेकस्मिन् सान्निध्यात्तन्त्रयुक्तितः ॥
क्रियाणां चाविभागेन शोषोत्पादनेन च ।
एक एव मतः शोषः सन्निपातात्मको ह्यतः ॥
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि ।
क्षयाद्वेगप्रतीघाताद्व्यायामाद्विषमाशनात् ॥
जायते कुपितैर्दोषैर्व्याप्तदेहस्य देहिनः ।
कफप्रधानैर्दोषैर्हि रुद्धेषु रसवर्त्मसु ॥
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा ।
क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥
भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनं ।
स्वरभेदश्च जायन्ते षड्रूपे राजयक्ष्मणि ॥
स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।

ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥
एकादशभिरेतैर्वा षड्भिर्वापि समन्वितं ।
कासातीसारपार्श्वार्त्तिस्वरभेदारुचिज्वरैः ॥
त्रिभिर्वा पीडितं लिङ्गैर्ज्वरकासासृगामयैः ।
जह्याच्छोषार्दितं जन्तुमिच्छन् सुविपुलं यशः ॥
व्यवायशोकस्थाविर्य्यव्यायामाध्वोपवासतः ।
व्रणोरःक्षतपीडाभ्यां शोषानन्ये वदन्ति हि ॥
व्यवायशोषः शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथा पूर्व्वं क्षीयन्ते चास्य धातवः ॥
प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्व्विकारैरभिलक्षितः ॥
जराशोषी कृशो मन्दस्वल्पबुद्धिबलेन्द्रियः ।
श्वसनोऽरुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥
ष्ठीवति श्लेष्मणा हीनं तैयत्रारतिपीडितः ।
सम्प्रस्नुतास्यनासाक्षः शुष्करूक्षमलच्छविः ॥
अध्वप्रशोषी स्रस्ताङ्गः संभृष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥
व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
उरःक्षतकृतैर्लिङ्गैः संयुक्तश्च क्षतादिना ॥

रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषः सचासाध्यतमस्मृतः ॥
व्यायामभाराध्ययनैरभिघातातिमैथुनैः ।
कर्म्मणा चाप्युरस्येन वक्षो यस्य विदारितं ॥
तस्योरसि क्षते रक्तं पूयः श्लेष्मा च गच्छति ।
कासमानश्छर्दयेच्च पीतरक्तासितारुणं ॥
सन्तप्तवक्षाः सोऽत्यर्थं दूयनात्परिताम्यति ।
दुर्गन्धवदनोच्छ्वासो भिन्नवर्णस्वरो नरः ॥
केषाञ्चिदेव शोषो हि कारणैर्भेदमागतः ।
न तत्र दोषलिङ्गानां समस्तानां निपातनं ॥
क्षयाएव हि ते ज्ञेयाः प्रत्येकं धातुसंक्षयात् ।
चिकित्सितं तु तेषां हि प्रागुक्ते धातुसंक्षये ॥
श्वासाङ्गसादकफसंस्रवतालुशोष
च्छर्द्यग्निसादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठ
गृध्रास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्ये
च्छुष्कांस्तरून्पवनधूमदवार्दितांश्च ॥
महाशनं क्षीयमाणमतीसारनिपीडितं ।

शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्ज्जयेत् ॥

उपाचरेदात्मवन्तं दीप्ताग्निमकृशं नवं ।

स्थिरादिवर्गसिद्धेन घृतेनाजाविकेन च ॥

स्निग्धस्य मृदुकर्त्तव्यमूर्द्धञ्चाधश्च शोधनं ।

आस्थापनं तथाकार्य्यं शिरसश्च विरेचनं ॥

यवगोधूमशालीश्च रसैर्भुञ्जीत शोधितः ।

दृढेऽग्नौ बृंहयेच्चापि निवृत्तोपद्रवं नरं ॥

व्यवायशोषिणं प्रायो भजन्ते वातजा गदाः ।

बृंहणीयो विधिस्तस्मै हितः स्निग्धोऽनिलापहः ॥

काकानुलूकान्नकुलान् विलाडान् गण्डूपदान् व्यालबिलेशयाखून् ।

गृध्रांश्च दद्याद्विविधैः प्रकारैः समैन्धवान्सर्षपतैलभृष्टान् ॥

देयानि मांसानि च जाङ्गलानि मुद्गाढकीसूपरसाश्च हृद्याः ॥

खरोष्ट्रनागाश्वतराश्वजानि देयानि मांसानि सुकल्पितानि ।

मांसोपदंशांश्च पिबेदरिष्टान्माध्वीकयुक्ता मदिराश्च सेव्याः ॥

अर्कामृताक्षारजलोषितेभ्यः कृत्वा यवेभ्यो विविधांश्च भक्ष्यान् ।

खादेत् पिबेत्सर्प्पिरजाविकं वा कृशो यवाग्वा सह भक्तकाले ॥

सर्प्पिर्मधुभ्यां त्रिकटु प्रलिह्याच्चव्याविडङ्गोपहितं क्षयार्त्तः ।

मांसादमांसेषु घृतञ्च सिद्धं शोषापहं क्षौद्रकणासमेतं ॥

द्राक्षासितामागधिकावलेहः सक्षौद्रतैलः क्षयरोगघाती ।

घृतेन चाजेन समाक्षिकेन तुरङ्गगन्धातिलमाषचूर्णं ॥

सिताश्वगन्धामगधोद्भवानां चूर्णं घृतं क्षौद्रयुतं प्रलिह्यात् ।

क्षीरं पिवेद्वाप्यथ वाजिगन्धाविपक्वमेवं लभते च पुष्टिं ॥
तदुत्थितं क्षीरघृतं सिताढ्यं प्रातः पिवेद्वाथ पयोऽनुपानं ।
उत्सादने चापि तुरगङ्गगन्धा योज्या यवाश्चैव पुनर्न्नवे च ॥
छत्त्रे वृषे तत्कुसुमैश्च सिद्धं सर्प्पिः पिवेत्क्षौद्रयुतं हिताशी ।
यक्ष्माणमेतत्प्रबलञ्च कासं श्वासञ्च हन्यादपि पाण्डुताञ्च ॥
शकृद्रसा गोऽश्वगजाव्यजानां क्वाथामिताश्चापि तथैव भागैः ।
मूर्व्वाहरिद्राखदिरद्रुमाणां क्षीरस्य भागस्त्वपरो घृतस्य ॥
भागान् दशैतान् विपचेद्विधिज्ञो दत्वा त्रिवर्गं मधुरञ्च कृत्स्नं ।
कटुत्रिकञ्चैव सभद्रदारु घृतोत्तमं यक्ष्मनिवारणाय ॥
द्वे पञ्चमूल्यौ वरणं करञ्जं भल्लातकं विल्वपुनर्न्नवे च ।
यवान्कुलत्थान्वदराणि भार्गीं पाठां कृताशं समहीकदम्वं ॥
कृत्वा कषायं विपचेद्धि तस्य षड्भिर्हि पात्रैर्घृतपात्रमेकं ।
व्योषं महावृक्षपयोऽभयाश्च चव्यं सुराख्यं लवणोत्तमञ्च ।
एतद्धि शोषं जठराणि चैव हन्यात्प्रमेहांश्च सहानिलेन ॥
गोश्वाव्यजैभैणखरोष्ट्रजाजैः शकृद्रसक्षीररसक्षतोत्थैः ।
द्राक्षाश्वगन्धामगधासिताभिः सिद्धं घृतं यक्ष्मविकारहारि ॥
एलाजमोदामलकाभयाक्षगायत्र्यरिष्टासनशालसारान् ॥
विडङ्गभल्लातकचित्रकोग्राकटुत्रिकाम्भोदसुराह्वजाश्च ।
पक्वा जले तेन पचेद्धिसर्प्पिस्तस्मिन् सुसिद्धे त्ववतारिते च ॥
त्रिंशत्पलान्यत्र सितोपलाया दत्वा तुगाक्षीरिपलानि षट्च ।
प्रस्थे घृतस्य द्विगुणञ्च दद्यात्क्षौद्रं ततो मन्थहतं विदध्यात् ॥

पलं पलं प्रातरतः प्रलिह्यात्पश्चात्पिबेत्क्षीरमतन्द्रितश्च ।
एतद्धि मेध्यं परमं पवित्रं चक्षुष्यमायुष्यमथो यशस्यं ॥
यक्ष्माणमाढ्य व्यपहन्ति चैतत्पाण्ड्वामयञ्चैव भगन्दरञ्च ।
श्वासञ्च हन्ति स्वरभेदकासहृत्प्लीहगुल्मग्रहणीगदांश्च ॥
न चात्र किञ्चित्परिवर्ज्जनीयं रसायनञ्चैतदुपास्यमानं ।
प्लीहोदरोक्तं विहितं च सर्पिस्तीण्येव चान्यानि हितानि चात्र॥
उपद्रवांश्च स्वरवैकृतादीन् जयेद्यथास्वं प्रसमीक्ष्य शास्त्रं ।
अजाशकृन्मूत्रपयोघृताशृङ्मांसालयानि प्रतिसेवमानः ॥
स्नानादिनानाविधिना जहाति मासादशेषं नियमेन शोषं ।
रसोनयोगं विधिवत्क्षयार्त्तः क्षीरेण वा नागबलाप्रयोगं ॥
सेवेत वा मागधिकाविधानं तथोपयोगं जतुनोऽश्मजस्य ।
शोकं स्त्रियं क्रोधमसूयनञ्च त्यजेदुदारान्विषयान्भजत ॥
वैद्यान् द्विजातीं स्त्रिदशान् गुरूंश्च वाचश्च पुण्याः शृणुयाद्द्विजेभ्यः।

---

॥ द्विचत्वारिंशत्तमोऽध्यायः ॥

अथातो गुल्मप्रतिषेधं व्याख्यास्यामः ॥
यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥
हृद्वस्त्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ।
चयापचयवान्वृत्तः स गुल्म इति कीर्त्तितः ॥
पञ्च गुल्माश्रया नृणां पार्श्वे हृन्नाभिवस्तयः ।

कुपितानिलमूलत्वाद्गूढमूलोदयादपि ॥
गुल्मवद्वा विशालत्वाद्गुल्म इत्यभिधीयते।
स यस्मादात्मनि चयं गच्छत्यप्स्विव बुद्बुदः ॥
अन्तःसरति यस्माच्च न पाकमुपयात्यतः।
स व्यस्तैर्जायते दोषैः समस्तैरपि वोच्छ्रितैः ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः।
सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजनं ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
द्वेषोऽन्ने वायुरूर्द्ध्वञ्च पूर्व्वरूपेषु गुल्मिनां ॥

हृत्कुक्षिशूलं मुखकण्ठशोषो वायोर्न्निरोधो विषमाग्निता च ।
ते ते विकाराः पवनात्मकाश्च भवन्ति गुल्मेऽनिलसम्भवे तु ॥
स्वेदज्वराहारविदाहदाहास्तृष्णाङ्गरागः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेऽरुचिरङ्गसादश्छर्दिःप्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मकः सर्व्वविकारयुक्तः सोऽसाध्य उक्तः चतजञ्च वक्ष्ये ।
नवप्रसूताऽहितभोजना या याचामगर्भं विसृजेदृतौ वा ॥
वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहं ।
पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणं चाप्यपरं निबोध ॥
न स्पन्दते नोदरमेति वृद्धिं भवन्ति लिङ्गानि च गर्भिणीनां।
तं गर्भकालातिगमे चिकित्स्यमसृग्भवं गुल्ममुशन्ति तज्ज्ञाः ॥

वातगुल्मार्द्दितं स्निग्धं युक्तं स्नेहविरेचनैः ।
उपाचरेद्यथाकालं निरूहैः सानुवासनैः ॥
पित्तगुल्मार्द्दितं स्निग्धं काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ॥
श्लेष्मगुल्मार्द्दितं स्निग्धं पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहैः समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ।
पित्तवद्रक्तगुल्मिन्या नार्य्याः कार्य्यः क्रियाविधिः ॥
विशेषमपरं चास्याः शृणु रक्तविभेदनं ।
पलाशभस्मतोयेन सिद्धं सर्प्पिः प्रयोजयेत् ॥
दद्यादुत्तरवस्तिञ्च पिप्पल्यादिघृतेन तु ।
उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरो हितः ॥
आनूपौदकमज्जानो वसा तैलं घृतं दधि ।
विपक्वमेकतः शस्तं वातगुल्मेऽनुवासनं ॥
जाङ्गलैकशफानान्तु वसा सर्प्पिश्च पैत्तिके ।
तैलं जाङ्गलमज्जान एवं गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षडङ्गं विपचेद्घृतं ।
शर्करासैन्धवोपेतं तद्धितं वातगुल्मिने ।
चित्रकव्योषसिन्धूत्थपृथ्वीकाचव्यदाडिमैः ।
दीप्यकग्रन्थिकाजाजीहवुषाधान्यकैः समैः ॥
दध्यारनालबदरमूलकस्वरसैर्घृतं ।

तत्पिबेद्वातगुल्माग्निदौर्बल्याटोपशूलनुत्॥
हिङ्गुसौवर्च्चलाजाजीविडदाडिमदीप्यकैः।
पुष्करव्योषधान्याम्लवेतसक्षारचित्रकैः॥
शटीवचाजगन्धैलासुरसैश्च विपाचितं।
शूलानाहहरं सर्प्पिर्दध्ना चानिलगुल्मिनां॥
विडदाडिमसिन्धूत्थकृतभुग्व्योषजीरकैः।
हिङ्गुसौवर्च्चलक्षाररुग्वृचाम्लाम्लवेतसैः॥
वीजपूररसोपेतं सर्प्पिर्दधिचतुर्गुणं।
साधितं दाधिकं नाम गुल्मह्वत्प्लीहशूलजित्॥
रसोनस्वरसे सर्पिः पञ्चमूलरसान्वितं।
सुरारनालदध्यम्लमूलकस्वरसैः सह॥
व्योषदाडिमवृक्षाम्लयवानीचव्यसैन्धवैः॥
हिंग्वम्लवेतसाजाजीदीप्यकैश्च समांशिकैः।
सिद्धङ्गुल्मग्रहण्यर्शःश्वासोन्मादक्षयज्वरान्॥
कासापस्मारमन्दाग्निप्लीहशूलानिलाञ्जयेत्।
दधिसौवीरकं सर्प्पिः क्वाथो मुद्गकुलत्थजौ॥
पञ्चाढकानि विपचेदावाप्य द्विपलान्यथ।
सौवर्चलं स्वर्जिकाञ्च देवदार्व्यथ सैन्धवं॥
वातगुल्मापहं सर्प्पिरेतद्दीपनमेव च।
तृणमूलकषाये तु जीवनीयैः पचेद्घृतं॥
न्यग्रोधादिगणे वापि गणे वाप्युत्पलादिके।

रक्तपित्तोत्थितं घ्नन्ति घृतान्येतान्यसंशयं ॥
आरग्वधादौ विपचेद्दीपनीययुतं घृतं ।
क्षारवर्गे पचेच्चान्यत्पचेन्मूत्रगणेऽपरं ॥
घ्नन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयं ।
यथादोषोच्छ्रयञ्चापि चिकित्सेत्सान्निपातिकं ॥
चूर्णं हिंग्वादिकं वापि घृतं वा प्लीहनाशनं ।
पिबेद्गुल्मापहं काले सर्पिस्तैल्वकमेव वा ॥
तिलेक्षुरकपालाशसार्षपं यवनालजं ।
भस्म मूलकजञ्चापि गोजाविखरहस्तिनां ॥
मूत्रेण महिषीणाञ्च पालिकैश्चावचूर्णितैः ।
कुष्ठसैन्धवयष्ट्याह्वनागरक्रिमिघातिभिः ॥
साजमोदैश्च दशभिः सामुद्राच्च पलैर्युतं ।
अयः पात्रेऽग्निनाल्पेन पक्त्वा लेह्यमयोद्धरेत् ॥
तस्य मात्रां पिबेद्धत्वा सुरया सर्पिषापि वा ।
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ॥
गुल्मं वातविकारांश्च क्षारोऽयं हन्त्यसंशयं ।
स्वर्जिकाकुष्ठसहितः क्षारः कैतकजोऽपि वा ॥
तैलेन शमयेत्पीतो गुल्मं पवनसम्भवं ।
पीतं सुखाम्बुना वापि स्वर्जिकाकुष्ठसैन्धवं ॥
वृश्चीकमुरुवूकञ्च वर्षाभूवृहतीद्वयं ।
चित्रकञ्च जलद्रोणे पक्त्वापादावशेषितं ॥

मागधीचित्रकक्षौद्रलिप्ते कुम्भे निधापयेत्।
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतं॥
तुषोषितं दशाहन्तु जीर्णभक्तः पिबेन्नरः।
अरिष्टोऽयं जयेद्गुल्ममविपाकमरोचकं॥
पाठानिकुम्भरजनीत्रिकटुत्रिफलाग्निकं।
लवणं द्वचवीजञ्च तुल्यं स्यादनवं गुडं॥
पथ्याभिः सहितं चूर्णं गवां मूत्रयुतं पचेत्।
गुटिकास्तद्घनीभूतं कृत्वा खादेदभुक्तवान्॥
गुल्मप्लीहाग्निसादांस्ता नाशयेयुरशेषतः।
हृद्रोगं ग्रहणीदोषं पाण्डुरोगञ्च दारुणं॥
सशूले सोन्नतस्पन्दे दाहपाकरुगर्दिते।
गुल्मे रक्तं जलौकोभिः सिरामोक्षेण वा हरेत्॥
सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनां॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः।
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः॥
बद्धवर्चोऽनिलानान्तु सार्द्रकं क्षीरमिष्यते।
कुम्भीपिण्डेष्टकास्वेदान्कारयेत्कुशलो भिषक्॥
गुल्मिनः सर्व्व एवोक्ता दुर्व्विरेच्यतमा भृशं।
अतश्चैतांस्तु सुस्विन्नान्स्रंसनेनोपपादयेत्॥
विलेपनाभ्यञ्जनानि तथा संदहनानि च।

उपनाहाश्च कर्त्तव्याः सुखोष्णाः शाल्वणादयः ॥
उदरोक्तानि सर्प्पींषि चूर्णवर्त्तिक्रियास्तथा ।
लवणानि च योज्यानि यान्युक्तान्युदरामये ॥
वातवर्चोनिरोधे तु सामुद्रार्द्रकसर्षपैः ।
कृत्वा पायौ विधातव्या वर्त्तयो मरिचोत्तराः ॥
दन्तीचित्रकमूलेषु तथा वातहरेषु च ।
कुर्य्यादरिष्टान् सर्व्वांश्च सूत्रस्थाने यथेरितान् ॥
खादेद्वाप्यङ्कुरान् भृष्टान् पूतीकनृपवृक्षजान् ।
ऊर्द्ध्ववातमनुष्यच्च गुल्मिनं न निरूहयेत् ॥
पिबेत्तृष्णन्नागरं वा सगुडां वा हरीतकीं ।
गुग्गुलुं त्वष्टतां दन्तीं द्रवन्तीं सैन्धवं वचां ॥
मूत्रमद्य पयोद्राक्षारसैर्व्वीक्ष्य बलाबलं ॥
एवं पीलूनि पिष्टानि पिबेत्सलवणानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥
युक्ता हन्ति सुरा गुल्मं शीघ्रं काले प्रयोजिता ।
बद्धविण्मारुतोगुल्मी भुञ्जीत पयसा यवान् ॥
कुल्माषान्वा बहुस्नेहान् भक्षयेल्लवणोत्तरान् ।
अथास्योपद्रवः शूलः कथञ्चिदुपजायते ॥
शूलं निखानितमिव सुखं येन न वेत्त्यसौ ।
तत्र विण्मूत्रसंरोधः कृच्छ्रोच्छ्वासः स्थिराङ्गता ॥
तृष्णा दाहो भ्रमोऽन्नस्य विदग्धपरिशुद्धता ।

रोमहर्षोऽरुचिश्छर्दिर्भुक्तवद्भिर्ज्वलाङ्गता ॥
वाय्वादिभिर्यथासङ्ख्यं मिश्रैर्वा वीक्ष्य योजयेत्।
पथ्यात्त्रिलवणं चारं हिङ्गुतुम्बुरुपौष्करं ॥
यवान्यथ हरिद्रा च विडङ्गान्यम्लवेतसं।
विदारी त्रिफला भीरु शृङ्गाटी गुडशर्करा ॥
काश्मरीफलयष्ट्याह्वपरूषकहिमानि च।
षड्ग्रन्थातिविषादारुपथ्यामरिचवृचकान् ॥
कृष्णामूलकचव्यञ्च नागरचारचित्रकान्।
उष्णाम्लकाञ्जिकचीरतोयैः श्लोकसमापनात् ॥
यथाक्रमं विमिश्रांश्च द्वन्द्वे सर्व्वांश्च सर्व्वजे।
तथैव सेकावगाहप्रदेहाभ्यङ्गभोजनं ॥
शिशिरोदकपूर्णानां भाजनानाञ्च धारणं।
वमनोन्मर्दनस्वेदलङ्घनचपणक्रियाः ॥
स्नेहादिश्च क्रमः सर्व्वो विशेषेणोपदिश्यते।
वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलं।
न खादेदालुकञ्ज्ल्लो मधुराणि फलानि च ॥
विना गुल्मेन यच्छूलं गुल्मस्थानेषु जायते।
निदानं तस्य वक्ष्यामि रूपञ्च सचिकित्सितं ॥
वातमूत्रपुरीषाणां विग्रहादतिभोजनात्।
अजीर्णाध्यशनायासविरुद्धान्नोपसेवनात् ॥
पानीयपानात्त्तुल्काले विरूढानाञ्च सेवनात्।

पिष्टान्नशुष्कमांसानामुपयोगात्तथैव च ॥
एवंविधानां द्रव्याणामन्येषां चोपसेवनात् ।
वायुः प्रकुपितः कोष्ठे शूलं सञ्जनयेद्भृशं ॥
निरुच्छासो भवेत्तेन वेदनापीडितो नरः ।
शङ्कुस्फोटनवत्तस्य यस्मात्तीव्राश्च वेदनाः ॥
शूलासक्तस्य लक्ष्यन्ते तस्माच्छूलमिहोच्यते ।
निराहारस्य यस्यैव तीव्रं शूलमुदीर्य्यते ॥
प्रस्तब्धगात्रो भवति कृच्छ्रेणोच्छ्वसितीव च ।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥
एतैर्लिङ्गैर्व्विजानीयाच्छूलं वातसमुद्भवं ।
तृष्णा दाहो मदो मूर्च्छा तीव्रं शूलं तथैव च ॥
शीताभिकामो भवति शीतेनैव प्रशाम्यति ।
एतैर्लिङ्गैर्व्विजानीयाच्छूलम्पित्तसमुद्भवं ॥
शूलेनोत्पीड्यमानस्य हृल्लास उपजायते ।
अतीव पूर्णकोष्ठत्वं तथैव गुरुगात्रता ॥
एतच्छ्लेश्मसमुत्थस्य शूलस्योक्तं निदर्शनं ।
सर्व्वाणि दृष्ट्वा रूपाणि निर्द्दिशेत्सान्निपातिकं ॥
सन्निपातसमुत्थानमसाध्यं तं विनिर्दिशेत् ।
शूलानां लक्षणं प्रोक्तं चिकित्सां च निबोध मे ॥
आशुकारी हि पवनस्तस्मात्तं त्वरया जयेत् ।
तस्य शूलाभिपन्नस्य स्वेद एव सुखावहः ॥

पायसैः कृशरापिण्डैः स्निग्धैर्व्वापिशितैर्हितः ।
हृद्यच्छाकेन वा स्निग्धमुष्णं भुञ्जीत भोजनं॥
चिरविल्वाङ्कुरान् वापि तैलभृष्टांस्तु भक्षयेत् ।
वैहङ्गांश्च रसान् स्निग्धान् जाङ्गलान् शूलपीडितः ॥
यथालाभं निषेवेत मांसानि बिलशायिनां ।
सुरासौवीरकं शुक्तं मस्तुदश्वित्तथा दधि॥
सकाललवणं पेयं शूले वातसमुद्भवे ।
कुलत्थयूषो युक्ताम्लो लावकीयूषसंस्रुतः ॥
ससैन्धवः समरिचो वातशूलविनाशनः ।
विडङ्गं शिग्रुकम्पिल्लपथ्याश्यामाम्लवेतसान्॥
सुरसामश्वकर्णञ्च सौवर्चलयुतान्पिवेत् ॥
मद्येन वातजं शूलं क्षिप्रमेव प्रशाम्यति ।
पृथ्वीकाजाजिचविकायवानीव्योषचित्रकाः ॥
पिप्पल्यः पिप्पलीमूलं सैन्धवं चेति चूर्णयेत् ।
तानि चूर्णानि पयसा पिवेत्काम्बलिकेन वा ॥
मध्वासवेन चुक्रेण सुरासौवीरकेण वा ।
अथ वै तानि चूर्णानि मातुलुङ्गरसेन वा ॥
तथा वदरयूषेण भावितानि पुनःपुनः ।
तानि हिंगुप्रगाढानि सह शर्करया पिवेत्॥
सह दाडिमसारेण वर्त्तिः कार्य्या भिषग्जिता ।
सा वर्त्तिर्व्वातिकं शूलं क्षिप्रमेव व्यपोहति॥

गुडतैलेन वा लीढा पीता मद्येन वा पुनः ।
बुभुक्षाप्रभवे शूले लघु सन्तर्पणं हितं ॥
उष्णैः क्षीरैर्यवागूभिः स्निग्धैर्मांसरसैस्तथा ।
वातशूले समुत्पन्ने रूक्षं स्निग्धेन योजयेत् ॥
सुसंस्कृताः प्रदेयाः स्युर्घृतपूरा विशेषतः ।
वारुणीञ्च पिबेज्जन्तुस्तथा सम्पद्यते सुखी ॥
एतद्वातसमुत्थस्य शूलस्योक्तं चिकित्सितं ।
अथ पित्तसमुत्थस्य क्रियां वक्ष्याम्यतः परं ।
स सुखं छर्दयित्वा तु पीत्वा शीतोदकं नरः ॥
शीतलानि च सेवेत सर्व्वाण्युष्णानि वर्ज्जयेत् ।
मणिराजतताम्राणि भाजनानि च सर्व्वशः ॥
वारिपूर्णानि तान्यस्य शूलस्योपरि निक्षिपेत् ।
गुडशालियवाः क्षीरं सर्पिः पानं विरेचनं ॥
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनां ।
रसान्सेवेत पित्तघ्नान् पित्तलानि विवर्ज्जयेत् ॥
पालाशं धान्वनं वापि पिबेद्यूषं सशर्करं ।
परूषकाणि मृद्वीकाखर्ज्जूरोदकजान्यपि ॥
तत्पिबेच्छर्करायुक्तं पित्तशूलनिवारणं ॥
अशने भुक्तमात्रे तु प्रकोपः श्लैष्मिकस्य च ॥
वमनं कारयेत्तत्र पिप्पलीवारिणा भिषक् ।
रूक्षः स्वेदः प्रयोज्यः स्यादन्याश्चोष्णाः क्रिया हिताः ॥

पिप्पलीशृङ्गवेरञ्च श्लेष्मशूले भिषग्जितं ।
पाठां वचां त्रिकटुकं तथाच कटुकरोहिणीं ॥
चित्रकस्य च निर्यूहं पिबेद्यूषं समार्ज्जकं ।
एरण्डफलमूलानि मूलं गोक्षुरकस्य च ॥
शालपर्णीं पृश्निपर्णीं बृहतीं कण्टकारिकां ।
दद्याच्छृगालविन्नाञ्च सहदेवां तथैव च ॥
महासहां क्षुद्रसहां मूलञ्चेक्षुरकस्य च ।
एतत्सम्भृत्य सम्भारं जलद्रोणे विपाचयेत ॥
चतुर्भागावशेषन्तु यवक्षारयुतं पिबेत् ॥
वातिकं पैत्तिकं वापि श्लैष्मिकं सान्निपातिकं ।
प्रसह्य नाशयेच्छूलं छिन्नाभ्रमिव मारुतः ॥
पिप्पल्यः स्वर्ज्जिकाक्षारो यवाश्चित्रक एव च ।
सैव्यञ्चैव समानीय भस्म कुर्य्याद्विचक्षणः ॥
तदुष्णवारिणा पीतं श्लेष्मशूले भिषग्जितं ।
रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः ॥
स संरुद्धः करोत्याशु ध्मानं गुडुगुडायनं ।
सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः ॥
नान्नं वाञ्छति नो निद्रामुपैत्यर्त्तिनिपीडितः ।
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ॥
तत्र पुष्करमूलानि हिंगुसौवर्चलं त्रिडं ।
सैन्धवं तुम्बुरुपथ्याचूर्णं कृत्वा तु पाययेत्॥

पार्श्वहृद्वस्तिशूलेषु यवक्षायेन संयुतं।
सर्पिः स्नीहोदरोक्तं वा घृतं वा हिंगुसंयुतं॥
वीजपूरकसारं वा पयसा सह साधितं।
एरण्डतैलमथ वा मद्यमस्तुपयोरसैः॥
भोजयेच्चापि पयसा जाङ्गलेन रसेन वा।
प्रकुप्यति यदा कुचौ वह्निमाक्रम्य मारुतः॥
तदास्य भोजनं भुक्तं सोपस्तम्भं न पच्यते।
उच्छ्वसित्यामशक्तता शूलेनाहन्यते मुहुः॥
नैवासने न शयने तिष्ठन्न लभते सुखं।
कुक्षिशूल इतिख्यातो वातादामसमुद्भवः॥
वमनं कारयेत्तत्र लङ्घयेद्वा यथाबलं।
संसर्गपाचनं कुर्य्याद्द्रव्यैर्दीपनसंयुतैः॥
नागरं दीप्यकं चव्यं हिंगुसौवर्च्चलं विडं।
मातुलुङ्गाश्च वीजानि तथा श्यामोरुवूकयोः॥
वृहत्याः कण्टकार्य्याश्च क्वाथं शूलहरं पिवेत्।
वचा सौवर्चलं हिंगु कुष्ठं सातिविषाभया॥
कुटजस्य च वीजानि सद्यःशूलहराणि तु।
विरेचनं प्रयुञ्जीत ज्ञात्वा दोषवलावलं॥
स्नेहवस्तीन्निरूहांश्च कुर्य्याद्दोषनिवर्हणं।
उपनाहाः स्वेदसेका धान्याम्लपरिसेचनं।
कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः॥

हृदिस्थः कुरुते शूलमुच्छ्वासरोधकं परं।
स हृच्छूल इतिख्यातो रसमारुतसम्भवः॥
तत्रापि कर्म्माभिहितं यदुक्तं हृद्विकारिणां।
संरोधात्कुपितो वायुर्व्वस्तिमावृत्य तिष्ठति॥
वस्तिवंचणनाभीषु ततः शूलोऽस्य जायते।
विण्मूत्रवातसंरोधो वस्तिशूलः स मारुतात्॥
नाभ्यां वंचणपार्श्वेषु कुक्षौ मेढ्रान्त्रमर्द्दकः।
मूत्रमावृत्य गृह्णाति मूत्रशूलः समारुतात्॥
वायुः प्रकुपितो यस्य रुक्षाहारस्य देहिनः।
मलं रुणद्धि कोष्ठस्थं मन्दीकृत्य तु पावकं॥
शूलं सञ्जनयंस्तीव्रं स्रोतांस्यावृत्य तस्य हि।
दक्षिणं यदि वा वामं कुक्षिमादाय जायते॥
सर्व्वत्र वर्द्धते क्षिप्रं शूलं तत्र सघोषवत्।
पिपासा वर्द्धते तीव्रा भ्रमो मूर्च्छा च जायते॥
उच्चारितो मूत्रितश्च न शान्तिमधिगच्छति।
विट्शूलमेतज्जानीयाद्भिषक्परमदारुणं॥
क्षिप्रं दोषहरं कार्य्यं भिषजा साधु जानता।
स्वेदनं वमनञ्चैव निरूहाः स्नेहवस्तयः॥
पूर्व्वोद्दिष्टान्पाययेत योगान् कोष्ठविशोधनान्।
उदावर्त्तहराश्चास्य क्रियाः सर्व्वाः सुखावहाः॥
अतिमात्रं यदा भुक्तं पावके मृदुतां गते।

स्थिरीभूतं तु तत्कोष्ठे वायुराहृत्य तिष्ठति ॥
अविपाकगतं ह्यन्नं शूलं तीव्रं करोत्यति ।
मूर्च्छाध्मानं विदाहश्च हृदुत्क्लेशो विलम्बिका ॥
विरिच्यते छर्दयति कम्पतेऽथ विमुह्यति ।
क्षाराश्चूर्णानि गुटिकाः शस्यन्ते शूलनाशनाः ॥
गुल्मावस्थाः क्रियाः कार्य्या यथावत्सर्व्वशूलिनां ।

---

## ॥ त्रिचत्वारिंशत्तमोऽध्यायः ॥

अथातो हृद्रोगप्रतिषेधं व्याख्यास्यामः ॥
वेगाघातोष्णरूक्षान्नैरतिमात्रोपसेवितैः ।
विरुद्धाध्यशनाजीर्णैरसात्म्यैश्चापि भोजनैः ॥
दूषयित्वा रसं दोषा विगुणा हृदयं गताः ।
कुर्व्वन्ति हृदये बाधां हृद्रोग तं प्रचक्षते ॥
चतुर्व्विधः स दोषैश्च पञ्चमः क्रिमिभिस्तथा ।
पृथग्लिङ्गं प्रवक्ष्यामि चिकित्सितमनन्तरं ॥
आयम्यते मारुतजे हृदयं तुद्यते तथा ।
निर्म्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि च ॥
तृष्णोषादाहचोषाः स्युः पैत्तिके हृदयक्लमः ।
धूमायनश्च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥
गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवं ।
माधुर्य्यमपि चास्यस्य बलासावतते हृदि ॥

उत्क्लेशः ष्ठीवनं तोदः शूलो हृल्लासकस्तमः।
अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत्॥
भ्रमक्लमौ सादशोषौ ज्ञेयास्तेषामुपद्रवाः।
क्रिमिजे क्रिमिजातीनां श्लैष्मिकीणाञ्च ये मताः॥

वातोपसृष्टे हृदये वामयेत्स्निग्धमातुरं।
द्विपञ्चमूलक्वाथेन सस्नेहलवणेन तु॥
पिप्पल्येलावचाहिंगुयवभस्मानि सैन्धवं॥
सौवर्च्चलमथो शुण्ठीमजमोदाञ्च चूर्णितं।
फलधान्याम्लकौलत्थदधिमद्यासवादिभिः॥
पाययेत विशुद्धञ्च स्नेहेनान्यतमेन वा।
भोजयेज्जीर्णशाल्यन्नं जाङ्गलैः सघृतै रसैः॥
वातघ्नसिद्धं तैलञ्च दद्याद्वस्तिं प्रमाणतः।
श्रीपर्णीमधुकक्षौद्रशीतोपलजलैर्व्वमेत्।

पित्तोपसृष्टे हृदये सेवेत मधुरैः शृतं॥
घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान्।
क्षमस्य च रसैर्मुख्यैर्जाङ्गलैः सघृतैर्भिषक्॥
सक्षौद्रं वितरेद्वस्तिं तैलं मधुकसाधितं।
वचानिम्बकषायाभ्यां वान्तं हृदि कफात्मके।
चूर्णन्तु पाययेतोक्तं वातजे भोजयेच्च तं।
फलादिमथ मुस्तादिं त्रिफलां वा पिबेन्नरः॥
श्यामात्रिवृत्कल्कयुतं घृतं वापि विरेचनं।

बलातैलैर्विदध्याच्च वस्तिं वस्तिविशारदः ।
क्रिमिहृद्रोगिणं स्निग्धं भोजयेत्पिशितौदनं ॥
दध्ना वा पललोपेतं त्र्यहं पश्चाद्विरेचयेत् ।
सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः ॥
विडङ्गगाढैर्धान्याम्लं पाययेताप्यनन्तरं ।
हृदयस्थाः पतन्त्येवमधस्तात्क्रिमयो नृणां ॥
यवान्नं वितरेच्चास्य सविडङ्गमतः परं ।

---

॥ चतुश्चत्वारिंशत्तमोऽध्यायः ॥

अथातः पाण्डुरोगप्रतिषेधं व्याख्यास्यामः ॥

व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव तीक्ष्णं ।
निषेवमाणस्य विदूष्य रक्तं कुर्वन्ति दोषास्त्वचि पाण्डुभावं ॥
पाण्ड्वामयोऽष्टार्द्धविधः प्रदिष्टः पृथक् समस्तैर्युगपच्च दोषैः ।
सर्व्वेषु चैवैष्विह पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोगः ॥
त्वक्स्फोटनं ष्ठीवनगात्रसादौ मृद्भक्षणं प्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥
सकामलापानकिपाण्डुरोगः कुम्भाह्वयो लाघरकोऽलसाख्यः ।
विभाष्यते लक्षणमस्य कृत्स्नं निबोध वक्ष्याम्यनुपूर्व्वशस्तत् ॥
कृष्णेक्षणं कृष्णसिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।
वातेन पाण्डुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥
पीतेक्षणं पीतसिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।

पित्तेन पाण्डुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लसिरावनद्धं तद्वर्णविण्मूत्रनखाननञ्च ।
कफेन पाण्डुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥
सर्वात्मके सर्व्वमिदं व्यवस्येद्वक्ष्यामि लिङ्गान्यथ कामलायाः ।
यो ह्यामयान्ते सहसान्नमम्लमद्यादपथ्यानि च तस्य पित्तं ॥
करोति पाण्डुं वदनं विशेषात्तन्द्राबलत्वं प्रथमोदितांश्च ॥
भेदस्तु तस्याः खलु कुम्भसाह्वं शोफो महांस्तत्र च पर्व्वभेदः ।
ज्वराङ्गमर्दभ्रमसादतन्द्राक्षयान्वितो लाघरकोऽलसाख्यः॥
तं वातपित्ताभिपरीतलिङ्गं हलीमकं नाम वदन्ति तज्ज्ञाः ।
उपद्रवास्तेष्वरुचिः पिपासा छर्दिर्ज्वरो मूर्द्धरुजाग्निसादः ॥
शोफस्तथा कण्ठगतोऽबलत्वं मूर्च्छा क्लमो हृदयपीडनञ्च ।
साध्यन्तु पाण्ड्वामयिनं समीक्ष्य स्निग्धं घृतेनोर्द्धमधश्च शुद्धं ॥
सम्पादयेत् क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णयुतैः प्रयोगैः ।
पिवेद्घृतं वा रजनीविपक्वं यत्त्रैफलं तैल्वकमेव वापि ॥
विरेचनद्रव्यकृतं पिवेद्वि योगांश्च वैरेचनिकान् घृतेन ।
मूत्रे निकुम्भार्द्धपलं विपाच्य पिवेदभीक्ष्णं कुडवार्द्धमात्रं ।
खादेद्गुडं वाप्यभयाविमिश्रमारग्वधादिक्वथितं पिवेद्वा ॥
अयोरजोव्योषविडङ्गचूर्णं लिह्याद्धरिद्रां त्रिफलान्वितां वा ।
सर्प्पिर्मधुभ्यां विदधीत वापि शास्त्रप्रदर्शाभिहितांश्च योगान् ॥
हरेच्च दोषान् बहुशोऽल्पमात्रान् क्षयेद्धि दोषेष्वतिनिर्हृतेषु ।
धात्रीफलानां रसमिक्षुजञ्च मन्थं पिवेत् क्षौद्रयुतं हिताशी ॥

उभे वृहत्यौरजनी शुकाख्यां शाकादनीं चापि सकाकमाचीं।
आदारिविम्बीं सकदम्बपुष्पीं विपाच्य सर्पिर्विपचेत्कषाये ॥
तत्पाण्डुतां हन्त्युपयुज्यमानं क्षीरेण वा मार्गधिकां यथाग्नि।
हितश्च यष्टीमधुकं कषायं चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादलानां दलायसश्चूर्णमनल्पकालं।
प्रवालमुक्ताञ्जनशङ्खचूर्णं लिह्यात्तथा काञ्चनगैरिकोत्थं ॥
आजं शकृद्वा कुडवप्रमाणं विडं हरिद्रालवणोत्तमञ्च।
पृथक्पलांशानि समग्रमेतच्चूर्णं हिताशी मधुनावलिह्यात् ॥
मण्डूरलोहाग्निविडङ्गपथ्याव्योषांशकः सर्व्वसमानताप्यः।
मूत्रासुतोऽयं मधुनावलेहः पाण्ड्वामयं हन्त्यचिरेण घोरं।
विभीतकायोमलनागराणां चूर्णं तिलानाञ्च गुडस्य मुख्यः।
तक्रानुपानो वटकाप्रयुक्तः क्षिणोति घोरानपि पाण्डुरोगान् ॥
सावैर्च्चलं हिङ्गुकिराततिक्तकलायमात्राणि सुखाम्बुना वा।
मूर्व्वाहरिद्रामलकञ्च लिह्यात्स्थितं गवां सप्त दिनानि मूत्रे।
मूलं वलाचित्रकयोः पिवेद्वा पाण्ड्वामयार्त्तोऽक्षसमं हिताशी ॥
सुखाम्बुना वा लवणेन तुल्यं शिग्रोःफलं क्षीरभुजोपयोज्यं।
न्यग्रोधवर्गस्य पिवेत् कषायं शीतं सिताक्षौद्रयुतं हिताशी ॥
शालादिकं चाप्ययसारचूर्णं धात्रीफलं वा मधुनावलिह्यात् ॥
विडङ्गमुस्त त्रिफलाजमोदपट्ठषकव्योषविनिर्द्दहन्यः।
चूर्णीकृता वा गुडशर्करेच तथैव सर्पिर्मधुनी शुभे च ॥
सम्भारमेतद्विपचेन्निधाय सारोदके सारवतो गणस्य।

जातञ्च लेह्यं मतिमान्विदित्वा निधापयेन्मोचकजे समुद्गे ॥
हन्त्येष लेहः खलु पाण्डुरोगं सशोथमुग्रामपि कामलाञ्च ।
सशर्करा कामलिनां त्रिभण्डी हिता गवाची सगुडा च शुण्ठी ॥
कालेयकेचापि घृतं विपक्वं हितं च तत्स्याद्रजनीविमिश्रं ।
धातुं नदीजं जतुशैलजं वा कुम्भाह्वये मूत्रयुतं पिबेद्वा ॥
मुत्रस्थितं सैन्धवसम्प्रयुक्तं मासं पिबेद्वापि हि लोहकिट्टं ।
दग्ध्वाक्षकाष्ठैर्मलमायसंवा गोमूत्रनिर्व्वापितमष्टवारान् ॥
विचूर्ण्य लीढं मधुनाचिरेण कुम्भाह्वयं पाण्डुगदं निहन्यात् ।
सिन्धूद्भवं वाग्निसमं च कृत्वा सिक्त्वा च मूत्रे सकृदेव तप्तं ॥
लौहञ्च किट्टं बहुशश्च तप्त्वा निर्व्वाप्य मूत्रे बहुशस्तथैव ।
एकीकृतं गोजलपिष्टमेतदेकध्यमावाप्य पचेदुखायां ॥
यथा न दह्येत तथा विशुष्कं चूर्णीकृतं पेयमुदश्विता तत् ।
तक्रौदनाशी विजयेत रोगं पाण्डुं तथा दीपयतेऽनलञ्च ॥
द्राक्षागुडुच्यामलकीरसैश्च सिद्धं घृतं लाघरके हितञ्च ।
गौडानरिष्टान्मधुशर्कराश्च मूत्रासवान् चारकृतांस्तथैव ।
स्निग्धान् रसानामलकैरुपेतान् कोलान्वितान् वापिहि जाङ्गलानां ॥
सेवेत शेषाभिहितांश्च योगान् पाण्ड्वामयी शालियवांश्च नित्यं ॥
श्वासातिसारारुचिकासमूर्च्छालटक्छर्द्दिशूलज्वरशोफदाहान् ।
तथा विपाकस्वरभेदसादान् जयेद्यथास्वम्प्रसमीक्ष्य शास्त्रं ॥
अन्तेषु शूनं परिहीनमध्यं म्लानं तथान्तेषु च मध्यशूनं ।

गुदेऽथ शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पं ॥
विवर्ज्जयेत्पाण्डुकिनं यशोर्थी तथातीसारज्वरपीडितञ्च ।

---

॥ पञ्चचत्वारिंशत्तमोऽध्यायः ॥

अथातो रक्तपित्तप्रषेधं व्याख्यास्यामः ॥
क्रोधशोकभयायासविरुद्धान्नातपानलान् ।
कट्वम्ललवणक्षारतीक्ष्णोष्णातिविदाहिनः ॥
नित्यमभ्यसतो दुष्टो रसः पित्तञ्च कोपयेत् ।
विदग्धं स्वगुणैः पित्तं विदहत्याशु शोणितं ॥
ततः प्रवर्त्तते रक्तमूर्द्ध्वञ्चाधो द्विधापिवा ।
आमाशयाद्व्रजेदूर्द्ध्वमधः पक्वाशयाद्व्रजेत् ।
विदग्धयोर्द्वयोश्चापि द्विधाभागं प्रवर्त्तते ।
केचित्सयकृतः सीह्नः प्रवदन्त्यसृजोगतिं ॥
ऊर्द्ध्वं साध्यमधोयाप्यमसाध्यं युगपद्गतं ।
सदनं शीतकामित्वं कण्ठधूमायनं वमिः ॥
लोहगन्धिश्च निश्वासो भवत्यस्मिन्भविष्यति ।
वाह्यास्तल्लचणैस्तस्य सङ्घादोषोच्छ्रितोर्विदुः ॥
दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छाः
भुक्ते चान्ने विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा ।
तृष्णा कण्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च ॥

देषो भक्तोऽविपाको विरतिरपि रते रक्तपित्तोपसर्गाः ॥
मांसप्रक्षालनाभं क्वथितमिव च यत्कर्दमाम्भोनिभं वा
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभं ।
यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्रचोक्ता विकाराः
तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥

नादौ संग्राह्यमुद्रिक्तं यदस्रं बलिनो यतः ।
तत्पाण्डुग्रहणीकुष्ठप्लीहगुल्मज्वरावहं ॥
अधः प्रवृत्तं वमनैरूर्द्ध्वमार्गं विरेचनैः ।
जयेदन्यतरच्चापि क्षीणस्य शमनैरसृक् ॥
अतिप्रवृत्तदोषस्य पूर्व्वं लोहितपित्तिनः ।
अक्षीणबलमांसाग्नेः कर्त्तव्यमपतर्पणं ॥
लङ्घितस्य ततः पेयां विदध्यात्स्वल्पतण्डुलां ।
तर्प्पणं पाचनं लेहान् सर्प्पींषि विविधानि च ॥
द्राक्षामधुककाश्मर्य्यसितायुक्तं विरेचनं ।
यष्टीमधुकयुक्तं च सक्षौद्रं वमनं हितं ॥

पयांसि शीतानि रसाश्च जाङ्गलाः सतीनयूषाश्च सशालिषष्टिकाः ।
पटोलशेलुसुनिषण्णयूथिकावटातिमुक्ताङ्कुरसिन्दुवारजं ॥
हितञ्च शाकं घृतसंस्कृतं सदा तथैव धात्रीफलदाडिमान्वितं ।
रसाश्च पारावतशल्लकूर्मजास्तथा यवाश्चोऽभिहिता घृतोत्तराः ॥
सन्तानिकाश्चोत्पलवर्गसाधिते क्षीरे प्रशस्ता मधुशर्करोत्तमाः ।
हिमाः प्रदेहा मधुशर्कराश्च ये घृतानि पथ्यानि च रक्तपित्तिनां ॥

मधूकशोभाञ्जनकोविदारजैः प्रियङ्गुकायाः कुसुमैश्च चूर्णितैः ।
भिषग्विदध्याच्चतुरः समाक्षिकान् हिताय लेहानसृजः प्रशान्तये ॥
लिह्याच्च दूर्व्वावटजांश्च पल्लवान्मधुद्वितीयान् सितकर्णिकस्य च ।
हितञ्च खर्ज्जूरफलं समाक्षिकं फलानि चान्यान्यपि तद्गुणान्यथ ॥

रक्तातिसारप्रोक्तांश्च योगानत्रापि योजयेत् ।
श्लक्ष्णेक्षुकाण्डमापोथ्य नवे कुम्भे हिमाम्भसा ॥
योजयित्वा क्षिपेद्रात्रावाकाशे सोत्पलन्तु तत् ।
प्रातः शृतं क्षौद्रयुतं पिबेच्छोणितपित्तवान् ॥
पिबेच्छीतकषायं वा जम्ब्वाम्रार्ज्जुनसम्भवं ।
उडुम्बरफलं पिष्ट्वा पिबेत्तद्रसमेव वा ॥
त्रपुषीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना ।
पिबेद्वृषसमं कल्कं यष्टीमधुकमेव वा ॥
चन्दनं मधुकं रोध्रमेवमेवं समं पिबेत् ।
करञ्जवीजमेवं वा सिताक्षौद्रयुतं पिबेत् ॥
मज्जानमिङ्गुदस्यैवं पिबेन्मधुकसंयुतं ।
सुखोष्णं लवणं वीजं कारञ्जन्दधिमस्तुना ॥
पिबेद्वापि त्र्यहं मर्त्यो रक्तपित्ताभिपीडितः ।
रक्तपित्तहराः शस्ताः षडेते योगसत्तमाः ॥
पथ्याश्चैवावपीडेषु घ्राणतः प्रस्रुतेऽसृजि ।
अतिनिस्रुतरक्तो वा क्षौद्रयुक्तं पिबेदसृक् ॥
यकृद्वा भक्षयेदाजमामं पित्तसमायुतं ।

पलाशवृन्तस्वरसे विपक्वं सर्प्पिः पिबेत्क्षौद्रयुतं सुशीतं ॥
वनस्पतीनां स्वरसैः कृतं वा सशर्करं क्षीरघृतं पिबेद्वा ।
द्राक्षामुशीराण्यथ पद्मकं सिता पृथक्पलांशान्युदके समावपेत् ।
स्थितं निशान्तद्रुधिरामयं जयेत्पीतं पयो वाम्बुसमं हिताशिनः ॥
तुरङ्गवर्च्चःस्वरसं समाक्षिकं पिबेत्सिताक्षौद्रयुतं वृषस्य वा ।
लिहेत्तथा वास्तुकबीजचूर्णं क्षौद्रान्वितं तण्डुलसाह्वयं वा ॥
लिह्याच्च लाजाञ्जनचूर्णमेकमेवं सिताक्षौद्रयुतां तुगाख्यां ।
द्राक्षां सितां तिक्तकरोहिणीञ्च हिमाम्बुना वा मधुकेन युक्तां ।
पथ्यामहिंस्रां रजनीं घृतञ्च लिह्यात्तथा शोणितपित्तरोगी ॥
वासाकषायोत्पलमृत्प्रियङ्गुनेत्राञ्जनाम्भोरुहकेशराणि ।
पीत्वा सिताक्षौद्रयुतानि जह्यात्पित्तासृजो वेगमुदीर्णमाशु ॥
गायत्रिजम्ब्वर्ज्जुनकोविदारशिरीषरोध्राशनशाल्मलीनां ।
पुष्पाणि शिग्रोश्च विचूर्ण्य लेह्यो मध्वन्वितः शोणितपित्तरोगे ॥
सक्षौद्रमिन्दीवरभस्म वारि करञ्जबीजं मधुसर्प्पिषी च ।
जम्ब्वर्ज्जुनाम्रक्वथितञ्च तोयं घ्नन्ति त्रयः पित्तमसृक्च योगाः ।
मूलानि पुष्पाणि च मातुलुङ्ग्याः पिष्ट्वा पिबेत्तण्डुलधावनेन ॥
घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा ।
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करञ्चेक्षुरसं हिमं वा ॥
शीतोपचारं मधुरञ्च कुर्य्याद्विशेषतः शोणितपित्तरोगे ।
द्राक्षाघृतक्षौद्रसितायुतेन विदारिगन्धादिविपाचितेन ॥
क्षीरेण चास्थापनमग्र्यमुक्तं हितं घृतञ्चाप्यनुवासनार्थं ॥

प्रियङ्गुरोध्राञ्जनगैरिकोत्पलैः सुवर्णकालीयकशङ्खचन्दनैः ।
सिताश्वगन्धाम्बुदयष्टिकाह्वयैर्मृणालसौगन्धिकतुल्यपेषितैः ॥
निरूह्य चैनं पयसा समाक्षिकैर्घृताप्लुतैः शीतजलाम्बुसेचितं ।
क्षीरोदनं भुक्तमथानुवासयेद्घृतेन यष्टीमधुसाधितेन च ॥
अधोवहं शोणितमाशु नाशयेत्तथातिसारं रुधिरस्य दुस्तरं ।
विरेकयोगेऽतिचैव शस्यते वाम्यस्य रक्ते विजिते बलान्वितः ॥
एवं विधा उत्तरवस्तयश्च मूत्राशयस्थे रुधिरे विधेयाः ।
प्रवृत्तरक्तेषु च पायुजेषु कुर्य्याद्विधानं खलु रक्तपित्ते ॥
विधिश्चासृग्दरेऽप्येष स्त्रीणां कार्य्यो विजानता ।
शस्त्रकर्म्मणि रक्तं वा यस्यातीव प्रवर्त्तते ॥
त्रयाणामपि दोषाणां शोणितस्य च सर्व्वशः ।
लिङ्गान्यालोक्य कर्त्तव्यं चिकित्सितमनन्तरं ॥

---

॥ षट्चत्वारिंशत्तमोऽध्यायः ॥

अथातो मूर्च्छाप्रतिषेधं व्याख्यास्यामः ।
क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ॥
विघातादभिघाताद्वा हीनसत्त्वस्य वा पुनः ।
करणायतनेषूग्रा वाह्येष्वाभ्यन्तरेषु च ॥
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ।
हृत्पीडाजृम्भनं ग्लानिः संज्ञानाशो बलस्य च ॥
सर्व्वासां पूर्व्वरूपाणि यथास्वमुपलक्षयेत् ।

संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुःषड्विधा सा प्रकीर्त्तिता ॥
वातादिभिः शोणितेन मद्येनच विषेणच।
षट्स्वपि तासु पित्तं हि प्रभुत्वेनावतिष्ठते ॥
पृथिव्यम्भस्तमोरूपं रक्तगन्धश्च तन्मयः।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति।
गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः ॥
तएव तस्माज्जायन्ते ताभ्याम्मोहा यथेरिताः।
स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ॥
मद्येन विलपन् शेते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत् ॥
वेपथुस्वप्नतृष्णाः स्युः स्तमश्च विषमूर्च्छिते।
वेदितव्यन्तीव्रतरं यथास्वं विषलक्षणैः ॥
सेकावगाहौ मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च।
शीतानि पानानिच गन्धवन्ति सर्व्वासु मूर्च्छास्वनिवारितानि ॥
सिताप्रियालेक्षुरसप्लुतानि द्राक्षामधूकस्वरसान्वितानि।
खर्ज्जूरकाश्मर्य्यरसैः शृतानि पानानि सर्प्पींषि सजीवनानि ॥
सिद्धानि वर्गे मधुरे पयांसि सदाडिमा जाङ्गलजा रसाश्च।

तथा यवा लोहितशालयश्च मूर्च्छासु पथ्याश्च सदा सतीनाः ॥
भुजङ्गपुष्पं मरिचान्युशीरं कोलस्य मध्यञ्च पिबेत्समानि ।
सतीनतोयेन बिसं मृणालं चैन्द्रेण कृष्णां सितया च पथ्यां ॥
कुर्य्याच्च नासावदनावरोधं क्षीरं पिबेद्वाप्यथमानुषीणां ।
मूर्च्छाप्रसक्तां तु शिरोविरेकैर्ज्जयेदभीक्ष्णं वमनैश्च तीक्ष्णैः ॥
हरीतकीक्काथघृतं पिबेद्वा धात्री फलानां स्वरसैः कृतंवा ।
द्राक्षासितादाडिमलाजवन्ति शीतानि नीलोत्पलपद्मवन्ति ॥
पिबेत्कषायाणि च गन्धवन्ति पित्तज्वरं यानि शमं नयन्ति ।
प्रभूतदोषस्तमसोऽतिरेकात्संमूर्च्छितो नैव विबुध्यते यः ॥
संन्यस्तसंज्ञो भृशदुश्चिकित्स्यो ज्ञेयस्तदा बुद्धिमता मनुष्यः ।
यथामलोष्टं सलिले निषिक्तं समुद्धरेदाश्वविलीनमेव ॥
तद्वच्चिकित्सेत्त्वरया भिषक्तमवेदनं मृत्युवशप्रयातं ।
तीक्ष्णाञ्जनाभ्यञ्जनधूमयोगैस्तथा नखाभ्यन्तरतोत्त्रपातैः ॥
वादित्रगीतानुनयैरपूर्व्वैर्व्विघट्टनैर्गुप्तफलावघर्षणैः ॥
आभिःक्रियाभिश्च न लब्धसंज्ञः सानाहलालाश्वसनश्च वर्ज्यः ।
प्रभूतसंज्ञं वमनानुलोम्यैस्तीक्ष्णैर्व्विशुद्धं लघुपथ्यभुक्तं ॥
फलत्रिकैश्चित्रकनागराद्यैस्तथाश्मजाताज्जतुनः प्रयोगैः ।
सशर्करैर्मासमुपक्रमेत विशेषतो जीर्णघृतं स पाय्यः ॥
यथास्वञ्च ज्वरघ्नानि कषायाण्युपयोजयेत् ।
सर्व्वमूर्च्छापरीतानां विषजानां विषापहं ॥

---

॥ सप्तचत्वारिंशत्तमोऽध्यायः ॥

अथातः पानात्ययप्रतिषेधं व्याख्यास्यामः ॥

मद्यमुष्णं तथा तीक्ष्णं सूक्ष्मं विशदमेव च ।
रूक्षमाशुकरञ्चैव व्यवायि च विकाशि च ॥
औष्ण्याच्छीतोपचारं तत्तैक्ष्ण्याद्धन्ति मनोगतिं ।
विशत्यवयवान् सौक्ष्म्याद्वैशद्यात्कफशुक्रनुत् ॥
मारुतं कोपयेद्रौक्ष्याद्आशुत्वादाशुकर्म्मकृत् ।
हर्षदञ्च व्यवायित्वाद्विकाशित्वाद्विसर्पति ॥
तदम्लं रसतः प्रोक्तं लघुरोचनदीपनं ।
केचिल्लवणवर्ज्ज्यांस्तु रसानत्रादिशन्ति हि ॥
स्निग्धैस्तदन्नैर्म्मांसैश्च भक्ष्यैश्च सह सेवितं ।
भवेदायुःप्रकर्षाय बलायोपचयाय च ।
काम्यता मनसस्तुष्टिर्द्धैर्य्यं तेजोऽतिविक्रमः ॥
विधिवत्सेव्यमाने तु मद्ये सन्निहिता गुणाः ।
तदेवानन्नमन्नेन सेव्यमानममात्रया ॥
कायाग्निनाद्यग्निसमं समेत्य कुरुते मदं ।
मदेन करणानान्तु भावान्यत्वे कृते सति ॥
निगूढमपि भावं स्वम्प्रकाशीकुरुतेऽवशः ।
व्यवस्थस्य मदो ज्ञेयः पूर्व्वो मध्योऽथ पश्चिमः ॥
पूर्व्वे वीर्य्यरतिप्रीतिहर्षभाष्यादिवर्द्धनं ।
प्रलापो मध्यमे हर्षो युक्तायुक्तक्रियास्तथा ॥

विसंज्ञः पश्चिमे शेते नष्टकर्म्मक्रियागुणः ।
श्लैष्मिकानल्पपित्तांश्च स्निग्धान्मात्रोपसेविनः ॥
पानं न बाधतेऽत्यर्थं विपरीतांस्तु बाधते ।

निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यं ।
उत्पादयेत् कष्टतमान्विकारानापादयेच्चापि शरीरभेदं ॥
क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि ॥
अत्यम्लभक्ष्यावततोदरेण साजीर्णभुक्तेन तथाबलेन ।
उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान् ॥

पानात्ययं परमदम्पानाजीर्णमथापि वा ।
पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणं ॥
स्तम्भाङ्गमर्दहृदयग्रहतोदकम्पाः
पानात्ययेऽनिलकृते शिरसो रुजश्च ।
स्वेदप्रलापमुखशोषणदाहमूर्च्छाः
पित्तात्मके वदनलोचनपीतता च ॥
श्लेष्मात्मके वमथुशीतकफप्रसेकाः
सर्व्वात्मके भवति सर्व्वविकारसम्पत् ।
ऊष्मा शरीरगुरुता विरसाननत्वं
श्लेष्माधिकत्वमरुचिर्म्मलमूत्रसङ्गः ॥
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
स्तृष्णारुजा शिरसि सन्धिषु चापि भेदः ।

आध्मानमुद्गिरणमम्लरसो विदाहो
जीर्णस्य पानजनितस्य वदन्ति लिङ्गं ॥
ज्ञेयानि तत्र भिषजा सुविनिश्चितानि
पित्तप्रकोपजनितानि च कारणानि ।
हृद्गात्रतोदवमथुज्वरकण्ठधूम
मूर्च्छाकफस्रवणमूर्द्धरुजो विदाहः ॥
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेन धीराः ।
हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं विजह्यात् ॥
जिह्वौष्ठदन्तमसितं त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च ।
हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं भजन्ते ॥

तेषां निवारणमिदं हि मयोच्यमानं
व्यक्ताभिधानमखिलेन विधिं निबोध ।
मद्यन्तु चुक्रमरिचार्द्रकदीप्यकुष्ठ
सौवर्चलायुतमलं पवनस्य शान्त्यै ॥
पृथ्वीकदीप्यकमहौषधहिङ्गुभिर्वा
सौवर्चलेन च युतं वितरेत्सुखाय ।
आम्रातकाम्रफलदाडिममातुलुङ्गैः

कुर्य्याच्छुभान्यपि च षाडवपानकानि ॥
सेवेत वा फलरसोपहितान्नसादी
नानूपवर्गपिशितान्यपि गन्धवन्ति ।
पित्तात्मके मधुरवर्गकषायमिश्रं
मद्यं हितं समधुशर्करमिष्टगन्धं ॥
पीत्वा च मद्यमपि चेक्षुरसप्रगाढं
निःशेषतः क्षणमवस्थितमुल्लिखेच्च ।
लावैणतित्तिरिरसांश्च पिबेदनम्ला
न्मौद्गान्सुखाय सघृतान्ससितांश्च यूषान् ॥
पानात्यये कफकृते कफमुल्लिखेच्च
मद्येन बिम्बिविदुलोदकसंयुतेन ।
सेवेत तिक्तकटुकांश्च रसानुदारान्
यूषांश्च तिक्तकटुकोपहितान् हिताय ॥
पथ्यं यवान्न विकृतान्यपि जाङ्गलानि
श्लेष्मघ्नमन्यदपि यच्च निरत्ययं स्यात् ।
कुर्य्याच्च सर्व्वमथ सर्व्वभवे विधानं
द्वन्द्वोद्भवे द्वयमवेक्ष्य यथा प्रधानं ॥
सामान्यमन्यदपि यत्तु समग्रमग्र्यं
वक्ष्यामि यच्च मनसो मदकृत्सुखञ्च ।
त्वङ्नागपुष्पमगधैलमधूकधान्यैः
कृष्णैरजाजिमरिचैश्च कृतं समांशैः ॥

पानं कपित्थरसवारिपरूषकाढ्यं
पानात्ययेषु विधिवत्प्रतमम्बरान्ते ।
ह्रीवेरपद्मपरिपेलवसंप्रयुक्तैः
पुष्पैः प्रलिप्य करवीरजलोद्भवैश्च ॥
पिष्टैः सपद्मकयुतैरपि सारिवाद्यैः
सेकं जलैश्च वितरेदमलैः सुशीतैः ।
त्वक् पत्रचोचमरिचैलभुजङ्गपुष्प
सेम्मातकप्रसवकल्कगुडैरुपेतं ॥
द्राक्षायुतं द्रुतमलं मदिरामयार्त्तो
स्त्यानकं शुचि सुगन्धिनरैर्निषेव्यं ।
पिष्ट्वा पिवेच्च मधुकं कटुरोहिणीञ्च
द्राक्षाञ्च मूलमसकृत् त्रपुसीभवं यत् ॥
कर्प्पासमूलमथ नागबलाञ्च तुल्यां
पीत्वा सुखी भवति साधु सुवर्चलाञ्च ।
काश्मर्य्यदारुविडदाडिमपिप्पलीषु
द्राक्षान्वितासु कृतमम्बुनि पानकं यत् ॥
तद्वीजपूरकरसायुतमाशु पीतं
शान्तिं परां मदगदेष्वचिरात्करोति ।
द्राक्षासितामधुकजीरकधान्यकृष्णा
स्वेवं कृतं हृष्टतया च पिवेत्तयापि ॥
सौवर्चलायुतमुदाररसं फलाम्लं

भार्गीशृतेन च जलेन हितावसेकः ।
इक्ष्वाकुधामार्गववृच्चकानि काकक्षयोडुम्बरिकाश्च दुग्धे ।
विपाच्य तस्याञ्जलिना वमेद्धि मद्यं पिबेदह्नि गते त्वजीर्णे ॥

त्वक्पिप्पलीभुजगपुष्पविडङ्गपेतं
सेवेत हिङ्गुमरिचैलयुतं फलाम्लं ।
उष्णाम्बुसैन्धवयुतास्त्वथ वा विडत्वक्
चव्यैर्लहिङ्गुमगधाफलमूलशुण्ठीः ॥

हृद्यैः खडैरपि च भोजनमत्र शस्तं
द्राक्षाकपित्थफलदाडिमपानकं यत् ।
तत्पानविभ्रमहरं मधुशर्कराढ्य
माम्रातकोलरसपानकमेव वापि ॥

खर्जूरवेत्रककरीरपरूषकेषु
द्राक्षाद्वृत्स्तु च कृतं समितं हितं वा ।
श्रीपर्णियुक्तमथ वा तु पिबेदिमानि
षष्ठ्याक्षयोत्पलहिमाम्बुविमिश्रितानि ॥

क्षीरिप्रबालविसजीरकनागपुष्प
पत्रैलवालुशितशारिवपद्मकानि ।
आम्रातभव्यकरमर्द्दकपित्थकोल
वृक्षाम्लवेत्रफलजीरकदाडिमानि ॥

सेवेत वा मरिचजीरकनागपुष्प
त्वक्पत्रविश्वचविकैलयुतान्नसांश्च ।

सूक्ष्माम्बरश्रुतहिमांश्च सुगन्धिगन्धान्।
पानोद्भवानुदति सन्नगदानशेषान्॥
पञ्चेन्द्रियार्थविषया मृदुपानयोगा
हृद्याः सुखाश्च मनसः सततन्नियोज्याः।
पानात्ययेषु विकटोरुनितम्बवत्यः
पीनोन्नतस्तनभरा नतमध्यदेशाः॥
प्रौढाःस्त्रियोऽभिनवयौवनपीनगात्र्यः
सेव्याश्च पञ्चविषयातिशयस्वभावाः।

पिबेद्रसं पुष्पफलोद्भवं वा सितामधूकत्रिसुगन्धियुक्तं।
संचूर्ण्य संयोज्य च नागपुष्पैरजाजिकृष्णामरिचैश्च तुल्यैः॥
वर्षाभुयष्ट्याह्वमधूकलाचालकर्बुदाराङ्कुरजीरकाणि।
द्राक्षाञ्च कृष्णामथ केशरञ्च चीरे समालोड्य पिबेत्सुखोष्णं॥
भवेच्च मद्येन तु येन पातितः प्रकामपीतेन सुरासवादिना।
तदेव तस्मै विधिवत्प्रदापयेद्विपर्य्यये भ्रंशमसौ च गच्छति॥
यथानरेन्द्रोपहतस्य कस्यचिद्भवेत्प्रसादस्तत एव नान्यतः।

विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते।
तस्य पानात्ययोद्दिष्टा विकाराः सम्भवन्ति हि॥
मद्यस्याग्नेयवायव्यौ गुणावम्बुवहानि च।
स्रोतांसि शोषयेयातां तेन तृष्णा प्रजायते॥
पाटलोत्पलकन्देषु मुद्गपर्ण्या च साधितं॥
पिबेन्मागधिकामिश्रं तत्राम्भोहिमशीतलं।

सर्पिस्तैलवसामज्जदधिभृङ्गरसैर्युतं ॥
क्वाथेन विल्वयवयोः सर्व्वगन्धैश्च पेषितैः ।
पक्वमभ्यञ्जने श्रेष्ठं सेके क्वाथः सुशीतलः ॥
रसवन्ति च भोज्यानि यथास्वमवचारयेत् ।
पानकानि सुशीतानि हृद्यानि सुरभीनि च ॥
त्वचं प्राप्तस्तु पानोष्मा पित्तरक्ताभिमूर्च्छितः ।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजं ॥
शीतं विधानमत ऊर्द्धमहं प्रवक्ष्ये
दाहप्रशान्तिकरमृद्धिमतां नराणां ।
तत्रादितो मलयजेन हितः प्रदेह
श्चन्द्रांशुहारतुहिनोदकशीतलेन ।
शीताम्बुशीतलतरैश्च शयानमेवं
हारैर्म्मृणालवलयैरबला स्पृशेयुः ॥
भिन्नोत्पलोज्ज्वलहिमे शयने शयीत
पत्रेषु वा सजलविन्दुषु पद्मिनीनां ।
आसादयन्पवनमाहृतमिष्टगन्ध
कह्लारपद्मदलशैवलसञ्चयेभ्यः ॥
शीतैर्व्वनान्तपवनैः परिमृश्यमानः
शीतश्चरेद्वनकाननदीर्घिकासु ।
दाहाभिभूतमथ वा परिषेचयेत्तु
शीतैरुशीरजलचन्दनवारिभिस्तं ॥

विश्राविता हृतमलां नववारिपूर्णां
पद्मोत्पलोज्ज्वलजलामधिवासिताञ्च ।
वापीम्भजेत हरिचन्दनभूषिताङ्गः
कान्ताकरस्पर्शकर्कशरोमकूपः ॥
तत्रैनमम्बुरुहपत्रसमैः स्पृशन्त्यः
शीतैःकरोरुवदनैः कठिनैःस्तनैश्च ।
तोयावगाहकुशला मधुरस्वभावाः
संहर्षयेयुरबला मधुरैः प्रलापैः ॥
धारागृहे प्रगलितोदकदुर्दिनाभे
क्लान्तः शयीत सलिलानिलशीतकुक्षौ ।
गन्धोदकैः सकुसुमैरुपसिक्तभूमौ
पत्राम्बुचन्दनरसैरुपलिप्तकुड्ये ॥
मांसीतमालघनकुङ्कुमपद्मपत्र
जात्युत्पलप्रियककेशरपुण्डरीके ।
पुन्नागनागकरवीरलतापकारे
तस्मिन्गृहे कमलरेणुवृते शयीत ॥
यत्राहतानिलविकम्पितपुष्पदाम्नि
हेमन्तविन्ध्यहिमवन्मलयाचलानां ।
शीताम्भसां सकदलीहरितद्रुमाणां
उद्भिन्ननीलनलिनाम्बुरुहाकराणां ॥
चन्द्रोदयस्य च कथाः शृणुयान्मनोज्ञा

ग्लानं सुदीनमनसं मनसोऽनुकूलाः ।
पीनस्तनोरुजघना घनसारदिग्धाः
ता एवमार्द्रवसनाः सह संविशेयुः ॥
स्निष्टाबलाः शिथिलमेखलहारयष्ट्यः ॥
हर्षयेयुःपुनर्नार्य्यः स्वगुणैरहसि स्थिताः ।
ताः शैत्याच्छमयेयुश्च पित्तपानात्ययं स्त्रियः ।
रक्तपित्ततृषादाहेष्वयमेव विधिः स्मृतः ॥
सामान्यतो विशेषन्तु शृणुदाहेष्वशेषतः ।
कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ह्यति ॥
संचूष्यते दह्यते च ताम्राभस्ताम्रलोचनः ।
लोहगन्धाङ्गवदनो वह्निनेवावकीर्य्यते ॥
तं विलङ्घ्य विधानेन संसृष्टाहारमाचरेत् ।
अप्रशाम्यति दाहे च रसैस्तृप्तस्य जाङ्गलैः ॥
शाखाश्रया यथान्यायं रोहिणीर्व्यधयेत्सिराः ।
पित्तज्वरसमः पित्तात्स चाप्यस्य विधिर्हितः ॥
तृष्णानिरोधादब्धातौ क्षीणे तेजः समुत्थितं ।
स वाह्याभ्यन्तरं देहं देहदे मन्दचेतसः ॥
संशुष्कगलताल्वोष्ठोजिह्वां निःकृष्य वेपते ।
तत्रोपशमयेत्तेजस्त्वब्धातुश्च विवर्द्धयेत् ॥
पाययेत्काममम्भश्च शर्कराढ्यं पयोऽपिवा ।
शीतमिक्षुरसं मन्थं वितरेच्चेरितं विधिं ॥

अस्त्रजा पूर्व्वोक्तोऽस्य दाहोऽन्यः स्यात्सुदुस्तरः।
विधिः सद्योव्रणीयोक्तस्तस्य लक्षणमेव च॥
धातुक्षयोक्तो यो दाहस्तेन मूर्च्छा तृषान्वितः।
क्षामस्वरः क्रियाहीनः स सीदेद्भृशपीडितः॥
रक्तपित्तविधिस्तस्य हितः स्निग्धोऽनिलापहः।
क्षतजेनाश्नतश्चान्यः शोचतोवाप्यनेकधा॥
तेनान्तर्दह्यतेऽत्यर्थं तृष्णामूर्च्छाप्रलापवान्।
तमिष्टविषयोपेतं सुहृद्भिरपि संवृतं॥
क्षीरमांसरसाहारं विधिनोक्तेन साधयेत्।
मर्म्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमो मतः॥
सर्व्वएव च वर्ज्याःस्युः शीतगात्रेषु देहिषु।
एवं विधो भवेद्यस्तु मदिरामयपीडितः॥
प्रशान्तोपद्रवस्यापि शोधनं प्राप्तमाचरेत्।
सजीरकाण्यार्द्रकशृङ्गवेरसौवर्चलान्यर्द्धजलप्लुतानि।
मद्यानि हृद्यान्यथ गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णां॥
जलप्लुतश्चन्दनभूषिताङ्गः स्रग्वी सभक्तां पिशितोपदंशां।
पिबेत्सुरां नैव लभेत रोगान्मनोमतिघ्नश्च मदं न याति॥

---

॥ अष्टचत्वारिंशत्तमोऽध्यायः॥

अथातस्तृष्णाप्रतिषेधमध्यायं व्याख्यास्यामः॥
सततं यःपिबेद्वारि न तृप्तिमधिगच्छति।

पुनःकाङ्क्षति तोयञ्च तं तृष्णार्दितमादिशेत् ॥
भयश्रमाभ्यां बलसंक्षयाद्वा
धंर्षाभशोकश्रममद्यपानाद्रुचाम्लशुष्कोष्णकटूपयोगात्।
धातुक्षयाल्लङ्घनसूर्य्यतापात् पित्तञ्च वातश्च भृशं प्रवृद्धौ।
स्रोतांसि संदूषयतः समेतौ यान्यम्बुवाहीनि शरीरिणां हि।
स्रोतःस्वपांवाहिषु दूषितेषु जायेत तृष्णा प्रबला ततस्तु।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा च।
स्यात्सप्तमी भक्तनिमित्तजा तु लिङ्गानि तासां शृणु चौषधानि॥
ताल्वोष्ठकण्ठास्यविशोषदाहाः सन्तापमोहभ्रमविप्रलापाः।
पूर्व्वाणि रूपाणि भवन्ति तासामुत्पत्तिकालेषु विशेषतोहि।
शुष्कास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरोगलेषु।
स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति।
मूर्च्छाप्रलापारुचिवक्त्रशोषाः पीतेक्षणत्वं प्रततश्च दाहः॥
शीताभिकाङ्क्षा मुखतिक्तताच पित्तात्मिकायां परिधूमनञ्च।
वास्पावरोधात्कफसंवृतेऽग्नौ तृष्णाबलासेन भवेत्तु तत्र॥
निद्रागुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रं।
शीतज्वरच्छर्दिररोचकश्च कफात्मिकायां त्वचि पाकएव॥
एतानि रूपाणि भवन्ति यस्यान्तयार्दितः काङ्क्षति नाति चाम्भः।
क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु॥
तयाभिभूतस्य निशादिनानि गच्छन्ति दुःखं पिवतोऽपितोयं।
रसक्षयाद्या क्षयसम्भवा सा तयाभिभूतस्तु निशादिनेषु॥
पेपीयतेऽम्भः स सुखन्न याति तां सन्निपातादिति केचिदाहुः।

रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत् ॥
त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादयुक्ता ।
स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्व्वन्नमेवाशु तृषां करोति ॥
क्षीणं विचित्तं वधिरं तृषार्त्तं विवर्ज्जयेन्निर्गतजिह्वमाशु ।
तृष्णाभिवृद्धावुदरे च पूर्णे तं वामयेन्मागधिकोदकेन ॥
विलेपनं चात्र हितं वदन्ति स्याद्दाडिमाम्रातकमातुलुङ्गैः ।
तृष्णा प्रयोगैरिह सा निवार्य्या शीतैश्च सम्यग्रसवीर्य्यजातैः ॥
गण्डूषमम्लैर्व्विरसे च वक्त्रे कुर्य्यात्क्षुभैरामलकस्य चूर्णैः ।
सुवर्णरूप्यादिभिरग्नितप्तैर्लोष्टैः कृतं वा सिकतोपलैर्व्वा ॥
जलं सुखोष्णं शमयेत्तु तृष्णां सशर्करं क्षौद्रयुतं हिमं वा ।
पञ्चाङ्गिकाः पञ्चगणा य उक्तास्तेष्वम्बु सिद्धं प्रथमे गणे वा ॥
पिबेत्सुखोष्णं मनुजोऽल्पशस्तु तृषो विमुच्येत हि वातजायाः ।
पित्तघ्नवर्गेण कृतः कषायः सशर्करः क्षौद्रयुतः सुशीतः ॥
पीतस्तृषां पित्तकृतान्निहन्ति क्षीरं शृतं वाप्यथ जीवनीयैः ।
बिल्वाढकीकण्टकपञ्चमूलीदर्भेषु सिद्धं कफजान्निहन्ति ॥
हितं भवेच्छर्दनमेव चात्र तप्तेन निम्बप्रसवोदकेन ।
सर्व्वासु तृष्णास्वथवापि पैत्तं कुर्य्याद्विधिस्तेन विना न शान्तिः ॥
पर्य्यागतोडुम्बरजो रसस्तु सशर्करस्तत्क्वथितोदकं वा ।
वंशस्य सिद्धस्य च सारिवादेः पातव्यमम्भः शिशिरं तृषार्त्तैः ।
कशेरुशृङ्गाटकपद्ममोचविशेषु सिद्धं क्षतजान्निहन्ति ॥
नीलोत्पलोशीरकुचन्दनानि दत्वा प्रवाते निशि वासयेत्तु ।

तदुत्तमं तोयमुदारगन्धि सितायुतं क्षौद्रयुतन्तथैव ।
द्राक्षाप्रगाढञ्च हिताय वैद्यः तृष्णार्दितेभ्यो वितरेन्नरेभ्यः ॥
सारिवादौ तृणपञ्चमूले तथोत्पलादौ मधुरे गणे च ।
कुर्य्यात्कषायञ्च यथैव युक्तं मधूकपुष्पादिषु वापरेषु ॥
राजादनक्षीरिकपीतनेषु षट्पानकान्यत्र हितानि च स्युः ।
सतुण्डिकेरीण्यथवा पिबेत्तु पिष्टानि कार्पाससमुद्भवानि ॥
क्षतोद्भवां रुग्विनिवारणेन जयेद्रसानामसृजश्च पानैः ।
क्षयोत्थितां क्षीरघृतं निहन्यान्मांसोदकं वा मधुकोदकं वा ॥
आमोद्भवां बिल्ववचायुतानां जयेत्कषायैरथ दीपनानां ।
आम्रातभल्लातबलायुतानि पिबेत्कषायाण्यथ दीपनानि ॥
गुर्व्वन्नजातां वमनैर्जयेच्च क्षयादृते सर्व्वकृताश्च तृष्णाः ।
अन्नोद्भवां मांसरसो निहन्ति गुडोदकं वाप्यथवापि मन्थः ॥
भक्तोपरोधात्तृषितो यवागूमुष्णां पिबेन्मन्थमथो हिमं च ।
या स्नेहपीतस्य भवेच्च तृष्णा तत्रोष्णमम्भः प्रपिबेन्मनुष्यः ॥
मद्योद्भवामर्द्धजलं निहन्ति मद्यं तृषां चापि हि मद्यपस्य ।
उष्णोद्भवां हन्ति जलं सुशीतं सशर्करञ्चेक्षुरसं तथाम्भः ।
स्वैः स्वैः कषायैर्व्वमनानि तासां तथा ज्वरोक्तानि च पाचनानि ।
लेपावगाहौ परिषेचनानि कुर्य्यात्तथा शीतगृहाणि चापि ॥
संशोधनं क्षीररसौ घृतानि सर्व्वासु लेहान्मधुरान् हिमांश्च ॥

॥ एकोनपञ्चाशत्तमोऽध्यायः ॥

अथातश्छर्द्दिप्रतिषेधमध्यायं व्याख्यास्यामः ॥

अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि।
अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः॥
श्रमात् भयात्तथोद्वेगादजीर्णात्कृमिदोषतः।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः॥
बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात्।
छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः॥
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः।
दोषानुदीरयन् वृद्धानुदानो व्यानसङ्गतः॥
ऊर्द्ध्वमागच्छति भृशं विरुद्धाहारसेविनां।
हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः॥
द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणं।

प्रच्छर्द्दयेत्फेनिलमल्पमल्पं शूलार्द्दितोऽभ्यर्द्दितपार्श्वपृष्ठः॥
श्रान्तः सघोषं बहुशः कषायं जीर्णेऽधिकं सानिलजा वमिस्तु।
योऽम्लं भृशं वा कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा॥
सदाहचोषज्वरवक्त्रशोषमूर्च्छान्विता पित्तनिमित्तजा सा।
यो हृष्टरोमा मधुरं प्रभूतं शुक्लं हिमं सान्द्रकफानुविद्धं॥
अभक्तरुग्गौरवसादयुक्तोवमेदमी सा कफकोपजा स्यात्।
सर्व्वाणि रूपाणि भवन्ति यस्यां सा सर्व्वदोषप्रभवा मता तु॥
बीभत्सजा दौहृदजामजा च या सात्म्यतोवा कृमिजा च या हि।

सा पञ्चमी तास्तु विभावयेत्तु दोषोच्छ्रयेणैव यथाक्रमादौ ॥
आमाशयोत्क्लेशभवास्तु सर्व्वास्तस्माद्धितं लङ्घनमेव तासु ।
शूलहृल्लासबहुला क्रिमिजा च विशेषतः ॥
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ।
क्षीणस्योपद्रवैर्युक्तां सासृक्पूयां सचन्द्रिकां ॥
छर्दिं प्रसक्तां कुशलो नारभेत चिकित्सितुं ।
वमीषु बहुदोषासु च्छर्दनं हितमुच्यते ॥
विरेचनं वा कुर्वीत यथादोषोच्छ्रयं भिषक् ।
संसर्गांश्चानुपूर्व्वेण यथास्वभेषजाय तान् ॥
लघूनि परिशुष्काणि सात्म्यान्यन्नानि वाचरेत् ।
यथास्वञ्च कषायाणि ज्वरघ्नानि प्रयोजयेत् ॥
हन्यात्क्षीरघृतं पीतं छर्दिं पवनसम्भवां ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥
यवागूं मधुमिश्रां वा पञ्चमूलीकृतां पिबेत् ।
पिबेद्वाव्यक्तसिद्धूत्यफलाम्लं वैष्किरं रसं ॥
सुखोष्णलवणं वात्र हितं स्नेहविरेचनं ।
पित्तोपशमनीयानि पानानि शिशिराणि च ॥
कषायाण्युपयुक्तानि घ्नन्ति पित्तकृतां वमीं ।
शोधनं मधुरैश्चात्र द्राक्षारससमायुतैः ॥
बलवत्यां प्रशंसन्ति सर्पिस्तैल्वकमेव च ।
आरग्वधादिभिर्यूषं दशाङ्गयोगमेव च ॥

पाययेताथ सक्षौद्रं कफजायां चिकित्सकः ।
कृतङ्गुडूच्या विधिवत्कषायं हिमसंज्ञितं ॥
तिसृष्वपि भवेत्पथ्यं माक्षिकेण समन्वितं ।
बीभत्सजां हृद्यतमैर्हृद्यार्हृद्यां काङ्क्षितैः फलैः ॥
लङ्घनैर्वमनैस्त्वामां सात्म्यैश्चासात्म्यकोपजां ।
कृमिहृद्रोगवच्चापि कृमिजां साधयेदमीं ॥
वितरेच्च यथादोषं प्रसृतं विधिमनन्तरं ।
दधित्थरससंयुक्ता पिप्पलीमाक्षिकान्विता ॥
मुहुर्मुहुर्नरो लीढ्वा छर्दिभ्यः प्रतिमुच्यते ।
समाक्षिका मधुरसा पीता वा तण्डुलाम्बुना ॥
तर्प्पणं वा मधुयुतं तिसृणामपि भेषजं ।
क्षयङ्गुप्तां सयष्ट्याह्वां तण्डुलाम्बुमधुद्रवां ॥
पिबेद्यवागूमथवा सिद्धां पत्रैः करञ्जजैः ।
युक्ताम्ललवणाः पिष्टाः कुस्तुवर्य्योऽथवा हिताः ॥
तण्डुलाम्बुयुतं खादेत्कपित्थं त्र्यूषणेन वा ।
सिताचन्दनमध्वाक्तं लिह्याद्वा मक्षिकाशकृत् ॥
पिबेत्पयोऽग्नितप्तञ्च निर्व्वाप्य गृहगोपिकां ।
सर्प्पिःक्षौद्रयुतान् वापि लाजशक्तून्पिबेत्तथा ॥
सर्प्पिःक्षौद्रसितोपेतां मागधीं वा लिहेत्तथा ।
धात्रीरसे चन्दनं वा घृतं मुद्गदलाम्बु वा ॥
कोलामलकमज्जानं लिह्याद्वा त्रिसुगन्धिकं ।

रूचोद्रं शालिलाजानां यवागूं वा पिवेन्नरः ॥
प्रेयाण्युपहरेच्चापि मनोघ्राणसुखानिच ॥
जाङ्गलानिच मांसानि स्वादुवत्पानकानिच।
भोजनानि विचित्राणि कुर्य्यात्सर्व्वास्वतन्द्रितः ॥

---

॥ पञ्चाशत्तमोऽध्यायः ॥

अथातो हिक्काप्रतिषेधं व्याख्यास्यामः।
विदाहिगुरुविष्टम्भिरूचाभिष्यन्दिभोजनैः ॥
शीतपानासनस्थानरजोधूमानिलानलैः।
व्यायामकर्म्मभाराध्ववेगाघातापतर्पणैः ॥
आमदोषाभिघातस्त्रीचयरोगप्रपीडनैः।
विषमाशनाध्यशनैस्तथा संशमनैरपि ॥
हिक्का श्वासश्च कासश्च नृणां समुपजायते।
मुहुर्मुहुर्व्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्।
सघोषवानाशु हिनस्त्यसून् यतस्ततस्तु हिक्केति भिषग्भिरुच्यते ॥
अन्नजां यमलां चुद्रां गम्भीरां महतीं तथा।
कफेनानुगतो वायुः पञ्च हिक्काः करोति हि ॥
मुखं कषायमरतिर्गौरवं कण्ठवक्षसोः।
पूर्व्वरूपाणि हिक्कानामाटोपो जठरस्य च ॥
पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः।
हिक्कयत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक् ॥

चिरेण यमलैर्व्वेगैर्या हिक्का संप्रवर्त्तते ।
कम्पयन्ती शिरोग्रीवं यमलान्तां विनिर्दिशेत् ॥
विकृष्टकालैर्या वेगैर्म्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधाविता ॥
नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
शुष्कौष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी ॥
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता ।
मर्म्माण्यापीडयन्तीव सततं या प्रवर्त्तते ॥
देहमायाम्य वेगेन घोषयत्यतिक्षयतः ।
महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी ॥

आयम्यते हिक्कतोऽङ्गानि यस्य दृष्टिश्चोर्द्धं ताम्यते यस्य गाढं ।
क्षीणोऽन्नद्विट्क्षौति यस्य हिक्की तौ द्वावन्त्यौ वर्ज्जयेद्धिक्कमानौ ॥
प्राणायामोद्वेजनत्रासनानि सूचीतोदैः संभ्रमश्चात्र शस्तः ।
यष्ट्याह्वं वा माक्षिकेणावपीडः पिप्पल्यो वा शर्कराचूर्णयुक्ताः ॥
सर्पिः कोष्णं क्षीरमिक्षोरसो वा नातिक्षीणे स्रंसनं छर्दनञ्च ।
नारीपयःपिष्टमशुक्लचन्दनं घृतं सुखोष्णं च ससैन्धवं तथा ॥
चूर्णीकृतं सैन्धवमम्भसा तथा निहन्ति हिक्काञ्च हितञ्च नस्यतः ।
युञ्ज्याद्धूपं शालनिर्य्यासजातं नैपालं वा गोविषाणोद्भवंवा ॥
सर्पिःस्निग्धैः चर्म्मबालैः कृतंवा हिक्कास्थाने स्वेदनं वापि कार्य्यं ।
क्षौद्रोपेतं गैरिकं काञ्चनाह्वं लिह्याद्भस्म ग्राम्यसत्वास्थिजंवा ॥
तद्वच्छ्वाविन्मेषगोशल्यकानां रोमाण्यन्तर्धूमदग्धानि चात्र ।

मध्वाज्याक्तं वर्हिपत्रप्रसूतमेवं भस्मौडुम्बरं तैल्वकं वा ॥
खर्जिचारं वीजपुराद्ररसेन चौद्रोपेतं हन्ति लीढ़ाशु हिक्कां ।
सर्प्पिःस्निग्धाघ्नन्तिहिक्कां यवाग्वः कोष्णग्रासाःपायसो वा सुखोष्णः॥
शुण्ठीतोये साधितक्षीरमाजन्तद्वत्पीतं शर्करासंयुतं वा ।
स्रोतोभिर्वा सेव्यमानं निहन्याद्धात्वा हिक्कामाशु मूत्रं त्वजाव्योः ॥
सपूतिकीटं लशुनोग्रगन्धाहिंस्रजमाचूर्ण्यसुभावितन्तत् ॥
चौद्रं सितां वारणकेशरञ्च पिवेद्रसेनेक्षुमधूकजेन ।
पिवेत्पलं वा लवणोत्तमस्य द्वाभ्यां पलाभ्यां हविषः समग्रं ॥
हरीतकीं कोष्णजलानुपानां पिवेद्धृतं चारमधुप्रपन्नं ।
रसङ्कपित्थान्मधुपिप्पलीभ्यां पिचुप्रमाणं प्रपिवेत्सुखाय ॥
कृष्णां सितां चामलकञ्च लीढं सशृङ्गवेरं मधुनाथवापि ।
कोलास्थिमज्जाञ्जनलाजचूर्णं हिक्कां निहन्यान्मधुनाच लीढं ॥

पाटलायाः फलं पुष्पं गैरिकं कटुरोहिणी ।
खर्जूरमध्यं मागध्यः काशीशं मधुनामच ॥
चत्वारोयूषयोगाः स्युः प्रतिपादप्रदर्शिताः ।
मधुद्वितीयाः कर्त्तव्यास्ते हिक्कासु विजानता ॥

कपोतपारावतलावशल्यकश्वदंष्ट्रगोधाहृषदंशजान् रसान् ।

पिवेत् फलाम्लानहिमान् ससैन्धवान्
स्निग्धांस्तथैवर्श्यमृगद्विजोद्भवान् ॥

विरेचनं पथ्यतमं ससैन्धवं घृतं सुखोष्णञ्च शितोपलायुतं ।
सदागतावूर्द्ध्वगतेऽनुवासनं वदन्ति केचिच्च हिताय हिक्किनां ॥

॥ एकपञ्चाशत्तमोऽध्यायः ॥

अथातः श्वासप्रतिषेधं व्याख्यास्यामः ॥

यैरेव कारणैर्हिक्का बहुभिः सम्प्रवर्त्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनां ॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्धगो भूत्वा तं श्वासं परिचक्षते ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥
प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते ।
निषण्णस्यैति शान्तिञ्च स क्षुद्र इतिसंज्ञितः ॥
हृट्खेदवमथुप्रायः कण्ठघुर्घुरिकान्वितः ।
विशेषाद्दुर्द्दिने तास्यच्छ्वासः स्यात्तमको मतः ॥
घोषेण महताविष्टः सकासः सकफो नरः ।
यः श्वसित्यबलोऽन्नद्विट् सुप्तस्तमकपीडितः ॥
स शाम्यति कफे हीने स्वपतश्च विवर्द्धते ।
मूर्च्छाज्वराभिभूतस्य ज्ञेयः प्रतमकस्तु सः ॥
आध्मातो दह्यमानेन वस्तिना सरुजं नरः ।
सर्व्वप्राणेन विच्छिन्नं श्वस्याच्छिन्नन्तमादिशेत् ॥
निःसंज्ञः पार्श्वशूलार्त्तः शुष्ककण्ठोऽतिघोषवान् ।

संरब्धनेत्रस्त्वायम्य यः श्वस्यात्स महान्स्मृतः ॥
मर्म्मस्वायम्यमानेषु श्वसन्मूढो मुहुश्च यः ।
ऊर्द्धप्रेची हतरवस्तमूर्द्धश्वासमादिशेत् ॥
क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥
स्नेहवस्तिं विना केचिदूर्द्धञ्चाधश्च शोधनं ।
मृदुप्राणवतां श्रेष्ठं श्वासिनामादिशन्ति हि ॥
कासे श्वासे च हिक्कायां हृद्रोगे चापि पूजितं ।
घृतं पुराणं संसिद्धमभयाविडरामठैः ॥
सौवर्च्चलाभयाविल्वैः संस्कृतं वा नवं घृतं ।
पिप्पल्यादिप्रतीवापं सिद्धं वा प्रथमे गणे ॥
सपञ्चलवणं सर्प्पिः श्वासकासौ व्यपोहति ।
हिंस्राविडङ्गपूतीकत्रिफलाव्योषचित्रकैः ॥
द्विचीरं साधितं सर्पिश्चतुर्गुणजलान्वितं ।
कोलमात्रैः पिबेत्तद्धि श्वासकासौ व्यपोहति ॥
अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा ।
क्वाथे वृषकषाये वा पचेत्सर्प्पिश्चतुर्गुणे ॥
तन्मूलं कुसुमावापशीतं चौद्रेण योजयेत् ।
शृङ्गीमधुरिकाभार्गीशुण्ठीतार्चसिताम्बुदैः ॥
सहरिद्रैः सयष्ट्याकैः समैरावाप्य योगतः ।
घृतप्रस्थं पचेद्धीमान् शीततोये चतुर्गुणे ॥

श्वासह्रासस्तथा हिक्का सर्पिरेतन्नियच्छति।
सुवहाकालिकाभार्गीशुकाख्यानैचुलम्फलं ॥
काकादनीं शृङ्गवेरं वर्षाभू बृहतीद्वयं।
कोलमात्रैर्घृतप्रस्थं पचेदेभिर्जलाढकं ॥
कटूष्णं पीतमेतद्धि श्वासामयविनाशनं।
सौवर्चलयवक्षारकटुकाव्योषचित्रकैः॥
वचाभयाविडङ्गैश्च साधितं श्वासशान्तये।
गोपवल्ल्युदके सिद्धं स्यादन्यद्द्विगुणे घृतं॥
तालीशतामलक्युग्राजीवन्तीकुष्ठसैन्धवैः।
विल्वपुष्करपूतीकसौवर्चलकणाग्निभिः॥
पथ्यातेजोवतीयुक्तैः सर्पिर्जलचतुर्गुणं।
हिङ्गुपादयुतं सिद्धं सर्व्वश्वासहरम्परं॥
पञ्चैतानि हवींष्याहुर्भिषजः श्वासकासयोः।
वासाघृतं षट्फलञ्च घृतं चात्र हितं भवेत्॥
तैलं दशगुणे सिद्धं भृङ्गराजरसे शुभे।
सेव्यमानं यथान्यायं श्वासकासौ व्यपोहति॥
फलाम्ला विष्किररसाः स्निग्धाः प्रव्यक्तसैन्धवाः।
एणादीनां शिरोभिर्व्वा कौलत्था वा सुसंस्कृताः॥
हन्युः श्वासञ्च कासञ्च संस्कृतानि पयांसि च।
तिनिशस्य च वीजानि कर्कटाख्या सुवर्चिका॥
दुरालभाथ पिप्पल्यः कटुकाख्या हरीतकी।

श्वाविन्मयूररोमाणि कोला मागधिका कणाः ॥
भार्गीलकुचशृङ्गवेरञ्च शर्कराशल्लकाञ्जनं ।
त्रिकण्टकस्य बीजानि चूर्णितानि तु केवलं॥
पञ्चश्लोकार्द्धिकास्त्वेते लेहा ये सम्यगीरिताः ।
सर्प्पिर्मधुभ्यां ते लेह्याः कासश्वासार्दितैर्नरैः ॥
सप्तच्छदस्य पुष्पाणि पिप्पलीश्चापि मस्तुना ।
पिवेत्सच्चूर्णं मधुना धानाश्चाप्यथ भक्षयेत् ॥
अर्काङ्कुरैर्भावितानां यवानां साध्वनेकशः ।
तर्पणं वा पिवेदेषां सक्षौद्रं श्वासपीडितः ॥
शिरीषकदलीकुन्दपुष्पमागधिकायुतं ।
तण्डुलाम्बुयुतं पीत्वा जयेच्छ्वासानशेषतः ॥
कोलमज्जस्तालमूलव्याघ्रचर्ममसीमपि ।
लिह्यात्क्षौद्रेण भार्गीं वा सर्पिर्मधुसमायुतां ॥
निम्बैः कदम्बबीजं वा सक्षौद्रं तण्डुलाम्बुना ।
द्राक्षां हरीतकीं कृष्णां कर्कटाख्यां दुरालभां ॥
सर्प्पिर्मधुभ्यां विलिहन्हन्ति श्वासान् सुदारुणान्।
हरिद्रां मरिचं द्राक्षां गुडं रास्नां कणां शटीं ॥
लिह्यात्तैलेन तुल्यानि श्वासार्त्तो हितभोजनः ।
गवां पुरीषस्वरसं मधुमागधिकायुतं ॥
लेहः श्वासेषु कासेषु वाजिनां वा शकृद्रसः ।
पाण्डुरोगेषु शोथेषु ये योगाः सम्प्रकीर्त्तिताः ॥

श्वासकासापहास्तेऽपि कासघ्ना येच कीर्त्तिताः ।
भार्गीलकूच्यूषणं तैलं हरिद्रा कटुरोहिणीं ॥
पिप्पलीं मरिचं चण्डाङ्गीशक्रद्रुममेव च ।
तलकोटस्य वीजेषु पचेदुत्कारिकां शुभां ॥
सेव्यमाना निहन्त्येवा श्वासानाशु सुदुस्तरान् ।
पुराणसर्प्पिः पिप्पल्यः कौलत्था जाङ्गला रसाः ॥
सुरासौवीरकं हिङ्गु मातुलुङ्गरसो मधु ।
द्राक्षामलकविल्वानि शस्तानि श्वासहिक्किनां ॥
श्वासहिक्कापरिगतं स्निग्धैः स्वेदैरुपाचरेत् ।
युक्तैर्लवणतैलाभ्यां तैरस्य ग्रथितःकफः ॥
खस्थो विलयं याति मारुतश्चास्य शाम्यति ।
स्निग्धं ज्ञात्वा ततश्चैव भोजयित्वा रसौदनं ॥
वातश्लेष्मविबन्धो वा भिषग्धूमं प्रयोजयेत् ।
मनःशिलादेवदारुहरिद्राच्छदनामिषैः ॥
लाचोरुवूकमूलैश्च कृत्वा वर्त्तीर्व्विधानतः ।
सर्पिर्नवमधूच्छिष्टशालनिर्य्यासजं तथा ॥
शृङ्गवालखुरस्नायुवल्कसमस्तं गवामपि ।
तुरुष्कशल्लकीनाञ्च गुग्गुलोः पद्मकस्य च ॥
एते सर्व्वे ससर्पिष्का धूमाः कार्य्या विजानता ।
बलीयसि कफग्रस्ते वमनं सविरेचनं ॥
दुर्व्वले चैव रुत्ते च तर्प्पणं हितमुच्यते ।

जाङ्गलैरभ्रजैर्म्मांसैरानूपैर्व्वा सुसंस्कृतैः ॥
निदिग्धिकाश्चामलकप्रमाणां हिंग्वर्द्धयुक्तां मधुना सुयुक्तां ।
लिहन्नरः श्वासनिपीडितो हि श्वासं जयत्येव बलात्त्र्यहेण ॥
यथाग्निरिद्धः खलु काष्ठसङ्घैर्व्वज्रं यथा वा सुरराजमुक्तं ।
रोगास्तथैते खलु दुर्न्निवाराः श्वासश्च कासश्च विलम्बिका च ॥

---

## ॥ द्विपञ्चाशत्तमोऽध्यायः ॥

अथातः कासप्रतिषेधमध्यायं व्याख्यास्यामः ॥
उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च ते ज्ञेयास्त एवोत्पत्तिहेतवः ॥
धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव ॥
प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात्सहसा सदोषः कासः स विद्वद्भिरुदाहृतस्तु ॥
स वातपित्तप्रभवः कफाच्च क्षतात्तथान्यः क्षयजोऽपरश्च ॥
पञ्चप्रकारः कथितो भिषग्भिर्व्विवर्द्धितो यक्ष्मविकारकृत्स्यात् ॥
भविष्यतस्तस्य तु कण्ठकण्डूर्भोज्योपरोधो गलतालुलेपः ।
स्वशब्दवैषम्यमरोचकोऽग्निसादश्च लिङ्गानि भवन्त्यमूनि ॥
हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः ॥
प्रसक्तवेगश्च समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः ।
उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषार्त्तः ॥

पित्तेन पीतानि वमेत्कटूनि कासेत्स पाण्डुः परिदह्यमानः ॥
विलिप्यमानेन मुखेन सीदन्शिरोरुगार्त्तः कफपूर्णदेहः।
अभक्तरुग्गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥
वक्षोऽतिमात्रं विहतञ्च यस्य व्यायामभाराध्ययनाभिघातैः।
विश्लिष्टवक्षाः स नरःसरक्तं ष्ठीवत्यभीक्ष्णं क्षतजःस उक्तः॥

अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः।
रुक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ॥
सपूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितं।
कण्ठेन रुजतात्यर्थं विभिन्नेनेववोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः ।
पारावतइवाकूजन् कासवेगात् क्षतोद्भवात्॥
विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः॥
कुपिताःक्षयजं कासं कुर्य्युर्देहक्षयप्रदं ॥

स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चापलभेत कासी।
शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु प्रक्षीणमांसो रुधिरं सपूयं॥
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति।
वृद्धत्वमासाद्य भवत्यथोवै याप्यन्तमाहुर्भिषजस्तु कासं॥
शृङ्गीवचाकट्फलकत्तृणाब्दधान्याभयाभार्ग्यमराह्वविश्वं।

उष्णाम्बुना हिङ्गुयुतं तु पीत्वा बद्धास्रमप्याशु जहाति कासं ॥
फलत्रिकव्योषविडङ्गशृङ्गीरास्नावचापद्मकदेवकाष्ठैः ।
लेहः समैः चौद्रसिताघृताक्तः कासं निहन्यादचिरादुदीर्णं ॥
पथ्यां सितामामलकानि लाजां समागधीं चापि विचूर्ण्य शुण्ठीं ।
सर्पिर्मधुभ्यां विलिहीत कासी ससैन्धवां वोष्णजलेन कृष्णां ॥
खादेद्गुडं नागरपिप्पलीभ्यां द्राचाञ्च सर्पिर्मधुनावलिह्यात्।
द्राचां सितां मागधिकाञ्च तुल्यां सशृङ्गवेरं मधुकन्तुगाञ्च ॥
लिह्याद्घृतचौद्रयुतां समांशां शितोपलां वा मरिचांशयुक्तां ।
धात्रीकणाविश्वसितोपलाञ्च संचूर्ण्य मण्डेन पिबेच्च दध्नः ।
हरेणुकां मागधिकाञ्च तुल्यां दध्ना पिबेत् कासगदाभिभूतः ॥
उभे हरिद्रे सुरदारुशुण्ठीं गायत्रिसारञ्च पिबेत्समांशं ।
वस्तस्य मूत्रेण सुखाम्बुना वा दन्तीं द्रवन्तीञ्च सतिल्वकांशां ॥
भृष्टानि सर्प्पिष्यथ वादराणि खादेत्पलांशानि ससैन्धवानि ।
कोलप्रमाणं प्रपिबेद्धि हिङ्गु सौवीरकेणाम्लरसेन वापि ॥
चौद्रेण लिह्यान्मरिचाणि वापि भार्गीवचाहिङ्गुकृताञ्च वर्त्तिं ।
धूमे प्रशस्ता घृतसंप्रयुक्ता वेणुत्वगेलालवणैः कृता च ॥
मुस्तेङ्गुदीत्वङ्मधुकाक्षमांसीमनः शिलालैश्छगलाम्बुपिष्टैः ।
विधाय वर्त्तीः सपयोनुपानं धूमं पिबेद्वातबलासकासी ॥
पिबेच्च सीधुं मरिचान्वितं वा तेनाशु कासं शममभ्युपैति ।
द्राचाम्बुमञ्जिष्ठपराक्कथाभिः चीरं शृतं माचिकसंप्रयुक्तं ॥
निदिग्धिकानागरपिप्पलीभिः खादेच्च मुद्गान्मधुना सुसिद्धान्।

उत्कारिकां सर्प्पिषि नागराढ्यां पक्त्वा समूलैस्त्रुटिकोलपत्रैः ॥
एभिर्न्निषेवेत कृताञ्च पेयां तन्वीं सुशीतां मधुना विमिश्रां ।
यत्सौक्ति सर्पिर्व्विहितं षडङ्गं तदातकासं जयति प्रसह्य ॥
विदारिगन्धादिकृतं घृतं वा रसेन वा वासकजेन पक्वं ।
विरेचनं स्नैहिकमत्र चोक्तमास्थापनं चाप्यनुवासनञ्च ॥
धूमं पिवेत्स्नैहिकमप्रमत्तः पिवेत्सुखोष्णं घृतमेव चात्र ।
हिता यवाग्वश्च रसेषु सिद्धाः पयांसि लेहाः सघृतास्तथैव ॥
प्रच्छर्दनं कायशिरोविरेकास्तथैव धूमाः कवलग्रहाश्च ।
उष्णाश्च लेहाः कटुकानि हन्युः कफं विशेषेण विशोषणं वा ॥
कटुत्रिकञ्चापि वदन्ति पथ्यं घृतं कृमिघ्नस्वरसे विपक्वं ॥
निर्गुण्डिपत्रस्वरसे च पक्वं सर्पिः कफोत्थं विनिहन्ति कासं ।
पाठाविडव्योषविडङ्गसिन्धुत्रिकण्टरास्नाहुतभुग्बलाभिः ॥
शृङ्गीवचाम्भोधरदेवदारुदुरालभाभार्ग्यभयाशठीभिः ।
सम्यग्विपक्वं द्विगुणेन सर्प्पिर्निदिग्धिकायाः स्वरसेन चैतत् ॥
श्वासाग्निसादस्वरभेदभिन्नान्निहन्त्युदीर्णानपि पञ्च कासान् ।
विदारिगन्धोत्पलसारिवादीन्निःक्वाथ्य वर्गान् मधुकञ्च कृत्स्नं ॥
घृतस्य चेदिक्षुरसाम्बुदुग्धैः काकोलिवर्गे च सशर्करं तत् ।
प्रातः पिवेत्पित्तकृते च कासे रतिप्रसक्ते क्षयजे च कासे ॥
खर्जूरभार्गीमगधाप्रियालमधूलिकैलामलकैस्समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढन्लीन्हन्ति कासानुपयुज्यमानं ॥
रक्तां हरिद्राञ्जनवह्निपाठामूर्व्वापकुल्या विलिहेत्समांशाः ।

क्षौद्रेण कासे क्षतजे क्षयोत्थे पिबेद्घृतं चेक्षुरसे विपक्वं ॥
चूर्णं पिबेच्चामलकस्य वापि क्षीरेण पक्वं सघृतं हिताशी ।
चूर्णानि गोधूमयवोद्भवानि काकोलिवर्गस्य कृतः सुसूक्ष्मः ।
कासेषु पेयस्त्विषु कासवद्भिः क्षीरेण सक्षौद्रघृतेन वापि ॥
गुडोदकं वा क्वथितं पिबेद्धि क्षौद्रेण शीतं मरिचोपदंशं ।
प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्वार्द्धतुलां गुडस्य ॥
चूर्णीकृतैर्ग्रन्थिकचव्यजीरव्योषेभकृष्णाहपुषाजमोदैः ।
विडङ्गसिन्धुत्रिफलायमानीपाठाग्निधान्यैश्च पिचुप्रमाणैः ॥
दत्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद्यथावत् ।
तम्भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तं ॥
अनेन सर्व्वे ग्रहणीविकाराः सश्वासकासस्वरभेदशोषाः ।
शाम्यन्तिचायं चिरमन्तरग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ॥
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात्कल्याणको नाम गुडः प्रतीतः ।
द्विपञ्चमूलेभकणात्मगुप्ताभार्गीशठीपुष्करमूलविश्वान् ॥
पाठामृताग्रन्थिकशङ्खपुष्पीरास्नाग्न्यपामार्गबलायवासान् ।
द्विपालिकान्तस्य यवाढकञ्च हरीतकीनाञ्च शतं गृह्णां ॥
द्रोणे जलस्याढकसंयुते च क्वाथे कृते पूतचतुर्थभागे ।
पचेत्तुलां शुद्धगुडस्य दत्वा पृथक् च तैलात् कुडवं घृताच्च ॥
चूर्णं च तावन्मगधोद्भवाया देयञ्च तस्मिन्मधुसिद्धशीते ।
रसायनात् कल्कमतो विलिह्याद्द्वे चाभये नित्यमथाग्र्य हन्यात् ॥
तद्राजयक्ष्मग्रहणीप्रदोषशोफाग्निमान्द्यस्वरभेदकासान् ।

पाण्ड्वामयश्वासशिरोविकारान् हृद्रोगहिक्काविषमज्वरांश्च ॥
मेधाबलोत्साहमतिप्रदश्च चकार चैतद्भगवानगस्त्यः ।
कुलीरशृङ्गीचटकैणलावान्निकाथ्य वर्गैर्मधुरैस्तथान्यैः ॥
पचेद्घृतं तत्तु निषेव्यमानं हन्यात् क्षतोत्थं क्षयजञ्च कासं ।
शतावरीनागबलाबलाभिर्घृतं विधेयञ्च हिताय कासिनां ॥

---

॥ त्रिपञ्चाशत्तमो ऽध्यायः ॥

अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः ॥

अत्युच्चभाषणविषाध्ययनाभिघात
शीतादिभिः प्रकुपिताः पवनादयस्तु ।
ते शब्दवाहिधमनीषु गताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥

वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्व्वदति गर्द्दभवत्खरञ्च ।
पित्तेन पीतवदनाक्षिपुरीषमूत्रो ब्रूयाद्गलेन च विदाहसमन्वितेन ॥

कृच्छ्रात्कफेन सततं कफरुद्धकण्ठो
मन्दं शनैर्व्वदति वापि दिवाविशेषात् ।

सर्व्वात्मके भवति सर्व्वविकारसंपदव्यक्तता च वचसस्तमसाध्यमाहुः॥

धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च
वागेष वापि हतवाक् परिवर्ज्जनीयः ।

अन्तर्गतस्वरमलव्यपदं चिरेण मेदोऽन्वयाद्वदति दिग्धगलौष्ठतालुः
क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः ।

मेदस्विनः सर्व्वसमुद्भवस्य स्वरामयो यो न स सिद्धिमेति॥
स्निग्धान्स्वरातुरनरानपकृष्टदोषान्संयोजयेद्वमनरेचनवस्तिभिश्च।
नस्यावपीडमुखधावनधूमलेहैः सम्पादयेच्च विविधैः कवलग्रहैश्च॥

यः श्वासकासविधिरादित एव चोक्त
स्तञ्चाप्यशेषमवतारयितुं यतेत।
वैशेषिकञ्च विधिमूर्द्धमतो वदामि
तद्वै स्वरातुरहितं निखिलं निबोध॥
स्वरोपघातेऽनिलजे भुक्तोपरि घृतं पिवेत्।
कासमर्द्दकवार्त्ताकमार्कवस्वरसैर्युतं॥
पीतं घृतं हन्त्यनिलं सिद्धमार्त्तगले रसे।
यवक्षाराजमोदाभ्यां चित्रकामलकेषु वा॥
देवदार्व्वश्मिकाभ्यां वा सिद्धमाजं समाक्षिकं।
सुखोदकानुपानो वा ससर्प्पिस्को गुडौदनः॥
क्षीरानुपानं पित्ते तु पिवेत्सर्प्पिरतन्द्रितः।
अश्नीयाच्च ससर्प्पिष्कं यष्टीमधुकपायसं॥
लिह्यान्मधुरकाणां वा चूर्णं मधुघृताप्लुतं।
शतावरीचूर्णयोगं बलाचूर्णमथापि वा॥
पिवेत्कटूनि मूत्रेण कफजे स्वरसङ्क्षये।
लिह्याद्वा मधुतैलाभ्यां भुक्त्वा खादेत् कटूनि च॥
स्वरोपघाते मेदोजे कफवद्विधिरिष्यते।
सर्व्वजे चापि चर्य्यजे प्रत्याख्यायाचरेत् क्रियां॥

शर्करामधुमिश्राणि शृतानि मधुरैःसह ।
पिबेत्पयांसि यश्चोच्चैर्वदतोऽभिहतः स्वरः ॥

---

॥ चतुःपञ्चाशत्तमोऽध्यायः ॥

अथातः क्रिमिरोगमध्यायं व्याख्यास्यामः ।
अजीर्णाध्यशनासात्म्यैर्विरुद्धमलिनाशनैः ॥
अव्यायामदिवास्वप्नगुर्व्वतिस्निग्धशीतलैः ।
माषपिष्टान्नविदलविसशालूककसेरुकैः ॥
पर्णशाकसुराशुक्तदधिक्षीरगुडेक्षुभिः ।
पललानूपपिशितपिण्याकपृथुकादिभिः ॥
स्वादम्लद्रवपानैश्च श्लेष्मा पित्तञ्च कुप्यति ।
क्रिमीन् बहुविधाकारान् करोति विविधाश्रयान् ॥
आमपक्काशयस्तेषां प्रसवः प्रायशः स्मृतः ।
विंशतेः क्रिमिजातीनां त्रिविधः सम्भवः स्मृतः ।
पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणं ॥
अजवाविजवाः किप्याश्चिप्या गण्डूपदास्तथा ।
चूरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः ॥
श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिसरन्ति च ।
तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि ॥
शूलाग्निमान्द्यपाण्डुत्वविष्टम्भबलसङ्क्षयाः ।
प्रसेकारुचिहृद्रोगविड्भेदास्तु पुरीषजैः ॥

रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः ।
शूलाटोपशकृद्भेदपक्तिनाशकराश्च ते ॥
दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा ।
पिपीलिका दारुणाश्च कफकोपसमुद्भवाः ॥
रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः ।
मूढधान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा ॥
मज्जादा नेत्रलेढारस्तालुश्रोत्रभुजस्तथा ।
शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते ॥
केशरोमनखादाश्च दन्तादाः किक्किशास्तथा ।
कुष्ठजाश्च परीसर्प्पा ज्ञेयाः शोणितसम्भवाः ॥
ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा ।
रक्ताधिष्ठानजान् प्रायोविकारान् जनयन्ति ते ॥
माषपिष्टान्नलवणगुडशाकैः पुरीषजाः ।
मांसमाषगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ।
ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ॥
भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणं ।
दृश्यास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः ॥
केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्जयेत् ।
एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरं ॥
सुरसादिविपक्वेन सर्प्पिषा वान्तमादितः ।

विरेचयेत्तीक्ष्णतरैर्योगैरास्थापयेच्च तं ॥
यवकोलकुलत्थानां सुरसादेर्गणस्य च ।
विडङ्गस्नेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युञ्ज्यात् क्रमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥
स्नेहेनोक्तेन चैनन्तु योजयेत्स्नेहवस्तिना ।
ततः शिरीषकिणिहीरसं क्षौद्रयुतं पिबेत् ।
केवूकस्वरसं वापि पूर्ब्ववत्तीक्ष्णभोजनः ॥
पलाशवीजस्वरसं कल्कं वा तण्डुलाम्बुना ।
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजं ।
लिह्यादश्वशकृच्चूर्णं विडङ्गं वा समाचिकं ॥
पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ।
खादेत्पूपलिकान् पक्वान् धान्याम्लञ्च पिबेदनु ॥
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ।
विडङ्गचूर्णपिष्टाभ्यां तस्मिन् भक्ष्यन्तु कारयेत् ॥
तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ॥
श्वाविधः शकृतश्चूर्णं सप्तकृत्वः सुभावितं ।
विडङ्गानां कषायेण त्रैफलेन तथैव च ॥
चौद्रेण लिह्यानुपिवेद्रसमामलकोद्भवं ।
अचाभयारसञ्चापि विधिरेषोऽप्ययसामपि ॥

पूतीकस्वरसं वापि पिवेद्वा मधुना सह ।
पिवेद्वा पिप्पलीमूलमजामूत्रेण संयुतं ॥
सप्तरात्रं पिवेद्दृष्टन्तपु वा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेवं क्रमीन् भिषक् ॥
शिरोहृद्घ्राणवक्त्राचिसंस्रुतांश्च पृथग्विधान् ।
विमेणाञ्जनैर्नस्यैरवपीडैश्च साधयेत् ॥
शक्रद्रसन्तुरङ्गस्य सुशुष्कं भावयेदति ।
निःक्वाथेन विडङ्गानां चूर्णं प्रधमनन्तु तत् ॥
अयसूर्णान्यनेनैव विधिना योजयेद्भिषक् ।
सकांस्यनीलं तैलं च नस्यं स्यात्सुरसादिके ॥
इन्द्रलुप्तविधिश्चापि विधेयो रोमभोजिषु ।
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकं ॥
रक्तजानां समुद्दिष्टं कुर्य्यात्कुष्ठचिकित्सिते ।
सुरसादिन्तु सर्व्वेषु सर्व्वथैवोपयोजयेत् ॥
प्रव्यक्ततिक्तकटुकं भोजनञ्च हितं भवेत् ।
कुलत्थक्वाथसंसृष्टं चीरपानञ्च पूजितं ॥

चीराणि मांसानि घृतानिचैव दधीनि शाकानि च पर्णवन्ति ।
समासतोऽस्लान्मधुरान् हिमांश्च क्रमीन् जिघांसुः परिवर्जयेत्तु ॥

---

॥ पञ्चपञ्चाशत्तमोऽध्यायः ॥

अथात उदावर्त्तप्रतिषेधमध्यायं व्याख्यास्यामः ॥

अधश्चोर्द्धञ्च भावानां प्रवृत्तानां स्वभावतः।
न वेगान् धारयेत्प्राज्ञो वातादीनां जिजीविषुः॥
वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः।
व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते॥
क्षुत्तृष्णाश्वासनिद्राणामुदावर्त्तो विधारणात्।
तस्याभिधास्ये व्यासेन लक्षणञ्च चिकित्सितं॥
त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः।
अपथ्यभोजनाच्चापि वक्ष्यते च यथापरः॥

आध्मानशूलौ हृदयोपरोधं शिरोरुजं श्वासमतीव हिक्कां।
कासप्रतिश्यायगलग्रहांश्च बलासपित्तप्रसरञ्च घोरं॥
कुर्य्यादपानाभिहतः स्वमार्गे हन्यात्पुरीषं मुखतः क्षिपेद्वा।
आटोपशूलौ परिकर्त्तनञ्च सङ्गः पुरीषस्य तथोर्द्धवातः॥
पुरीषमास्यादपि वा निरेति पुरीषवेगेऽभिहते नरस्य।
मूत्रस्य वेगेऽभिहते नरस्तु कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पं॥
मेढ्रे गुदे वङ्क्षणमुष्कयोश्च नाभिप्रदेशेष्वथ वापि मूर्द्ध्नि।
आनद्धवस्तिश्च भवन्ति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्त्तेः॥
मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात्पवनात्मकाः स्युः।
श्रोत्राननघ्राणविलोचनोत्था भवन्ति तीव्राश्च तथा विकाराः॥
आनन्दजं शोकसमुद्भवं वा नेत्रोदकं प्राप्तममुञ्चतो हि।
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन॥
भवन्ति गाढं क्षवथोर्व्विघाताच्छिरोऽक्षिनासाश्रवणेषु रोगाः।

कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथ वा प्रवृत्तिः ॥
उद्गारवेगेऽभिहते भवन्ति जन्तोर्व्विकाराः पवनप्रसूताः।
छर्द्देर्व्विघातेन भवेच्च कुष्ठं येनैव दोषेण विदग्धमन्नं॥
मूत्राशये वा गुदमुष्कयोश्च शोफो रुजा मूत्रविनिग्रहश्च।
शुक्राश्मरी तत्स्रवणं भवेद्वा ते ते विकारा विहते तु शुक्रे॥
तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधोऽभिघातात्कृशता च दृष्टेः।
कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघाताद्धृदये व्यथा च॥
श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमोहावथवापि गुल्मः।
जृम्भाङ्गमर्दोऽङ्गशिरोऽक्षिजाड्यं निद्राभिघातादथवापि तन्द्रा॥

तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतं।
शकृद्वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत्॥
सर्व्वेष्वेतेषु विधिवदुदावर्त्तेषु कृत्स्नशः।
वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये॥
सामान्यतः पृथक्त्वेन क्रियां भूयो निबोध मे।
आस्थापनं मारुतजे स्निग्धे स्विन्ने विशिष्यते॥
पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत्।
सौवर्चलाढ्यां मदिरां मूत्रेऽभिहते पिबेत्॥
एलामप्यथ मद्येन क्षीरं वापि पिबेन्नरः।
धात्रीफलानां स्वरसं सजलं वा पिबेत्त्र्यहं॥
रासभस्यपुरीषस्य गर्दभस्याथ वा पिबेत्।
मांसोपदंशं मधु वा पिबेद्वा सीधु गौडिकं॥

भद्रदारु घनं मूर्व्वां हरिद्रां मधुकं तथा ।
कोलप्रमाणानि पिबेदान्तरिक्षेण वारिणा ॥
दुष्पर्शाखरसं वापि कषायं कुङ्कुमस्य च ।
एर्व्वारुवीजं तोयेन पिबेद्वा लवणीकृतं ॥
पञ्चमूलीशृतं क्षीरं द्राक्षारसमथापि वा ।
योगांश्च वितरेत्तत्र पूर्व्वोक्तानश्मरीभिदः ॥
मूत्रकृच्छ्रक्रमं वापि कुर्य्यान्निरवशेषतः ।
भूयो वक्ष्यामि योगांश्च मूत्राघातोपशान्तये ॥
स्नेहस्वेदैरुदावर्त्तं जृम्भाजं समुपाचरेत् ।
अश्रुमोक्षोऽश्रुजे कार्य्यः स्निग्धस्विन्नस्य देहिनः ॥
तीक्ष्णाञ्जनावपीडाभ्यां तीक्ष्णगन्धोपसिंहनैः ।
वर्त्तिप्रयोगैरथ वा क्षवशक्तिं प्रवर्त्तयेत् ॥
तीक्ष्णौषधप्रधमनैरथवादित्यरश्मिभिः ।
उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ॥
सुरां सौवर्च्चलवतीं बीजपूर्णरसान्वितां ।
छर्द्याघातं यथादोषं सम्यक् स्नेहादिभिर्जयेत् ॥
सक्षारलवणोपेतमभ्यङ्गं वात्र दापयेत् ।
वस्तिशुद्धिकरावापञ्चतुर्गुणजलम्पयः ॥
आवारिनाशात्क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरं ॥
क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनं ।

तृष्णाघाते पिबेन्मन्थं यवागूं वापि शीतलां ॥
भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः ।
निद्राघाते पिबेत् क्षीरं स्वप्याच्चेष्टकथारतः ॥
आध्मानोत्थेषु रोगेषु यथास्वं प्रयतेत हि ।
यच्च यस्मिन्भवेत्प्राप्तं तच्च तस्मिन् प्रयोजयेत् ॥
वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्त्तं करोति हि ॥
वातमूत्रपुरीषासृक्कफमेदोवहानि वै ।
स्रोतांस्युदावर्त्तयति पुरीषं चातिवर्त्तयेत् ॥
ततो हृद्बस्तिशूलार्त्तो गौरवारुचिपीडितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥
श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ।
तृष्णाहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥
लभते च बहूनन्यान्विकारान्वातकोपजान् ।
तत्तैललवणाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ॥
दोषतो भिन्नवर्चस्कं भुक्तं चाप्यनुवासयेत् ।
न चेच्छान्तिं प्रयात्येवमुदावर्त्तः सुदारुणः ॥
अथैनं बहुशः स्विन्नं युञ्ज्यात्स्नेहविरेचनैः ।
पाययेत त्रिवृत्पीलुयवानीरसपानकैः ॥
हिङ्गुकुष्ठवचास्वर्जिविडङ्गं वा द्विरुत्तरं ।
योगावेतावुदावर्त्तं शूलञ्चापि नियच्छतः ॥

देवदार्वग्निकं कुष्ठं वचाम्पथ्यां पलङ्कषां ।
पौष्कराणि च मूलानि तोयस्यार्द्धाढकं पचेत् ॥
पादावशिष्टं तत्पीतमुदावर्त्तं व्यपोहति ।
मूलकं शुष्कमार्द्रञ्च वर्षाभ्वः पञ्चमूलकं ॥
आरेवतफलं चाप्सु पक्का तेन घृतं पचेत् ।
तत्पीयमानं शमयेदुदावर्त्तमशेषतः ॥
वचामतिविषां कुष्ठं यवक्षारं हरीतकीं ।
कृष्णां निर्दहनीञ्चापि पिवेदुष्णेन वारिणा ।
इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचां ।
कुष्ठं किण्वाग्निकौ चापि पिवेत्तुल्यानि पूर्व्ववत् ॥
मूत्रेण देवदार्वग्नित्रिफलाष्टहतीः पिवेत् ।
यवप्रस्थं फलैः सार्द्धङ्कृष्टकार्य्या जलाढके ॥
पक्काद्धं प्रस्थशेषन्तु पिवेद्धिङ्गुसमन्वितं ।
मदनालाबुवीजानि पिप्पलीं सनिदिग्धिकां ॥
सञ्चूर्ण्य प्रथमेन्नाद्या विशत्येतद्यथा गुदं ।
चूर्णं निकुम्भकम्पिल्लश्यामेच्वाकग्निकोद्भवं ॥
कृतवेधनमागध्यो लवणानाञ्च साधयेत् ।
गवां मूत्रेण ता वर्त्तीः कारयेत्तु गुदानुगाः ॥
सद्यः शर्म्मकरावेतौ योगावमृतसम्भवौ ।

---

॥ षट्पञ्चाशत्तमोऽध्यायः ॥

अथातो विसूचिकाप्रतिषेधमध्यायं व्याख्यास्यामः ॥

अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितं ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥
सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैरुच्यते तु विसूचिका ॥
न ता परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥

मूर्च्छातिसारौ वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥

कुक्षिरानह्यतेऽत्यर्थं तान्यम्यत्यय च कूजति ।
निरुद्धो मारुतश्चापि कुक्षावुपरिधावति ॥
वातवर्चोनिरोधश्च कुक्षौ यस्य भृशम्भवेत् ।
तस्यालसकमाचष्टे हिक्कोद्गारौ तु यस्य तु ॥

दुष्टन्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्द्धमधश्च यस्य ।
विलम्बिकां तस्य विवर्जनीयामाचक्षते शास्त्रविदः पुराणाः ॥
यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः ।
दोषेण येनावततं स्वलिङ्गैस्तं लक्षयेदामसमुद्भवैश्च ॥
यः श्यावदन्तौष्ठनखोऽल्पसंज्ञश्छर्द्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्व्वविमुक्तसन्धिर्य्यायान्नरोऽसौ पुनरागमाय ॥
साध्यासु पार्ष्ण्योर्दहनं प्रशस्तमग्निप्रतापो वमनञ्च तीव्रं ।

पक्वे ततोऽन्ने तु विलङ्घनं स्यात्संपाचनं चापि विरेचनं वा ॥
विशुद्धदेहस्य हि सद्य एव मूर्च्छातिसारादिरुपैति शान्तिं ।
आस्थापनं चापि वदन्ति पथ्यं सर्व्वासु योगानपरान्निबोध ॥
पथ्यावचाहिङ्गुकलिङ्गगटञ्जसौवर्चलैः सातिविषैश्च चूर्णं ।
सुखाम्बुपीतं विनिहन्त्यजीर्णं शूलं विसूचीमरुचिञ्च सद्यः ॥
क्षारागदं वा लवणं विडं वा गुडप्रगाढानथ सर्षपान्वा ।
अम्लेन वा सैन्धवहिङ्गुयुक्तौ सवीजपूर्णौ सघृतौ त्रिवर्गौ ॥
कटुत्रिकं वा लवणैरुपेतं पिबेत्सुहीवीरविमिश्रितं तु ।
कल्याणकं वा लवणं पिबेत्तु यदुक्तमादावनिलामयेषु ॥
कृष्णाजमोदचवकाग्नि वापि तुल्यौ पिबेद्वा मगधानिकुम्भौ ।
दन्तीयुतं वा मगधोद्भवानां कल्कं पिबेत्कोषवतीरसेन ॥
उष्णाभिरद्भिर्मगधोद्भवानां कल्कं पिबेन्नागरकल्कयुक्तं ।
व्योषं करञ्जस्य फलं हरिद्रे मूलं समं वाप्यथ मातुलुङ्ग्याः ॥
छायाविशुष्का गुटिकाः कृतास्ता हन्युर्व्विसूचीं नयनाञ्जनेन ।
सुवामितं साधुविरेचितं वा सुलङ्घितं वा मनुजं विदित्वा ॥
पेयादिभिर्दीपनपाचनीयैः सम्यक्क्षुधार्त्तं समुपक्रमेत ।
आमं शकृद्वा निचितं क्रमेण भूयो विवद्धं विगुणानिलेन ॥
प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति ।
तस्मिन्भवत्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ॥
आमाशये शूलमथो गुरुत्वं हृल्लासउद्गारविघातनञ्च ।
स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा च शकृद्वमिश्च ॥

आमस्य पक्काशयजे भवन्ति लिङ्गानि चात्रालसकोद्भवानि।
आमोद्भवे वातमुपक्रमेत संसर्गभक्तक्रमदीपनीयैः॥
अथेतरं यो न शकृद्दमेत्तमाशु जेयत्स्वेदनपाचनैश्च।
विसूचिकायां परिकीर्त्तितानि द्रव्याणि वैरेचनिकानि यानि॥
तान्येव वर्त्तीर्वितरेद्विचूर्ण्य सदिग्धजावीभगवां तु मूत्रैः।
स्विन्नस्य पायौ विनिवेश्य तास्य चूर्णानि चैषां प्रधमेत्तु नाड्या॥
मूत्रेण संसाध्य यथाविधानं द्रव्याणि यान्यूर्द्ध्वमधश्च यान्ति।
क्वाथेन तेनाशु निरूहयेच्च मूत्राढ्ययुक्तेन समाचिकेण॥
त्रिभण्डियुक्तं लवणप्रकुञ्चं दत्वा विरिक्तक्रममाचरेच्च।
एष्वेव तैलेन च साधितेन प्राप्तं यदि स्यादनुवासयेच्च॥

---

## ॥ सप्तपञ्चाशत्तमोऽध्यायः ॥

अथातोऽरोचकप्रतिषेधमध्यायं व्याख्यास्यामः॥

दोषैः पृथक् सह च चित्तविपर्य्ययाच्च
भक्तायनेषु हृदि चावतते प्रगाढं।
नान्ने रुचिर्भवति तं भिषजो विकारं
भक्तोपघातमिह पञ्चविधं वदन्ति॥
हृच्छूलपीडनयुतं विरसाननत्वं
वातात्मके भवति लिङ्गमरोचके तु।
हृद्दाहचोषवहुता मुखतिक्तता च
मूर्च्छा सहृड्भवति पित्तकृते तथैव॥

कण्डूगुरुत्वकफसंस्रवसादतन्द्राः
श्लेष्मात्मके मधुरमास्यमरोचके तु ।
सर्व्वात्मके पवनपित्तकफा बहूनि
रूपाण्यथास्य हृदये समुदीरयन्ति ॥
संरागशोकभयविप्लुतचेतसस्तु
चिन्ताकृतो भवति सोऽशुचिदर्शनाच्च ।
वाते वचाम्बुवमनं कृतवान्पिबेच्च
स्नेहैः सुराभिरथ वोष्णजलेन चूर्णं ॥
कृष्णाविडङ्गयवभस्महरेणुभार्गी
रास्नैलहिङ्गुलवणोत्तमनागराणां ।
पित्ते गुडाम्बुमधुरैर्वमनं प्रशस्तं
स्नेहः ससैन्धवसितामधुसर्प्पिरिष्टः ॥
निम्बाम्बुवामितवतः कफजेऽनुपानं
राजद्रुमाम्बुमधुना तु सदीप्यकं स्यात् ।
चूर्णं यदुक्तमथवानिलजे तदेव
सर्व्वैश्च सर्व्वकृतमेवमुपक्रमेत ॥
द्राक्षापटोलविडवेत्रकरीरनिम्ब
मूर्व्वाभयाक्षवदरामलकेन्द्रवृक्षैः ।
वीजैः करञ्जनृपवृक्षभवैश्च पिष्टै
र्लेहं पचेत्सुरभिमूत्रयुतं यथावत् ॥
मुस्तां वचां त्रिकटुकं रजनीद्वयञ्च

भार्गीञ्च कुष्ठमथ निर्द्दहनीञ्च पिष्ट्वा ।
मूत्रेऽविजे द्विरदमूत्रयुते पचेद्वा
पाठान्तुगामतिविषां रजनीञ्च मुख्यां ॥
मण्डूकिमर्कममृताञ्च सलाङ्गलाख्यां
मूत्रे पचेत्तु मद्दिषस्य विधानविद्वा ।
एतान्न सन्ति चतुरो लिहतस्तु लेहान्
गुल्मारुचिश्वसनकण्ठहृदामयाश्च ॥
सात्म्यान् स्वदेशरचितान् विविधांश्च भक्ष्यान्
पानानि मूलफलषाडवरागयोगान् ।
अद्यादृसांश्च विविधान् विविधैः प्रकारै
र्भुञ्जीत वापि लघुरुच्यमनःसुखानि ॥
आस्थापनं विधिवदत्र विरेचनञ्च
कुर्य्यान्मृदूनि शिरसश्च विरेचनानि ।
त्रीण्यूषणानि रजनीत्रिफलायुतानि
चूर्णीकृतानि यवशूकविमिश्रितानि ॥
क्षुद्रायुतानि वितरेन्मुखधावनार्थं
मन्यानि तिक्तकटुकानि च भेषजानि ।
मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्व्विविधैश्च लेहैः ॥
मत्रासवैर्ग्गुडकृतैश्च तथालरिष्टैः
क्षारासवश्च मधुमाधवतुल्यगन्धैः ।

स्यादेष एव कफवातहते विधिश्च
शान्तिं गते कृतभुजि प्रशमाय तस्य ॥
दुःखाभिघातभयशोकहतेऽन्तरग्नौ
भावानवाय वितरेत्खलु शस्यरूपान्।
अर्थेषु चाप्यपचितेषु पुनर्भवाय
पौराणिकैः श्रुतिपथैरनुमानयेत्तं ॥
दैन्यं गते मनसि बोधनमत्र शस्तं
यद्यत्प्रियं तदुपसेव्यमरोचके तु ॥

---

॥ अष्टपञ्चाशत्तमोऽध्यायः ॥

अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः ॥

वातकुण्डलिकाष्ठीला वातवस्तिस्तथैव च।
मूत्रातीतः सजठरो मूत्रोत्सङ्गः क्षयस्तथा ॥
मूत्रग्रन्थिर्मूत्रशुक्रमुष्णवातस्तथैव च।
मूत्रौकसादौ द्वौ चापि रोगा द्वादश कीर्त्तिताः ॥
रौक्ष्याद्वेगविघाताद्वा वायुर्वस्तौ सवेदनं ॥
मूत्रं सङ्गृह्य चरति विगुणः कुण्डलीकृतः।
सृजेदल्पाल्पमथवा सरुजस्कं शनैः शनैः ॥
वातकुण्डलिकां तान्तु व्याधिं विद्यात्सुदारुणं।
शकृन्मार्गस्य वस्तेश्च वायुरन्तरमाश्रितः ॥
अष्ठीलावद्घनं ग्रन्थिं करोत्यचलमुन्नतं।

विण्मूत्रानिलसङ्गश्च तत्राध्मानञ्च जायते ॥
वेदना जायते वस्तौ वाताष्ठीलेति तां विदुः।
वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः ॥
निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः।
मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिनिपीडितः ॥
वातवस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः।
सन्धार्य्य वेगं मूत्रस्य यो भूयः स्रष्टुमिच्छति ॥
तस्य नाभ्येति यदि वा कथञ्चित्संप्रवर्त्तते।
प्रवाहतो मन्दरुजमल्पमल्पं पुनः पुनः ॥
मूत्रातीतन्तु तं विद्यान्मूत्रवेगविघातजं।
मूत्रस्य विहते वेगे तदुदावर्त्तहेतुना ॥
अपानः कुपितो वायुरुदरं पूरयेद्भृशं।
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनं ॥
तं मूत्रजठरं विद्यादधोवस्तिनिरोधजं।
वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः ॥
मूत्रं प्रवृत्तं सज्येत सरक्तं वा प्रवाहतः।
स्रवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजं ॥
विगुणानिलजो व्याधिर्मूत्रसङ्गः स संज्ञितः।
रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ ॥
सदाहवेदनं कृच्छ्रं कुर्य्यातां मूत्रसंचयं ॥
अभ्यन्तरे वस्तिमुखे वृत्तोऽल्पः स्थिर एव च।

वेदनावाननिस्यन्दी मूत्रमार्गनिरोधनः ॥
जायते सहसा यस्य ग्रन्थिरश्मरिलक्षणः ।
स मूत्रग्रन्थिरित्येवमुच्यते वेदनादिभिः ॥
प्रत्युपस्थितमूत्रस्तु मैथुनं योऽभिनन्दति ।
तस्य मूत्रयुतं रेतः सहसा संप्रवर्त्तते ॥
पुरस्ताद्वापि मूत्रस्य पश्चाद्वापि कदाचन ।
भस्मोदकप्रतीकाशं मूत्रशुक्रन्तदुच्यते ॥
व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलावृतं ।
वस्तिमेढ्रगुदश्चैव प्रदहन् स्रावयेदधः ॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा ।
कृच्छ्रात्प्रवर्त्तते जन्तोरुष्णवातं वदन्ति तं ॥
विशदं पीतकं मूत्रं सदाहं बहलन्तथा ।
शुष्कं भवति यच्चापि रोचनाचूर्णसन्निभं ॥
मूत्रौकसादं तं विद्याद्रोगं पित्तकृतं बुधः ।
शुष्कं भवति यच्चापि शङ्खचूर्णप्रपाण्डुरं ॥
पिच्छिलं संहतं श्वेतं तथा कृच्छ्रं प्रवर्त्तते ।
मूत्रौकसादं तं विद्यादामयं चापरं कफात् ॥
कषायकल्कसर्पींषि भक्ष्यान् लेहान्पयांसि च ।
क्षारमध्वासवस्वेदान् वस्तींश्चोत्तरसंज्ञितान् ॥
विदध्यान्मतिमांस्तत्र विधिज्ञाश्मरिनाशनं ।
मूत्रोदावर्त्तयोगांश्च कार्त्स्न्येनात्र प्रयोजयेत् ॥

कल्कमेर्वारुवीजानामक्षमात्रं ससैन्धवं ।
धान्याम्लयुक्तं पीत्वैव मूत्रकृच्छ्रात्प्रमुच्यते ॥
सुरां सौवर्च्चलवतीं मूत्रकृच्छ्री पिबेन्नरः ।
मधुमांसोपदंशं वा पिबेद्वाप्यथ गौडिकं ॥
पिबेत्कुङ्कुमकर्षं वा मधूदकसमायुतं ।
रात्रिपर्य्युषितं प्रातस्तथा सुखमवाप्नुयात् ॥
दाडिमाम्लयुतां मुख्यामेलाजीरकनागरैः ।
पीत्वासुरां सुलवणां मूत्रकृच्छ्रात्प्रमुच्यते ॥
पृथक्पर्ण्यादिवर्गस्य मूलं गोक्षुरकस्य च ।
अर्द्धप्रस्थेन तोयस्य पचेत् क्षीरचतुर्गुणं ॥
क्षीरावशिष्टं तच्छीतं सिताक्षौद्रयुतं पिबेत् ।
नरो मारुतपित्तोत्थं मूत्राघातनिवारणं ॥
निष्पीड्य वाससा सम्यग्वर्च्चो रासभवाजिनां ।
रसस्य कुडवन्तस्य पिबेन्मूत्ररुजापहं ॥
मुस्ताभयादेवदारुमूर्व्वाणां मधुकस्य च
पिबेदक्षसमं कल्कं द्राक्षाया जलसंयुतं ॥
पिबेत्पर्य्युषितं वारि शीतं मूत्ररुजापहं ।
निदिग्धिकायाः स्वरसं पिबेत् कुडवसंमितं ॥
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतं ।
प्रपोड्यामलकानान्तु रसं कुडवसम्मितं ।
पीत्वागदी भवेज्जन्तुर्मूत्रदोषरुजातुरः ॥

धात्रीफलरसेनैवं सूक्ष्मैलां वा पिबेन्नरः।
पिष्ट्वाथ वा सुशीतेन शालितण्डुलवारिणा ॥
तालस्य तरुणं मूलन्त्रपुषस्वरसन्तया।
श्वेतं कर्क्कटकञ्चैव प्रातस्तं पयसा पिबेत्॥
शृतं वा मधुरैः क्षीरं सर्प्पिर्मिश्रं पिबेन्नरः।
मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरं परं ॥
बलाश्वदंष्ट्राक्रौञ्चास्थिकोकिलाचकतण्डुलान्।
शतपर्व्वकमूलञ्च देवदारुसचित्रकं ॥
श्वत्रबीजञ्च सुरया कल्कीकृत्य पिबेन्नरः।
मूत्रदोषविशुद्ध्यर्थं तथैवाश्मरिशोधनं ॥
पाटलाक्षारमाहृत्य सप्तकृत्वः परिस्रुतं।
पिबेन्मूत्रविकारघ्नं संसृष्टं तैलमात्रया ॥
नलेक्षुदर्भाश्मभेदत्रपुसैर्व्वारुबीजकं।
क्षीरे परिस्रुतं तत्र पिबेत्सर्प्पिः समायुतं ॥
पाटल्या यावशूकाच्च पारिभद्रात्तिलादपि।
क्षारोदकेन मतिमान् लगेलोषणचूर्णकं ॥
पिबेद्गुडेन मिश्रं वा लिह्यात्स्नेहान् पृथक् पृथक्।
अतऊर्द्ध्वं प्रवक्ष्यामि मूत्रदोषे क्रमं हितं ॥
स्नेहस्वेदोपपन्नानां हितन्तेषु विरेचनं।
ततः संशुद्धदेहानां हितास्थोत्तरवस्तयः ॥
स्त्रीणामतिप्रसङ्गेन शोणितं यस्य सिच्यते।

मैथुनोपरमस्तस्य बृंहणस्य विधिः स्मृतः ॥
ताम्रचूडवसातैलं हितञ्चोत्तरवस्तिषु ।
विधानं तस्य पूर्व्वं हि व्यासतः परिकीर्त्तितं ॥
क्षौद्रार्द्धपात्रं दत्वा तु पात्रन्तु क्षीरसर्प्पिषोः ।
स्वयङ्गुप्ताफलञ्चैव तथैव क्षुरकस्य च ।
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत् ॥
एतदैकध्यमानीय खजेनाभिप्रमन्थयेत् ।
तस्य पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत् ॥
एतत्सर्प्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा ।
मूत्रदोषान् जयेत्सर्वानन्ययोगैः सुदुर्ज्जयान् ॥
जयेच्छोणितदोषांश्च बन्ध्या गर्भं लभेत च ।
नारी चैतत्प्रयुञ्जाना योनिदोषात्प्रमुच्यते ॥
बलाकोलास्थिमधुकं श्वदंष्ट्राथ शतावरी ।
मृणालञ्च कशेरुश्च बीजानि क्षुरकस्य च ॥
सहस्रवीर्य्यांशुमती पयस्या सह कालया ।
शृगालविन्नातिबला बृंहणीयो गणस्तथा ॥
एतानि समभागानि मतिमान् सह साधयेत् ।
चतुर्गुणेन पयसा गुडस्य तुलया सह ॥
द्रोणावशिष्टं तत्पूतं पचेत्तेन घृताढकं ।
तत्सिद्धं कलसे स्थाप्य क्षौद्रप्रस्थेन संयुतं ॥
सर्पिरेतत्प्रयुञ्जानो मूत्रदोषात्प्रमुच्यते ॥

॥ ऊनषष्टितमोऽध्यायः ॥

अथातो मूत्रदोषप्रतिषेधमध्यायं व्याख्यास्यामः ॥

वातेन पित्तेन कफेन सर्व्वैस्तथाभिघातैः शकृदश्मरीभ्यां ।
तथापरः शर्करया सुकष्टो मूत्रोपघातः कथितोऽष्टमस्तु ॥

अल्पमल्पं समुत्पीड्य मुष्कमेहनवस्तिभिः ।
फलङ्गिरिव कृच्छ्रेण वाताघातेन मेहति ॥
हरिद्रमुष्णं रक्तं वा मुष्कमेहनवस्तिभिः ।
अग्निना दह्यमानाभिः पित्ताघातेन मेहति ॥
स्निग्धं शुक्लमनुष्णञ्च मुष्कमेहनवस्तिभिः ।
संहृष्टरोमा गुरुभिः श्लेष्माघातेन मेहति ॥
दाहशीतरुजाविष्टो नानावर्णं मुहुर्मुहुः ॥
ताम्यमानः सुकृच्छ्रेण सन्निपातेन मेहति ।
मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु च ॥
स्रोतःसु मूत्राघातस्तु जायते भृशवेदनः ।
वातवस्तेस्तु तुल्यानि तस्य लिङ्गानि लक्षयेत् ॥
शकृतस्तु प्रतीघाताद्वायुर्व्विगुणतां गतः ।
आध्मानञ्च सशूलञ्च मूत्रसङ्गं करोति हि ॥
अश्मरीहेतुकः पूर्व्वं मूत्राघात उदाहृतः ।
अश्मरी शर्कराचैव तुल्ये सम्भवलक्षणैः ॥
शर्करायां विशेषन्तु शृणु कीर्त्तयतो मम ।
पच्यमानस्य पित्तेन भिद्यमानस्य वायुना ॥

श्लेष्मणोऽवयवा भिन्नाः शर्करा इतिसंज्ञिताः ।
हृत्पीडा वेपथुः शूलं कुक्षौ वह्निः सुदुर्ब्बलः ॥
ताभिर्भवति मूर्च्छाच मूत्राघातश्च दारुणः ।
मूत्रवेगनिरस्तासु तासु शाम्यति वेदना ॥
यावदन्या पुनर्नैति गुडिका श्रोतसोमुखं ।
शर्कराश्मभवस्यैतन्मूत्राघातस्य लक्षणं ॥
चिकित्सितमतस्तूर्द्धमष्टानामपि वक्ष्यते ।
अश्मरीञ्च समाश्रित्य यदुक्तं प्रसमीक्ष्य तत् ॥
यथादोषं प्रयुञ्जीत स्नेहादिकमपि क्रमं ।
श्वदंष्ट्राश्मभिदौ कुम्भीं वृषकं कण्टकारिकां ।
बलां शतावरीं रास्नां वरुणं गिरिकर्णिकां ।
तथाविदारिगन्धादिं संहृत्य चैष्टतं पचेत् ॥
तैलं घृतं वा तत्पेयं तेन वाप्यनुवासनं ।
दद्यादुत्तरवस्तिञ्च वातकृच्छ्रोपशान्तये ॥
श्वदंष्ट्रास्वरसे तैलं सगुडक्षीरनागरं ।
पक्का तत्पूर्व्ववद्योज्यं तत्रानिलरुजापहं ॥
तृणोत्पलादिकाकोलीन्यग्रोधादिगणे कृतं ।
पीतं घृतं पित्तकृच्छ्रं नाशयेत् क्षिप्रमेवच ॥
दद्यादुत्तरवस्तिञ्च पित्तकृच्छ्रोपशान्तये ।
एभिरेव कृतःस्नेहस्त्रिविधेष्वेव वस्तिषु ॥
हितं विरेचनं चेक्षुवीरद्राक्षारसैर्युतं ।

सुरसोषकमुस्तादिवरुणादौच संस्कृतं ॥
तैलं तथा यवाग्वश्च कफकृच्छ्रे प्रशस्यते।
यथादोषोच्छ्रयं कुर्य्यादेतानेवच सर्व्वजे ॥
फल्गुवृश्चीकदर्भाश्मसारचूर्णञ्च वारिणा।
सुरेचुरसदर्भाम्बुपीतं कृच्छ्ररुजापहं ॥
तथाभिघातजे कुर्य्यात् सद्योव्रणचिकित्सितं।
मूत्रकृच्छ्रे सदा चास्य कार्य्या वातहरी क्रिया॥
स्वेदावगाहावभ्यङ्गा वस्तिचूर्णक्रियास्तथा।
शकृच्छ्रौ द्वौ तथान्यौ यौ तयोः प्रोक्तः क्रियाविधिः॥
इति सौश्रुत आयुर्वेदशास्त्रे उत्तरतन्त्रे कायचिकित्सा समाप्ता ॥

---

षष्टितमोऽध्यायः ॥

अथातो ऽमानुषप्रतिषेधमध्यायं व्याख्यास्यामः ॥
निशाचरेभ्यो रच्यस्तु नित्यमेव चतातुरः।
इति यत्प्रागभिहितं विस्तरस्तस्य वच्यते ॥
गुह्यानागतविज्ञानमनवस्था सहिष्णुता।
क्रिया वा ऽमानुषी यस्मिन् स ग्रहः परिकीर्त्त्यते ॥
अशुचिं भिन्नमर्य्यादं चतं वा यदिवाऽचतं।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापिच ॥
असङ्ख्येया ग्रहगणा ग्रहाधिपतयस्तु ये।
व्यज्यन्ते विविधाकारा भिद्यन्ते ते तथाष्टधा ॥

देवास्तथा शत्रुगणाश्च तेषां गन्धर्व्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजातिरेषोऽष्टधा देवगणग्रहाख्यः ॥

संतुष्टः शुचिरपि चेष्टगन्धमाल्यो
निस्तन्द्रो ह्यवितथसंस्कृतप्रभाषी ।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवतिच यः स देवजुष्टः ॥
संस्वेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः ।
संतुष्टो भवति नचान्नपानजातै
र्दुष्टात्मा भवतिच देवशत्रुजुष्टः ॥
हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वा प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्यः ॥
ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतमतिरल्पवाक्सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीडितो मनुष्यः ॥
प्रेतेभ्यो विसृजति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः ।
मांसेप्सुस्तिलगुडपायसाभिकाम

स्तब्धको भवति पितृग्रहाभिभूतः ॥
भूमौ यः प्रसरति सर्पवत्कदाचित्
सृक्कन्यौ विलिहति जिह्वया प्रसक्तं।
निद्रालुर्गुडमधुदुग्धपायसेषु
विज्ञेयो भवति भुजङ्गमेन जुष्टः ॥
मांसासृग्विविधसुराविकारलिप्सु
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः।
क्रोधालुर्विपुलबलो निशाविहारी
शौचद्विड्भवतिच रक्षसा गृहीतः ॥
उद्धस्तः कृशपरुषश्चिरप्रलापी
दुर्गन्धो भृशमशुचिस्तथातिलोलः।
बह्वाशी विजनहिमाम्बुरात्रिसेवी
व्याविग्नं भ्रमति रुदन् पिशाचजुष्टः ॥
स्थूलाक्षस्त्वरितगतिः स्वफेनलेही
निद्रालुः पततिच कम्पतेच योऽति।
यश्चाद्रिद्विरदनगादिविच्युतःसन्
संदृष्टो न भवति वार्द्धकेन जुष्टः ॥
देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥
कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः।
रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च ॥

दर्प्पणादीन् यथाच्छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्कराचिश्च यथा देहञ्च देहभृत् ॥
विशन्तिच न दृश्यन्ते ग्रहास्तद्वच्छरीरिणं ।

तपांसि तीव्राणि तथैव दानं व्रतानि धर्म्मो नियमश्च सत्यं ।
गुणास्तथाष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावं ॥
न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान् क्वचिदाविशन्ति
ये वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः ॥
तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः ।
असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तमाविशन्ति ॥

निशाचराणां तेषां हि ये देवगणसंस्तृताः ।
ते तु तत्सत्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः ॥
देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये ।
देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते चदेववत् ॥
स्वामिशीलक्रियाचाराः क्रमएव सुरादिषु ।
नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः ॥
सत्यलादपवृत्तेषु वृत्तिस्तेषां गणैः कृता ।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः ॥
भूतानीति कृता संज्ञा तेषां संज्ञा प्रवक्तृभिः ।
ग्रहसंज्ञाभिभूतानि यस्माद्देत्यनया भिषक् ॥
विद्यया भूतविद्यात्वमतएव निरुच्यते ।
तेषां शान्त्यर्थमन्विच्छन्वैद्यस्तु सुसमाहितः ॥

जपैः सनियमैर्होमैरारभेत चिकित्सितुं ।
रक्तानि गन्धमाल्यानि वीजानि मधुसर्प्पिषां ॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते ।
वस्त्राणि मद्यमांसानि चीराणि रुधिराणि च ॥
यानि येषां यथेष्टानि तानि तेभ्यःप्रदापयेत् ।
हिंसन्ति मनुजान् येषु प्रायशो दिवसेषु तु ॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये ।
देवग्रहे देवगृहे जुहुयाग्निं प्रापयेद्वलिं ॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससम्भृतं ।
असुराय यथाकालं विदध्याच्चत्वरादिषु ॥
चतुःपथे राक्षसस्य भीमेषु गहनेषु वा ।
शून्यागारे पिशाचस्य तीव्रं वलिमुपाहरेत् ॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः ।
न शक्या वलिभिर्जेतुं योगैस्तान् समुपाचरेत् ।
अजर्च्चर्म्मरोमाणि शल्यकोलूकयोस्तथा ॥
हिङ्गुमूत्रञ्च वस्तस्य धूमसस्य प्रयोजयेत् ।
एतेन शाम्यति चिप्रं बलवानपि यो ग्रहः ॥
गजाह्वपिप्पलीमूलव्योषामलकसर्षपान् ।
गोधानकुलमार्जारऋचपित्तप्रभावितान् ॥
नस्याभ्यञ्जनसेकेषु विदध्याद्योगतत्त्ववित् ।
खराश्वाश्वतरोलूककरभश्वशृगालजं ।

पुरीषं गृध्रकाकानां वराहस्य च पेषयेत् ।
वस्तमूत्रेण तत्सिद्धं तैलं स्यात्पूर्व्ववद्धितं ॥
शिरीषवीजं लशुनं शुण्ठीं सिद्धार्थकं वचां ।
मञ्जिष्ठां रजनीं कृष्णां वस्तमूत्रेण पेषयेत् ॥
वर्त्तीश्छायाविशुष्कास्ताः सपित्ता नयनाञ्जनं ।
नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः ॥
हरिद्रे च कृता वर्त्तिः पूर्व्ववन्नयनाञ्जनं ।
ये ये ग्रहा न सिध्यन्ति सर्व्वेषां नयनाञ्जनं ॥
सैन्धवं कटुकं हिङ्गुवयस्थाञ्च वचामपि ।
वस्तमूत्रेण तत्पिष्टं मत्स्यपित्तेन पूर्व्ववत् ॥
पूराणसर्पिर्लशुनं हिङ्गु सिद्धार्थकं वचां ।
गोलोमीचाजलोमीच भूतकेशी जटा तथा ॥
कुक्कुटीसर्प्पगन्धाञ्च तथाकाणविषाणिके ।
चव्यप्रोक्ता वयस्थाच शृङ्गी मोहनवल्लिका ॥
अर्कमूलं त्रिकटुकं लताश्रोतोञ्जनाञ्जनं ।
नैपाली हरितालञ्च रक्षोघ्ना ये च कीर्त्तिताः ॥
सिंहव्याघ्रर्क्षमार्जारद्वीपिवाजिगवान्तथा ।
श्वाविच्छल्यकगोधानामुष्ट्रस्य नकुलस्य च ॥
विटलग्रोमवसामूत्ररक्तपित्तनखादयः ।
अस्मिन्वर्गे भिषक्कुर्य्यात्तैलानि च घृतानि च ॥
पानाभ्याञ्जननस्येषु तानि योज्यानि जानता ।

अवपीडेऽञ्जने चैव विदध्याद्गुटिकीकृतां ॥
विदधीत परीषेके क्वथितं चूर्णितं तथा ।
उद्धूलने सुत्रणपिष्टं प्रदेहे चावचारयेत् ॥
एष सर्व्वविकारांस्तु मानसानपराजितः ।
हन्यादल्पेन कालेन स्नेहादिरपिच क्रमात् ॥
नचायुक्तं प्रयुञ्जीत प्रयोगन्देवताग्रहे ।
ऋते पिशाचादन्येषु प्रतिकूलं नचाचरेत् ॥
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः ।
हिताहितविधानञ्च नित्यमेव समाचरेत् ॥
ततः प्राप्स्यति सिद्धिञ्च यशश्च विपुलं भिषक् ।

---

॥ एकषष्टितमोऽध्यायः ॥

अथातोऽपस्मारप्रतिषेधमध्यायं व्याख्यास्यामः ॥
स्मृतिर्भूतार्थविज्ञानमपस्य परिवर्जने ।
अपस्मार इतिप्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥
मिथ्यादियोगेन्द्रियार्थकर्मणामभिसेवनात् ।
विरुद्धमलिनाहारविहारकुपितैर्मलैः ॥
वेगनिग्रहशीलानामहिताशुचिभोजिनां ।
रजस्तमोऽभिभूतानां गच्छताञ्च रजस्वलां ॥
तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशं ।

चेतस्यभिहते पुंसामपस्मारोऽभिजायते ॥
संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः ।
रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा ॥
विक्षिपन् हस्तपादौ च विजिह्मभ्रुर्विलोचनः ।
दन्तान् खादन्वमन् फेनं विवृताक्षः पतेत्क्षितौ ॥
अल्पकालान्तरश्चापि पुनः संज्ञां लभेत सः ।
सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः ॥
वातपित्तकफैर्नृणाञ्चतुर्थः सन्निपाततः ।
हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता ॥
निद्रानाशश्च तस्मिंस्तु भविष्यति भवत्यथ ।
वेपमानो दशन्दन्तान् श्वसन् फेनं वमन्नपि ॥
यो ब्रूयाद्विकृतं सत्त्वं कृष्णं मामनुधावति ।
ततो मे चित्तनाशः स्यात्सोऽपस्मारोऽनिलात्मकः ॥
तृट्तापस्वेदमूर्च्छार्त्तो धुन्वन्नङ्गानि विह्वलः ।
यो ब्रूयाद्विकृतं सत्त्वं पीतं मामनुधावति ॥
ततो मे चित्तनाशः स्यात्सपित्तभव उच्यते ।
शीतहृल्लासनिद्रार्त्तः पतन् भूमौ वमन् कफं ॥
योब्रूयाद्विकृतं सत्त्वं शुक्लं मामनुधावति ।
ततो मे चित्तनाशः स्यात्सोऽपस्मारः कफात्मकः ॥
हृदि तोदस्तृडुत्क्लेदस्त्रिष्वप्येतेषु सञ्ज्ञया ।
प्रलापः कूजनं क्लेशः प्रत्येकन्तु भवेदिह ॥

सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे ।
अनिमित्तागमाद्व्याधेर्गमनादहतेऽपिच ॥
आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजं ।
क्रमोपयोगाद्दोषाणां चणिकत्वात्तथैवच ॥
आगमादैश्वरूपाच्च सतु निर्वर्ण्यते बुधैः ।
वर्षत्यपि यथा देवे भूमौ वीजानि कानिचित् ॥
शरदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः ।
स्थायिनः केचिदल्पेन कालेनाभिप्रवर्द्धिताः ॥
दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः ।
अपस्मारो महाव्याधिस्तस्माद्दोषजएवतु ॥
तस्य कार्य्यो विधिः सर्व्वो यउन्मादेषु वक्ष्यते ।
पुराणसर्पिषः पानमभ्यङ्गश्चैव पूजितः ॥
उपयोगो यद्दोक्तानां योगानान्तु विशेषतः ।
शिग्रुकट्वङ्गकिण्वं हि निम्बत्वग्समसाधितं ॥
चतुर्गुणे गवां मूत्रे तैलमभ्यञ्जने हितं ।
गोधानकुलनागानां पृषतर्च्चगवामपि ॥
पित्तेषु सिद्धन्तैलञ्च पानाभ्यङ्गेषु पूजितं ।
तीक्ष्णैरुभयतोभागैः शिरश्चापि विशोधयेत् ॥
पूजां रुद्रस्य कुर्व्वीत तद्गणानाञ्च नित्यशः ।
कुलत्थयवकोलानि शणवीजं पलङ्कषां ॥
जटिलां पञ्चमूल्यौ द्वे पथ्याञ्चोत्क्वाथ्य यत्नतः ।

वस्तमूत्रयुतं सर्पिःपिबन्तद्वातिके हितं।
काकोल्यादिप्रतीवापं सिद्धंवा प्रथमे गणे ॥
पयोमधुसितायुक्तं घृतं यत्पैत्तिके हितं।
कृष्णावचामुस्तकाद्यैर्युक्तमारग्वधादिके॥
पक्वन्तन्मूत्रवर्गेषु श्लेष्मापस्मारिणे हितं।
सुरद्रुमवचाकुष्ठसिद्धार्थव्योषहिङ्गुभिः॥
मञ्जिष्ठारजनीयुग्मसमङ्गात्रिफलाम्बुदैः।
करञ्जबीजशैरीषगिरिकर्णाङ्कुताशनैः॥
सिद्धं सिद्धार्थकं नाम सर्प्पिर्मूत्रचतुर्गुणं।
कृमिकुष्ठगरश्वासबलासविषमज्वरान्॥
सर्व्वभूतग्रहोन्मादानपस्मारांश्च नाशयेत्।
दशमूलेन्द्रवृचत्वङ्मूर्व्वाभार्गीफलत्रयैः॥
सम्याकश्रेयसीसप्तपर्णपामार्गपीलुभिः।
एतैः कल्कैश्च भूनिम्बपूतीकव्योषचित्रकैः॥
द्विवित्पाठानिशायुग्मसारिवाद्वयपौष्करैः।
कटुकामदयन्त्युग्रानीलिनीकमिशत्रुभिः॥
सर्प्पिरेभिश्च गोक्षीरदधिमूत्रसकृद्रसैः।
साधितं पञ्चगव्याख्यं सर्व्वापस्मारभूतनुत्॥
चातुर्थकक्षयश्वासानुन्मादांश्च नियच्छति।
वातिकं वस्तिभिश्चापि पैत्तिकन्तु विरेचनैः॥
कफजं वमनैर्द्धीमानपस्मारमपाचरेत्।

भार्गीशृते पचेत्क्षीरे शालितण्डुलपायसं ॥
त्र्यहं शुद्धाय तद्भोज्यं वराहायोपकल्पयेत्।
ज्ञात्वा च मधुरीभूतं तं विशस्य तदुद्धरेत्।
त्रीन्भागांस्तस्य चूर्णस्य किण्वभागेन संसृजेत्॥
मण्डोदकार्थे देयश्च भार्गीक्वाथः सुशीतलः।
शुद्धे कुम्भे निदध्याच्च सम्भारं तं सुरान्ततः॥
जातगन्धां जातरसां पाययेदातुरं भिषक्।
सिरां विध्येदथ शास्त्रां मङ्गल्यानि च धारयेत्॥

---

॥ द्विषष्टितमोऽध्यायः ॥

अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः॥
मदयन्त्युद्गता दोषा यस्मादुन्मार्गमाश्रिताः।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥
एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः।
मानसेन च दुःखेन स पञ्चविध उच्यते॥
विषाद्भवति षष्ठश्च यथास्वन्तत्र भेषजं।
सचाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च॥
मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणं।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनं॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति॥

रूक्षच्छविः परुषवाक् धमनीततो वा
श्वासातुरः कृशतनुः स्फुरिताङ्गसन्धिः ।
आस्फोटयन्पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥
तृट्स्वेददाहबहुलो बहुभुग्विनिद्र
श्छायाहिमानिलजलान्तविहारसेवी ।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च ॥
छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रचारः ।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात् ॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात् ।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यं ॥
चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यै
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा ।
गाढं क्षते मनसि च प्रियया रिरंसो
र्जायेत चोत्कटतरो मनसो विकारः ॥
चित्रं स जल्पति मनोऽनुगतं विसंज्ञो

गायत्यथो हसति रोदिति चापि मूढः ।
रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः ॥
श्यावाननो विषकृतेन भवेद्विसंज्ञः ॥
स्निग्धं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत् ।
तीक्ष्णैरुभयतोभागैः शिरसश्च विरेचनैः ।
विविधैरवपीडैश्च सर्षपस्नेहसंयुतैः ॥
शोजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत् ।
सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः ॥
सर्षपानाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा ।
दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च ॥
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः ।
भीषयेत्सततं पाशैः कशाभिर्वाथ ताडयेत् ॥
यन्त्रयित्वा सुसुप्तं वा त्रासयेत्तं तृणाग्निना ।
प्रतुदैर्दारयेच्चैनं मर्म्माघातं विवर्ज्जयेत् ॥
सापिधाने जरत्कूपे सततं वा निवासयेत् ।
त्र्यहात्त्र्यहाद्यवागूञ्च दद्यात्सक्तून् जलेनवा ॥
केवलानम्बुयुक्तान् वा कुल्माषान्वा बहुश्रुतः ।
हृद्यं यद्दीपनीयञ्च तत्पथ्यं तस्य योजयेत् ॥
विडङ्गत्रिफलामुस्तमञ्जिष्ठा दाडिमोत्पलैः ।
श्यामैलावालुकैलाभिश्चन्दनामरदारुभिः ॥
वर्हिष्ठरजनीकुष्ठपर्णिनीशारिवाकयैः ।

हरेणुकातृट्‌दन्तीवचातालीशकेशरैः ।
द्विक्षीरं साधितं सर्पिर्मालतीकुसुमैः सह ।
गुल्मकासज्वरश्वासक्षयोन्मादनिवारणं ॥
एतदेवहि सम्पक्वं जीवनीयोपसम्भृतं ।
चतुर्गुणेन दुग्धेन महाकल्याणमुच्यते ॥
अपस्मारं ग्रहं शोषं क्लैव्यं कार्श्यमवीजतां ।
घृतमेतन्निहन्त्याशु येचाद्यौ गदिता गदाः ॥
वर्हिष्ठकुष्ठमञ्जिष्ठाकटुकैलानिशाह्वयैः ।
तेनेदं त्रिफलाहिङ्गुवाजिगन्धामरद्रुमैः ॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः ।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणं ॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसां ।
ख्यातं फलघृतं स्त्रीणां वन्ध्यानाञ्चाशु गर्भदं ॥
ब्राह्मीमैन्द्रीं विडङ्गानि व्योषं हिङ्गु सुरां जटां ॥
विषघ्नीं लशुनं रास्नां विशल्यां सुरसां वचां ।
ज्योतिष्मतीं नागविन्नामनन्तामभयान्तथा ॥
सौराष्ट्रीञ्च समांशानि गजमूत्रेण पेषयेत् ।
छायाविशुष्कास्तद्वर्त्तीर्योजयेद्विधिकोविदः ॥
अवपीडेऽञ्जनेऽभ्यङ्गे नस्ये धूमे प्रलेपने ॥
उरोऽपाङ्गललाटेषु सिराश्चास्य विमोचयेत् ॥
अपस्मारक्रियाञ्चापि ग्रहोद्दिष्टाञ्च कारयेत् ।

शान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत् ॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक् ।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनं ॥
मृदुपूर्ब्बं मदेष्येवं क्रियां विद्वान् प्रयोजयेत् ।
विषजे मृदुपूर्ब्बाञ्च विषघ्नीं कारयेत्क्रियां ॥

---

॥ त्रिषष्टितमोऽध्यायः ॥

अथातोरसभेदविकल्पमध्यायं व्याख्यास्यामः ॥
दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ।
त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥
अविदग्धा विदग्धाश्च भिद्यन्तेते त्रिषष्टिधा ।
रसभेदत्रिषष्टिन्तु वीक्ष्य वीक्ष्यावचारयेत् ॥
एकैकेनानुगमनं भागशो यदुदीरितं ।
दोषाणां तत्र मतिमान् त्रिषष्टिन्तु प्रयोजयेत् ॥
यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः ।
पञ्चानुक्रमते योगानम्लश्चतुर एव च ॥
त्रींश्चानुगच्छति रसो लवणः कटुको द्वयं ।
तिक्तः कषायमन्वेति ते द्विका दश पञ्च च ॥
तद्यथा । मधुराम्लः । मधुरलवणः । मधुरतिक्तः ।
मधुरकटुकः । मधुरकषायः । एते पञ्चानुक्रान्ता मधुरेण ॥
अम्ललवणः । अम्लकटुकः । अम्लतिक्तः । अम्लकषायः ।

एते चत्वारोऽनुक्रान्ता अम्लेन ।

लवणकटुकः । लवणतिक्तः । लवणकषायः । एते त्रयोऽनुक्रान्ता लवणेन ।

कटुतिक्तः । कटुकषायः । द्वावेतावनुक्रान्तौ कटुकेन ॥
तिक्तकषाय एकएवानुक्रान्तस्तिक्तेन ।
एते पञ्चदशद्विकसंयोगाः व्याख्यातास्त्रिकं वक्ष्यामः ॥
आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति ।
षडम्लो लवणस्तस्मादूर्ध्वन्त्वेकं रसः कटुः ॥

मधुराम्ललवणः । मधुराम्लकटुकः । मधुराम्लतिक्तः । मधुराम्लकषायः ।

मधुरलवणकटकः । मधुरलवणतिक्तः । मधुरलवणकषायः । मधुरकटुकतिक्तः । मधुरकटुकषायः । मधुरतिक्तकषायः । एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते ॥

अम्ललवणकटुकः । अम्ललवणतिक्तः । अम्ललवणकषायः । अम्लकटुकषायः । अम्लकटुतिक्तः । अम्लतिक्तकषायः । एवमेषां षण्णामादावम्लः प्रयुज्यते ॥ लवणकटुतिक्तः । लवणकटुकषायः । लवणतिक्तकषायः । एवमेषां त्रयाणामादौ लवणः प्रयुज्यते । कटुतिक्तकषायः । एवमेकस्यादौ कटुकः प्रयुज्यते ॥ एवमेते त्रिकसंयोगविंशतिर्व्याख्याताः ।

चतुष्कान्वक्ष्यामः ॥ चतुष्करससंयोगान्मधुरो दश गच्छति ।
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्वेकमेव तु ॥

मधुराम्ललवणकटुकः। मधुराम्ललवणतिक्तः।
मधुराम्ललवणकषायः। मधुराम्लकटुकतिक्तः।
मधुराम्लकटुकषायः। मधुरलवणतिक्तकटुकः।
मधुराम्लतिक्तकषायः। मधुरलवणकटुतिक्तः।
मधुरलवणकटुकषायः। मधुरलवणतिक्तकषायः।
एवमेषां दशानामादौ मधुरः प्रयुज्यते॥
अम्ललवणकटुकतिक्तः। अम्ललवणकटुकषायः।
अम्ललवणतिक्तकषायः। अम्लकटुतिक्तकषायः।
एवमेषां चतुर्णामम्लः॥
लवणकटुतिक्तकषायः। एवमेकस्यादौ लवणः॥
एवमेते चतुष्करससंयोगाः पञ्चदशकीर्त्तिताः।
॥ पञ्चकान्वक्ष्यामः॥
पञ्चकान्पञ्च मधुरएकमम्लस्तु गच्छति।

मधुराम्लवणकटुतिक्तः। मधुराम्ललवणकटुकषायः। मधुराम्ललवणतिक्तकषायः। मधुराम्लकटुतिक्तकषायः। मधुरलवणकटुतिक्तकषायः।

एवमेषां पञ्चानां पञ्चकरससंयोगानामादौ मधुरः प्रयुज्यते॥

अम्ललवणकटुतिक्तकषायः। एवमेकस्यादावम्लः प्रयुज्यते।

एवमेते षट् पञ्चकसंयोगा व्याख्याताः। षट्कमेकं वक्ष्यामः॥

एकस्तु षट्कसंयोगः। मधुराम्ललवणकटुकतिक्तकषायः। एवमयमेकषट्संयोगः॥

एककैश्च षड्रसाभवन्ति । मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति ॥

भवतिचात्र ॥ एषा त्रिषष्टिर्व्याख्याता रसानां रसचिन्तकैः ।
दोषभेदे त्रिषष्टिस्तु प्रयोक्तव्या विचक्षणैः ॥

---

## ॥ चतुःषष्टितमोऽध्यायः ॥

अथातः स्वस्थवृत्तमध्यायं व्याख्यास्यामः ॥

समदोषःसमाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः सुस्थइत्यभिधीयते ॥
सूत्रस्थाने समुद्दिष्टः सुस्थो भवति यादृशः ।
तस्य यद्रक्षणं तद्धि चिकित्सायाः प्रयोजनं ॥
तस्य यद्वृत्तमुक्तं हि रक्षणं हि समासतः ।
तस्मिन्नर्थाः समासोक्ता विस्तरस्तस्य वक्ष्यते ॥
यस्मिन्यस्मिन्नृतौ ये ये दोषाः कुप्यन्ति देहिनां ।
तेषु तेषु प्रदातव्याः रसास्तेते विजानता ॥
प्रक्लिन्नत्वाच्छरीराणां वर्षासु खलु देहिनां ।
मन्देऽग्नौ कोपमायान्ति संहर्षान्मारुतादयः ॥
तस्मात्_क्लेदविशुद्ध्यर्थं दोषसंहरणायच ।
कषायतिक्तकटुकैरसैर्युक्तमथोद्रवं ॥
नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च ।
देयमन्नं नृपतये यज्जलं चोक्तमादितः ॥

तप्तावरतमम्भो वा पिबेन्मधुसमायुतं।
अह्नि मेघानिलाविष्टेऽत्यर्थशीताम्बुसङ्कुले ॥
तरुणत्वाद्विदाहञ्च गच्छन्त्योषधयस्तदा।
मतिमांस्तन्निमित्तञ्च नैव व्यायाममाचरेत् ॥
अत्यम्बुपानावश्यायग्राम्यधर्मातपांस्तथा।
भूबाष्पपरिहारार्थं शयीत च विहायसि ॥
शीते साग्नौ निवाते च गुरुप्रावरणे गृहे।
यायान्नागवधूभिश्च प्रशस्तागुरुभूषितः ॥
दिवास्वप्नमजीर्णञ्च वर्ज्जयेत्तत्र यत्नतः।
सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः॥
क्षीरेक्षुविकृतिक्षौद्रशालिमुद्गादिजाङ्गलाः।
सलिलञ्च प्रसन्नत्वात् सर्व्वमेव तदा हितं ॥
सरःस्वाप्लवनञ्चैव कमलोत्पलशालिषु।
प्रदोषे शशिनः पादाश्चन्दनञ्चानुवासनं ॥
तिक्तस्य सर्प्पिषः पानैरसृक्स्रावैश्च युक्तितः।
वर्षास्वपचितं पित्तं हरेच्चापि विरेचनैः ॥
नोपेयात्तीक्ष्णमम्लोष्णं क्षारं स्वप्नं दिवातपं।
रात्रिजागरणञ्चैव मैथुनञ्चापि वर्जयेत् ॥
स्वादुशीतजलं मद्यं शुचिस्फटिकनिर्म्मलं।
शरच्चन्द्रांशुनिर्द्धौतमगस्त्योदयनिर्विषं ॥
प्रसन्नत्वाच्च सलिलं सर्व्वमेव तदा हितं।

सचन्दनं वा कर्पूरं वासश्चामलिनं लघु ॥
भजेच्च शारदं माल्यं सौधोः पानञ्च युक्तितः ।
पित्तप्रशमनं यच्च तच्च सर्व्वं समाचरेत् ॥

हेमन्तः शीतलो रुचो मन्दसूर्य्योऽनिलाकुलः ।
ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति ॥
कोष्ठस्थः शीतसंस्पर्शादन्तःपिण्डीकृतोऽनलः ।
रसमुच्छोषयत्याशु तस्मात्स्निग्धं तदा हितं ।
हेमन्ते लवणक्षारतिक्ताम्लकटुकोत्कटं ।
सर्प्पिस्तैलमहिमसशनं हितमुच्यते ॥
तीक्ष्णान्यपि च पानानि पिवेद्गुरुभूषितः ।
तैलाभ्यक्तः सुखोष्णे च वारिकोष्ठेऽवगाहयेत् ॥
साङ्गारयाने महति कौशेयास्तरणास्तृते ।
शयीत शयने वापि वृतो गर्भगृहोदरे ।
स्त्रीःस्निग्धागुरुधूपाढ्याः पीनोरुजघनस्तनीः ॥
प्रकामञ्च निषेवेत मैथुनं तर्पितो नृपः ।
मधुरं तिक्तकटुकमम्लं लवणमेवच ॥
अन्नपानं तिलान् माषान् शाकानि च दधीनि च ।
तथेक्षुविकृतीः शालीन्सुगन्धांश्च नवानपि ॥
प्रसहानूपमांसानि क्रव्यादविलशायिनां ।
औदकानां प्लवानाञ्च पादिनाञ्चोपजायते ॥
मद्यानि च प्रसन्नानि यच्च किञ्चिद्बलप्रदं ।

कामतस्तन्निषेवेत पुष्टिमिच्छन् हिमागमे॥
एष एव विधिः कार्य्यः शिशिरे समुदाहृतः।
हेमन्ते निचितःश्लेष्मा शैत्याच्छीतशरीरिणां॥
श्रीष्ण्याद्वसन्ते कुपितः कुरुते च गदान् बहून्।
ततोऽम्लमधुरस्निग्धलवणानि गुरूणि च॥
वर्ज्जयेद्दमनादीनि कर्म्माण्यपि च कारयेत्।
षष्टिकान्नं यवान् शीतान् मुद्गान्नीवारकोद्रवान्॥
लावादिरिभ्किवरसैर्द्धाद्यूषैश्च युक्तितः।
पटोलनिम्बवार्त्ताकुतिक्तकैश्च हिमात्यये॥
सेवेन्मध्वासवारिष्टान् सीधुमाध्वीकमासवान्।
व्यायाममञ्जनं धूमं तीक्ष्णञ्च कवलग्रहं॥
सुखाम्बुना च सर्व्वार्थान् सेवेत कुसुमागमे।
तीक्ष्णरूचकटुक्षारकषायं कोष्णमद्रवं॥
यवमुद्गमधुप्रायं वसन्ते भोजनं हितं।
व्यायामोऽत्र नियुद्धाध्वशिलानिर्व्वातजो हितः।
उत्सादनं तथास्नानं वनिताः काननानि च॥
सेवेत निर्हरेच्चापि हेमन्तोपचितं कफं।
शिरोविरेकवमननिरूहकवलादिभिः॥
वर्ज्जयेन्मधुरस्निग्धदिवास्वप्नगुरुद्रवान्।
व्यायाममुष्णमायासं मैथुनञ्चातिशोषि च॥
रसांश्चाम्लगुणोद्रिक्तान् निदाघे परिवर्जयेत्।

सरांसि सरितोवापि वनानि रुचिराणि च॥
चन्दनानि परार्ध्यानि स्रजः सकमलोत्पलाः॥
तालवृन्तानिलाहारांस्तथा शीतगृहाणि च।
घर्मकाले निषेवेत वासांसि सुलघूनि च॥
शर्कराखण्डदिग्धानि सुगन्धीनि हिमानिच।
पानकानि च सेवेत मन्थांश्चापि सशर्करान्॥
भोजनं च हितं शीतं सघृतं मधुरद्रवं।
शृतेन पयसा रात्रौ शर्करामधुरेणच॥
प्रत्यग्रकुसुमाकीर्णशयने हर्म्यसंस्थिते।
शयीत चन्दनार्द्राङ्गः स्पृश्यमानोऽनिलैः सुखैः॥
तापात्यये हिता नित्यं रसा ये गुरवस्त्रयः।
पयोमांसरसाः कोष्णास्तैलानि च घृतानि च॥
बृंहणञ्चापि यत्किञ्चिदभिष्यन्दि तथैव च।
निदाघोपचितञ्चैव प्रकुप्यन्तं समीरणं॥
निहन्यादनिलघ्नेन विधिना विधिकोविदः।
नदीजलं रूक्षमुष्णमुदमन्थं तथातपं॥
व्यायामञ्च दिवास्वप्नं व्यवायञ्चात्र वर्जयेत्।
यवषष्टिकगोधूमान् शालींश्चाप्यनवांस्तथा॥
हर्म्यमध्ये निवाते च भजेच्छय्यां मृदूत्तरां।
सविषप्राणि विन्मूत्रलालानिष्ठीवनादिभिः॥
समाप्लुतं तदातोयमान्तरीक्षं विषोपमं।

वायुनाविषदुष्टेन प्राबृष्येणचदूषितं ।
तद्धि सर्वोपयोगेषु तस्मिन्काले विवर्जयेत् ॥
निरूहैर्वस्तिभिश्चान्यैस्तथान्यैर्नाहृतायहैः ।
कुपितं शमयेद्वायुं वार्षिकं वा चरेद्विधिं ॥
ऋतावृतौ य एतेन विधिना वर्त्तते नरः ।
घोराननृतुजतान् रोगान्नाप्नोति स कदाचन ॥
अत ऊर्द्धं द्वादशाशनप्रविभागान्वच्यामः ।
तत्र शीतोष्णस्निग्धरूक्षद्रवशुष्कैककालिकद्विका
लिकौषधयुक्तमात्राहीनदोषप्रशमनवृत्त्यर्थाः ।
तृष्णोष्णमददाहार्त्तान् रक्तपित्तविषातुरान् ॥
मूर्च्छार्त्तान् स्त्रीषु च क्षीणान् शीतैरन्नैरुपाचरेत् ।
कफवातामयाविष्टान् विरिक्तान् स्नेहपायिनः ॥
प्रक्लिन्नदेहांश्च नरानुष्णैरन्नैरुपाचरेत् ।
वातिकान् रूक्षदेहांश्च व्यायामोपहतांस्तथा ॥
व्यायामिनश्चापि नरान् स्निग्धैरन्नैरुपाचरेत् ।
मेदसाभिपरीतांस्तु स्थूलान्मेहातुरानपि ॥
कफाभिपन्नदेहांश्च रूक्षैरन्नैरुपाचरेत् ।
शुष्कदेहान् पिपासार्त्तान् दुर्बलानपि च द्रवैः ॥
प्रक्लिन्नकायान् व्रणिनः शुष्कैर्म्मेहितमेव च ।
एककालं भवेद्देयो दुर्ब्बलाग्निविवृद्धये ॥
समाग्नये तथाहारो देयः कालमथोभयं ।

औषधद्वेषिणे देयस्तथौषधसमायुतः ॥

मन्दाग्नये रोगिणेच मात्राहीनः प्रशस्यते।

यथार्थदत्तस्त्वाहारो दोषप्रशमनः स्मृतः ॥

अतःपरन्तु स्वस्थानां वृत्त्यर्थं सर्व्वमेवच ।

द्वादशान्नप्रविचारानेतानेव प्रचक्षते ॥

अतऊर्द्धं दशौषधकालान्वक्ष्यामः ॥

तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुर्ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः ॥

तत्र निर्भक्तं केवलमेवौषधमुपयुज्यते।

वीर्य्याधिकं भवति भेषजमन्नहीनं

हन्यात्तथामयमसंशयमाशु चैव।

तद्बालवृद्धयुवतीमृदवोऽथ पीत्वा

ग्लानिं परां समुपयान्ति बलक्षयञ्च ॥

प्राग्भक्तं नाम यत्तु प्राग्भक्तस्योपयुज्यते ।

शीघ्रं विपाकमुपयाति बलं न हिंस्या

दन्नावृतं नच मुहुर्व्वदनान्निरेति।

प्राग्भक्तसेवितमथो बलमादधाति

दद्याच्च वृद्धशिशुभीरुवराङ्गनाभ्यः ॥

अधोभक्तं नाम यद्भुक्तान्ते पीयते॥

पीतं यदन्नमुपयुज्य तदूर्द्धकाये

हन्याद्गदान् बहुविधांश्च बलं ददाति।

मध्येभक्तं नाम यन्मध्ये भक्तस्य पीयते ॥

मध्येतु पीतमुपहन्त्यविसारिभावा
द्ये मध्यदेहमभिभूय भवन्ति रोगाः।

अन्तराभक्तं नाम यदन्तरापीयते पूर्व्वापरयोर्भक्तयोः ॥

हृद्यं मनोबलकरन्त्वतिदीपनीयं
पथ्यञ्च सम्भवति चान्तरभक्तमेतत् ॥

सभक्तं नामौषधेषु यत्साध्यते भक्तं ॥

पथ्यं सभक्तमबलाबलयोर्हि नित्यं
तद्द्वेषिणामपि तथा शिशुवृद्धयोश्च।

सामुद्गं नाम यद्भक्तस्यादावन्तेच पीयते ॥

दोषे द्विधा प्रतिसृतेतु समुद्गसंज्ञ
माद्यन्तयोर्यदशनस्य निषेव्यते तु ॥

मुहुर्मुहुर्न्नाम सभक्तमभक्तं वा यदौषधं मुहुर्मुहुरुपयुज्यते ॥

श्वासे मुहुर्मुहुरतिप्रसृते च कासे
हिक्कावमीषु च वदन्त्युपयोज्यमेतत्।

ग्रासान्तरं नाम यत्पिण्डव्यामिश्रं ॥

ग्रासान्तरेषु वितरेद्दमनीयधूमान्
श्वासादिषु प्रथितदृष्टगुणांश्च लेहान् ॥

एवमेते दशौषधकालाः ॥

विसृष्टे विण्मूत्रे विशदकरणे देहेच सुलघौ
विशुद्धे चोद्गारे हृदि सुविमले वातेच सरति।

तथान्नश्रद्धायां क्षुदुपगमने कुक्षौ च शिथिले
प्रदेयस्त्वाहारो भवति भिषजा कालः स तु मतः ॥

---

पञ्चषष्टितमोऽध्यायः ॥

अथातस्तन्त्रयुक्तिनामाध्यायं व्याख्यास्यामः ॥

द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति । तद्यथा ॥ अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्द्देशउपदेशोऽपदेशः प्रदेशोऽतिदेशोऽपवर्गो वा क्यशेषोऽर्थापत्तिर्विपर्य्ययः प्रसङ्ग एकान्तोऽनेकान्तः पूर्व्वपक्षो निर्ण योऽनुमतं विधानमनागतावेक्षणमतिक्रान्तावेक्षणं संशयो व्या ख्यानं स्वसंज्ञानिर्वचनं निदर्शनं नियोगो विकल्पः समुच्चयऊह्य मिति ॥

अत्रासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते ।
वाक्ययोजनमर्थयोजनञ्च ॥ भवन्ति चात्र श्लोकाः ॥
असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनं ।
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥
व्यक्ता नोक्तास्तु ये ह्यर्था लीना ये चाप्यनिर्म्मलाः ।
लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनं ॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ॥
प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः ।
यमर्थमधिकृत्योच्यते तदधिकरणं यथा रसं दोषं वा ॥
येन वाक्यं युज्यते स योगः । यथा ।

तैलं पिवेच्चामृतवल्लिनिम्बहिंस्राभयावृचकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु हिताय नित्यङ्गलगण्डरोगी ॥
सिद्धं पिवेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूर
स्थानामपि पदानामेकीकरणं योगः ॥
योऽर्थोभिहितः सूत्रे पदे वा स पदार्थः। अपरिमिताश्च पदार्थाः ॥
यथा स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणामर्थानामुपपत्तिर्दृ
श्यते तत्र योऽर्थः पूर्व्वापरयोगसिद्धोभवति स ग्रहीतव्यो यथा ।
वेदोत्पत्तिं व्याख्यास्याम इत्युक्ते सन्दिह्यते बुद्धिः ।
कतमस्य वेदस्यायमुत्पत्तिं विवक्षुरिति । ऋग्वेदादयस्तु वेदा
स्तत्र पूर्व्वापरयोगमुपलभ्य विद विचारणे विद विन्दत्येतयोश्च धा
त्वोरनेकार्थयोः प्रयोगः पश्चात्प्रतिपत्तिर्भवति । आयुर्वेदोत्पत्ति
मयं विवक्षुरित्येवं पदार्थः ॥
यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः ॥
यथामृत्पिण्डोऽद्भिः प्रक्लिद्यते तथा माषदुग्धप्रभृतिभिर्व्रणः
प्रक्लिद्यतइति ॥
समासकथनमुद्देशः । यथा । शल्यमिति ॥
विस्तरवचनं निर्द्देशः । यथा । शारीरमागन्तुचेति ॥
एवमित्युपदेशः। यथा। तथा नजागृयाद्रात्रौ दिवास्वप्नञ्च वर्जयेत्
अनेन कारणेनेत्यपदेशः ॥ यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत
इति ।
प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः ॥

यथादेवदत्तस्थानेन शल्यमुद्धृतं तस्माद्यज्ञदत्तस्याप्ययमेवोद्धरिष्यतीति ॥

प्रकृतस्यानागतेन साधनमतिदेशः ॥

यथानेनास्य वायुरूर्द्धमुपतिष्ठते तेनोदावर्त्तः स्यादिति ॥

अभिव्याप्यापकर्षणमपवर्गः ॥

यथाऽस्वेद्या विषोपसृष्टा अन्यत्र कीटविषादिति ॥

येन पदेनानुक्तेन वाक्यं समाप्यते स वाक्यशेषः ॥

यथा शिरः पाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणमपि गम्यते पुरुष एवोक्त इति ।

यदकीर्त्तितमर्थादापद्यते सार्थापत्तिः ।

यथौदनं भक्ष्य इत्युक्तेऽर्थापन्नं भवति नायं पिपासुर्यवागूमिति ॥

यद्यत्राभिहितं तस्य प्रातिलोम्यं विपर्य्ययः ॥

यथा कृशाल्पप्राणभीरवो दुश्चिकित्स्या इत्युक्ते विपरीतं गृह्यते दृढादयः सुचिकित्स्या इति ।

प्रकरणान्तरेण समापनं प्रसङ्गः ॥

यथाप्रकारान्तरिता योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्मपुरुषश्चिकित्सायामधिकृतः ॥

सर्व्वत्र यदवधारणेनोच्यते स एकान्तः ॥

यथा त्वक्छिद्भिरेचयति मदनफलं वामयतीति ॥

क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकार्थः ॥

यथा केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं केचिद्रसं केचिद्वीर्य्यं केचिद्विपाकमिति ॥

आक्षेपपूर्व्वकः प्रश्नः पूर्व्वपक्षः ॥ यथा कथं वातनिमित्ताश्चत्वारः प्रमेहा असाध्या भवन्तीति ॥

तस्योत्तरं निर्णयः। यथा शरीरं प्रपीड्य पश्चादधोगत्वा वसामेदोमज्जानुविद्धं मूत्रं प्रसृजति वात एवमसाध्या वातजाइति।

यथाचोक्तं॥ कृत्स्नं शरीरं निःपीड्य मेदो मज्जवसायुतः।

अधःप्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः ॥

परमतमप्रतिषिद्धमनुमतं यथान्यो ब्रूयात्सप्तरसाइति।

प्रकरणानुपूर्व्याभिहितं विधानं॥

यथा सक्थिमर्म्माण्येकादश प्रकरणानुपूर्व्वाभिहितानि।

एवं वक्ष्यतीत्यनागतावेक्षणं॥

यथाश्लोकस्थाने ब्रूयाच्चिकित्सितेषु वक्ष्यामीति॥

यत्पूर्व्वमुक्तं तदतिक्रान्तावेक्षणं॥

यथाचिकित्सितेषु ब्रूयात् श्लोकस्थाने यदीरितमिति।

उभयहेतुदर्शनं संशयः। यथा तलहृदयाभिघातः प्राणहरः पाणिपादच्छेदनमप्राणहरमिति।

तन्त्रातिशयोपवर्णनं व्याख्यानं॥ यथेह पञ्चविंशतिकः पुरुषोऽत्र व्याख्यायते। अन्येष्वायुर्व्वेदतन्त्रेषु भूतादिप्रकृत्यारब्धचिन्ता।

अन्यशास्त्रासामान्याखसंज्ञा। यथा मिथुनमिति मधुसर्पिषोर्ग्रहणं॥ लोके प्रथितमुदाहरणं। यथोष्णभयाच्छीतमनुधावति॥

निश्चितं वचनं निर्व्वचनं। यथायुर्व्विद्यतेऽस्मिन्ननेनवायुर्व्विन्दतीत्यायुर्व्वेदः॥

दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनं॥ यथाग्निर्व्वायुना सहितः कोष्टे वृद्धिङ्गच्छति तथा वातपित्तकफदुष्टो व्रणइति॥

इदमेव कर्त्तव्यमिति नियोगः। यथापथ्यमेव भोक्तव्यमिति

इदञ्चेदञ्चेति समुच्चयः। यथा मांसवर्गे एणहरिणलावतित्तिरितिशारङ्गाः प्रधानमिति॥

इदञ्चेति विकल्पः। यथारसौदनः सघृता यवागूर्व्वा॥

यदनिर्दिष्टं बुद्धिमता तदूह्यं॥ यथाभिहितमन्नपानविधौ चतुर्विधञ्चान्नमुपदिश्यते।

भक्ष्यं भोज्यं लेह्यं पेयमेवञ्चतुर्व्विधं वक्तव्येद्विविधमभिहितमचोह्यमिति॥ अन्नपाने विशिष्टे द्वयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवति। किञ्चान्यत्। अन्नेन भक्ष्यमवरुद्धं तन्नसाधर्म्यात्। पेयेन लेह्यं द्रवसाधर्म्यात्। चतुर्व्विधश्चाहारः प्रायेण द्विविधः प्रसिद्धइति॥

द्वात्रिंशद्युक्तयो ह्येतास्तन्त्रसारगवेषणे।
मया सम्यग्विनिहिताः शब्दन्यायार्थसंयुताः॥
योह्येता विधिवद्वेत्ति दीपीभूतास्तु बुद्धिमान्।
स पूजार्हो भिषक् श्रेष्ठइति धन्वन्तरेर्म्मतं॥

## षट्षष्टितमोऽध्यायः ॥

अथातो दोषभेदविकल्पनामाध्यायं व्याख्यास्यामः ॥

अष्टाङ्गायुर्वेदविदं दिवोदासं महामतिं ।
छिन्नशास्त्रार्थसन्देहं सूक्ष्मागाधमिवोदधिं ॥
विश्वामित्रसुतः श्रीमान् सुश्रुतः परिपृच्छति ।
द्विषष्टिर्दोषभेदा ये पुरस्तात्परिकीर्त्तिताः ॥
कति तत्रैकशो ज्ञेया द्विशो वाप्यथवा त्रिशः ।
तस्य तद्वचनं श्रुत्वा संशयच्छिन्महातपाः ॥
प्रीतात्मा नृपशार्दूलः सुश्रुतायाह तत्वतः ।
त्रयो दोषा धातवश्च पुरीषं मूत्रमेवच ॥
देहं सन्धारयन्त्येते ह्यव्यापन्ना रसैर्हितैः ॥
पुरुषः षोडशकलः प्राणाश्चैकादशैव ये ।
रोगाणान्तु सहस्रं यच्छतं विंशतिरेवच ॥
शतञ्च पञ्च द्रव्याणां त्रिसप्तत्यधिकोत्तरं ।
व्यासतः कीर्त्तितं तद्धि भिन्नदोषास्त्रयोगुणाः ॥
द्विषष्टिधा वदन्त्येते भूयिष्ठमिति निश्चयः ।
त्रयएव पृथक् दोषा द्विशो नव समाधिकैः ॥
त्रयोदशाधिकैकद्विसममध्योल्बणैस्त्रिशः ।
पञ्चाशदेवन्तु सह भवन्ति चयमागतैः ॥
क्षीणमध्याधिकक्षीणक्षीणवृद्धैस्तथापरैः ।
द्वादशैवं समाख्यातास्त्रयो दोषा द्विषड्विधा ।

मिश्रधातुमलैर्दोषा यान्त्यसंख्येयतां पुनः ॥
तस्मात्प्रसङ्गं संयम्य दोषभेदविकल्पनैः
रोगं विदित्वोपचरेद्रसभेदैर्य्यथेरितैः ॥
भिषक् कर्त्ताथ करणं रसा दोषास्तु कारणं ।
कार्य्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा ॥
अध्यायानान्तु षट्षष्ट्या ग्रथितार्थपदक्रमं ।
एवमेतदशेषेण तन्त्रमुत्तरमृद्धिमत् ॥
स्पष्टगूढार्थविज्ञानमगाढमन्दचेतसां ।
यथाविधि यथाप्रश्नं भवतां परिकीर्त्तितं ॥

सद्योत्तरं त्वेतदधीत्य सर्व्वं ब्राह्म्य विधानेन यथोदितेन ।
न हीयतेऽर्थान्मनसोऽभ्युपेतादेतद्वचो ब्राह्ममतीव सत्यं ॥

इति सौश्रुते आयुर्व्वेदशास्त्र उत्तरस्थानं समाप्तमिति ॥

श्रीबलरामगुप्तसूनुना वैद्यवाटीनिवासिना राजकीयविद्यामन्दिरायुर्व्वेदपण्डितेन श्रीमधुसूदनगुप्तेन संशोधितः सुश्रुतस्य द्वितीयखण्डः समाप्तः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

S 964
1835-6